सि सर्व इति स्मरणात्॥ असतश्च सतश्चैव सर्वस्य प्रभवाप्ययात्॥ सर्वस्य सर्वदा ज्ञानात्सर्वमेवं प्रचक्षत इति श्री
मत्स्मरणाच्च॥ सर्वेषामभयं प्रदं ददातीति॥ वरेण्यः सर्वोत्कृष्टः॥ अनघः पापसंबंधरहितः जीवंतं लोकानां
जीवात्वान्मूत्रयति ह्लरती तिरेफलोपाज्जीमूतः जगतो विश्वस्य निर्माणं करोतीति कारयतीति वा ब्रह्मणो ति
॥ ॥आप्यायनश्चापांस्थानं चैतन्याधाराणि क्रियं॥ सप्तशीर्षाध्वरगुरोपुराणपुरुषोत्तम॥ आथायपति
ज्ञानादिति॥ आप्यमयतं पश्येति वा॥ आप्यानां लक्ष्मीकौस्तुभादीनां प्रयनमिति वा। अपामुत्पत्तिस्थाना
आपो वै नरसूनव इति स्मृतेश्च॥ ब्रह्मवादिनां वैदिकानां त्वमेव न निर्गमः॥ वेद एव द्विजातीनां निःश्रेयस

करः। पर इति स्मरणात्॥ विदितं वेद्यं ब्रह्म यैस्ते विदितवेद्याः॥ वेद्यं नमपरं पश्यमिति स्मरणात्॥ तेषां ब्रह्मसा
क्षात्कारिणां त्वमेव गतिर्गम्यः ब्रह्मज्ञानेन मुच्यत इति स्मरणात्॥ प्रपन्नास्मि जगन्नाथ कवं वाचस्पतिं प्र
भुं॥५८॥ सुब्रह्मण्य प्रनाथं त्वं वसुसेणं वसुप्रदं। महायोगबलोपेतं पृश्निगर्भं हनाद्विषां॥५९॥
जगन्नाथ कवदेव्याख्याति॥ वाचो वेदस्य वागिंद्रियस्य वा प्रवर्त्तकः। अलुक्समासः॥ प्रभवति सर्वे
भ्य इति प्रभुः॥ सुब्रह्मण्याऋत्विग्विशेषः॥ वाग्विशेषो वा वाग्वै सुब्रह्मण्या इति श्रुतेः॥ सोस्यास्तीति सु
ब्रह्मण्यः॥ सुतरां ब्रह्मण्य इति वा॥ ब्रह्मणे वेदाय चतुर्मुखाय ब्राह्मणाय वा हित इति ब्रह्मः॥ दैत्यादिभि
राधर्षयितुमशक्यः॥ वसुद्रव्यं सेनालोकसाधनोपायो यस्य इत्योन्यादेन हि भगवद्भिः सुखा जायंते॥ वसु
दीप्यमानं सेनाया अस्य पायायस्येति वा॥ आर्त विविदिषंति यज्ञेन दानेनेति श्रुतेः॥ वसु धनं प्रकर्षेण भक्ते
भ्यो ददातीति चतुर्विधा भजंते मामित्युपक्रम्य आर्तो जिज्ञासुरर्थार्थीत्यभिधानात्॥ वसूनि खुरगाणां प्र
कर्षेण द्यतिखंडयतीति वा॥ महतोऽकृत्रिमस्य योगस्य बलेन सामर्थ्येनोपेतो युक्तः॥ पश्य मे योगमै

श्वराख्यायत्रयोगीश्वरः कृष्ण इत्यादिस्मरणात्॥ छिद्रमिवाकाशो गर्भो यस्य तस्माद्वा एतस्मादात्मन
आकाशः संभूत इति श्रुतेः॥ भूतान्यर्चींषि तेजांसि सूर्यादिरूपेण तेजस्तेन त्विना महं॥ अग्नीषोमौ शिर
र्यपो॥ तेजस्त्वास्मि विभावसावित्यादिस्मरणात्॥ वासुदेवं महात्मानं पुंडरीकाक्षमच्युतं॥ सुरसु
रगुरुं देवं विभुं भूतमहेश्वरं॥ ६०॥ ॥ एकात्मूहं चतुर्व्यूहं जगत्कारणं॥ वसति सर्वभूतेषु वासयति
वात्मनि सर्वभूतानीति वासुः दीव्यति क्रीडति विजिगीषते व्यवहरति द्योतते स्तूयते कामयते ग
च्छतीति वा देवः॥ वासुश्चासौ देवश्चेति॥ सर्वत्रासौ समस्तं वसत्यत्रेति वै यतः॥ ततः स वासुदेवेति विद्वद्भि
:परिपठ्यत इति वैष्णवात्॥ महांश्चासावात्मा चेति वा॥ महत्त्वमाकाशाद्याधारतया॥ सर्वभूतेषु चात्मा
नं सर्वभूतानि चात्मनीति स्मरणात्॥ यच्चाप्नोति पदादत्ते यच्चात्ति विषयानिह यच्चास्य संततो भावस्तस्मा
दात्मेति कीर्तित इति स्मरणात्॥ हृदयपुंडरीकमश्नुते व्याप्नोतीति॥ यत्पुंडरीकं पुरमध्यसंस्थितमि
ति श्रुतेः॥ नश्चैस्तनोतीति वा॥ पुंडरीकवदक्षिणी यस्येति वा॥ पुंडरीकस्यानाहतमक्षि शिवार्चनेयेन

वसतीतिवा॥नच्यवतीत्यच्युतःषड्भावविकाररहित्यात्॥शाश्वतंशिवमच्युतमितिश्रुतेः॥नच्युतोस्मादिति
वा॥यद्गत्वानिवर्त्ततेतद्धामपरमंममेतिस्मरणात्॥सुरानसुरानसुरानसुरांश्चरणातिहितमुपदिशतीति॥
सुरासुरेभ्योगरिष्ठइतिवा॥देवमुक्तार्थंविभुर्व्यापकः॥विशेषेणानत्वस्ययोजनवशेनमत्स्यादियोनिषु
भवतीतिवा॥भूतानांपृथिव्यादीनामुत्पत्तिस्थितिलयकारित्वान्महानीश्वरः॥एकएवव्यूहोदेहा
विराट्स्वरूपोयस्यएकस्यैवव्यूहोनानादेहकल्पनापस्येतिवा॥एकोदेवसर्वभूतांतरात्माइतिश्रुतेः॥
चत्वारोवेदायुगाविवावावोहग्रहणसाधनानियस्यचतुर्वाङ्गरिति॥वासुदेवेरूढंवा॥चक्रपाणिः
श्चतुर्भुजइतिकोषात्जगत्कारणानांमहाभूतानांकारणं॥तमहंप्रपन्नास्मीतिसर्वत्रसंबंधः॥किमर्थं
प्रपन्नेत्यतआह॥ ॥ब्रूहिमेभगवन्धर्मांश्चातुर्वर्ण्यस्यशाश्वतान्॥६१॥आश्रमाचारसंयुक्तान्सरहस्या
न्ससंग्रहान्॥चतुर्णांवर्णानांसमाहारश्चातुर्वर्ण्यंतस्यकर्त्तव्यान्शाश्वतान्सर्वकालीनान्धर्मान्त्वंमे
ब्रूहि॥शाश्वतत्वेनप्रवाहानादित्वमुक्तंजिज्ञासितान्धर्मान्विशिनष्टि॥आश्रमेतिआश्रमाब्रह्मचा

रिप्रभृत्यपञ्चेरा वर्यंतेक्ति यंतहस्त्याश्रमकार्त्स्न्यासेसंयुक्ताश्रमेनान्यरहस्यमापद्धर्मोरहस्यशापञ्चिन्नंवाते
नसहितास्सरहस्यासंग्रहाः देसंदोपस्नासहितानुग्रहीतिसंबंधः॥ भगवदुत्तरमवतारयति॥ एवमु
क्तेभुदेवेशःद्रोणयाद्रोणीमभाषत॥६१॥ एवमुक्तप्रकारेणाद्रोणयासहितोदेवदेवःद्रोणींवक्ष्य
माणमभाषत॥तदाह॥ शृणुदेविधरेधर्मांश्चातुर्वर्ण्यस्यशाश्वतान्॥ आश्रमाचारसंयुक्तान्सरह
स्यान्ससंग्रहीन्॥६२॥ येनुत्वांधारयिष्यंतिसंतश्चैवांपरायणाः॥ हेधरेमदुक्तधर्मधारणसमर्थे
स्वजिज्ञासितान्वर्णाश्रमधर्मान्संततानुष्ठेयान्सापद्धर्मान्संक्षेपात्तयेसंतोविहितानुष्ठातारोनिषि
द्धवर्ज्जकाश्चत्वांधारयिष्यंतितेषांपरायणान्परमयनंस्थानं — मोक्षलक्षणंयेभ्यस्तान्अतःशृणु॥
पुनर्द्धर्मविशेषणांस्त्रश्राश्रमरोरहस्योरेकविषयताभिधानायसाधोत्तरपर्यालोचनयाऽथ्रग्रंतमपिव
र्मशद्वंषद्विधस्यात्र्धर्मपरमेवाप्रपाति॥ यथोक्तंभविष्ये॥ वर्णधर्मस्मृतस्त्वेकआश्रमाणामतःप
रं॥ वर्णाश्रमस्तृतीयस्तुगौणोनैमित्तकस्तथोपनयनेश्रूप॥ आश्रमत्वंसमाश्रित्ययोधर्मःसंप्रव

न्ते ॥ स खल्वाश्रमधर्मस्तु भिक्षादंडादिको यथा ॥ वर्णत्वमाश्रमत्वं च यो धिकृत्य प्रवर्त्तते ॥ स वर्णाश्रम
धर्मस्तु स्यान्मौञ्जी मेखला यथा ॥ यो गुणेन प्रवर्त्तेत गुणधर्मः स उच्यते ॥ यथा मूर्द्धाभिषिक्तस्य प्रजानां प्रति
पालनं ॥ निमित्तमेकमाश्रित्य यो धर्मः संप्रवर्त्तते ॥ नैमित्तिकः स विज्ञेयः प्रायश्चित्तविधिर्यथा ॥ वर्णांश्चै
वाश्रमांश्चैव प्रतिलोमानुलोमजान् ॥ अधिकृत्य प्रवर्त्तेत यः स साधारण उच्यते ॥ श्राद्धकर्म तपश्चैव सत्य
मक्रोध एव च ॥ स्वेषु दारेषु संतोषः शौचं नित्यानसूयता ॥ आत्मज्ञानं तितिक्षा च धर्मः साधारणो नृ
पेति ॥ गौणो गुणनिमित्तकः ॥ एकं वर्णत्वं ब्राह्मणत्वादि उपनयनं वसंते ब्राह्मणमुपनयीतेत्यादि
॥ भिक्षेतित्रिषु वर्णेषु बैल्वपालाशदंडानि नो पवीतानि धारयेदित्यादिः ॥ अवधानं चावधानं विना नेत्यत आह
॥ ॥ निषण्णा भव वामोरु कांचने स्मिंश्च आसने ॥ ६४ ॥ सुखासीना निबोध त्वं धर्मान्निगदतो मम ॥ सु
श्रोणि तद्धर्मश्रवणाय अस्मिन् सौवर्णे सर्वोत्कृष्टे आसने निषद्य सुखासीना भूत्वाशेषविशेषपुरस्स
रं तु वतो मम सकाशात् जिज्ञासितान् धर्मान् श्रुत्वा निबोध सम्यक् तया तु ध्यस्व ॥ ततः सा किंचका

रेत्यतआह ॥ मुमुक्षुर्वो वैलक्षणान् धर्मान्सुखी सीताप्रकाशसदा ॥ २१ ॥ तस्मिन्काले सुखासनेन
सावधानाय रामचन्द्राय ब्रह्मर्षिवसिष्ठेनाभिहितान् धर्मान्मुमुक्षुर्वै श्रवणस्मरणरूपफलोपधि
कतानावोधेनापात्मनेपदप्रयोगः ॥ ॥ इति श्रीवसिष्ठवंशावतंसश्रीमत्कौण्डिन्यनायकात्मजश्रीकेश
वनायकब्रह्मसाहितश्रीधर्माधिकारिश्रीरामपंडितात्मजनंदपंडितकृतो विष्णुस्मृतिविवृत्तौ श्री
मत्साकेशववैजयंत्यां प्रथमोध्यायः ॥ ॥ समाप्तोयं प्रथमोध्यायः ॥ ॥ श्रीबिंदुमाधवार्पणमस्तु
॥ ॥ श्रीबिंदुमाधवायनमः ॥ एवं शास्त्रोत्पत्तिनिमित्तमभिधाय भूमिजिज्ञासिताच्वर्णाश्रमधर्मान्हि
तीयाध्यायेनाह ॥ ॥ तत्रादौ वर्णानाह ॥ ॥ ॐ ब्राह्मणःक्षत्रियोवैश्यःशूद्रश्चेतिवर्णाश्चत्वारः ॥ २
॥ वक्ष्यमाणधर्माणां न्यायमूलकत्वद्योतनाय तन्मूलस्य प्रणवस्यादावुपन्यासः ॥ तेन वर्ण
वाधिकारिणांत्रैवर्णिकानामेवास्मिन्शास्त्रेधिकारोध्वनितः ॥ वक्ष्यतिचांते येद्विजावासपिष्य
तीति ॥ ब्राह्मणादयश्चत्वारो वर्णास्तेनाख्यशास्त्रेव्यवहारः तावद्वर्णपसंज्ञाकरणं च तत्प्रयोजनं च

वर्णाश्रमाणां स्वे स्वे धर्मे व्यवस्थापनमित्यादिषु स्फुटं॥ उद्देशेनैव चतुर्ष्वसिद्धावपि चतुर्ग्रहणं ब्राह्मण
क्षत्रियायामुत्पन्नः क्षत्रिय एव॥ वैश्यायामुत्पन्नो वैश्य एवेत्यादिशंखादिप्रयोगेणानुलोमानामपि वर्णसं
ज्ञापयितुं तेन च तेषां राजा राजसूयेनेत्यादिवर्णधर्मानधिकारः॥ अयोगवाग्नीणाम्बष्ठादिनादि प्राप्य
र्यः॥ यद्वा वर्णज्ञात्यनंतर्गतया वैश्यायां वर्णांतावारणायतेन च वर्णधर्मानधिकारः॥ [illegible]
हस्तिनादि [illegible] अस्येत्वनुलोमानां कथंचि
द्रूणीतमीवा द्रूणधर्मप्राप्त्या प्रतिलोमजानां तन्निहत्यर्थमित्याहुः॥ इति करणांत्रपीमार्गाणुवर्त्तितं
सैव वर्णत्वमन्यथा न ग्रत्वमिति बोधयितुं॥ यथाह विष्णुपुराणे॥ ब्राह्मणाद्याश्च ये वर्णाः स्वधर्मादन्य
तो मुखं॥ यांति ते नयसंज्ञां हि हीनकर्मस्ववस्थिता इति॥ तानेव धर्मविशेषाभिधित्सया वांतरसंज्ञ
याविभजते॥ तेषामाद्या द्विजातयः त्रयः॥ १॥ तेषां चतुर्णां वर्णानां मध्ये आद्यास्त्रयो द्विजातिर्जनन
येषां ते द्विजातयः॥ तत्कारणं च वक्ष्यति मातुरग्रेऽधिजननं द्वितीयं मौंजिबंधनं॥ अत्रास्य मातासावि

त्रीमध्यवसितिपितास्याचार्य इत्येतेभ्यो यतोऽन्येषां द्विजत्वमिति ॥ आद्यग्रहणमनन्तनिरासार्थम् शूद्र एकजातिरिति गौ-
तमीयात् ॥ द्विजातिसंज्ञाप्रयोजनमाह ॥ तेषां निषेकाद्यः श्मशानान्तो मन्त्रवत्क्रियासमूहः ॥ ३ ॥ तेषां
द्विजातीनां प्रक्रमादेव प्राप्तौ पुनस्तच्छब्दनिर्देशो द्विजानुलोमजसंग्रहार्थः ॥ शूद्रस्य शूद्रायां दासस्यैव वा ॥ शूद्रा-
द्येवंविधः कार्यो विनामन्त्रेण संस्कृत इति यमस्मरणात् ॥ निषेको गर्भाधानमाद्यो यस्य श्मशानेन सं-
क्षिप्तेन कर्मणान्तो यस्य स क्रियाणां संस्कारकर्मणां समूहः कल्पोऽपि मन्त्रवन्मन्त्राः विद्यन्ते यस्यां क्रियायां
यथा भवति तथा कार्य इति शेषः ॥ वर्णधर्मानुप्रतिजानीते ॥ ॥ तेषां स्वधर्माः ॥ ४ ॥ तेषां चतुर्णां वर्णानां
। व्यवहितपरामर्शाय पुनस्तच्छब्दः धर्मा अभ्युदयसाधनानि चकारोऽनुलोमजसंग्रहार्थः ॥ ब्राह्मणस्या-
ध्यापनं ॥ ५ ॥ षट्स्वध्यापनस्य हेतुत्वेन पाठास्येदवचनमनुचितं तथ्यस्य ॥ अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्प-
णं ॥ श्राद्धं वा पितृयज्ञः स्यात्पित्र्यो बलिरथापि वे ॥ इति काम्याध्यापनेन नमतस्यानित्यकर्मत्वाभिधानाद्धर्मत्व-
मप्यविरुद्धं ॥ तच्च ब्राह्मणस्यैव ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहा इति गौतमस्मरणात् ॥ क्षत्रि-

पदेशप्रयोगस्त्वापद्विब्राह्मणक्षत्रियोर्भवति॥आपत्कालेब्राह्मणस्याब्राह्मणाद्विद्योपयोगइतिस्मै
वस्मरणात्॥क्षत्रियस्यशस्त्रनित्यता॥६॥शस्त्राणांमंत्रप्रयोज्यानिधनुःशरादीनितेषुनित्यतातत्पर
तापुष्ट्याद्यभिसंधिंविनापि॥आहिताग्न्यादित्वात्पूर्वनिपातेननित्यशस्त्रोत्यर्थः॥अधीत्यवेदंविप्रेभ्यःक्ष
त्रियोधनुःश्रुतिं॥आददीतद्विजेभ्यश्चुतयासौक्षत्रियोभवेदितिधनुर्वेदस्मरणात्॥वैश्यस्यपशु
पालनं॥७॥पशूनांगवादीनांपालनमाहारादिदानेनपोषणंदुग्धाद्यभिसंधिंविना॥शूद्रस्यद्वि
जातिशुश्रूषा॥८॥द्विजानांब्राह्मणादीनांत्रयाणांशुश्रूषापरिचर्यावेतनाद्यभिसंधिंविनापि॥
त्रितयसाधारणंधर्ममाह॥ ॥द्विजानांयजनाध्ययने॥९॥द्विजानांब्राह्मणादीनांत्रयाणांयज
नेयागःगुरोःसकाशाद्वेदग्रहणंतेधर्मौ॥दानंतुसर्वसाधारणमस्त्वेव॥दृष्टार्थस्त्वधर्मान्वक्तुंपृथक्कृत्य
तिजानीते॥अथैतेषांवृत्तयः॥१०॥यत्तेषांब्राह्मणादीनांचतुर्णांवर्णानांवृत्तयोजीवनोपायाउच्यंते॥
ब्राह्मणस्ययाजनप्रतिग्रहौ॥११॥याजनमार्त्विज्यंप्रतिग्रहःसत्कर्मस्थत्वानुकूलोव्यापारःद्वंद्वनिर्देशा

दध्यापनमपि चतुर्थमस्त्रस्य तत्रैणाजीवनीति मानवात्॥ तेनाध्यापनमुभयरूपं॥ वक्ष्यति च॥ धर्मा
र्थौ यत्र न स्यातामिति॥ क्षत्रियस्य क्षितित्राणं॥ १२॥ क्षत्रियस्य स्वातादन्योपसर्जनतया वा क्षिते
स्तद्वासिनां भूतानां त्राणं चौरादिभयापनयेन रक्षा मारणं स्यादानं॥ क्षत्रियस्येदमन्यत्तदुपजी
वेन इत्यपेति गौतमस्मरणात्॥ कृषिगोरक्षवाणिज्यकुसीदयोनिपोनिपोषणानि वैश्यस्य
॥१३॥ कृषिः कर्षणेन सस्योत्पादनं गोरक्षः रक्षणं रक्षा तगवां रक्षा गोरक्षो गोपालनं गावः पशुमात्रो
पलक्षणं॥ पशुपाल्यं विशः स्मृतं इति योगिस्मरणात्॥ वाणिज्यं क्रयविक्रयो॥ कुसीदं वृद्ध्य
र्थं धनप्रयोगः योनिः पोषणं बीजं स्थिरबीजं॥ तस्य पोषणं रक्षणं॥ बीजानामुप्तिर्विशुद्धस्य बीजक्षेत्र
गुणस्य चेति मानवात्॥ एतानि वैश्यस्य हत्रयः॥ शूद्रस्य सर्वशिल्पानि॥ १४॥ शिल्पानि चित्रक
रणादीनि सर्वशब्देन वैश्यवृत्तीनां कृष्यादीनामपि ग्रहणं॥ यथाह देवलः॥ शूद्रधर्मो द्विजातिशुश्रू
षा कलत्रादिपोषणं कर्षणं पशुपालनं भारोद्वहनं पण्यव्यवहारश्चित्रकर्म नृत्तगीतं वेणुवीणामु

रजसृष्टं गावादत्तानीति ॥ आपद्धर्मानाह ॥ ॥ आपद्यनंतरा वृत्तिः ॥ १५ ॥ आपदि ब्राह्मणादीनां याजनादि
भिः रनिर्वाहे अनंतरा संनिहिता कनीयसी आयसी वृत्तिः ॥ यथाह वसिष्ठः अजीवंतः स्वधर्मेणानंतरां
पापीयसीं वृत्तिमातिष्ठेरन्न तु कदाचिज्ज्यायसीमिति ॥ गौतमस्तु तामथाह ॥ ॥ आपत्कल्पानुवृत्तौ
याजनाध्यापनप्रतिग्रहाः सर्वेषामिति ॥ तद्विरोधं परिहरति नारदः ॥ उत्कृष्टं चापकृष्टं च तयोः कर्म न
विद्यते ॥ मध्यमे कर्मणी हित्वा सर्वसाधारणे हि ते ॥ शूद्रब्राह्मणयोरुत्कृष्टापकृष्टे कर्मणी न स्तः ॥ परंतु
मे क्षत्रियवैश्यकर्मणी हित्वा यतस्ते सर्वसाधारणे न तस्य ब्राह्मणस्य क्षत्रियवैश्यकर्मणी भवतो न शू
द्रस्यापि वैश्यक्षत्रियकर्मणी भवतो न ब्राह्मणमिति पर्यवस्यति ॥ यतः स एवाह ॥ न कथंचन कुर्वी
त ब्राह्मणः कर्म वार्षलं ॥ वृषलः कर्म वा ब्राह्मं पतनीयं हि ते तयोरिति ॥ अनेन गौतमीयं सर्वपदं वै
वर्णिकपरमेव । तेन चैकांतरेमपि सिद्धं ॥ यथाह गौतमः ॥ न दत्ता भेदंतरवृत्तिस्तदलाभे वैश्यवृत्तिरि
एवमेव क्षत्रियस्य वैश्यवृत्तिस्तदलाभे शूद्रवृत्तिरिति ॥ तत्रोभ्यानुलोम्ये प्रातिलोम्ये वा पूर्वमनंतरा तदसं

३

वि. टी.
२७

मद्येषु कांतरानकथंचनह्यंतरेति ॥ ब्राह्मणस्य तु विशेषमाह गौतमः ॥ सर्वथा तु द्विजश्रेष्ठः कामवशो ऽरणान्त
दप्येके प्राणसंशय इति ॥ सामान्यधर्मानाह ॥ क्षमा सत्यं दमः शौचं दानमिंद्रियसंयमः ॥ अहिंसा
गुरुशुश्रूषा तीर्थानुसरणं दया ॥ १६ ॥ आर्जवं लोभशून्यत्वं देवब्राह्मणपूजनं ॥ अनभ्यसूया च त
था धर्मः सामान्य उच्यते ॥ १७ ॥ अपकारेऽपि चित्तस्याविकारः क्षमा ॥ अप्राणिपीडाकरं यथार्थवचनं
सत्यं ॥ अंतःकरणसंयमो दमः ॥ बाह्याभ्यंतरशुद्धिः शौचं प्राणिनामार्तिपरिहाराय यथाशक्त्यन्नो
दकोपाहारस्तद्वर्जनमहिंसा ॥ मातृपित्रादीनामनुमताचरणं गुरुशुश्रूषा ॥ काशीप्रयागादि
परिशीलनं तीर्थानुसरणं ॥ आपन्नभूतहितैषित्वं दया ॥ अकौटिल्यमार्जवं ॥ यथोपपन्न
द्रव्यसंतोषो लोभशून्यत्वं ॥ देवब्राह्मणयोः संमाननं तत्पूजनं ॥ परोत्कर्षासहिष्णुत्वमसूया ॥ त
द्वर्जनमनसूया तथाशब्देनानृशंस्यादीनां ग्रहणम् ॥ अयं च सर्वोऽपि प्रत्येकं संकल्पितो ब्राह्मणाद्या
चांडालमतिशयं जनयतीति साधारणधर्म उच्यते शास्त्रेषु ॥ यथाह व्यासः ॥ आनृशंस्यमहिंसा चप्र

राम
२७

स्याद्ःसंविभोगिता॥ श्राद्धकर्मातिथेयंचसत्यमक्रोधएवच॥ स्वेषुदारेषुसंतोषःशौचंनित्यानु
सूयता॥ आत्मज्ञानंतितिक्षाचधर्मःसाधारणोनृपेति॥ ॥इतिश्रीधर्माधिकारिरामपंडितात्म
जनंदपंडितकृतौश्रीमत्संवेजपंत्सा द्वितीयोध्यायः॥ ॥श्रीविंदुमाधवायनमः॥ श्रीगोपी
जनवल्लभायनमः॥ ॥अभिहिताभिवांछितवर्णाश्रमधर्माणांराजायत्ततयाऽथप्रंराजधर्मा
नेवतृतीयाध्यायेनाह॥ ॥तत्रविधानविधानायप्रतिजानीते॥ अथराजधर्माधीनत्वंद्योतयितुंध
र्मशद्वप्रयोगः॥ तथाचवाजसनेयके॥ तदेतत्क्षत्रस्यक्षत्रंयद्धर्मइति॥ प्रजापालनः॥ २॥ प्र
जाःस्वदेशवासिनोजनास्तेषांपरितःसर्वतःचौरादिभ्यःपालनमाप्यदुद्धारः॥ तत्प्रकारमा
ह॥ वर्णाश्रमाणांस्वस्वधर्मेव्यवस्थापनं॥ ३॥ वर्णाब्राह्मणादयआश्रमाब्रह्मचार्यादयस्तेषां
स्वस्वधर्मेअध्यापनपालनादौभैक्षभिक्षादानादौचविशेषेणप्रच्युततयावस्थापनंनिग्रहादि
दर्शनेनतत्परतासंपादनं॥ वर्णशद्वेनैवतन्मूलकानांसंकराणांग्रहणं॥ आश्रमशद्वेनचतन्मू

लकानोपाखंडादीनीनायंमुसंसज्यगार्हस्थ्यवान भस्यो नजायते॥ परिव्राडपि मैत्रेयसंन्यस्तः पा
पकृत्तस्ततिविष्णुपुराणात्॥ वीप्साच नेत्रस्यम यसंसिद्धप्रयोगस्यास्तस्यापि संग्रहार्था॥ यथा
हयाज्ञवल्क्यः॥ क्षेत्रेलिनेगमिपाखंडिगणानामप्ययं विधिः॥ भेदंचैषां नृपोरक्षेत्पूर्ववृत्तिं
च पालयेदिति॥ राज्ञो निवासस्थानमाह॥ ॥राजा च जांगलं पशव्यं सस्योपेतं देशमाश्रयेत्॥
॥४॥ यद्यप्यल्पोदकतृणपर्वतो देशो जांगलस्तथाप्यत्र समजलतृणपर्वत एव यो ग्राम्ययज्ञवृक्षणा
यः पशुभ्यो हितः सुरसबहुलतृणादिमत्त्वमपि पशव्यः सस्यैः वार्षिकशारदैहैमंतवासंतिकादिभिरु
पेतं तृपर्वत एव यो ग्रामव्यवहितो ग्रामनिकटपाश्रितं देशं जनपदमाश्रयेदधिवसेत्॥ वसेत्॥ वैश्यप्र
ड्प्रायंच॥५॥ वैश्यशूद्रबहुलं वकारादार्यबहुलं चयथाहमनुः॥ आर्यप्रायमनाविलमिति॥ तत्र
च तत्र महीवारिवृक्ष गिरिदुर्गाणामन्यतमं दुर्गमाश्रयेत्॥६॥ धन्वदुर्गं धन्विनामेवमंडलरूपं दु
र्गं निर्जलपर्यंतभूमिकं स्थानमित्यन्ये पुरदुर्गमन्योन्यसंश्लिष्टमानुषमंडलं॥ महीदुर्गंमिष्टामेव

ष्टकापाषाणादिनिर्मितं दुर्गमस्ये वोन्नावच्च देशात्रुचुराद्दुर्गमित्यन्ये॥ वारिदुर्गं नद्यादिजलाहेणाभयतः समेतेन दु
र्गं वृक्षदुर्गं घनतरगहनवेष्टितो भूभागः॥ गिरिदुर्गं परिमंडलगिरिवलयवेष्टितो देशः॥ गिरिशिरो भूभागो वा तत्र
क्वचिद्देशे एषामन्यतमं दुर्गमधिवसेत्॥ एकस्य राज्ञो व्यवहितानेकदेशपरिपालनं कथं शक्यमित्यत आह॥
व तत्स्वस्वग्रामाधिपान् कुर्यात्॥७॥ तत्र दुर्गे स्थितः सन् स्वस्वग्रामे प्रत्येकमेकैकस्मिन् ग्रामे अधिपान्
साधारणे पालननिपुणान् कुर्यात्॥ वा॥ तत्र दुर्गस्थ देशाध्यक्षान्॥८॥ प्रत्येकाध्यक्षसत्वेपि देशा
नां ग्रामाणामेकैकमपरमध्यक्षं कुर्यात्॥ शताध्यक्षान्॥९॥ दशाध्यक्षसद्भावेपि शतशो नग्रामाध्यक्ष
मेकैकमपरं कुर्यात्॥ देशाध्यक्षांश्च॥१०॥ शताध्यक्षेसत्यपि देशानां ग्रामसहस्राणां प्रत्येकमध्यक्षा
न् परांश्च कुर्यात्॥ चकाराद्विंशसहस्रेशयोर्ग्रहणं॥ यथाह मनुः॥ ग्रामस्याधिपतिं कुर्याद्दशग्रामा
धिपं तथा॥ विंशतीशं शतेशं च सहस्रपतिं॥ तेषां प्रयोजनमाह॥ ॥ग्रामदोषाणां ग्रामाध्यक्षः परिहा
रं कुर्यात्॥११॥ यस्य यस्य ग्रामस्य यो यो ध्यक्षः स स तत्तद्ग्रामोद्भवानां चौर्यादिदोषाणामुचिताचरणे

मि॰ टी॰
२९

नयेत्तत्परिहारं कुर्यात्॥ सोऽप्यशक्तः शतपरीहारं कुर्यात्। अशक्तोऽदशग्रामाध्यक्षायनिवेदयेत्॥१२॥ स्वयं न
ग्रामदोषपरिहारं कर्तुमशक्तो दशग्रामाध्यक्षायनिवेदयेत्सतत्परिहारं कुर्यात्॥ सोऽप्यशक्तः शताध्यक्षा
य॥१३॥ सदशाध्यक्षोऽथशक्तः स्वेकृतग्रामाध्यक्षायतद्दोषं निवेदयेत्स तं परिहरेत्॥१८॥ सोऽप्यश
क्तो देशाध्यक्षाय॥१४॥ स शताध्यक्षोऽप्यशक्तः स्वे देशाध्यक्षाय तं दोषं निवेदयेत्स तं परिहरेत्॥ अनवस्था
परिहरिति। देशाध्यक्षोऽपि सर्वात्मना दोषमुच्छिद्यात्॥१५॥ देशाध्यक्षः सर्वात्मनापि सर्वसाधनादिना तत्
ग्रामेनाग्रामप्येनापितं दोषमुधिष्ठाद्युच्छिन्नमूलमेव कुर्यान्न तु राजनि निवेदयेत्॥ यत इन्नीराह मनु
ः॥ यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः॥ अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात्॥ दशी कुलं
तु भुञ्जीत विंशी पञ्च कुलानि च॥ ग्रामं ग्रामशताध्यक्षः सहस्राधिपतिः पुरमिति॥ कुलं हलद्वयकर्षणीया
भूः हलं तु द्विगुणं कुलमिति निबन्धनात्॥ हलमानं च हारीतः॥ ॥अष्टागवं धर्महलं षड्गवं जीवितार्थि
नाम्॥ चतुर्गवं गृहस्थानां द्विगवं ब्रह्मघातिनामिति॥ स्थानं तु ल्कराजग्राह्यं पण्यविंशतिभागादि स्थलं
अत्र धर्महलमेव ग्राह्यं क्वचित् द्वितीयोऽप्य विशेषमाह॥ ॥आकरस्थुल्कतरनागवनेषु ग्रामनियुञ्जीत॥१६॥ आकरो रत्नाद्युत्प

राम
२९

शुल्कमितियावत्॥ तरस्तीर्थस्तेनघादिरनेन। तितरोनौकादिस्तं कुंभशुल्कं जलजं। शुल्कमितियावत्॥ ना
गागजाववनान्परणापानिना॥ वत्सतिवत्सतिवनानानिवा॥ नगाःपर्वताःस्तत्संबंधिनांगं॥ गिरिदुर्गमितिवा
॥ तेषांमास्वहितोपि णोनियुंजीत॥ नग्रामाध्यक्षादिमिरेवनिश्चिंतःस्यात् आकरादीनांराज्योपछंम
कतयाविश्रब्धपरिहारायोगात्॥ धर्मिष्ठान्धर्मकार्येषु॥१७॥ धर्मकार्येषुदानादिव्यापारेषुधर्मिष्ठा
न्दानादिव्यसनिनएवनियुंजीत। तेषांतद्व्यसनित्वेनतन्निपुणत्वात्॥ निपुणानर्थकार्येषु॥१८॥ अर्थ
कार्येषुसुवर्णादिपरीक्षास्तत्निपुणानेवनियुंजीत॥ यद्वा। ऊहापोहादिनाप्रयोजननिर्णयवस्तुकार्ये
षुनिपुणान्पंडितान्नियुंजीत॥ शूरान्संग्रामकर्मसु॥१९॥ ॥संग्रामस्यकर्माणिसेनागुल्मनिवेशनादी
नितेषुशूरानभीरून्नियुंजीत॥ उग्रानुग्रेषु॥२०॥ उग्रेषुताडनमारणादिषुग्रान्क्रूरान्तःकरणान्नियुंजी
त॥ षंढान्स्त्रीषु॥२१॥ षंढानपुंसकास्तान्स्त्रीरक्षणादिषुनियुंजीत॥ यथाऽऽह॥ धर्मज्ञानर्थकृत्येषुपंडिता
न्॥ क्लीबान्स्त्रीषुनियुंजीतनीचान्नीचेषुकर्मसु इति॥ राज्ञोहन्त्रिमाह॥ ॥प्रजाभ्योवल्पर्थसंवत्सरे

त्याधान्यतः षष्ठमंशमाददेत ॥२४॥ राजा यथोक्तविधिना रक्षिताभ्यः प्रजाभ्यो धान्यार्थं करस्वरूपेण तत्तदर्थसंवत्सरेण
प्रतिसंवत्सरमुत्पन्नात् धान्यात् व्रीह्यादेः षष्ठमंशं गृह्णीयात् ॥ गौतमस्तु राज्ञो बलिर्दा
नं कर्षकैर्दशममष्टमं षष्ठं वेत्याह ॥ ॥ सवकृष्टपाकभूमेरतिभोगमध्यमभोगाल्पभोगविषयो व्यवस्थितो विक
ल्पः ॥ अतिभोगे दशमांशः मध्यमभोगे ष्टमांशः ॥ अल्पभोगे षष्ठांश इति ॥ मनुस्तु धान्यानामष्टमो भा
गः षष्ठो द्वादश एव वेत्याह ॥ ॥ तत्रापि पूर्ववद्व्यवस्था ॥ तथा दशमद्वादशयोरपि ॥ सर्वसस्येष्वयं ॥२३॥
सस्यानि वार्षिकाणि शरत्कालादीनि तेभ्योऽपि सर्वेभ्यः षष्ठमंशमाददीत ॥ एवं मितेर्देशस्यान्तरीय विक
ल्पनिरासार्थः ॥ द्विकं शतं पशुहिरण्येभ्यो वस्त्रेभ्यः ॥२६॥ पशूपजीविनां पशुभ्यो हिरण्योपजीविनां हिरण्ये
भ्यो वस्त्रोपजीविनां वस्त्रेभ्यश्च राजा प्रतिसंवत्सरं द्विकं शतमाददीत ॥ द्वावृपादीयते येन यस्मिन् शतेन
द्विकं शतं तदस्मिन् वृद्ध्याय लाभशुल्कोपदा दीयत इति कन् ॥ पशुहिरण्यवस्त्रोपजीविभ्यः पशुहिरण्यवस्त्र
द्रव्यस्तु पदमाददीत ॥ मांसमधुघृतौषधिगन्धपुष्पमूलफलपत्रसदारुपत्राजिनमृद्भाण्डाश्मभाण्डवैदलेभ्य
ः षड्भागं ॥२५॥ मांसं छागादेर्मधुक्षौद्रं घृतं सर्पिः औषधयो गुडूच्यादयो गंधाश्चंदनादयः पुष्पाणि चंपकादी

र्नन मूलानि मूलानि हरिद्रादीनि रसालवणादीरोदारूणि काष्ठानि पत्राणि ताडीपत्रादीनि अजिनानि रूष्णाजिन
दीनि छड्डांडानि घटादीनि अभ्रभांडानि मणिपात्रादीनि वैदलानि वंशविदलाकृतानि शूर्पादीनि तेभ्यः षाष्ठभा
गं षष्ठः सचासौभागश्चेति षाष्ठभागस्तं राजा शुल्करूपमाददीत ॥ प्रतिसंवत्सरमित्यत्राप्यनुवर्तते ॥ यत्किंचिद
पि वर्षस्यदापयेत्कर संज्ञितं ॥ व्यवहारेणजीवंतं राजाराष्ट्रेपृथग्जनमितिमनुस्मरणात् ॥ यत्तु षाण्मषष्ठितमइ
ति हरदत्तस्तत्र ॥ आददीताथषड्भागं द्रुमांसमधुसर्पिषां ॥ गंधौषधिरसानांच पुष्पमूलफलस्य च ॥ पत्र
शाकतृणानांच वैदलानामजिनस्य च ॥ मृन्मयानां तु भांडानां सर्वस्याश्ममयस्य चेति मनुविरोधात् ॥ पूर्वोक्त
स्य क्वचिदपवादमाह ॥ ॥ ब्राह्मणेभ्यः करादानं न कुर्यात् ॥ २६ ॥ ब्राह्मणेभ्यः कर्षकेभ्यो व्यवहर्तृभ्यश्च पू
र्वोक्तं करादानं न कुर्यात् ॥ परं तु श्रो चिदपवादमाह ॥ ॥ ब्राह्मणेभ्यः करादानं न कुर्यात् ॥ २६ ॥ ब्राह्मणेभ्यः कर्ष
केभ्यो व्यवहर्तृभ्यश्च पूर्वोक्तं करादानं न कुर्यात् ॥ परंतु श्रोत्रियेभ्यः ॥ ॥ म्रियमाणोप्याददीत न राजा श्रोत्रियात्क
रमिति मानवात् ॥ तत्र हेतुमाह ॥ ॥ ते हि राज्ञो धर्मकराः ॥ २७ ॥ ते हि श्रोत्रिया ब्राह्मणाः करविषये राज्ञो ध

धर्मसवनिजाचारसंपन्नं कृत्स्नेन दहति समस्तकरादिना शोधात् ॥ यथाह मनुः ॥ सारक्षमाणो राज्ञा यं कुरुते धर्ममन्वहं
॥ तेनायुर्वर्द्धते राज्ञो द्रविणं राष्ट्रमेव चेति ॥ ननु करग्रहणस्य दृष्टार्थत्वेनाप्यतो हि त्रिसंभवेन दंडनावश्यकमित्य
त आह ॥ ॥ राजा च प्रजाभ्यः सुकृतदुष्कृतयोः षड्भागभाक् ॥ २८ ॥ करग्रहणेन रक्षिताभ्यः प्रजाभ्यो यामुत्रा
निपुण्यानि तदग्रहणेनारक्षिताभ्यो यानि पापानि तेभ्यो राजा षड्भागभनते ॥ तच्छब्दः शासनस्य दृष्टांतरं प्राप्नो
तीत्यर्थः ॥ ननु तदेव शास्त्रफलं प्रयोक्तरि इति न्यायविरोधात् ॥ पुण्यात्षड्भागमादत्ते न्यायेन परिपालय
न् ॥ अधर्मादपि षड्भागो भवत्यस्य ह्यरक्षत इति योगियनुस्मरणात् ॥ यत्र रक्ष्यमाणाः कुर्वंति यत्किंचित्
किल्बिषं प्रजाः ॥ तस्मात्तु नृपतेरर्द्धं यस्माद्गृह्णात्यसौ करान् इति योगिस्मारणांतदरक्ष्यमाणा इति शातवाक्य
संतारकष्टोऽस्त्रसंसत्तदुःकृतपरां ॥ तस्मात्करादानं दृष्टार्थत्वेनावश्यकं ॥ ॥ एवं वार्षिककरमभिधायेदानीं
प्रतिप्रायोगिकं तमाह ॥ ॥ स्वदेशपण्याच्च शुल्कांशं दशधममादद्यात् ॥ २९ ॥ यत्पण्यं स्वदेश एव क्रीत्वा विक्री
यते वणिग्भिस्तस्मात्पण्याद्राजा दशमं शुल्कांशं शुल्करूपोंशः शुल्कांशः स्तमादद्यात् ॥ परपण्यस्य दशममंशं

शुल्कं गृह्णीयादित्यर्थः॥ परदेशपण्याच्च विंशतितमं॥ इणायस्य पण्यं देशान्तरे क्रीत्वा देशान्तरे विक्रीयते तस्माद्विंशतितमं भागं शुल्कं दद्यात्॥ पण्यस्यापि विंशांशं शुल्कं गृह्णीयादित्यर्थः॥ यद्यप्यत्र वाक्यद्वयेपि पण्यस्यैव दशमविंशतितमौ भागौ शुल्कांशः प्रतीयेत। तथापि देशकालानुरूपेणाभियुक्तेन तस्य पण्यमूल्यस्येति ज्ञेयं॥ शुल्कस्थानेषु कुशलाः सर्वपण्यविचक्षणाः॥ कुर्युरर्घं यथापण्यं ततो विंशं नृपो हरेदिति मानवात्॥ सामुद्रपण्ये शुल्के तु विशेषो बौधायनीयः॥ सामुद्रः शुल्को वररूपमुद्धृत्य दशपणं शतमन्येषामपि सारानुरूपमुद्धृत्य धर्म्यं प्रकल्पयेदिति॥ सामुद्रः समुद्रसंबंधी॥ वररूपमुद्धृत्य दशपणं शतमिति॥ श्रेष्ठं मुक्ताफलादि पुनर्मध्ये एकं वस्तु पृथक्कृत्वान्यत्र वस्तुनि दशमं अंशं शुल्कं गृह्णीयादित्यर्थः॥ शुल्कप्रसंगादाह॥ शुल्कस्थानादपाक्रामन्सर्वापहारमाप्नुयात्॥ २१॥ शुल्कस्य ग्रहणस्थानं हट्टघट्टादि तस्माच्छुल्कदानभियापक्रामन्नपसरन्नन्यमार्गेण गच्छन्वाणिक् सर्वपण्यापहारमाप्नुयात॥ तस्य सर्वपण्यमपहार्यमित्यर्थः॥ २२॥ इदं च राजयोग्यराजप्रतिषिद्धपण्यविषयं॥ यथाह मनुः॥ राज्ञः प्रख्यातभाण्डानि प्रतिषिद्धानि

लिचनानि निर्हरतो लोभात्सर्वापहारं हरेन्नृप इति ॥ अन्यत्रतु । शुल्कस्थानं परिहरन्नकाले क्रयविक्रयी ॥
मिथ्यावादी च संख्याने दाप्योऽष्टगुणमत्ययमिति मानवं द्रष्टव्यं ॥ मासिकं करमाह ॥ ॥ शिल्पिनः कर्मजी
विनश्च मासेनैकं राज्ञः कर्म कुर्युः ॥ २१ ॥ शिल्पिनो लोहकारादयः कर्मोपजीविनः कारवो वर्द्धक्यादयः पश्वकार
द्योपजीविनः ॥ एतेच स्वमासेन प्रतिमासमेकमेकाहं साध्यं लोहकाष्ठादिकर्म कुर्युः ॥ सएव तेषां करः ॥
॥ यथाह मनुः ॥ कारुकाञ्छिल्पिनश्चैव शूद्रांश्चात्मोपजीविनः ॥ एकैकं कारयेत्कर्म मासि मासि मही
पतिः ॥ गौतमोपि ॥ एतेनात्मोपजीविनो व्याख्याता नौचक्रवन्तश्चेति ॥ आत्मोपजीविनः शारीरकष्टको
रिणो नौवन्तो नाविकाश्चक्रवन्तः शाकटिकाः ॥ राजकर्मकरेभ्यो राज्ञा न किंचिद्देयमेव ॥ यथा
ह स एव ॥ भक्तं तेभ्यो दद्यादिति ॥ वणिजां विशेषमाह स एव ॥ पण्यं वणिग्भिरर्घापचयेन देयमिति ॥ इ
दं च शुल्कादधिकं ॥ तदाह बृहस्पतिः ॥ शुल्कं दद्युः स्वतो मासमेकैकं पण्यमेव च ॥ अर्घापचयं च मूल्येन वणि
जस्त्वेष्टथक्रयगा इति ॥ अर्घापचयं न्यूनमूल्यमल्पद्रव्यं ॥ न्यूनलाभं वा पशुक्रयजातेन । परिपालनं तत्संगत्याह

॥ ॥स्वाम्यमात्यदुर्गकोशदंडराष्ट्रमित्राणिप्रकृतयः॥३३॥स्वामीराजाअमात्यामंत्रिपुरोहितादयः॥दुर्गंप्रवी
कं धन्वादिकोशोधननिचयःदंडोहस्त्यश्वादियुक्तंबलंराष्ट्रंप्रजानिवेशोमित्राणिसहजप्राकृतकृत्रिमाणि
एतान्यभिहिताभिधित्सितराजधर्माणांप्रकृतयोमूलकारणानि॥तद्दूषकांश्चहन्यात्॥३४॥तासांप्रकृ
तीनांस्वाम्यादीनांयेदूषकाकार्याद्यमतापादकदोषासंजकाशत्रुचारादयस्तान्हन्यात्॥स्वराष्ट्रपरश
ष्ट्रयोश्चचार॥श्चद्रूक्ःस्यात्॥३५॥स्वराष्ट्रंस्वाज्ञावशवर्तीदेशःस्तथापरेषांशत्रूणांचयद्राष्ट्रंचक
रान्मित्रोदासीनराष्ट्रयोश्चचारास्वशाएवचद्रूक्षीयस्यतथास्यात्॥चारैःसर्वराष्ट्रवृत्तंजानीयादि
त्यर्थः॥तत्रस्वराष्ट्रवृत्तेज्ञानप्रयोजनमाह॥ ॥साधूनांपूजनंकुर्यात्॥३६॥साधूनांसुवृत्तानांपू
जनंकुवस्त्राश्वादिदानेनसम्मानंकुर्यात्॥दुष्टांश्चहन्यात्॥३७॥दुष्टान्दुर्वृत्तान्हन्यादपराधानुसा
रेण॥अथपरराष्ट्रवृत्तज्ञानप्रयोजनमाहशत्रुमित्रोदासीनमध्यमेषुसामभेदानदानदंडान्यथार्हंयथाकं

तं प्रयुंजीत ॥ २८ ॥ शत्रुर्द्वेष्टा मित्रं सुहृत् उदासीन उभयविलक्षणः मध्यमः शत्रुविजिगीषुमध्यवर्ती स्वप
ःतां ख्यातं येणीश्वरः ॥ अरिर्मित्रमुदासीनोनन्तरस्तत्परः परइति ॥ अनंतरोरिः तस्य परो मित्रं तत्पर उदासीन
ः अन्यत्रापि ॥ अरेश्च विजिगीषोश्च मध्यमो भूम्यनंतरइति ॥ तेषु प्रतिदिशमवस्थितेषु द्वादशस्वपि य
थार्हं अरयो यथा प्रमतिक्रम्य यथाकालं स्वशत्रून् पञ्चयायचपाद्यनतिक्रमेण सामादीन् प्रयुंजीत ॥ तत्र सा
म प्रियवाक्यं भेदस्तु सामंतादीनामन्योन्यं वैरोत्पादनं दानं धनं अजादेः ॥ दंडो धनापहारादिर्वधांतः प्रकाशो
प्रकाशश्चेति ॥ तद्यथा ॥ हीनो दंडेन समः समसाम्नाधिको दानेनाधिकान्तरो भेदेन साधनीय इति ॥ यद्वा
शत्रुर्दंडेन मित्रं साम्ना उदासीनो दानेन मध्यमो भेदेनेति ॥ सामादिप्रयोगाणां फलमाह ॥ संधिविग्रहय
नासनसंश्रयद्वैधीभावांश्च यथाकालमाश्रयेत ॥ ३९ ॥ संधिर्व्यवस्था ॥ करणां विग्रहोपकारकरणां यानमभि
प्रतिपात्रा ॥ आसनमुपेक्षा ॥ संश्रयो बलवदाश्रयणं ॥ द्वैधीभावः स्वबलस्य द्विधाकरणमेनासंधिविग्र
हृतीन् गुणान् यथाकालं यथावद्देशकालशक्तिमित्राद्यनतिक्रमेणाश्रयेत ॥ एषां च देशकालस्वरूपादि

भेदामानलेऽङ्गष्टव्या॥ तत्रसामफलंसंधि॥ दंडफलंविग्रह॥ भेदफलंयानं॥ आसनेसंश्रयद्वैधीभावौ॥ दानफलमि
तिविवेकः॥ तत्रयानकालमाह॥ ॥चैत्रेमार्गशीर्षेवायात्रांयायात्॥४०॥ सास्मिन्पौर्णमासीतिसंज्ञा
यांमित्यनुशासनेनचैत्रीमार्गशीर्षीपौर्णमासीसंबंधाद्दर्शपूर्णिमांतोहिविधोपिमासोगृह्यते॥ वाशब्दा
त्फाल्गुनोपि॥ यथाहमनुः॥ मार्गशीर्षेशुभेमासियायाद्यात्रांमहीपतिः॥ फाल्गुनंवाथचैत्रंवामासौप्र
तियथाबलमिति॥ तस्मिन्यात्रांयायादेतयापुनराधेयमस्मिन्नयेस्पष्टेनिवहप्रत्ययमात्रार्थविवक्षया
प्रयोगः॥ तेषांनातिशीतोष्णतयासमजलान्नतयाचसुखदत्वात्॥ नैमित्तिककालांतरमाह॥ ॥
परस्यव्यसनेवा॥४१॥ परस्यशत्रोर्व्यसनंधनबलमित्रादिनाशोवाशब्दोनात्मनोधनबलमित्रादिपो
षणस्यदृष्टचन॥ तस्मिन्यात्रांयायात्॥ तदाहमनुः अन्येष्वपिचकालेषुयदापश्येद्ध्रुवंजयम्॥ तदायाया
द्विगृह्यैवव्यसनेचोत्थितेरिपोरिति॥ यानफलेविशेषमाह॥ परदेशावाप्तौतद्देशधर्मानोच्छिंद्यात्
४२॥ परेषांशत्रूणांयोदेशोराष्ट्रंतस्यावाप्तौस्ववशीभावेतस्यदेशस्यदेशस्यधर्मानाचारादान्नोच्छिं

घातः॥४२॥ परेषां शत्रूणां यो देशो राष्ट्रं तस्मात् प्राप्तो स्ववशीभावेन स्वदेशस्य धर्मान् आचारादीन् नोच्छिंद्या
त्॥ नाचारांतरप्रवर्तनेन पुरा वर्तयेत्॥ न समूलं वा लुंपेत्॥ यथाह योगीश्वरः॥ यस्मिन्देशे य आचा
रो व्यवहारः कुलस्थितिः। तथैव परिपाल्योसौ यदा वशमुपागतः इति। तृप्यदेनैव देशप्राप्तोपुनर्देश
पदोपायानं संनिहितानां निपरामर्शेनम वारणाय। ततश्चावाशिधर्माणामुपरुध्यारिमासीत
राष्ट्रस्योपपीडयेत्॥ इष्टये चात्मसनेतं पवसान्नोदकेंधन मित्रादीनां तदवामावच्छेदो नि
रस्तः॥ आसन्नादिफले विशेषमाह॥ ॥परेणाभियुक्तस्य सर्वात्मना स्वं राष्ट्रं गोपायेत्॥४३॥ आ
सन्नादिषु त्रिषु यथाक्रमं विस्वराष्ट्रे रक्षणमेव फलं। तत्र शत्रुणाभियुक्तस्यास्कंदितस्य तदा स्वराष्ट्रं
सर्वेणात्मबलकोशादिना ततश्चात्मनास्वशरीरेणापि तोपायैर्द्वद्वेन॥ तच्चात्मनारक्षणोप्रधानवि
रोधपर्वेतिक्रमधर्मइत्यत आह॥ ॥नास्ति राज्ञां समरे मनुष्याणां मरणे दोषो धर्मः॥४४॥ श्रुवेष्टिना
येन यज्ञानां त्रियाणां नया पार्थिवानामेव समरे संग्रामे यः ननुष्यागेमरणं न तुल्योन्योधर्मोनास्ति

॥तेनेनतुल्यागोनराद्युरक्षणोधर्मद्वयलाभेःनाप्रासंगिकमाह॥ ॥गोब्राह्मणनृपमित्रधनदारजीवित
रक्षणाद्येहतास्तेस्वर्गलोकभाजः॥४५॥गोब्राह्मणोजातिमात्रेणनृपोधार्मिकःप्रजापालकोमि
त्रस्योपकारकःसुहृत्धनंजीवनसाधनंदाराधर्मापत्यसाधनानिस्त्रियोजीवितंप्राणाएतेषांरक्षणाद्धे
तो।येहताप्रतिपन्नैस्तेस्वर्गलोकंभजंतिरदंचयुद्धंविनाप्ययुद्धधर्मिणांफलोपदर्शनेनकाम्यम
रणांतरमुपदिश्यते॥अन्यथायुद्धमात्रस्यैवस्वर्गफलनयाविशेषवचनानर्थक्यात्॥अतएवस्मृ
:॥शस्त्रंद्विजातिभिर्ग्राह्यंधर्मोयत्रोपरुध्यते॥द्विजातीनांचवर्णानांविप्लवेकालकारिते॥आत्मनश्चप
रित्राणेदक्षिणानांचसंगरे॥स्त्रीविप्राभ्युपपत्तौचघ्नन्धर्मेणनदुष्यतीति॥वर्णसंकररक्षणार्थंच॥
४६॥परदाराभिमर्शनेनजायमानवर्णसंघट्टनंवर्णानांतदर्थमपियेहतावंदिग्राहजारादिभिस्ते
पिस्वर्गलोकभाजोभवंति॥अतएवाहमनुः॥परदाराभिमर्शेषुप्रवृत्तान्नॄन्महीपतिः॥उद्वेजनकरैर्दं
डैश्छिह्नयित्वाप्रवासयेत्॥वधोवर्णसंसर्गोवाब्राह्मणवैश्योश्रमादीनांद्वित्रिपस्तुतत्रि

त्यमेवरक्षणाधिकारादिति॥ पूर्वं दासदानां आगतस्य रक्षणमुक्तमत्र त्वनुवर्त्य संकरानरक्षणमिति भेदः॥ या
न फलएवविशेषान्तरमाह॥ ॥राजा परपुरावाप्तो तत्र तत्कुलीनमभिषिंचेत्॥४७॥ यदारिपुहनना
दिना दिना तत्पुरमवाप्नोति राजा तदा तत्रारिपुरे तस्यैव राज्ञः कुलीनं कुलसंभूतमभिषिंचेत्॥ तत्स्वंमे
यदि स्वचिकीर्षितं विख्याप्य समयं करोति सर्वेषां तु विदित्वैषां समासेन चिकीर्षितं स्थापयेत्तत्र तद्वं
श्यं कुर्याच्च समयक्रियामिति मानवात्॥ किंच॥ न राजकुलमुच्छिद्यात्॥४८॥ तज्जः कुलसंततिं नो
च्छिद्यात् न हन्यात्॥ किंतु वंश्यं कुर्यात्॥ कचित्तदेपवादमाह॥ ॥अन्यत्राकुलीनराजकुलात्॥४९॥
अकुलीना राजकुलानुत्पन्नाः राज्ञः सेवकादयो वा केवलभाग्योदयेन ये राजानस्तत्कुलादन्यत्र तत्कुलं
तूच्छिद्यादेवेत्यर्थः॥ यथा वक्ष्यति ये वाकुलीना राज्यमभिकामयेयुरिति ता हन्यादिति वक्ष्यते॥ मृगयापान
स्त्रीपानाभिरतिं परिहरेत्॥५०॥ मृगया आखेटकं अक्षाः द्यूतं स्त्रियो मैथुने पानं मद्यादेरिदमन्यादेषामप्य
मप्युपलक्षणं॥ यथाह मनुः॥ मृगयाक्षादिवास्वापः परीवादः स्त्रियो मदः॥ तौर्यत्रिकं वृथाघावकाम

ज्ञोदशको गण इति॥ वस्तुद्वयपरिगणनं तु तेषां कष्टतमत्वमभिप्रेत्य॥ यथाह मनुः॥ पानमक्षाः स्त्रियश्चै
व मृगया च यथाक्रमं॥ एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे इति॥ कष्टतरमत्येताभिरतिजनकत्वेन दु
ष्परिहरमनयोरेव॥ तेष्वभिरतिमप्रासक्तिमेव परिहरेत्॥ वाक्पारुष्यं दंडपारुष्ये च॥ ५१॥ वाक्पारुष्यं परुष
भाषणं दंडपारुष्यं निर्दयप्रहरणं ते उभे परिहरेत्॥ नार्थदूषणं कुर्यात्॥ ५२॥ अर्थस्य सुवर्णादे
र्दूषणं वृथा व्ययमेवं न कुर्यात्॥ इदमप्यन्येषामप्युपलक्षणं॥ यथाह मनुः॥ पैशून्यं साहसं द्रोह ई
र्ष्यासूयार्थदूषणं॥ वाग्दंडजं च पारुष्यं क्रोधजोपि गणोष्टक इति॥ त्रितयपरिगणनं तु पूर्ववदेव॥ यथाह
मनुः॥ दंडस्य पातनं चैव वाक्पारुष्यार्थदूषणे॥ क्रोधजेपि गणे विद्यात्कष्टमेतत्त्रिकं सदेति॥
आयद्वाराणि नोच्छिंद्यात्॥ ५३॥ स्वपुरे परपुरे दुर्गेषु वा आयद्वाराणि पूर्वराजदत्तानि करणगोपु
रादीनि नोच्छिंद्यात् न परावर्त्तयेत् लुंपेद्वा॥ यद्यायादिषु ह्वानि भवेयुः॥ नापात्रव्यास्यात्॥ ५४॥ अपात्रे
षु नटभटवंदिचारणमागधादिषु धनवर्षणशीलो न स्यात्॥ धूर्त्तैर्वंदिनिमित्रैश्च कुर्वीत कुतवेशटे॥

वि·टी·
३६

॥नटचारणमल्लेषु दत्तं भवति निष्फलमिति दत्तस्मरणात्॥ तान्विल्पनिषेधादान्तरं स्थापयत्किंचिद्दद्यात्
॥उत्तरविवरणेऽपि ददभारमते॥ आकरे ममा सर्वमाददद्यात्॥५५॥ आकराः सुवर्णरत्नाद्युत्पत्तिस्थानानि तेभ्यो
यदुत्पन्नं तत्सर्वं स्वयमाददद्यात्॥ न तत्र विप्राद्यंशकल्पनाविधो विशेषमाह॥ ॥निधिलब्धान्तर्द्द्व्यास्तरो
भ्यो ददद्यात्॥५६॥ अज्ञातस्वामिकं भूमौ चिरनिखातं धनं निधिस्तं लब्धा राजा ब्राह्मणेभ्यः स्व दद्यादद्यात्
॥अर्द्धमित्यनेनैवाभिप्रेतः षड्भागः यस्य सुवर्णादेः स्वीकरणं संभवति न स्वे वदानमाच षष्ठे न मूल्यादिकल्प
नयारत्नहीरकादेरपीति॥ मनुः॥ निधीनां हि पुराणानां धातूनामेव च क्षितौ॥ अर्द्धभाग्रक्षणाद्राजा भू
मेरधिपतिर्हि सः॥ इति न धातूनामेवैते स्यु वदार्पयुक्तं वान्॥ ॥ द्वितीयमर्द्धं कोशे प्रवेशयेत्॥५७॥
लब्धस्य निधेरर्द्धं ब्राह्मणेभ्यो दत्तमिति द्वितीयमर्द्धं राजा स्वकोशे प्रवेशयेत्॥ स्थापयेत्॥ अर्द्धं ब्रा
ह्मणेभ्यो दद्यादित्यनेनैवार्द्धमभिप्रेतं प्रथक्सूत्रकरणं कोशप्रवेशमात्रविधानार्थं॥ न तद्
नीमेव न द्वयोर्नैत्येवमर्थं॥ अत एव प्रस्तागते स्वामिनिरूपसंख्यादिभिर्विभावितो सोऽपत्य प्रणी

राम
३६

यद्दत्तिवक्ष्यति ॥ निधिं ब्राह्मणो लब्ध्वा सर्वमादद्यात् ॥ ५८ ॥ पूर्वोक्तं निधिं ब्राह्मणो लब्ध्वा सर्वमेवा
दद्यादन्यो न दद्यात् ॥ षट्कर्माभिरतश्चेत् ॥ यथाह वसिष्ठः ॥ ब्राह्मणश्चेदधिगच्छेत् षट्कर्मसु वर्त
मानो न राज्ञा हरेदिति ॥ क्षत्रियश्चतुर्थमंशं राज्ञे दद्यात् चतुर्थांशं ब्राह्मणेभ्योर्द्धमादद्यात् ॥ ५९ ॥ क्षत्रिय
श्चेत्पूर्वोक्तं निधिं लभेत तदा तं चतुर्द्धा विभज्यैकं चतुर्थांशं राज्ञे प्रदद्याच्छेषो निधिरं चतुर्थांशं ब्राह्मणेभ्यो द
द्यादवशिष्टमर्द्धं स्वयमादद्यात् ॥ वैश्यस्तु चतुर्थमंशं राज्ञे दद्यात् ब्राह्मणेभ्योर्द्धं चतुर्थमंशमादद्या
त् ॥ ६० ॥ यदि वैश्यो निधिं लभेत तदा तं चतुर्द्धा विभज्यैकमंशं राज्ञे अंशद्वयं ब्राह्मणेभ्यो दत्वावशिष्टं च
तुर्थांशं स्वयमादद्यात् ॥ शूद्रश्चावाप्तं द्वादशधा विभज्य पंचांशान् राज्ञे दद्यात् पंचांशान् ब्राह्मणेभ्यो
ंशद्वयमादद्यात् ॥ ६१ ॥ यदि शूद्रो निधिं लभेत तदा तं द्वादशधा विभज्य पंचांशान् राज्ञे पंचांशान् ब्राह्मणे
भ्यश्च दत्वावशिष्टमंशद्वयं स्वयमादद्यात् ॥ परेणाप्रज्ञाप्यमानं चिरं यो धिगच्छेत् ज्ञात्वा तद्धरेदधिगंत्रे ष
ष्ठमंशं प्रदापयेदिति वशिष्ठे ऽन्य ब्राह्मणोप्याख्यातापि षष्ठमंशं लभेतेति गौतमीयेव यच्च द्वावा ब्राह्मणाः शद्वोम्भ

परावेवव्याख्यातौ ॥ यत्त्वितरेणानिधौ लब्धे राज्ञा षड्भागः शमाहरेदिति योगीश्वरवाक्ये इतरशब्दो विद्वद्ब्रा
ह्मणक्षत्रियादिपरो व्याख्यातो मितास्तरायां तत्रन्नियवेश्यविषयकोऽनद्वचनद्वयादर्शननिबंधनमि
ति मंतव्यं ॥ यत्त्वपरार्केणेतरशब्दो विद्वद्ब्राह्मणमात्रपरो मितिमिरंगरदत्तादिब्राह्मणपरतया
कथं चित्साधु ॥ गोमूल्यकात्यायनोक्तास्तथाकारुकुशीलवान ॥ श्रेष्ठान्नप्रवृत्तिकांश्चैव विश्वा
सभृद्वन्दावरेदिति वचनात् ॥ प्रतिवेदितसूक्ष्मसर्वमपहरेत् ॥ ३४ ॥ यद्यपि गंत्राराज्ञेन
विवेदितो निधिरथ च विज्ञातः कथं चित्राजा तदा तस्य निधेः सर्वमपहरेद्दक्षिणानां च सारानुसारे
ण दण्डनीयः ॥ यथाह योगीश्वरः ॥ अनिवेदितविज्ञातो दाप्यस्तं दण्डमेव चेति ॥ ३५ ॥ अनिवेदित इति
कर्तरि निष्ठा यः कश्चिद्विहितस्थाराज्ञे न निवेदितवान् विज्ञातश्च निधिरधिगंतत्वेन राज्ञा तस्य स
र्वं निधिधनं चापहरेत् ॥ शूद्रो विष्णिवा यत्कुलो भजानां माहसमानधर्मत्वात्क्षत्रियादिवद्वेदानि
र्णयः ॥ प्रातिलोमजानां शूद्रस्य धर्मत्वान्मूद्रवदिति विज्ञानेश्वरस्वामिकेत्वाह ॥ स्वनिहितानाद्राज्ञे ब्राह्म

णवर्जं द्वादशमंशं दद्युः ॥ १३ ॥ यद्यसौ राजलब्धो निधिः स्वयं ब्राह्मणादिभिः वर्णैरेव निहितो भवेत्तदा ब्रा-
ह्मणवर्जं क्षत्रियादयो द्वादशमंशं राज्ञे दद्युः स्वायं निधिं चाप्नुयुः ॥ अयमर्थः ॥ यद्यधिगतो निधिः क्षत्रियादिभि-
स्वीभिभिरागत्य रूपसंख्यादिभिर्भाव्यते तदा द्वादशमंशं दत्वा लभ्यत इति ॥ ॥ यथाह मनुः ॥ ममायमिति यो
ब्रूयान्निधिं सत्येन मानवः ॥ तस्याददीत षड्भागं राजा द्वादशमेव चेति ॥ अंशविकल्पस्तु वर्णापेक्षया का-
लापेक्षया वा योज्यः ॥ यथाह ॥ ॥ प्रनष्टस्वामिकं द्रव्यं राजा त्र्यब्दं निधापयेत् ॥ अर्वाक्त्र्यब्दाद्धरेत्स्वामी
परतो नृपतिर्हरेदिति ॥ हरणं ग्रहणः ॥ पश्चादप्यागते दानावश्यंभावात् ॥ ततश्च त्र्यब्दादर्वाक् द्वादशें-
शं उपरिष्टात् ॥ षष्ठ इति भावः ॥ द्वादशमंशमिति नियमेन च स्वाम्यागमनात्पूर्वं राजादिभिर्दत्तस्य प-
ङ्गादेर्ब्राह्मणायंशस्यास्वामिदत्तेन यात्रस्याहरणीयत्वं गम्यते ॥ अस्वामिविक्रयं दानमाधिं वा विदि-
वर्जयेदिति बृहस्पतिस्मरणात् ॥ यद्वा स्वनिहितमेव निधिं चिरकालमनासादितं यदि स्वयमेव लं-
भन्ते वर्णास्तदा ब्राह्मणवर्जं राज्ञे द्वादशमंशं दद्युः ॥ ब्राह्मणस्तु द्वादशमपि न दद्यात् ॥ यथा न

दि·टी· रद:॥स्वमप्यर्थं तथा नष्टं लब्ध्वा राज्ञे निवेदयेत्॥ गृह्णीयात्तं ततः स्तु हृष्टमस्तु इष्यन्नथोन्यथेति॥ यद्वा ब्रा

३८ ह्मणवर्जं पूर्वोक्तं ब्राह्मणांश विना राज्ञ एव दद्युः ब्राह्मणेभ्यो न दद्युः रिति॥ मिथ्यावादिनः प्रत्याह॥ ॥प

रनिहितं स्वं निहितमिति ब्रुवंस्तत्सम दंडमावहेत्॥ ३४॥ पुनः परनिहितमन्यदीयं निधिं लोभान्निश

येन स्वं निहितं स्वीयमिति ब्रुवंस्तत्समं पञ्चमं ति धिसमं दंडमावहेद्दद्यात्॥ मनुः स्वच्छमांशं दं

डमात्॥ ॥अष्टं नवदं दद्यः स्वविनस्याशमष्टमं॥ तस्यैवा वा निधानेस्य संख्या याल्पीयसी कला मि

ति॥ अल्पीयसीं षोडशी॥ तत्रैयं व्यवस्था॥ अस्वस्य स्वत्व वचने तत्समो दंडः स्वस्यैव संख्या घव्यथा

वचनेः षष्टमांशादेरिति॥ बालानाथस्त्रीधनानि वराजा परिपालयेत्॥ ३५॥ बालस्याषोडशाद्वर्षा

त्॥ अनाथो वेसकरहितोंधपंग्वादिः॥ स्त्रीवंध्याः पुत्रादिर्मध्ये ऽनाथपदप्रयोगादुभयत्रान्वयेन

बालस्त्रियोरप्यनाथत्वं गम्यते॥ ततश्चानाथयोर्बालस्त्रियोर्बालस्त्रिपश्चानाथस्य धनानि स्वत्य [illegible]

सुपलब्धानि मेर्विभावितान्यपि रूपसंख्यादिभिर्न तदानामेव [illegible] स्वयमे

रा·म·
३८

वराजाप्रतिपालयेत्॥यथाह मनुः॥बालदायादिकं रिक्थं तावद्राजानुपालयेत्॥यावत्स्यात्स समावृ
त्तो यावद्वातीतशैशवः॥ वशापुत्रासु चैवं स्याद्रक्षणं निःकुलासु च॥ पतिव्रतासु च स्त्रीषु विधवा
स्वातुरासु चेति॥ चकारात्स्वयमनुपलब्धस्वामिकरिक्थस्यान्यस्यापि परिपालयेत्॥ तथा च शंखलिखि
तौ॥ न हार्यं राज्ञा देवब्राह्मणस्वं स्थितं न निक्षेपोपनिधिक्रियाक्रमागतं न बालस्त्रीधनं॥ न
नीति॥ निक्षेपोपनिधी परहस्तस्थापितौ तस्मिन्मृतेपि राज्ञा तौ न हार्यौ॥ किंतु यथास्थानं पाल
नीयौ। तथा क्रियाः श्रोत्रियदेहिकाः क्रमः पत्रादीनो राजा तु हर्त्तावपि राजग्रहणं तु पुत्रद्वौधव
दीनिरासाय॥ तेषां तदपहर्तृत्वप्रसंगात्॥ यथाह मनुः॥ जीवंतीनां तु तासां ये तद्धरेयुः स्वबांधवाः॥
तान्शिष्याच्चौरदंडेन धार्मिकः पृथिवीपतिरिति॥ प्रजायाः परिपालनेनैवास्य सिद्धौ पृथग्विधानं रा
जभागग्रहणनिवृत्त्यर्थं॥ पूर्वोक्तशंखलिखितवचनारंभसामर्थ्यात्॥ चोरहृतं प्रत्याह॥ ॥चौ
रहृतं धनमवाप्य सर्वमेव सर्ववर्णेभ्यो दद्यात्॥ ३६॥ चौरैः प्रच्छन्नं प्रकाशं वापहृतं जानपदधनम

वाप्यजन्मान्तरीयसर्वमेनं सर्ववर्णेभ्यो दद्यात्स्वर्थयेत्॥ सर्वमेवेत्यनेन श्रुतित्वेनापि किंचिन्त्रा देयमित्यु
क्तं तदुपयोगे दोषश्रवणात्॥ यथाह मनुः॥ दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्हृतं धनं॥ राजा तदुपयुंजान
श्चौरस्याप्नोति किल्बिषमिति॥ सर्वमेवेत्यवधारणं ददातिनापि संबध्यते॥ अदाने दोषश्रवणात्॥ यथा
ह योगीश्वरः॥ देयं चौरहृतं द्रव्यं राज्ञा जानपदाय तु॥ अददद्धि समाप्नोति किल्बिषं यस्य तस्य त
दिति॥ एतेनोपक्षेपमोषौ निराकृतौ॥ अनवाप्य चस्वकोशादेव दद्यात्॥ ६७॥ चौरहृतं प्रत्याह
र्तुं यतमानोपि तद्द्रव्यमप्राप्यतावद्द्रव्यं स्वकोशादेव दद्यात्॥ चकारादशक्तोपि॥ यथाह व्यासः॥
प्रत्याहर्तुमशक्तस्तु धनं चौरैर्हृतं यदि॥ स्वकोशात्तद्धि देयं स्यादशक्तेन महीक्षितेति॥ एवं प्रजापा
लने दृष्टोपायानभिधायेदानीमदृष्टोपायं तत्राह॥ शांतिस्वस्त्ययनैर्दैवोपघातान्प्रशमयेत्॥
॥ ६८॥ प्रत्युत्पन्नारिष्टा समनायक्रियमाणं कर्म शांतिः ग्रहशांतिमहाशांत्यादिः॥ अनुत्पन्ना
रिष्टोनुत्पत्त्यै क्रियमाणं कर्म स्वस्त्ययनं प्रास्थानिकहोमाणां कर्म शांतिः ग्रहशांतिमहाशांत्यादि

दि॥ षडुर्वच्चनेन पुण्याहसंयुक्तादीनां ग्रहणं॥ तैर्द्दैवोपघातानां प्रशमयंतः दैवैं पौर्वदैहिकमि
ष्टानिष्टफलकं कर्म तेनोपघातानामापदः प्रशमयेत्॥ प्रशमनं नाम उत्पन्नानां ध्वंसनमनुत्पन्ना
नां च आगमाभावपरिपालनमिति। यथाह गौतमः॥ यानि च दैवोत्पातकानि चिंतकाः प्रब्रूयुः स्ता
न्याद्रियेत॥ तदधीनमपि ह्येके योगक्षेमं प्रतिजानते॥ शांतिपुण्याहस्वस्त्ययनायुष्यमंगलसंयु
क्तान्याभ्युदयिकानि विद्वेषणसंवननाभिचारद्विषद्वृद्धियुक्तानि च शालाग्नौ कुर्यादिति॥ पुण्याह
भवंतो ब्रुवंत्विति दिनदोषनाशकं कर्म स्वस्त्यायुष्यं जन्मादिनकर्तव्यं दूर्वाहोमादि मंगलं नाम शा
न्त्यादि विद्वेषणं शत्रूणां परस्परं विरोधित्वादकं संवननं वशीकरणं द्विषद्वृद्धिर्द्विषतां स्वभावप्र
ता॥ नि शालाग्नौ कार्याणि॥ सचराजस्तु विशेषाच्चत्तामइति प्रकृत्स्ववेश्मन आवसथः सथ्यः सभ्येति
श्रीणि स्यानामभिधाय सर्वेष्वेवाजस्रा अग्नयः स्युरग्निपूजा च नित्या यथा गृहमेधस्यापस्तंबोक्तानां
त्रयाणामग्नीनामन्यतमः शालाग्निरवसेयो तेनोपासनो नाम पित्रेताग्निस्तपो ग्राह्येषु श्रौतेषु चाग्नि

५८

यमितत्वात्॥ परचक्रोपघातं चास्त्रशस्त्रनिपातनया॥ इत्र॥ एषां शत्रूणां चक्रं बलं तेनोपघातादापदः श
स्त्रनिपातनया शस्त्राभियोगेन प्रशमयेत्॥ चकारात्स्वचक्रोपघातं च॥ वेदेति॥ हा सधर्मे धर्मशास्त्रार्थकुश
लं कुलीनमव्यङ्गं तपस्विनं तपस्विनं पुरोहितं चैव वरयेत्॥७०॥ वेदाश्च गादयश्चत्वारो विशेषात्वादी
नामथर्वाभिधेयत्वात्॥ यथाह योगीश्वरः॥ पुरोहितं च कुर्वीत दैवज्ञमुदितोदितं॥ दंडनीत्यां च कु
शलमथर्वाङ्गिरसे तथेति॥ इति महाभारते तच्छाः॥ धर्मशास्त्रं मानवादि अर्थशास्त्रमौशन
सादि तेषु कुशलं कुलीनं महाकुलप्रसूतमव्यङ्गमविकलाङ्गं तपस्विनं कृच्छ्रचान्द्रायणादिनिष्ठं
वरणेन अभ्यर्थनेन पुरोहितमग्नानातिहितं सर्वकार्येषु कुर्यात्॥ यच्च इसा मौम्यतो मिहितं तथा
पि ब्राह्मणमेव तस्मा ब्राह्मणाय स्यमाणो ब्राह्मणं पुरो दधीतेति श्रुतेः॥ चकारादभिजनादिसंप
न्नं॥ यथाह गौतमः॥ ब्राह्मणं पुरो दधीत॥ विद्याभिजनवाग्रूपवयःशीलसंपन्नं न्यायवृत्तं तप
स्विनमिति॥ यद्वा चकारादृत्विजोपि वरयेत्॥ यथाह योगीश्वरः॥ श्रौतस्मार्तक्रियाहेतो वृणुयात्

हुत्विजः स्त थे ति ॥ अत्विमलुब्धानवहितांश्छक्तिसंपन्नागतो विशादीनामुपाध्यायस्तुच्यते ॥ तथा च शंखलिखि
तौ सपवर्ग्यादुष्टस्तास्सर्विकुलोपाध्याय इति ॥ शुचीनलुब्धानवहितांश्छक्तिसंपन्नान्सर्वार्थेषु सहायान्
॥८१॥ शुचीन् वाह्याभ्यंतरशौचयुक्तान् अलुब्धान् क्षिप्रसातिशयरहितान् अनवहितान् सर्वत्रसावधानान् शक्ति
भिः प्रभावोत्साहमंत्रजाभिः संपन्नान्युक्तान् सर्वार्थेषु सर्वकार्येषु लौकिकदैविकेषु मतिविषयेषु कृतिवि
षयेषु च सहायान् सहायंत इति सहायाः सहकारिणो मंत्रिणो वरयेत् प्रार्थयेत् ॥ बहुवचनसामान्येपि स
प्ताष्टौ वा कार्याः ॥ यथाह मनुः ॥ मौलान् शास्त्रविदः शूरान् लब्धलक्षान् कुलोद्भवान् मंत्रिणः सप्त वाष्टौ
वा कुर्वीत सुपरीक्षितानिति ॥ चकारादमात्यदूतसेनानीनां ग्रहणं यथा मनुः ॥ अन्यानपि प्रकुर्वीत शु
चीन्प्राज्ञानवस्थितान् ॥ सम्यगर्थसमाहर्त्ःनमात्यान्सुपरीक्षितानिति ॥ अमात्याः सहचराः ॥ दूतं चैव प्र
कुर्वीत सर्वशास्त्रविशारदं ॥ इंगिताचारचेष्टज्ञं शुचिं दक्षं कुलोद्भवमिति ॥ भारतेपि ॥ सेनासंचालने चि
तसेनाकर्मस्वभिष्ठितं ॥ शूरं व्यूहविधानज्ञं हस्त्यश्वरथकोविदमिति ॥ स्वयमेव व्यवहारान्पश्येद्विद्वद्भिर्वि

स्मृतेः सार्द्धं ॥७१॥ पूर्वोक्ताष्टादशस्वयमेव नान्यस्मान्निरूढाभिधानविषयान्न शेषेत्स्वरसङ्क्षेपेणाविवेच
येत् ॥ यथाह ॥ परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु ॥ वाक्यान्न्यायाद्व्यवस्थानं व्यवहार उदाहृत इति
तस्य च चतुष्कुलत्वेनानेकविधत्वमुक्तं तदाह मनुः ॥ तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः ॥ सम्भू
य च समुत्थानं दत्तस्यानपकर्म च ॥ वेतनस्यैव चादानं संविदश्च व्यतिक्रमः ॥ क्रयविक्रयानुशयो
विवादः स्वामिपालयोः ॥ सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके ॥ स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च
॥ स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय इति ॥ सार्द्धस्मृतौ यानि द्वैधा ह्यष्टादशानामर्थशोधे स्यनेनान्यथादर्शनादर्श
नफलसंबंधः ॥ किं नु राज्ञ एव पश्यामनुः ॥ अदंड्यान्दंडयन्राजा दंड्यांश्चैवाप्यदंडयन् ॥ अयशो महद
प्नोति नरकं चैव गच्छतीति ॥ एते च विवादा यथाक्रमं सम्मुखं ते विधायके स्त्रिचतुरैः सभ्यैः कुशाग्रार्थकोवि
दैः ॥ सभ्यैर्निर्णीतमर्थं नु राजा विप्रैः परीक्षयेदिति नारदस्मरणात् ॥ राज्ञो नु दत्तत्वपित्वयमेवेति वचनं
क्रोधलोभादिदोषपरवशतानिरासाय ॥ यथाह याज्ञवल्क्यः ॥ व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः स

ह ॥ धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः इति ॥ स्वयमेवेत्यस्यानुकल्पमाह ॥ ॥ व्यवहारदर्शने ब्राह्मणं
वा नियुंज्यात् ॥ ७३ ॥ पूर्वोक्ते व्यवहारदर्शने स्वस्याशक्तौ ब्राह्मणं प्राड्विवाकं नियुंज्यात् ॥ यथाह योगीश्वर
: ॥ अपश्यता कार्यवशाद्व्यवहारान्नृपेण तु ॥ सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित् इति ॥ प्राड्विवाक
शब्दार्थमाह बृहस्पतिः ॥ विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च ॥ प्रियपूर्वं प्राग्वदति प्राड्विवाकस्ततः
स्मृत इति ॥ वाशब्दात्तदसंभवे वैश्यं वा नियुंज्यात् न शूद्रं ॥ यथाह कात्यायनः ॥ ब्राह्मणो यत्र न स्यात्तु क्ष
त्रियं तत्र योजयेत् ॥ वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत् इति सभ्यानाह जन्मकर्मव्रतोपेताश्च राजा
सभासदः कार्या रिपौ मित्रे च ये समाः कामक्रोधभयलोभादिभिः कार्यार्थिभिरनाहार्याः ॥ ७४ ॥ जन्म विशि
ष्टमातापितृतः । कर्म जातकर्मादिसंस्काराः ॥ व्रतान्यध्ययनाङ्गानि सौम्यप्राजापत्यादीनि ॥ तैरुपेताः
श्चकाराच्छ्रुताध्ययनसंपन्नाः ॥ यथाह योगीश्वरः ॥ श्रुताध्ययनसंपन्ना धर्मज्ञाः सत्यवादिनः ॥ राज्ञः स
भासदः कार्या रिपौ मित्रे च ये समाः ॥ इति ॥ रिपौ मित्रे च ये समा रागद्वेषरहिताः कामो भोगलिप्सा क्रो

वि.टी.
४२

योऽसमर्थोऽसमर्थं त्रासो लोभो लिप्सातिशयः आदिशब्दात्स्नेहादीनां ग्रहणं॥ तैः कृत्वा कार्यार्थिभिर्व्यवहारिकै
रन्नाहार्या अनाकर्षणीयाः अयमर्थः॥ कार्यार्थिभिर्द्रव्यादिप्रदानेन स्वविषयकपक्षपातजननं सभ्यानां का
मेनाकर्षणं॥ प्रतिपक्षतिरस्करणश्रावणेन स्वपक्षपातजननं क्रोधेनाकर्षणं॥ विपक्षबाधकदर्शनेन तत्सभ्या
पक्षपातजननं भयेनाकर्षणं॥ धनदानादिना स्वपक्षपातजननं लोभेनाकर्षणं॥ [illegible]
दानमानसत्कारैः यथा सभ्यास्तु सीदन्ति तथा कार्यं॥ यथोक्तं कात्यायनेन॥ स तु सभ्यैः स्थिरैर्युक्तः प्राज्ञै
र्मौलैर्द्विजोत्तमैः॥ धर्मशास्त्रार्थकुशलैरर्थशास्त्रविशारदैरिति॥ बहुवचनसामान्येपि सप्तपञ्चत्रयो
वा कार्याः॥ यथाह बृहस्पतिः॥ लोकवेदज्ञधर्मज्ञाः सप्तपञ्चत्रयोपि वा यत्रोपविष्टा विप्रास्तु सा यज्ञस
दृशी सभेति॥ चकारान्नृपाकलेखकसाध्यपालगणकांग्रहणं॥ यथाह व्यासः॥ त्रिस्कन्धज्योतिषा
भिज्ञं स्फुटप्रत्ययकारकं॥ श्रुताध्ययनसंपन्नं गणकं योजयेन्नृपः॥ स्फुटलेखं विनियुञ्जीत शाब्दला
क्षणिकं शुचिं॥ स्पष्टाक्षरं जितक्रोधमनुद्धतं सत्यवादिनं॥ साध्यपालस्तु कर्तव्यो राज्ञा साध्यस्य

राम
४१

साधकः॥ क्रमायातो दृढः शूरः सभ्यानां च मते स्थितः॥ आकारणोत्तरं यत्र च साक्ष्यर्थिप्रतिवादिनां॥ सभ्याधी
नः सत्यवादी कर्त्तव्यस्तु नरः पूरुषः॥ श्रोतारो वणिजस्तत्र कर्त्तव्या न्यायदर्शिन इति। हितायच्चकाराङ्गुज
न्यपि सभ्याः॥ अन्यायेनापि तं यान्तं येनुयान्ति सभासदः॥ तेपि तद्भागिनः तस्माद्बोधनीयः स तैर्नृपः॥ इत्यनेन
राजानुरोधस्यापि परिहरणीयत्वस्मरणात्॥ व्यवहारदर्शनप्रकारमाह मनुः॥ धर्मासनमधिष्ठाय संवीतां
गः समाहितः॥ प्रणम्य लोकपालेभ्यः कार्यदर्शनमारभेदिति॥ धर्मासनं धर्मसभा॥ तत्र बृहस्पतिः॥ दुर्गम
ध्ये गृहं कुर्याज्जलवृक्षान्वितं पृथक्॥ प्राग्दिशि प्राङ्मुखीं तस्य लक्षण्यां कल्पयेत्सभामिति॥ सैव धर्माधि
करणमित्याह कात्यायनः॥ धर्मशास्त्रविचारेण मूलशास्त्रविवेचनं॥ यत्राधिक्रियते स्थाने धर्माधिकर
णं हि तदिति॥ मूलं व्यवहारः शास्त्रं तत्स्मृतिपादकं स्मृत्यादि॥ व्यवहारपदं हि तदिति॥ चेच्छेदेन स्वय
मेवावेदयति नराजादिप्रेरित इत्युक्तं॥ नोत्पादयेत्स्वयं कार्यं राजा नाप्यस्य पूरुषः॥ न च प्रापितमन्येन ग्रसे
१४ दर्शननिमित्तमाह याज्ञवल्क्यः॥ स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः॥ आवेदयति चेद्राज्ञे व्यवहारपदं

वि॰ टी॰
४२

नार्थं कश्चन नेति मानवात् ॥ आबर्हिर्निरूप्य नेतत्संबंधी तन्नियुक्तो पिवा ह्रस्वते ॥ अर्थिना संनियुक्तो
वा प्रत्यर्थिप्रहितोऽपि वा ॥ यो यस्यार्थे विवदते तयोर्जयपराजयाविति कात्यायनीयात् ॥ असंबंधी
तु दंड्यः ॥ यो न भ्राता न च पिता न पुत्रो न नियोगकृत् ॥ परार्थवादी दंड्यः स्याद्व्यवहारेषु विब्रुवन्निति नार-
दीयात् ॥ आवेदितं श्रुत्वा प्रष्टव्योऽसौ ॥ कालेकार्यार्थिनं पृच्छेत्प्रणतं पुरतः स्थितं ॥ किं कार्यं का च ते पीडा
मा भैषीर्ब्रूहि मानव ॥ केन कस्मिन् कदा कस्मात्पृच्छेदेवं सभागतमिति तदुक्तं च स वलिख्या ॥ रागादि-
ना यदेकेन कोपितः करणो वदेत् ॥ तदोमिति लिखेत्सर्वं वादिनः फलकादिष्विति नारदीयात् ॥ का-
रणं समा ॥ अनंतरं क्रममाह कात्यायनः ॥ एवं पृष्टः स यद्ब्रूयात्तत्सभ्यैर्ब्राह्मणैः सह ॥ विमृश्य कार्यं न्या-
य्यं चेदाह्वानार्थमतः परं ॥ मुद्रां वा निक्षिपेत्तस्मिन्पुरुषं वा समादिशेत् ॥ अकल्पबालस्थविरविषम-
स्थक्रियाकुलान् ॥ कार्यातिपातिव्यसनिनृपकार्योत्सवाकुलान् ॥ मत्तोन्मत्तप्रमत्तार्तभृत्यान्नाह्वानुपेन्नृपः
॥ न हीनपक्षां युवतिं कुले जातां प्रसूतिकां ॥ सर्ववर्णोत्तमां कन्यां ता ज्ञातिप्रभुकाः स्मृताः ॥ तदधीनकुटुं-

विन्यः स्वैरिण्यो गणिकाश्चयाः ॥ निष्कुलायाश्च पतितास्तासां नाह्वानमिष्यते ॥ देशं कालं च विज्ञाय का
र्याणां च बलाबलं ॥ अकल्यादीनपि शनैर्यानैराह्वानयेन्नृपः ॥ ज्ञात्वाभियोगं येपिस्युः वने प्रव्रजितादयः ॥
तादयः ॥ तानप्याह्वानयेद्राजा गुरुकार्येष्वकोपयन्निति ॥ आहूतस्यानागमने कात्यायनः ॥ आहू
तस्त्ववमन्येत यः शक्तो राजशासनं ॥ तस्य कुर्यान्नृपो दंडं विधिदृष्टेन कर्मणेति ॥ पलायने तु हीनता ॥
आहूतः अपलायी च हीनः पंचविधः स्मृत इति स्मरणात् ॥ यदि वाद्युक्तस्य प्रतिवादी अतिक्रामति तदासावासे
द्धव्यः ॥ तत्र नारदः ॥ वक्तव्येर्थे ह्यतिष्ठंतमुत्क्रामंतं च तद्वचः आसेधयेद्विवादार्थी यावदाह्वानदर्शनं ॥ आ
सेधो राजाज्ञयावरोधः स चेतो न गंतव्यमिदं न कर्तव्यमित्यादिरूपः ॥ तदतिक्रमकारी दंड्यः ॥ आसे
धकाल आसिद्ध आसेधं यो तिवर्तते ॥ स विनेयोन्यथा कुर्वन्नासेद्धा दंडभाग्भवेत ॥ नदीसंतारका
तारदुर्देशोपप्लवादिषु ॥ आसिद्धस्तं परासेधमुत्क्रामन्नापराध्नुयात् ॥ आदिशब्दादस्यावश्यककार्ये
षु विवाहादिष्वपि ॥ स च व्यवहारश्चतुष्पात् ॥ भाष्योत्तरक्रियासाध्यसिद्धिभिः क्रमवृत्तिभिः ॥ आह्निसवत्

वि॰टी॰
४४

रं शस्तु चतुष्पादभिधीयत इति ॥ भाषाप्रतिज्ञापक्ष इत्येकार्थाः ॥ क्रियाप्रमाणं साधनमिति सेयं च द्विवि
धः ॥ भूतछलानुसारित्वाद्द्विगतिः समुदाहृतः भूतं तत्त्वार्थसंयुक्तं प्रमादाभिहितं छलमिति स्मरणात् ॥ तत्र
विशेषः ॥ छलं निरस्य भूतेन व्यवहारान्नयेन्नृप इति ॥ युगपदनेकव्यवहारप्राप्तौ बृहस्पतिः ॥ अहं पूर्वं कम
प्राप्तावर्थिप्रत्यर्थिनो यदा ॥ वादो वर्णानुपूर्वेण ग्राह्यः पीडामवेक्ष्य वेति ॥ तत्र प्रतिज्ञामाह योगीश्वरः ॥ प्रत्य
र्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना ॥ समामासतदर्धाहर्नामजात्यादिचिह्नितमिति ॥ पूर्वसमादिरा ह्नि
त्यप्रत्यन्तु इति विशेषः ॥ तत्र विशेषो वा ईत्यपः ॥ प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितं ॥ निश्चि
तं लोकसिद्धं च पक्षं पक्षविदो विदुः ॥ अल्पाक्षरस्त्वसंदिग्धो बह्वर्थः व्याप्यनाकुलः ॥ मुक्तो विरोधिकारणै
र्विरोधप्रतिषेधक इति प्रतिज्ञादोषा नारदोक्ताः ॥ अन्यार्थमर्थहीनं च प्रमाणागमवर्जितं ॥ लेख्यं हीना
धिकमस्पष्टं भाषादोषाः प्रकीर्तिता इति ॥ साध्यं साधनमर्हमं ॥ सत्कारणैः सद्धेतुभिः ॥ निश्चितमसंदिग्धं
॥ लोके प्रसिद्धं ॥ पक्षलक्षणमाक्षेपस्त्वाभासः ॥ यथा ॥ अप्रसिद्धं निराबाधं निरर्थं निःप्रयोजनं ॥ अ

राम
४४

साध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेत् ॥ अप्रसिद्धं यथा ॥ कूष्मांडपरिमाणं मौक्तिकं मेपहृतमनेनेति ॥ नि
राबाधं ॥ अस्मद्दीपप्रभयायं प्रदीप्य गृहं कृतीति ॥ निरर्थं टठडटस्सेति निःप्रयोजनं ॥ अस्मत्सत्वातिवेशेयं श्चिरं देवान्पू
जयतीति ॥ असाध्यं मां हृष्टानेवाहिनिकोचितमिति ॥ अल्पत्वा ॥ दल्पकालत्वान्न दिव्यसाक्षिणौ ॥ लिखि
तभुक्तीकूरापास्नेइति ॥ विरुद्धं ग्रामदेशादीनां ॥ तत्र बृहस्पतिः ॥ राज्ञा च वर्जितो यश्च यश्च पौरविरोधकृ
त् ॥ राष्ट्रस्य वासमस्थं स्यप्रकृतीनां तथैव च ॥ अन्ये वा ये पुरग्राममहाजनविरोधिनः ॥ अस्रादेयास्तु ते सर्वे व्यव
हाराः प्रकीर्तिता इति ॥ स्थावरविवादेत्वयं विशेषः ॥ देशश्चैव तथा स्थानं सन्निवेशस्तथैव च ॥ जातिः संज्ञा
धिवासश्च प्रमाणं क्षेत्रनाम च ॥ पितृपैतामहं चैव पूर्वराजानुकीर्तनं ॥ स्थावरेषु विवादेषु दशैतानि निवे
शयेदिति ॥ देशः काश्यादिः ॥ स्थानं काश्यादि ॥ संनिवेशे गृहादि ॥ जातिरर्थिप्रत्यर्थिनोर्ब्राह्मणत्वादि
ः ॥ संज्ञा देवदत्तादिः ॥ अत्र विशेषः कात्यायनीयः ॥ अनेकपदसंकीर्णः पूर्वपक्षो न सिध्यतीति ॥ युगप
दिति शेषः ॥ पक्षं च संशोध्य यत्रैलिखेत् ॥ पूर्वपक्षं स्वभावोक्तं प्राड्विवाकोभिलेखयेत् ॥ पांडुलेखेन

फलकेतरः पत्रे विशोधितमितिकात्यायनीयात्। विशोधनं विस्मृततत्संधानेन। अन्यथाभूतमप्यनुप-
न्यस्तहीयनेऽप्यवहारज इतिवास्तववस्तुनो व्यवस्थापनैः। शोधनं च यथावद्वस्तुसंस्थापनं। शोधयेत्पूर्ववादं तु या-
वन्नोत्तरदर्शनं। अप्रवृष्टस्य स्तोत्रे तेनापि दत्तं शोधनं भवेदिति नारदीयात्।। इति प्रतिज्ञा।। ।।अथो-
त्तरं।। ।।तत्र योगीश्वरः।। श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसंनिधाविति।। तत्र विशेषो नारदीयः
।।पक्षस्य व्यापकं सारमसंदिग्धमनाकुलं।। अव्याख्यागम्यमित्येतदुत्तरं तद्विदो विदुरिति।। तच्च-
तुर्विधं।। यथाह कात्यायनः।। सत्यं मिथ्योत्तरं चैव प्रत्यवस्कंदनं तथा।। पूर्वन्यायविधिश्चैवमुत्त-
रं स्याच्चतुर्विधमिति।। तल्लक्षणान्याह कात्यायनः।। साध्यस्य प्रतिपत्तिस्तु सत्योत्तरमिति स्मृतं।। अभियो-
गापह्नवश्च मिथ्योत्तरमुदाहृतम्।। प्रत्यवस्कंदनं पक्षे स्वपत्रे कारणोमिथा।। अयं मयाजितः पूर्वमिति प्राङ्न्या-
यउच्यते।। इति।। तत्र मिथ्योत्तरं चतुर्धा।। मिथ्यैतन्नाभिजानामि तदा तत्र न संनिधिः।। अजातश्चास्मि तत्का-
ल इति मिथ्या चतुर्विधमिति।। उत्तरलक्षणाभावे उत्तराभासः यथा संदिग्धमन्यत्प्रकृतादत्यल्पमतिभूरि च

॥ यद्यैकदेशव्याप्यन्यत्तथा नैवोत्तरं भवेत् ॥ यद्यत्स्वपदमत्यापि निगूढार्थं तथाकुलम् ॥ व्याख्यागम्यमसा
रं च नोत्तरं स्वार्थसिद्धय इति ॥ संदिग्धमृणाभियोगे गृहीतं न वा मयेति ॥ प्रकृतादन्यदृणाभियोगे नाहं तां
गालयामीति ॥ अत्यल्पं शताभियोगे पंच धारयामीति ॥ अतिभूरि पंचाभियोगे शतं धारयामीति ॥ यद्यै
कदेशव्यापि सुवर्णरजतवस्त्राद्यभिचारि ॥ यथा कार्ष्यापभववत्सरे नैनत्रमणं गृहीतमित्यभियोगे म
गुणं माघसंवत्सरे गृहीतमिति ॥ निगूढार्थमृणाभियोगे मत्स्वरूपं त्वं जानासीति ॥ अत्र व्यंजेन याद
ष्टोऽहं त्वां हनिष्यामीति गमयति ॥ आकुलं पूर्वापरविरुद्धमृणाभियोगे सत्यं गृहीतं न धारयामीति ॥
व्याख्यागम्यमप्रसिद्धपदप्रयोगेण ॥ यथा मदायागोरनेनापहृतेत्यभियोगे न मयार्जुनो पहृतरत्यर्जु
नपदेन गौरुच्यते असारं न्यायविरुद्धं ॥ यथा ॥ अनेन गृहीतस्य धनस्य वृद्धिर्दत्ता न मूलमित्यभियोगे सतां
वृद्धिर्दत्ता न मूलं धारयामि । ति ॥ उत्तरं चैकमेवग्राह्यम् ॥ नोत्तरसंकरः ॥ यथाह कात्यायनः ॥ यद्यैक
देशे यत्सत्यमेकदेशे च कारणं ॥ मिथ्या चैवैकदेशे च संकरात्तदनुत्तरमिति ॥ यथा सुवर्णरूप्याभियोगे

सुवर्णं निगृहीतं रूप्यं गृहीतं प्रतिदत्तं चेति॥ एवमुत्तरत्रयसंकरेऽपि ज्ञेयं॥ तत्र कारणमाह स एव॥ न चैकस्मिन्वि
वादे तु क्रिया स्याद्वादिनोर्द्वयोः॥ न चार्थसिद्धिरुभयोर्न चैकत्र क्रियाद्वयमिति॥ द्वयोरपि क्रियोपन्यासे दत्त यथा
॥ मिथ्या क्रियापूर्ववादे कारणे प्रतिवादिनीति॥ संकीर्णानां च युगपदुत्तरत्वं क्रमेण तूत्तरत्वमेव॥ तेन नै
न विना तस्य तस्यानुपमर्दात्॥ क्रमं चाह हारीतः॥ यत्प्रभूतार्थविषयं यत्र वा स्यात्क्रियाफलं॥ उत्तरत
त्रं तज्ज्ञेयमसंकीर्णमितोऽन्यथा॥ संकीर्णमिति शेषः॥ क्वचित्संकराभ्यनुज्ञानमाह हारीतः॥ मिथ्याकारण
योर्वापि प्राङ्न्यायकारणस्योत्तरमिति॥ यथा॥ आह॥ यत्कश्चिद्गृहीतेयं गौर्मदीया कान्त्रिके समहानष्टासदृहे गृ
हेत्य परेद्युते॥ मिथ्यैतत्कान्त्रिकान्मागेवा षट्मया क्रीतेति॥ तत्र संकीर्णस्यैव पक्षदूषकत्वादुत्तरत्वं॥ ते
द मिथ्यैव कारणोपन्यासाहसस्तेयपारुष्यगोऽभिशापात्यये स्त्रियां॥ विवादयेत्सद्य एव कालोऽन्यत्रेच्छया
स्मृतः इति॥ इत्युत्तरमुक्त्वा अथ क्रिया॥ तत्र योगीश्वरः॥ ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनमिति॥
तत उत्तरानन्तरं॥ अर्थी साध्यवान् साधनं प्रमाणं॥ ततश्च मिथ्योत्तरे पूर्ववाद्येवार्थी तस्यैव साधनं नि

दिशेत्॥ प्राङ्न्यायकारणोक्तौ प्रत्यर्थ्यावार्थीति स एव॥ प्राङ्न्यायसाधनयोरेव साध्यत्वात्॥ संप्रतिपत्तौ तु द्वयोर
पि साध्याभावान्नैकस्यापि साधनोपन्यास इति द्विपाद्व्यवहारः॥ तदाह हारीतः॥ प्राङ्न्यायकारणोक्तौ तु प्र
त्यर्थी निर्दिशेत् क्रियाम्॥ मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेदिति॥ साधनोपन्यासफलमाह योगी
श्वरः॥ तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोन्यथेति॥ तस्य साधनस्य वक्ष्यमाणस्य लिखितसाक्ष्यादेः सिद्धा
ववाधेसिद्धिं साध्यस्य जयलक्षणां प्राप्नोति॥ अतोन्यथा साधनासिद्धौ विपरीतं पराजयमित्यर्थः
॥ ततः सभापतिकर्त्तव्यमाह स एव॥ उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये॥ निह्नवे भावितो दि
नस्यांते दद्याद्त्याय वेतनमिति॥ इति साधारणव्यवहारमातृका॥ ॥ अथासाधारणानि तत्र योगीश्वरः॥ अ
भियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत्॥ अभियुक्तं च नान्येन नोक्तं विप्रकृतिं नयेदिति॥ आवेदनकाले भि
तं पदं भाषाकालेन परिवर्त्तयेत्॥ यथा नारदः॥ पूर्वपदं परित्यज्य योन्यदालंबते पुनः॥ पदसंक्रमणाज्ज्ञे
यो हीनवादी स वै नर इति॥ हीनवादी दंड्यो न तु हीनार्थः॥ सर्वेष्वर्थविवादेषु वाक्छलेनावसीदति॥ प

वि.र
४७

क्रमणाद्भेदो हीनवादी स वै नर इति ॥ हीनवादी दंड्यो न तु हीनार्थः ॥ सर्वेष्वर्थरक्षीमृत्स्मरणादाने शास्यो
पर्धानहीयत इति ॥ अभियोगमनस्तीर्येन्यस्यापवादः ॥ कुर्यात्प्रत्यभियोगं च कलहे साहसेषु चेति ॥
अस्य फलमाह नारदः ॥ पूर्वमावारयेद्यस्तु नियतं स्यात्स्वदोषभाक् ॥ पश्चाद्यः सोप्यसत्कारी पूर्वे तु वि
नयेगुरुः ॥ युगपत्प्रतिपन्नौ तु द्वयोरपि तुल्यो दंडः ॥ कलहे साहसे चैव युगपत्संप्रवृत्तयोः ॥ विशेषश्चेन्न
लभ्येत विनयः स्यात्समस्तयोरिति ॥ मिथ्याभियोगिन्याह योगीश्वरः ॥ मिथ्याभियोगी द्विगुणमभियो
गाद्धनं वहेदिति ॥ सपणविवादे त्वाह ॥ सपणश्चेद्विवादः स्यात्तत्र हीनं तु दापयेत् ॥ दंडं च स्वपणं चै
व धनिने धनमेव चेति ॥ अनेकाभियुक्तार्थापह्नवेप्याह ॥ निह्नुते लिखितं नैकमेकदेशविभावितः ॥
दाप्यः सर्वं नृपेणार्थं न ग्राह्यस्त्वनिवेदित इति ॥ पूर्वोत्तरकार्ययोर्बलाबलमाह ॥ ॥ सर्वेष्वर्थविवादेषु
बलवत्युत्तरा क्रिया ॥ आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरेति ॥ व्यवहारदर्शिनां बलाबलमाह ॥ ॥
नृपेणाधिकृताः पूगाः श्रेणयोऽथ कुलानि च ॥ पूर्वं पूर्वं गुरु ज्ञेयं व्यवहारविधौ नृणामिति ॥ परावर्त्तनं

एम
४७

पंव्यवहारमाह॥ ॥वलोपधिविनिर्वृत्तान्व्यवहारान्निवर्तयेत्॥ स्त्रीनक्तमंतरागारबहिःशत्रुकृतांस्तथा॥ मत्तो
न्मत्तार्त्तव्यसनिबालभीतादिप्रयोजितः॥ असंबद्धकृतश्चैव व्यवहारो न सिध्यतीति॥ ॥यत्तु॥ गुरोः
शिष्ये पितुः पुत्रे दंपत्योः स्वामिभृत्ययोः॥ विरोधे तु मिथस्तेषां व्यवहारो न सिध्यतीति॥ तद्दृष्टादृष्टविरोध
भिप्रायेण॥ न त्वस्पृष्टार्थाभिद्राभिप्रायेण॥ तेषामपि विषयविशेषे व्यवहारस्येष्टत्वात्॥ यथा अथ शास्त्री
पताडने गुरुशिष्ययोः॥ पैतामहधनादाने पितापुत्रयोः॥ स्त्रीधनाछेदने दंपत्योः॥ भृत्यप्रदाने स्वामिभृ
त्ययोरित्यादि॥ यदप्यस्य वद्भिः सार्द्धं स्त्रीणां प्रेस्य जनस्य च॥ अनादेयो भवेद्यो भवेद्वा दो धर्मविद्भिरु
दाहृतो धृतिन दत्ते कार्थैर्वद्भिः भर्त्तरि विद्यमाने कुलस्त्रीणां स्वामिनि विद्यमान प्रेष्यस्य च व्यवहा
रासिध्य भिप्रायेण॥ न तु गण इंद्यापहारादौ वद्भिगोपथौ डिकादि॥ स्त्रीभिरर्थादीनियुक्तस्य प्रे
ष्यस्य चेति॥ राजा च सर्वकार्येषु सांवत्सराधीनः स्यात्॥ ७५॥ राजा पूर्वोक्तः सर्वकार्येषु लौकिकवैदि
कवैदिकवैदिकेषु सांवत्सरो ज्यौतिषिकस्तदधीनः स्यात् तदुदितयहनक्षत्रादिपूजनपरः स्यात्॥ चका

रात्मतंत्रणोपि तु राज्ञा धर्मश्रवणोपलभ्यमानः स्तुतरूपादानं तत्स्वनदेवस्यकल्पवोधनार्थं ॥ यथाह योगीश्वरः ॥ ग्रहा
धीनान्नरेन्द्राणां तुच्छाः पतनतानि च ॥ आवाभावौ च जगतस्तस्मात्पूज्यतमा ग्रहा इति ॥ देवब्राह्मणान्सततमेव पू
जयेत् ॥ ७५ ॥ देवान् विष्ण्वादीन् ब्राह्मणांश्च सानकांश्च सततं निरंतरमेव पूजयेत् ॥ यथाह मनुः ॥ ब्राह्मणा
न्पर्युपासीत प्रातरुत्थाय पार्थिवः ॥ त्रैविद्यवृद्धान्विदुषस्तिष्ठेत्तेषां च शासने इति ॥ आवृत्तानां गुरु
कुलाद्विप्राणां पूजको भवेत् ॥ नृपाणामक्षयोह्येष निधिर्ब्राह्मो विधीयते ॥ वृद्धसेवी भवेत् ॥ ७७ ॥ वृ
द्धानां ज्ञानतपोवयोवृद्धानां विप्राणां सेवाशीलः स्यात् ॥ यथाह मनुः ॥ वृद्धांश्च नित्यं सेवेत विप्रान्वे
दविदः शुचीन् ॥ वृद्धसेवी च सततं रक्षोभिरभिपूज्यत इति ॥ यज्वा पानीच ॥ ७८ ॥ यज्ञानां ज्योतिष्टोमा
दीनां यजनशीलं भवेत् ॥ चकाराद्वाग्धनदानशीलश्च यथाह मनुः ॥ यजेत राजा क्रतुभिर्विविधै
राप्तदक्षिणैः ॥ धर्मार्थं चैव विप्रेभ्यो दद्याद्भोगान्धनानि चेति ॥ न चास्य विषये ब्राह्मणः क्षुधार्तो वि
सीदेत् ॥ ७९ ॥ अस्य राज्ञो विषये देशे ब्राह्मणः श्रोत्रियः क्षुधार्तो नावसीदेत्तन्न क्लिश्येत ॥ यथाह

मनुः॥ नचक्षुधास्यसंसीदेच्छ्रोत्रियोविषयेवसन्निति॥ चकारादश्रोत्रियोपि॥ नचार्थोपिसत्क
र्मनिरतः॥ ८०॥ अन्यःक्षत्रियादिरपिसत्कर्मसुरत्याध्ययनदानेषुभितरां हस्मर्थकर्मपरिहारेणास्तो
राज्ञोविषयेक्षुधानसीदेत्॥ नेदंब्राह्मणादीनूप्रत्युपदिश्यतेप्रक्रमविरोधात्किंतुराजानंप्रत्येवत
स्यैवफलसंबंधश्रवणात्॥ यथाहमनुः॥ यस्यराज्ञस्तुविषयेश्रोत्रियःसीदतिक्षुधा॥ तस्यापि
तत्क्षुधाराष्ट्रमचिरेणावसीदतीदग्गीति॥ तत्रस्वायमर्थः॥ राज्ञास्वविषयेब्राह्मणादिर्यथाक्षुधा
नावसीदेत्तथाकुर्यादिति॥ अनेवसादोपायमाह॥ ॥ब्राह्मणेभ्यःस्वभुवंप्रतिपादयेत्॥ ८१॥ ब्राह्मणे
भ्यःश्रोत्रियेभ्यःस्वकारोदन्येभ्यःस्वतज्जीवनपर्याप्तांभुवंसस्योत्महीप्रतिपादयेद्दद्यात्॥ यथाह
मनुः॥ श्रुतवृत्तेविदित्वास्यधर्म्यांवृत्तिंप्रकल्पयेत्॥ संरक्षेत्सर्वतश्चैनंपितापुत्रमिवौरसमिति
॥ ननुप्रतिपादितायाअपिभुवःपरेणापहारेणतदवसादस्तदवस्थएवेत्यतआह॥ ॥येषांचप्रतिपादये
त्तेषांस्ववंश्यान्भुवःप्रमाणंदानच्छेदोपवर्णनंचपटेताम्रपट्टेवालिखितंस्वमुद्रांकितंचागामि

न्नृपवित्तापनार्थं दद्यात्॥८॥ येषां ब्राह्मणादीनां स्तुवं दद्यात्तेषां वस्त्राणि शासनपत्रं दद्यादिति संबंधश्च
तुर्थ्यर्थे षष्ठी॥ स्ववंश्यान्नृपित्रादीन् त्रीन्वहुवचनसामर्थ्यात् स्वं च कारात् संप्रदानं वंश्यानात्मानं च बहुवः दे
त्रादिकायाः प्रमाणं निवर्तनादि परिमाणम्॥ दीयत इति दानं भूम्यादेः छेदोऽपहारः उपवर्णितमस्य
दायजनकनृपा येन शास्त्रेण वृद्ध्या मानलक्षणेन तद्दानच्छेदोपवर्णनं महादानस्य भूम्यादेः छेदेन द्य
द्यात्॥ हिम्नस्योपवर्णनं पूर्वं सोमुकनद्याः पश्चिमतो मुकस्यानस्येदं क्षेत्रमित्येवमादिना कथके दव
के वक्ताराम्नातमेमुकपुत्रस्य यदत्तोपरिलेखितमिति स्वहस्तेन शाकनृपातीतसंवत्सररूपं द्विचं झोप
क्रमराणादिरूपं वा कालं पटे ताम्रपासिके वस्त्रस्वडेनाम्रपट्टे ताम्रफलके वा उत्कीर्णं लिखितं मुद्रा
मत्रिणा नहारलेखलिपित्वेति यावत्स्वमुद्राहं सवराहादिकानयांकितं सर्वोपरि चिह्नितं च
कृत्वाऽऽगामिनाम विद्यानां नृपाणां वित्तापनार्थं दानार्थं दानाच्छेद्योऽनुपालनमिति प्रार्थतार्थं दद्या
त्॥ यथाह योगीश्वरः॥ ॥दत्वा भूमिं निबंधं वा कृत्वा लेख्यं तु कारयेत्। आगामिभद्रनृपतिपरिज्ञानाय

मनुः॥ न च क्षुधास्य संसीदेच्छ्रोत्रियो विषये वसन्निति॥ चकारादश्रोत्रियोऽपि॥ न चान्यो
पि सत्कर्मनिरतः॥ ८०॥ अन्यः क्षत्रियादिरपि सत्कर्मक्षुद्व्याध्यमनदानेषु नितरां सम्यर्थक
र्मपरिहारेण राज्ञो विषये क्षुधा न सीदेत्॥ नेदं ब्राह्मणादीन्प्रत्युपदिश्यते प्रक्रमविरोधा
त् किंतु राजानं प्रत्येव तस्यैव फलसंबंधश्रवणात्॥ यथाह मनुः॥ यस्य राज्ञस्तु विषये श्रोत्रियः सी
दति क्षुधा॥ तस्यापि तत्क्षुधा राष्ट्रमचिरेणावसीदतीति॥ ततश्चायमर्थः॥ राजा स्वविषये ब्राह्म
णादिर्यथा क्षुधा नावसीदेत्तथा कुर्यादिति॥ अनवसादोपायमाह॥ ॥ब्राह्मणेभ्यः श्रुतवृत्तं प्रति
पादयेत्॥ ८१॥ ब्राह्मणेभ्यः श्रोत्रियेभ्यश्चकारादन्येभ्यः श्रुतज्जीवनपर्याप्तां भुवं सस्योत्पत्त्यर्हां प्र
तिपादयेद्दद्यात्॥ यथाह मनुः॥ श्रुतवृत्ते विदित्वास्य धर्म्यां वृत्तिं प्रकल्पयेत्॥ संरक्षेत्सर्वतश्चैनं
पिता पुत्रमिवौरसमिति॥ ननु प्रतिपादिताया अपि भुवः परेणापहारे तदवसादस्त
दवस्थ एवेत्यत आह॥ ॥येषां च प्रतिपादयेत्तेषां स्ववशपान्प्रभुवः प्रमाणं दानच्छेदोपवर्णनं च

पटे ताम्रपटे वा लिखितं स्वमुद्रांकितं चागामिनृपविज्ञापनार्थं दद्यात् ॥ ८ ॥ शायेषां ब्राह्मणादीनां भुवं दद्या
त्तेषां वंशसमानलक्षणां शासनपत्रं दद्यादिति संबंधः चतुर्थ्यर्थे षष्ठी ॥ स्ववंश्यान्पित्रादीन्त्रीन्बहुव
चनस्य सामर्थ्यात् त्रिवकारात्स्वं प्रदानवंश्यानात्मानं च भुवः क्षेत्रादिकायाः प्रमाणं निवर्त्तनादिपरिमाण
म् ॥ दीयत इति दानं भूम्यादि तस्य छेदो ऽपहारः उपवर्णनं दानस्य वा यजनकतया येन शास्त्रेण वर्ण्यमाण
लक्षणेन तद्दानछेदोपवर्णनं यद्वा दानस्य भूम्यादितस्य छेदो ऽवछेदो नद्याघाटादिलक्षणस्तस्योपवर्णनं पू
र्वतो ऽमुकतद्या पश्चिमतो ऽमुकस्थानमिदं क्षेत्रमित्येवमादिवाक्यकदंबकं चकारात् अनंतरममुकपुत्रस्य पद
त्रोपरिलेखितमिति स्वहस्तेन शाकनृपातीतसंवत्सररूपं रविचंद्रोपरागादिरूपं च कालं पटे कार्पासिके
वस्त्रखंडे ताम्रपट्टे ताम्रफलके वा ऽनन्तकालीनैर्वर्णैर्लिखितं मुद्रया प्रत्रिणानद्वारा लेखयित्वेति यावत् स्वस्य
मुद्रा हंससूराहादिका तयांकितं सर्वोपरि चिह्नितं च कृत्वा आगामिनां भविष्यतां नृपाणां विज्ञाप
नार्थं दानच्छेदो ऽनुपालनमिति प्रार्थनार्थं दद्यात् ॥ यथाह योगीश्वरः ॥ ॥ दत्वा भूमिं निबंधं वा कृत्वा

त्वालेख्यंतुकारयेत्॥आगामिभद्रनृपतिपरिज्ञानायपार्थिवः॥पटेवाताम्रपट्टेवास्वमुद्रोपरिचि
ह्नितम्॥अभिलेख्यात्मनोवंश्यानात्मानंचमहीपतिः॥प्रतिग्रहपरीमाणंदानच्छेदोपवर्णनम्॥स्वह
स्तकालसंपन्नंशासनंकारयेत्स्थिरमिति॥व्यासः॥स्थानंवंमहीपतिः॥इत्रिशानुपूर्वीचदेशग्राममुपाग
तान्॥ब्राह्मणांस्तुतथाचान्यान्मान्यानधिकृतानपि॥स्थानंराजधानी॥उपगतान्तत्कालआगं
तुकान्॥कुटुंबिनोथकायस्थान्दूतवैद्यमहत्तरान्॥मेदचंडालपर्यंतान्सर्वान्संबोधयन्निति।
॥मातापित्रोरात्मनश्चपुण्यायामुकसूनवे॥दत्तंमयामुकायाद्यदानंसब्रह्मचारिणे॥अनाच्छेद्यमनाहा
र्यंसर्वभागविवर्जितम्॥चंद्रार्कसमकालीनंपुत्रपौत्रान्वयागतं॥दातुःपालपितुःस्वर्गंहर्तुर्नरकमे
वच॥षष्टिंवर्षसहस्राणिदानच्छेदफलंलिखेत्॥स्वमुद्रावर्षमासार्द्धदिनाध्यक्षाक्षरान्वितः॥पाल
पितुःस्वर्गहर्तुर्नरकमेवच॥एवंविधंराजकृतंशासनमुदाहृतमिति॥भागोभ्यस्तुद्वैरिकमहत्तमादि
लभ्यैविशेषणावर्जितंमासार्द्धपक्षः।दिनाध्यक्षोवारः॥शासनपत्रलेखकश्चसंधिविग्रहाधिका

वि·टी·
५२

रीनन्नृपः कश्चित्॥ तथा च स्मृत्यन्तरे॥ संधिविग्रहकारी तु भवेद्यस्तस्य लेखकः॥ स्वयं राज्ञा समादि-
ष्टः स लिखेद्राजशासनम्॥ इति॥ अनेन भोगातिशयेन फलातिशय उपपादितः॥ ब्राह्मणानवसादेन का-
ङ्क्षन्नरपत्याह॥ ॥परदत्तां च भुवं नापहरेन्नृप॥८३॥ परैरन्यैर्नृपतिभिर्दत्तां भुवं यामक्षेत्रादिकां नापह-
रेत् किं तु पालयेदेव॥ चकारात्स्वदत्तामपि॥ स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्॥ षष्टिर्वर्षसह-
स्राणि विष्ठायां जायते कृमिः॥ इति वसिष्ठस्मरणात्॥ किंच॥ ब्राह्मणेभ्यः सर्वदायान्नृपः प्रयच्छेत्॥८४॥
दीयन्त इति दायाः विविधविषयाः धान्यादयः ब्राह्मणेभ्यः प्रयच्छेत् प्रकर्षेण प्रसन्नमनस्त्वाद्दद्यात्॥ यथाह योगी-
श्वरः॥ दृष्ट्वा ज्योतिर्विदो वैद्यान्दद्याद्गां काञ्चनं महीम्॥ नैवेशिकानि च तथा ह्यात्मरक्षाप्रकरे मनुः॥ ए-
वं प्रयत्नं कुर्वीत यथा न शक्यास्तेषु च॥ ज्ञाते प्रसाधने चैव सर्वालङ्कारिकेषु च॥ इति॥ यद्यपि सर्वत्राणि वान्मा-
तं गोपयेदित्यादिस्मृत्या सामान्यरूपेणैवात्मरक्षणं विहितं तथापि तस्याप्यापद्धर्माभिधायकत्वेन अनाप-
द्यपि राज्ञा सर्वदा कुर्त्येन सर्वकालमवधानेनायं दमुच्यत इति नानर्थक्यमिति तु शब्दार्थः॥ सुदर्शनस्य

राम
५१

स्यात्॥ ८६॥ सुदर्शनो विशिष्टवेषाभरणो भवेत्॥ चकाराद्द्वलदर्शनं निरंतरस्य भवेत्॥ यथाह मनुः॥ अलं
कृतश्च संपश्येदायुधीयं पृथग्जनं॥ वाहनानि च सर्वाणि शस्त्राण्याभरणानि चोत॥ षडुक्तं सर्वतो ह्यात्मानं गो
पायेदिति तदुपायमाह॥ ॥विषघ्नागदमंत्रधारी च॥ ८७॥ विषघ्नानि विषनाशकान्यगदा रोगदमनाश
कान्यथ ये मंत्रास्तद्धारणशीलो भवेत्॥ चकाराद्विषघ्नरत्नधारी च भवेत्॥ यथाह मनुः॥ विषघ्नैरगदैश्चा
स्य सर्वद्रव्याणि शोधयेत्॥ विषघ्नानि च रत्नानि नियतो धारयेत्सदेति॥ किंच॥ नापरीक्षितमुपयुंज्या
त्॥ ८८॥ परिचारकैरपरीक्षितमन्नादि नोपयुंज्यान्नोपभुंजीत॥ अपरीक्षितनिषेधेन परीक्षितम
भ्यनुज्ञायते॥ यथाह मनुः॥ तत्रात्मभूतैः कालज्ञैरहार्यैः परिचारकैः॥ सुपरीक्षितमन्नाद्यमद्यान्म
न्त्रैर्विषापहैरिति॥ स्मितपूर्वाभिभाषी स्यात्॥ ८९॥ स्मितपूर्वमभिभाषितुं शीलमस्य तथा
स्यात्॥ वध्येष्वपि न भ्रुकुटीमाचरेत्॥ ९०॥ वध्येषु चौरादिष्वपि स्वयं भ्रुकुटीं कोपावेशलक्षणं नाच
रेत्॥ तर्हि तेषां कथं दमनमितत्राह॥ ॥अपराधानुरूपं च दंडं दंड्येषु दापयेत्॥ ९१॥ दंड्येषु द

52

मि·टी·
५२

डार्हइथपराधानुरूपमपराधेचौर्यादावनुरूपंयोग्यंमहतिमहीयीपीसमल्पेयंयस्वल्पीयांसंदंडंदमनफल
कंक्रियाविशेषंदापयेदित्यादिद्वारान्प्रापयेत्॥चकाराद्देशकालवयोवस्थाद्यनुरूपंच॥यथाहयोगी
श्वरः॥ज्ञात्वापराधंदेशंचकालंबलमथापिवा॥वयःकर्मचवित्तंचदंडंदंडेषुपातयेदिति॥नहिकिंदंडेप्र
योजनकर्तव्यमेवराज्ञइत्यतआह॥ ॥सम्यग्दंडप्रणयनंकुर्यात्॥८२॥पत्रग्रहीत्वमुसलंराजासस्कं
द्धन्यात्तुतंस्वयमित्यादिविशेषविधानमश्नितंतस्यपापमेवसाम्यक्कृपयादमनंभवतितदाकथमित्यतआ
हसम्यग्दंडप्रणयनंकुर्यात्॥सम्यक्कृपयादंडस्यदमनंभवतितथादंडप्रणयनंकुर्यात्दंडस्यदमनार्थ
त्वात्॥यथाहगौतमः॥दंडोदमनादित्याहुस्तेनादांतान्दमयेदिति॥द्वितीयमयमराधेनसकस्यचिद्दं
मेत॥८३॥वत्वारोवाश्रयोवापियंब्रूयुर्वेदपारगाः॥सधर्मइतिविज्ञेयोनेतरेषांसहस्रशइत्यादिम
त्वादिवाक्यात्कथंचिद्देकस्मिन्नज्ञानकृतेपराधेराजन्नदंड्योपमस्मद्वाक्यादित्यादिवेदवित्संघे
नवचनस्यैवधर्मत्वमनुसंदधानोराजानायमनुजानातिदंड्यमुक्तोसित्वंगच्छयथेष्टमितितस्यकस्य

राम
५२

द्विष्टा वा देशमिष्टितीयमपराधं द्वितीयवारं कृतमन्यं वापराधं स राजा नष्टमेत ॥ अनेन नवप्रथमेपराधेनुज्ञानमप्यनुज्ञानं भवति ॥ यथाह गौतमः ॥ अनुज्ञानं वापेदं वित्समवायवचनादिति ॥ राजधर्मेषु पुनः कृच्छ्रेतराजपरामर्शोन्येन नियुक्तादिनाज्ञातमपि स्वयं नद्यामेनेत्येवमर्थं ॥ यथाह मनुः ॥ अमात्य प्राड्विवाको वा यः कुर्यात्कार्यमन्यथा ॥ तत्स्वयं नृपतिः कुर्यात्तं सहस्रं च दंडयेदिति ॥ अत्रैव हेतुमाह ॥ ॥ स्वधर्ममपालयन्नादंड्यो नाम नास्ति राज्ञां ॥ ९४ ॥ स्ववर्णाश्रमादिविहितधर्ममपालयान्नकुर्वन् राज्ञो दंड्यो नाम नास्ति ॥ यथाह योगीश्वरः ॥ अपि भ्राता सुतोर्घ्यो वा श्वशुरो मातुलोपि वा ॥ नादंड्यो नाम राज्ञोस्ति धर्मोद्विचलितः स्वकादिति ॥ एतदपि मातापितृव्यतिरेकेण ॥ तथा च शंख ॥ अदंड्यो मातापितरौ स्नातकपुरोहितपरिव्राजकवानप्रस्थाः श्रुतशीलशौचाचारवंतः ते हि धर्माधिकारिणः इति ॥ इदमपि धनदंडाभिप्रायेण ॥ यथाह बृहस्पतिः ॥ गुरून् पुरोहितान्मान्यांश्चादंडैनैव दंडयेत् ॥ विवादिनानराश्चान्यान् दोषार्थेन च दंडयेदिति ॥ पूर्वं सर्वत्रैकवक्तृवचनमेकेन राज्ञा कर्यं चिद

58

दंडितोथ न्येनास्ते दंडनीयस्त्येव मर्या॥ न च केप्यति कल्प्यायेन कान्त्या यन्नः॥ सचिङ्गमपि पापं तु ए
वे स्वरूपस्य कारणं॥ तदा दंडं निपुंजीत दोषमोक्षि प्रमलनरति॥ राजांतरेण गुरुतल्पादौ मगा विप्रा
विक्षितप्रत्यो राज्ञा पापकारणं एवो दीनि वदता विङ्गर स्तिं पामेष्ट कोदीति किं वक्तव्यमित्युक्तं भवति॥ दंडफ
लमाह॥ ॥यत्र श्यामो लोहिताक्षो दंडश्चरति निर्भयः॥ प्रजास्तत्रा विवर्द्धते नेता चेत्साधु पनि [illegible]
२५॥ यत्र राष्ट्रे दंडो निर्भयोऽप्रमाति हतश्चरति प्रतिवर्त्ते॥ न तत्र प्रजा विशेषणावर्द्धते कथं स निर्भयः प्रवर्त्त
नो भिन्यतश्चाह॥ नेता चेत्साधु पश्यतीति नेता राजा यदि साधु रागद्वेषो विहाय उक्तं पश्यत्स्य भवस्यति
तदा निर्भयः प्रवर्त्तेन इत्यर्थः॥ दंडाधिष्ठातृदेवतास्वरूपनिरूपक श्यामादि विशेषणत्रयेण दंडस्यापि त्रि
गुणात्मकत्वमभिहितं॥ तत्र श्यामत्वेन तामसत्वं लोहिताक्षत्वेन राजसत्वं निर्भयत्वेन च
सात्विकत्वमभिहितं॥ रजस्तमोभ्यामनुमतेः सत्वेन च प्रवर्त्तेरिति॥ उक्तदंडविधेर्विषयप्रदर्शनेनान्यत्राण
वादमाह॥ ॥स्वराष्ट्रे न्यायदंडस्याद् भृशदंडश्च शत्रुषु॥ सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः॥ स्वराष्ट्रेप

पराधीनस्तेष्वन्यापि न देशकालाद्यौचित्येन दंडोपस्य शत्रुषु शत्रुराष्ट्रेषु भ्रंश उत्कटो विनाशको दंडोपस
तथा स्यात्॥ यथाह मनुः॥ उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत्॥ दूषयेच्चास्य सततं यवसान्नोदकेंध
नमिति अस्य कृतविदंडवादमाह॥ ॥सुहृत्सु बंधुवर्गेषु स्निग्धेषु मित्रेषु शत्रुषु वा स्वदेशे वा विषये प्राज्ञ ज्ञो अ
कुटिलमतिः तथा त्राणेषु नृपाद्वा सिद्धपि दत्तमया महिषु तथैवार्चितो भवेदिति प्रत्येकं संबध्य
ते॥ शत्रुदेशगतेष्वप्येतेषु भ्रंशो दंडो न स्यात् किंतु स्वदेशगतेष्वपीत्यर्थः गच्छेवं दंडलब्धं कोचे काषे संचे
कोषसंचयः कार्यः तदभावे दानाद्यसिद्ध्या कथं कीर्तिरित्यत आह॥ ॥एवं छत्रस्य नृपतेः शिलोञ्छे
नापि जीवतः॥ विस्तीर्यते यशो लोके तैलबिन्दुरिवाम्भसि॥ ६७॥ एनं अथ राजधर्मस्त्यारेस्पाभिहितं
छत्रमात्राकारो यस्य स तथा तस्य नृपतेर्यशो लोके पृथिव्यां विस्तीर्यते विस्तारमायाति यथाम्भसि तैलबिं
दुस्तद्वत्। शिलोञ्छेनेति॥ अपि रिक्तार्थी शिलोञ्छेन जीवन्निव॥ शाल्यादेर्निपतितपरित्यक्तवल्लरी अह
णां शिलमेकैककणोपादानमुंछस्तयोः समाहारः शिलोञ्छं तेन जीवने विप्रस्य यथा कोशाद्यभावे पि छत्रमा

त्रेणैव यशोलाभस्तथा यथोक्तदंडेनात्मकोशस्यापि नृपतेरिति ॥ कैमुतिकन्यायपरत्वेन क्रिविशेषः ॥ श्लोकस्य ब्राह्मणमात्रद्रष्टृत्वात् विप्रो जातो इत्यादिनापरीत्युपक्रम्यमानत्वेन तदभिधानात् ॥ अथ राजधर्म इति राजपदेनोपक्रम्यैवं दृष्टस्य नृपतेरित्युपसंहारे नृपतिपदोपादानं तज्जातिमुक्तानामन्येषामपि यथोक्तधर्मप्राप्त्यर्थमनुनाराजधर्मोन्यत्र च हृप्यापि यथा ह ततो भवेन्नृपइति नृपमात्रेण राजधर्मातिदेशाभिधानात् ॥ यथोक्तधर्मानुष्ठानस्योपक्रमोपसंहारे फलसंयोगात् तमाह ॥ ॥प्रजासुखे सुखी राजा तद्दुःखे यश्च दुःखितः ॥ स कीर्तियुक्तो लोकेस्मिन् प्रेत्य स्वर्गे महीयते ॥ ९८ ॥ यो राजा प्रजानां लोकानां सुखे सति तेषु वहेतुना सुखवान्भोपदानात् पश्चात्तासां प्रजानां दुःखे सति तेषु नैव हेतुना दुःखवानतरतिमानभवति स लोकेस्मिन् जनपदे कीर्तियुक्तः सम्प्रेत्य पापानन्तरं स्वर्गे ब्रह्मलोकादौ महीयते मोदते एतेन यथोक्तधर्मजातस्यैहिकामुष्मिकफलकत्वेन सर्वधर्मोत्कृष्टतया वश्यमनुष्ठेयत्वमभिहितम् ॥ ॥इति श्रीमन्महाराजाधिराजश्रीवसिष्ठवंशावतंस श्रीकोंडपनायकात्मजश्रीमन्माणनायकापरनामधेयश्रीकेशवनायकशोत्साहितश्री

धर्माधिकारिरामपंडितात्मजनंदपंडितकृतौ विष्णुस्मृतिविवृतौ श्रीमत्केशववैजयंत्यां तृतीयोध्या
यः॥ ॥ ॥श्रीगोपीजनवल्लभायनमः॥ ॥श्रीविंदुमाधवायनमः॥श्रीगणेशायनमः॥ ॥पूर्वाध्याये
दंडं दंड्येषु दापयेदित्युक्तं॥सचदंडो द्विविधः शारीरोऽर्थदंडश्च॥यथाहनारदः॥शारीरश्चार्थदंड
श्च दंडस्तु द्विविधः स्मृतः॥शारीरस्ताडनादिस्तु मरणांतः प्रकीर्तितः॥काकिण्यादिस्त्वर्थदंडः सर्व
स्वांतस्तथैव च॥इति॥तत्रार्थदंडेऽपेक्षितं परिमाणं चतुर्थाध्यायेनाह॥जालस्थार्कमरीचिगतं र
जस्त्रसरेणुसंज्ञकम्॥१॥जालं गवाक्षस्तत्र तिष्ठतीति जालस्थास्ते च तेऽर्कमरीचयः सूर्यकिरणा
स्तद्गतं तत्रपरिदृश्यमानं यत्सूक्ष्मं रजस्तत्त्रसरेणुसंज्ञकं॥त्रसरेणुरितिसंज्ञा यस्य तत्तथा॥तत्सर्वप
रिमाणानां पूर्वावधिभूतम्॥यथाहमनुः॥जालांतरगते भानौ यत्सूक्ष्मं दृश्यते रजः॥प्रथमं तत्प्रमा
णानां त्रसरेणुः स उच्यते॥इति॥तदष्टकं लिक्षा॥२॥तेषां त्रयः सर्षपो राजिका॥तत्त्रयं गौरसर्षपः॥४॥
त्रसरेणूनामष्टकमष्टकमष्टानां समुदायो लिक्षाख्यदंडं प्रकांडम्॥ ॥तत्त्रयं राजसर्षपः॥३॥तासां लिक्षाणां त्रयं राज

60

वि॰टी॰
५५

तेषां राजसर्षपाणां षट्कं षण्णां समुदायं त्रयं गौरसर्षपः सिद्धार्थः ॥ गौरपदं न्यूनाधिकपरिमाणानां रक्ता
दीनां व्युदासाय ॥ तत्षट्कं यवः ॥५॥ तेषां गौरसर्षपाणां षट्कं षण्णां समुदायो यवः सोपि न सूक्ष्मो न स्थू
लः । किं तु मध्य एव ॥ यथाह मनुः ॥ सर्षपाः षड्यवो मध्य इति ॥ गौरसर्षपादीनां स्थूलसूक्ष्मत्वेन स्वरू
पवस्य तु तस्य श्रमुपसंहर्त्तुं शक्यमिति तस्यैव मध्यत्वोपादानं तदपि स्थूलस्थूलतरस्थूलतमसूक्ष्मसू
क्ष्मतरसूक्ष्मतमेति षट्कदापरिहारेणोपादेयं तत्त्रयं पकृष्णलं ॥६॥ तेषां यवानां वयं त्रयाणां स
मुदायः कृष्णलं कृष्णलानामिति कृष्णलं गुंजा ॥ सापि मध्यैव गुंजाशब्दपरिहारेण कृष्णलशब्दोपा
दानं सितासितगुंजापरिहाराय तस्याः स्तङ्गिनपरिमाणत्वात् ॥ तत्पंचकं माषः ॥७॥ तेषां कृष्णला
नां पंचकं पंचानां समुदायो माषः ॥ तद्द्वादश मद्वार्द्धी ॥८॥ तेषां माषाणां द्वादशं द्वादशं
द्वादशानां समुदायोऽक्षार्द्धं अर्द्धाक्षमिति चरूडासंज्ञा ॥ ननु षोडशमाषः कर्षोऽक्ष इति क्लिष्टा डा
परिभाषितषोडशमाषात्मककर्षसुवर्णपर्यायादक्षस्यार्द्धमिति योगिका ॥ द्वादशमाषात्मकत्वेन पादोनसुवर्ण

एम
५५

त्वात्॥ चतुर्विंशतिमाषस्याल्पस्याप्रसिद्धेश्च॥ यद्वाऽनेनैव योगबलेन चतुर्विंशतिमाषकोऽप्यल्पोऽस्ती किमस्य
ते॥ अस्याईमेव सचतुर्माषकं सुवर्णः॥९॥ अस्याईमेव द्वादशमाषके सचतुर्माषकं चतुर्भिर्माषकैः सहि
तं षोडशमाषः सुवर्णः॥ स एव च विस्तोत्कर्षश्चेत्युच्यते सुवर्णविस्तो हेम्नोऽक्ष इति त्रिकांडस्मरणात्॥ कु
रुदेशे पुनर्विस्तशब्देन पलमुच्यते॥ कुरुविस्तस्तु तत्पलमिति तस्यैव स्मरणात्॥ इह स्वतिस्तु सुवर्णशब्दा
र्थमनम्यथैवाह॥ स्नाम्रकर्षकृता मुद्रा विज्ञेयः कार्षिकः पणः॥ स एव ताम्रिका प्रोक्ता ताश्चतस्रस्तु दान
का॥ ते द्वादश सुवर्णस्तु दीनारश्चित्रकस्मृत इति॥ चतुःसुवर्णको निष्कः॥१०॥ चत्वारः सुवर्णाः पूर्वोक्ता
यस्मिन्स चतुःसुवर्णको निष्क इत्युच्यते॥ तदेव च पलं॥ पलं सुवर्णाश्चत्वार इति मानवे निष्कपलयोस्तुल्यपरिमा
णता प्रत्ययात्॥ लाघवाभिसंधिना च न पृथक् ज्ञाकरणं॥ सुवर्णरजतपरिमाणयोरंतरा सूत्रकरणं चाभि
यविधस्यापि निष्कस्य चतुःसौवर्णिकत्वाभिधानाय॥ अत एवमनुयोगीश्वराभ्यां रजतपरिमाणेपि चतुःसौ
वर्णिको निष्को॥ निष्कं सुवर्णाश्चत्वार इत्युक्तम्॥ यद्यपि साष्टशते सुवर्णानां हेम्नुरोऽब्रुषणोपले॥ दीना

वि०ट
५६

रेपि च निष्काख्यो निष्किकादिस्मरणान्निष्कशब्देनामर्थस्तथापि दंडविधावपमेव मुख्य इत्यस्यैव लक्षणमभि-
धानं ॥ यथाह बृहस्पतिः ॥ संख्या रश्मिरजोमूलमनुना समुदाहृता ॥ कार्षापणान्तसा दिव्ये नियोज्या
विनयेन तथेति ॥ व्यासस्तु सुवर्णनिष्कयो रूपभयोरप्यन्यथा परिमाणमाह ॥ ॥ पलं चाष्टौ सुवर्णं स्तु सुवर्णा
स्तु चतुर्दश ॥ एवं निष्कप्रमाणं तु व्यासेन परिकीर्तितमिति ॥ दीनारपरिमाणं तु स्मृत्यन्तरे ॥ दीनारो रूप
कैरष्टाविंशत्या परिकीर्तितः ॥ सुवर्णस्य प्रतितमो भागो रूपकमुच्यत इति ॥ कात्यायनस्तु बृहस्पतिव्याम
श्चात्वारिंशत्याणकः सुवर्णपरपर्यायो दीनारोभिहितः सनाथ्रिकाणत ॥ ताम्रकर्षकृता मुद्रेत्यक्रमाद
नेन तत्रत्यः सुवर्णशब्दोपि व्याख्यातः ॥ प्रसृतस्तु द्वात्रिंशत्कृष्णलवाः सो वर्णाख्या व्यावहारिको निष्को
वराहापरपर्यायो निष्कघत इत्यलं ॥ इदानीं रजतपरिमाणमाह ॥ ॥ द्वे कृष्णले समधृते रूप्यमाषक
॥१९॥ पूर्वोक्ते द्वे कृष्णले समधृते तुल्यपरिमाणे रूप्यसंबंधी माषको भवति ॥ अयं च राजसर्षपादी
नां यवांतानां यवानां त्रयाणामपि शेषः ॥ अन्यथा न्यूनाधिकपरिमाणेस्मै रुत्तरोत्तरपरिमाण कल्पने

राम
५६

तेषामपिवैषम्यापत्तेः॥यद्यपिस्थूलेसूक्ष्मेवाद्वेकृष्णलेतुल्यंपरिमाणोभवतिएवंतथापिमध्यमपरिमाणोया
ज्ञवल्क्ययोगीश्वरीयेतद्विशेषणास्यसर्वविशेषत्वात्॥वल्लोपितावानेव॥वल्लःस्यात्कृष्णलद्वयमितिस्मरणात्॥व
ल्लःशिंबीधान्यविशेषः॥तत्षोडशकंधरणं॥१२॥तेषांरूप्यमाषाणांशोडशकंषोडशानांसमुदायोध
रणंतदेवचपुराणइत्युच्यते॥तेषोडशस्याद्धरणंपुराणश्चैवराजतइतिमनुस्मरणात्राजतइतिविशेषो
पादानात्सौवर्णंधरणंत्वन्यदेव॥तदप्याहसएव॥पलंसुवर्णाश्चत्वारःपलानिधरणंदशेति॥राजतेर्द
शभिर्द्धरणैराजतंशतमानं॥धरणानिदशज्ञेयःशतमानंतुराजतइतिवनुस्मरणात्॥शतमानमपिनिष्क
पलयोस्तुल्यंपरिमाणमेवशतमानंचदशभिर्द्धरणैःपलमेवचानिष्कंसुवर्णाश्चत्वारइतियोगिस्मरणात्॥
राजतइतिविशेषोपादानात्सौवर्णःशतमानःसौवर्णैर्दशभिर्द्धरणैर्भवति॥शतमानंभवतियेनहि
रण्यंपभिमतइत्यापस्तंबस्मरणात्॥विष्णुगुप्तस्तुराजतपरिमाणमन्यथैवाह॥॥अष्टाशीतिर्गौरसर्षपा
रूप्यमाषःतेषोडशधरणम्॥निष्कावाविंशतिर्वारूप्यपलंचदशधरणिकम्॥तत्पलानांशतंतुला॥तत्तु

लाविंशतिर्भार इति॥ निष्काबोराजमाषा॥ त्रिंशां त्वपि पाहुर्लौक्रियां पलशतं भारस्याद्विंशतिस्तुला॥ आ
चितो दशभारास्तु शाकटो भार आचित इति॥ इदानीं ताम्रपरिमाणमाह॥ ॥ताम्रकार्षिकः कार्षापणः
॥१३॥ कर्षः षोडशमाषः पलचतुर्थांशः। ते षोडश स्तः कर्षो स्त्री पलं कर्षचतुष्टयमिति च स्मरणात्॥ कर्षे
णोन्मितः कार्षिकस्ताम्रस्यासौ कार्षिकश्चेति ताम्रकार्षिकः कार्षपरिमितताम्रनाणकः कार्षापण इत्य
र्थः॥ इष्टापूर्ते निति लुदाकर। छादसः पञ्चाह्वहस्पतिः॥ ताम्रकर्षकृता मुद्रा विज्ञेयः कार्षिकः पण इति
॥ स कार्षापणः स्त्राम्रिकासाम्रिकोडिका पणाश्चे सुच्यते॥ कार्षापणस्तु विज्ञेयः निकात्यायनस्मरणा
च॥ यत्तु पणो शीतिक पईकइति नदु पचा रात्र मूल्यप्रे नाभिधत्ते षोडशपणो पुरो पञ्चात्स्यात्कात्यायन
॥ कार्षापणो दक्षिणस्यां दिशि रौप्यः प्रवर्तते॥ पणो निबद्धः पूर्वस्यां षोडशैव पणाः स त्विति॥ षोडशा
णा मूल्यरजतनिर्मितः षोडशपणा च लवादिभेदेन व्यवस्थितः इति॥ पत्नुः माषो विंशतिमो भागः पण
स्य परिकीर्तितः शतिनस्यं च सुवर्णोपलयन्त्वे॥ पलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्तितमिति यो गिस्म

रणान्॥एवंचपणपिसुवर्णाद्यावस्तकर्षकार्षापणपणशब्दाःसमानार्थास्तर्थास्त्रथापिकर्षपणका
र्षापणशब्दास्ताम्रविषयाएव॥सुवर्णादिविस्त्रशब्दाःसुवर्णविषयाएवेतिव्यवस्था॥इहतुपराशरस्वषोड
शरस्वषोडशभिर्माषैःकर्षमाह॥॥पंचगुंजोभवेन्माषःकर्षोषोडशभिश्चतैः॥तैश्चतुर्भिःकरःप्रोक्तोदाने
मानेचपेशसइति॥पेशसोहेम्नः॥एवंड्ब्यांतेष्वपीदंपरिमाणमूहनीयं॥एवंपणादिपरिमाणंनिरू
प्यशास्त्रपरिभाषामाह॥॥पणानांद्वेशतेसार्द्धेप्रथमःसाहसःस्मृतः॥मध्यमःपंचविज्ञेयःसह
स्रंत्वेवचोत्तमः॥१४॥पणानांकार्षापणानांसार्द्धद्विशतेप्रथमसाहसः॥पणानांपंचशतानिमध्यमे
साहसः॥पणानांसहस्रमुत्तमसाहसोदंडः॥इदममतिपूर्वापराधे॥मतिपूर्वापराधेतुयोगीश्वरो
क्तं॥साशीतिःपणसाहस्रोदंडउत्तमसाहसः॥तदर्द्धंमध्यमःप्रोक्तस्तदर्धमधमःस्मृतइतिद्रष्ट
व्यं॥अत्रविशेषोनारदोयः॥चतुर्विंशावरःपूर्वःपरःषण्णवतिर्भवेत्॥शतानिपंचतुपरोमध्यमोद्वि
शतावरः॥साहस्रस्तूत्तमोज्ञेयःसतुपंचशतावरः॥त्रिविधःसाहसेष्वेवंदंडउक्तःस्वयंभुवेति॥का

त्यायनः॥ सुवर्णशतमेकं तु विषाहो दंडमर्हति॥ अंगच्छेदेन दंडं तु संदंशाहै स्मृतं तु कं॥ मनुः॥ काषपिणं
भवेद्दंड्यो यत्रान्यः प्राकृतो जनः॥ तत्र राजा भवेद्दंड्यः सहस्रमिति धारणा॥ कात्यायनः॥ माषः पादो द्विपा
दो वा देयो यत्र प्रकल्पितः॥ अनिर्दिष्टं तु सौवर्णं माषकं तत्र कल्पयेत्॥ यत्रोक्तो माषको दंडो राज्ञस्तत्र
प्रकल्पयेत्॥ मध्यमानां तु रौप्यस्यादधमानां तु ताम्रक इत्याद्यूह्यतो वधेयम्॥ ॥इति श्रीमन्महाराजा
धिराज श्री वसिष्ठवंशावतंस श्री कोंडपनायकात्मज श्री नम्मसनायकाय र्तो मधेय श्री केशवला
यकश्रोत्साहित श्रीधर्माधिकारिरामपंडितात्मज नंदपंडित कृतौ विष्णुस्मृतिटीकायां श्रीमत्यां केश
ववैजयंत्यां चतुर्थोऽध्यायः॥ ॥छ॥ एवं पूर्वाध्यायेनार्थदंडं निरूप्य शारीरदंडं निरूपयन्नेव तद्भयविनि
योगमष्टादशस्वपि व्यवहारपदेषु पंचमाध्यायेनाह॥ ॥तत्र शारीरो दंडो दशधा॥ शारीरो दशधा प्रोक्त
इति स्मरणात्॥ नायं नियमः॥ तंधनांककरणकर्मकरणकर्प्रकरणबंधनागारप्रवेशताडनमुंडना
दीनामन्येषामपि दर्शनात्॥ तत्र नवविधमाह मनुः॥ दशस्थानानि दंडस्य मनुः स्वायंभुवोऽब्रवीत्॥ उप

स्यमुदरं जिह्वा हस्तौ पादौ च पंचमं ॥ चक्षुर्नासां च कर्णौ च धनं देहस्तथैव चेति ॥ तथा ॥ शिरसो मुंडनं दंडस्त
स्य निर्वासनं पुरात् ॥ ललाटे चाभिशस्तांकः प्रयाणं गर्दभेन त्वित्यादि तत्र तत्रावधेयम् ॥ तत्राष्टादशानाम
पि व्यवहारपदानामुपजीव्योपजीवकभावाद्युभावान् पाठक्रमस्यानंतरत्वे च पूर्वं साहसादंडोपक्रमा
च्च साहसमेव तावत् शरीरदंडविनियोगमुपक्रमते ॥ तल्लक्षणमाह नारदः ॥ सहसा क्रियते कर्म यत्किंचि
द्बलदर्पितैः ॥ तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते ॥ तत्पुनस्त्रिविधं ज्ञेयं प्रथमं मध्यमं तथा ॥ उत्त
मं चेति शास्त्रेषु तस्योक्तं लक्षणं पृथक् ॥ फलमूलोदकादीनां क्षेत्रोपकरणस्य च ॥ भंगाक्षेपोपमर्दा
द्यैः प्रथमं साहसं स्मृतम् ॥ वासःपश्वन्नपानानां गृहोपकरणस्य च ॥ एतेनैव प्रकारेण मध्यमं साहसं
स्मृतं ॥ व्यापादो विषशस्त्राद्यैः परदाराभिमर्शनं ॥ प्राणोपरोधि यच्चान्यदुक्तमुत्तमसाहसं ॥ तस्य
दंडः क्रियापेक्षः प्रथमस्य शतावरः ॥ मध्यमस्य तु शास्त्रज्ञैर्दृष्टः पंचशतावरः ॥ उत्तमे साहसे दंडः
सहस्रावर इष्यते ॥ वधः सर्वस्वहरणं पुरान्निर्वासनांकने ॥ तदंगच्छेद इत्युक्तो दंड उत्तमसाहसेति इ

॥तत्रोत्तमोत्तमसाहस्रेतमाह॥ ॥अथमहापातकिनो ब्राह्मणवर्ज्जंसर्वेवध्याः॥२॥ ॥अथेतिदंडविनि
योगाधिकारः॥ महापातकिनोब्रह्महादयोवक्ष्यमाणास्त्वारश्चेत्ब्राह्मणंवर्जयित्वासर्वेवध्याः॥ वधो
त्रप्राणवियोगफलकोव्यापारः॥ इदंचप्रायश्चित्ताकरणे॥ चतुर्णामपिचैतेषांप्रायश्चित्तमकुर्वतां॥ शा
रीरंधनंसंयुक्तंदंडंधर्म्यंप्रकल्पयेदिति॥ मानवात्॥ चतुर्णामपितेषांब्रह्महादीनांशारीरोदंडोवधः। धनदं
डःसर्वस्वापहारः। एतदुभयंसमुच्चयेनक्षत्रियादिविषयं॥ क्षत्रियादीनांब्राह्मणवधेवधःसर्वस्वहरणं
चेतिबौधायनस्मरणात्॥ ब्राह्मणस्यतुसर्वस्वापहारएवनवधः॥ महापातकयुक्तोपिनविप्रोवधमर्ह
तीतिबृहस्पतिस्मरणात्॥ महापातकिपदेनेवासिष्ठोसर्वपदोपादानंमहापातकसमेष्वपिवधप्रा
प्त्यर्थंअतएवयाज्ञवल्क्यः॥ पितुःस्वसारंमातुश्चमातुलानींस्नुषामपि पत्न्याघुपक्रम्यछित्वालिंगंवध
स्तस्यसकामायाःस्त्रियाअपीत्याह॥ एवमन्यत्राप्युदाहार्यं॥ इदंचकामतोमहापातकेषुज्ञेयं॥
अकामतस्तूत्तमसाहस्रोदंडः॥ यथाहमनुः॥ इतरेकृतवंतस्तुपापान्येतान्यकामतः॥ सर्वस्वहा

रमर्हंतीति सकामाक्षेप्रवासनमिति॥ इतरेविंशतिरिक्ताः॥ प्रवासनंवधः॥ अयमर्थः॥ क्षत्रियादीनांकामतो
महापातकेषुप्रायश्चित्ताकरणेवधसर्वस्वापहारौकार्यौ॥ आद्यायांश्चेन्नकरोतितत्प्रसाहसोदंडएवंतेषा
मेवाकामतस्तेषुप्रायश्चित्ताकरणेसर्वस्वापहारमात्रंकरणेतुमध्यमसाहसोदंडइति॥ ब्राह्मणवर्जमि
त्यत्रहेतुमाह॥ ॥नशारीरोब्राह्मणस्यदंडः॥ २॥ शारीरःशरीरसंबंधीअंगच्छेदादिरपियतोनब्राह्म
णस्यदंडः॥ नत्वंगभेदंविप्रस्यप्रवदंतिमनीषिणइतिहारीतस्मरणात्॥ कथंतर्हिमहापातकेस्यदं
डइत्यतआह॥ ॥स्वदेशात्ब्राह्मणंकृतं॥ कंविवासयेत्॥ ३॥ स्वदेशात्स्वराज्याधीनाद्राष्ट्राद्व्यप्रमा
णःकृतोकश्चिदंकंयस्यतथाविधंब्राह्मणंविवासयेत्निष्काशयेत्॥ यद्वा॥ वाससोविगतोविवासाः
विवासंसंकरोतीतिणिचिक्तेरणाविष्ठवत्त्वातिपदिकस्येतिटिलोपेरूपं॥ नग्नीकुर्यादित्यर्थः॥ अथ
वावसत्यस्मिन्नितिवासोगृहंविवासयेद्गृहंकुर्यादिति॥ एवंचानुवधाद्युपेदस्यावासससम
सौयोज्यो॥ महापातकविशेषेणांकल्पमवस्थामाहि॥ तस्यचब्रह्महत्यायामशिरस्कंपुरुषंलला

वि·टी·
६०

टेकुर्यात्॥४॥तस्य ब्राह्मणस्य ब्रह्महत्यायां ब्रह्मणो ब्राह्मणस्य हननं ब्रह्महत्या तस्यां जातायामशि
रस्कं शिरोहीनं पुरुषं पुरुषाकृतिमंकं ललाटे कुर्यात् तच्च कारागृहे रोमुंडनादिच। यथाऽपमः॥ ब्राह्मण
स्यापराधेषु चतुर्ष्वपि विधीयते। शिरसो मुंडनं दंडः पुरान्निर्वासनं तथा। प्रख्यापनार्थं पापस्य भय
ण गर्दभेन च। ललाटे चांककरणं कुर्याद्राजा यथाविधि॥ सुराध्वजं सुरापाने॥५॥ सुरायास्त्रिविध
याअपि पाने सुराध्वजं शौंडिकद्वारस्थितध्वजाकृतिमंकं॥ श्वपदं स्तेये॥६॥ श्वपदं श्वपदाकारमंकं
स्तेये सुवर्णस्तेये॥ भगं गुरुतल्पगमने॥७॥ गुरुतल्पं पितृभार्या तद्गमने भगं भगाकारमंकं ब्राह्म
णस्य ललाटे कुर्यादिति प्रत्येकं संबध्यते। असंक्रांतं च तत्र दाहकृतिना न प्रायश्चित्तेन कार्यं यथाह बौध
यनः। न प्रायश्चित्तेन ललाटे कपित्वा विषयांतान्निर्वासनमिति। यद्यपि संसर्गिणामंकविशेषो नो
क्तस्तथापि येन महापातकिना पापसंसर्गस्तदंकेनैवांकयेद्यो येन संवसत्येषां सतल्लिंगोऽभिजाय
त इति कर्मविपाकसंस्थालिंगास्तस्यैव दहनं कुर्यादिति प्रायश्चित्तसामान्यलिंगाद्या इदमपि प्रायश्चित्ता

राम
६०

करणे तत्करणेऽन्त्यमसाहसो दंड एवमंकनीय इत्याह मनुः ॥ प्रायश्चित्तं तु कुर्वाणाः सर्वे वर्णा यथोदितं
नांक्या राज्ञा ललाटेषु दाप्यास्तूत्तमसाहसमिति ॥ यत्तु प्रायश्चित्ताकरणेऽकनं क्षत्रियादीनामप्यव्रति
रेकेणोक्तं तेन ब्राह्मणसमानधर्मस्य न स्यत्क्षत्रियादिविषयमेवेदं ॥ इतरेषां वधविधानादंकन
निषेधाच्च यथाहोशनाः ॥ ब्राह्मणस्यापराधेषु चतुर्ष्वंको विधीयते । इतरेषां तु वर्णानामंकनं नात्र का
र्येत ॥ महापातकयुक्तांश्च वधदंडेन शातयेदिति ॥ एतदपि कामतो महापातकेष्व् अकामतस्तु म
नुः आगस्सु ब्राह्मणस्यैषु कार्यो मध्यमसाहसः ॥ विवास्यो वा भवेद्राष्ट्रात्सद्रव्यः सपरिच्छद इति
आगस्सु महापातकेषु प्रायश्चित्तकरणापोर्यथाक्रमं मध्यमसाहसद्रव्यविवासने द्रष्टव्ये ॥ त
दपराधांतरे ब्राह्मणस्य कथमित्यत आह ॥ अन्यत्रापि वधकर्मणि तिष्ठंतं समग्रधनमक्षतं विवा
सयेत् ॥ ८ ॥ वध्यं वधार्हं वधनिमित्तमिति यावत् । अन्यस्मिन्नपि कर्मणि वर्त्तमाने कूटशास
नकरणादौ वर्त्तमानं ब्राह्मणं समग्रमनपहृतं धनं यस्य तादृशमक्षतमक्षतकरच्छेदादिरहितं वि

वासयेत् निष्काशयेत् संभवत्स्ववधन्तु श्रवणनासाकरणाद्यसंभवः। यथाह मनुः। न जातु ब्राह्मणं हन्या
त्सर्वपापेष्वपि स्थितं। राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतमिति। पञ्चापक्षे वेनोक्तं चक्र निरोधो ब्रा
ह्मणस्येति निर्वासनकाले वस्त्रादिना वरोधपरं अङ्कनं तु ब्राह्मणोऽङ्कनेदिति मनुस्मरणात्। तिष्ठ
तमिति शत्राववर्तमानक्रियेषेयं वा पदं डोनभूतभाविक्रियस्येति मते आरम्भे प्रथमं दद्यात्स्वह्
न्ते मध्यमः स्मृतः। यस्य योषिदिति दोदण्डः सपर्याप्तस्य वेश्मनेदिति कात्यायनेनत नत्रतत्र दण्डात
राभिधानात् आरम्भे अध्यवसायमात्रे। प्रवृत्ते संपादितसामग्र्याके। पर्याप्ते संपूर्णीकृतक्रिये यथ
थाह कर्मोपपाद॥ कूटशासनकर्तृंश्च राजा हन्यात्॥ ए॥ शासनं पट्टताम्रपट्टे वा लिखितमित्यादि
नोक्तं तद्ये कूटं राजाज्ञामन्तरेण स्वेच्छाकल्पितं कुर्वन्ति तान् मात्यादीन् राजा हन्यात्। द्विष्टसेविन
राश्च कारास्थकृतिभेदकांश्च। यथाह मनुः॥ ॥ कूटशासनकर्तृंश्च प्रकृतीनां च दूषकान्। स्त्री
बालब्राह्मणघ्नांश्च हन्याद्द्विट्सेविनस्तथेति यत्तु योगीश्वरेणोक्तं तुलाशासनमानानां कूटकृन्नाणा

कस्यचा। एभिश्च व्यवहर्त्तायः सदाप्योदममुत्तममिति तन्न द्वाभ्यामेव विषयं तस्य वधनिषेधात्। राजयदं
तस्य हननावश्यकर्त्ताबोधं नाय। यथाह मनुः। अमात्यः प्राड्विवाको वाय: कुर्यात्कार्यमन्यथा। तत्स्व
यं नृपतिः कुर्यात्तं सहस्रं च दंडयेदिति॥ कूटलेख्यकारांश्च॥१०॥ ॥राजशासनातिरिक्तम
पि व्यवहारिकं लेख्यमृणादिपत्रं कूटं कृत्रिमं ये कुर्वंति तानपि हन्यात्। यथाह कात्यायनः॥ प्रमाणे
न तु न्यूनेन मुद्रया वापि कूटयं। कार्यं तु साधं धोवे सदंद्याद ममुत्तममिति। स्थावरे विशेषमा
ह स एव। स्थावरे विक्रयाधाने लेख्यं कूटं करोति यस्स सम्यक्प्रभावितः कार्यो जिह्वापाणिपहीनवर्जित
इति। चकारात्कूटसाक्षिकारात्कूटसाक्षिणश्च। कूटसाक्ष्यं तु कुर्वाणान्त्रीन्वर्णान्प्रवासयेत्कोटय
:। प्रवासयेद्दंडयित्वा ब्राह्मणं तु विवासयेदिति कात्यायनस्मरणात्। प्रवासयेन्मारयेत्। यत्तु योगीश्व
रेणोक्तं पृथक्पृथग्दंडनीयाः कूटकृत्साक्षिणस्तथा। विवाद्विगुणं दंडं विवास्यो ब्राह्मणः स्मृ
तेति। द्विगुणं दंडवचनं तत्साक्षिकूटविषयं॥ गरदाग्निदप्रसह्यतस्करान्स्त्रीबालनपुरु

षघातिनश्च ॥२१॥ गरंददातीति गरदो विषप्रयोक्ता। अग्निदः परगृहादिदाहकर्ता। प्रसह्य बला
त्कारेण तस्कराः परस्वापहारिणः। स्त्रीबालपुरुषाःज्ञातिमात्रेण तान्घ्नंतीति तद्घातिनस्तान्हन्या
त्। व्यापादो विषशस्त्राद्यैः परदाराभिमर्शनं। प्राणोपरोधियच्चान्यदुक्तंसंसाहसंस्मृतमितिना
रदोक्तेषामुत्तमसाहसत्वमभिधायवधः सर्वस्वहरणंपुरान्निर्वासनांकने। तदंगच्छेदइत्यु
क्तो दंडउत्तमसाहसइतिवधाभिधानात्। सचानुबंधाद्यपेक्षयोन्नेयः। योगीश्वरोपि॥ क्षेत्र
वेश्मवनग्रामविवीतखलदाहकाः॥ राजपत्न्यभिगामीच दग्धव्यास्तु कटाग्निना॥ शस्त्रावपा
ते गर्भस्यपातनेचोत्तमोदमः। उत्तमोवाधमोवापि पुरुषस्त्रीप्रमापणे। चकारात्तादृशस्त्रीप्र
मापणे साहसमेव। विषाग्निदां पतिगुरुनिजापत्यप्रमापिणीं। विकर्णकरनासोष्ठां कृत्वा गो
भिः प्रमापयेदिति॥ ॥एवं धान्यंदशभ्यः कुंभेभ्योधिकमपहरेत्तु ॥२१॥ धान्यं संबंधी हि यद्वादित
घेदशभ्यः कुंभेभ्योधिकमपहरंस्तु हन्तव्यः। न्यूनेपि हन्यात्। विंशतिद्रोणाः कुंभः। द्रोणैः षोडशभिः खारी। विंशत्या

कुंभ उच्यते इति भविष्यपुराणात् । शाकचिंत्तु कुंभो द्रोणद्वयं ज्ञेयः खारी द्रोणास्तु षोडश इत्युक्तं । तद्देशका
लहर्तृक्रियमाणस्वामिगुणापेक्षया योज्यं । यथाह मनुः ॥ धान्यं दशभ्यः कुंभेभ्यो हरतोभ्यधिकं वधः ॥
शेषेप्येकादशगुणं दाप्यस्तस्य च तद्धनमिति दशकुंभन्यूने तु वदत्यति ॥ ॥ धरिममेयानां शतादभ्यधि
के ॥ १३ ॥ धरिमेन तुलया मीयंत इति धरिममेयानि सुवर्णरजतादीनि ॥ तेषां ये माषशतादभ्यधि
कमपहरेत्पुरुषान्न हन्यादभिरभिव्याख्याधिकस्योत्तरावधिश्रन्यत्वगमयति ॥ यद्यपि धरिममेयानि गु
डादीन्यपि भवंति तथापि मानवे सुवर्णादिभिरेव तेषां विशेषणात्रान्यसंभवः यथाह मनुः ॥ तथा धरिम
मेयानां शतादभ्यधिके वधः सुवर्णरजतादीनामुत्तमानां च वाससां । आदिशब्दाद्गृहीतायुपसंग्रह
ः सुवर्णरजतादीनामुत्तमानां च वाससां । रत्नानां चैव सर्वेषां शतादभ्यधिके वध इति नारदस्मरणा
त् । शतमत्र माषाणामेव मानवे सदंडप्रात्युपान्माषमिति माषस्यैवोपक्रमात् । शतन्यूने तु वदत्यति
यद्यप्येतच्छ्लेयदंडप्रस्तावेभिधेयं तथापि साहसेपि तत्संभवतीति नात्रासंगतिः ॥ येचाकुलीनाराज्यम

68

वि॰ श्व
६३

मिकामयेयुः ॥२४॥ अकुलीना अराजबीजिनो दासीपुत्रादयो वा ये राज्यं अभिकामयेयुस्तानपि हन्यात्
अभिरक्तास्त्वर्थाः ते न राज्यैकदेशकामनायां न वधः किं तूत्तमसाहसो दंडः पदेति गम्यते चकाराद्राज
क्रीडाद्यनुकुर्युः । यथाह कात्यायनः ॥ राजक्रीडासु ये सक्ता नराः नष्टं स्तु पजीविनः । अप्रियं वास्य व
क्तारो वधं तेषां प्रकल्पयेदिति राजा स्वनाद्यारोहणे तु मध्यमसाहसो दंडः । यथाह योगीश्वरः ।
राजयानासनारोढुर्दंडो मध्यमसाहस इति । कोशापहारे तु वध एव । यथाह मनुः ॥ राज्ञः कोशापहर्तॄंश्च
प्रतिकूलेषु च स्थितान् ॥ घातयेद्विविधैर्दंडैर्हरेत्सर्वस्वमेव वेति ॥ सेतुभेदकांश्च ॥ २५ ॥ सेतुर्जलप्र
वाहबंधः स च द्विविधः खेयो बंध्यश्च यथाह नारदः । सेतुश्च द्विविधो ज्ञेयः खेयो बंध्यस्तथैव च ॥ तोय
प्रवर्त्तनात् खेयो बंध्यः स्यात्तन्निवर्त्तनादिति । तस्य भेदका भेत्तारो ये तानपि हन्यात् । यदि न प्रतिसं
स्कुर्युस्तत्संस्कारे तूत्तमसाहसो दंड एव । यथाह मनुः । तडागभेदकं हन्यादप्सु शुद्धवधेन वा । तद्वापि
प्रतिसंस्कुर्याद्दाप्यश्चोत्तमसाहसम् । तडागभेदात्सेतुभेदादिनाम सेतुभेदकारी तु क्रियमपि हन्यात् । यथा

स्म
६३

हयोगीश्वरः॥ विषदुष्टां स्त्रियं चैव पुरुषघ्नीमगर्भिणीं सेतुभेदकरीं वाप्सु शिलां बध्वा प्रवेशयेदिति
चकारात्कोष्ठागारादिभेदकांश्चाय यथाह मनुः। कोष्ठागारेश्वरः। विषदुष्टां स्त्रियं चैव पुरुषघ्नीमगर्भिणीं से
तुभेदकरीं वाप्सु शिलां बध्वा प्रवेशयेदिति। चकारात्कोष्ठागारायुधागारदेवतागारभेदकार इह
स्याश्वरथहहस्त्यहन्यादेवाविचारयन्निति। कोष्ठं वक्षसमूहः। प्रसह्य तस्कराणां चावकाशभक्तप्रदो
श्च॥२६॥ ये प्रसह्य तस्करा बलावष्टंभेन चौरास्तेषामवकाशं निवासस्थानं भक्तमशनं च प्रकर्षेण ज्ञात
पेददाति तांश्च हहेणांच। यथाह योगीश्वरः भक्तावकाशाग्न्युदकमन्त्रोपकरणव्ययान्दत्वा चौरस्य वा
हंतुर्जानतो दम उत्तम इति। उक्तार्थस्य च विस्पष्टार्थमाह॥ अमत्र राज्ञाशक्तेः॥२७॥ यदुक्तं चौराव
काशभक्तप्रदानृन्यादिति तद्वा राज्ञाशक्तेरन्यत्र राज्ञाशक्तिं विना राज्ञस्तच्चौरनिवारणेन वा क्रिस्नदा
ग्रामवासिना मात्मत्राणाय चौरादिभ्यस्तत्राणेपि न वधः रस्य र्घः। सर्वत एवात्मानं गोपायेदित्यात्मरक्ष २
णस्य पथ्या कथं विदाव शपकत्वान्॥ ।स्त्रियमशक्तेस्तत्कान्तदति क्रमिणीं च॥२८॥ मरणादिसमर्थे

वि॰टी॰
६४

ऽप्यशक्तो निरोद्धुमन्यायमर्थमैत्र्या यस्यास्तं मर्यादामतिक्रमितुं परस्वरूपोपभोगं लंपटतया शीलमस्याप्त
वस्त्रियं हस्यान् । यथाह मनुः॥ मन्त्रि रिलक्षयघ्नाकुस्त्रीत्ता निवलदर्मिना। तांश्चामिस्वाद्येझाज्ञा संस्थाने वकुरसंस्थि
त इति वेकारात् स्तपलादिगामिनो वा तथा चपमः॥ हषलस्ववते पानुत्राप्सरणी मदमोहिता। तांश्च भि
स्वाद्येझाज्ञा संस्थानेचभ्मघातिनां॥ वैसप्तवासः श्रियंवा पिञ्जाह्नाणी श्वेवतेनुपा। त्रिरसोमुंडनंतस्याः प्रया
णां गर्दभेन तु। बृहस्पतिः गृहमागस्य पानारीं पुलोमस्पर्शनादिना। कारयेत्तत्रसाहं घानतस्याहिदमस्म
ना॥ छित्त्वनासोष्ठकर्णे तु परिभ्राम्य पुमजापेदिति। एवं साहसे दंडो निरूपितः इदानीं दंडपारुष्येतं प्रेक्ष
ते। तत्तन्त्वत्रणमाह नारदः॥ परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः। भस्मादिभिश्चोपघातो दंडपा
रुष्यमुच्यते इति तदपि त्रिविधं। तस्यापि दृष्टं त्रैविध्यं हीनमध्योत्तमानां च द्रव्याणां समतिक्रमात्। त्री
ण्येव साहसान्याहुस्तत्रकंटकशोधनमिति तत्रोत्तमवर्णातिक्रमे दंडमाह॥ हीनवर्णोऽधिकवर्णा
स्य येनांगेनापराधं कुर्यात्तदेवास्य शातयेत्॥ २९॥ हीनवर्णः शत्रियादिरधिकवर्णस्य ब्राह्मणादेर्येनां

गेनहस्तपादादिनापराधंप्रहारादिकुर्यात्तत्तदेवांगमस्यहीनवर्णस्यशातनयेच्छिंद्यात्।यथाहमनुः।येनके
नकेनचिदंगेनहिंस्याच्छ्रेयांसमंत्यजः।छेत्तव्यंतत्तदेवास्यतन्मनोरनुशासनमिति।अंत्यजग्रहणंक्षत्रिय
शूद्रोपलक्षणार्थं।यथाहयोगीश्वरः।विप्रपीडाकरंछेद्यमंगमब्राह्मणस्यत्विति।वैश्यस्यापिक्षत्रियापका
रिणोंगच्छेद्यस्यवावैश्यापकारिणोप्ययमेवंदंडः॥सामान्यसूत्रंमनूक्तविषयेष्वेवंविधदंडप्राप्त्यर्थं
विशेषसूत्राण्येवंगविशेषनियमार्थानीतिनात्यंतरानर्थकं॥एकासनोपवेशीकट्यांकृतांको
निर्वास्यः॥२०॥हीनवर्णोधिकवर्णस्येतियावत्समवर्णाक्रोशनमनुवर्त्ततेसतस्यैकासनोपवे
शनशीलःकट्यांस्फिचिवासायसेनांकितोराष्ट्रान्निष्कासनीयः॥यथाहमनुः।सहासनमभिप्रेप्सु
उनमितिदंडेनताडनमुक्तंतत्सहकृतंकृतेद्रष्टव्यं॥ ॥निष्ठीव्योष्ठद्वयविहीनःकार्यः॥२१॥हीनवर्णोधि
कवर्णस्योपरिनिष्ठीव्यपूत्कारंकृत्वाओष्ठद्वयेनविहीनःकार्यः।ओष्ठद्वयंछेत्तव्यमित्यर्थः।यथाहमनु
॥अवनिष्ठीवतोदर्पाद्वावोष्ठौछेदयेन्नृपइति॥अवशर्द्धापिंजाचगुदहीनः॥२२॥हीनवर्णोधिकवर्णस्यो

२०

परिदर्प्यादत्र शब्दः पितापाद्युपचापूर्व्वं च्छ्रगुरुरहीनः कार्यः।। चकाराद्वभ्रात्रपिताचमेऽहीनः।। यथाह मनु
।। अवभ्रत्रयतो मेढ्रमवशर्द्धयतो गुदमिति।। एवं दंडपारुष्ये दंडोभिहितः इदानीं वाक्पारुष्यं प्रस्तौति।। तत्स्वरू
पमाह नारदः। देशजातिकुलादीनामाक्रोशन्यंगसंयुतापद्वचः। प्रतिकूलार्थं वाक्पारुष्यं तदुच्यत इति
तदपि त्रिविधं निष्ठुराश्लीलतीव्रत्वात्तदपि त्रिविधं स्मृतं। साक्षेपं निष्ठुरं ज्ञेयमश्लीलं न्यंगसंयुतं। पतनीयैरु
पतनीयैरुपक्रोशैर्यितातिजिह्वो जिह्वारहितः कार्यः।। स्वार्थात्तु जपो कर्म्मप्रयोजकजातिग्रहणं क्षत्रियाद्यु
पलक्षणं जपमज इति हेतुसाम्यात्।। त्रैविद्यनृपदेवानां क्षेप उत्तमसाहस इति योगीश्वरेणाच वधुशतं ब्राह्मणा
माक्रुष्य क्षत्रियो दंडमर्हति। वैश्योऽप्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हतीति तदस्य तस्य गुणान्त्रियवैश्य विष
य।। चकमो हृदो दाहकृत्रीभूदश्या।। धर्म्मोपदेशकर्त्री चरेदोदाहरणाच्चतः।। आक्रोशकस्तु विप्राणां जिह्वा
च्छेदेनदंड्यत इति वार्हस्पत्यात् दर्पेण धर्म्मोपदेशकारिणः शूद्रस्य समासेचयेत्तैलमास्ये।। २४।। ।।दर्पेण
विप्राणामस्य कुर्वतः।। तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिव इति। श्रोत्रे श्रोत्रानुरिति शेषः अमास्य

वेदमुपशृण्वतः त्रपुजतुभ्यां श्रोत्रपूरणमिति गौतमीयात्॥ ॥एतच्च दर्पेणसान्नाहृवयो॥ब्राह्मणमग्रतः
कृत्वा श्रावणेतु न दोषः॥ श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः। इति भारतात् दर्पेणेति वचनाद्ब्राह्मणा
भ्यर्थितयोः क्षत्रियवैश्ययोरध्यापनेन दोष इत्युक्तं प्राक्॥ ॥द्रोहेण च नामजातिग्रहणे दशाङ्गुलोऽस्य
शङ्कुर्निक्षेप्यः॥२५॥ ॥द्रोहेणेर्ष्यातिशयेनाक्रोशे द्विजातीनां विप्रेभ्यो ह्यधिकवर्णानां नामजातिग्रहणे आस्य
स्थाने वर्णमुखे ज्वलन्नयोमयो दशाङ्गुलः शङ्कुर्निक्षेप्यो निधेयः॥ यथाह मनुः॥ नामजातिग्रहं त्वेषा
मभिद्रोहेण कुर्वतः॥ निक्षेप्योऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुल इति॥ एवं शारीरदण्डविषयमभिधायेदा
नीमर्थदण्डविषयमाह॥ श्रुतदेशजातिकर्मणामन्यथावादी कार्षापणद्विशतं दण्ड्यः॥२६॥ श्रुतं वेदादि
विद्या देशो मध्यदेशादिः जातिर्ब्राह्मणत्वादिः कर्मसंध्याग्न्याधानादि बहुवचनीकारीरमुपनयनादिसंस्कारकर्म तेषा
मधिकवर्णनिष्ठानामन्यथापकर्षं द्रोहेण यो वदति हीनवर्णः स कार्षापणानां शतद्वयं दण्ड्यः॥ यथाह
मनुः॥ श्रुतं देशं च जातिं च कर्म शारीरमेव च। वितथेन ब्रुवन्दर्पाद्दाप्यः स्याद्द्विशतं दममिति॥ काणं खञ्जं वाद

चि॰टी॰
६६

नांतं थ्य वा यपि कार्षापण द्वयं ॥१७॥ एकाक्षि विकलाः काणाः एकपाद विकलः खंजः आदि शब्देन पंग्वादीनां
ग्रहणं तेषां तु तत्र भवतां नां तथ्य वाद्यपि सत्यवादो भवत्यपि हीन वर्णः कार्षापण द्वयं दंड्यः ॥ अस्य च वचनेतु शंखलिखितेषु
स्मृतिवाक्याभिधाने काणं पर[?] दंड्य अभिगुणोत्तम वर्णोद्देश विषयं समगुण सम वर्णोद्देशे तु योगीश्वरः ॥ सत्यासत्य
सत्यास्य थात्मोत्रे मूर्तां गे [?] गिरणाविधिक रोति वे दंडः पणानद्वं दश दशेति निर्गुण हीन वर्णोद्देशे मत्तु
॥ काणं वाप्य थ वा खंजं अमन्यं वापि तथा विधं तथ्येना पि ब्रुवन्दाप्यो दंड कार्षापणावरमिति ॥ गुरूना क्षिपन्
र्षापणशतं ॥१८॥ गुरून्मातृ आदीनाक्षिपथ वा खंजमंन्यं वापि तथा विधां तथ्येनापि ब्रुवन्दाप्यो दंड कार्षापण
वरमिति ॥ गुरूनाक्षिपन् कार्षापणशतं ॥ [?]शतं दंड्यः यथाह मनुः ॥ मातरं पितरं जायां भ्रातरं तनयं गुरुं ॥ आ
क्षारयन् शतं दाप्यः पंथानं चा ददुरो रिति ॥ इदं च सापराधे मात्रादि विषयं ॥ निरपराध मात्रादि विषये च तेषामा
क्षारयन् शतं दाप्यः पंथानं चा ददुरोरिति ॥ तथा छिकसा[?]चि प्रानुगुरुस्य निर्वासनं मुंडनं ताडनं वा गोमयाद्यु
पघा[?] क्रोशेनु शंखलिखित लिखितौ ॥ तथा छिकसा[?]चि प्रानु गुरुस्य निर्वासनं मुंडनं ताडनं वा गोमयाद्यु
लेपनं खरारोहणं दर्पहरणं वा दंडो वेति ॥ क्रोशनस्य तु वक्तने ॥ पुनरपि तीव्राक्षेपे दंडमाह ॥ परस्य पा
नीयाक्षेपेक ते तत्त्वमसा हंसं ॥२०॥ पतनीयं महापातकादि तद्युक्तमाक्षेपे ब्रह्महा त्वमसीत्यादि

पाप
६६

हीनवर्णेनोत्तमवर्णस्य कृते तत्र मध्यमसाहसं दंड्यः ॥ सोपपातकं दंडः पूर्वोक्तेन जिह्वाछेदेन विकल्पते समानविषय
त्वात् ॥ कृते त्वित्यनेनासज्जिदोष इति ज्ञेयं दंडगुरुत्वात् सवर्णाक्षेपे तु योगीश्वरः ॥ पतनीये कृते क्षेपे दंडो मध्यमसाह
स इति ॥ उपपातकयुक्ते मध्यम ॥ २० ॥ उपपातकं गोवधादि तद्युक्ते आक्षेपे मध्यमः स्यात् हीनवर्णेनोत्तमवर्ण
स्य कृते स मध्यमसाहसं दंड्यः ॥ समानाक्षेपे तु योगीश्वरः ॥ उपपातकयुक्ते तु दाप्यः प्रथमसाहसमिति ॥ एत
भयातिरिक्तपापाहिते क्षेपे प्रथमसाहसं दंड्यः ॥ यथाह व्यासः ॥ पापोपपापवक्तारो महापातकशंसकाः ॥
आद्यमध्योत्तमान् दंडान् दद्यस्ते यथाक्रममिति ॥ त्रैविद्यवृद्धानां पूगानां सभ्यादिसंघानां च निंदां तल
त्तुपाविप्राः राजभृत्याः सभ्यादयः तदादिक्षेपे हीनवर्णकृते यथाक्रमं उत्तममध्यमसाहसौ दंडौ कार्यौ ॥ यथा
ह याज्ञवल्क्यः ॥ त्रैविद्यनृपदेवानां क्षेप उत्तमसाहसः ॥ मध्यमो जातिपूगानां ॥ ग्रामदेशयोश्च प्रथमसाहसं
॥ २१ ॥ हिंसारायीपाः मत्स्यादाः गौडा इति ग्रामदेशयोराक्षेपे चक्राख्यूरचरित्रा विश्वामित्रा इत्यादिकुलाक्षेपे
च हीनवर्णेन कृते स प्रथमसाहसं दंड्यः ॥ तदुक्तं प्रथमो ग्रामदेशयोरिति ॥ अल्पाक्षेपे तु बृहस्पतिः ॥ देश

१ अपरस्याप्यः पणानईत्रयोदशपायेनयोऽत्र परदर्या ह्याप्यः प्रथमसाहसमिति। अश्लीलाक्षेपे दंडमाह॥ ॥न्यंगवतो युक्ते

दिकं द्विपिकार्षापणशतं॥२१॥ न्यंगमश्लीलमश्लीलं तस्मात्संयुक्तममितिमा रेदस्यरणात्तानस्य भावोन्यत्
नम॥२३॥ मातृपितृक्षेपे मातरं तेगइति पामीत्यादिके तत्र मसाहसं दं॥ इदमपुत्रमाक्षेपेहीनव
र्णाक्षेपेनुपातिथ्यर॥ अभिगन्तास्मिभगिनीमातरंवा तवेति हाशमंतंदापयेद्राजापंचविंशतिकंदम
मिति। समवर्णाक्षेपेतु समानयोः समोदंडो न्यूनस्य द्विगुणकः सः। उत्तमस्याधिकः प्रोक्तो वाक्पारुष्ये
परस्परमितिहृ हस्यलाघवं रीत्या कल्पनीयः। निष्ठुराक्षेपे दंडमाह। समवर्णाक्रोशने द्वादशपणा
न्दण्ड्यः॥२४॥ सवर्णमिवविकृत्वेस्मादितिष्ठुरमादिश्य द्वादशपणान् दंड्यः वर्णगुणोपलक्षणं पथा
रहस्यातिः॥ समजातिगुणानां तु वाक्पारुष्ये परस्परं विनयोभिहितः शास्त्रेपणाः ऐत्रयोदशोति
श्रेईक्षत्रयोदशो येथितिसार्द्धद्वादशोत्तमः॥ ॥अनेन समवर्णस्यापि गुणोत्कर्षापकर्षाभ्यां दण्डता
रतम्यकल्प्या॥ हीनवर्णाक्रोशने षट्॥२५॥ हीनवर्णविषये निष्ठुराक्षेपे उत्तमवर्णोषट्पणान्
दण्ड्यः। इदमपि समगुणाक्षेपे निर्गुणाक्षेपेतु नदंडः। गुणहीनस्य पारुष्ये ब्राह्मणेनापराधगुपादितिवा

ईस्यत्यात। समकालान्येपे हीनवर्णस्य दंडमाह॥ यथालमुत्तमवर्णान्येपेतत्प्रमाणो दंडः॥ २६॥ कालोत्रा
न्येपकालक्रमनतिक्रम्येति यथाकालं श्रान्येपकाल एवेति यावत्॥ तत्रोत्तमवर्णे समवर्णान्येपे हीनव
र्णस्य तत्प्रमाणः षट्कार्षापणप्रमाणो दंडः कार्यः॥ समोत्तमवर्णान्येपकालपवातियन्हीनवर्णः षट्
पणान्दंड्य इत्यर्थः॥ अनेन द्वादशपणो दंडः पूर्वोक्तकारण इति सिद्धं॥ यथाह नारदः। पूर्वमाक्षारयेद्यो
क्षनियतं स्यात्सदोषभाक्। पश्चाद्यः सोप्यसत्कारी पूर्वे तु विनयो गुरुरिति निर्द्दिष्टं न विषये भवेत्॥ सधन वि
षये तु स एव॥ पारुष्ये साहसे चैव युगपत्संप्रवृत्तयोः॥ विशेषश्चेन्न लभ्येत विनयः स्यात्समस्तयोरिति
समो द्वादशपणः पश्चादान्येपे हीनवर्णस्य दंडमाह॥ त्रयोवाकार्षापणा॥ २७॥ यथाकालपक्षा
त्पदोत्तरं पश्चात्कालपभिप्रेत्यवाशवः समोत्तमवर्णान्येपानंतरमाक्षिप्यतो हीनवर्णस्य त्रयः का
र्षापणा दंडः॥ आक्रुष्टस्तु समाक्रोशन् ताडितः प्रतिताडयन्। हत्वापराधिनं चैव नापराधी भवेन्न
र इति बृहस्पतिनाल्पं दंड्यास्ते निरपराधताभिधानात्तरुक्तं दंडातिदेशमाह॥ सुत्तवाक्यानिध्या

नेत्सेवमेव॥३८॥उक्तं निष्ठुरं तादृशवाक्याभिधानेत्वेवमेवत्रयः कार्षापणो दंडः इत्यर्थः। एवं वाक्यपारु
ष्यदंडो निरूपित इदानीं स्त्रीसंग्रहणं प्रस्तौति। तल्लक्षणमाह मनुः। उपचारक्रियाकेलिः स्पर्शो भूष
णवाससां। सहखट्वासनं चैव सर्वं संग्रहणं स्मृतमिति॥ तच्च त्रिविधं तदाह व्यासः॥ त्रिविधं तत्स
माख्यातं प्रथमं मध्यमोत्तमं। अदेशकालभाषाभिर्निर्जने च परस्त्रियाः। कटाक्षावेक्षणं हास्यं प्रथ
मं साहसं स्मृतं। प्रेषणं गंधमाल्यानां धूपभूषणवाससां। प्रलोभनं चान्नपानैर्मध्यमं समुदाहृ
तं। सहासनं विविक्तेषु परस्परमपाश्रयः। केशाकेशि ग्रहश्चैव सम्यक् संग्रहणं स्मृतमिति। तत्र
प्रथमसंग्रहणे दंडमाह॥ ॥पारजायामवस्त्रीगमनेत्तमसाहसदंड्यः॥३९॥परजायां गच्छतीति
पारजामी सवर्णाकारोत्तमजातीयगुप्तपरदारगमने उत्तमसाहसदंड्यः। इच्छंतीगमने तु मध्यम
साहसमेव। यथाह मनुः। सहस्रं ब्राह्मणो दंड्यो गुप्तां विप्रां बलाद्व्रजन्। शतानि पंच दंड्यः स्यादिच्छंत्या
सह संगत इति। एवं क्षत्रियादिष्वपि कल्प्यं। आनुलोम्येन गमने त्वाह॥ हीनवर्णागमने मध्यमं॥४०

ब्राह्मणादिरगुप्तक्षत्रियादिहीनवर्णागमने मध्यमसाहसं दंड्यः॥ यथाह मनुः॥ अगुप्ते वैश्यराजन्ये
शूद्रां च ब्राह्मणो व्रजन्। शतानि पंच दंड्यः स्यात्सहस्रं त्वन्त्यजस्त्रियमिति। ता एव गुप्ता व्रजन्नुत्तमसा
हसं दंड्यः॥ यथाह स एव। सहस्रं ब्राह्मणो दंड्यो गुप्तेतु ते व्रजन्। शूद्रायां क्षत्रियविशोः साह
स्रो वै भवेद्दम इति। जातिज्ञोऽप्येवं गुप्तागुप्तागमने तु मनुराह। उभावपि हि तावेव ब्राह्मण्या गुप्तया स
ह। विप्लुतौ शूद्रवद्दंड्यौ दग्धव्यौ वा कटाग्निना। ब्राह्मणीं यद्यगुप्तां तु गच्छेतां वैश्यपार्थिवौ। वै
वैश्यं पंचशतं कुर्यात् क्षत्रियं तु सहस्रिणं। वैश्यश्चेत्क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजन्। यो ब्राह्मण्या
मगुप्तायां तावुभौ दंडमर्हतः॥ क्षत्रियायामगुप्तायां वैश्यः पंचशतं दमं। मूत्रेणामौंड्यमृच्छेत्तु क्षत्रि
यो दंडमेव वा। शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन्। अगुप्तमेकांगसर्वस्वी गुप्तं सर्वेण हीय
त इति। अत्र क्षत्रियं च शतं वैश्यं सहस्रिणमित्यन्वयः कार्यः। प्रातिलोम्यापवादेषु द्विगुणत्रिगुणाद
मा इति योगीश्वरस्मरणात्। स्त्रीणां मध्यममेव दंडः। सजातावुत्तमो दंड आनुलोम्ये च मध्यमः पुंसो नार्याः कर्णौ

वि॰टी॰
६९

दिकर्त्तनमिति योगीश्वरस्मरणात् । न चात्र प्रातिलोम्यव्यवाय एव स्त्रियाः दंडाभिधानं न सवर्णा
नुलोमव्यवायेपि तद्दंडाभिधानस्य पुंमात्रविषयत्वादिति वाच्यं पुरुषवत् स्त्रिया अपि तत्र दंडाकांक्षायां तौल्ये
नाभिहितदंडस्यैव योग्यतया संबंधावकाशात् । पुंसः परदारेषु तद्वेतनावापेक्षया तमिति प्रायश्चित्तस्म
रणदर्शनाच्च ॥ गोगमने च ॥ ४१ ॥ गोगमने च मध्यमः ॥ अन्त्याश्चंडाल्याद्याः । चंडालः श्वपचः क्षत्ता सूतो वैदेह
कस्तथा । मागधायोगवौ चैव सप्तैतेन्त्यावसायिनः इत्यंगिरःस्मरणात् । आसामन्यतमाभिगमने वा सनो
अंत्याभिगमने त्वंकनककबंधेन प्रवासयेदिति योगीश्वरस्मरणात् । इदमपि प्रायश्चित्ताकरणे उत्तमसाहसो
दंड एवेत्युक्तं ज्ञाने । पशुद्वीनां स्त्रीगावमध्यममिति योगीश्वरवचनं तत्र हीनास्त्वंत्यजास्तेयामेव रजकश्च
र्मकारश्च नटो बुरुड एव च । कैवर्तमेदभिल्लाश्च सप्तैते त्वंत्यजाः स्मृता इति संवर्तोक्ताः । अयमपि दंडः स्त्री
त्रिपादीनां सैव ज्ञातव्यस्तत्राप्युत्तम एव । सह अंत्येत्वं स्त्रियमिति मनुस्मरणात् । अंत्येनोत्तमसाहसः पशु
गमने कर्षापणानां शतं दंड्यः । पशून्गच्छन् शतं दाप्य इति योगीश्वरस्मरणात् । एवं स्त्रीसंग्रहणे दंडोभिहितः

६९

इदानीप्रसंगात्स्त्रीपुंधर्मेतंप्रक्रमोतितितान्तन्त्रमाहनारदः॥विवाहादिविधिःस्त्रीणांयत्रपुंसांचकथ्यते॥स्त्री
पुंसयोगसंज्ञंतद्विवादपदमुच्यतइति॥तत्रदोषमनुक्त्वाकन्यादानेदंडमाह॥दोषमनाख्यायकन्यांप्रयच्छन्
॥४४॥अल्पीयांसमोषधापनेयमपिदोषमनुक्त्वाकन्यांप्रयच्छन्वरकार्षापणशतंदद्यः।दीर्घकुत्सितरोगादि
दोषेतुनारदः।पक्षदोषवतीकन्यामनाख्यायप्रयच्छति।तस्यकुर्यान्नृपोदंडंपूर्वसाहसचोदितमिति।संसृष्ट
ष्टमैथुनत्वादिदोषेतुयोगीश्वरः॥अनाख्यायददद्दोषंदद्यउत्तमसाहसमिति।दोषानाहनाहनारदः॥दीर्घ
कुत्सितरोगार्त्तांव्यंगासंसृष्टमैथुना।दुष्टामन्यगतभावांचकन्यादोषाःप्रकीर्त्तितइति।तांचविभृयात्॥४५
तांसंसृष्टमैथुनत्वादिदोषवर्त्तीकथांकस्यादातापावृत्तीवस्त्रयमेवविभृयान्मोषयेत्।नतुदीर्घकुत्सित
रोगादिमतीव्याधितांस्त्रीप्रजांवव्यामुत्सृजेत्।विगतार्त्तवां।अदुष्टांलभतेत्यक्तुंतीर्थान्नत्वेवकर्मणइतिदेवल
स्मरणात्।तीर्थात्संभोगतइत्यर्थः॥यद्वादीर्घरोगादिदोषानाख्यानएवशतदंडोभरणसमुच्चितोवाक्य
द्वयैकविषयतयाविधीयमसर्वोत्तमसाहसेनतुल्यवलएवेतिविकल्प्यतेनारदवाक्यैर्दोषधापनेयव्याध्या

दिदोषपरमिति॥ अदुष्टां दुष्टामिति ब्रुवंस्तूत्तमसाहसं॥९६॥ ॥ अदुष्टामदूषितां दुष्टां मैथुनादिसंसर्गे
णादूषितामिति ब्रुवन्नुत्तमसाहसं दंड्यः। दोषांतरेण दूषणे तु शतमेव। दूषयंस्तु शतमिति योगीश्वरेण
न। एवं स्त्रीपुंधर्मे दंडोऽभिहितः इदानीं दंडपारुष्यप्रतोन्नमद्रव्यातिक्रमे तत्पापविशिष्टं दंडं प्रसंगेनाति॥ ॥ गजा
श्वोष्ट्रगोघाते त्वेककरपादः कार्यः॥९७॥ नृपाद्वः अकरणतरा रंभोर्थः। गजमश्वमुष्ट्रं गां वा यो हंति स एक
करपादः कार्यः एकं करपादं यस्य स तथोक्तः एकं करपादं तस्य छिंद्यादित्यर्थः। पशुनमं तु नाभ्युधमारणे
त्रिपंचोरवलि लिंघि पंभवेत्व। प्राणभृत्सु महत्स्वर्द्धं शतमभ्योक्षा वा विछिन्ने मुक्तः। आदिशब्दान्महिष्यादि
र्ग्रहणं। अर्द्धं तु त्तमसाहसः तदुभयमपि देशकालव्यक्तितारतम्यापेक्षया वस्तुं योग्यं विप्रोस विक्रपोच॥९८
॥ विरूढं प्रासंख्य विधुष्यानेरा हारदेस्य छिक्र यशालोधिमं स विक्रयी सोप्येककरपादः कार्यः पत्तु स्तटस्थ
णांव्यवहारी विमांसस्य च विक्रयी॥ अंगहीनस्तु कर्तव्यो दाप्यश्चोत्तमसाहसमिति योगीश्वरेण स्योनः
पुण्येनता छील्यविषयं। अंगहीनो नासाकर्णहीन॥ प्रभ्रम द्रव्यातिक्रमे दंडमाह। ग्राम्यपशुघाती कार्षापणा

७८

शतं दद्युः॥४९॥ ग्राम्याः पशवो आविकादयस्तान् हत्वा कार्षापणशतं दद्युः। व्यक्तिवैशिष्ट्ये तु क्षुद्रका
णां पशूनां तु हिंसायां द्विशतो दम इति मानवं दण्डं व्यवस्थापकं द्रष्टव्यं तु गर्दभाजाविकानां च दण्डः स्यात् पंच
माषकः। माषकस्तु भवेद्दण्डः शूकरनिपातने इति कात्यायनीयं द्रष्टव्यं॥ माषोऽत्र राजतः। अल्पदण्डो हि क्षुद्र
दुःखे च शोणितोत्पादे शाखाङ्गच्छेदने तथा। दण्डः क्षुद्रपशूनां तु द्विपणप्रभृति क्रमादिति योगीश्वरीयं प्र
।उक्तविधिविशेषकं च द्विविशेषमाह॥ पशुस्वामिने तन्मूल्यं दद्यात्॥५०॥ यस्य पशुर्हतस्तस्मै तस्य पशोर्मू
ल्यं दद्यात्। इदं च प्रतिरूपकाभावे। यथाह पराशरः। अन्यापरेण प्राणभृतां दद्यात्तत्प्रतिरूपकं। तस्या
भावे तु मूल्यं वा दद्यादिति स्वयंभुवोऽब्रवीन्मनुरिति तस्याप्यभावे स्वामितुष्टिमुत्पादयेत्। यथाह मनुः। यो यस्य
हिंस्याद्द्रव्याणि ज्ञानतोऽज्ञानतोऽपि वा। स तस्योत्पादयेत्तुष्टिं राज्ञे दद्याच्च तत्समम्। इति। तत्समं दण्डमनु
क्तदण्डेषु। इदं च पशुमरणोपरणाभावे तु समुत्थानव्ययदानं वक्ष्यति। हीनद्रव्यातिक्रमे दण्डमाह। आ
रण्यपशुघाती पंचाशतं कार्षापणान्॥५१॥ अरण्ये भवा आरण्याश्चैते पशवस्तान् हत्वा पंचाश

ं कार्षापणान् दंड्यः । यथाह मनुः । पंचाशत्तु भवे दंडः शुभेषु मृगपक्षिषु । शुभेषु हंससपरादिषु । प
क्षिघाती मत्स्यघाती च दशकार्षापणान् ॥५२॥ पक्षिणां शुकपिकादीनां मत्स्यानां पाठीनरोहितो
दानां च घातको दशकार्षापणान् दंड्यः । चकारात्सर्पादिवधेऽपि । यथा का दशपणा इत्यर्थः । एवं क्षु
द्रपूर्वं दंड्यानां कीटोपघाती च कार्षापणान् दंड्यः । चकारात्सर्पादिवधेऽपि । यथाह कात्यायनः । विष
णो द्वादशपणो वधे तु स्यात्पक्षिणां । सर्पमार्जारनकुलश्वसूकरवधे तु तो विंशपणाः पणान्नो द्वादश
पणाः एकादशपणा इत्यर्थः । एवं क्षुद्रपूर्वं दंड्यानां ॥ कीटोपघाती च कार्षापणं ॥५३॥ कीटस्य प्रा
णीपाठे च तीर्येकं कार्षापणं दंड्यः । स्थावरादिद्रोहे दंडमाह ॥ फलोपगमद्रुमस्यच्छेदी तूत्तमसा
हसं ॥५४॥ फलेनोपगमस्संत इति फलोपगमा फलोपकारिणः पनसाम्रादय । तादृशद्रुमच्छेदी त्त
त्तमसाहसं दंड्यः । पनोपगो भोग इति पाठे फलेनोपभुज्यंत इति ग्रहः । एवं परोहिता खिनानां शाखा
स्कंधसर्वविदारणे । उपजीव्यद्रुमाणां च विंशतेर्द्विगुणो दमः इति योगिवचनं । मत्फलोपभोग्यानां र

तस्यैगणाय वक्ष्यमाणं वनस्पतीनां सर्वेषामुपभोगो यथा यथा। तथा तथा दमः कार्यो हिंसायामिति धा
रणेति मनुस्मरणात्॥ तुशब्दाच्चैत्यादि द्रुमच्छेदे पि तथा च योगीश्वरः॥ चैत्यश्मशानसीमासु पुण्यस्थाने सुरा
लये। जातद्रुमाणां द्विगुणो दमो वृक्षेथ विश्रुते इति॥ चैत्यं चयनस्थानं॥ पुष्पोपगमहद्रुमच्छेदी मध्यमं॥ ५५
पुष्पैरुपगम्यंत इति पुष्पोपगमाः पुष्पोपकारिणश्च पकादयः तच्छेदी मध्यमसाहसं दद्यात्॥ वल्लीगुल्म
लताछेदी कार्षापणशतं॥ ५६॥ वल्लंते वेष्टंते इति वल्ल्यः गुडूचीमाधव्यादिः गुडूचीति गुल्मः अनतिदीर्घ
निविडनतासंतानो प्रतानो ~~षधिवीरुधां~~ लत्यादिः लातीति लता॥ सरलप्रायादीर्घयापि नाइत्तादि
त्तच्छेदी प्रत्येकं कार्षापणशतं दद्यात्॥ यत्तु गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधां। पूर्वस्मृतादर्द्ध
दंडः स्थानेषूक्तेषु कर्त्तने उक्तस्थानेषु शाखास्कंधमूलेषु पूर्वस्मृताद्विंशतिचत्वारिंशद्धातिरूपा
दर्द्ध इति योगिवचनं तदप्युपकारतारतम्येनावस्थाप्यं॥ तृणच्छेद्येकं॥ ५७॥ तृणं कुशदूर्वादि ग
वाद्यर्थं विना तच्छेद्येकं कार्षापणं दद्यात्॥ यत्तु द्विजस्तृणैधः पुष्पाणि सर्वतः स्ववदाहरेदिति योगीव

वचनं तत्स्वाम्यर्थतृणादिविषयं गोभ्यर्थं तृणमेधांसि वीरुद्वनस्पतीनां च पुष्पाणि स्ववदाददीत फलानि चापरि
वृतानामिति गौतमस्मरणात्। एतच्चापरिगृहीतविषयं परिगृहीते हि जन्मातिरिक्तोस्यापि परिग्रहादे
व स्वत्वस्मृतेः पश्चादस एव स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेष्विति। यत्तु नवाहं स्मृत्ये तृणं वा
यदि वा काष्ठं पुष्पं वा यदि वा फलं। अनापृच्छ्य तु गृह्णानो हस्तच्छेदनमर्हतीति तद्ब्राह्मणस्वामिकापह
र्हि न व्यतिरिक्तापहर्तृविषयमनापद्विषयं वा गवादिव्यतिरिक्त — विषयं वा। राजादिरक्षितविषयं
वा। ब्राह्मणस्यापि बलाद्ब्राह्मणस्वामिकापहारविषयं वा। तथा च शंखलिखितौ। ब्राह्मणो ब्राह्म
णस्य समिदाज्येध्माग्निकाष्ठतृणोलपपुष्पमूलफलान्यपहरन् बलादविज्ञातो वा हस्तच्छेदनम
र्हति प्रमुपानं। कुशकरक्षाग्निहोत्रस्यापहरन् स्वेच्छया नो गृह्णीयादिति। एतेन स्ववदाहरणमप
रिगृहीतविषयत्वे फलेषु कुसुमेष्वपि पथ्ये यच्च मलावहमिति विरुध्येतेति चौर्यनिरसनं गवादिवृत्तिवि
षयत्वात्तस्य॥ सर्वेषां तत्स्वामिनां तद्दुण्यमिति॥१५८॥ सर्वे फलोपगमद्रुमादिच्छेदिनस्तत्स्वामिनां हितं

78

द्रुमादिस्वामिनां तदुत्पन्नफलपुष्पोपगमं द्रुमादिफलपुष्पादिसंततिं पुनः प्ररोपितद्रुमादि
भोगकालपर्यंतं दाप्या इति शेषः। अत्र गोरणादिषु साधन विशेषेण दंड विशेषेण दंडविशेषमा
ह। हस्तेनोद्गूरयिता दशकार्षापणं॥ ५९॥ ताडनार्थं हस्तमुद्गूर्य दशकार्षापणं दंडंदयः॥ पादेन
विंशति॥ ६०॥ पादेनोद्गूर्य विंशतिकार्षापणान्दंड्यः॥ काष्ठेन प्रथमसाहसं॥ ६१॥ काष्ठमुद्गूर्य प्रथ
मसाहसं दंड्यः॥ पाषाणेन मध्यमं॥ ६२॥ पाषाणमुद्गूर्य मध्यमसाहसं दंड्यः॥ शस्त्रेणोत्तमं॥ ६३
शस्त्रखड्गाद्युद्गूरणे उत्तमसाहसं दंड्यः। सजातीयविषयं सर्वमेतत्। उद्गूरणे हस्तपादे तु दशविंशति
कौ दमौ परस्परं तु सर्वेषां शस्त्रे मध्यमसाहस इति योगीश्वरस्मरणात्। परस्परं सजातीयेषु उत्तमवर्णे
षु तु पाणिपादच्छेदनं च। हीनवर्णो द्विजवर्णस्य येनांगेनापराधं कुर्यात्तदेवास्य शातयेदिति सा
मान्यसूत्रात्। अत एव मनुः॥ पाणिमुद्यम्य वा दंडं पाणिच्छेदनमर्हति। पादेन प्रहरन्कोपात्पादच्छे
दनमर्हतीति। हीनवर्णेषु चार्द्धकल्प्यः। हीनेष्वर्द्धं दमो मोहमदादिभिरदंडनमिति योगिस्मरणात्। चतु

वि०दि०
७३

शस्त्रे मध्यमसाहसं नित्ह्यानरत्वाविषयं । समोत्तमवर्णयोर्दंडांतराभिधानात् । हस्तादिपातनेरक्त एव दंडो द्वैगुण्येन योज्यः । यथाह कात्यायनः ॥ उद्गुरणे तु हस्तस्य कार्यो द्वादशको दमः ॥ स एव द्विगुणः प्रोक्तः पातने पु सजातिषु । निःसंस्पर्शमात्रे त्विदमेव । उद्गुरणे प्रथमो दंडः संस्पर्शे तु तदर्धक इति योगीश्वरस्मरणात् ॥ पादकेशांशुककरलुंचने दशपणान् दंड्यः ॥ ६४ ॥ पादकेशवस्त्रकराणामन्यतमस्य लुंचने उत्थित्वाकर्षणे दशपणान् दंड्यः । तमस्यैव गले वस्त्रं दत्वा निष्पीड्य निपात्य पादप्रहारे शतं दंड्यः ॥ यथाह योगीश्वरः ॥ पादकेशांशुककरोल्लुंचनेषु पणान्दश । पीडाकर्षांशुकावेष्टपादाध्यासे शतं दम इति ॥ हीनवर्णे तूत्तमवर्णस्य केशादिग्रहणे तु प्रकुराह । केशेषु गृह्णतो हस्तौ छेदयेदविचारयन् । पादयोर्दाढिकायां च ग्रीवायां वृषणेषु चेति ॥ शोणितेन विना दुःखमुत्पादयिता द्वात्रिंशत्पणान् ॥ ६५ ॥ शोणितेन विना शोणितं यथा न दृश्यते तथा मुष्ट्यादिभिस्ताडयिता द्वात्रिंशत्पणान्दंड्यः ॥ सह शोणितेन चतुःषष्टिं ॥ ६६ ॥ सह शोणितेन शोणितं यथा दृश्यते तथा ताडयिता चतुःषष्टिं

राम
८३

पणान्दंड्यः॥ अत्र विशेषमाह बृहस्पतिः। त्वग्भेदे प्रथमो दंडो मांसभेदे तु मध्यमः। उत्तमस्त्वास्थिभेदे तु घा
तने तु प्रमापणे इति॥ करपाददंतभंगे कर्णनासाविकर्तने [illegible] कर्त्तने मध्यमं॥६७॥ करपाददंतस्य प्र
त्येकं भंगे कर्णनासस्य च प्रत्येकं विकर्त्तने मध्यमसाहसं दंड्यः अपंच स्वस्थानादपतितेषु पतितेषु तूत्तमः
कर्णनासाकदेदंतभेदे स्थिभेदने। कर्त्तव्यो मध्यमो दंडो द्विगुणः पतिते स्थिति बृहस्पतिस्मरणात्
। एवं सर्वत्र ज्ञेयं॥ चेष्टाभोजनवाग्रोधे व्यवहारदाने च॥६८॥ चेष्टा चलनादिः॥ भोजनमभ्यवहा
रः। वाग्व्याहारः॥ एतेषां प्रत्येकं रोधे स्कंधादिनाश्लाघातदाने च मध्यमसाहसं दंड्यः। यथाह बृह
स्पतिः॥ प्रथमः शस्त्रसंपाते संपाते संपोऽप्यः द्विगुणो दर्पतः। कार्पः कृतान्तरूपस्कालये घाते दमो
धुवैरिति। वकाराद्धणोड्रेदादेव। पक्ष्योदं गोजणोड्रदे मृते कस्महतेतयेति योगिस्मस्मरणात्
॥ नेत्रकंधराबाहुसक्थ्यांसभंगे चोत्तमं॥६९॥ नेत्रं नेत्रगोलः कंधुराग्रीवा बाहू प्रसिद्धौ सस्थिज
घनमंसः स्कंधः। वकारादोष्ठादिग्रहणं। एतेषां प्रत्येकं भंगे उत्तमसाहसं दंड्यः। यत्तु चेष्टाभोजनवाक्रो

[illegible]वेदी भेनेत्रादिप्रति भेदने। कंधरावाकसंस्कंध॥ चकारादोष्ठादिग्रहणं। एतेषां प्रत्येकं मंगे तत्र मुसाद

७५ भेदः॥ एतत्तु चेष्टाभोजनवाक्यानां च भंगे मध्यमसाहसं इति योगिवचनं तत्र भंगो भेदनं न तु छेदनं नो भि

नेद्यां रवेयाः। यथाह कात्यायनः॥ कर्णोष्ठघ्राणपादाक्षि जिह्वा शिश्नकरस्य च। छेदने चोत्तमो दंडो॥

भेदने मध्यमो मनुरिति। छेदनं द्वैधीभावः। भेदनं च पदशैथिल्यमात्रापादनं सवर्णेत्रमवर्णा विप्र

त्वेन मध्यमोत्तमसाहसयोर्व्यवस्था कार्या॥ उभयनेत्र भेदिनं राजा यावज्जीवं बंधनान्न विमुंचेत्॥

॥८०॥ उभयोरपि नेत्रयोर्भेदकरोति तं राजा यावज्जीवं बंधनान्न विमुंचेत् बंधनागारात्र बहि

ष्कुर्यात्। राजानुवृत्तौ पुनः राजग्रहणं राज विषय केऽपराधे दंडांतर लोभनार्थं तथा चनारदः॥ राज

निग्रह शेषक कृता गस्य पितुर्मतिः॥ कूर्मत्वं तस मंडो विपच्चे दब्रह्म हत्या शनाति गमिति॥ श्लोक श्ल

हं॥ तादृशमेव वा कुर्यात्॥८१॥ तादृशं नेत्रद्वयरहितं वा कुर्वीत कारये दित्यर्थः॥ एवकारो म

ध्यमसाहसस्यैकनेत्रभेदविषयस्य व्यवस्थापनार्थः॥ नाशक्षेत्रब्राह्मणान्नत्रियादिविषयत्वेन परस्पद

राम

७४

पश्चवस्थापनार्थः। यत्तु द्विनेत्रभेदिनो राजद्विष्टदेशकृतस्तथा। विप्रत्वेन च शूद्रस्य जीवतोष्टशतो
दम इति द्वो गि वचनं तद्दोषबधप्रतिसप्ताधेयभेदविषयं॥ एकं बहूनां निघ्नतां प्रत्येकस्योक्ताद्दया। वि
डा द्विगुणाः॥ ७२॥ यदा पुनर्बहवो मिलिता एकं निघ्नंति तदा तेषां प्रत्येकमुक्ताद्दंडात् द्विगुणो दंडः
कार्यः॥ द्विगुण एवं वोत्र धनदंडाभिप्रायेण। अंगच्छेदादौ तदसंभवात्। निहननं चात्र दंडपारुष्यं ते नात्र
सर्वतत्र द्विपालस्यते। तातश्च सर्वेषामपि दंडपारुष्यविषयेषु बहुकर्तृकेषु द्विगुणो दंडो वचेषइ
त्यर्थः॥ अपवमत्तु॥ बहूनामेककार्याणां सर्वेषां शस्त्रधारिणां। यद्येको घातयेत्तत्र सर्वे ते घातका
ः स्मृताः इति। कात्यायनोपि। आरंभकृत्सहायश्च तथा मार्गानुदेशकः॥ आश्रयः शस्त्रदाता च
भक्तदाता विकर्मिणां। युद्धोपदेशकश्चैव न द्विनाशप्रदर्शकः उपेक्षाकार्ययुक्तस्य दोषवक्तानु
मोदकः। अनपेक्षाद्दमोपश्च सर्वेषां कार्यकोरिणाः पथा शक्त्यनुरूपं च दंडं प्रकल्पयेदिति। त
त्रोपेक्षकादीनां दंडमाह॥ उत्क्रोशंतमनभिधावतां तत्समीपवर्तिनां सरतां च॥ ७३॥ शत्रुचौरादि

वि·टी· ७५

भिरभिभूयमानं धावन्तमावर्तते मुक्त्रोशं तं जनमनमनमभिधावन्तमभिभूयमानसमीनसमीपव
र्त्तिनां संसरतां पलायमानानां जानमभिधावकानामपि तत्त्वि पित्ताद्दंडाद्विगुणो दंडो भवति। उ
पेक्षकः शक्तिमान् क्षो दित्यनेनोपेक्षकस्यापि पातकत्वाभिधानात्। विक्रुष्टेनाभिधावकः शत
दंडभागिति पोगिवचनं तद्दशक्रोशमापवर्त्तिविषयं। चकारादकारणविक्रोष्टग्रहणं। अकार
णे च विक्रोष्टेति पोगिस्मरणात्। अत्र परस्पर्धार्थं शाखेन। विक्रोष्ट द्विगुणो दंडः परिहासेन
विक्रोष्टर्योपेक्षः शतदंड इति शेषं। एवं दंडपारुष्येपि तिनिमित्तं दंडमभिधायेदानीं सर्वशेषं क
विद्विशेषमाह॥ सर्वेष्वपुरुषपीडाकरास्तु उत्थानव्ययं दद्युः॥७२॥ सर्वे समानोत्तमहीन
वर्णाः साक्षात्साहाय्येन वा पुरुषपीडाकरा मनुष्यताडकाः तेषां मनुष्याणामुत्थानभवव्रणीभा
वस्तदर्थमौषधव्ययः आहिना या वान्व्ययपक्षा वद्दंडं दद्युः॥ चकारात्तु ष्टिकारं च। यथाहकात्यायनः। देहे दि
पविनाशे तुपथ्यादंडं अक्तस्यपेत। तथा तु ष्टिकरं देपं समुत्थानं च यं डितैरिति॥ समुत्थानमिति पोटे

राम ७५

समुत्थानं परिचर्या तथा सहवर्त्तमानं व्ययं दद्युः व्ययं दत्वा परिचरेयुश्चिरेयुरित्यर्थः ॥ दरिद्रैस्तु परिचर्या
मात्रमेव कार्या यथा कात्यायनः ॥ वाग्दण्डस्ताडनं चैव ये पूर्वमपराधिषु । हतं भयं प्रदाप्यास्ते शोध्यन्ति । स्वेस्व
कर्मणेति । व्ययदानाशक्तास्तु भावं तं दण्डमेव दाप्याः ॥ यथा मनुः । अङ्गावपीडनायां च व्रणशोणितयोस्तथा । स
मुत्थानव्ययं दाप्यः सर्वदण्डमथापि वेति । व्ययशब्दसामर्थ्यात्कलहापहृतमपि दद्युः ॥ समुत्थानव्ययं दाप्य
ः कलहापहृतं च यदि तिर्वा हिंस्यात् । अपहर्त्तॄणां च द्विगुणो दण्डः कलहापहृतं देयं दण्डश्च द्विगुणस्ततः इति
योगिस्मरणात् । ततोऽपहृताद्द्विगुणः ॥ ग्राम्यपशुपीडाकरस्य ॥ २५ ॥ ग्राम्याः पशवो गवाश्वादयस्तेषां पीडा
करी व्रणादिकर्त्तारस्ते पितदुत्थानव्ययं दद्युः ॥ ग्राम्यग्रहणादारण्येषु न ॥ इयं कल्पतरुकारानुमतव्ये
षु पशुवन्मूल्यदानं नास्तीति बोद्धव्यं पितृपस्खामिनेतन्मूल्यमित्यत्र पशुग्रहणात्ततश्च प्रमापणे ज्ञा
णाच्छेदे घाते त्वतिरूपकमिति प्राणाघ्रष्टव्योपि पशुपरएवचकारान्नेताम्यंगादिवकर्त्तव्यं । पथापरा
शरः । व्रणाभङ्गे चकर्त्तव्यस्नेहाभ्यंगकृपाणिना । यव सर्वैरापहर्त्तव्यो पावद्दृढवत्तोभवेदिति ॥ एवं दण्डपा

वि॰टी॰
७६

रूप्ये दंडोऽभिहितः॥ इदानीं स्तेये तं प्रस्तौति। तत्र नारदः। उपायैर्विविधैरेषां छलयित्वापकर्षणं
सुप्तमत्तप्रमत्तेभ्यः स्तेयमाहुर्मनीषिणः॥ तदपि त्रिविधं ज्ञेयं हीनमध्योत्तमक्रमात्। हीनमध्योत्तमानां तु द्रव्या
णामपहारतः॥ मृद्भांडासनखट्वास्थिदारुचर्मतृणादि यत्। शमीधान्यं कृतान्नं च क्षुद्रद्रव्यमुदाहृतं। वासः कौ
शेयवर्जं च गोवर्जं पशवस्तथा। हिरण्यवर्जं लोहं च मध्यं व्रीहियवा अपि। हिरण्यरत्नकौशेयस्त्रीपुंगोगजवा
जिनः। देवब्राह्मणराज्ञां च द्रव्यं विज्ञेयमुत्तमं। साहसेषु य एवोक्तस्त्रिषु दंडो मनीषिभिः। स एव दंडः स्ते
येऽपि द्रव्येषु त्रिषु तु क्रमादिति। तत्रोत्तमद्रव्यापहारे दंडमाह॥ गोश्वोष्ट्रगजापहारेष्वेककरपादः कार्य
॥७६॥ गोश्वोष्ट्रगजानामपहारक एककरपादः एकं करपादं यस्यासौ तादृशः कार्यः। एकं करं पादं छेत्त
व्य इत्यर्थः। मनुः। अश्वागारायुधागारदेवतागारभेदकान्। हस्त्यश्वरथहर्तॄंश्च हन्यादेवाविचारय
न्। बंदिग्राहांस्तथा वाजिकुंजरीणां च हारिणः। प्रसह्य घातिनश्चैव शूलानारोपयेन्नरानिति मनुयोगीश्व
रवचनं तन्मौनदुरूपेणताच्छीन्यविषयं वा कुमूल्यव्यक्तिविषयं वा वधेयोद्वंद्वबलात्तरहणेऽप्ययमेव दंडः॥

राम
७६

८५

नरहर्त्ताहस्तपादौछित्वास्थाप्यश्चतुष्पथइतिवा।हस्त्यश्वादीनामप्यपहारेदण्डमाह॥अल्पपशुपहा
र्य्यैकरस्य॥८७॥अजामेविंवायःसर्वदापहरतिसएकेरःकार्य॥एकःकरोस्यछेत्तव्यइत्यर्थः॥एकद्वरणेतुसा
र्द्धद्वादशपणान्दंड्यः।अजाविकेपहृतेईत्रषोडशपणाः॥नकुलविडालापहरणेत्रयःकार्षापणाइति
शंखलिखितस्मरणात्।चकारात्फलपुष्पाद्यपहारीच।यथाहबृहस्पतिः॥तृणंवायदिवाकाष्ठंपुष्पंवा
यदिवाफलं।अनापृच्छ्यचगृह्णानोहस्तछेदनमर्हतीति।बलाद्यपहारेचेदं।ब्राह्मणोब्राह्मणस्यसमि
दाद्यंधान्याग्निकाष्ठतृणोतपपुष्पमूलफलान्यपहरन्बलाद्विज्ञातोवाहस्तछेदनमोप्यपादितिशंखलिखि
तस्मरणात्॥धान्यापहार्य्येकादशगुणंदंड्यः॥८८॥धान्यंवाविंशकाद्यमाषादितद्घटकहरशाकुंभयोप
हरतिसएकादशगुणंदंड्यःततोधिकेवधाभिधानात्।यथाहमनुः॥धान्यंदशभ्यःकुंभेभ्योहरतोभ्यधि
कंवधः॥शेषेप्येकादशगुणंदाप्यस्तस्यचतद्धनमिति।धनमध्येकादशगुणमित्यर्थः॥सोयंदण्डस्व
भूतस्यस्वामिनःदेःकृतेपुनः।स्वामिनेपहृतंदेयंहर्त्रात्वेकादशाधिकमितिस्मरणात्॥सस्यापहारी

वि॰टी॰
७१

वा॥७९॥ तस्मान्नि हेमन्तवसन्तोद्भवानि व्रीहियवादीनि तानि पादशः कुम्भं योऽपहरति स एकादशगुणं
दंड्यः। पृथक् कृष्णलकग्रहणात् ह्रस्यमानो वार्हस्यमानो द्विगुणो दंडो न। किंतु मध्यमद्रव्यस्वान्मध्यमसाह
स एव। ततो विकेमस्यैत्वपहृते रववपव। तत्कारानुलामेयानामल्पेषामपि सुवर्णरजतादीनामथनन्त
नानामपहारे एकादशगुणः॥ शेषेष्वेकादशगुणोऽल्पत्वादंडप्रकल्पये इति स्मरणात्। अयं च दं
डः स्त्रीव्यवस्थयादधमास विषयो ज्ञेयः। महद्व्यपहारे तु विशेषमाह हृत्स्यादिति॥ धान्यहारादपागुणं
दाप्यस्तद्द्विगुणं दममिति। दशपुणांधान्यस्वामिने दापनीयो द्विगुणं दंड इत्यर्थः। पुनरुक्तमद्रव्या
पहारे परिमाणविशेषेण दंडविशेषमाह। सुवर्णरजतवस्त्राणां पंचाशतमभ्यधिकमपहरान्वध स
र॥८०॥ सुवर्णरजतोत्तमवस्त्राणामभ्यधिकं पंचाशतो धिकयावद्धतमपहरन्विकरः करर हितः का
र्यः। शताधिकवधाभिधानात्। सुवर्णरजतपोपंचाशत्संख्यत्वत्र माषाणामेवेत्युक्तं प्राक्। तेद्धन
मेकादशगुणं दंड्य॥८१॥ ततः पंचाशात्। कुनस्सुवर्णाज्ञानाद्यपहरन्तुल्यादेकादशगुणं दंड्यः। प

राम
७१

थाह मनुः तत तथा धरिममेयानां शतादभ्यधिके वधः। सुवर्णरजतादीनामुत्तमानां च वाससां। पंचाशतस्त्व
भ्यधिके हस्तभ्यधिके हस्तच्छेदनमिष्यते। शेषेष्वेकादशगुणं मूल्याद्दंडं प्रकल्पयेदिति। हीनद्रव्यापहारे
दंडमाह॥ सूत्रकार्पासगोमयगुडदधिक्षीरतक्रतृणलवणमृद्भस्मपक्षिमत्स्यघृततैलमांसमधुवै
दलवेणुमृन्मयलोहभांडानामपहर्त्ता मूल्यात्त्रिगुणं दद्यः॥८१॥ सूत्रं कार्पासादिनिर्मितं। कार्पा
सस्तूलं गोमयं गोशकृत् गुडदधिक्षीराणि प्रसिद्धानि। तक्रमुदश्वित् तृणं दूर्वादि लवणं सैंधवसा
मुद्रादि मृत् मृत्तिकादि भस्म भूतिः पादेप पक्षिणः शुकादयः। मत्स्याः पाठीनादयः घृततैले प्रसि
द्धे मांसं छागादेर्मधु क्षौद्रं वैदलं शूर्पव्यजनादि वेणुर्वंशः मृन्मयं घटकरकादि लोहभांडं कटाहादि
एषामेकादिशानि द्रव्याणामपहर्त्तोऽस्यैकं ह्रियमाणद्रव्यमूल्यात्त्रिगुणं धनं दद्यः। तथा च व्यास
ः। अल्पधान्यापहरणोद्धारे ततद्विकृतो तथा। स्वामिने तत्समं दाप्यो दंडं च त्रिगुणं टपरति। बहुवचना
त्किरावादिग्रहणं देशकालादिवैषम्ये द्विगुणमपि दद्यः। यथाह मनुः। सूत्रकार्पासकिण्वानां गोम

वि॰टी॰ ७८

पस्य गुडस्य च। दध्नः क्षारस्य तक्रस्य पानीयस्य तृणस्य च॥ वेणुवैदलभांडानां लवणानां तथैव च। मृन्म
यानां च हरणे हृदो भस्मन एव च। मत्स्यानां पक्षिणां चैव तैलस्य घृतस्य च। वेणुवैदलभांडानां लवणानां
लवणानां तथैव च। मृन्मयानां च हरणे हृदो भस्मन एव च। मत्स्यानां पक्षिणां चैव तैलस्य च घृतस्य च
। मांसस्य मधुकस्य चैव पश्चान्यस्य मधुसंभव। अन्येषां चैव मादीनामयानां च हरणे हृदो भस्मन एव च।
मत्स्यानां पक्षिणां चैव तैलस्य च घृतस्य च। मांसस्य मधुकस्य चैव पश्चान्यस्य मधुसंभव। अन्येषां चैव
मादीनामाभानामोदस्य च। पक्वान्नानां च सर्वेषां तन्मूल्याद्विगुणो दमः। इति द्विगुणत्रिगुणदंड
पोः देशापेक्षाय वस्था॥ पक्वान्नानां च॥ ८३॥ पक्वान्नानि शष्कुल्यपूपादीनि तेषामपहर्त्रीत
न्मूल्यात्त्रिगुणं दण्डः॥ चकारादोदनादीनां। पक्वान्नानां कृतान्नानामाष्टानामोदनस्य च। सर्वेषा
मल्पमूल्यानां मूल्यात्पंचगुणो दमः इति नारदस्मरणात्। अत्रापि पूर्ववद्व्यवस्था। पुष्पाहरितगुल्म
वल्लीलतापर्णानामपहरणे पंचकृष्णलान् ८४ पुष्पं च पक्वादि हरितं व्रीहमाईधान्यं गुल्मो मा

राम ७८

लत्यादिः वल्ली गुडूच्यादि लताद्राक्षादिः पर्णीनि तांबूलीपर्णादीनि एतेषामपहरणे पंचकृष्णलान्सा
ज्ञतान्दंड्यः। यथाह कात्यायनः। यत्रोक्तो माषकैर्दंडो रजतं तत्र निर्दिशेत्। कृष्णलैः स्वोक्त एवं स्यादु
क्तं दंडे विनिश्चित इति। बहुवचनाद्बहूनां द्रव्याहरणे। यथाह मनुः। पुष्पेषु हरिते धान्ये गुल्मवल्लीनगेषु च। अ
न्येष्वपरिपूतेषु दंडः स्यात्पंचकृष्णल इति। अपरिपूतमनपहृततुषं॥ शाकमूलफलानां च ८५ शाकं
वास्तुकादि दशविधं मूलपत्रकराग्रफलकांडविरूढकाः। त्वक्पुष्पं कवकं चेति शाकं दशविधं
स्मृतमिति स्मरणात् मूलमार्द्रकादि फलमाम्रादि। चकारादन्यदपि गोरसादि द्रष्टव्यं यथाह नारदः। शा
कानामल्पमूल्यानां हरणे फलमूलयोः। गोरसेक्षुविकाराणां तथा लवणतैलयोः। सर्वेषामल्पमूल्या
नां मूल्यात्पंचगुणो दम इति एतेषामपहरणे पंचकृष्णलान्दंड्यः। यथाह मनुः। परिपूतेषु धान्येषु शाक
मूलफलेषु च। वेणुपीठादीनां बहुमूल्यानामेकस्याप्यपहारे पूर्वमसाहसं दंड्यः। ब्राह्मणविषयमेतत्
तस्य वधतिभेवान्। अन्येषां वध एवां पुरुषादीनामपि यत्पदेन ग्रहणं यथाह मनुः। पुरुषाणां कु

64

लीनानांनारीणांचविशेषतः। मुख्यानांचैवरत्नानांहरणोवधमर्हतीति शंखलिखितौ। रातपुत्रहारकोऽस
हस्तश्शारीरोवादंडस्तत्कुलीनेष्वर्द्धमितिनारदः। सर्वस्वंहरन्नोनारीकन्यांतुहरतोवधः दासींहरतोम
ध्यः पादस्यच्छेदननयेति। कन्याविषयेविशेषमाहयाज्ञवल्क्यः। अलंकृतांहरन्कन्यामुत्तमंत्वन्यथा
धमं। दद्याद्दण्डंस्वजातिलोभेवधः स्मृतः। सकामायास्वनुलोमासुनदोषस्त्वन्यथाधमः। दू
षणोऽनुकारच्छेदउत्तमायांवधस्तथेति द्रव्याणामानेनसामृष्टाकोटेनचक्षुर्मशारकेरेकोपाछिलादंड
माह। अनुक्तद्रव्याणामपहर्तुर्मूल्यसमं ८१ यावस्तुनमध्यमाधमकोदिष्वनुक्तानिद्रव्याणितथाप्य
नुणासीमिनेनामहर्तोतन्मूल्यसमंदंड्यः सर्वस्वेपवशेषमाह। क्षेत्राः सर्वमपहृतंपनिकस्यदापयेत्।।
८८ क्षेत्राद्योराः सर्वमपहृतंधनसारमेसार्वंवाप्यत्रदर्शैकादशगुणादिदीस्त्रत्रैकादशगुणय
त्रमूल्यसमोदंडस्तत्रमूल्यसमंतदेवद्रव्यंतत्संज्ञानीयतन्मूल्यंवाधानकस्यस्वामिनोदाप्याः। गुर्वं
दंडविधेः कालमाह। तत्रक्षेत्रामभिहितंदंडप्रयोगः।। ८९।। ।। ततोपहृतद्रव्यदापनानंतरमभिहि

९ ॥ प्रतिमंत्रणातिक्रमणेच।९३॥ वेशो वेश्मनस्य प्रतिसन्निहितं सन्मुखं पार्श्वस्थं च वेश्मप्रतिवेशस्तत्र भवाः प्रातिवेश्यास्ते ब्राह्मणाः

तस्य दंडस्वरूपोनुष्ठानं कार्यं॥ यथाह बृहस्पतिः। संसर्गं विप्ररूपैश्च विज्ञाता राजपूरुषैः। प्रदाप्याप
हृतं दयाः दमैः। शास्त्रप्रचोदितैरिति। स्तेयप्रसंगात्पुनरपि साहसविषयमवशिष्टं दंडमाह॥ येषां
देयः पंथास्तेषामयं यदायी कार्षापणान्पंचविंशतिं दंड्यः॥९०॥ ॥येषां हन्वादीनां पंथा देय इति व
क्ष्यते तेषां पंथानमदत्वा कार्षापणानां पंचविंशतिं दंड्यः। गुर्वादिविषये तु मनुः। मातरं पितरं
जायां भ्रातरं स्वसुतं गुरुं। आक्षारयन् शतं दाप्यः पंथानं चाददद्गुरोरिति॥ ॥आसनार्हस्यास
नमदद्दंड्य ९१ आसनार्हस्याप्रति। प्रत्युत्थानाभिवादाभ्यां पुनः कारः प्रतिपद्यतइति मनुस्मर
णे दोषाभिधानात्॥ पूजार्हमपूजयंश्च॥९२॥ पूजार्हं मधुपर्कार्हं वक्ष्यमाणं स्नातकादिकं
विभवे सत्यपूजयन् पंचविंशतिं कार्षापणान्दंड्यः। चकारः प्रतिवदं स्वाभिवादितो नाभिवादयं
श्च प्रातिवेश्यब्राह्मणांश्च प्रातिवेश्यब्राह्मणा द्येषां श्रुतवृत्तसंपन्नानां निमंत्रणातिक्रमणे
कल्याणादावभोजने पंचविंशतिं कार्षापणान्दंड्यः। इदं च ग्रामादिके बुद्धिपूर्वकं तु सुवर्णम्

वि॰ टी॰ पकं दंशः। यथाह मनुः। जातिवैश्यानुवैश्यो चक्रत्स्नाणो विंशति द्विजे। अत्र भोजयन्विप्रा दंडं मर्हति माषकमिति मिश्रः यं वं दं डो द्विगुणा भोजयदानानन्तरं। कल्याणदर्शनार्थमन्निमंत्रणेनतु योगीश्वरः। तदि कः स्यात नेत्तुल्क हृ त्रानदाप्यः पणान्दशा त्राह्मणप्रातिवेश्यानामेतदेवानिमंत्रणा इतिञ्च कारात्रानातिक्रमेणो वो यथाह कात्यायनः सन्निकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत्। अयह दाति न मुक्तंप्यतस्य श्रेयेन लिप्यत इति। अधीयानत्व विशेषणान्मूर्खा तिक्रमणेन दोषः। यथाह व्यास यस्य स्वेकगृहे मूर्खो दूरे चापि गुणान्वितः यद्दातव्यं नास्ति मूर्खे ऽप्यतिक्रमः इति निमंत्रयित्वा भोजनमदापिनस्य ९४ यो ग्रं ब्राह्मणं निमंत्र्याभोजयन्नपंचविंशति कार्षापणान्दंड्यः। वका रात्तद्विगुणा भोज्यं साप्यः। ग्रामादिके चैवं वृद्धिपूर्वे हिरण्यमाषकं दंड्यः। यथाह मनुः। श्रोत्रिय ः श्रोत्रियं साधु भूमिकृत्येव भोजयन्नान्नदत्ते द्विगुणं दाप्यो हिरण्यं चैव माषकमिति। निमंत्रित श्रेयं मुक्त्वा चाभुंजानः सुवर्णमाषकं ९४ यो ग्रं ब्राह्मणं निमंत्र्याभोजयन् पंचविंशतिं कार्षा

एम
८०

यथानुरूपं दंड्यः। चकारात्तद्विगुणं भोज्यं दाप्यः। ग्रामादिके वेदं तु ह्निप्रूवे हिरण्यमाषकं दंड्यः। यथाह
मनुः श्रोत्रियः श्रोत्रियं साधुं भूतिकृत्येष्वभोजयन् तदन्नं द्विगुणं दाप्यो हिरण्यं चैव माषकमिति
॥ ॥निमंत्रितस्त्वथ सुस्थो वा भुंजानः सुवर्णमाषकं॥ ८५ निमंत्रितो निमंत्रणं स्वीकृत्य यदि न भुंक्ते
तदा सुवर्णमाषकं दंड्यः। निमंत्रितस्येकत्वनिर्देशादेकब्राह्मणेकेकर्मणि निमंत्रितस्याभोजने
इदं ज्ञेयं। बहुषु तु निमंत्रितेष्वेकस्याभोजनेनायं दंडः किंतु दंडांतरं कल्प्यं। सुवर्णपदं निरूपपदं मा
षकेरजतस्य ज्ञापकं स्यात् नतु कृष्णलपंचकात्मकमाषकैर्दंडइत्यनेन। इदं चास्य कृपरान्नभोजनवि
षयं। यथा मात्स्ये। आमंत्रितस्त्वमो विज्ञो वर्तमानः प्रतिग्रहे। निष्कारणेन गच्छेत्तु स दाप्यो
ऽष्टशतं दममिति। चकारात्प्रतिग्रहस्वीकृत्यापि तु प्रतिग्राही चावर्तमानः प्रतिग्रहस्तु
कृच्छ्रवचनात्। निकेतनपितृश्च द्विगुणमन्नं ८६ निमंत्रितोऽभुंजानो निमंत्रयितुर्द्विगुणमन्नं
न्नं वदाप्यः। चकारात्प्रतिग्राह्यश्च ॥ अभ्यदेयेणाज्ञातस्य दूषयिता षोडशसुवर्णा दं ८७॥

वि॰ यी
८१

अभक्ष्यं विष्ठादि तेन भक्ष्यन्नभोजितेन ब्राह्मणस्य दूषयिता दोषोत्पादयिता षोडश सुवर्णान्स्य दू-
षयिता षोडश सुवर्णान् दंड्यः। जात्यपहारिणि शते ९८ जात्यपहारिणा लशुनादिना अ-
भक्ष्यन्नभोजितेन यो ब्राह्मणस्य जातिमपहरति स शतं सुवर्णान् दंड्यः॥ सुरया वध्यः॥ ९९॥
सुरया पेयस्या द्यमन्नमानित्यक्तं पापिनयायो ब्राह्मणस्य जातिमपहरति स वध्यः। ब्राह्मणा-
व्यतिरिक्तश्चेत्समनुक्तांको विवासितव्यः॥ तत्त्रिपं द्वयपि पितुस्मदर्द्धं॥१००॥ पक्षत्रिप
मध्यादिना दूषयति क्षत्रियश्चेत्समनुक्तांको तिसतदर्द्धंमष्टौ सुवर्णान् दंड्यः। द्वं जात्यपहारे पञ्च-
पंचाशत्सुवर्णान् दंड्यः। पेयाद्या सुरयादीना मपि दूषणे वधमाव॥ ॥ वैश्यपद्द्वपि तु स्नदर्द्धं मपि॥
१०१॥ वैश्यपो। मध्यादिना दूषयति समेवा मष्टानामर्द्धं चतुरः सुवर्णान् दंड्यः॥ एवं जात्यपहारे
पंचविंशति। पेयाद्यादि सुरयान्तु वध्य एव॥ शूद्रं दूषयितुः प्रथमसाहसः॥१०२॥ शूद्रं पोमध्या दि-
नाद्दूषयति स प्रथमसाहसं दंड्यः। एवं जात्यपहारे सार्द्धं द्वादश सुवर्णान् सुरयानु पाविध्य एव अभ

राम
८१

ल्पेण।द्विजं दूष्यन्दंड्यस्तत्तमसाहसं।मध्यमं त्रिपणैश्चपंचयममंष्टमूडंमवेद्दंआःश्वतुष्यचाशदेयतु
ष्टिकमितिपोगिस्मरभगद्य।यस्तुअभक्ष्यमथचापेयंवैश्यादीन्योसपद्विजान्।जद्यस्यमध्यमा
कृष्टान्दंडादद्यायथाक्रमं।पणाश्चमूडंमवेदंत्र:श्वतुष्यचाशदेयतु।आशितारःस्वयंकार्या
राज्ञानिर्विषयाःकृतइतिमानवंदंडात्मात्वंतदाल्पत्रापश्चित्ताभक्ष्यापेयविषयमितिध्येयं॥
आशितारइत्याशपितारइत्यर्थःहीदसेविषयेभ्योस्पृश्यंत्रैवर्णिनिर्गतानिर्विषयाराज्ञुवहि
ष्कृतारित्यर्थः॥अस्पृश्यःकामकारेणास्पृशन्स्पृश्यंवध्यः१०३ अस्पृश्यचंडालादिःकामका
रेणबुद्धिपूर्वकंस्पृश्यंत्रैवर्णिकंस्पृशन्वध्यः।यस्तुचंडालश्चोत्तमानस्पृशन्पथितदंडभागिति
योगिस्मरणात्द्विवाहादिमहोत्सवसंमर्देदृष्टव्यं॥रजस्वलांशिफाभिस्ताडयेन्॥१०४ रजस्व
लांबुद्धिपूर्वंत्रैवर्णिकान्स्पृशंतीशिफाभिर्वटप्ररोहैस्ताडयेन॥पथ्युद्यानोदकसमीपे
सभ्युविकारीपणाशतं॥१०५ पथिमार्गेउद्यानंपुष्पवाटिकानुदकाशयचस्त्रडागादिषु

मि·टी
८२

समीपे तु मूत्रपुरीषात्सृष्टुंचिकीर्षोः पणशतं दंडः ॥ तच्चापास्यात् ॥१०६॥ तद्धि मूत्रपुरीषाद्यप
स्यादपसारयेन् च कारादिमेध्यसंसृष्टं स्पृष्ट्वा च यियंतुमसमर्थस्तदोज्झनमार्गे यद्यमेध्यमनाप द्विस
ष्टौ कार्षापणौ तं प्रादमेध्यं चाप्यशोधयेत् ॥ आपद्गतस्तथा वृद्धो गर्भिणी बालएव च परिभा
षणमर्हन्ति तच्च शोध्यमिति स्थितिरिति सामान्येन तल्लेख्याथ मेध्याभिसायं परिभाषणं भ्रूयो
प्येदं न कार्यमिति संवित्प्रसंगं तार्थाद्विषयेतु विशेषमाह कात्यायनः दृशाकौ
द्वातितीर्थानि यो मेध्येन विनाशयेत् ॥ अमेध्यं शोधयित्वा तु दंडयेत् पूर्वं साहसमिति पुन
र्दंडपारुष्ये दंडमाह ॥ गृहभंकुड्यापपभेत्ता मध्यमसाहसं ॥१०७॥ गृहं प्रहृशालादिभ्ना
रागणादिकुड्यभित्तिः आदिशब्दाद्वारपाकारादिस्तदुपभेत्ता तत्रात्तत्रानत्राशीको मध्यमसाह
सं दंड्यः इदं च गम्भारादिवद्गृहविषयं दंडभूपपन्नान्यत्र वृक्षादिवृद्धविषये तु कात्यायनः प्रा
कारं भेदयेद्यस्तु पातयेद्वा न पेद्वा तेपत्तु वा ॥ वस्तुपादं प्रसोमार्गं प्राप्नुयात् पूर्वं साहसमिति

एम
८२

।राजकीयप्राकारादिभेदने तु मनुः। प्राकारस्य च भेत्तारं परिखाणां च पूरकं। द्वाराणां चैव भंक्तारं क्षि
प्रमेव प्रवासयेदिति॥ तच्च योज्यम्‌ १०८॥ ॥तच्च पातितं गृहं भित्त्वा रिपुनर्योजयचुच्छापयेत्त
डुच्छापनं द्रव्यं दद्यादित्यर्थः। यत्तु अभिघाते तथाच्छेदे भेदकुड्यावपातने। पणान्दाप्यः पंचदशवि
शतिं तद्व्ययं तथेति योगिवचनं तन्मृदादिभित्तिविषयं॥ गृहे पीडाकरं द्रव्यं प्रक्षिपन्‌ पणाञ्छतं॥
१०९॥ परगृहे पीडाकारं कंटकाविद्धकर्मणपुत्तलिकादि द्रव्यं प्रक्षिपन्‌ पणाशतं दंड्यः। यत्तु दुःखो
त्पादि गृहे द्रव्यं क्षिपन्‌ प्राणहरं तथा। षोडशाद्यः पणान्दंड्यो द्वितीयो मध्यमं दमं। इति योगिवच
नं तत्कंटकादिप्रक्षेपे विषसर्पादिप्रक्षेपे वं द्रष्टव्यं। एवमुक्त्वा वशिष्टदंडपारुष्ये दंडमभिधाय पुन
:साहसेन प्रसंगेनितत्रापराधविशेषे दंडमाह॥ साधारणापलापी च॥११०॥ अनेकस्वामिकं द्र
व्यं साधारणं तस्यापलापनशीलः पणाशतं दंड्यः। चक्रादासीगर्भविनाशकश्च। साधारणस्यापलापी
दासीगर्भविनाशकृत्‌। शतं दंडभागिति योगिस्मरणात्‌। अभिन्नस्याप्रदाता च॥१११॥ देवब्राह्म

मि·टी· णाद्यर्थं ग्रिषितस्यार्थस्य लोभेनाप्रदानाच्च पणशतं दण्ड्यः। चकारादर्प्यकोशकादिग्रहणात्। अर्ध्या
८३ को शातिक्रमहृड्वान्त्र मायो प्रकारकः इति योगीश्वरेणाह। पञ्चत्र पंचाशत्पणको दंडः पाणिनि
विनिश्चय इति तद्रापमेवाल्यदंडाभिधानेतस्यामादिकाप्रदानादिविषयं ज्ञेयं॥ पितृपुत्रा वा
र्थयाज्यर्त्विता अन्योन्यापतितत्यागी च॥२३७॥ पिता जनकः पुत्र औरसः। आचार्यउपनायाध्या
पयिता याज्योपयतमानः। ऋत्विक् हृतः सन्यक् संकरः। एषामन्योन्यस्यापतितस्यत्यागी व शतं दंड्य
ः। अपतितत्वं शक्तादेरप्युपलक्षणं। अलिंगं पस्त्र न स्यज्यो याज्यं चर्त्विक् त्यजेप दि। शक्तकर्मण्य
दुष्टं च तयोर्दंडः शतं शतमिति मानवात्। त्यागः प्रवासोपलक्षणं। अथ वेत्स्मति विद्धः प्रवसत्का
मादन्यत्र प्रापः सवने ऋत्विक् शतं दंड्य इति शंखलिखितस्मरणात्। इदं चाकामतः कामतो हि
त२ शतं पञ्चाहसंग्रहा। कामाच्चेदपतितं याज्यं त्यजेद्दत्विक् ग्रामगुप्ताद्दि शतं दमं पाज्यश्चेत्त देवानुपाल्
। त्यागश्चात्विजः पतितस्येति। अप्रवादमाह। कामममपतितम श्रोत्रियमय जे घाज्य मभिशस्तम राम ८३

दातारमिति चकारात्स्वसृभ्रातृदंपत्त्याशिष्याणां ग्रहणं। पितृपुत्रस्वसृभ्रातृदंपत्याचार्यशिष्यकाः। एषा
मपतितान्योन्यत्यागी च शतदंडभागिति योगिस्मरणात् ॥ न च तत्रैव स्यात् ॥ ११३ ॥ तान् पित्रादीननुज्ञ
ह्यानननयेत्। त्यागश्चात्र भोजनादिव्यवहारस्य न त्वज्ञातिबहिष्कारविधिः। चकारान्गुरुणा वत्स पितृ
ग्रहणं। तथा च शंखलिखितौ। अत्याज्या माता तथा पिता सपिंडगुरवः सर्व एवात्याज्या इति। त्यागो
ऽतिक्रमस्याप्युपलक्षणं। मातापितरावतिक्रामेत् गुरुं त्वपाणां व्यतिक्रमादं गच्छेद इति तयोरेव स्मरणा
त्। दंडविधानादेवात्याज्यत्वे आसे पृथक्सूत्रकरणं त्यक्तृणामपांक्तेयत्वश्राद्धपरिहार्यत्वयोर्ज्ञापनार्थं।
तच्च व्यशीतिनमेस्टष्टिपिछते। अपंच शतं दंडो अकामतस्त्यागे कामतस्त्यागे तु द्विशतो दंड यथाह तु:शं
खलिखितौ अत्याज्यमाने तु पक्रम्य यस्मजेत्कामादपतितान्स दंड्यः आक्रया द्विशतमिति। अत्यंताभिनि
वेशेन तु त्यागे षट्शतः यथाह मनुः। न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति। त्यजन्नपतितानेतान् राज्ञा
दाप्यः शतानि षडिति ॥ शूद्रप्रव्रजितानां देवे पित्र्ये भोजकश्च ॥ १४ ॥ शूद्राश्च ते प्रव्रजिताश्च शूद्रप्रव्रजिता

वि.टी.
८४

दिगंबरोदयस्तेषां देवेष्विज्येन भोजयिताघातं दंडः । चकारात्स्वच्छंदविषयगामी वा स्वच्छंदविषयागामी नियो
गिस्मरणात् ॥ अयोग्यकर्मकारी च ॥१५॥ यद्यस्य योग्यं न भवति यथानुपनीतस्याध्ययनं तादृशकर्मका
री च शतं दंड्यः । चकारात्स्वामिमतानपकारी च । सामंतकुलिकादीनामपकारस्य कारक इति योगिस्मरणात्
। यन्वत्रपंचाशत्पणं दंडाभिधानं तद्विपंप्रदनादृश्याभिधायं म्लोकस्य ताद्दशीत्यप्रत्ययेनाद्य त्रिविषयत्वात्
। पत्तुसमुद्रगृहभेदकश्च ॥१६॥ तडागादिमुद्रयासहवर्त्तमानं समुद्रं तादृशगृहस्य भेदक उद्घाटयिता शतं दंड्यः
:। चकारात्समुद्रपरिवर्त्तकश्च । समुद्रपरिवर्त्तकश्च । समुद्रपरिवर्त्तश्च सारभारभांडं चकृत्रिमं । आच्छादनं वि
क्रयं वा पि[illegible]यते । दंड कल्प्यता । मित्रयरोत्तुपंचाशत्पणेनुशतंतमुच्यते । द्विपणो द्विशतो दंडो मूल्यवृद्धौ वह
द्विमानमिति योगिस्मरणात् । समुद्रं सपिधानं करं उक्तादितस्य परिवर्त्तो यस्त्यासः च्चार भांडकष्टादि । प
त्तुसमुद्रगृहभेदकृत् । पंचाशत्पणिको दंडश्चाभिमिति योगिस्मरणात्स्वामिमुद्रितविषयं ॥ अनियुक्तः
शपथकारी ॥१७ एतास्सर्व्वेर्वानियुक्तो नादिष्टः शपथं विप्रपादस्पर्शादिकं यः करोति स शतं दंड्यः । अ

पुंस्त्वं शपथं कुर्वन्तीति योगीश्वरः। मातरं ह्रियामी मादिरपुत्रकाद्यर्थः॥ पशूनां पुंस्त्वोपघातकारी॥ १८॥ पशू
नां वृषादीनां पुंस्त्वस्य प्रजननशक्तेः इति च्छेदनादिना उपघातकारी विनाशकः शतं दंड्यः॥ यथाह योगीश्वरः। वृ
षभादि पशूनां च पुंस्त्वस्योपघातकः। शतं दंडभागी तिशेषः। दुग्धहरणादश्वादि घृतादि गुणाः महापशूनामेते
पुंस्त्वानेषु द्विगुणाः स्मृता इति योगीस्मरणात्॥ इमा पितापुत्रविरोधे साक्षिणां दशपणो दंडः॥ १९॥ पिता
पुत्रयोर्विरोधे द्रव्यादिविषयविपयविवादे ये कलहाभिवृद्ध्यभिसंधिना साक्ष्यमंगीकुर्वन्ति तेषां दश
पणो दंडः॥ पश्चाद्योर्ध्यान्तरे यस्मात्तस्योत्तमसाहसः॥ २०॥ ॥ यः पुनस्तयोः पितापुत्रयोरंतरे मध्ये अ
भिनिवेशेन पणादानाय धनदानाय वा प्रतिभूः स्यात्तस्योत्तमसाहसो दंडः॥ यत्तु पितापुत्रविरोधे तु सा
क्षिणां त्रिपणो दमः। अंतरे च यो यत्स्यात्तस्याप्यष्टगुणो दम इति योगीस्मरणं तद्व्यवहारमार्गेणापि
साक्ष्यप्रज्ञाभिभावकरणे इति प्रसंगनिवृत्त्यपेद्रष्टव्यं। अत्यभिनिवेशे त्वष्टशतं। यथाह भृगुः शंखलिखि
तौ पितापुत्रयोर्विरोधे साक्षी न तिष्ठेत् यस्तिष्ठेत्स दंड्यस्त्रीन् कार्षापणान् यश्चान्तरे गच्छेत्सोप्यष्टशतं

वि॰टी॰
८५

दाप्य इति अष्टाधिकं शतमित्यर्थः। चकाराद्दंपर्योग्रहणं। गुरोः शिष्येपितुः पुत्रेदंपत्योः स्वामिभृत्ययोः। अन्या
देषोमवेद्दादोषमविङ्गिः कृत इत्यवपित्रादिसोधर्म्योभेदामान॥ तुलामानकूटकर्तुश्च॥२१॥ तुलातोनदंडः
मानं कुडवादिकं टकादिचक्रराद्दम्पा दिनाणकस्य कूटव्यवहर्त्तुश्च ग्रहणं प्रत्येपायः कूटदेशज्ञापितद्रिपरिहारे
णास्मूनाधिकभावकल्पितमुद्रामुद्रितत्वं इद्रं प्रातरगमत्वं चाकरोति तस्योत्तमसाहसोदंडः। यथाहयोगी
श्वरः। तुलाशासनमानानां कूटकृन्नाणकस्य च। एभिश्च व्यवहर्ता यः स दाप्यो दममुत्तममिति। तद
कूटकूटवादिनश्च॥२२॥ तस्य तुलादेरकूटं शुद्धमसत्यामपिय। कूटं वदति चकारात्कूटमप्यकूटं वदति
तस्याप्युत्तमसाहसोदंडः। यथाहयोगीश्वरः। अकूटं कूटकं ब्रूते कूटं यश्चाप्यकूटकं। सनाणकपरीक्षी
तु दाप्य उत्तमसाहसमिति॥ ॥इभ्याणां प्रतिरूपविक्रयिकस्य च॥२३॥ इभ्याणां सुवर्णरजतादीनां प्रति
रूपं रससवेधाद्यापादितस्वर्णादिसाहश्यं तत्ताम्रादि तद्विक्रयोस्यास्तीति विक्रयी तस्य विक्रेतुरुत्तमसाहसोदं
डः। चकारात्कर्णनासछेदनासछेदश्च। यथाहयोगीश्वरः। कूटस्वर्णव्यवहारी विमांसस्य च विक्रयी। अंगही

नक्रकर्तव्योदासप्यश्चोत्तमसाहसमिति। यत्तु तेनैव भ्रष्टचर्ममणि। स्मृत्वा यः काष्ठवल्कलवाससा। अज्ञातो ज्ञा
तिकारणो विक्रेयाष्टगुणो दम इत्यत्र कं तस्यैरिमणि तद्द्रव्यं षट्वेति ध्येयं एवं साहसे दंडो भिहितः स दंडो भिहितः सं
घातं संभूय समुत्थाय समुत्थाने दंड प्रसक्तौ ति। तल्लक्षणमाह नारदः। वणिक्प्रभृतयो यत्र कर्म संभूय कुर्वते तत्संभू
य समुत्थानं व्यवहारपदं स्मृतमिति तत्र वणिजां दंडमाह। संभूय वणिजां पण्यमनर्घेणावरुंधतां ॥२४॥ ये
पुनर्वणिजः संभूय मिलित्वा देशांतरागतपण्यमनर्घेण हीनमूल्येन प्रार्थयमाना रुधंति प्रत्येकमुत्तमसा
हसो दंडः ॥ वक्ष्यमाणस्य प्रत्येकपदस्य मध्यस्थतया पाश्चात्यान्वयात् ॥ प्रत्येकं विक्रीणतां वा ॥२५॥ ये
च स्वीयं पण्यमनर्घेणाधिकमूल्येन विक्रीणंति तेषामपि प्रत्येकमुत्तमसाहसो दंडः। यथाह योगीश्वरः। सं
भूय वणिजां पण्यमनर्घेणोपरुंधतां। विक्रीणतां वा विहितो दंड उत्तमसाहस इति। तेषां च तत्र लाभालाभव्यवस्थ
ह सएवं समवायेन वणिजां लाभार्थं कर्म कुर्वतां। लाभालाभौ यथाद्रव्यं यथा वा संविदा कृता। विति। सविद्वलो
किं क्वलौ किं कीचलौ किं कौ वणिगादिषु अलौ। किंकारात्विंकृतानमूल्या यथाह मनुः। ऋत्विजः समवेता

वि·र· क्रयपथास्तत्रे निर्मंत्रितास्तु कुर्युर्यथार्हतः कर्मरहस्यप्रदर्शिगणानथेति। दृष्टिरागविभागं वाह्कास्यामनः। ह्वा
८६ दशाह्वादशाष्टेभ्यः षट्च दक्षिणीये मध्यतस्त्र्यंशस्त्र्ज्ञाये भ्यश्च इतरे भ्य इति। आद्याहोतृ द्वर्युद्र्व ह्मोद्गाता
रः। द्वितीयामैत्रावरुणप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रस्तोतारः स्मृताः। अच्छावाक नेष्टाग्नीध्रप्रतिहर्त्रा इतरे याव
ग्रावस्तुन्नेतृपोतृसुब्रह्मण्या इति। हस्तस्यायोगेशयाह मनुः॥ ऋत्विग्यदि वृतो यज्ञे स्वकर्म परिहापयेत्। तस्य
कर्मानुरूपेण देयोंऽशः सहकर्तृभिरिति। सहकर्तृभिः सहकारिभिरित्यर्थः। अत्र विशेषान्तरमाह स्मृतिकालस्मु
दीन्हेतमान्तराय यज्ञतस्यादौ यपिको वा तेक्रतुसंपादयेत् प्रोष्य मन्यागतस्य किंचित्वलमनतेः। स एव वाह् दुष्ट
स्यर्त्विक् प्रतिकूलोपाध्यायः। एवं व्याक्षिप्त पतितोऽन्त्यजः प्रहीनपत्र षष्ठमेषु सेषसादकर्त्राष्टे विद्रूसतिक त्रीभि
:सहकारिभिरित्यर्थः। एवं संभूय समुत्थानं दर्शितं। इदानीं विक्रीयासंप्रदानं दर्शयति। तत्र लक्षण
माह नारदः। विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते। विक्रीयासंप्रदानं तद्विवादपदमुच्यते इति। लोकेऽस्मि राम
द्विविधं द्रव्यं स्थावरं जंगमं तथा। क्रयधर्मेषु सर्वं तत्पण्यमुच्यते। षड्विधस्तस्य तु बुधैर्दानादानविधिः स्मृतः॥ ८

मं तुलिमं मेयं क्रियया रूपतः श्रियेति । गणिमं माषादि । तुलिमं धान्यादि । मेयं तैलक्षीरादि । क्रियया दोह
नवाहनादिकया गवाश्वादि । रूपतः पण्याङ्गनादि । श्रिया संपदा गृहारामादि कोशावारत्नादि । तत्र ष
ड्विधमपि पण्यं विक्रीयासंप्रयच्छतः स्यात् ॥ गृहीतमूल्यं यः पण्यं क्रेतुर्नैव दद्यात्तस्मात्सोदयं दाप्यः ॥ २६
गृहीतं मूल्यं विक्रेत्रा यस्य पण्यस्य तद्गृहीतमूल्यं पण्यं क्रेतुः क्रेत्रे स्वदेशवासिने याच्यमानोऽपि यो विक्रेता नैव द
द्यात्तस्मात्सोदयं दाप्यः । अयमभिसंधिः पण्ये तेन क्रीते याच्यमानो न प्रयच्छति तद्देशे च कालान्तरे पण्ये नाश
ता सह तत्पण्यं क्रेत्रे विक्रेता दापनीयः । नैवल्पवधारणार्द्धपादोदत्ते तु यावदवशिष्टं तस्यैव या
वयान्मूल्यमवहीयेत तेनैव सह तावदेवावशिष्टं क्रेत्रे विक्रेता दापनीयः । यथाह नारदः । अर्घश्चे
दवहीयेत सोदयं पण्यमावहेत् । स्थानिनामेष नियमो दिग्लाभं दिग्गतस्य तु । यदा त्वर्घह्रासो ना
स्ति किं तु क्रयकाले कालान्तरे च तुल्य एवार्घस्तदा तस्य पण्यं तस्मिन्देशे क्रयकाले विक्रीणानो यो लाभ
स्तेनोदयेन सह तत्क्रेत्रे विक्रेता दापनीयः । यदि तु क्रेता देशान्तरादागतस्तदा तस्य पण्यभाण्डस्य दे

शेगत्वा। विक्रीणानो यो नाम स्वात्महितेप्सया पदार्थः। दिष्टमेवादिगागत इति स्वरूपाणान्। यदानु
गृहधेत्वादिकं गृहीतमूल्यं न प्रयच्छति न दातिदानं दुपभोगरूपेणोदयेन सह तद्द्रव्यं प्रपा
ह नारदः। विक्रीय पण्यं मूल्येन यः क्रेतुर्न प्रयच्छति। स्थावरस्य क्षयं दाप्योऽजंगमस्य क्रियाफलमि
ति। स्वपउपभोगः क्रियाफलं ज्ञाबादि। इदमप्यनुशयाभावे अनुशये तु सति मनुराह क्रीत्वा विक्रीय वा
किंचिद्यस्येहानुशयो भवेत्। सोन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत वेति विशेषान्तरमाह योगीश्वरः। दशै
कपंचसप्ताहमासत्र्यहार्धमासिकं। बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणमिति क्रीत्वा विक्रीय वा
किंचिद्यस्येहानुशयो भवेत्। सोन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत वेति। विशेषान्तरमाह योगीश्वर
ः। दशैकपंचसप्ताहमासत्र्यहार्धमासिकं। बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणमिति। तस्यार्द्
इमा राज्ञा च पणशतं दंड्यः॥१७॥ ॥गृहीतमूल्यं पण्यं यः क्रेतुर्नैव प्रयच्छति राज्ञा पणशतं दं
ड्यः। एवं विक्रीतानुशयोऽभिहितः। इदानीं क्रीतानुशयं प्रस्तौति न हि वादपदमुच्यत इति। तदेतदुभयमपि

कविवादपदं क्रयविक्रयानुशय इतिमठस्मरणात्तत्र विक्रेतृदोषविनिक्रीतमक्रीणतो
याहानिः सा क्रेतुरेवस्यात् २८॥ क्रीतंद्रव्यंमूल्यं पण्यं दीयमानमप्यक्रीणतः ए हन्नोपहृपहस्येततदासो
हानिः हेतुरेवस्यान्न विक्रेतुः। दीयमानाग्रहणरूपक्रेतृदोषेणानष्टत्वात्। यथाह नारदः। दीयमानंनगृह्णा
ति क्रीत्वा पण्यं वयः क्रयी। सएवास्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छत इति। यदिपुनर्याच्यमानोपि विक्रेतातन्न
प्रयच्छति तदा विक्रेतुरेवासौ हानिः। यथाह स एव। उपहन्येत वा पण्यं दह्येतापह्रियेत वा विक्रेतुरेवसो
ऽनर्थो विक्रीयासंप्रयच्छत इति॥ राजनिषिद्धं विक्रीणतस्तदपहाः॥ २९॥ ॥ यद्राज्ञा विशेषतो निषि
द्धं तदमत्र विक्रेतव्यमिति तद्विक्रीणतस्तस्यैव तस्य नोपहारः कार्यः। निषेधो यथा। प्रनाम पि गा मय
ति। यथाह योगीश्वरः। व्या सिद्धं राजयोग्यं च विक्रीतं राजगामि तदिति संभूयसमुत्थाने वक्ष्याव शि
ष्टं शौल्किके दंडमाह॥ ॥तरिकः स्थलजं शुल्कं गृह्णन्दश पणान्दंड्यः॥ ३०॥ तीर्यतेनेनेति तरो नौका
दिः तच्छुल्काधिकारी तरिकः। तदाह मनुः। पणं यानं तरे दाप्यं पौरुषोर्द्धपणं तरे। पादं पशुश्च योषिच्च प

वि.टी.
८८

पादार्द्धं रिक्तकः पुमान् ॥ भांडपूर्णानि यानानि तार्यं दाप्यानि सारतः रिक्तभांडानि यत्किंचित्पुमांसश्चा
परिच्छदा इति ॥ सपदि स्थलजं स्थलेऽयं वंशुल्कं गृह्णाति तद्दशपणान्दद्यात् ॥ स्थलदं शुल्कमुक्तं तत्री
पाध्याये स्थलदेशपण्यात् शुल्कांशं दशप्रमाणं घादिष्यदिनी ॥ तद्देवाहिंवंधं शुल्कमुक्तं भवतीति तदुभ
यस्य सविशेषातिक्रमे दण्डमाह ॥ ब्रह्मचारिवाणिनाभक्ष्यभिक्षुगुर्विणीतीर्थानुसारिणां नाविकः शौल्कि
कः शुल्कमाददानश्च ॥ ३१ ॥ ब्रह्मचारी उपकुर्वाणो नैष्ठिकश्च वानप्रस्थस्तृतीयाश्रमः भिक्षुः सन्न्या
सी गुर्विणी गर्भिणी तीर्थानुसारी नितरं तीर्थसेवी एतेषां शुल्कमाददानो नाविको जलशुल्काधिका
री शौल्किकः स्थलशुल्काधिकारी च दशपणान्दद्यात् ॥ अनेनैषां शुल्कं न ग्राह्यमित्युक्तं भवति । तथा च स्मृत्यंत
रे । न भिक्षुकाषपिण्यमस्ति शुल्कं न शिल्पहृत्रो न शिशो न दूते । न भैक्ष्यलब्धे न हृतावशेषे न श्रोत्रिये प्रव्रजिते
न यज्ञ इति । गर्भिण्यां विशेषमाह मनुः ॥ गर्भिणी तु द्विमासादिस्तथा प्रव्रजितो मुनिः । ब्राह्मणा लिंगिनश्चै
व न दाप्यास्तारिकं तरे इति दण्डोत्तरकल्पमाह ॥ ।तद्यतेषां दद्यात् ॥ ३२ ॥ तेषां ब्रह्मचारिप्रभृतीनां तक्षु

८८
राम

हीनमपि शुल्कं परावर्त्य दद्यात्॥ एवं संभूयसमुत्थाने वक्तव्यावशिष्टो दंडो ऽभिहितः। इदानीं द्यूतसमाह्वयपदं
उं प्रस्तौति। न त्वन्दनमृणमाह नारदः॥ अक्षवध्रशलाकाद्यैर्देवनं जिह्मकारितं। पणक्रीडावयोभिश्च प
दं द्यूतसमाह्वयमिति। अक्षाः पाशाः। वध्रं चर्मपट्टिका। शलाका दंताहिमय्यो दीर्घचतुरस्राः॥ आदि
शब्दात्काकिण्यावध्रकाश्चैव शलाकाशोयरवच। अन्वाः सवीजाः कुरुका द्यूतोपकरणानि
षडिति स्मृत्यंतरोक्तं ग्राह्यं। काकिन्यः कपर्दकाः शोपश्चतुरंगकाष्टादिनिर्मितं तैरन्यं सवीजागु
प्तवीजाकुरुकामुद्रयः। एतैः पणपूर्विका क्रीडा द्यूतं वियोभिः। कुक्कुटादिभिश्च कारान्मेष
महिषादिभिश्च देवनं समाह्वय इति यथाह मनुः। अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते
प्राणिभिः क्रियमाणस्तु स विज्ञेयः समाह्वय इति। द्यूतं च समाह्वयश्च द्यूतसमाह्वयं। तत्र कूट
स्य देविनो दंडमाह॥ द्यूते कूटस्य देविना करच्छेदः॥ २३॥ द्यूते पूर्वोक्तैः कूटैः कपटाविकैटैरक्षा
दिभिर्यदा व्यतिते पाक रच्छेदः कार्यः॥ उपधि देविनां संदंशच्छेदः॥ २४॥ अन्यं वंचनार्थं हि त्रिसंप्र

वि॰टी
८९

ति पत्रिर्हस्तपादानुपाद्याभिमतपातनमशीतिं अदिनाप्रतिबचनवाऽपधिस्तेनयेदाव्यंतिनेवोसदेश
च्छेदः तर्ज्जन्यंगुष्ठे सदंशस्तस्य छेदः कार्यः । यत्नः पोगीष्वरगतेष्वकरच्छेडातिर्वासनमुक्तं । राज्ञा
ज्ञासपिद्वंनिर्वास्याः कूटाक्षोपधिदेविनः इति तद्वासविषयं तस्य शारीरं दण्डमपेयाच विष्णु
श्वपदस्य तिवासनेविशेषमाह नारदः ॥ कूटाक्षदेविनः पापान् राजाराष्ट्राद्विवासये
त् । कंठे क्ष मालामासज्य सह्येषां विनयः स्मृतः इति । यत्तु द्यूतं समाह्वयं चैव यः कुर्यात् का
रयेत वा तान् सर्वान् घातयेद्राजा शूद्रांश्च द्विजलिंगिनः इति मनुनाद्यंतुनिषिद्धत्कूटद्यूत
विषयं राजादिदत्तद्यूतविषयं वा वेदितव्यं । यथाह बृहस्पतिः । द्यूतं निषिद्धं मनुना सत्यशौचधनाप
हं । तत्प्रवर्त्तितमन्यैस्तु राजभागसमन्वितं । राजभागो राजसभिक संप्रति पत्याया वा नुवृ
त्तो भवति तां व्याते यथाह याज्ञवल्क्यः सभिकः कारितो दद्याद्धनं भागं यथारुचि मिति । तद्गत्वा
त्वा हं सपादं । मदेश्च सभिकः पंचकं शतं । पक्षीया हृत्तिकितवा दितरा दृशकं शतमिति स्मृहा प

राम
८

पणाकास्मिन् शतिकाशतियरिमितानिकावाहृद्धिर्लोभोयस्यताहृशाद्दतंकितवान्निपुणद्देविन
:पंचकंशतेपंचकमितरादनिपुणात्कितवात्पराजितात्द्वादशकंशतंशतेदशकंसभिकोघूतसभाप
तीराजभागंदेविनात्सुत्तमणीस्वबृद्धिंरहस्यादित्यर्थः॥सभाद्वयस्यघूतधर्मकाणवेतिनेष्टयगभि
धानं।यथाहस्मरणवायचएवविधिक्षित्रयःप्राणिघूतेसमाह्वयइति।प्रसंगोत्सुनस्तेयदंडमाह॥ग्रं
थिभेदकानांकर॥३५॥वस्त्रांचलवद्धंद्रव्यंबित्त्वसौत्स्फुटस्यवायेपहरंतितेग्रंथिभेदकास्तेषांसंदं
शाछेदः कार्यः।उत्क्षेपकानांवकरछेदः॥३६॥येवस्त्रपात्राद्युत्क्षिप्यापहरंतितेउत्क्षेपकास्तेषांक
रछेदःकार्यः।प्रकृतेपिकरछेदव्यवापात्रानुपप्तेरस्मनंतुपंगासुनरुपादानोद्वितीयापराधेक
रंकरपादंदेकहिंघानं।यथाहयोगीश्वरः।उत्क्षेपकग्रंथिभेदौकरसंदंशहीनकौ।कार्यौद्वितीयाप
पराधेकरपादैकहीनकाविति॥तृतीयापरावेवधएव।यथाहमनुः।अंगुलीग्रंथिभेदस्यछे
दयेत्प्रथमेग्रहे।द्वितीयेवधमहतीति।एवंप्रासंगिकंपरिसमाप्यदानंस्वामिपालविवादेदंडंप्र

मि.टी.
९०

स्येति तत्स्वस्वामिपालयोः पालस्यैव प्रसिद्ध्येव सिद्धमित्यभिप्रेत्याह मनुः। पशुषु स्वामिनां चैव पालानां च
व्यतिक्रमे। विवादं संप्रवक्ष्यामि यथावद्धर्मतत्त्वतः इति। तत्र दोषकार्यं वक्तुं पालदोषं विविनक्ति॥
॥ दिवा पश्वतां वृकाद्युपघाते पाले दोषः॥ १७१॥ पशूनां गवादीनां दिवसे वृकाद्युपघाते दक्ष
ष्टशृगालादिभिरुपघाते कृते सोपाते स्यैव दोषो वक्तव्यः तमोपुष्पसोपालो वृकाद्यवस
हादष्टानात्मावापतुनपतेत। यथाह मनुः। अजाविके तु संरुद्धे वृकैः पाले त्वनायति। यां प्रस
ह्य वृको हन्यात् पाले तत्किल्विषं भवेदिति। वृकैः संरुद्ध इति वचनादसंरुद्धानामाकस्मिकवृका
द्युपघाते न पालदोषः। यथाह स एव। तासां चेदवरुद्धानां चरन्तीनां मिथो वने। यामुत्प्लुत्य वृको
हन्यान्न पालस्तत्र किल्विषी। इति। दिवा ग्रहणाद्रात्रौ स्वामिगृह उपघाते स्वामिन एव दोषः
दिवा रात्रं पालाधीनं योगक्षेमं तासां पुनः पालस्यैव। यथाह मनुः। दिवा वक्तव्यता पाले रा
त्रौ स्वामिनि तद्गृहे। योगक्षेमोऽन्यथा चेत्तु पालो वक्तव्यतामियादिति। वृकग्रहणाद्व्याघ्रादि

रम
९०

विकीर्विकृतिरसंबद्धप्रलापः असंबद्धस्य प्रकृतानुपयुक्तस्य प्रलापो मुहुर्मुहुर्भाषणं। चकारान्मानसी च विकृतिः प्रतिवाक्या
दाने परवाक्यानाकर्णनं वेत्यादिः। साक्षी तूपलक्षणं तेनार्थिप्रत्यर्थिनोरप्यन्यतरो यद्येवं विकारवांस्तदासौ दुष्टो ज्ञेयः। य
थाह योगीश्वरः। देशाद्देशांतरं याति सृक्किणी परिलेढि च। ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च। परिशुष्यत्स्खलद्वा
क्यो विरुद्धं बहु भाषते। वाक्चक्षुः पूजयति नो तथोष्ठौ निर्भुजत्यपि। स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः। अ
भियोगेथ साक्ष्ये वा स दुष्टः परिकीर्तित इति। विद्यादित्यनेन चैतेषां लक्षणानां दुष्टताज्ञापकत्वेन प्रमाकत्वमि
त्युक्तं। स्वाभाविकनैमित्तिकयोर्विशेषस्य दुर्ज्ञेयत्वात्। तत्तस्मात्तद्वचनान्निर्णयाभावमात्रं न दंडादिकमपीति
ज्ञेयं। साक्षिणश्च कदा कथं पृच्छेदित्यत आह॥ ॥ साक्षिणश्चाह्वयादित्योदये कृतशपथान् पृच्छेत्॥ २९॥ ॥ पूर्वो
क्तान् साक्षिणः सभांतः साक्षिणः समाहूयादित्योदये सति पूर्वाह्ण एव कृतवक्ष्यमाणशपथान् प्रकृतमर्थं प्रा
ड्विवाकः पृच्छेत्। यथाह नारदः। सभांतः साक्षिणः सर्वानर्थिप्रत्यर्थिसंनिधौ। प्राड्विवाको नियुंजीत विधि
नानेन सांत्वयन्। उदङ्मुखान्प्राङ्मुखो वा पूर्वाह्णे वै शुचिः शुचीनिति। प्रश्नप्रकारमाह॥ ॥ ब्रूहीति ब्राह्मणं
पृच्छेत्॥ ३०॥ ॥ अस्मिन्विषये यत्त्वं जानासि तद्ब्रूहीति ब्राह्मणं पृच्छेत्। प्रश्नानुवृत्तौ पुनर्वचनमपृष्ठस्य वचन

मशृष्टस्यवचनं निषेधार्थं॥ ॥सत्यंब्रूहीतिराजन्यं॥२१॥ ॥अस्मिन्विषये सत्यंब्रूहीतिराजन्यं पृच्छेत्॥ ॥गोबीजकांचनैर्वैश्यं॥२२॥गोबीजकांचनानि ते विफलानीति शापितं वैश्यं पृच्छेत्॥ ॥सर्वैर्महापातकैस्तु शूद्रं॥२३॥ सर्वैः पंचभिर्महापातकैर्ब्रह्महत्यादीनि पंचापि ते महापातकानीति शापितं शूद्रं पृच्छेत्॥ सर्वशब्दात्रित्वे तु दासः तु शब्दाद्द्व्यमाणपातकांतराणां शूद्रसमवर्णानां च संग्रहः॥ अनेनक्तशपथानि तिवैश्यशूद्रशूद्रसमब्राह्मणविषयमेवावतिष्ठते॥ शपथोनेकेसत्यकर्मतद्देवराजब्राह्मणसंसदि स्याद्ब्राह्मणानामिति गोतमस्मरणात्॥ शूद्रसमान्विप्रानाह मनुः॥ गोरक्षकान्वाणिजिकांस्तथा कारुकुशीलवान्॥ प्रेष्यान्वार्द्धुषिकांश्चैव विप्रान्शूद्रवदाचरेदिति॥ शपथस्वरूपमाह॥ ॥साक्षिणश्श्रावयेत्॥२४॥ वक्ष्यमाणं वाक्यमुक्तलक्षणान्साक्षिणः श्रावयेदित्येष एव शपथः॥ किं श्रावयेदित्यत आह॥ ॥ये महापातकिनां च लोका ये चोपपातकिनां ते कूटसाक्षिणामपि॥२५॥ महापातकिनो ब्रह्महादयः [illegible] उपपातकिनो गोघ्नादयस्तेषां ये लोकास्ते मिथ्यासाक्षिणामपि भवंति॥ किंच॥ ॥जननमरणांतरे कृतं सुकृतं हानि स्यात्॥२६॥ ॥जन्मारभ्यामरणं कृतस्य सुकृतस्य नाशश्च मिथ्यासाक्षिणां॥ साक्षिणां सत्यानुसरणाय तत्प्रशंसति॥ ॥सत्येनादित्यस्त

॥खंचसत्येन॥३३॥ ॥आकाशस्य निरवलिंबावस्थानशक्तिः॥ ॥सत्येनदेवाः॥३४॥ ॥देवानांदिविदेवनशक्तिः॥ ॥४

स१

पति॥२१॥ ॥योयमादित्येतेजःप्रभावःसत्यफलमित्यर्थः॥ ॥सत्येनभातिचंद्रमाः॥२०॥भानंशोभातिशयः॥॥
सत्येनवातिपवनः॥२१॥ ॥वानंवहनशक्तिः॥ ॥सत्येनभूर्द्धारयति॥२०॥ ॥धारणंधारणशक्तिः॥ ॥स
त्येनापस्तिष्ठंति॥२३॥ ॥अपांसमुद्रभुवांस्थानंप्रखरतरार्ककरनिकरसंस्पर्शेप्यशोषणं॥ ॥सत्येनाग्निः
॥२२॥तिष्ठतिस्थानमत्रदाहशक्तिः॥८॥सत्येनयज्ञाः॥३५॥ ॥यज्ञानामग्निष्टोमादीनांपरलोकेफलजनन
नेशक्तिःसत्याधिक्येहेतुमाह॥ ॥अश्वमेधसहस्रंचसत्यंचतुलयाधृतं।अश्वमेधसहस्राद्धिसत्यमेवविशिष्य
ते॥२६॥ ॥सहस्राश्वमेधजन्यसुकृतेनसहतोल्यमानंसत्यमेवातिरिच्यतेतेषामनेकांगोपसंहारसाध्यत्वेनसाङ्गुण
स्याशक्यानुष्ठानत्वात्।सत्यस्यतुकेवलमात्मशुद्धिमात्रसाध्यत्वात्।कोटसाक्ष्यफलातिदेशमाह॥ ॥जानंतोपि
हियेसाक्ष्येतद्गीभूताउपासतेतिकूटसाक्षिणःपापैस्तुल्यादंडेनवाप्यथ॥२७॥ ॥येपुनर्विप्रतिपन्नमर्थंविशेषतो
जानंतोपिसाक्ष्येनियुक्तास्तद्गीभूतास्तिष्ठंतिधर्मसाक्षुवाचदंतेकूटसाक्षिणःपापैरनंतरोक्तैदंडेनचपूर्वोक्तेनसर्व
स्वापहारलक्षणेनतुल्यावेदितव्याःसर्ववर्णेषुसाक्षिषुसाक्षुप्रश्नक्रमाह॥ ॥एवंहिसाक्षिणःपृच्छेद्व
र्णानुक्रमतोनृपः॥२८॥ ॥एवंपूर्वोक्तशपथश्रावणपूर्वकंवर्णानुक्रमेतोब्राह्मणंपृष्ट्वाक्षत्रियमित्यादि

सा२ ति३ म२

क्रमेणन्नृपोराजाप्राड्विवाकोवासाक्षिणःपृच्छेत्।साक्षिवचनेनचकथंजयपराजयावधारणमित्यतआह॥ ॥यस्योचुः
साक्षिणःसत्यांप्रतिज्ञांसजयीभवेत्।अन्यथावादिनोयस्यध्रुवस्तस्यपराजयः॥७९॥ ॥यस्यार्थिनःप्रतिज्ञांदेश
कालद्रव्यसंख्यादिविशिष्टांसाक्षिणःसत्यांब्रूयुःसत्यमिदंजानीमोवयमितिसजयीभवति।यस्यपुनरन्यथावदं
तिमिथ्येतदाहनास्मत्समक्षमनेनकिमपिकृतमितितस्यपराजयोध्रुवोनिश्चितः।यथाहबृहस्पतिः।यस्यो
शेषःप्रतिज्ञार्थःसाक्षिभिःप्रतिवर्णितः।सजयीस्यादन्यथातुसाध्यार्थंनसमाप्नुयादिति।अन्यथाशब्दसामर्थ्यादे
कदेशस्याप्यन्यथात्वेपराजयएव।यथाहसएव।देशंकालंधनंसंख्यांरूपंजात्याकृतीवयः।विसंवदेद्यत्रसा
दीतदनुक्तंविदुर्बुधाः।इति।क्वचिदस्यापवादमाहसएव।साध्यैकांशेपिगदितेसाक्षिभिःसकलंभवेत्।स्त्रीसं
गेसाहसेचौर्येयत्साध्यंपरिकल्पितम्।इति।साक्षिविप्रतिपत्तौनिर्णयप्रकारमाह॥ ॥बहुत्वंप्रतिगृह्णीयात्सा
द्वैधेनराधिपः।समेषुचगुणोत्कृष्टान्गुणिद्वैधेद्विजोत्तमान्॥८०॥ ॥नराधिपोराजाप्राड्विवाकोवासाक्षिणांद्वै
धेविप्रतिपत्तौबहुत्वंप्रतिगृह्णीयाद्बहूनांवचनंप्रमाणीकुर्यात्।समेषुसमसंख्याकेषुपुनःसाक्षिषुगुणैरध्यय
नादिभिरुत्कृष्टान्प्रमाणीकुर्यात्।यदापुनर्गुणिनामेवद्वैधंतदाद्विजोत्तमान्ब्राह्मणानेवप्रमाणीकुर्या

न्नवद्गुणिनोपिच्छत्रियादीनांब्राह्मणानांसाम्येनविप्रतिपन्नोगुणवत्त्वमत्वेननिर्णयः।गुणिद्वैधेतुवचनंग्राह्यं
येगुणवत्तमाइतियोगिस्मरणात्।यत्तुभेदात्साक्षित्वंतज्जातिगुणसंख्यासाम्येनागृह्यमाणविशेषविषयं।कूटसाक्षि
लक्षणाभिधानस्यप्रयोजनमाह॥ ॥यस्मिन्यस्मिन्विवादेतुकूटसाक्ष्यंकृतंवदेत्।तत्तत्कार्यंनिवर्तेतकृतंवाप्यकृतं
भवेत्॥८४॥ यस्मिन्यस्मिन्नृणादानादौविवादेविप्रतिपन्नेर्थेकूटसाक्षीमिथ्यावदेत्तत्तत्कार्यंनिवर्तेतनसि
ध्येत्।कृतमप्यकृतमसिद्धंस्यात्।कूटसाक्षीचतावद्धारंदंडनीयः॥ ॥इतिश्रीधर्माधिकारिणामपंडितात्मजश्री
नंदपंडितकृतौविष्णुस्मृतिविवृत्तौश्रीमत्यांवैजयंत्यामष्टमोध्यायः॥८॥ ॥अष्टमेसाक्षिणोनिरूपितानव
मेसमयक्रियांनिरूपयितुंदिव्यमातृकांनिरूपयति॥ ॥अथसमयक्रिया॥१॥ ॥अथलौकिकत्रिविधप्रमा
णनिरूपणानंतरं।अनेनचानंतर्याभिधानेनलौकिकप्रमाणाभावएवसमयक्रियायाःप्रामाण्यंगम्यते।
तदाहयोगीश्वरः।प्रमाणंलिखितंभुक्तिःसाक्षिणश्चेतिकीर्तितं।एषामन्यतमाभावेदिव्यान्यतममुच्यतइति।
इदंचस्थावरविवादएव।तथाचबृहस्पतिः।स्थावरेष्वेतदाख्यातंलाभभोगंप्रसाधनं।प्रमाणहीनेप्रवादेतुनदो
षोदैविकीक्रियेति।अस्यार्थः।लाभोदानादिप्राप्तंभोगउक्तलक्षणः।असाधनंसाक्षिस्वरूपं।स्थावरेष्वेतदेवसाधकत्वे

वि॰टी॰ए
१२२

नाख्यातं न दिव्यं सर्वथैतदसंभवे तु दिव्यमपि न दोषाय यत्रान्यथा लौकिकप्रमाणाभावे दिव्यस्य च निषेधे ऽनिर्णयप्रसंगात्॥ एतेन स्थावरेषु विवादेषु दिव्यानि परिवर्जयेत्। साक्षिभिर्लिखितेनापि भुक्त्या चैतत्प्रसाधयेदिति पितामहवचनमपि व्याख्यातं। विवादांतरे त्वपरिहरणमात्रदोषेषु पुत्रकसाक्ष्ये साक्षिषु सत्स्वपन्नादोवायद्यंतरात्मसाक्षिकार्थविसं वादेन दोषं कल्पयंति तदा भवद्दिव्यं साक्ष्यादीनामाशयदोषसंभवाद्दिव्यस्य च निर्दोषत्वेन वस्तुतत्त्वावेदकतया धर्मतत्त्वविषयत्वात्। यथाह नारदः। तत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिणि। दैवसाध्ये पौरुषेयी न लेख्यं वा प्रयोजयेदिति। पौरुषेयी साक्ष्यादिः। अलौकिके प्रमाणं स्यात्समयः। तच्च द्विविधं। दिव्यं च। तत्र तात्कालिकनिर्णयहेतु दिव्यं तदाह बृहस्पतिः। घटोऽग्निरुदकं चैव विषं कोशश्च पंचमः। षष्ठं तु तंडुलाः प्रोक्ताः सप्तमं तप्तमाषकं। अष्टमं फालमित्युक्तं नवमं धर्मजं स्मृतं। दिव्यान्येतानि सर्वाणि निर्दिष्टानि स्वयंभुवेति। यद्यपि कोशस्य दिव्यलक्षणाभावान्नात्र परिगणनं युक्तं तथापि तुलादिवत्तुल्यवन्महाभिसावष्टंभाभियोगेषु च प्राप्त्यर्थं घृतकांचनमपि तप्तमाषावांतरभेद इति न पृथग्गणितं। शपथस्तु कालांतरनिर्णयहेतुरिष्टस्पर्शादिर्वक्ष्यमाणः तस्य क्रियानुष्ठानं॥ तत्र विषयविशेषे दिव्यानां वक्ष्यमाणद्रव्यसंख्यादिनियमानां पुरस्तादपवादमाह॥ ॥राजद्रोहसाहसेषु यथाकामं॥ २॥

राजाज्ञो होराज्ञा निष्टकराणां सहसमुक्तलक्षणं तच्छुद्ध्यर्थं दिव्यकरणे यथाकामं द्रव्यसंख्यादिनियमापेक्षा नास्ति। साहस
सामान्योपादाने प्युत्तमसाहसेष्वेव दिव्यानि। तथा च कात्यायनः। उत्तमेषु तु सर्वेषु साहसेषु विचारयेत्॥
सद्भावं दिव्यदृष्टेन सत्सु साक्षिषु वै भृगुरिति। प्रथमयोस्त्वल्पविषयत्वात् शपथैरेव निर्णयः। शपथानामपि समयशब्देनैवो
पादानात्। यथाह बृहस्पतिः। एते तु शपथाः प्रोक्ताः स्वल्पेऽर्थे सुकराः सदा। साहसेष्वभिशापे च दिव्यानि च विशोधनमि
ति। बहुवचनात् पानकाद्यभियोगग्रहणं। परदाराभिशापे च चौर्यागम्यागमेषु च। महापातकशस्त्रेषु स्याद्दिव्यं नृपसा
हसे इति कालिकापुराणात्। दिव्यव्यवस्थापकद्रव्यसंख्यासंख्यविषयमाह॥ ॥निक्षेपयेष्वर्थप्रमाणं॥३॥ ॥निक्षेपा
पह्नवे चौर्याभियोगबहुवचनात् साहसे च विप्रतिपन्नस्यार्थस्य प्रमाणं द्रव्यसंख्यां कल्पयित्वा दिव्यं व्यवस्थापयेत्। यथाह
कात्यायनः। दत्तस्यापह्नवो यत्र प्रमाणं तत्र कल्पयेत्। स्तेयसाहसयोर्दिव्यं सत्येऽप्यर्थे प्रदापयेत्। महापापाभिशा
पेषु निक्षेपहरणे तथा। दिव्यैः कार्यं परीक्षेत राजा सत्स्वपि साक्षिष्विति। कस्यार्थस्य प्रमाणं कल्पनीमित्यत्रा
ह॥ ॥सर्वेष्वेवार्थजातेषु मूल्यं कनकं कल्पयेत्॥८॥ ॥स्तेयापह्नवादिविषयेषु सर्वेष्वप्यर्थजातेषु परिमाणं कल्प
यित्वा तन्मूल्यत्वेन सुवर्णं कल्पयेत्तत्प्रमाणेन दिव्यव्यवस्थेति। यथाह कात्यायनः॥ सर्वद्रव्यप्रमाणं तु ज्ञात्वा हेम प्र

कल्पयेत्। हेमप्रमाणयुक्तं तु तदा दिव्यं नियोजयेत्॥ ज्ञात्वा संख्यां सुवर्णानां शतनाशे विषं स्मृतं। अशीतेस्तु विनाशे वै
दद्याच्चैव हुताशनं। षष्ट्या नाशे जलं देयं चत्वारिंशति वै घटं। विंशद्दशविनाशे तु कोशपानं विधीयते। पंचाधिकस्य वा
नाशे ततोऽर्द्धार्द्धस्य तंडुलाः। ततोऽर्द्धार्द्धविनाशे तु स्पृशेत्पुत्रादिमस्तकान्। ततोऽर्द्धार्द्धविनाशे तु लौकिक्यश्च क्रियाः
स्मृताः। एवं विचारयन् राजा धर्मार्थाभ्यां न हीयत इति। सुवर्णः षोडशमाषः। विंशन्नाशे दशनाशे चेत्यर्थः। न तु त्रिंशन्ना
शेऽर्द्धार्द्धेति पंचानां लिंगदर्शनात्। पंचाधिकस्य वा नाशे इत्यत्रापि कोशो विधीयत इत्येव शेषः। पंचवाधिकं चेति
पंचाधिकं। अन्यथा पंचनाशे दिव्याभावप्रसंगः। अत्रे। नाधिकपदेन दशाधिकविंशाद्यवधि। कानामसुवर्णरसे
व्यावधिकानां संख्यानां निर्णयः सिध्यति। तदन्यतरस्यार्द्धस्य पंचार्द्धं सार्द्धद्वयं तदर्द्धं सपादः। सुवर्णस्तदन्यत
रनाशे तंडुलाः। ततोऽर्द्धार्द्धे तु सपादसुवर्णार्द्धे दशमाषाः। तस्याप्यर्थे दशमाषाः। तस्याप्यर्थे चे माषाः। तदन्यतर
नाशे पुत्रादिमस्तकस्पर्शः। ततोऽर्द्धार्द्धेति पंचार्द्धं सार्द्धं माषद्वयं। तदर्थं सपादो माषः। सार्द्धषट्तंडुलाः। तत्रा
शैलौकिक्यः शास्त्रान्तरदृष्टाः क्रिया भवंति। तत्र बृहस्पतिः। सत्यवाहनशस्त्राणि गोबीजरजतानि च॥
देवब्राह्मणपादांश्च पुत्रदारशिरांसि च। एते तु शपथाः प्रोक्ता मनुना स्वल्पकारण इति। नाएवकि

यावर्णाद्यवस्थया दर्शयति॥ ॥तत्र कूसलोने शूद्रं दूर्वाकरं शापयेत्॥५॥ ॥त्रियवः कूसलस्तस्माद्दूनं कू
सलोनं ताह्रशे द्विविवादे शूद्रं दूर्वाकरे दत्वा न मेयमेपद्धनमिति शापयेदेवमग्रेपि ज्ञेयं॥ किंच॥ ॥द्विकूसलो
नेतिलकरं॥६॥ ॥कूसलाधिके द्वाभ्यां वानेहे द्विन्नितिलान्करेदत्वा शूद्रं॥ किंच॥ ॥त्रिकूसलोने रजतकरं॥७॥ ॥द्वा
भ्यामधिके त्रिभ्यः कूसलेभ्य ऊनेहे न्निरजतं करे दत्वा॥ किंच॥ ॥चतुःकूसलोने सुवर्णकरं॥८॥ ॥त्रि
भ्योधिके चतुर्भ्यः कूसलेभ्य ऊनेहेत्नि सुवर्णं करे दत्वा॥ किंच॥ ॥पंचकूसलने सीरोद्धृतमहीकरं॥९॥ ॥चतु
र्भ्योधिके पंचभ्यः कूसलेभ्यो माषाड्नेहे न्निसीरेण लांगलेनोद्धृतां महीमृत्खंडं करे दत्वा शूद्रं शापयेत्॥ एवं पंचेद्र
व्यसंख्यानिर्णीयदिव्यं तन्निर्णयमोहं॥ ॥सुवर्णाद्धोनिकोशो देयः शूद्रस्य॥१०॥ ॥सुवर्णार्द्धादष्टभ्यो माषेभ्यो
वांक् माषाद्र्धं च शूद्रस्य कोशपानं कारयेत्॥ पुनः शूद्रग्रहणमस्मिन्नेव विषये वैश्यादीनां शवोक्तपुत्रादिमस्तकस्प
र्शज्ञापनार्थं॥ मितथा च स्मृत्यंतरे॥ निष्कं तु सत्यवचने द्विनिष्के पादलंभने॥ त्रिकादर्वाक्तु यार्थं स्यात्कोशपानम
तःपरमिति॥ अत्र च निष्कशब्देन दीनारो भिधीयते॥ तस्यैव सुवर्णार्द्धेन न त्वात्॥ किंच॥ ॥ततश्चारं यथार्हं धटाग्नु
दकविषाणामन्यतमं॥११॥ ॥ततः सुवर्णार्द्धोनात्परं सुवर्णार्द्धपादोनसुवर्णादौ यथार्हं ततकोलोचितं तत्ते

कालोचितं तन्न तं च्छोचितं च घटादिज्ञेयं ग्रंथ कला। अग्निः फालस्तप्त माष आदिः विषे व दृश्यमाणो एतेषामन्यतमं दि
व्यं शूद्रस्य कारयेत् विशेषादीनां दिव्यं पञ्चयेऽर्द्धं व्यवस्थामाह॥ ॥द्विगुणोऽर्थं यथा लिखिता समयक्रिया वैश्य
स्य॥२२॥ ॥यव त्रैवी तिलरजतसुवर्णलोष्ठस्पर्शकरपान स्पृशः शपथाः शूद्रस्योशपथाः शूद्रस्योक्तास्त एव वा
तत्र स्परिमाणात् द्विगुणपरिमाणेयं द्विचतुःपदशक्त लब्धसुवर्णेन इन्द्रिक्रमाद्वैश्यस्य भवंति। वैश्य॥ ॥त्रिगुणो रा
जन्यस्य॥२३॥ ॥शूद्रोक्तपरिमाणात्त्रिगुणे हे त्रित्रिषणवणवद्वादश पंचदशका हलंला सर्वसुवर्णेन क्रमात्
दूर्वातिलरजतसुवर्णलोष्ठस्पर्शकोशपानानि क्षत्रियस्य भवंति। ब्राह्मणस्य विशेषमाह॥ ॥कोशवर्जं
चतुर्गुणो ब्राह्मणस्य विंश२४॥ ॥चतुरष्टद्वादशषोडशविंशतिहलैर्नैन इक्रमाद्ब्राह्मणस्य दूर्वातिलरजतसुवर्णलोष्ठ
स्पर्शा भवंति। यथाह बृहस्पतिः। एषा संख्या निकृष्टानां मध्यानां द्विगुणा स्मृता। चतुर्गुणोत्तमानां च कल्पनी
या परीक्षकैरिति। एषा कृष्णलादिः। निकृष्टाः शूद्राः मध्या वैश्याः। अनेन तु वन्द्यायेन क्षत्रियाणां त्रिगुणे
निर्णयं स्यान प्रमाणात्। कोशवर्जमित्यत्र हेतुमाह॥ ॥न ब्राह्मणस्य कोशं दद्यात्॥२॥ ॥ब्राह्मण
स्य विशेषमाह न कारयेत् राजन्य प्राड्विवाको वा। कोशो विषोपलक्षणं। ब्राह्मणस्य विषं च नेति

स्मरणात्। नब्राह्मणानां विषमिति वक्ष्यमाणाद्धानन्त्वयं कोशनिषेधो विप्रस्य प्रकृत एवाभियोगे॰ उताभियोगमात्रे। नाद्यः प्रकृत
मात्रविषयत्वे न्यत्र प्राप्त्यभावाद्वक्ष्यमाणपर्युदासानुपपत्तेः। नापरः। साधारणः समस्तानां कोशः प्रोक्तो मनीषिभिः। सर्वाण्ये
तानि सर्वेषां ब्राह्मणस्य विषं विना। आदित्यस्तु यन्तोयं ब्राह्मणं तन्न पाययेदित्यादिवचनैरभियोगसाधारण्येन विप्रस्य कोशप्रा
पणविरोधादिति वेन्नवाहं। उक्तवाक्यानां पर्युदस्तविषयमात्रे विप्रस्य कोशप्रापकत्वेनापि चारितार्थ्यान्नाभियोगमात्रविषयत्वं
ततश्च पर्युदासे विषयपरिहारेण सर्वत्र निषेधप्रवृत्तेः प्रकृतविषयेपि प्रवृत्तिरित्यविरोधः। अत्र पर्युदासमाह॥ ॥अन्यत्रागामिका
लसमयनिबंधनक्रियातः॥२६॥ ॥आगामिकालो भावी यः समयस्तत्र यः समयो विश्वासस्तन्निबंधनात्तद्धेतुः क्रियाप्रमाणे
तामन्यत्र विनेत्यर्थः। भाविविश्वासार्थं ब्राह्मणस्यापि कोशो भवतीति तात्पर्यं। यथाह पितामहः। शंकाविश्वाससंधाने विभागे रिक्थि
नां तथा। क्रियासमूहकर्तृत्वे कोशमेव प्रदापयेत्। समूहस्य क्रिया क्रियासमूहस्तस्मिन् कर्तृत्वं संवित्संभूयसमुत्थानं वा तथा।
तेषां विस्रंभे सर्वशंकासु संधिकार्ये तथैव च। एषु कोशः प्रदातव्यो नित्यं चित्तविशुद्धये इति। कथं तर्हि प्रकृतविषये ब्राह्मणस्य शुद्धिभा
वनेत्यत आह॥ ॥कोशस्थाने ब्राह्मणं सीतोद्धृतमहीकरमेव शापयेत्॥२७॥ ॥यत्रार्द्धसुवर्णान्न चतुर्गुणे सुवर्णद्वये नेकोशः प्रा
प्तो ब्राह्मणस्य तत्र सीतया लांगलपद्धत्या उद्धृता या मही लोष्टं तत्करमेव तं शापयेत्। अनेनोक्तविषयककोशस्थानापत्तिवचने

न विषयांतरे कोशस्यानापत्तिरपि न ब्राह्मणस्येति गम्यते। विश्वासादिव्यतिरेकेण विप्रस्य कोशस्यैवाप्राप्तेः। क्वचित्तु रूपे स्थाना
पत्तेरप्यपवादमाह॥ ॥प्राग्दृष्टदोषं स्वल्पेप्यर्थे सुवर्णसंख्यकादि दिव्यानामन्यतममेव कारयेत्॥१८॥ ॥यस्य ब्राह्मणस्य शर्वचौर्यादि
दोषो मिथ्याशपथकरणादिदोषो वा दृष्टो भवति तस्य स्वल्पेप्यर्थे सुवर्णद्वयादर्वाक् पुत्त्रानां दिव्यानां धटादीनां चतुर्णामन्यतममेव
कारयेन्न कोशं। अपि शब्दादन्येष्वपि। महापराधे निःशंकेन क्षात्रल्लीवकुत्सितो। नास्तिके दृष्टदोषे च कोशपानं विवर्जयेदिति नार
दस्मरणात्। कोशाप्राप्तेव च न स्थानास्थापत्तस्यापि प्राप्तिः। यद्यपि सन्निधिनात्र ब्राह्मणमात्रविषयमिदमिति ज्ञातीयते तथा
पि क्षत्रियादिष्वपि प्राग्दृष्टदोषत्वसंभवात्तद्विषयमपीदमित्यवगन्तव्यम्। तेन तेषामपि सार्द्धसुवर्णाद्वौ धटाद्यन्यतममेव भ
वति यद्यपि तादृशे विषये कोशः क्षत्रियादीनां प्राप्त एवास्ति तथापि तद्बाधेन धटादिविधा विधानाय वचनमर्थवद्देवा। तत्र सं
ख्याविशेषेण दिव्यविशेषमाह बृहस्पतिः। सेख्यार्श्मिरजो मूला मनुना समुदाहृता। कार्षापणान्ता सा दिव्ये नियोज्या विनि
येतथा। विषं सहस्रे पद्मन्ते पादोने च ऊनाशनः। त्रिपादोने च सलिलमर्द्धे देयो धटः सदा। चतुश्शताभियोगे च दातव्यस्तप्तमा
षकः। त्रिशते तंडुला देया कोशश्चैव तदर्द्धके। शते हृते पहृते च दातव्यं धर्मशोधनं। गोचोरस्य प्रदातव्यः सम्यक्फालस्तु तैः।
एषा संख्या निकृष्टानां मध्यानां द्विगुणा स्मृता। चतुर्गुणोत्तमानां च कल्पनीया परीक्षकैः। इति। द्वैगुण्यादिकल्पनमदृष्ट

दोषविषयं दृष्टदोषे तत्संख्यायामेव भवंति। अस्यास्ताम्रिकपणविषयत्वे नार्द्धसुवर्णादिसमाणत्वात्तायत्तु पितामहेनोक्तं सहस्रे
तु धरं दद्यात्सहस्रार्द्धे तथायसं। अर्धस्यार्द्धे तु सलिलं तस्यार्द्धे तु विषं स्मृतमिति तदप्यस्मिन्नेव विषये पातित्यावहद्रव्यस्तेयादिवि
षयविवादे। योऽत्यंद्रद्यांतरविवादेषु ना सहस्रार्द्धे रेत्फालेन विषं न तु लां तथेति यो गीश्वरीयेज्ञेयामिति प्रोचुः। वस्तुतस्तु दृष्टा
दृष्टदोषपुरुषविषयत्वेन वाक्यद्वयेपि अल्पाधिकसंख्याव्यवस्था साधीयसी स्थलवाक्यानुरोधादिति॥ पुरुषविशेषे दिव्यापवादमा
ह॥ ॥सत्तु विदितं सच्चरित्तं न महत्यर्थेपि॥९८॥ ॥सत्तु शिष्टेषु शिष्टः पुनरुकामात्मेत्यादिवसिष्ठाद्युक्तलक्षणेषु शिष्टत्वेन वि
दितं प्रसिद्धं सत्सु श्रुतिस्मृत्याद्युदितं चरितं माचरणं यस्येति सं तथा तादृशं वहुश्रुतमिति यावत्तं महत्यप्यर्थे महाभियोगेपि ध
टाद्यन्यतममपि दिव्यं न कारयेत्। वहुश्रुतमिति यावत्तं म महत्यर्थे महाभियोगेपि घटादिद्यन्यतमेपि दिव्यं न कारयेत्॥ वहुश्रु
तलक्षणमाह गौतमः स एष बहुश्रुतो भवति लोकवेदवेदांगविद्वाकोवाक्येतिहासकुशलस्तदपेक्षस्तद्वृत्तिरष्टाचत्वारिंशता
संस्कारैः संस्कृतस्त्रिषु कर्मस्वभिरतः षट्सु वा सामयाचारिकेष्वभिविनीत इति। तस्य दंडाद्यभावमप्याह स एव। षड्भिः प
रिहार्यो राज्ञावध्यश्चावध्यश्चादंड्यश्चाबहिष्कार्यश्चापरिहार्यश्चेति। न चैवं मणिर्णयप्रसंगः वहुश्रुतस्याभियोक्तृत्वेऽ
भियुक्तस्यैव दिव्यमस्याभियुक्तत्वेऽभियोक्तुर्दिव्यविधिविरोधस्तदपवादरूपत्वादस्यार्थस्यात तथापाविशेषेषपि

व्यं निषेधति कात्यायनः। मातापितृद्विजगुरुबालस्त्रीराजघातिनां महापातकयुक्तानां नास्तिकानां विशेषतः। लिंगिनां प्रसवानां च मंत्रयोगक्रियाविदां। वर्णसंकरजातानां पापाभ्यासप्रवर्त्तिनां। एतेष्वेवाभियोगेषु संदिग्धेष्वपि पूजितः। दिव्यं प्रकल्पयेन्नैव राजा धर्मपरायणः। एतैरेव नियुक्तानां साधूनां दिव्यमर्हति। नेच्छंति साधवो यत्र तत्र शोध्याः स्वकैर्नरैरिति। लिंगिनो वेदबाह्यलिंगधारिणः। प्रसवाः प्रतिलोमजाः। वर्णसंकरजाताः संकरसंकराः। पूर्वं कृतमहापातकादेः पुनर्महापातकाद्यभियोगेऽयं दिव्यनिषेध इति केचित्। महापातकाद्युक्तानामित्यपरे। येषु पापेषु दिव्यानि प्रति सिद्धानि यत्नतः। कारयेत्तत्र तेनैतानि नाभिशस्तं त्यजेन्मनुरिति भृगुस्मरणात्। जातिविशेषेपि दिव्यं निषेधति कात्यायनः। अस्पृश्याधमदासानां म्लेच्छानां पापकारिणां। प्रातिलोम्यप्रसूतानां निश्चयो न तु राजनि। तत्र सिद्धानि दिव्यानि संशये तेषु निर्दिशेदिति। यत्पुनः स्मृत्यंतरे सपणश्चेद्विवादः स्यादित्यनेन पणस्य पाक्षिकत्वमुक्तं तदपवादमाह॥ ॥अभियोक्ता वर्त्तयेच्छीर्षं॥९०॥ ॥अभियोक्ता मदीयं धारयसीत्यादिवादी सशीर्षं विवादपराजयनिमित्तं पणं वर्त्तयेद्दंडं कुर्यात्। तु यत्तु शीर्षं दंड इति प्राग्व्याख्यातं तदसुंदरं। शीर्षशब्दस्य दंडपरत्वे कोशएकोशिरः स्मृत इत्यनेन कोशे दंडाभावप्रसंगः। न चैतद्युक्तं कात्यायनेन कोशे दंडाभावप्रसंगः स्यादभिधानात् ब्राह्मेस्यष्टयिष्यांति। किंच। राजद्रोहसाहसेषु विनापि शीर्षकमित्यत्र

दंडस्यैवापवादप्रसंगात् तदुपनियुक्तं। स्वल्पेपराधे वाग्दंडो धिग्दंडः प्रथमसाहसे। मध्यमोत्तमयोर्थदंडो राजद्रोहे च बन्धनं। निर्वा
सनं वधो वापि कार्यो वात्महितैषिणेति बृहस्पतिना तत्रापि दंडविधानेन तत्र प्रथम एव प्रतिपदोक्तं दंडं यच्छाभियोक्तांगीकरोति तत्र दाभि
युयुक्तो दिव्यं कुर्वीत नान्यथेति तिवाच्यं तदपि न दंडेषु पराजयो निमित्तेन त्वंगीकारः। अंगीकारस्यैच्छिकत्वात् अनित्यत्वेन दंडस्य
नित्यवच्छ्रवणविरोधात्। अंगीकारे पराजितस्यापि दंडप्रसंगात्। अनंगीकारे च पराजितस्यापि दंडाभावप्रसंगाच्च। तथा वदंड्योत्त
मे राजैकरात्रमुपवसेदिति प्रायश्चित्तविरोधः। तस्माच्छीर्षशब्देन पणएवात्राभिधीयत इत्यवश्यंभन्तव्यं तत्र स्यैच्छिकत्वसंभवात्। तत
श्च यद्यहमत्र पराजीयेयं तदेदंडं दद्यामिति पणेदित्यर्थपर्यवसानात् सामान्यदंडात्प्रतिपदोक्तात्स्वेच्छांगीकृतं पणापरपर्याय
मिदंडांतरं दिव्येनियम्यते। तेन च सपणश्चेद्विवादः स्यात्तत्र हीनं तु दापयेत्। दंडं च स्वपणं चैव धनिने धनमेव चेति याज्ञवल्क्योयो
दंडपणसमुच्चयो दिव्येषु नित्यवद्भवतिष्ठते। अत एव नारदः। शिरोवर्तीयदा न स्यात्तदा दिव्यं न दीयत इति। अयं च नियमो घटादिषु
चतुर्ष्वेव कोशस्त्वशीर्षकोपि भवति। यथाह पितामहः। शिरःस्थायि विहीनानि दिव्यानि परिवर्जयेत्। धटादीनि विषान्तानि
कोशएकोगशिराः स्मृत इति। कोशस्यापि शिरस्त्वशंकाभियोगे। यथाह कात्यायनः। न शंकाशिशिरः कोशे कल्पयेत्तु कदाच
नेति। सावष्टंभाभियोगे तु शिरस्त्वमेव। यथाह योगीश्वरः। तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये। महाभियोगेष्वेतानि

शीर्षकस्थेऽभियोक्तरीति। भावः प्रतिज्ञावादिनः प्रमाणोपन्यास इति स्थितं तदपवादमाह॥ ॥अभियुक्तश्च दिव्यं कुर्यात्॥२१॥ ॥
अभियुक्तो नाहं धारयामीत्यादिवादी स दिव्यं कुर्यात्। तदाह पितामहः। अभियोक्ता शिरःस्थाने दिव्येषु परिकल्प्यते। अभियुक्ता
य दातव्यं दिव्यं दिव्यविशारदैरिति। अस्यापवादमाह योगीश्वरः। रुच्या वान्यतरः कुर्यादितरो वर्तयेच्छिरः इति। रुचिः परस्प
रसंप्रतिपत्तिः। सा च दिव्यानभिज्ञस्याप्युपलक्षणं। तेन नाभियुक्तस्य कथंचिदनधिकारेऽभियोक्तुरेव दिव्यमिति ज्ञेयं का
लदिव्यविरोधे तु यथायुक्तं विशेषयेत्। अन्ये न हारयेद्दिव्यं विधिरेषविवर्जने इति कात्यायनस्मरणात्। यथायुक्तं यस्मिन्का
ले यस्य कर्तुर्यद्दिव्यं विधिरेषविवर्जने प्राप्तं तदसंभवे न्येन कारयेदित्यर्थः। अभियोक्ता वर्तयेच्छीर्षमित्यस्यापवादमाह
॥ ॥राजद्रोहसाहसेषु विनापि शीर्षवर्तनात्॥२२॥ ॥राजद्रोहो राज्ञोनिष्टाचरणं साहसं यथोक्तं। बहुवचनाच्चौरनिर्देशा
त्स्तेयाद्यर्थे ग्रहणं। यथाह पितामहः। राजभिः शंकितानां च निर्दिष्टानां च दस्युभिः। आत्मशुद्धिपराणां च दिव्यं देयं शिरो वि
नेति। अधिकारिभेदेन दिव्यव्यवस्थामाह॥ ॥स्त्रीब्राह्मणविकलासमर्थरोगिणां तुला देया॥२३॥ ॥स्त्रीब्राह्मणो जाति
मात्रेण। विकलोन्धपंग्वादिः। असमर्थो तिवार्द्धकेन। रोगी व्याधितः। तत्र तत्र वक्ष्यमाणः कुष्ठ्यादिः। एतेषां शोधना
र्थं तुलैवेति नियम्यते। बहुवचनाद्बालादयोपि गृह्यंते। यथाह योगीश्वरः। तुला स्त्रीबालवृद्धांधपंगुब्राह्मणरोगिणां

मिति। नारदोपि। क्लीबातुरान्सत्वहीनान्नपतितान्न्योऽद्भितान्नरान्। बालं वृद्धं स्त्रियं चैव परीक्षेत घटे सदेति॥ सत्वहीनातिवाप
उः उज्झितान्तरानिति पाठे विकलान्तःकरणानित्यर्थो विधेयः। एतेषु न पतितानां दिव्यनिषेधस्तुलाव्यतिरिक्तदिव्यविषय इति ध्येयं। उ
क्तां व्यवस्थायां नैमित्तिकमपवादमाह॥ ॥सा च न वातिवाये॥२७॥ ॥सा च तुला वायौ अतिवाति सति दिव्यविषये प्रवाते न तुला
ते थेति नारदस्मरणात्। अनेन च नैमित्तिकनिषेधेन निमित्ताभावे सार्वकालिकत्वं तुलाया उक्तं भवति। यथाह पितामहः।
धटः सर्वर्तुकः प्रोक्तो वाते वाति विवर्जयेदिति। अग्निव्यवस्थामाह॥ ॥न कुष्ठ्यसमर्थलोहकाराणामग्निर्देयः॥२८॥ ॥कु
ष्ठी व्याधिवान्। असमर्थो दुर्बलः। लोहकारो लोहशिल्पी। एतेषामग्निरग्निदिव्यं न देयं। यथाह पितामहः। कुष्ठिनां वर्जये
दग्निमिति। कात्यायनोपि। न लोहशिल्पिनामग्निमिति पितामहः। तोयमग्निं विषं चैव दातव्यं बलिनां नृणामिति। वृद्धवच
नात् स्त्रीबालरोगिवृद्धानां ग्रहणं। यथाह नारदः। न मज्जनीयं स्त्रीबालं धर्मशास्त्रविचक्षणैः। रोगिणो ये च वृद्धाः स्युः पुमांसो
ये च दुर्बलाः। निरुत्साहा न च क्लिष्टा न्नात्रैस्तोये निमज्जयेत्। न चापि हारयेदग्निं न विषेण विशोधयेदिति। अत्र स्त्री अप्रगल्भा
बालादिसाहचर्यात्। प्रगल्भा बालादिसाहचर्यात्। प्रगल्भायास्त्वग्निरपि भवति। स्त्रीणां तु न विषं प्रोक्तं न चापि सलिलं भ
वेत्। धटकोशादिभिः स्तासां मंतस्तत्त्वं विशोधयेत्। इत्यत्रादिशब्देनाग्नेर्ग्रहणात्। यस्तु स्त्रीणां तु न भवेद्दिव्यं यदि धर्मस्त्व

वि॰टी॰ए

१२८

वेद्यात् इति दिव्यसामान्यनिषेधः सजलशैलविषयेत्यर्थः। तत्रैव कालव्यवस्थामाह॥ ॥शरद्ग्रीष्मयोरश्वा॥२८॥ ॥शरद्ग्रीष्मयोर्भिष्मनाङ्गिरः॥ अत्र च विशेषोऽश्ववर्णात्। नृशैरयो रुभयोरप्युपादाने द्वयोः पर्युदासादितरा भ्यनुज्ञा दर्शिता॥ यथाह पितापितामहः। अग्नेः शिशिरहेमन्तौ वर्षाश्चैव प्रकीर्तिता इति। तथा चैत्रो मार्गशिरश्च वैशाखश्च तथैव च। एते साधारणा मासा दिव्यानाम विरोधिन इति। यत्तु अनेन विधिना कार्यो हुताशसमयः सदा। ज्ञाते ग्रीष्मादसावुक्तः काले न्यस्मिन् सुशीतल इति नारदस्मरणं। तत्कालेन्यस्मरणं सुशीतल इति विशेषणसामर्थ्याद् हृष्यादिना शीतलां शरदमप्युपादत्ते। निषेधस्तु ला एव ग्रीष्मसाहचर्यात्तेनास्मिन् काले ग्निशोधनमिति स्मरणाच्च॥ ॥विषव्यवस्थामाह॥ ॥न कुष्ठिपैत्तिकब्राह्मणानां विषं देयं॥२७॥ ॥कुष्ठी त्वन्दोषी पैत्तिकः पित्तरोगवान्। ब्राह्मणो जातिमात्रं। एतेषां दिव्यं न देयं। यथाह पितामहः। पित्तश्लेष्मवतां नित्यं विषं तु परिवर्जयेदिति। कात्यायनः। ब्राह्मणस्य विषं विनेति। बहुवचनात् स्त्रीबालरोगिगृहवृद्धदुर्बलानां ग्रहणं। तत्रैव च कालव्यवस्थामाह॥ ॥प्राहृषि च॥२८॥ प्राहृषि वर्षासु विषं न देयं प्राहृट्पर्युदासादितराभ्यनुज्ञा दर्शिता। यथाह पितामहः। हेमन्ते शिशिरे विषमिति चैत्रवैशाखयोः सर्वदिव्यसाधारणाद्वसन्तोपभ्यनुज्ञातः। ग्रीष्मशरदोस्तु विषमात्रापरिमाणाल्पत्वलिङ्गादभ्यनुज्ञा गम्यते। यथाह नारदः। वर्षासु षड्यवा मात्रा ग्रीष्मे पञ्च यवाः स्मृताः। हेमन्ते तु य

१२९

वा:सत्तरध्यत्वात्ततोपिहीति।वर्षेचतुर्थवामात्रेत्यपिपाठः।हेमंतग्रहणंच्छिशिरस्यग्रहणं।हेमंतशिशिरयोःसमासेनेतिलिंगा
त्।नन्वेवंवर्षास्वपिमात्राविशेषाभिधानेनतदभ्यनुज्ञानम्प्राप्नोषीतिविरुद्धं।सत्यं।सप्रत्ययमात्राभिप्रायोयंप्राक्प्रतिषेधोनसर्वथे
तिध्येयं।अनेननारसिंहीमवसंतेषुवर्षासुचविवर्ज्जोदितिनारदवाक्यंव्याख्यातं।जलव्यवस्थामाह।। ।।नश्लेष्मवातपित्तभीरूणां
श्वासकासिनांमंबुत्यागविनांचोदकोद्धरणं।श्लेष्मनिमित्ताव्याधयःशिरोदिकर्णदंतरुजस्तैरहिताःपीडिताःसर्वतोतत्कालेवा
भीरवोयेजलंदृष्ट्वामूर्च्छंतितेषांनमज्जनाद्वा।श्वासःप्रतिलोमवायुवेगःकासस्तस्यैवकफेनघातस्तोविद्यतेयेषांमंबुनिर्जले
जीवनंयेषांकेवलत्वादीनांतेषांचोदकंदिद्यंनदेयंसलिलंश्वासकासिनामितिपितामहस्मरणात्।बहुवचनात्स्त्रीवालवृद्धदुर्बला
नांग्रहणं।यथाहनारदः।नमज्जनीयंस्त्रीवालधर्मशास्त्रविचक्षणैः।रोगिणोयेचवृद्धाःस्युःपुमांसोयेचदुर्बलाः।साहसे
प्यागतानेतान्नैवतोयेनिमज्जयेदिति।कथंतर्हितेषांनिर्णयइत्यतआहसएवात्क्लीबादीनसत्वहीनांश्चपरितश्चाहितान्नवृव
लाश्चवालवृद्धंस्त्रियंचैवपरीक्षेतघटेसदेति।सदेत्यनेनत्रयेःशिशिरहेमंतौवर्षाश्चैवप्रकीर्त्तिताः।।शरद्ग्रीष्मेतुसलिलंहेमंते
शिशिरेविषमित्यसाधारणोपिकालएतेषांतुलैवेति।साधारणेतुकालेचैत्रादावेषांतुलास्थितेवातुलेतिकोशस्यापि
ग्रहणं।कोशस्तुसर्वदादेयस्तुलायास्तुसार्वकालिकीतिस्मरणात्।तत्रैवकालव्यवस्थामाह।। ।।हेमंतशिशिरयो

वि॰टी॰ए
१२ए

स्या॥ इ॰॥ हेमंतशिशिरयोश्च जलदिव्यं न देयं। हयोः पर्युदासादितराभ्यनुज्ञा दर्शिता। यथाह पितामहः। शरद्ग्रीष्मे तु स
लिलमिति। चैत्रवैशाखयोः सर्वदिव्यसाधारणत्वाद्धेमंताभ्यनुज्ञा वर्षाणां तु नारदेन शरद्ग्रीष्मे तु सलिलमिति विधाय
पिनशीते तोयशुद्धिः स्यादुष्णकाले ग्निशोधनं। न प्रावृषि विषं दद्यात् प्रवाते न तुलां तथेति पुनर्निषेधाच्छीतनिमित्त एव
वर्षापरिहारो विहितो न तु तद्भावस्याभ्यनुज्ञा सिध्यति। एवं च नोष्णकाले ग्निशोधनं मिश्रादिष्वप्युष्णत्वनिमित्त एवा
निषेधो न कालविशेषेण भिन्नः। प्रवाते न तुलामित्यत्रानियतप्रवाते न तुलामित्यत्रानियतप्रवातवदनियतयोः शैत्यौष्ण्य
तिकयोः शीतोष्णयोरभिप्रेतत्वात्। तस्मात्तत्तद्दिव्योक्तकाल एव तत्तद्दिव्यनिषेधो न कालांतरस्य विधानादेवेतरानिषे
धोसिद्धेः पुनर्निषेधात्तूपपन्नः। एतेन शीतशरदे न हेमंतशिशिरवर्षाणां ग्रहणमिति निरस्तं। कोशस्य व्यवस्थामाह॥
न नास्तिकेभ्यः कोशो देयः॥ ३१॥ ॥ नास्तिका वेदशास्त्रविश्वासरहितास्तेभ्यः कोशपानं न देयं। बहुवचनान्मद्य
पादीनां ग्रहणं। यथाह पितामहः। मद्यपस्त्रीव्यसनिनां कितवानां तथैव च। कोशः प्राज्ञैर्न दातव्यो ये च नास्तिक
वृत्तयः। नारदोपि। महापराधे निर्धर्मे कृतघ्ने क्लीबकुत्सिते। नास्तिके हस्तदोषे च कोशपानं विवर्जयेदिति। महापराधो
महापातकी। निर्धर्मो वर्णाश्रमरहितः। पाखंडी निर्हीन इति पाठे क्षपणाकुत्सितः। प्रतिलोमजः। हस्तदोषः पूर्वोक्तः। व्रा

१२ए

त्यदाशेध्विति पाठे दासः कैवर्तः। अत्र च कर्तृकालविशेषविधिनिषेधाश्रवणात्सर्वकर्तृकत्वं सार्वकालिकत्वं च सिध्यति। यथाह पितामहः। साधारणः समस्तानां कोशः प्रोक्तो मनीषिभिरिति नारदः। कोशस्तु सर्वदा देयः तुला स्यात्सार्वकालिकीति। तथा निमित्तविशेषाश्रवणात्सर्वनिमित्तत्वं चास्य सिध्यति। यथाह योगीश्वरः। तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये। महाभियोगेष्वेतानि शीर्षकस्थेभियोक्तरीति। नारदः। कोशमल्पेपि दापयेदिति। पितामहः। कोशः शंकासु पंचमः इति। एते वाक्ये महाभियोगे अल्पाभियोगयोश्चाविशेषात् कोशो भवतीति सिद्धं। ब्राह्मणस्य तु कोशविषये विशेषोभिहित एव प्राक्। एषां तुलादीनां पंचानां मध्ये ब्राह्मणेषु तुलानिदीनां पंचानां मध्ये ब्राह्मणेषु तुला नियमात्कोशस्य च सर्वसाधारणत्वादग्न्यादीनि त्रीणि क्षत्रियादित्रयविषयाणीति मंतव्यं। यथाह नारदः। ब्राह्मणस्य घटो ज्ञेयः क्षत्रियस्य हुताशनः। वैश्यस्य सलिलं प्रोक्तं विषं शूद्रस्य दापयेदिति। अयं च नियमः साधारणे चैत्रादिकोलोतन्न कालेपि तुलतन्न देवदिव्यं सर्वेषां ब्राह्मणस्य विषं विनेति पितामहस्मरणात्। स्त्र्यादीनां तन्नकालेपि तुलाद्येवा यस्तु घटकोशादिभिस्तासां मंतव्यं त्वं विशोधयेदित्यनेन स्त्रीणां कोश विधिः। यश्च मद्यप स्त्रीव्यसनिनाभिद्युपकस्य कोशः प्राड्ग्नेर्दातव्य इति निषेधस्तु भयमपि आस्तिकनास्तिकभेदेन व्यवस्थापनीय

मित्यलं कोशस्य क्वचिदपवादमाह ॥ ॥ न देशे वाधिवरको मरको रुष्टेवा ॥ ३१ ॥ ॥ व्याधिर्ज्वरादिर्मरको जन
मरको मारीत्याभ्यामुपसृष्टे भिभूते देशे कोशो न देयः । चकारादग्निवायुमुकशलभादीनां ग्रहः । अलं कुल्पन्याय त्वा
त्तौ त्यात्यानिक कोशनिमित्तिकयोरनिष्टयोर्विवेकमशक्यत्वात् । निमित्त विशेषेण देशविशेषानाह कात्याय
नः ॥ इंद्रस्थाने मिश्रस्तानां महापातकिनां नृणां । नृपद्रोहे प्रवृत्तानां राजद्वारे प्रयोजयेत् ॥ प्रातिलोम्यप्रसूतानां दि
व्यं देयं चतुष्पथे । अतो न्येषु तु कार्येषु सभामध्ये विदुर्बुधाः इति । इंद्रस्थानं इंद्रध्वजस्थस्थानं । प्रसिद्धदेवायतनं वा
साधारणं दिव्यविधिमाह ॥ ॥ सचेलं स्नातमाहूय सूर्योदय उपोषितं । कारयेत्सर्वदिव्यानि देवब्राह्मणसन्निधौ
॥ ३३ ॥ ॥ सर्वेषु दिव्येषु कृतोपवासं परेद्युः कृतदिने सूर्योदये सचेलं स्नातं दिव्यकारिणमाहूय देवस्य विष्णुशिवसूर्यादेर्नृप
स्य ब्राह्मणानां सभ्यानामन्येषां च सन्निधौ प्राड्विवाकः सर्वाणि दिव्यानि कारयेत् । यद्यप्युपोषितमिति सा
मान्येनोक्तं तथापि कारात्रेत्रिरात्रं वा बलाभियोगतारतम्येण द्रष्टव्यं स्यादपि । यथाह पितामहः ॥ त्रिरात्रोपो
षिताय स्यादेकरात्रोषिताय वा । नित्यं नित्याति देयानि शुचये वाद्रवाससे इति । कारयेदिति कर्तरि सामा
न्ये पित्र पाप्तुज्ञातः सोपवासः प्राड्विवाक इति ज्ञेयं । यथाह सरवाद्दि दिव्येषु सर्वकार्याणि प्राड्विवा

कः समाचरेत्॥ अध्वरेषु यथाध्वर्युः सोपवासोऽष्टपात्रयये ति। सूर्योदय इति दिनसामान्येपादित्यवासर इति ज्ञेयं
शिष्टाचारात्। भौमवारेपीति केचित् तन्न। नपरीक्षा विवासु शनिभौमदिने भवेति निषेधात्। तत्रापि पूर्वाह्णे ग्निपरीक्षास्या
त्पूर्वाह्णे च घटो भवेत्। मध्याह्ने तु जलं देयं मध्याह्नात्परतो विषं। दिवसस्यैव पूर्वाह्णे कोशशुद्धिर्विधीयते। रात्रौ तु पश्चिमे या
मे विषं देयं सुशीतलं इति पितामहोक्तो विशेषो ज्ञेयः। हेमंतशिशिरयोर्मध्याह्नात्परतोन्यदा रात्रिपश्चिमयाम इति व्यवस्था।
अनुक्तकालविशेषाणां तु पूर्वाह्ण एव। पूर्वाह्णे सर्वदिव्यानां प्रदानमनुकीर्तितमिति नारदस्मरणात्। देवसन्निधिरभिशाप
विषयः। नृपसन्निधिस्तु सर्वविषयः। नृपसन्निधिस्तु सर्वविषयः। नृपब्राह्मणसन्निधावितियोगिस्मरणात्॥ ॥इति
श्रीधर्माधिकारिरामपंडितात्मजश्रीनंदपंडितकृतौ विष्णुस्मृतौ श्रीमत्यां वैजयंत्यां नवमोध्यायः॥ ९॥ ॥एवं नव
मे दिव्यमातृकामभिधाय दशमे घटप्रयोगमाह॥ ॥अथ घटः॥ १॥ ॥घटः पादस्तुलादीनां समुदायस्तद्विरभिधी
यत इति। घटनिर्माणप्रकारमाह॥ ॥चतुर्हस्तोच्छ्रितौ द्विहस्तौ॥ २॥ ॥स च चतुर्भिर्हस्तैर्यथोच्छ्रितो द्वाभ्यां च हस्ताभ्यामायतो
भवति तथा कार्यः। घटोच्छ्रायायामाभ्यां भवत इति तावनेनान्तौ। उच्छ्रायवचनान्निखननीयभागातिरिक्तमिदं परिमा
णमित्युक्तं। निखेयभागश्च हस्तद्वयमित्येवं षड्हस्तौ पादस्तंभौ। तौ चोपरिभ्रमेश्चतुरस्रौ अधस्तात्तु नियमः। तयोश्च द
क्षिणोत्तरभावेन पूर्वपश्चिमभावेन वा निखातयोरंतरालं हस्तद्वयं सार्द्धहस्तमात्रं वा स्यात्। तदुपर्युत्तरंगकाष्ठमपि

स्तंभांतरालपरिमाणाभिधाने नैवोक्तमिति स्तंभांतरालपरिमाणाभिधाने नैवोक्तमिति न पृथगुक्तं तेन पादस्तंभमस्तक
देशाद्बहिर्निःसृतो हस्तद्वयात्सार्द्धहस्ताद्वा किंचिदधिको विलंबयोपेतो दंडः कार्य इत्यवगंतव्यं हस्तस्तु चतुर्विंशांगुल एवे
ति तुलानिर्माणप्रकारमाह ॥ तत्र सारदृढो द्वावपि पंचहस्तायतो भयतः शिक्यानुला ॥ ३ ॥ तत्र घटे साराः दृढाः खदि
रतिंदुकशालशिंशपाद्या येऽद्रुमास्तदुद्भवा तत्क्वाख्वाजन्यापंचहस्तावायता चतुरस्रा मध्ये प्रांतयोश्च लोहवलयकर्करो
पेताउभयोर्वलविततशिक्यानुलाग्नमध्यावलंबिकिंकीटे बलुनीया । तदेतत्सर्वं सपरिकरं नारदपितामहाभ्यां स्पष्टीकृ
तं । छित्वा तु यज्ञियं वृक्षं यूपवन्मंत्रपूर्वकं । प्रणम्य लोकपालेभ्यस्तुला कार्या मनीषिभिः । मंत्रः सोम्यो वानस्पत्यः
छेदनेप्येष वा । अर्जुनस्तिंदुकः सारः स्तिनिशो रक्तचंदनः । एवंविधानि काष्ठानि घटार्थे परिकल्पयेत् । कर्त्ता घटेत्तु
लाकार्या खादिरी तैंदुकी तथा । शैंशपी तदलाभे तु शालाद्वा कोटरं विना । चतुरस्रास्त्रिभिः स्थानैर्घटकर्कटकादिभिः
। घटो मध्यांकुशः कर्कटकस्तुलांप्रांतद्वयलंबिलोहांकुशस्तेसुका कार्या । कटकानि च देया त्रिषु स्थानेषु चोर्ध्व
वत् । चतुर्हस्ता तुला कार्या पादौ चोपरि तत्समौ । हस्तद्वयं निवेश्य स्यात्तादृश्योरुभयोरपि । षड्हस्तं तु तयोः प्रोक्तं प्र
माणं परिमाणतः । अंतरं च तयोर्हस्तो भवेदर्द्धमेव वा । अर्द्धहस्तस्य परिमाणं स्यादंतरालाधिकं तथा । तोरणे च तथ

कार्येपार्श्वयोरुभयोरपिधराद्दुत्तरेस्यातांनित्यंदशभिरंगुलैः।अवलंबौचकर्त्तव्यौतोरणभ्रामकोमुखौ।स्तम्भयो
स्तत्रसंबद्धोधटमस्तकोद्रुविनो।प्राङ्मुखोनिश्चलःकार्यःशुचौदेशेधटस्तथा।।शिक्यद्वयंसमासज्यपार्श्वयोरुभयोरपि
प्राङ्मुखदुखान्कल्पयेद्दर्भानुशिक्ययोरुभयोरपि।ततःकिमित्यतआह।। ।।तांवसुवर्णकारकांस्यकाराणामन्यत
मोविभृयात्।।४।। ।।तांतुलांसुवर्णकारकांस्यकाराकाराणांवदुक्षवनाह्वणिजोवान्यतमोविभृयात्परीक्षावलंबस
मोकुर्यात्।अन्यतमग्रहणायास्तस्याःसाम्यपरीक्षार्थंसवतेराज्ञानियोक्तव्याः।यथाहतुनारदपितामहौ।परीक्षकानियो
क्तव्यास्तुलामानविशारदाः।वणिजोहेमकोराकांस्यकाराश्चयेवचा।कार्यःपरीक्षकैर्नित्यमवलंबसमोधटः।उद
कंचप्रदातव्यंधटस्योपरिपंडितैः।यस्मिन्नप्लवतेतोयंसविज्ञेयःसमोधटइति।ततःकिमित्यतआह।। ।।तत्रैकस्मिन्
शिक्येपुरुषमारोपयेद्द्वितीयेप्रतिमानंशिलादि।।५।। ।।तत्रतुलाप्रांतावलंबिन्येकस्मिन्शिक्येप्राङ्मुखत्वेधटस्यप
श्चिमेउदङ्मुखत्वेचोत्तरेपुरुषंदिव्यकारिणमारोपयेदपरेउपवेशयेत्।यथाहनारदः।पश्चिमेतोलयेत्कर्त्तॄनन्यस्मिन्प्रति
कांशुभां।इष्टकाभस्मपाषाणकपालास्थिविवर्जितां।मृत्पिंडमभिशस्तंचतुलयाधारयेत्समं।पितामहस्त्वन्यथाह।धा
रयेदुत्तरेपार्श्वेपुरुषंदक्षिणेशिलां।पिटकंपूरयेत्तस्मिन्निष्टकाग्रावपांसुभिरिति।शिक्यसन्निवेशयोर्विकल्पा

र्विकल्पाङ्गदस्पर्शाङ्गुष्ठयोरङ्गुष्ठयोरपि विकल्पः स्थितौ स वस्तंभनिवेशे र्वापरयोर्दक्षिणोत्तरयोर्वेति फलितौ दृष्टः
काग्रावपाश्र्वे नासंभवतो विकल्पो न तु सङ्गुष्ठयो निषेधश्रवणात् । मा पैर्वापिटकं श्रयेत् । माष राशिमथापि वेति स्मृत्यंत
रादितिवंडिकाचमत्कारः । यद्यपि धरपरीक्षा पूर्वमभिहिता तथाप्यर्थात्प्रतिमानपुरुषयोरारोपणानंतमपि सेति द्र
ष्टव्या ततः किमित्यत आह ॥ ॥ प्रतिमानपुरुषौ समौ स्तो सुचिह्नितौ कृत्वा पुरुषमवतारयेत् ॥ ६ ॥ प्रतिमानपुरु
षौ पूर्वोक्तौ समौ स्तो परीक्षकैः समानतया निर्णीतौ सुचिह्नितौ प्रतिमानेऽद्ययांतरागमापत्शंका निवृत्त्यै पुरुषेच
वस्त्रालंकारादिन्यूनाधिक्यशंका निवृत्त्यै राजमुद्रादिना सम्यक् चिह्नितौ कृत्वा पुरुषं तुलाफलकादवतारयेत् ॥
अन्ये तु तुलाप्रांतयोरवलंबनस्थभागे पंककरणं चावदन्ते । अवतारणानंतरकृत्यमाह पितामहः । तोलयित्वान
रं पूर्वं पश्चात्तमवतार्य तु । धटं तु कारयेन्नित्यं पताकाध्वजशोभितामितिततः किं कार्यमित्यत आह ॥ ॥ वंद्रेच समये
नरं गृह्णीयात् ॥ ७ ॥ ॥ दिव्यकर्तुरवतारणानंतरं चशरोपात्नं धर्मावाहनादि शिरः पत्रारोपणांतमनुष्ठानकांडं सर्वं दिव्य
साधारणं कृत्वा धटं तुलां समयेन शपथेन वक्ष्यमाणेन गृह्णीयात् नियमयेत् तं च विधिमाह पितामहः । ततश्चा
वाहयेद्देवान्विधानेन मंत्रवित् । वादित्रतूर्यघोषैश्च गंधमाल्यानुलेपनैः । प्राङ्मुखः प्रांजलिर्भूत्वा प्राड्विवाक

स्ततो वदेत्ततो एह्येहि भगवन्धर्म दिव्येस्मिं स्त्वं समाविशा सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः। आवाह्यतु धर्मदेवमीप
श्चादंगानि विन्यसेत्। इंद्रं पूर्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा। वरुणं पश्चिमे भागे कुबेरं चोत्तरे तथा। अग्न्यादिलोकपा
लांश्च कोणभागेषु विन्यसेत्। इंद्रः पीतो यमः श्यामो वरुणः स्फटिकप्रभः। कुबेरस्तु सुवर्णाभो अग्निश्चापि सुवर्णभः।
तथैव निर्ऋतिः श्यामो वायुर्धूम्रः प्रशस्यते। ईशानस्तु भवेद्रक्त एवं ध्यायेत्क्रमादिमान्। इंद्रस्य दक्षिणे भागे वसूनारा
धयेद्ध्रुवः। ध्रुवो धरस्तथा सोमश्चापश्चैवानिलोनलः। प्रत्यूषश्च प्रभासश्च वसवोष्टौ प्रकीर्तिताः। देवेशेशानयोर्म
ध्ये आदित्यानां तथार्चनं। धातार्यमा च मित्रश्च वरुणोंशो भगस्तथा। इंद्रो विवस्वान्पूषा च पर्जन्यो दशमस्तथा। त
तस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः। इत्येते द्वादशादित्या नामभिः परिकीर्तिताः। अग्नेः पश्चिमदिग्भागे रुद्रा
नामयः नंदिः। वीरभद्रश्च शंभुश्च गिरीशश्च महायशाः। अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः। भुवनाधी
श्वरश्चैव कपाली च विशांपतिः। स्थाणुर्भगश्च भगवान्रुद्रा एकादश स्मृताः। प्रेतेशरक्षोमध्ये तु मातृस्थानं प्रक
ल्पयेत्। ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही चैव माहेंद्री चामुंडा गणसंयुताः। नि
र्ऋतेरुत्तरे भागे गणेशायतनं विदुः। वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते। गगनः स्पर्शनो वायुरनिलो

मारुतस्तथा। प्राणः प्राणेशजीवौ च मरुतौ षट्प्रकीर्तिताः। घटस्योत्तरभागे तु दुर्गामावाहयेद्बुधः। एतासां देवतानां तु स्वना
म्ना पूजनं विदुः। रक्तैर्गंधैश्च माल्यैश्च दध्यपूपाक्षतादिभिः। अर्चयेत्तु ध्वजं पूर्वं ततः शिष्टांस्तु पूजयेत्। भूषावसानं धर्माय दत्वा वा
द्यादिकं क्रमात्। अर्घादि पश्चादंगानां भूषांतं तु प्रकल्पयेत्। गंधादिकानि वेद्यां तापरिचर्यां प्रकल्पयेत्। चतुर्दिक्षु तथा
होमः कार्यो वेदपारगैः। आज्येन हविषा चैव समिद्भिर्होमसाधनैः। सावित्र्या प्रणवेनाथ स्वाहांतेनैव होमयेत्। ऋ
त्विक्पुरोहिताचार्यान्दक्षिणाभिश्च तोषयेत्। यंत्रार्थमभियुक्तः स्याल्लिखित्वा तु पत्रके। मंत्रेणानेन सहितं तत्का
र्ये तु शिरोगतं। आदित्यचंद्रावनिलोनलश्च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति न
रस्य वृत्तं। इमं मंत्रविधिं कृत्स्नं सर्वदिव्येषु योजयेत्। आवाहनं च देवानां तथैव परिकल्पयेदिति। अनंतरकृत्यमाह
॥ ॥तुलाधारं॥ ९॥ ॥यः सुवर्णकाराद्यन्यतमस्तुलां धारयति तमपि शपथेन नियमयेत्। यथाह नारदः
समयैः परिगृह्णाथ पुनरारोपयेन्नरमिति। शपथप्रकारमाह॥ ॥ब्रह्मघ्नां ये स्मृता लोका ये लोकाः कूटसाक्षिणां। तु
लाधारस्य ते लोकास्तुलां धारयतो मृषा॥ १०॥ ॥ब्रह्मघ्नां ब्रह्महंतॄणां कूटसाक्षिणां च ये लोकास्ते तुलाधारस्या
पि भवंति यद्यसौ मृषा कपटेन तुलां धारयति। तुलाधारणस्य प्रहृत्तिनिमित्तस्य घटस्य स्वर्णकारयोस्तुल्य

स्रूपतयाऽन्यद्देनैव मंत्रप्रयोगोद्वयोरप्यभिमंत्रणे। तुलां विवदतो सृषेति पाठेन तुलापरीक्षार्थं ये नियुक्ताः स्वर्णका
रादयो येवस्तु द्रव्यशुद्धिपरीक्षार्थं नियुक्ता ब्राह्मणास्तेभ्यो पि यं शपथो देय इति धसिधति। अनंतरं प्राड्विवाको धट
मामंत्रयेत्। धटमामंत्रयेत्। धटमामंत्रयेच्चैव विधिनानेन शास्त्रवित्। इति पितामहस्मरणात्। धटाभिमंत्र
णमंत्रानाह॥ ॥धर्मपर्यायवचनैर्धट इत्यभिधीयसे। त्वमेव धट जानीषे न विदुर्यानि मानुषाः॥१॥ व्यवहाराभिशस्तोयं
मानुषस्तोल्यते त्वयि। तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि॥२॥ ॥धट इति शब्दो धर्मपर्यायस्तेनाभिधीयमानत्वाद्ध
र्मपर्यायस्तेनाभिधीयमानत्वाद्धर्मवृत्तितया मानुषेर्दुर्विज्ञेयान्यप्रत्यक्षतया धर्माधर्मादीनि प्रत्यक्षतया त्वं जा
नीषे त्वत्तो व्यवहारे लौकिके प्रवादे भिशस्तोयं संदिग्धोयं मानुषस्त्वयि तोल्यते तदेनं मानुषं त्वयि तोल्यं संशयाद्धर्म
तो धर्मपुरस्कारेण त्रातुं पालयितुमर्हसीति। पितामहस्तु मंत्रांतराण्यप्याह। त्वं धट ब्राह्मणा सृष्टः परीक्षार्थं दु
रात्मनां। धकाराद्धर्ममूर्तिस्त्वं टकारात्कुटिलं नरं। धृतो भावयसे यस्माद्धटस्तेनाभिधीयसे। नारदोपि। धर्मपर्या
यशब्देन धट इत्यभिधीयसे। त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च। त्वमेवेत्यादि मूलवत्सार्धश्लोकः। अ
नंतरं देवासुरमनुष्याणां सत्ये त्वमतिरिच्यसे। सत्यसंधोसि भगवन् शुभाशुभविभावने। आदित्यचंद्रेता

२१

वि॰ टी॰ २०
१३५

दिव्यर्थं वचनं। एषां च मंत्राणां विकल्प एव स्मृतीनां कल्पानां स्वायत्तत्वात्॥ अनंतरकर्तव्यमाह॥ ॥ततस्त्वारोपयेच्छिक्ये म
य एवाथ तं नरं॥ ॥ततः प्राड्विवाकः स्वकृतपत्रस्यार्थनानंतरं तु शब्दात्कर्तापि तुलाभिमंत्रणं कारयित्वाऽथानंत
रं तं नरं दिव्यकारिणं स्त्रिं च शिक्ये निवेशितं स्मिन्नेव शिक्ये पुनरप्यारोपयेत्। कर्तुः कलाभिमंत्रणमंत्रमाह
याज्ञवल्क्यः। त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता। तत्सत्यं वद कल्याणि संशयान्मां विमोचय। यद्यस्मि पापकृ
न्मातस्ततो मां त्वमधो नय। शुद्धश्चेद्गमयोर्ध्वं मां तुलामित्यभिमंत्रयेदिति। नमिति पुनः कर्तृपरामर्शस्तेनैव सं
निवेसेन तदारोपणमाप्यर्थः। तेनैव सन्निवेशेन पुनरारोपयेन्नतमिति स्मरणात्। तेनैव पूर्वस्थैव। आरोपितस्य
च स्थानकालपरिमाणं निर्णेतारं चाह पितामहः। ज्योतिर्विद्ब्राह्मणः कश्चित्कुर्यात्कालपरीक्षणं। विनाड्यः पं
च विज्ञेयाः परीक्षाकालकोविदैरिति। विनाड्यः पलानि यथोक्तो दशगुरुवर्णः प्राणः षट् प्राणाः स्याद्विना
डिकेति। तस्मिन्काले राजनियुक्तैर्ब्राह्मणैस्तस्य शुद्ध्यशुद्धी निर्णीय राज्ञे कथनीये। यथाह पितामहः। साक्षि
णो ब्राह्मणाः श्रेष्ठा यथादृष्टार्थवादिनः। ज्ञानिनः शुचयोऽलुब्धा नियोक्तव्या नृपेण तु। तेषां वचनतो गम्यः
शुद्ध्यशुद्धिविनिर्णयः। समंततः साक्षिणः सर्वे शुद्ध्यशुद्धी नृपे तदेति। शुद्ध्यशुद्धिनिर्णयकारणमाह॥ ॥तुलि

तोयदि दिव्ये दैन्ततः स धर्मतः शुचिः ॥१४॥ ॥सदिव्यकर्त्ता पुनरुक्तलितो यदि धर्मतो धर्मेण न कुहकविद्यादिना वर्द्धितो धंग
छेन्नतः शुचिः शुद्धो भवेत् अनेन समहीयमानयोरर्थादशुद्धिरुक्ता । यथाह नारदः । तुलितो यदि वर्द्धेत विशुद्धः स्यान्न
संशयः । समो वा हीयमानो वा न विशुद्धो नर इति । यत्तु पितामहेन • हीयमानो न शुद्धः स्यादेकेषां तु समोऽशुचिरित्ये
कीयमतेन समस्याशुचित्वमुपन्यस्तं तद्व्यवहारदोषमहत्त्वाल्पनिर्णयानुपयोगात् पुनरारोपणाभिप्रायेण ।
यथाह वृहस्पतिः । धटेभियुक्तस्तुलितो हीनश्चेद्धानिमाप्नुयात् तोलितः समस्तः पुनस्तोल्यो वर्द्धितो विजयी भवेदिति । पापाभि
योगे तु समस्याल्पदोषत्वमाह पितामहः । अल्पपापः समो ज्ञेयो बहुपापस्तु हीयत इति । कामाकामकृतत्वादिना
साक्षात्प्रयोजकत्वादिना वा महत्त्वाल्पत्वे ज्ञेये । तत्वदंडप्रायश्चित्तयोस्तारतम्यमुपयुज्येत । क्वचिच्छुद्धिनिर्णयायोपायां
तरमाह ॥ ॥शिक्यच्छेदाक्षभंगेषु भूयस्त्वारोपयेन्नरं ॥१५॥ शिक्यं तुलाप्रांतद्वयावलंबी फलकसंलग्नो रज्जुसमूहस्तस्य
च्छेदेऽक्षः तुलारंगकाष्ठं तस्य वा भंगे वक्ष्यमाणतुलाकर्कटादिभंगेषु च नरं दिव्यकर्त्तारं पुनरारोपयेत् । तुशब्दात्क्रमो वा
हनाद्यानंतर्यं बोधितं । यथाह कात्यायनः । शिक्यच्छेदे तुलाभंगे तथा चापि गुणस्य वा । शुद्धेस्तु संशये चैव परीक्षेत पुन
नरमिति । दंतु हष्टकारणके भंगादौ ज्ञेयम् हष्टकारणके तु पराजय एव । कदयच्छेदे तुलाभंगे धरककर्कटयोस्त

वि॰टी॰ १३५

थारज्जुच्छेदेद्वाभंगेन्नतथैवाशुद्धिमादिशेदितिनारदस्मरणात्॥ अपरार्कस्तु शुद्धितःशुद्धिमाप्नुयादितिपाठमवलंब्यतत्रापिजयमेवाह॥ चंद्रिकारोपसुमेवपाठमनुमेनेव्याचख्योच॥ अपरिदृश्यमानकारणकशिक्यच्छेदादिविषयमेतत्तदेविकल्पेवशिक्य॥ छेदादेःनिर्णयकारणत्वादिति॥ कद्यंशिक्यतले॥ घटस्तुलादिसमुदायःकर्कटेवकौलोहकीलौतुलाप्रांतावलंबिनौ॥ पितामहस्तु॥ यथोक्तघटस्थापनेच्छायांराज्ञाशालाकार्येत्याह॥ विशालांसुच्छ्रितांशुभ्रांघटशालांतुकारयेत्॥ यत्रस्थोनोपहन्येतश्वभिश्चांडालवायसैः॥ तत्रैवलोकपालादीन्सर्वेदिक्षुनिवेशयेत्॥ त्रिसंध्यंपूजयेच्चैतांगंधमाल्यानुलेपनैः॥ कपाटवीजसंयुक्तांपरिचारकरक्षितां॥ स्मृत्यानीयाग्निसंयुक्तामग्न्यांकारयेन्नृपइति॥ उक्तेर्थेहेतुवचनेनोपसंहरति॥ ॥ एवंनिःसंशयंज्ञानंयतोभवतिनिर्णयः॥ २६॥ ॥ एवंशिक्यच्छेदादौपुनरारोपणेकृतेनिर्हरणांशुद्ध्यशुद्धिविषयंज्ञानंनिःसंशयंनिश्चयरूपंभवतियेनराज्ञादंडादिविषयोनिर्णयोभवति॥ तेनचैहिकामुष्मिकफलसिद्धिरिति॥ यथाहपितामहः॥ एवंकारयिताराजाभुक्त्वाभोगान्मनोरमान्॥ महतींकीर्तिमाप्नोतिब्रह्मभूयायकल्पतइति॥ ॥इतिश्री

विज्ञानेश्वरीयमिताक्षरायां

इतोऽश्रीमत्यांवैजयंत्यांदशमोध्यायः॥१०॥ ॥अथैकादशेध्यायेग्निविधिमाह॥ ॥अथाग्निः॥१॥ ॥अथस्थंडिल्यानंत
रमग्निविध्यंनिरूप्यतइत्यर्थः।तत्रवक्ष्यमाणगेतव्यंमंडलपरिमाणमाह॥ ॥षोडशांगुलंतावदंतरंमंडलमप्रकं
कुर्यात्॥२॥ ॥तिर्यगपवोदराण्यष्टौवर्धीवावीह्ययस्त्रयः।प्रमाणमंगुलस्योक्तमित्युक्तप्रमाणाष्टांगुलस्त
नप्रमाणेनषोडशांगुलमेकैकंमंडलं।तावदंतरंषोडशांगुलांतरालमेवंसप्तमंडलानिसांतरालानिआद्यं
तयोरवस्थाननिर्लेपमंडलाभ्यांसहितानिप्रागग्रपूर्वगाणिगोमयेनकुर्यात्।यथाहपितामहः।अग्नेर्विधि
प्रवक्ष्यामियथावच्छास्त्रचोदितं।कारयेन्मंडलान्यष्टौपुरस्तान्नवमंतथा।आग्नेयंमंडलंत्वाद्यंद्वितीयंवा
रुणंतथा।तृतीयंवायुदैवत्यंचतुर्थंयमदैवतं।पंचमंत्विंद्रदैवत्यंषष्ठंकौबेरमुच्यते।सप्तसोमदैवत्यंमष्टमं
सर्वदैवतं।पुरस्तान्नवमंयत्तुतन्महत्पार्थिवंविदुः।यद्वा।सप्तमंसोमदैवत्यंसावित्रंत्वष्टमंतथा।नवमंसर्वदैव
त्यमितिदिव्यविदोविदुः।गोमयेनकृतानिस्फुरद्भिःपर्युक्षितानिद्वात्रिंशदंगुलान्याद्यमंडलान्मंडलांतरं।अष्टाभि
र्मंडलैरेवमंगुलानांशतद्वयं।षट्पंचाशत्समधिकंभूमेस्तुपरिकल्पना।कर्तुःपदसमेकार्यंमंडलंतुप्रमाणतः।पू
र्वंषोडशांगुलत्वंमंडलस्योक्तंकायस्तुनःकर्तृपदसमत्वमुच्यतेतत्पदस्यन्यूनाधिभावेषोडशांगुलत्वोसंभवा

पद्मांतरमभिप्रेत्येत्यवधेयं।यथाह नारदः।मंडलस्य प्रमाणं तु कुर्यात्तत्पदसम्मितमिति।मंडले मंडले दे
याः कुशाः शास्त्रप्रचोदिताइति।यथाप्रेतुहोतुश्च मसइत्यादिहोतव्यमसादिसमारभ्य याम्यादीनां तत्र तत्र
मंडले पूजासिद्धिरिति।तथा।मंडलेभ्यो दक्षिणतः कृत्वाग्निस्थापने द्विजः।शांत्यर्थं जुहुयादग्नौ हुतमष्टोत्तरं शतं।अ
ग्नयेपावकायेतिस्वाहांतं प्रणवादिकं।अश्विहीनं समं तस्मिन्नष्टांगुलमयोमयं।पिंडं तु तापयेदग्नौ पंचाशत्पलिकं समं
द्विजः प्राड्विवाकः।समंडलद्वयं।समं समंततया तापयेत्।जातवेदलोहकारो यः कुशलश्चाग्निकर्मणि।दृष्टप्रयो
गश्चान्यत्र तेनायोऽग्नौ तु तापयेत्।तापिते तु ततः पश्चादग्निमावाहयेत्सुधीः।तत्र पूजां कृतां स्य कारयेन्मनुजाधि
पः।रक्तचंदनधूपाद्यै रक्तपुष्पैस्तथैव च।आवाहनं तु देवानां कृत्वा पूर्वविधानवत्।पूर्वविधानवदिति तुलादि
वोक्तविधिना वाहनादिशिरष्पत्रारोपणांतं कृत्वेत्यर्थः।एतदनंतरं व्रीहिमर्दनं करतलाकरणं च कर्तव्यं
तच्चवक्ष्यति करावित्यादिना।तदनंतरं कृत्यमाह॥ ॥ततः प्राङ्मुखस्य प्रसारितभुजद्वयस्य सप्ताश्वत्थपत्राणि कर
योर्दद्यात्।ततः किमित्यत आह॥ ॥तानि च करद्वयसहितानि सूत्रेण वेष्टयेत्॥७॥ ॥तान्यश्वत्थपत्राण्यर्कप
त्राणि वाद्याभ्यां कराभ्यामंजलीकृताभ्यां सह श्वेतेन सूत्रेण सप्त वारं वेष्टयेत्।वराह उपरि सप्तशमीपत्राणि

सप्ताश्वत्थानि सप्त दूर्वापत्राणि दध्यक्तानक्षतान् पुष्पाणि च दद्यात्। यथाह तु नारदपितामहौ। पश्चिमे मंडले तिष्ठेत् प्राङ्मु
खः प्राञ्जलिः शुचिः। लक्षयेत्तस्य चिह्नानि हस्तयोरुभयोरपि। प्राक्कृतानि च गूढानि सव्रणान्यव्रणानि च। तिलव्रणाङ्कि
णस्यानेकालकेलक्ष्मकोदिना। कृत्वैवमभियुक्तस्य प्रथमं हस्तलक्षणं। पत्रैरंजलिमापूर्य अश्वत्थैः सप्तभिः समैः
तदभावेऽर्कपत्रैर्वा समैः सूक्ष्मैः प्रपूरयेत्। वेष्टयीत सितैः सूत्रैः सप्तभिः समैः। तदभावेऽर्कपात्रेषु पिप्पलपत्रेषु शमीप
त्राणपथाक्षतान् दूर्वायाः सप्तपत्राणि दध्यक्तान्याक्षतांस्तथा। हस्तयोर्निक्षिपेत्तस्य कुसुमानि च सप्त चेति। तदनंत
रकृत्यमाह।। ।।ततस्तत्राग्निवर्णं लोहपिंडं पंचाशत्पलिकं समं न्यसेत्।।५।। ।।ततः प्राड्विवाकीयाज्यहोमाग्नौ तृतीयता
पेन तप्यमानस्यायःपिंडस्य त्वमग्ने इत्यादिवक्ष्यमाणमंत्रेण प्राड्विवाकीयाभिमंत्रणानंतरं संदेशेन पुरत आनीतस्या
यःपिंडस्य सुरंजितस्य सस्फुलिंगस्य त्वमग्ने सर्वभूतानामिति मंत्रेण कर्त्राप्यभिमंत्रणे कृते पत्रांतर्हितायामंजलावग्नि
वर्णं रूपस्पर्शाभ्यामग्निसमं लोहपिंडमष्टांगुलायामं पंचाशत्पलपरिमितं समममग्निरहितं न्यसेत्। यथाह तु नार
दपितामहौ। अग्निवर्णमयःपिंडं सस्फुलिंगं सुरंजितं। तापेत्ततीसंतप्तं ब्रूयात्सत्यपुरस्कृतं। वारद्वयमग्नौ संतापितस्य जले
निर्वापितस्य च पुनः संतापस्तृतीयस्तापः। त्वमग्ने वेदाश्चत्वारस्त्वं च यज्ञेषु हूयसे। त्वं मुखं सर्वदेवानां त्वं मुखं वादि

नां।जठरस्थो हि तत्तो वेत्ति शुभाशुभं पापं पुनासि वै यस्मात्तस्मात्पावक उच्यसे पापेषु दर्शयात्मानमर्चिष्मान्भव पावक
कात्र्यथवा शुद्धभावेषु शीतो भव हुताशन।ततस्तस्मै सुपादायता ज्ञा धर्मपरायणः।स देशेन निष्ठुक्तो वा कर्त्ता सम
भिमंत्रयेत्।त्वमग्ने सर्वदेवानामंतश्चरसि पावक।हव्यं वहसि देवानां ऋतशो तिप्रयच्छसि।प्रच्छन्नानि मनुष्य
णां पापानि सुकृतानि च।त्वं देवतानि ज्ञामीषेन चिहुयोनि मानवाः।व्यवहाराराभिशस्तो हं वन्हे तिष्ठामि मंश
यात्तस्मान्मां संशयारूढं धर्मतस्त्रातुमर्हसि यस्ना।त्वमग्ने सर्वभूतानामंतश्चरसि पावक।साक्षिवत्पुण्यपापेभ्यो
ब्रूहि सत्यं कवे मम।तस्येत्युक्तवतो लोहं पंचाशत्पलिकं समं।अग्निवर्णं न्यसेत्पिंडं हस्तयोरुभयोरपीति।
ततः किमित्यत आह॥ ॥तमादाय नाङ्गुतं नातिविलंबितं मंडलेषु पादन्यासं कुर्वन्व्रजेत्॥६॥ ॥
तमयष्पिंडमंजलिनादाय नातिद्रुतविलंबितं मध्यमया गत्या मंडलेष्वेव पादन्यासं कुर्वन् गच्छेत्।त
तः किमित्यत आह॥ ॥ततः सप्तमं मंडलमतीत्य भूमौ लोहपिंडं जह्यात्॥७॥ ॥तत्र स्थानमंडलाद्यत्स
प्तमं मंडलं तदतीत्याष्टमं मंडलं प्राप्येति यावत्।भूमाव परिमितांगुले नवमे मंडले शुष्कतृणशर्गेत
लोहपिंडं जह्यात्।यथाह तु योगीपितामहः।सप्तमादाय सप्तैव मंडलानि शनैर्व्रजेत्।न मंडलमतिक्रा

मेव्रांतरास्थापयेत्पदं।अष्टमंमंडलंगत्वानवमेनिक्षिपेद्बुधः।तद्गैःस्रुकैर्स्तसंशर्गेमहत्यग्निपरीक्षणइति
शुद्ध्यशुद्धिनिर्णपायमाह॥ ॥योहस्तयोःक्वचिद्दग्धस्तमशुद्धंविनिर्दिशेत्।नदग्धःसर्वथायस्तुसविशुद्धोभवे
न्नरः॥८॥ ॥योदिव्यकर्त्ताहस्तयोःक्वचित्पर्वह्रत्तेषुविष्ठुततोन्यत्रवादग्धोविस्फोटरक्तमंडलादिमान्भव
तितमशुद्धंविनिर्दिशेत्।यःपुनःसर्वथानदग्धोविस्फोटादिमान्नभवतिसनरोविशुद्धोभवेत्।यथाहना
रदः।तस्यैवंमुक्तपिंडस्यकुर्यात्करपरीक्षणं।पूर्वंहृष्टेषुचिह्नेषुततोन्यत्रापिलक्षयेत्।मंडलेरक्तसंकाशं
यच्चान्यद्वाभिसंभवं।सोविशुद्धस्तुविज्ञेयोसत्यधर्मोव्यवस्थितः।यदातुनविभाव्येतेदग्धाविति कारोतथा
मोच्यःशुद्धस्तसत्कृत्यदग्धोदंड्योयथाक्रमइति।शुद्धिकालमाहपितामहः।निर्विशंकेनव्रीहीणांहस्ताभ्यां
मर्दनेकृते।निर्विकारोदिनस्यांतेशुद्धिंतस्यविनिर्दिशेदिति।यत्तु।मुक्ताग्निम्र्दितव्रीहिरदग्धःशुद्धिंतस्य
विनिर्दिशेत्।शुद्धिमाप्नुयादितितत्परिहृत्यपरिधीन्वहारियोजनंतुहोतीवृदनातयोभावेपित्वानिर्देशा
दुपपन्नोदग्धादग्धसंदेहादौकथमित्यतआह॥ ॥भयोद्वापातयेद्यस्तुदग्धोवानविभाव्यते।पुनस्तहा
रयेल्लोहंसमयस्यापिविशोधनात्॥९॥ ॥यःपुनस्तन्नायःपिंडदर्शमजाड्यादयप्पिंडमष्टमम

वि०दी२१
१३८

डलाभ्यंतरेपातयेद्यश्च व्रीहिमर्द्दनेकृतेपिदग्धादग्धसंदेहाद्दोकथमित्यत्रअनिश्चीयते किंतु संदिह्यते तं लोहमयपिंडसु
त्तरीत्या पुनरपिहारयेत्। कृतः समयस्य कृतस्यादिव्यस्य वक्तुलानुशासनात्कृते न दिव्ये न त्र विशोधनात् विशुद्ध्य
निश्चयादित्यर्थः। यथाह नारदः। यस्त्वंतरापातयति दग्धश्च न विभाव्यते। पुनस्तं हारयेद्दिव्यं स्थितिरेषा हरीकृते
ति। दाहसंदेहापि करयोरेव अन्यत्र तु न निश्चये विनाशुद्धिः किंतु संदेह एव पुनर्हरणमेव। यथाह कात्यायनः॥
प्रस्खलन्नभियुक्तश्चेत्स्थानादन्यत्र दह्यते। अदग्धं तं विदुर्देवास्तत्र भूयोपि दापयेदिति। ततः प्राड्रवस्थेत्यत्र ततः प्राशब्दाक्रा
नंतर्यं प्रश्नोवधिमाह॥ ॥करौ विमृदितव्रीहेस्तस्य करावादावेव पिप्पलपत्रन्यासात्प्रागेव व्रणकिणतिलकाल
कादिति व्रीहेस्तस्यादावेव लक्षयेत्॥१०॥ ॥विमृदिताव्रीहयो येन सो विमृदितव्रीहिस्तस्य करावादावेव पिप्प
लपत्रन्यासात्प्रागेव व्रणकिणतिलकालकादिस्थाने षु लक्तरसादिना लक्षयेदंकयेत्। अग्निधारणात्प्राक्त
नान्येतानीति ज्ञापयितुमादावेवेत्युक्तं। विमृदितव्रीहीः इति पाठे तु स्पष्टमेव। यथाह योगीश्वरः। करौ विमृदितव्री
हेर्लक्षयित्वा ततो न्यसेत्। सप्ताश्वत्थस्य पत्राणि तावत्सूत्रेण वेष्टयेदिति। स्वस्थानप्रच्यावनेनाज्ञाभिधानमेक
योरप्यांतयोर्व्रीहिमर्द्दनस्य प्राप्त्यर्थं। उक्तानि मृदितव्रीहिरदग्धः शुद्धिमाप्नुयादिति स्मरणात्। मृदितव्री

हि रितिसामान्याभिधानेपिसप्तवारमितिविज्ञेयं।व्रीहीनतिप्रयत्नेनसप्तवारमितिविज्ञेयं।नारदस्मरणात्।व्रीह
भावेयवान्वान्वामर्द्दयेत्।हतेगोमर्द्दयेत्पश्चाद्व्रीहीन्वायदिवायवानितिपितामहस्मरणात्।तत्तत्रशिवर्णाभि
त्पत्रतत:शब्दोक्तानंतर्यपूर्वाविधिमाह॥ ।।अभिमंत्र्यास्यकरेलोहपिंडंन्यसेत्॥१॥ ।।तत:शिरोरोपितपत्रस्यहस्त
वेष्टनाद्यनंतरंतृतीयेतापेनपमानमय:पिंडंवद्यमाणेमंत्रै:प्राड्विवाकै:स्वयमभिमंत्र्यावमा।ग्रइत्यादिमंत्रै:कर्त्री
वाभिमंत्र्यास्वकरयोलोहपिंडंन्यसेत्।पुनर्निष्परिमाणलोहपिंडपरामर्श:परिमाणांतरप्राप्त्यर्थ:।यथाहतु:शंखलि
खितौ।अथसप्ताश्वत्थपर्णांतरितंषोडशपलमग्निवर्णंलोहपिंडमंजलिनादायसप्तपदंगच्छेदितिपरिमाणयोश्चैव
स्याचकार्येवलत्तारतम्येनकार्यौ।पुनर्न्यासोपन्यास:पूर्वोक्तराजप्राड्विवाककर्तृकविकल्पप्राप्त्यर्थ:।स्वत्या
नप्रच्यावनेनचाभिमंत्रनाभिधानंस्मृत्यंतरोक्तहोमचतुष्टयस्यानित्यताज्ञापनाय।तेनचाय:पिंडसंतापकाग्नि
संस्कारकत्वेनसन्निपत्योपकारकस्यप्राड्विवाकीयहोममात्रस्यैवानुष्ठानंनारादुपकारकस्यहोमकर्मचतुष्ट
यस्य।अतएववाक्यद्वयेपिक्रमबोधकात्तत:शब्दोपादानमत्यान्यवधानबोधनायेतिचंद्रिकास्वरस:।प्राड्वि
वाकीयाभिमंत्रणमंत्रानाह॥ ।।त्वमग्नेसर्वभूतानोमंतश्चरसिसाक्षिवत्।त्वमेग्नेविजानीषेनविदुर्याभि

वि॰टी॰ ११

२३९

मानवा॥ ११॥ व्यवहारतनियमस्तोयं मानुषः शुद्धिमिच्छति तेन देनं संशयादस्माद्धर्मतस्त्रातुमर्हसि॥ १२॥ हे त्रम
त्वं सर्वेषां जरायुजांडजस्वेदजोद्भिज्जानां भूतानां प्राणिनां सुपभुक्तान्नपानादिपावकत्वेनांतर्मध्ये जठरं चरसि तेन
यान्यतीन्द्रियत्वेन धर्माधर्मादीनि मानवा न विदुस्तान्यपि साक्षिवत्सा दात्तेद्रष्टत्वेन त्वमेव भोत्त्रम विजानीषि पु
नः संबोधनं ऋदितिसामुख्याय देवजानीषे पुनः संबोधनं ऋदितिसामुख्याय देवजानीषे इति पाठे देवद्युतिमन्निमर्थः। व्य
वहारे ऋणादिप्रयोगे पातकाद्यभियोगे वा। अभिशस्तो विथ्यावादित्वेन प्रतीतोयं मानुषः शुद्धिमात्मनः सत्यवादित्वमिच्छ
ति तस्मात्कारणादेनमस्मात्कारणात्संशयाद्धर्मतोनतुकूटकादिविद्यावलात्त्रातुं योग्योसि। कर्त्रभिमंत्रणमंत्रस्तु ना
रदयोगीश्वरोक्तयोरन्यतरो वेदितव्यः॥ ॥इति श्री धर्माधिकारि
विज्ञुस्मृतिविवृतौ वैजयंत्यामेकादशोध्यायः॥ ॥अथ द्वादशाध्याये जलदिव्यप्रयोगमाह॥ ॥अथोदकं॥ १॥ ॥
अथाग्निदिव्यानंतरमुदकदिव्यमुच्यते इत्यर्थः। तत्रोदकस्वरूपमाह॥ ॥पंकशैवालदुष्टग्राहमत्स्यजलौकादि
वर्जितेंभसि॥ २॥ ॥पंकः कर्दमः। शैवालं ललनाविताने दुष्टाः कंकादयः। ग्राहाः शिशुमारादयः। मत्स्याः पाठी
नाद्याः। जलौकारक्तपाः। आदिशब्दात्तृणोर्म्यादीनां ग्रहणं। तद्वर्जितेंभसि प्रविशेदित्यग्रेतनेन संबंधः। यथाह

२३

पितामहः। स्थिरतोये निमज्जेत्तु न ग्राहिणि न चाल्पके। अट्टेण शैवालरहिते जलौकामत्स्यवर्ज्जिते। देवखातेषु यत्तोयं तत्स्थि-
तं कुर्याद्विशोधनं। आहार्य्यं वर्ज्जयेन्नित्यं शीघ्रगासु नदीषु च। आविशेत्सलिले नित्यमूर्मिपंकविवर्ज्जित इति। आहार्यं
तडागादिभ्य आनीयतात्रकराहादिस्थं। शीघ्रगास्विति विशेषणात्तु वेगासु नदीष्वपि भवति। यथाह नारदः। नदी-
षु तत्तु वेगासु सागरेषु वहेषु च। ह्रदेषु देवखातेषु तडागेषु सरस्सु चेति। तत्रात्यक्त्यमाह स एव। गत्वा तु तज्जलस्थानं त-
टे तोरणमुच्छ्रितं। कुर्वीत कर्णमात्रं तु भूमिभागे समे शुचौ। पितामहः। शरान्संपूजयेत्तत्र चैवं च धनुस्तथा। मंगधूप-
पुष्पैश्च ततः कर्म समाचरेत्। कर्मस्वरूपं प्रज्ञादि वक्ष्यमाणं। ततः किमित्यत आह॥ ॥तत्रानाभिमग्नस्य रागद्वेषिणः
पुरुषस्यान्यस्य जानुनी गृहीत्वाभिमंत्रितमंभः प्रविशेत्॥३॥ ॥तत्र नद्यादिजलाशये नाभिप्रमाणोदकस्थस्य रा-
गद्वेषरहितस्यान्यस्य कस्यचित्पुरुषस्य त्रैवर्णिकस्य यज्ञदुद्दोद्ध्वर्वां धर्मस्थूणामवलंब्य प्राङ्मुखस्य तथावस्थितस्य
जानुनी शोध्यो हस्तद्वयेन धृत्वा वक्ष्यमाणमंत्राभ्यां प्राङ्मुखेन स्वयं च स्मृत्यंतरोक्तमंत्रेणाभिमंत्रितमंभः प्रविशेदं-
भसि निमज्जेदित्यर्थः। यथाह तु नारदपितामहौ। नाभिमात्रे जले स्थाप्य स्तंभवत्पुरुषं दृढं। शुचिभ्यां प्राङ्मुखः

तिष्ठेद्धर्मस्थूणां प्रगृह्य सः। यज्ञभूद्रोद्भवा शुद्धा कीटकोटरवर्जिता। ब्राह्मणः क्षत्रियो वैश्यो रागद्वेषविवर्जितः। त
स्योरू प्रतिसंगृह्य निमज्जेदग्निशापवानिति। एतच्च वरुणपूजानंतरं। यथाह नारदः। गंधमाल्यैः सुरभिभिर्मधुक्षीर
घृतादिभिः। वरुणाय प्रकुर्वीत पूजामादौ समाहितः। ततस्तोयमाहृत्य देवानु सलिलं चानुमंत्रयेदिति। आदिशब्दाद
ग्निशर्करयोर्ग्रहणं। आदौ धर्मावाहनादि। देवान्धर्मादीन्। शिरष्पत्रारोपणांतकर्मकांडोपलक्षणमेतत्। तत
दनंतरं जलाभिमंत्रणं प्राड्विवाकस्यानंतरं कर्तुः। ततः किमित्यत आह। ॥ तत्समकालं च नातिक्रूरमृदुना ध
नुषा पुरुषोपरः। शरक्षेपं कुर्वीत ॥६॥ ॥ तस्य मज्जनस्य समकालं च नातिक्रूरेण नातिमृदुना च धनुषा वेगेनाप
रः स्थूणाग्राहादन्यः पुरुषः क्षत्रियस्तद्वृत्तिर्ब्राह्मणो वा तोरणमूले स्थितः शराणां त्रयाणां वैणवानामनायसाग्रा
णां प्रतिकूले वायौ समे भूभागे सार्द्धशतहस्तोपरिस्थापितलक्ष्यमुद्दिश्य प्रक्षेपमसनं कुर्यात्। ततः किमित्यत
आह। ॥ तं चापरः पुरुषो जवेन शरमानयेत् ॥७॥ ॥ त्रयाणां मध्यमं शरं शरपातस्थानादेव न तु सर्पणस्थानादप
रः द्रष्टुरन्यः पुरुषो जवेन पंचाशद्धावकपुरुषातिशायिना वेगेन तोरणस्थाने स्थितपुरुषांतरागमनसमकाल

मिवानयेतोयथाहधनुर्नारदपितामहैरुक्तरंतुः सप्तशतं मध्यमं षट्शतं स्मृतं। मंदं पंचशतं ज्ञेयमेषज्ञेयो धनुर्विधिः। मध्यमे
नचचापेन प्रक्षिपेच्च शरस्त्रयो। हस्तानां चशते सार्द्धे लक्ष्यं कृत्वा विचक्षणः। न्यूनाधिके तु दोषः स्यात् क्षिपतः सायकास्त
था। शरास्थानायसायो स्तु प्रकुर्वीत विशुद्धये। वेणुकांडमया श्चैव क्षेप्तातु सुदृढं क्षिपेत्। द्रोणश्च वद्धे त्रियः प्रोक्तस्त हंति
ब्राह्मणोपिवा। अक्रूरहृदयः शांतः सोपवासो नृपाज्ञया। तेषां चश्रेष्ठितानां चशराणां शास्त्रचोदनात्। मध्यमस्तु
शरो ग्राह्यः पुरुषेण वलीयसा। शरस्य पतनं ग्राह्यं सर्पणं तु विवर्जयेत्। सर्पात्र सर्पन् शरो यायाद्दूराद्दूरतरं यतः। इषुं न प्र
क्षिपेद्विद्वान्मारुते वातिवायति। विषमे भूप्रदेशे च वृक्षाणु समाकुले। तृणगुल्मलता वल्ली वृक्षपाषाणसंयुते। गंतुं स्याद्विच
कर्तुश्च सम्यग्गमनमज्जने। करतालं नयेदत्र प्राड्विमेकेनचांतिमो। गच्छेत्तोरणमूलात्तु यतः स पुरुषो गतः। पंचाशता
धावकानां यो स्यात्तामधिकोजवे। तो च तत्र नियोक्तव्यो शरापिवगादादाय सायकान्। यत्र कारणमिति। ततः किमित्य
तत्राह।। ।। तन्मध्ये योन दृश्येत सशुद्धः स्यात्परिकीर्तितः। अन्यथा त्वविशुद्धः स्यादेकांगस्योपदर्शने।। ।।
तन्मध्ये तोरणमूललक्ष्यस्थानस्थितयोः पुरुषयोर्गमनागमनकालमध्ये यो जलान्निर्गतो न दृश्येत किंतु

वि०दी०१२
१४१

निमग्न एवास्ते स शुद्धः परिकीर्त्तितो धर्मज्ञैः। अन्यथा तावत्कालमध्ये यो जलादुत्थितो दृश्येत सोऽशुद्ध इत्यर्थसिद्धमेवोत्तर
विवक्षयाभिहितं। तामेवाह। नोत्थित एवाशुद्धः किं त्वेकांगस्य कर्णनासादेरपि दर्शने स्थानांतरगमने वात्राशुद्ध एवाय यथा
हतुर्नारदपितामहौ। आगतस्तु शरग्राही न पश्यति यदा जले। अंतर्जलगतं सम्यक् तदा शुद्धं विनिर्दिशेत्। अन्यथा न वि
शुद्धः स्यादेकांगस्यापि दर्शने। स्थानाद्वान्यत्र गमनाद्यस्मिन्पूर्वं निवेशितः। शिरोमात्रं तु संदृश्येत न कर्णौ नापि नासि
का। अप्सु प्रवेशने यस्य शुद्धं तमपि निर्दिशेत्। निमज्ज्योत्प्लवते यस्तु दृष्टश्चेत्प्राणिभिर्नरः। पुनस्तत्र निमज्जेत्स शरैरवि
ज्ञ विभाविभावित इति पाद्मे। चास्य जलानुमंत्रणमंत्रमाह॥ ॥त्वमंभः सर्वभूतानामंतश्चरसि साक्षिवत्। त्वमेवांभो
विजानीषे न विदुर्यानि मानुषाः॥७॥ व्यवहाराभिशस्तोऽयं मानुषस्त्वयि मज्जति। तदेनं संशयादस्माद्धर्मतस्त्रातुमर्
हसि॥८॥ ॥अत्रांभः संबोध्यं। श्लोकार्थस्तु व्याख्यात एव। पितामहस्तु मंत्रांतरमाह। तोय त्वं प्राणिनां प्राणः सृष्टेराद्यं
तु निर्मितं। शुद्धेश्च कारणं प्रोक्तं द्रव्याणां देहिनां तथा। अतस्त्वं दर्शयात्मानं शुभाशुभम् इति। शोध्यस्य जलानुमंत्रण
माह योगीश्वरः। सत्येन माभिरक्ष त्वं वरुणेत्यभिशाप्य कं। नाभिदघ्नोदकस्थस्य गृहीत्वोरू जलं विशेदिति॥ ॥इति

१५

श्रीधर्माधिकारि — विष्णुस्मृतिविवृत्तौ श्रीमत्यां वैजयंत्यां द्वादशोऽध्यायः॥ ॥अथत्र
योविधिमाह॥ ॥अथ विषं॥१॥ ॥विषं विषविधिरित्यर्थः। तत्र वर्ज्यानि विषाण्याह॥ ॥विषाणि देयानि सर्वाणि॥२॥ ॥सर्वाणि
वारिजादीनि विषाण्यदेयानि। यथाह पितामहः। वारिजानि वर्जीणि निकृत्रिमाणि तथैव च। भूमिजानि च सर्वाणि विषाणि
परिवर्जयेत्। नारदोऽपि। भृष्टं च वारितं चैव धूपितं मिश्रितं तथा। कालकूटमलाबुं च विषं यत्नेन वर्जयेदिति। तर्हि किं विषं देय
मित्यत आह॥ ॥ऋते हिमाचलोद्भवात् शार्ङ्गात्॥३॥ ॥हिमगिराववियत्तश्रृंगोद्भवं तद्विना। एवमुक्तो विषं शार्ङ्गं भक्षयेद्धि
मशैलजमिति योगिस्मरणात्। तच्च कियत्कथं देयमित्यत आह॥ ॥तस्य च यवसप्तकं घृतप्लुतमभिशस्ताय दद्यात्॥४॥
॥तस्य विषस्य यवपरिमितं भागं। चकारात् वोक्तचतुर्यवादिपरिमितं वा पिष्टीकृतं तत त्रिंशद्गुणेन घृतेन प्लुतं योजितं दद्या
नाभिमुखाय सोपवासायाभिशस्ताय वक्ष्यमाणमंत्राभ्यां प्राड्विवाकेन कर्त्रा च स्मृत्यंतरोक्तमंत्रेणाभिमंत्रिताभ्यां देवब्राह्म
णसंनिधौ महेश्वरं सोपवासः प्राड्विवाको दद्यात्। यथाह नारदः। अतः परं प्रवक्ष्यामि विषस्य विधिमुत्तमं। यवाः सप्त प्र
दातव्याः शुद्धिहेतोरसंशयं। शृंगिणो वत्सनाभस्य हिमजस्य विषस्य च। पूर्वाह्णे शीतले देशे विषं दद्यात्तु देहिनां। घृतेन योजितं
श्लक्ष्णं पिष्टं त्रिंशद्गुणेन तु। दद्याद्धि सोपवासाय देवब्राह्मणसन्निधौ। धूपोपहारमंत्रैश्च पूजयित्वा महेश्वरं। ततस्त्वावाहयेद्दे

वि०टी०१३
१४२

वा सर्पदंष्टो दीक्षितश्च यो मृतः हवनादिशिरस्यारोपणान्तं विधाय च। द्विजानां सन्निधाने च दक्षिणाभिमुखे स्थिते उदङ्मुखः प्राङ्मुखो
वा दद्याद्विप्रः सुसमाहितः। विप्रः प्राड्विवाकः समाहितः सोपवासः। शुद्धिनिर्णयमाह॥ ॥विषवेगात्क्रमापेतं सुखेन यदि जीर्यते
विशुद्धं तमिति ज्ञात्वा दिवसान्ते विवर्जयेत्॥५॥ ॥तज्जग्धितं विषं विषवेगानां सप्तानां धातोर्धात्वन्तरप्राप्तिरूपाणां येन क्रमारो
मांचादयस्तैरपेतं रहितं यदि जीर्यते तदा तं विशुद्ध इति ज्ञात्वा दिवसान्ते संध्यायां विसर्जयेत्। यथाह पितामहः॥ त्वग्
रक्तमांसमेदोस्थिमज्जाशुक्राणि धातवः। धातोर्धात्वन्तरप्राप्तिर्विषवेग इति स्मृत इति। तल्लक्षणानि विषतंत्रे। वेगो रोमा
ञ्चमाद्यो जनयति विषजः स्वेदवक्त्रोपशोषौ तस्योर्ध्वं तत्परौ द्वौ वपुषि जनयतो वर्णभेदप्रवेपौ। यो वेगः पंचमोसौ नयनवि
वशतां कंठभंगं च हिक्कां षष्ठो निःश्वाससंमोहौ वितरति च मृतिं सप्तमो भक्षकस्येति। दिवान्तावधिः स्वल्पमात्राविषयः॥
सप्तयवमात्रायां तु पंचतालशतपरिमित एव कालः। यथाह नारदः। पंचतालशतं कालं निर्विकारो यदा भवेत्। तदा भ
वति संशुद्धस्ततः कुर्याच्चिकित्सितमिति। अथ विषकुट्टकादिभयाद्राजा धारयेद्धितकारिणं। औषधीमंत्रयोगा
श्च मणीन् यथा विषापहान्। कर्तुः शरीरतं त्यांश्च गृह्णीयात्मन्त्रान्परीक्षयेत्। भर्जनात्पाचनान्मन्त्राद्वपनान्मिश्रणात्तथा
राजायते न संदेह्यो हि विषं शोधाय कल्पितमिति। प्राड्विवाकस्यानुमंत्रणमंत्रावाह॥ ॥विषत्वाद्विषमत्वाच्च क्रूरं त्वं सर्वदे

१

हिनां त्वमेव विषज्ञानीषे न विद्यो नि मानुषाः ॥६॥ ॥व्यवहाराभिशस्तोयं मानुषः शुद्धिमिच्छति। तदेनं संशयाद्धर्मतस्त्रा
तुमर्हसि ॥७॥ ॥भो विष त्वं विषत्वात् विशेषेण बलितोतिमारयतीति विषं तत्त्वात् स्वभावेनान्यनैरपेक्ष्येण वहिमगिरिशृंगा
दिप्ररोहितेनातिविषमत्वाच्च सर्वेषां चतुर्विधानामपि देहिनां भूकंकालखंडादिकर्त्तनशीलं। शेषं व्याख्यातं। पितामहस्तं
मंत्रांतराण्याह। त्वं विष ब्राह्मणा सृष्टं परीक्षार्थं दुरात्मनां। पापानां दर्शनात्मानं शुद्धानाममृतं भव। मृत्युमर्त्ते विषे त्वं
हि ब्रह्मणा परिनिर्मितं। त्रायस्वैनं नरं पापात्सत्येनास्यामृतं भवेति। शोध्यस्यानुमंत्रणमंत्रमाह योगीश्वरः। त्वं विष ब्र
ह्मणः पुत्रः सत्यधर्मे व्यवस्थितः। त्रायस्वास्मादभीशापात्सत्येन भाववामृतमिति॥ ॥इति श्रीधर्माधिकारिराम
विष्णुस्मृतिविवृत्तौ श्रीमत्यां वैजयंत्यां त्रयोदशोध्यायः॥ ॥अथ चतुर्दशोध्याये कोष
विधिमाह॥ ॥अथ कोशः॥१॥ ॥कोषः कोषविधिरित्यर्थः। कोषोत्पत्तिप्रकारमाह॥ ॥उग्रान्नु समभ्यर्च्य तत्स्नानो
दकात्प्रसृतित्रयं पिबेत्॥२॥ ॥उग्रानादित्यादीन् समभ्यर्च्य शोपचारपूर्वकमभ्यर्च्य तेषां स्नानोदकात्प्रसृति
त्रयं ~~[illegible]~~मेकत्रपात्रांतरे निधायानंतरं धर्मावाहनादिशिरस्यारोपणांतविधिमनुष्ठाय तत्त्वमंभः सर्वेरुताना

वि॰टी॰१४
१४३

मितिजलदिव्योक्तमित्रेण प्राड्विवाकाभिमंत्रितं सत्येन माभिरक्षत्वं वरुणेति मंत्रेण स्वयमभिमंत्र्य गोमयमं
डले स्थितः सोपवासश्चार्द्रवासाः सूर्याभिमुखीभूय तज्जलं पिबेत्॥ यथाह पितामहः॥ अतः परं प्रवक्ष्यामि को
शस्य विधिमुत्तमं। शास्त्रविद्भिर्यथाप्रोक्तं सर्वकालाविरोधिनं। पूर्वाह्णे सोपवासस्य स्नातस्यार्द्रपटस्य वा सशूक
स्याव्यसनिनः कोशकार्यं विधीयते। इत्युक्तः। अहमानस्य देवब्राह्मणसंनिधौ। भक्तो यो यस्य देवस्य पाययेत्तस्य तं
जलं। समभावे तु देवानामादित्यस्य तु पाययेत्। दुर्गायाः पाययेच्चौरान् ये च शस्त्रोपजीविनः। भास्करस्य तु यत्नो
यं ब्राह्मणं तत्र पाययेत्। दुर्गायाः स्नापयेच्छूलमादित्यस्य तु मंडलं। इतरेषां तु देवानां स्नापयेदायुधानि तु। यथा
विधि समभ्यर्च्य तज्जलं प्रसृतित्रयं। पाययेत्तेभ्य आदाय धर्मादीन्समर्जयेत्ततः। सोपवासः प्राड्विवाको यथोक्तेनाभि
मंत्र्य तत्। तमाहूयाभिशस्तं तु मंडलाभ्यंतरे स्थितं। आदित्याभिमुखं कृत्वा पाययेत्प्रसृतित्रयं। आदित्याभिमुखं पू
र्वाभिमुखं वा प्राङ्मुखं कारिणं कृत्वेति पितामहस्मरणात्। यद्यप्यादित्याभिमुखीकरणानंतरमेव पानं प्रती
यते तथापि निर्दिष्टात्। तथापि पानात्प्रागेनः श्रावणं इष्टव्यं। एनः संश्रावयित्वा तु पाययेत्प्रसृतित्रयमिति नार

दस्मरणात्॥ तत्प्रकारमप्याह स एव। स्वेच्छया यः पिबेत्कोशं कश्चिद्दूषितो नरः॥ विसंवादे नरो लोभाच्छिन्नो भवति
दुर्मतिः॥ आत्मनः कामकारेण कोशं पीत्वा विसंवदेत्। दरिद्रो व्याधितो मूर्खः सप्तजन्मनि जायते इत्यभियुक्तं प्रति।
अभियोक्तारं प्रत्यप्याह। बलात्कोशं हि यो दत्त्वा हितमिच्छेत वात्मनः स विनाशी भवेन्नस्य तच्च कार्यं न सिद्ध्यतीति॥ इ
दं च पराजयलिंगाद्वारादेरधिकं मिथ्याकोपानफले दृष्टव्यं। कर्तुरेनः श्रवणानंतरवक्तव्यमाह॥ ॥इदं मया न कृतमि
ति वदन्देवताभिमुखः॥३॥ ॥इदमिति विवादास्पदीभूतं ब्रणग्रहणादिकर्म पातकं वा मया न कृतमिति वदन्
स्नापितदेवताभिमुखः पिबेत्। न कृतमिति वचन व्यक्तिरभाव साधने तु कृतमित्येवाशुद्धाशुद्धिविभानोपायमा
ह॥ ॥यस्य पश्येद्द्विसप्ताहात्त्रिसप्ताहाद्द्यापि वा॥४॥ तमशुद्धं विजानीयात्तथा शुद्धं विपर्यये॥ ॥यस्य कर्तुः कोश
पानदिनादारभ्य द्विसप्ताहाच्चतुर्दशाहं यावत्त्रिसप्ताहादेकविंशतिदिनं यावत्तथा पिबेत्यनुस्यया त्रिरात्रसप्तरात्र
सप्तरात्रयोरपि ग्रहणं। रोगः क्षयातिसारादिः। अग्निर्गृहस्तेनवलादिदाहः। वज्रुलानुशाशना द्वितीयार्थे प्रथमा
ज्ञातीनां पुत्रदारादीनां मरणं राजातंकं राजभयं वा पश्येत्तमशुद्धं विजानीयात्तथा विपर्यये पूर्वोक्तनिमित्ताभा
वे शुद्धं च विजानीयात्। यथाह पितामहः। त्रिरात्रात्सप्तरात्राद्वा द्विसप्ताहाद्द्यापि वा। वैकृतं यस्य दृश्येत पापकृत्स तु मान

षः। कात्यायनोपि। अर्थे दैवविसंवादस्त्रिपक्षाद्दापयेत्तु। अभियुक्तं तु यत्नेन तमर्थं दंडमेव च। दैवविसंवादो रोग
ज्ञातिमरणादिः। अत्रेयं चतुर्णामपवादविपक्षाणां व्यवस्था। यदुक्तं त्रिंशते तंडुला देयाः कोशश्चैव तदर्द्धक इत्यने
न सार्द्धशतकार्षापणविवादे कोशः इति तद्विषयं। यच्चोक्तं सुवर्णार्द्धे नैकोशो देयः शूद्रस्य हि गुणार्थे वैश्यस्य त्रि
गुणो राजन्यस्येति तत्र सप्तरात्रोपवासेन निःशेषं विनाशे तु कोशपानं विधीयते इत्यनेन दशसुवर्णविवादे विंशति
सुवर्णविवादे च कोशः इति तत्र क्रमाच्चतुर्दशैकविंशतिदिनानीति। रोगाश्च व्याख्याताः कात्यायनेन। ज्वरातीसा
रविस्फोटः शूलास्थिपरिपीडने। नेत्ररुङ्मालरोगश्च तथोन्मादः प्रजायते। शिरोरुग्भुजभंगश्च व्याधयो दैविकाः स्मृता
इति। ज्ञातिपदार्थमाह बृहस्पतिः। शोच्यस्तु जननी तातः पुत्रो भ्राता सहोदरः। भार्या पुत्रवती धर्म्या ज्ञातयः परिकी
र्तिता इति। जननीग्रहणात्सपत्नमातुर्व्युदासः। सहोदरग्रहणादसहोदरस्य। पुत्रवती॰ग्रहणात् भोगापत्न्या
इति। पुत्रो मुख्यो गौणश्च सामान्यश्रवणात्। पितामहोपि तस्यैकस्येन सर्वस्य जनस्य यदि तत्कृतं। रोगोग्निर्ज्ञातिम
रणं सेव तस्य विभावनेति। तस्यैकस्यैव न॰ किंतु सर्वस्य पुत्रादेरपि रोगाग्निज्ञातिमरणं॰ इति वदता पौत्रस्नुषा
देरपि मरणे पराजयहेतुत्वं भवति। तदपि प्रातिस्विकं तेषामेव॰ न देशभंगग्रामकरादा। रोगोग्निर्ज्ञातिमरणमथ

देरपि मरणे पराजय इत्युक्तं भवभ्रंशो धनक्षयः। प्रात्यात्मिकं भवेद्यस्य तस्य विद्यात्पराजयमिति। अयमर्थः कार्यविवादादि
अवध्यनंतरं तु न दोषः। ऊर्ध्वं यस्य द्विसप्ताहाद्वैकृतं तु महद्भवेत्। नाभियोज्यः स विदुषा कृतकालव्यतिक्रमादिति। अवधि
मध्योपलक्षणमेतत् कृतकालव्यतिक्रमादित्युपसंहारात्। इत्वीकरादिस्पर्शे त्वहोरात्रमेवावधिः। नचानिर्दिष्टत्वादिति प्रसज्ज्येयः
शपथेष्वविरिति मनुस्मरणात्। न चैवास्तु द्विरेव वक्तव्या दंडाभिधानाय न शुद्धिः प्रयोजनाभावादित्यत आह॥ दिव्ये च शुद्धं
पुरुषं सत्कुर्याद्धार्मिको नृपः॥५॥ ॥कोशक्रमे पि दिव्यपदोपादानं धटादि सर्वदिव्यग्राहणार्थं तेन सर्वेष्वपि दिव्येषु शुद्धं
पुरुषं वस्त्रालंकारादिभिः सत्कुर्यात् यो धार्मिको धर्मनिर्णयकारी। अशुद्धस्य सत्कारविधानादशुद्धस्य दंडो
गम्यते। तथाह कात्यायनः। शतार्द्धं दापयेच्छुद्धमशुद्धो दंडभाग्भवेत्। विषतोयहुताशानां तुलाकोशे च तंडुले। तप्तमाषकदि
व्ये च क्रमाद्दंडं प्रकल्पयेत्। सहस्रं षट्शतं चैव तथा पंचशतानि च। चतुस्त्रिद्व्येकमेकं च हीनं हीनेषु कल्पयेदिति॥ ॥इति
कोशविधिः॥ ॥एवं पंचापि महादिव्यानि भगवता स्वयमेवोक्तानि इत्यनंतरोक्तान्यन्यान्यल्पाभियोगविषयाणि प्र
भिधीयंते। तत्र पितामहः। तंडुलानां प्रवक्ष्यामि विधिं भक्षणवर्जने। चौर्ये तु तंडुला देया नान्यत्रेति विनिश्चयः। चौर्ये धन
विवादोपलक्षणं अपह्नवोपक्रमेण तद्वादे तु तंडुला इति स्मरणात्। तंडुलान्कारयेच्छुक्लान् शालेर्नान्यस्य कस्य

लिखित्वा मृन्मये भाजने कृत्वा आदित्यस्याग्रतः।स्नानोदकेन संमिश्रान्रात्रौ तत्रैव वासयेत्।आवाहनादि पूर्ववत्कृत्वा रा
त्रौ विधानतः।प्रभाते कारिणे दद्यात्त्रिक्षला प्राङ्मुखाय तु।सोपवासः स्वयं गृहे तंडुलान्भक्षयेच्छुचिः।प्राङ्मुखो
पोषितं स्नातं शिरोरोपितपत्रकं तंडुलान्भक्षयित्वा पत्रे निष्ठीवयेत्ततः।भक्षयित्वेति एवं ताणि त्रिरूपं भू
र्जपत्रे वन्तु नान्यस्य भलाभे पिप्पलस्य तु।शोणितं दृश्यते यस्य हनु तालु च शीर्यति।गात्रं तु कंपते यस्य तमशुद्धं विनि
र्दिशेत्।सम्यक्तंडुलाच्च यस्य यस्य नष्ठः स्वर्वथितांः।पिक्षान्तेष्ठीवनं यस्यात मशुद्धं विनिर्दिशेत्।उपजिह्वा तालु पा
तो भुक्तरोगीतयेव वा तेषां न तंडुला देयाः शंकया शोणितं न स्यात्त्विति।। ।।इति तंडुलविधिः।। ।।अथ तप्तमाषवि
धिः।। ।।तत्र पितामहः।।तप्तमाषस्य वक्ष्यामि विधिमुद्धरणे शुभं।कारयेदायसं पात्रं ताम्रं वा षोडशांगुलं।चतु
रंगुलखातं च मृन्मयं वापि वर्तुलं।पूरयेद्घृततैलाभ्यां विंशत्या तु पलैः स्तत।सुवर्णमाषकं तस्मिन्सुतप्ते निक्षि
पेन्निक्षिपेत्ततः।सुवर्णमाषकः सुवर्णषोडशभागः।सुवर्णग्रहणं रजतादिमाषनिवृत्त्यर्थं।ततश्चैवं हैमं पंचकृ
ष्णलकं माषकं तस्मिन्सुतप्ते निक्षिपेदिति यः।अंगुष्ठांगुलियोगेन तोद्धरेत्तप्तमाषकं।कराग्रं यो न धुनुयाद्विस्फो
टो वा न जायते।शुद्धो भवति धर्मेण निर्विकारकरांगुलिरिति।अंगुष्ठांगुल्योस्तर्जनीमध्यमयोः संयोगेने

तिष्ठांव:। उद्धरेदित्युनेनोद्धारमात्रं विवक्षितं न बहिः पेक्षः। एतदपि धर्मावाहनादिः शिरस्यत्रारोपणां ते साधारणविधौ
सति द्रष्टव्यं। सम्मुद्धरेन्तैल हूतात्स्तु तप्तान्नप्तमाषकं। अंगुष्ठांगुलियोगेन सत्यमामंत्र्य वा तभीरितिवृहस्पतिस्मरणात्।
सत्यमामंत्र्य एह्येहि भगवन् धर्मेत्यादिना वाह्येत्यर्थः। प्रार्थनामंत्रास्त्वग्निदिव्योक्ता एवो भयोरिति॥ ॥इति तप्तमाष
विधिः॥ ॥अथ हूतकोशनविधिः॥ ॥तत्र पितामहः। अथातः संप्रवक्ष्यामि विधानं हूतकोशनो सौवर्णी राजती ताम्रे
आयसे वापि मृन्मये। गव्यं हूतमुपादाय तदग्नौ तापयेच्छुचिः। सौवर्णी राजती ताम्री मायसीं वा सुशोधितां। सलिले
न सकृद्धौतां प्रक्षिपेत्तत्र मुद्रिकां। भ्रमद्वीचीतरंगाढ्ये सनखस्पर्शगोचरे। परीक्षेतादपत्रेण तु रुक्कारं सघोषकं। तत
स्तानेन मंत्रेण सकृत्तदभिमंत्रयेत्। परं पवित्रममृतं हूतत्वं यज्ञकर्मसु। दह पावक पापं त्वं हिमशीतं शुचौ भव॥
उपोषितं ततः स्नातमार्द्रवासससमागतं। ग्राहयेन्मुद्रिकां तां तु हूतमध्यगतां तथा। प्रदेशिचतस्याश्च परीक्षेयुः प
रीक्षकाः। यस्य विस्फोटका न स्युः शुद्धो सावन्यथाशुचिरिति। धर्मावाहनाद्यत्राप्युक्तुसं वैयं। हूतां तु मंत्रणमिदं प्राड्वि
वाकस्य। शोध्यस्य तु त्वमग्ने इत्यादिश्च वोक्त एव मंत्रः। प्रदेशिनी परीक्षयाऽतये वोद्धरणं सिद्ध्यति॥ ॥इति हूतकोशन
विधिः॥ ॥अथ फालविधिः॥ ॥तत्र वृहस्पतिः। आयसं द्वादशपलं घटितं फालमुच्यते। अष्टांगुलं भवेद्दीर्घं चतु

रंगुलविस्तृतं।अग्निवर्णंततश्चौरोजिह्वयालेह्येत्सकृत्।सुखंशुद्धासमालिप्यश्राद्धिवाकप्रचोदिताः।अदग्धश्चे
च्छुद्धिमियादन्यथातुसहीयते।अत्रापिधर्मावाहनादिपूर्वारोपणान्तंप्रार्थनामन्त्रोवाग्निदिव्योक्तावेवग्राह्यौ॥ ॥इति
फालविधिः॥ ॥अथधर्माधर्मविधिः।तत्रपितामहः।अत्रधासंप्रवक्ष्यामिधर्माधर्मपरीक्षणं।हन्तृणांयाचमानां
नांप्रायश्चित्तार्थिनांतृणां।रैत्याणांहृत्याणामित्यादिनामाहप्रोक्षपातकाभियोगादर्शिताः।राजतंकारयेद्धर्ममधर्मं
सीसकायसं।लिखेत्पत्रेवापिधर्माधर्मौसितासितौ।अभिषुक्ष्यपंचगव्येनगंधमाल्यैःसमर्चयेत्।जीवदानादिभिर्म
न्त्रैर्गायत्र्यातिबलोमभिः।आमन्त्र्यपूजयेद्गंधैःकुसुमैश्चसितासितैः।एवंविधाःयोपलिप्यपिंडयोस्तौनिधापयेत्।गो
मयेनमृदावापिपिंडौकार्यौसमौततः।मृद्भांडकेनुपहतेस्थाप्यौचानुपलक्षितौ।उपलिप्तेशुचौदेशेदेवब्राह्मण
सन्निधौ।आवाहयेत्ततोदेवान्लोकपालांश्चपूर्ववत्।धर्मावाहनपूर्वंतुप्रतिज्ञापत्रकंलिखेत्।यदिपापविमु
क्तोहंधर्मस्त्वायातुमेकरे।अनेनशोधयेद्वाभिमन्त्र्यैतौ।अभियुक्तस्ततोह्येकंप्रगृह्णीताविलंबितः।धर्मेगृहीते
शुद्धःस्यादधर्मेतुसहीयते।एवंसमासतःप्रोक्तंधर्माधर्मपरीक्षणमिति॥ ॥इतिधर्माधर्मदिव्यविधिः॥ ॥
॥इतिश्रीधर्माधिकार विद्वत्सुनिविद्वत्तोश्रीमत्यांवैजयंत्यांचतुर्दशोध्या

यतः॥ ॥एवमुक्तावक्ष्यमाणव्यवहारपदापेक्षिते मानुषे दैविके प्रमाणे निर्णीय सांप्रतं पंचमषष्ठरत्नावशिष्टमप्रमा
माष्टादशं दायभागपदं व्याचिख्यासुः पंचदशे ध्याये मुख्यगौणपुत्रान्विभक्तुं पितुं प्रतिजानीते॥ ॥अथ द्वादशपुत्रा भ
वंति॥१॥ विभाजकोपाधिसंख्यया पुत्राणां द्वादशत्वं। यत्तु बृहस्पतिना पुत्रास्त्रयोदश प्रोक्ता मनुना ये तु पूर्वशः इति
त्रयोदशत्वं देवलेन च पुत्राख्या दश पंच चेति पंचदशत्वमुक्तं तदवांतरभेदमादाय नात्यंतभेदेनेति न विरोधः तेषामप
चैवोत्तमत्वात्तत्र मुख्यं लक्षयति॥ ॥स्वक्षेत्रे संस्कृतायामुत्पादितः स्वयमौरसः प्रथमः॥२॥ उत्पादितत्वमात्र
स्य दत्तक्रीतादिष्वतिप्रसंगवारणाय स्वयमिति विशेषणं। अहमत्रोत्पादक इति स्वात्मानुसंधानवतेत्यर्थः। अ
हं गर्भमदधामोषधीष्विति एवं ते गर्भं दधाम्यसाविति च मंत्रलिंगात्। अन्यथा प्रमत्तोत्पन्ने अविज्ञातोत्पन्ने वाति
प्रसंगात्। तस्य च कानीनेतिप्रसंगात् निवृत्त्यै संस्कृतायामिति। तस्यापि कुंडगोलकयोरतिप्रसंगनिवृत्त्यै स्व
यमिति संस्कृताया अपि विशेषणं। तदप्याहृतिये पौनर्भवेति प्रसक्तं तस्या अपि स्वयं संस्कृतत्वात्। तद्वारणाय स्व
माहैव संस्कृतेति वक्तव्यं। एतेनेद्रौपदीपुत्रेष्वप्यनौरसत्वं सिद्धं। न च वक्ष्यमाणेन स्वक्षेत्रपदेनैव तद्वारणं पुनर्भ्वाः
परक्षेत्रत्वादिति वाच्यं। तस्या अपि स्वयं संस्कृतत्वेन स्वक्षेत्रत्वात्। अन्यथा तद्भर्तुः पारदार्यप्रायश्चित्तप्रसंगा

तानस्याःपदेवरसंस्कृतमात्रक्षेत्रेत्पन्नेदेवरौरसत्ववारणाय स्वक्षेत्रइतितस्याआक्षेवाग्दानेनभ्रातृक्षेत्रत्वात्तात्रन्य
थातस्याःसुतस्तस्यभ्रातृक्षेत्रेतोत्पन्नैःसवर्णस्यभ्रातृपुत्रत्वापत्तेरितिप्रसक्तिवारणायपुंस्त्वनिर्देशः। नचस्वक्षेत्रेस्व
यमुत्पादितइत्येतावतैवार्थसिद्धेः वाग्दत्तायाअसंस्कृतायांस्वयमुत्पादितेतिप्रसंगात्। सर्वंचेदंयाउदकपूर्वकमे
कस्मैदत्तानान्यस्मैचेत्कारणान्तराभ्यांतस्याश्चिद्रवत्तान्यस्मैदत्तातेनचसंस्कृतायामुत्पन्नःपौनर्भवेतिप्रसक्तेःस्वक्षे
त्रेत्वमात्रसंस्कृतेस्वयमुत्पादितस्तस्यतद्वारणायस्वमात्रक्षेत्रेइतिचनचात्रतस्याःपूर्वप्रतिगृहीतुःप्रतिग्रहेणपश्चा
त्संस्कर्तुश्चसंस्कारेणगोत्रवीजादिनिवाहेऽपिद्विवचनतोस्तनोभयक्षेत्रत्वात्। पुनश्चेदंस्वतस्त्वस्यसंस्कृतोत्पन्नेपौनर्भवे
तिप्रसक्तेस्तद्वारणायधर्मपत्नीविशेषणविशेषणकार्यम्। नैतावतावैवलक्षणौरसोधर्मपत्नीजइतियोगिस्मरणादिति
वाच्यंक्षेत्रजादावतिप्रसंगात्तद्वारणायकिंविधर्मपत्नीत्वविवाहकामन्यस्यपूर्विकात्वादितत्सर्वमत्रविवक्षितं
तत्रतत्रोपयोगात्। तत्रचस्वमात्रक्षेत्रेधर्मपत्न्यांस्वजातौसंस्कृतायांस्वयमुत्पादितऔरसइतिसिद्धं। यत्तुसव
र्णायांसंस्कृतायांस्वयमुत्पादितिबौधायनीयंसवर्णानांविशेषणंतदौरसेषुपितुराद्यौरसप्रतिपादनायनान्येषां
निराकरणायेतिमन्तव्यं। किंचैवंशूद्रापुत्रस्यापौरसत्वापत्तिः। भवतुकिंबाधकमितिचेत्। पुत्रप्रतिनिधिकरणायरिगण

नमेवधामित्युच्यते। यथाह मनुः। कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा। स्वयंदत्तश्च शौद्रश्च षड्दायादबांधवा इ
ति। मैवं। नायमूढोत्पन्नः शौद्रः प्रतिनिधीयते। अंशं शूद्रासुतो हरेदित्येकांशादानविधिविरोधात्। किंत्वनूढायां शूद्रायामु
त्पन्न एव। अत एव तस्यानंशत्वं स एव। ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न दायभागिति। तस्मादूढायां शूद्रायामप्युत्पन्नस्यौ
रसत्वेन किं विद्धाधकान्नेवौरसो धर्मपत्नीजइति योगिस्मरणं वा धकं शूद्रायामधर्मपत्नीत्वाभावात्। कृत्स्नवर्णवै
रामारमणायैव णधर्माणव सिष्टस्मरणादिति वक्तव्यं। धर्मोत्रश्रौतस्मार्तौ दिनेग्रहस्थाश्रममात्र धर्मपत्नीत्वाभा
वात्। कृत्स्नवर्णपरिणयनविधिविरोधात्। ततश्च दारानुकल्पत्वेनापि शूद्राया विधाने गृहस्थाश्रमविहितातिथिपू
जनादिसहकारित्वेन धर्मपत्नीत्वं न विरुद्धं। तस्माद्यथोक्तमेव साधीय इति प्रथमो मुख्य इत्यर्थः। स्वक्षेत्रे संस्कृता
यां स्वयमुत्पादयेत्तु यं। तमौरसं विजानीयात्पुत्रं प्रथमकल्पिकमिति मनुस्मरणात्। अथ गौणानुल्लेखयति॥ ॥
नियुक्तायां सपिंडेनोत्तमवर्णेन वोत्पादितः क्षेत्रजो द्वि॥३॥ ॥वाग्दानंतरमेव मृतपतिकायां क्लीवभार्यायां व्याधितभा
र्यायां वा पुत्रोत्पत्त्यर्थं गुरुभिर्नियुक्तायां गुरुवत्तु ज्ञातेन देवरेण कनिष्ठेन ज्येष्ठेन वा भर्तृभ्रात्रा तदभावे सपिंडेन त
स्याप्यभावे सगोत्रेण तस्याप्यभावेऽन्यत उत्तमवर्णेन ब्राह्मणेन वा यदुत्पादितः स मृतस्य क्लीवादेर्वा पत्युः क्षेत्रजः पु
त्रो भवति स द्वितीयः। स्वक्षेत्रे स्वयं संस्कृतायामपि स्वयमनुत्पादनात् क्षेत्रयोत्तरितत्वेन विप्रकर्षात् द्वितीयः

वि॰टी॰२५
१५८

क्लीबादिक्षेत्रजः तल्लाभे नियुक्तायां क्षेत्रजो द्वितीय इति वसिष्ठस्मरणात् वाग्दत्तायामन्नस्ता स्वयमसंस्कृतायां स्वयमसंस्कृतायामुत्पादने
नवकदाद्वयं तरितव्यान्तर्तीयो ऽत्रोक्तः। अत एव याज्ञवल्क्यीयेतदभिप्राय एव क्षेत्रजस्य तृतीयत्वोपन्यासः। अत्र मनुः। यस्त्वन्यजः
प्रमीतस्य क्लीबस्य व्याधितस्य वा। स्वधर्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृत इति। प्रमीतस्य वाग्दानान्तरं विवाहात् प्राक्। नान्य
स्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः। अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युः सनातनमिति विधवानियोजनं विनिंद्य
यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः। तामनेन विधानेन निजो विन्देत देवर इति मनुनैवाभिधानात् देवराभावे
सपिंडाद्या नियोज्या गोत्रजो वा। अपतिरपत्यलिप्सुर्देवरात् पिंडगोत्रर्षिसंबंधिभ्यो योनिमात्राद्वेति देवराभावविषय
त्वं वैषां तेनैव स्पष्टीकृतं। देवराच्च सपिंडाद्वा गौतमो योनिमात्राद्वा सवर्णाभावे ब्राह्मणाज्जा
तिमात्राद्वेति शंखस्मरणात्। तेन नियुक्ताभ्यां कार्याहृता भक्तेन कार्यं। नियुक्तायां सर्वांगमालानमभ्यज्य गंधोद्धु
षणः स्मरणात्। अयमेव पुत्रेण बीजिनाऽत्रोत्पन्नपत्यभावयोर्भविष्यतीति संविदा जनितो बीजिनोपि बीजः पु
त्र इत्युच्यते। यथाह मनुः। क्रियाभ्युपगमात्क्षेत्रं बीजार्थं यत्प्रदीयते। तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव चेति। क्रियासंवित्
सचोभयोरिक्थहरः पिंडदश्च। अपरेणतु रक्षेत्रे नियोगोत्पादितः सुतः। उभयोरप्यसौ रिक्थी पिंडदाता च धर्मत इति योगि
स्मरणात्। यत्तु औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतस्य द्वितीयस्थानेपाठः एतन्नैक्यतंत्रं तु त्रिकेव सुतः पुत्रिका

१५८

सुत इत्यर्थमभिप्रेत्य तस्यास्त्वोत्पन्नत्वेन सवर्णत्वेन च परोत्पन्नात्क्षेत्रजात्संनिकृष्टत्वात् । यत्तु तृतीयः पुत्रिकैव विज्ञाय
त इति वसिष्ठेन तस्यास्तृतीयत्वमुक्तं तत्पित्रा सवर्णादि पुत्रिकाभिप्रायेणेति तृतीये लक्षयति ॥ ॥ पुत्रिकापुत्रस्तृतीयः ॥
॥४॥ ॥ वक्ष्यमाणविधिना परिभाषिता कन्या पुत्रिका तस्याः पुत्रः पुत्रिकापुत्रः स तृतीयः । स्वदौहित्रत्वस्योत्पाद
कत्वयोरभावेन कदाचिदयं तरितत्वात् पुत्रिकां लक्षयति ॥ ॥ यस्त्वस्याः पुत्रः स मे पुत्रो भवेदिति या पित्रा दत्ता सा पुत्रि
केति । यथाह वसिष्ठः । अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम् । अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति । सा विकरणा
भिप्रजातिचेष्टा भवति । यथाह गौतमः । पितोत्सृजेत्पुत्रिकामनपत्योऽग्निं प्रजापतिं चेष्ट्वास्मदर्थमपत्यमिति संवाद्येति । होमश्चा
ऽनेनेति हरदत्तः । तत्र पुत्रिकायाः प्रदानेति स्थालीपाकेन धर्मवित् । अग्निं प्रजापतिं चेष्ट्वा पुत्रदानेन तथैव चेति जाबालिस्म
रणात् प्रकारान्तरेणापि तां लक्षयति ॥ ॥ पुत्रिकाविधिना प्रतिपादितापि भ्रातृविहीना पुत्रिकैवोढा ॥ ॥ पूर्वो
क्तपरिभाषा पुत्रिकाविधिस्तेन विधिनाऽभिसंधिमात्रेणैव तद्विषयेण प्रतिपादिता दत्ता भ्रातृविहीना सोदर
भ्रातृविरहिता पुत्रिकैव भवति । तेन तत्सुतोऽपि पुत्रिकापुत्र इत्यर्थः । यथाह गौतमः । अभिसंधिमात्रात्पुत्रिकेत्येके
षामिति । पित्रा भ्रातृविहीनेति पाठे तु पितृमरणानन्तरमभ्रातृका पित्रभिसंध्यभावे पितामहाद्यभिसंधि

125

विरी. १४९

नापिपुत्रिकैवाष्टतेपत्तरियादत्तासाविज्ञेयात्तुपुत्रिकेतिब्रह्मपुराणात्॥तेनतात्पुत्रएवतस्यरिक्थपिंडाधिकारीतितान
नुपष्ठीतत्पुरुषात्कर्मधारयस्यलघुत्वात्पुत्रिकैवपुत्रइतिकृतोनयास्त्वायतेतृतीयःपुत्रिकाविज्ञायतइति
वसिष्ठवाक्यात्तुग्रहात्॥नवयस्त्वस्याःपुत्रःसमेपुत्रइतिपुत्रिकालक्षणकरणात्तदादरइतिवाच्यं॥तस्यप्रका
रांतरेणपुत्रिकात्वप्रतिपादनार्थत्वात्॥अतएववसिष्ठेनतृतीयःपुत्रिकेतिपुत्रिकामभिधायपुत्रिका
पुत्रोपिद्वितीयगमिहितोऽभ्रातृकांप्रदास्यामीत्यनेनतस्मात्तथैवव्याख्येयमितिचेत्॥मैवं॥श्रुतिस्मृतिभ्यां
तस्यपक्षस्यदूषितत्वात्॥तत्रश्रुतिः॥अभ्रातेवपुंसएतिप्रती[illegible]स्या॥अभ्रातेवपुंसःयथाअभ्रा
तृकाकन्यादत्तापिसतीपित्रोरूढापिभर्त्रापुनःपुंसःयथाअभ्रातृकाकन्यादत्तापिसतीपित्रोरूढा
पिभर्त्रापुनःपुंसःप्रतीचीतिहनेवपितृनेवपितृवंशमेवाभिमुख्येनएतिसंतानकर्मणिपिंडदानार्थनप
तिवंशमित्यर्थः॥साहिपितृवंशंपुत्रैःपौत्रैश्चवर्द्धयतिनभर्तृवंशमिति॥स्मृतिरपिवसिष्ठस्याभ
अभ्रातृकापुंसःपितृनभ्येतिप्रतीचीनंगच्छतिपुत्रत्वमिति॥अत्रोभयत्रापिदत्तप्रत्याहृतिल

३११

क्षणदोषसंकीर्त्तनात्पुत्रिकेवपुत्रइतिपक्षएवासमंजसइत्युपेक्षितवान्श्रीभगवान्। चतुर्थंलक्षयति॥ ॥पौनर्भव
श्चतुर्थः॥१३॥ ॥वक्ष्यमाणलक्षणायांपुनर्भ्वांजातःपौनर्भवःसचतुर्थः। अक्षतायामन्यसंस्कृतायांस्वमात्रक्षेत्रत्वंस्व
मात्रसंस्कृतत्वंधर्मपत्नीत्वानांत्रयाणामभावात्क्षेत्रयांतरितत्वात्। क्षतायांतुधर्मपत्नीत्वाभावेपिस्वमात्रक्षेत्र
त्वंस्वमात्रक्षेत्रत्वंवास्त्येवेतिनत्रितयाभावोयद्यपितथापिपुनर्भूत्वनिमित्तपुनःसंस्काराभावेनातिप्रसंगाभावादितिवा
च्यंसंस्कारसामान्यविवक्षयातिप्रसंगवारणार्थत्वात्। विशेषविवक्षायांतुतद्वैयर्थ्यस्पष्टत्वात्। स्वैरिण्यांतुसंस्कारविधाना
देवनस्वसंस्कृतत्वंतदभावोनस्वक्षेत्रत्वं। धर्मपत्नीत्वंतुदूरापास्तमेवेतित्रितयांतरितत्वाच्चतुर्थत्वंतत्पुत्रस्यापिस्पष्टमेव
। यत्तुयोगीश्वरेणास्यषष्ठत्वमुक्तंतत्क्षानश्राद्धाद्यनर्हत्वेनातिविप्रकर्षमभिप्रेत्येतिनविरोधः। पुनर्भूलक्षणमाह॥ ॥अक्ष
ताभूयःसंस्कृता पुनर्भूः॥१८॥ ॥अक्षतासंस्कारमात्रदूषितापुनःसंस्कृताचेत्पुनर्भूः। नचनन्यपूर्विकापरिणयनविधा
नात्पुनःसंस्का[illegible]रएवानुपपन्नःक्रियमाणोपिवाकथंसुतद्योतसहायोत्पत्तिकविध्यवगमितसजातीयसंस्कारांतराव
रुद्धत्वादितिचेत्। वाढं। साचेदक्षतयोनिःस्याद्गतप्रत्यागतापिवा। पौनर्भवेनभर्त्रासापुनःसंस्कारमर्हतीतिमनुनापूर्व
संस्कारवत्संस्कारांतरस्याप्यभिधानात्। द्विविधापुनर्भूरक्षताक्षताचेति। अक्षतावदक्षताचैवपुनर्भूःसंस्कृतापुनरि

126

वि०टी१५
१५२

तियोगिस्मरणात्तात्रादत्तालक्षितासतांलक्षयति ।। ।।अक्षतत्वसंस्कृतापिपरपूर्वा।।ए।। ।।यातुसंस्कारात्प्रागेवपरपू
र्वापरोपभुक्तासायद्यपिभूयोनसंस्क्रियतेक्रियमाणसंस्कारस्यैवप्रथमत्वात्तथापिपुनर्भूर्भवतिपुनर्मिथुनीभव
नात् । अतएवमनुनायापत्यावापरित्यक्ताविधवावास्वेच्छयापिवा । उत्पादयेत्पुनर्भूत्वासपौनर्भवउच्यतइत्यनेन
सधवाविधवात्वाद्यनादृत्यपुनर्मिथुनीभवनमेवपौनर्भवत्वेनिमित्तमुपन्यस्तं । यद्वापूर्वसूत्रएवक्षतोपलक्ष
णीयाक्षतायाद्विःसंस्कारेणपुनर्भूत्वात्क्षतायाःसकृत्संस्कारेणैवपुनर्भूत्वावसिद्धेः । अत्रतुस्वैरिण्याअपि
पुनर्भूर्भवतीति । स्वैरिण्याअपिपुनर्भूत्वंप्रतिपाद्यते । यापरसवर्णंपरंपूर्वपतिमुत्सृज्यान्यंश्रितासाभूयःसंस्कारा
भावेपिपुनर्भूर्भा । अनेनचपुनर्भूत्वेपुनःसंस्कारःपुनर्मिथुनीभावश्चेतिद्वयंनिमित्तंदर्शितं । यश्चाहवसि
ष्ठः । यावाक्लीवंपतितमुन्मत्तंवाभर्तारमुत्सृज्यान्यंपतिंविंदतेमृतेवासापुनर्भवतीति । स्वैरिण्याःपुनःसंस्का
राभावश्चोपपादितोस्माभिःसविस्तरंमिताक्षराटीकायांप्रमिताक्षरायांइतिनेहोच्यते । पंचमंलक्षयति ।। ।।कानी
नःपंचमः ।।१०।। ।।कन्यालक्षणायपुनस्तमेवलक्षयति ।। ।।पितृगृहेत्वसंस्कृतयैवोत्पादितः ।।२१।। ।।वा
चादत्तापियावरेणसंस्कृतानस्यांपितृगृहस्थितायामेवयोजायतेसकानीनः । अनेनेदृशीकन्येत्यु

३५

१५

क्तं भवति। अत्रासंस्कृतेति वचनाद्वाग्दानं तर्यं गम्यते अन्यथा अप्रत्तेत्येवावक्ष्यत्। तथा च बौधायनः। असंस्कृतामनतिसृ
ष्टां यामुपगच्छेत्तस्यां यो जातः स कानीनो मातामहस्य सुत इति। अत्रासंस्कृतामनतिसृष्टामिति विशेषणद्वयोपादाना
द्वाग्दत्तायामसंस्कृतायां वा जातो वोढुः पुत्रो भवति। अवाग्दत्तायां जातो मातामहपुत्र इति सिध्यति॥ कानीनः क
न्यका जातो मातामहसुतो मत इति योगिस्मरणात्॥ वाग्दत्तायां पितृपत्योः संबंधसाम्यात्कस्यासावित्यत आ
ह॥ ॥स च पाणिग्राहस्य॥१३॥ ॥स वाङ्मात्रसंस्कृतायामुत्पन्नः पुत्रः पाणिग्राहस्य यस्तस्याः पाणिं ग्रही
ष्यति तस्यासौ पुत्रः। वाग्दानादेव पतित्वं तोत्पन्नः। यथाह मनुः। पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः। तं का
नीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवमिति। कन्या वा अक्षता अत्र संस्कृतेति ध्येयं। अनेन च वाग्दानाभावे यो जाय
ते स मातामहस्य पुत्र इत्युक्तं भवति तच्चोपपादितमधस्तात्। यदा तु पितृगृहे संस्कृतयेत्येव पादस्तदा त्वयम
र्थः सुलभ एव। नन्वपितृपतिसंबंधवद्बीजिसंबंधोपि विद्यते तत्कथं तस्यापत्यमसौ न स्यादिति चेत्सत्यं। बीजाद्यो
निर्बलसीति न्यायेन तस्य दौर्बल्यात्। षष्ठं लक्षयति॥ ॥गृहे च गूढोत्पन्नः षष्ठः॥१४॥ ॥पितृगृहानुवृत्तौ
पुनर्गृहोपादानं स्वगृहावगमाय तेन चोढासिध्यति तस्यां भर्तृगृहे गुढात्पन्नेत्रज्ञिभ्योम विज्ञायमाना

स्वजातीयास्वजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिरिति योगिनाप्युक्त स्वजात्याभिव्यातभार्यायामुत्पन्नो
गूढजः पुत्रः स च षष्ठः स्वदेशत्वादिसत्त्वेपि स्वातंत्र्यनी विशिष्टाभावात् कल्पाचतुष्टये नाविज्ञातोत्पन्नत्वेन
पंचम्या व्यवधानात् अत्रेनेन च पूर्वत्पादकानां विज्ञातत्वसिध्यो रसलक्षणो प्यात्मनो प्युत्पादकताज्ञा
नं स्वयं शब्दार्थः सिध्यति तदभावाच्चास्य षष्ठत्वं यथाह मनुः। उत्पद्यते गृहे यस्तु न विज्ञायेत कस्य सः। स
गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पज इति। वीजिदे त्रिणोस्तल्प संबंधात्कस्यासावित्यत इति। वीजिदो
त्रिणोस्तल्यस्तल्पसंबंधात्कस्यासावित्यत आह॥ ॥यस्य तल्पजस्तस्यासौ पुत्र इत्यर्थः। यो निप्रावल्या
त्तासप्तमं लक्षणं य॥ ॥सहोढः सप्तमः॥२५॥ ॥सहैव भार्यजायकत्वनते स सहोढः स च सप्तमः। पूर्वोक्ताभिः स्वदे
शत्वादिपंचकलाभिर्जाताज्ञातत्वरूपयाप्रष्ठ्यावच्छेवेभानात्। सहोढस्य शब्दार्थं व्याचष्टे॥ ॥या गर्भिणी संस्क्रि
यते तस्याः पुत्रः॥२६॥ ॥या वाग्दानात्प्रागेव गर्भिणी ज्ञाताज्ञाता वा वरेण संस्क्रियते वाग्दानस्यापि संस्का
रत्वात् तस्याः पुत्रः सहोढः। अयमेव कानीनगूढजाभ्यामस्य विशेषो यद्वाग्दानात्पूर्वमेव ज्ञाताज्ञाता वा गर्भो
[illegible]ति। ननु वाग्दानात्पूर्वमपि संभूतः कानीनो गूढजाभ्यामस्य विशेषो यद्वाग्दानात्पूर्वमेव ज्ञाता

ज्ञाता वा गर्भोत्पत्तिश्चेति ननु वाग्दानात्पूर्वमपि संभूतः कानीनो भवतीत्युक्तं तर्हि तस्मात्कोऽस्य भेद इति चेत् सत्यं
तस्य संस्कारात्प्रागेव प्रसूतेरस्य तु संस्कारानन्तरमिति महानेव भेदः। वोढुर्मातामहयोस्तु कल्प्यसंबंधात्कस्यासावित्य
त आह॥ ॥सवर्णपाणिग्राहस्य॥१७॥ ॥स सहोढो यस्तस्या गर्भिण्याः पाणिं गृह्णाति तस्य पुत्रः। मात्रा सह ऊढानेन माता
मह संबंधनिवृत्त्यै। यथाह मनुः। या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती। वोढुः स गर्भो भवति सहोढ इति चो
च्यत इति। एवं क्षेत्रद्वारा सन्निकृष्टान्सप्ताभिधायेदानीं बीजक्षेत्राभ्यामसन्निकृष्टांश्चतुरष्टमं लक्षयति॥ ॥दत्त
कश्चाष्टमः॥१८॥ दत्त एव दत्तकः स चाष्टमः। बीजक्षेत्रयोः सर्वथा परकीयत्वेन सहोढादपि विप्रकृष्टत्वात्।
ननु तस्यापि वाग्दानात्प्रागेव गर्भसंभवाद्बीजक्षेत्रयोः परकीयत्वाविशेष एव। वाढं। तथाप्युत्तरकालमपि दा
नेन क्षेत्रे स्वत्वसंभवाद्बीजक्षेत्रयोः परकीयत्वाविशेष एव। वाढं। तथाप्युत्तरकालमपि दानेन क्षेत्रे स्वत्वसंभवा
त्। प्रकृते तु सर्वथैव तदभावात्। यद्येवं क्रीतादिष्वपि समानत्वात्क्रमोऽनुपपन्नः पौर्वापर्यनियामकप्रत्यास
त्तितारतम्याभावादिति चेत्। मैवं। दृष्टप्रत्यासत्त्यभावेऽपि क्रमानुपपत्त्याऽदृष्टप्रत्यासत्तेरवश्याभ्युपेयत्वा
त्। तथाहि। यो दानप्रतिग्रहाभ्यां संस्कारविशेषो दत्तकस्य नासौ क्रीतस्य। यथा ब्राह्मोढायां यो नासावासु

रिदायामिति। सोपि त्वयत्र दृष्टग्रन्त्या सत्यसंभवस्तत्र कल्पते न पूर्वेषु सप्तस्विति। दानं च केनेत्यत आह॥ ॥स
च माता पिता भ्यां यस्मै दत्तस्तस्य पुत्रः। षष्ठी संप्रदाने बहुलानुशासनात्। शुक्रशोणितसंभवः पुरुषो
मातापितृनिमित्तकस्तस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवत इति वसिष्ठस्मरणात्॥
भर्त्रनुज्ञायां तु मातुरपि दानाधिकारः। न तु स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा। अन्यत्रानुज्ञानाद्भर्तुरिति त
स्यैव स्मरणात्। एवं मात्रभावे पितुरपि। मातापितृनिमित्तकस्तु पुत्रमापदीति मनुस्मरणात्। आप
दि दुर्भिक्षादौ अनापदि दातुः प्रतिषेधः। यद्वा आपदि प्रतिगृहीतुरपुत्रत्वे। अपुत्रेणैव कर्तव्यः पुत्रप्रतिनिधिः
सदेत्यत्रिस्मरणात्। सपुत्रत्वे तु तस्यैव प्रतिषेधः। एकस्य पुत्रो न देयः। न त्वेवैकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वेति
वसिष्ठस्मरणात्। तथाऽप्युक्ष्य ज्येष्ठं पितेति शौनःशेपाख्ये लिंगात्। भ्रातृपुत्रे तस्मिन् सर्वपुत्रत्वस्य वक्ष्यमा
णत्वात्। पुत्रप्रतिग्रहविधिमाह वसिष्ठः। पुत्रं प्रतिग्रहीष्यन् बंधूनाहूय राजनि निवेद्य निवेशनस्य मध्ये व्या
हृतिभिर्हुत्वा अदूरबांधवमसन्निकृष्टमेव प्रतिगृह्णीयादिति। अदूरबांधवं सन्निहितदेवाभिजातिसमूह
मसन्निकृष्टमसंवेष्टितमेव। बंधुसन्निकृष्टमेवेत्यपि पाठः। तत्र भ्रातृपुत्रो मुख्यः। दूरबांधवत्वेन च संदेहे गो

१५२

सएवासंदेहे चोत्पन्नेइरेवौषवं शूद्रमिमिवस्थापयेत्॥ विज्ञायतेह्येकेन बहूंस्त्रायतइति दानविधिस्तु जावालिनाउ
त्रिकादानेन व्याख्यातः। नवमं लक्षयति॥ ॥क्रीतश्च नवमः॥२०॥ ॥दत्तकोक्तरीत्या मातापितृभ्यामन्यतरे
ण वा ज्येष्ठमेकं च वर्जयित्वा आपदि विक्रीयमाणो धनं दत्त्वा यः क्रीतः स नवमः। क्रीतत्वेन क्रीतभार्यावद्दे
व पितृकर्मानर्हत्वे न दत्तादपि विप्रकृष्टत्वात्। अविभक्तो भ्रात्रादिषु साधारणधनक्रीतत्वेन दासादिवत्स्व
धारणापापन्नो वाह॥ ॥स च येन क्रीतः॥२१॥ स क्रीतो येन ममायं पुत्रो भवत्विति बुद्ध्या गृहीतस्तस्यैव पुत्रो न दासा
वसाधारणः। यथाह मनुः। क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात्। स क्रीतकः सुतस्तस्य सदृशोसदृशोगु
णैरिति। दशमं लक्षयति॥ ॥स्वयमुपगतो दशमः॥२२॥ ॥यो मातापितृविहीनस्ताभ्यां त्यक्तो वा तवाहं पुत्रो भवामीति
स्वयमेवोपगतः स दशमः। स्वयमुपगते कर्तव्यापाराभावादपुत्रेणैव कर्तव्यः उत्पत्तिनिविष्टस्थत्यादिविधिप
र्यवसानाभावेन क्रीतादिविप्रकृष्टत्वात्। न च स्वीकार एव कर्तव्यापारस्तस्य रागप्राप्तत्वेनाविधेयत्वात्। यथाह म
नुः। मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात्। आत्मानं स्पर्शयेद्यस्मै स्वयंदत्तश्च स स्मृत इति। समुदायमुपगतः
कस्यास्मीति यत आह॥ ॥स च यस्योपगतः॥२३॥ स स्वयमुपगतोऽयं कामयेत तवाहमिति तस्यैव पुत्रो नान्येषाम्॥

तदेतत्स्पष्टमाम्नातं वसिष्ठः। स्वयमुपगतस्तुर्थः तच्छुनःशेपेन व्याख्यातं। शुनःशेपो यूपे नियुक्तो देवतास्तुष्टाव त
स्येह देवताः पाशं विश्वामित्रो होतासीत्तस्य पुत्रत्वमियायेति। एकादशं लक्षयति॥ ॥अपविद्धस्त्वेकादशः॥
॥१४॥ ॥यस्त्यक्तो गृह्यते सोऽपविद्धः स चैकादशः। त्यक्तस्य स्वयं ग्रहणाद्दत्तात्मनोऽपि विप्रकृष्टत्वात्। त्यागश्च
केनेत्यत आह॥ ॥पित्रा मात्रा वा परित्यक्तः॥१५॥ ॥प्रत्येकं विभक्तिचकाराभ्यामुभाभ्यामन्य
तराभ्यां वैव सिद्धे येनान्यतरेणोभाभ्यां वा परित्यक्तोऽपविद्ध इत्यर्थः। यथाह मनुः। मातापितृभ्यामुत्सृष्टं तयोरन्य
तरेण वा। यं पुत्रं परिगृह्णीयादपविद्धः स उच्यत इति। परित्यक्तस्यास्वामिकतया कस्यासावित्यत आह॥ ॥
स च येन गृह्यते॥१६॥ ॥अस्वामिकपरिग्रहे तोवत्तत्वाद्येन गृह्यते तस्यैव स पुत्रो भवति। द्वादशं लक्षय
ति॥ ॥यत्र क्वचनोत्पादितस्तु द्वादशः॥१७॥ ॥उक्तविषयेभ्योऽन्यत्र यत्र क्वचन स्वीयायां परकीयायां वा सवर्णा
मसवर्णायां वा ऊढायामनूढायां वा दत्तायां वा येनोत्पादितस्तस्यैव पुत्रः। सजातीयतानियमस्य कृत्रिमेण
सह द्वादशपुत्रविषयत्वात्। स च द्वादशो विषयविशेषनियमाभावादपविद्धादपि विप्रकृष्टत्वात्। यथाह म
नुः। य एतेऽभिहिताः पुत्राः प्रसंगादन्यबीजजाः। यस्य ते बीजतो जातास्तस्य ते नेतरस्य त्विति। अत्र केचित्

यएैते क्षेत्रजादय एकादशपुत्रा औरसप्रसंगास्ते यस्य तो बीजतो जातास्तस्य न भवंति किं त्वितरस्य यस्य क्षेत्रं भवे
वा क्रियादिकं तं तस्यैवेत्याहुः। तन्नास्य स्यार्थस्य तत्तल्लक्षणवाक्यैरेवोक्तत्वेन पौनरुक्त्यप्रसंगात्। तथाहि तस्य स्या
द्यस्य तल्पज इति बोढुः कन्यासमुद्भव इति वोढुः सगर्भा भवतीति गूढोत्पन्नकानीनसहोढलक्षणेषु तत्र तत्र सर्वत्र श्रू
यमाणत्वात्। अन्ये तु य एते दत्रिमादयः पुत्रा उक्तास्ते यद्दित्रादीनां क्षेत्रे अन्येभ्यो जातास्तदा दात्रादिभिर्हृता अपि न प्र
तिग्रहीत्रादीनां पुत्रा भवंति। किंतु बीजन एवेत्यस्यार्थ इत्याहुः। तदपि न। तत्क्षेत्री स्वत्वेन स्वस्वत्वे सति दानक्रयादि
वाधकाभावात्। न चैकपुत्रप्रतिषेधवचनिकोयमर्थ इति वाच्यं। अदृष्टार्थत्वप्रसंगात्। बीजिपुत्रताभिधानेन स
र्वत्रादिसिद्धक्षेत्रिपुत्रताया अप्रसिद्ध्यापत्तेश्च। अपरे तु य एते क्षेत्रजादयः पुत्राः प्रसंगादुक्तास्ते बीजिन एव न क्षेत्रि
ण औरसः पुत्रिका वा स्यात्तदन्यबीजत्वमेकादशानामप्युपलक्षणं तेन स्वबीजजावपि पौनर्भवशौद्रौ न कर्तव्यौ। अ
त एव बृहस्पतिः। आज्यं विना यथा तैलं सद्भिः प्रतिनिधिः स्मृतः। तथैकादश पुत्रास्तु पुत्रिकौरसयोर्विनेत्याहुः। तद
पि मंदं। अस्यार्थस्याव्यवहितपूर्ववाक्येनैवोक्तत्वेन पौनरुक्त्यात्। तच्च वाक्यं क्षेत्रजादीन् सुतानेतानेकादश यथोदि
तान्। पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिण इति। औरसपुत्रिकाकर्तव्यश्राद्धादिक्रियालोपो माभूदि

१३०

तित्समितिनिषिद्धत्वेन क्षेत्रजादीनामभिधानात् । तस्मादस्य वाक्यस्य सम्भोर्थो विक्रयः । सयथा । क्षेत्रजादयः क्षेत्रिकादी-
नामेव पुत्रा इति तन्नेष्टं द्रणार्थकैरेव स्मृतं तैरसाधु भावे प्रतिनिषिद्धा कार्या इति क्षेत्रजादीनित्यनेनोक्तमिदानीं बी-
जिनः सर्वथापुत्रत्वेन केवलं क्षेत्रिकादीनामेव न किंतु बीजिनोपीत्याह । यस्येति । यस्य ते बीजतो जातास्तस्यापि ते ने-
तरस्या तु शब्दो व्यावारणे नेतरस्य क्षेत्रिकोदेरिति बीजिक्षेत्रिणोरुभयोरप्यपुत्रत्वे क्षेत्रजादय उभयोरपि पुत्रा भवंती-
त्यर्थः । यथाह याज्ञवल्क्यः । अपुत्रेणपरक्षेत्रे नियोगोत्पादितः सुतः । उभयोरप्यसौ रिक्थी । पिंडदाता च धर्मत इति
न च यमप्यर्थः स्त्रीपुंधर्माभिधाने विहित एव क्रियास्वुपगमात् क्षेत्रं बीजार्थं यत्प्रदीयते । तस्येह भागिनो दृष्टौ बी-
जी क्षेत्रिक एव चेत्यनेन क्रियाभ्युपगमो निमित्तमत्र तु तदभावे तूभयोरपुत्रत्वे दत्तकादीनां सर्वेषामेव द्व्यामुष्या-
यणताभिधानायेदमिति न पौनरुक्त्यं । क्रियालोपादिति हेतोर्द्वयोरपि समानत्वात् । अपुत्रेण परक्षेत्र इत्यत्राउ-
त्ततामात्रस्य द्व्यामुष्यायणतायां हेतुतादर्शनात् । तस्माद्बीजिनोप्यपुत्रत्वे यत्र कश्चनोत्पादितः पुत्रो
भवतीति सिद्धं । नन्वौरसः पुत्रिकाबीजक्षेत्रिणोपुत्रिकासुतः । पौनर्भवस्वकानीनः सहोढो गूढ-
संभवः । दत्तक्रीतस्वयंदत्ताः कृत्रिमश्चापविद्धकः । यत्र क्वचोत्पादितश्च पुत्रा ख्यादश पंचच

अनेनैव क्रमेणैषां पूर्वाभावे परः परः। पिंडदोंशहरश्चेति मुक्ता गुणवशात्स्थितिरिति देवलेन यत्र क्वचनोत्पादितो बीजजः पृथ-
ग्वोपन्यस्तस्तत्कथं यत्र क्वचनोत्पादितः साधारणेनोच्यत इति न विरोधः। न चैवं द्वादशसंख्याविरोधः। यत्र क्वच-
नोत्पन्नस्य पूर्वत्रावांतरभेदेन स्वातंत्र्याभावादिति वाच्यं। द्वादशातिरिक्तस्यापि व्यभिचारादुत्पन्नस्य संभ-
वात्। उपधेयसंकरेप्युपाधेरसंकराच्च। तद्भेदस्यैव च द्वादशत्वप्रयोजकत्वादित्यलं। अथवा यत्र क्वचनेत्यनेनानू-
ढाशूद्रा विवक्षिता तस्यां जातो द्वादशः पुत्र इति व्याख्येयं। ऊढायामुत्पन्नस्यौरसत्वाभिधानात्। अत एव मनुः। यं ब्राह्मण-
स्तु शूद्रायां कामादुत्पादयेत्सुतं। स पारयन्नेव शवस्तस्मात्पारशवः स्मृत इति कामादित्याह। तथा स्वयंदत्तश्च शौद्रश्च
षड्दायादबांधवा इत्यदायत्वमपि तस्यैवाह। ऊढायामुत्पन्नस्य तु शूद्रासुतो हरेदित्येकांशस्योक्तत्वात्। नन्वेषां प्रतिनि-
धित्वाविशेषे तुल्यकक्षत्वमेवोचितं। न तु द्वितीयादिकक्षत्वमेवोचितं। न तु द्वितीयादिकक्षत्वमित्यत आह॥ ॥ए-
तेषां पूर्वः पूर्वः श्रेयान्॥१८॥ ॥एतेषां द्वादशानां पुत्राणां मध्ये पूर्वः पूर्वः पूर्वपठितः श्रेयान् श्रेयोऽदृष्टविशेषस्त-
द्वत्त्वात्स्वशक्तेः। नन्वेषां पौर्वापर्येणोपादाने दृष्टविशेषः प्रत्यासत्तिरित्युक्तमेव किमर्थमिदमुच्यते पूर्वः पूर्वः श्रेयानिति।
सत्यं। द्वेधा हि श्रेयस्त्वं अवयवप्रत्यासत्त्या विशुद्धजन्मना च। तत्रौरसपौत्रिकेययोर्निर्भिन्नद्वयसद्भावादुभयथापि श्रे-

वि॰टी॰५
१५५

यत्त्वं क्षेत्रजादीनां सहोढांतानां पंचानामवयवप्रत्यासत्त्यैव श्रेयस्त्वं दंपत्योरन्यतरावयवसंबंधात्तु न जन्मना बीजक्षे
त्रयोर्विपर्यासात् । दत्तकादीनां जन्मनैव श्रेयस्त्वं नावयवप्रत्यासत्त्या । अन्यत्रानामेव परिग्रहात् । तयोश्चाव-
यवप्रत्यासत्तेरभ्यर्हितत्वमभिप्रेत्य क्षेत्रजादीनां पूर्वमुपन्यासः । तेषां पितृदायइव बंधुदायेष्वप्यधिकारात् । यथा
हतुः शंखलिखितौ । औरसः क्षेत्रजः पुत्रिकासुतः पौनर्भवः कानीनो गूढोत्पन्नश्चेति षट् पुत्रा बंधुदायादा इ
ति चकारात्सहोढोपि । अथ दायादबंधूनां सहोढो प्रथम इति वसिष्ठस्मरणात् । दत्तकादीनां तदभावादनभ्यर्हि
तत्वेन पश्चादुपन्यासः । यथाह हारीतः । दत्तः क्रीतकोपविद्धः सहोढः स्वयमुपगतः सहसा दृष्टश्चेत्यबंधुदाया इ
ति । सहसा दृष्टः कृत्रिमः । बंधूनामपुत्रपितृव्यादीनां दायमाददतीति बंधुदायादा इत्यबंधुदायादाः । अय
मर्थः । पत्न्याद्यभावे यदा भ्रातृपुत्रादीनां दायसंबंधः प्राप्नोति तदा ते औरसाद्याः सहोढांताः सहो
ढांताः स्वस्वैवापुत्रपितृव्यादिधनभाजो भवंति न दत्तकाद्याः पंचेति । ते तु केवलं पितुरेव तद्धनभाजो नान्ये
षां । तेषां षड् बंधुदायादाः पूर्वेऽन्ये पितुरेवेत्यविनिर्देशबल स्मरणात् । सहोढस्तु गुणागुणाभ्यां व्यवस्था । एवं म
नुगौतमाद्युक्तानां क्रमस्यापि व्यवस्था ज्ञेया । अपिंडदोंऽशहरश्चेति युक्त्या गुणवशात्पितिरितित्तस्यैव स्मर

१५

णात्।यत्तुगौतमीयेपुत्रिकापुत्रस्यदशमत्वेनपाठःसविजातीयतद्विषयःचतुर्थांशाभिधानात्।समानजा
तीयस्यौरससाम्यात्।तेषांचौरसोत्पन्नोज्यैष्ठ्यमपिन।औरसेपुनरुत्पन्नेष्वंतेषुनविद्यतइतिदेवलस्मरणा
त्।श्रेयस्त्वस्यप्रयोजनमाह॥ ॥सएवदायहरः॥२९॥ ॥योयंश्रेमानुक्तःसपित्रादिदायहरोनपापीया
न्।श्रेयसोऽभावेतुपापीयानपिदायहरोभवति।यथाहमनुः।श्रेयसःश्रेयसोऽलाभेपापीयान्रिक्थमर्ह
तीति।यदाश्रेयसोऽभायहरत्वंतदान्येषांकागतिरित्यतआह॥ ॥सचान्यान्बिभृयात्॥३०॥ ॥सपू
र्वःपूर्वःऔरसादिर्दायहरोन्याननुक्षेत्रजादीन्बिभृयात्।अन्नाच्छादनेनपोषयेत्।इदंचौरसाद्यपेक्षयान्येषां
कागतिर्निर्गुणत्वेज्ञेयं।समगुणत्वेतुमनुः।षष्ठंतुक्षेत्रजस्यांशंप्रदद्यात्पैतृकाद्धनात्।औरसोविभजन्
दायंपित्र्यंपंचममेववेति।अत्यंतसद्गुणत्वेतुतृतीयांशोब्रह्मपुराणेऽभिहितः।समग्रधनभोक्तास्यादौरसे
पिजघन्यजः।त्रिभागंक्षेत्रजोभुंक्तेचतुर्थंपुत्रिकासुतइति।पुत्रिकौरससमवायेतुमनुः।पुत्रिकायां
कृतायांतुयदिपुत्रोऽनुजायते।समस्तत्रविभागःस्याज्ज्येष्ठतानास्तिहिस्त्रियाइति।औरसपौनभ

१३२

वादिसमवाये ब्रह्मपुराणे। कृत्रिमः पंचभागं तु षड्भागं गूढसंभवः। सप्तांशश्चापविद्धस्तु कानीनश्चाष्ट
मांशभाक्। कानवभागं सहोढश्च क्रीतो दशममश्नुते। पौनर्भवस्त्वेकादशं द्वादशं स्वयमागतः। त्रयोदश
मभागं तु षड्भागं गूढसंभवः। सप्तांशश्चापविद्धस्तु शूद्रोत्पन्नः पितुर्धनात् इति। हारीतः। विभजिष्य
माणे एकविंशं कानीनाय दद्याद्विंशं पौनर्भवाय एकोनविंशं द्व्यामुष्यायणाय अष्टादशं क्षेत्रजाय स
प्तदशं पुत्रिकापुत्राय इतरान् औरसाय पुत्राय दद्युरिति। एतौ च न्यूनाधिकौ भागावौरसात् न्यूनाधिक
गुणवशाद्व्यवस्थाप्यौ। अत्यंतगुणवत्त्वे पंचमोंऽशः क्षेत्रजाद्याः सुताश्चान्ये पंचषट्सप्तभागिन इति वार्हस्पत्यात
अत्यंतनिर्गुणत्वे तु भरणमात्रमित्युक्तमेव। यदा तु विशिष्टजन्मनाश्रेयस्त्वं तदाक्रमविशेषं विशेषं चाह
बृहस्पतिर्देवलौ। एक एवौरसः पित्र्ये धने स्वामी प्रकीर्तितः। तत्तुल्या पुत्रिका प्रोक्ता द्वावेता तु समौ। स्मृतौ
दत्तोऽपविद्धश्च क्रीतः शौद्रस्तथैव च। जातिशुद्धाः कर्मशुद्धा मध्यमास्ते सुताः स्मृताः। क्षेत्रजो गर्हितः सद्भिस्तथा पौ
नर्भवः सुतः। कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च। विशेषश्चा पुत्राणां मातृपूर्वाद्विशिष्यते। तेषां सव
र्णा ये पुत्रास्ते तृतीयांशभागिनः। हीनास्तमुपजीवेयुर्ग्रासाच्छादनभाजना इति। अयमभिसंधिः। आनुपू

र्थं प्रत्यासत्तिक्रमस्तस्माद्विशेषोजन्मादिशुद्धिर्विशिष्टपतितापतितोत्पन्नयोः पुत्रयोः पौत्रयोर्वा तुल्यायामपि
प्रत्यासत्तौ विशुद्धोत्पन्नस्यैव पैत्रे पैतामहे वा धनेधिकारदर्शनात् । एवं प्रत्यासत्तिविप्रकर्षे पितृभ्रातृपुत्रयो
स्तथाविधयोः औरसपुत्रस्यैव पितृव्यधनेधिकारः समर्थ्यते प्रत्यासत्त्या धनाधिकारवादिभिरपि । यद्येवं तर्हि स्मृलो
केपि द्वादशपुत्रेषु तन्न्यायसंभवाद्दास्यां प्रत्यासत्तिरीदृशविशुद्धजन्मनैव धनाधिकारः सिध्यतु । स्यादेवं यदि पौ
त्रामप्रयोजकप्रत्यासत्तिमात्रेणैव धनाधिकारः कल्प्येत । अस्ति तु तत्रापि पूर्वाभावे परः पर इति श्रौतक्रमविधायकं
वचनं । तस्मान्मूलोक्तवार्हस्पत्ययोर्द्वयोरपि क्रमयोः श्रौतत्वाद्विकल्प एव साधुर्नोपपद्यते द्वयमिश्रीकृत्य विषय
व्यवस्था । औरससमवाये सगुणसवर्णविषयमिदं । निर्गुणास्तु सवर्णाश्चतुर्थांशभागिनः । उत्पन्ने त्वौरसे पु
त्रे चतुर्थांशहराः सुताः । सवर्णाः असवर्णास्तु ग्रासाच्छादनभाजना इति कात्यायनस्मरणात् । औरसत्वेन
पुत्रिकापि गृह्यते । एतेन तस्मिंश्चेत्प्रतिगृहीते औरस उत्पद्येत चतुर्थभागभागी स्याद्दत्तक इति वासिष्ठं
व्याख्यातं । द्व्यामुष्यायणभागे विशेषमाह योगीश्वरः । अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः । उभ
योरप्यसौ रिक्थी पिंडदाता च धर्मत इति । यदा तु परस्परसंविदा द्व्यामुष्यायण उत्पन्ने बीजिक्षेत्रिणोरन्य

133

तरस्यौरस उत्पद्येत तदा स्वस्वपितृधनहरत्वमेवोभयोर्न तु शह्यहारित्वं द्व्यामुष्यायणस्येत्याह मनुः। यद्ये
कारिक्थिनौ स्यातामौरसदत्तजौ सुतौ। यद्यस्य पैतृकं रिक्थं सतगृह्णीत नेतर इति। विभूयादित्यनेनेतर
इति। विभूयादित्यनेनेतरपरिसंख्याप्राप्तावपवादमाह॥ ॥ अनूढानां स्ववित्तानुरूपेण संस्कारं कुर्यात्।
॥३१॥ सर्पूर्वैः पूर्वैः औरसादिरन्येषामौरसानामनौरसानां चानूढानां संस्कृतानां स्ववित्तानुरूपेण
संस्कारं जातकर्मादि विवाहान्तं कुर्यात्। यद्यपि प्रक्रमबलादनौरसानामेव भरणवत्संस्कारोपिगम
म्यते। तथापि कैमुतिकन्यायेनौरसेष्वप्यसौ सिध्यतीति ज्ञेयं। तेन भरणमपि यावद्दशप्रमाणम
र्थसिद्धमेव। यद्यप्यनूढानामित्युपक्रमस्यासंजातविरोधित्वेन बलवत्वादुपसंहारस्थं संस्कारपदं
विवाहपरमेव युक्तं यतो वेदवाप्रायदर्शनादितिन्यायात्तथाप्यसंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्व
संस्कृतैरिति याज्ञवल्क्यवचनेनोपक्रमोपसंहारयोरेकरूपेणैकवाक्यतयाऽस्यापि तदर्थपरत्वमेव युक्त
मिति। भ्रात्रुपक्रमे स्ववित्तानुरूपेणेति वदता भगिनीसंस्कारे विशेषो दर्शितः। सवानूढास्त्वडुहि

134

तरइतितत्रवक्ष्यते।यदुक्तं।पूर्वःपूर्वःश्रेयानुदायहरस्तस्यापवादमाह॥ ॥पतितःक्लीबोचिकित्स्यरोगविक
लास्त्वभागहारिणः॥३२॥ ॥पतितोमहापातकादिना।क्लीबोऽनपुंसकोजात्याविकारेणवा।अचिकित्स्यरोगविक
भगंदराद्यग्रस्तोविकलइन्द्रियैरंधबधिरविग्रमूककुष्ठ्युन्मत्तकुणिपंग्वादिः।तुशब्दादाश्रमांतरगतादीनांग्रहणं।
एतेभागहारिणोनभवंति।यथाहवसिष्ठः।अनंशास्त्वाश्रमांतरगताइति।नारदोपि।पितृद्विट्पतितःषंढोयश्च
स्यादौपपातिकः।औरसानपिनैतेंऽशंलभेरन्क्षेत्रजाःकुतइति।मनुरेवलो ।सर्वएवविकर्मस्थानार्हंतिभ्रात
रोधनं।मृतेनपितरिक्लीबःकुष्ठ्युन्मत्तजडांधकाः।पतितःपतितापत्यंलिंगीदायांशभागिनः।पतितादिषुचोद्देश्य
गतत्वाल्लिंगमविवक्षितं।तेनचपत्नीदुहितृमात्रादीनांतथात्वेनिरंशत्वंसिद्ध्यति।भागाभावेकथमेषांजीवन
मित्यतआह॥ ॥रिक्थग्राहिभिस्तेभर्तव्याः॥३३॥ ॥येरिक्थग्रहणयोग्याःपुत्रादयोवक्ष्यमाणास्तैस्तेक्लीबादयो
भर्तव्याः।पतितस्यतुप्रायश्चित्तार्हतायांतत्कारयित्वांशोदेयोऽनर्हतायांपरित्यागएवनतुभरणं।अतीतव्यवहा
रान्ग्रासाच्छादनैर्बिभृयुःपतितज्ञातवर्जमितिबौधायनस्मरणात्।अन्येषांतुभरणेपातित्यं।सर्वेषामपितुन्या
य्यंदातुंशक्त्यामनीषिणा।ग्रासाच्छादनमत्यंतंपतितोह्यददद्भवेदितिमनुस्मरणात्।अत्यंतंयावज्जीवं।भेषजादिना

क्लीबत्वादेरप्यपगमे भागप्राप्तिरस्त्येव अनंशत्वनिमित्तापगमात्। क्लीबादीनामनंशत्वात्तत्पुत्राणामप्यनंशत्वप्रा
प्तावपवादमाह॥ ॥तेषां चौरसाः पुत्रा भागहारिणः॥ ३४॥ ॥तेषां क्लीबादीनामौरसाः पुत्रा भागं लभंते। चकारा
त्क्षेत्रजग्रहणं। औरसाः क्षेत्रजास्त्वेषां निर्दोषा भागहारिण इति योगिस्मरणात्। तत्र क्लीबस्य क्षेत्रजोऽन्येषामौरस
इति व्यवस्था जातिक्लीबे पुत्रोत्पत्त्यनंतरं रोगादिना क्लैब्योत्पत्तौ तु क्लीबस्याप्यौरससंभवात्तेषामौरसा इत्यविशे
षेणोपन्यासः। सक्षेत्रजग्रहणमितरपुत्रव्युदासार्थं। यत्तु देवलीयं तत्सुताः पितृदायांशं लभेरन्दोषवर्जिता
इति तत्सामान्योपादानं नत्वौरसक्षेत्रजपरमेवोपसंहारन्यायात्। पुत्रग्रहणात्पत्नीदुहित्रोर्भरणमेव नतु
भागहारित्वमित्युक्तं भवति। यथाह योगीश्वरः। सुताश्चैषां प्रभर्तव्या यावद्वै भर्तृसात्कृताः। अपुत्रा योषित
श्चैषां भर्तव्याः साधुवृत्तयः। निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव चेति। तेषामित्यनेन पतितादीनां स
र्वेषां प्राप्तावपवादमाह॥ ॥न तु पतितस्य॥ ३५॥ ॥पतितस्य त्वौरसा अपि पातित्यावतोत्पन्नाः पुत्रा न भागहा
रिणः। तेषामपि पतितत्वात्। यथाह वसिष्ठः। पतितोत्पन्नः पतितो भवतीत्याहुरन्यत्र स्त्रिया इति। कुतः पतितो
त्पन्नाः पतिता इत्यत आह॥ ॥पतनीये कर्मणि कृते त्वनंतरोत्पन्नाः॥ ३६॥ ॥ब्रह्महत्यादिपतनीयकर्मकरणानंत

रमनपक्त एवपातित्येयेउत्पन्नाःपुत्रास्तेपतितोत्पन्नाःपतितानतुपातित्यात्पूर्वमपनीतेवापातित्येयेउत्पन्नास्तेपतिताइ
तितेनचपतिताइतिचस्योत्पन्नाःपतिताइत्यर्थःसिद्धः।एतेनपतितोत्पन्नःपतितोइतिवासिष्ठंव्याख्यातं।यद्वा।पतितस्यौ
रसाःपुत्रानभागहारिणःतर्हिकेभागहारिणइत्यतआह।पत्नीनीयइतिपत्नीयेकर्मणिकृतेपातित्यावस्थायांतुनो
साभागहारिणःकिंत्वनंतरोत्पन्नाः।अनंतरोव्यवहितःकनिष्ठोज्येष्ठोवाभ्रातातदभावेश्वर्वोक्तःसपिंडादिर्वातेन
येउत्पन्नाःक्षेत्रजाइतियावत्तेतदीयंभागंलभंते।शुद्धावस्थोत्पन्नःरसाभावेतत्सद्भावेतुपातित्यावस्थोत्पन्नौरस
वत्पातित्यावस्थोत्पन्नःक्षेत्रजोपिनलभतएव।यदुक्तंयत्रक्वचनोत्पादितस्त्वदायहरइति।तस्यक्वचिदपवादमाह॥ ॥
प्रतिलोमासुस्त्रीषुचोत्पन्नाश्चाभागिनः॥३७॥ ॥शूद्रविट्क्षत्रियाणांदेश्यात्क्षत्रियाब्राह्मणयः प्रतिलोमास्तासुवैश्या
दिस्त्रीषुशूद्रादिभ्यउत्पन्नाआयोगवादयोवक्ष्यमाणाःशूद्रादिभ्यःपित्रादिभ्योभागंनलभंते।यत्तुशूद्रापुत्रवत्प्र
तिलोमास्त्वितिगौतमीयंतच्छूद्रापुत्रोप्यनपत्यस्यशुश्रूषुश्चेल्लभेतवृत्तिमूलमंतेवासिविधिनेत्युपक्रांतातिदेशा
त्सुश्रूषादिगुणोत्कृष्टप्रतिलोमजविषयं।चकारादक्रमोढादीनांग्रहणं।यथाहकात्यायनः।अक्रमोढासुतश्चै
वसगोत्राद्यश्चजायते।प्रव्रज्यावसितश्चैवनरिक्थंतेषुचार्हति।अक्रमोढात्वसवर्णाब्राह्मणसवर्णासुतस्तत्रक्यभा

वि.टी.१५
१५९

क्तो यथाह वसिष्ठः। अक्रमोढासुतस्त्वृक्थी सवर्णश्च यदा पितुरिति। तथा प्रतिलोमप्रसूता दुत्पन्न औरसोऽपि
न दायभाक्। प्रतिलोमप्रसूतायास्तस्याः पुत्रो न ऋक्थभाक्। ग्रासाच्छादनमत्यन्तं देयं तद्बन्धुभिर्मतं। वंशूनाम
पलाभे तु पित्र्यं धनमवाप्नुयात्। अपित्र्यं तद्धनं प्रादपनीयं न वा। धवा इति तस्यैव स्मरणात्। अत्यन्तं यावज्जीवं पि
त्र्यं पितुपार्जितं। अपित्र्यं पितृव्यनुपार्जितं किन्तु पुत्रस्य पितृव्यादेर्लब्धं तद्दानं बवाएवाप्नुयुर्न तु स्वेदद्युरित्यर्थः॥
द्वितीयप्रकार पिण्डानधिकारस्य सुखयार्थः। तत्राप्यनुपदमेव वक्ष्यते। इदं दायभागित्वं सादृशीत्यत्र प्र
तिलोमजानामेतनप्रतिलोमजजातिमात्रस्य तस्य स्वस्वपितृदायहरणस्य वक्ष्यमाणत्वात्। न च स्कन्दोला वादि
वत्सूतादीनामनंशत्वेन तत्पुत्राणां क्लीबादिपुत्रवद्दायांशभागित्वं स्यादित्यत आह॥ ॥ तत्पुत्राः पैतामहेष्वर्थे॥ ३५
॥ ॥ तेषां प्रतिलोमासु जातानां सूतादीनां ये पुत्रास्ते पितामहद्रव्यार्थे तस्मिन्नप्यभागिनः। तस्मिन्न
प्यभागिनः तस्मात्प्रतिलोमासु जातानां पुत्राणां पौत्राणां च न तद्धनभाक्त्वमिति सिद्धान्त ईकथं ते जीवेयु
रित्यत आह॥ ॥ अंशग्राहिभिस्तं भरणीयाः॥ ३९॥ ॥ बहूनां विभज्यार्थग्राहित्वे सर्वेषां भरणकर्तृता
बोधनायांशग्र्यपदेशः। अन्यथा योयस्य ऋक्थं गृह्णीयात्स तान्बिभृयादित्यर्थसिद्धमेव। सिद्धप्रसंगात्तु

१५

१३

ल्ययोगहेमस्यापिण्डस्यापिनिर्णयमाह ॥ ॥यश्चांशार्थहरः सपिण्डदायी ॥८०॥ ॥योयस्यार्थहस्य त्वेन
गृह्णीयात्स तस्मै पिं श्राद्धं च दद्यात् । द्वादशविधपुत्राभिप्रायमेतत् तदुपक्रमे गौणपिण्डदोशाहृस्ये षांपूर्वाभावे परः पर
इति योगिस्मरणात् । पुत्राभावे तु धनग्रहणेन श्राद्धाधिकारं बोधयितुं सामान्येनायमुपदेशः । योयतश्चाददीत
स तस्मै श्राद्धं कुर्यात् पिण्डं च त्रिपुरुषं दद्यादिति शंखस्मरणात् । तस्य क्वचिदपवादमाह ॥ ॥एकोढानामप्येक
स्याः पुत्रः सर्वासां पुत्र एव ॥८१॥ एकेन पुंसोढानां स्त्रीणामपुत्राणामप्येकस्या याः सपत्न्याः यः पुत्रः स सर्वासा
मपि पुत्रः पुत्रकार्यकारी । अयमर्थः । मातृधनं दुहितृकामी तिवक्ष्यति पुत्रः श्राद्धाधिकारी पुत्र इति वत तत्र
पुत्राभावे धनग्रहणनिमित्तको मातृश्राद्धाधिकारो दुहितॄणां प्राप्तस्तं सपत्नीपुत्रे विधातुं पुत्रत्वेनास्य व्यप
देश इति । एवकारो न तत्पुत्रीकरणं व्यावर्तयति । यथा पत्न्यवयवा स्वः क्षेत्रजो भर्तुः पुत्रस्तथा भर्त्रवयवा स्वः
सपत्नीपुत्रः पत्न्याः दंपत्योरन्यतरावयवान्वयेनैव पुत्रत्वसिद्धौ पुत्रीकरणानर्थक्यात् । यत्तु वृहस्पतिना
यद्येकजाता वहवो भ्रातरस्तु सहोदराः । एकस्यापि सुते जाते सर्वे ते पुत्रिणः स्मृताः । वह्वीनामेकप
त्नीनामेष एव विधिः स्मृतः । एका चेत्पुत्रिणी तासां सर्वासां पिण्डदस्तु सः इति धर्मातिदेशः सा

पत्नेभिहितः सोपिप्रतिनिमित्तविषयो न पुत्रीकरणविषयस्तस्य प्राप्तत्वात् । सपत्नीन्यायं भ्रातृष्वप्यतिदिश
ति । भ्रातॄणामेकजातानां वा ॥ ७३ ॥ एकजाताः सोदरास्तेषां भ्रातॄणामेकस्य भ्रातुर्यः पुत्रः स सर्वेषां पुत्रः पुत्रका
र्यकारी । अयमर्थः । अपुत्रभ्रातृणां पत्न्यभिगामीति वक्ष्यति तेन पत्न्याः प्राप्तपतिश्राद्धाधिकारं भ्रातृपुत्रे विधातुं
तस्य पुत्रत्वव्यपदेश इति । अत एव वृहस्पतिः । अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भवेत् । स एव तस्य कुर्वी
त पिण्डदानोदकक्रियां । पार्वणं तेन कार्यं स्यात्पुत्रवद्भ्रातृजेन तु । पितृस्थाने तु तं कृत्वा शेषान्पूर्ववदुच्चरेदिति
तथा मार्कंडेयोपि । पुत्रः पौत्रः प्रपौत्रश्च तद्वद्वा भ्रातृसंततिः । सपिण्डसंततिर्वापि क्रियार्हा नृप जायते ।
सर्वाभावे स्त्रियः कुर्युः स्वभर्तॄणाममंत्रकमिति । सर्वाभावे स्त्रीणामधिकारमाह । एतेन अपुत्राशयनं भर्तुः
पालयंती व्रते स्थिता । पत्न्येव दद्यात्तत्पिंडं कृत्स्नमंशं लभेत चेत्यपि वृद्धमनुवाक्यं व्याख्यातं । सर्वाभा
व एव तदधिकारबोधनात् । यद्वा अपुत्रेण पुत्रप्रतिनिधौ क्रियमाणे भ्रातृपुत्र एवादौ प्रतिनिधिः का
र्य इत्येवमर्थमिदं वाक्यं व्याख्येयं यथाश्रुतार्थानिर्वाहाभावात् । तथाहि । न तावत्सुताभावे दाया
धिकारो भ्रातृपुत्रस्य पत्नीदुहितरश्चैव पितरौ भ्रातरस्तथा ॥ तत्सुता इति पवचस्यानपासे -

तेनापि पिण्डाधिकारः। पत्नी भ्राता च तज्जश्चेति तृतीयस्थानपाठात्। तस्माद्यथोक्त एवार्थोऽस्य सम्यक्। अयं चापरो विशेषो यदेकोऽप्यसावनेकैर्भ्रातृभिः पुत्री कार्य इति। मनुनाऽभ्रातॄणामेकश्चेत्पुत्रवान् भवेत्। सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीदित्यत्र तेन पुत्रेणेत्येकत्वनिर्देशात्। कालिकापुराणेऽप्येकत्वनिर्देशात्। उभाभ्यामपि वेतालभैरवाभ्याम्। एकमेव करिष्यावोऽनंदिनं वेत्यभाषितौ। ततः कदाचिद्वैश्यां भैरवो मैथुनं गतः। तस्यां स जनयामास सुवेशं नाम पुत्रकम्। तमेव चक्रे तनयं वेतालोऽपि स्वकं सुतमित्यादिना एकस्यैव सुवेशस्य पुत्रीकरणलिङ्गदर्शनाच्च। विस्तृतं चैतत्पराशरस्मृतिविवृतौ विद्वन्मनोहरायां दत्तकमीमांसायां चास्माभिरिति नेह प्रतन्यते। यश्चार्थहरः स पिण्डदायीत्यस्यापवादान्तरमाह॥ ॥पुत्रः पितृवित्तालाभेऽपि पिण्डं दद्यात्॥४३॥ ॥पितुर्निर्धनत्वेन स्वस्य निस्पृहत्वेन वा पुत्रः पितृधनं न लभते सोऽपि पित्रे पिण्डं दद्यात्। अनेन पुत्रस्य पुत्रत्वमेव पिण्डदाने प्रयोजकं न धनग्रहणमन्येषां तु संबंधसाम्येऽप्यपवादाभावे तदेव प्रयोजकमित्युक्तम्। पुत्रपदनिर्वचनव्याजेन तत्रोपपत्तिमाह॥ ॥पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः। तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा॥४४॥ ॥मृतस्य प्रेतावस्थायां कृतपापजनितदुःखानुभवः पुन्नामा नरकस्ततः पिण्डोदकदानादि-

नाम्नुतोयस्मात्पितरंत्रायते तस्मात्पुत्र इति स्वयमेव स्वयंभुवादेन प्रोक्तः। अनेन पुत्रात्पादने पुन्नरकप्राप्तिर्दर्शिता।
तेन पुत्रोत्पादनं विहितं भविष्यति। तथा च स्मृतिः नापुत्रस्य लोकोऽस्तीति। नरकत्राणं च पिंडदानादिनैव सु
तेः स्मर्यते। जीवतो वाक्यकरणात् मृताहे भूरिभोजनात्। गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य लोकोऽस्ती
ति त्रिभिः पुत्रस्य पुत्रतेति। तमेवार्थमुदाहरति॥ ॥ऋणमस्मिन्संनयत्यमृतत्वं च गच्छति। पिता पुत्रस्य
जातस्य पश्येच्चेज्जीवतो मुखं॥४५॥ ॥जातस्य पुत्रस्य जीवतो मुखं यदि पिता पश्येत् तदास्मिन्पुत्रे स्वीयं पित्र्यमृ
णं संनयति संक्रामयति तावतैव स्वयं पितृऋणान्मुच्यत इति यावत्। यथाह वसिष्ठः। विज्ञायते हि त्रिभिरृणैरृ
णवान् ब्राह्मणो जायत इति। यज्ञेन देवेभ्यः प्रजया पितृभ्यो ब्रह्मचर्येण ऋषिभ्य इत्येष वा अनृणो यज्वा यः पुत्री ब्र
ह्मचर्यवानिति। मृतश्चामृतत्वं मोक्षं च गच्छति प्रतिबंधकीभूतस्यापगमात् मोक्षाधिकारी भवति। प्रजाभिर
ग्नेऽमृतत्वमश्यामित्यपि निगमो भवतीति वसिष्ठस्मरणात्। वंशकरपुत्रोत्पत्तौ फलविशेषमाह॥ ॥पुत्रेण लो
कान्जयति पौत्रेणानंत्यमश्नुते। अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपं॥४६॥ ॥पुत्रेण स्वर्गादिलोकान्जयति पौत्रेणान
न्त्यमश्नुते। अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति। दाय। भागप्रकरणोचास्याभिधानं पत्न्यादिसद्भावे पि पुत्रस्य तद

पुनरावृत्तिरहितंस्थाने॥जगत्परायण॥ए९॥१००॥जगतांचराचराणांपरमयनेस्थाने॥ ॥नमोनमस्
ते ९६॥१०१॥ नम्यंतइतिनमसोब्रह्मादयस्तैर्नम्यतइतिनमोनमः कर्मणिपुनिरुक्तेसाधुः इतिप्रतिस
मासो॥भगवन्सुखप्रद॥१०२॥भगवन्सुखात्स्वजिज्ञासितधर्मकर्णेनेन हर्षकामाः तएव वसुंधराधर्मस
पंधनहर्त्ताः तएव पृथिवीसर्वापद्भ्यामहतीप्रसन्नेनचेतसा एवंप्रणवत्यध्यायोपदेशरमहायुसं
भगवंतंप्रणवस्तैवनामभिःस्तुत्वा भगवतीक्ष्मासेसुखंयथाभवतितथावक्ष्यमाणंसुवाच॥ ॥इतिश्री
धर्माधिकारिरामपंडितात्मजनंदपंडितकृतौ विष्णुस्मृतिविवृतौ श्रीमत्यामष्टनवतितमोऽध्यायः॥९८॥
॥ ॥एवंध्यायतेप्रसन्नोलक्ष्मीस्तुतिंनवनवतितमेनावतारयति॥ ॥दृष्ट्वाश्रियंदेवदेवस्यविष्णोर्गृ
हीतपादांतपसाज्वलंतीं॥सुतप्तजाम्बूनदचारुवर्णांपद्मेहृदेवीवसुधाप्रहृष्टा॥१॥ ॥अथयेत्येतांसर्वंइन रम०
इतिश्रीस्नांदेवदेवस्यविष्णोर्गृहीतपादांसंवाहितचरणकमलांभगवतोयावद्योगनिद्रमनशनरूपेण

सहनलीलो जगत्कस्येति॥ कृष्णः॥५५०॥५८॥ कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः। विष्णुसंज्ञ-
द्येयोगाच्च कृष्णो भवति शाश्वत इति व्यासः। कर्षतीति कृष्ण इति वा कृषामि पृथिवीं पार्थं भूत्वा कार्ष्णाय-
सो हलः। कृष्णो वर्णश्च एव मे यस्मात्तस्मान्मां कृष्णं विदुर्जना इति स्मरणात्॥ पुंडरीकाक्षः॥५५१॥५९॥ हृदयपुं-
डरीकमक्षुते व्याप्नोतीति तत्रोपलक्ष्यत इति वा पुंडरीकवदक्षिणी यस्येति वा पुंडरीकस्थाने समर्पितं ति-
वा यान्ति येनासाविति वा॥ नारायणः॥५५२॥६०॥ नरश्चात्मा नरतीति नरः प्रोक्तः परमात्मा सनातन इति वा
तत्स्मरणात्। तस्माज्जातान्याकाशादीनि कार्याणि नाराणि तान्ययनं स्थानं यस्य यच्च किंचिज्जगत्सर्वं
दृश्यते श्रूयतेपि वा। अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इति श्रुतेः। नराज्जातानि नाराणीति त-
त्त्वविदुः। तान्येव चायनं तस्य तेन नारायणः स्मृत इति स्मृतेश्च। आपो नारा इति प्रोक्ता आपो वै नरसून-
वः। अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति मानवाः॥ परायणः॥५५३॥६१॥ परं तत्त्वं श्रेष्ठमयन-

तिश्रयो॥चंडालात्पांडुसोपाकस्त्वक्सारव्यवहारवान्॥आहिंडको निषादेन वैदेह्यामेव जायते॥
चंडालेन तु सोपाको मूलव्यसनवृत्तिमान्॥पुल्कस्यां जायते पापः सदा सज्जनवर्जितः॥निषादस्त्री च चंडालात्पुत्रमंत्या
वसायिनं॥श्मशानगोचरं सूते बाह्यानामपि गर्हितं॥श्वपाकाश्च कर्तव्या धनमेषां श्वगर्दभं॥वासांसि मृतचैलानि भिन्न
भांडेषु योजनं॥कार्ष्णायसमलंकारः परिव्रज्या च नित्यशः॥रात्रौ न विचरेयुश्च ग्रामेषु नगरेषु च॥दिवा चरेयुः कार्यार्थं चिह्नि
ता राजशासनैरिति॥श्वपाकाः संस्कृतमप्येषां पात्रमन्यैर्न प्रयोज्यं॥परिव्रज्या अटनं॥राजशासनं राजादिष्टं चिह्नंकटोक
पर्दकादिबंधनं॥तद्धर्मी नाह॥सर्वेषां च समानजातिभिर्विवाहः॥१५॥सर्वेषामायोगवादीनां प्रथमपतितसमानधर्माणा
मन्येषां च स्वस्वस्वसमानजातिधर्मैः सह विवाहादिर्व्यवहारो नोत्तमैः॥यथाह मनुः॥नैतैः समयमन्विच्छेत्पुरुषो धर्ममा
चरन्॥व्यवहारो मिथस्तेषां विवाहः सदृशैः सह॥प्रतिलोमासु स्त्रीषु चोत्पन्नानां भागिनेयस्यापवादमाह॥ ॥स्वपि
तृवित्तानुहरणं च॥१६॥ ॥सर्वेषामपि प्रतिलोमजानां स्वस्वपितृद्रव्यांशभागित्वमस्ति॥पितृपदेनैव सिद्धे स्वपदं
स्वसमानजातिधर्मपितरमाह न विजातिधर्मी तेन साक्षाद्वर्णजानां प्रतिलोमजानां न वर्णवित्तानुहरणमिति सि
ध्यति तच्चोक्तं॥यदुक्तं प्रतिलोमास्त्वार्यविगर्हिता इति तत्र विगर्हार्थं ज्ञानोपायमाह॥ ॥संकरे जातयस्त्वेताः

पितृमातृप्रदर्शिताः प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्मभिः॥१७॥ ॥या एता वर्णानां संकरे आयोग
वादयो जातयः पितृमातृभ्यां प्रदर्शिताः प्रच्छन्ना रहोत्पन्नाः प्रकाशाः प्रकटोत्पन्नाः प्रकाशाः स्वैर्वेदितव्याः शु
क्रशोणितानुयायिनो जातिधर्मस्य बलवत्वात्। यथाह मनुः। वर्णापेतमविज्ञानं रकलुषयोनिजं। पित्र्यं वा
भजते शैलं मातृं वोभयमेव वा। न कथंचन दुर्योनिः प्रकृतिं स्वां नियच्छति। तेषामदृष्टसाधनं धर्ममाह॥ ॥
ब्राह्मणार्थे वार्थे वा देहत्यागो नुपस्कृतः। स्त्रीबालाभ्युपपत्तौ च बाह्यानां सिद्धिकारणं॥१८॥ गोब्राह्मणस्त्री
बालानामन्यतरस्याभित्राणार्थमनुपस्कृतो दृष्टप्रयोजनानपेक्षः प्राणत्यागो बाह्यानां प्रतिलोमजानां सिद्धि
कारणं स्वर्गप्राप्तिहेतुर्नतन्यात् विना सामान्यधर्मात्। यथाह योगीश्वरः। अहिंसा सत्यमस्तेयं शौचमिंद्रियनि
ग्रहः। दाम जानां सिद्धिकारणं स्वर्गप्राप्तिहेतुर्नतन्यात् विना सामान्यधर्मात्। यथाह योगीश्वरः। अहिंसा सत्य
मस्तेयं शौचमिंद्रियनिग्रहः। दानं दमो दया क्षांतिः सर्वेषां साधनमिति॥ ॥इति धर्माधिकारि
विहितो श्रीमत्यां वैजयंत्यां षोडशोऽध्यायः॥ ॥एवमध्यायद्वयेन ब्रुवगोणखताभि
भत्यालद्वयितो सांप्रतं तेषां विभागं वक्तुं सप्रदर्शनप्रक्रमते। तत्र साधारणस्य धनस्य विशेषेण भजनं वि

भागःसाधारणंवानेकस्वामिकंस्वत्वंचलौकिकम।पित्रादीनांजन्मनैवउत्पन्नैवार्थेस्वामित्वाल्लभेतत्याचार्या
इतिगौतमस्मीयात्।पत्नीस्नुषादीनांतुपानिग्रहणेनपाणिग्रहणेनपाणिग्रहणेनाद्विसहत्वेकर्मसुतथाद्रव्यपरिग्रहे
ष्वेत्यापस्तंबीयात्।भ्रातृपुत्रादीनांतुस्वामिसंबंधेनअनंतरंसपिंडाद्यस्तस्यतस्यधनंभवेदितिलिंगात्।तदपिद्विवि
धंसप्रतिबंधमप्रतिबंधंच।तत्राद्यंपत्नीदुहित्रादीनांपुत्रेणप्रतिबंधात्।अंत्यंपुत्रादीनांकाचित्पुत्रेच्छयापिविभा
गात्।विशेषस्त्वसाधारणंतेनभजनंज्ञानमिश्रीवा।तत्रविद्यमानेपित्रादिधनेइदंतवेदंममेत्याकारकं।अकिंचन
तायात्वद्यारभ्ययत्त्वयातत्तवैवयन्मयार्जनीयंतन्मैवेति।एवंचासन्निहितेपिधनेज्ञानादिविशेषोविभागेसिध्यति
द्व्यपृथक्करणस्यतत्त्वेत्वसन्निहितेधनेअकिंचनतायांचविभागासिद्धेः।तदस्मिन्विभागेकर्तृकालप्रकारानाह॥
॥॥पिताचेत्पुत्रान्विभजेत्तस्यस्वेच्छास्वयमुपार्जितेर्थे॥१॥पितेतिकर्तृनिर्देशः।सचपुत्रपौत्राद्युपलक्षणं।त
स्ययथाप्रदेशंवक्ष्यतेचेदितीच्छारूपकालनिर्देशः।सचान्येषामुपलक्षणं।यथाहगौतमः।ऊर्ध्वंपितुःपुत्रा
ऋक्थंभजेन्निवृत्तेरसमातुर्जीवतिचेच्छतीति।नारदोपि।मातुर्निवृत्तेरजसिप्रत्तासुभगिनीषुच।निवृत्तेवा
पिरमणेपितर्युपरतस्पृहइति।नैमित्तिकंकालमाहशंखः।अकामेपितरिक्थविभागोवृद्धेविपरीतचेतसिदी
र्घरोगिणिचेति।रोगःक्रोधाद्युपलक्षणं।यथानारदः।व्याधितःकुपितश्चैवविषयासक्तमानसः।अन्यथाशा

स्त्रकारी च नार्हे भागे पिता प्रभुरिति। अन्यथा शास्त्रकारी विधिनिषेधातिक्रमकारी। उक्तनिमित्ताभावेन पुत्रेच्छया विषमभागः। देवलः। पितर्युपरते पुत्रा विभजेरन्धनं पितुः। अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते इति। मनुरपि अनीशास्ते हि जीवतोरिति। साहित्यमविवक्षितं। अस्वतन्त्राः पितृमन्तो मातर्यप्येवमेवेति शंखस्मरणात्। मातरि जीवंत्यां यदस्यां गतं तन्मातृधनमेव न पितृधने। अन्यथा पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेदित्यादि विरुध्येत। एवं विभागकर्तृकालयोरनेकत्वे पिता यदा तु पुत्रान्विभजेत्तदा तस्य स्वार्जितार्थविभागे स्वेच्छैव नियामिका। अयमर्थः। यदि पिता कस्यचित्पुत्रस्य गुणवत्तया बहुकुटुंबितया अशक्ततया वा किंचिदधिकं दित्सति तदा स्वेच्छया दद्यान्न पुत्रांतरसम्मत्यपेक्षा। तत्र स्वार्जितादर्थस्य कारणं विना तु न दद्यात्। जीवद्विभागे तु पिता नैकं पुत्रं विशेषयेत्। निर्भाजयेन्न चैवैकमकस्मात्कारणं विनेति कात्यायनस्मरणात्। स्वोपार्जितं पैतामहस्यापि नष्टोद्धृतस्योपलक्षणं। यथाह बृहस्पतिः। पैतामहं हृतं पित्रा स्वशक्त्या यदुपार्जितं। विद्याशौर्यादिना प्राप्तं तत्र स्वाम्यं पितुः स्मृतं। प्रदानं स्वेच्छया कुर्याद्भागं चैव ततो धनात्। तदभावे तु तनयाः समांशाः परिकीर्तिता इति। अत्रोभयत्रापि तु पत्न्यन्वितद्रव्यैः श्रमेण यदुपार्जयेदिति शेष इति वक्ष्यते। अतएव नारदः शास्त्रविषमविभागापालने पुत्रा दंड्या इत्यपाहस्तएव। समन्यूनाधिका भागाः पित्रा येषां प्रकल्पिताः। तथैव ते पालनीया विनेयास्ते स्युरन्यथेति। न चोक्ता

रवैषम्याभिप्रायमेतत् तस्यैव शास्त्रीयत्वेन तया अलंघनीयत्वौचित्यादिति वाच्यं। स्वार्जिते पितुरैच्छिकवैषम्य
स्यापि शास्त्रीयत्वेन धर्म्यत्वात्। अत एव नारदः। पित्रैव वा स्वयं पुत्रान्विभजेद्वयसि स्थितः। ज्येष्ठं श्रेष्ठविभागेन
यथा वास्य मतिर्भवेदिति शास्त्रीयोद्धारविभागादैच्छिकं वैषम्यविभागं पृथगेवाह। तस्यैव वालंघनीयतामप्याह स
एव। पित्रैव तु विभक्ता ये समन्यूनाधिकैर्धनैः। तेषां स एव धर्म्यः स्यात्सर्वस्य हि पिता प्रभुरिति। अत्र पित्रैवेत्येवका
रेण शास्त्रे नैपैच्छ्यं दर्शितं। तच्च सर्वस्य हि पिता प्रभुरित्यनेन स्वार्जितविषयं पर्यवस्यति। पितामहाद्यर्जिते पि
तुः प्रभुत्वाभावात्। न तु जीवन्पुत्रेभ्यो दायं विभजेत् सममित्यापस्तंबेन समविभागाभिधानात्कथमयमैच्छि
को विभागः प्रतिपाद्यत इति चेत्। सत्यं। तस्य सामान्यरूपत्वे स्वार्जितातिरिक्तपैतामहसंबंधिन्यानार्जि
तधनविषयत्वेनापि संभवात्। यद्वा तस्योद्धारविभागनिषेधकत्वेनैच्छिकविभागनिषेधकत्वाभावा
त्। तथा ह्यापस्तंबेनैव सममिति स्वमतमुक्त्वा ज्येष्ठो दायाद इत्येके देशविशेषे सुवर्णं कृष्णा गावः
कृष्णं भौमं ज्येष्ठस्य रथः पितुः परीभांडं च गृहे अलंकारो भार्याया ज्ञातिधनं चेत्येक इत्येकीयमतेनैवोद्धा
रविभागबाधकं चोक्तं। तदपि नित्यानुवादः मनुर्विधिमाज्ञन्यायविदः इत्यनेन निराकृतं तेनैव। एतेन कात्यायनी
यमपि पूर्वार्द्धं व्याख्यातं। उत्तरार्द्धं तु स्वेच्छाया निरंकुशत्वनिराकरणाय। यो वै भागिनं भागान्नुदते चयते वैनं सः

यदैवेनं न चयते। अयं पुत्रमथ पौत्रमिति स्मृतेरिति सर्वमनवद्यं। एतेन विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतान् न्या
नाधिकविभक्तानां धर्म्यः पितृकृतः स्मृत इति याज्ञवल्क्यवचनद्वयं व्याख्यातं। यदिच्छया विभजेत्सुतानित्यत्र
पिता सकलं द्रव्यं [illegible] विभागसमविभागविषयत्वमेव नियमितं द्वि
वृहस्पति कात्यायन नारद [illegible] द्विके विभागप्रतिपादनेन विरोधाच्चिरं [illegible]
[illegible]
[illegible]
[illegible]
[illegible] स्वार्जितद्रव्ये
न पितामहार्जिते पुत्रार्जिते वा न विषमो विभाग इत्युक्तं। अत्रैव पितामहोपात्ते जंगमे स्थावरे पि वा सममंशित्वमाख्या
तं पितुः पुत्रस्य चैवहीति हरस्य तिस्मरणात्। आहृतामेव भक्तानां यद्युत्थानं भवेत्सह। न तत्र विषमं भागं पिता दद्या
त्कथंचनेति मनुस्मरणाच्च। उत्थानं धनार्जनं सह पित्रेति वक्तव्यं। अन्यथा केवलपुत्रार्जिते उत्तेच्छयैव विभागाप
त्तेरसंगतं स्यात्। स्वेच्छोत्थनेनोद्धारविभागेन वैषम्यं नेत्युक्तं तस्य शाखायत्वेनवाछिकत्वाभावात्। स्वपदेन च पुत्रे

च्छया वैषम्यं निरस्तं। अनीशास्ते हि जीवतो रिति स्मरणात्। पितरि जीवति पुत्राणामर्थदानविसर्गाक्षेपेषु न स्वातंत्र्यमिति हारीत
स्मरणात्। अर्थो धर्मोपलक्षणं। अनर्हा एव पुत्रा अर्थे स्वातंत्र्यादिति शंखस्मरणात्। दानमदृष्टार्थं। विसर्गो वंद्यादिभ्यो दा
नमाक्षेपो धृतादिनानाशनं। अनिच्छायां तु यत एव वैषम्यं निरस्तं। पितेत्यनेन पुत्रैः पित्रर्जितस्य पितुरूर्ध्वं विभागो न वि
षम इत्युक्तं। विभजेरन् सुताः पित्रोरूर्ध्वं मृक्थमृणं सममिति योगिस्मरणात्। चेदित्यनेन व्याध्यादिग्रस्ते पितरि जीवत्यपि
पित्रर्जितस्य पुत्रैर्विभागो न विषम इत्युक्तं। विशेषाश्रवणान्न समं स्यादगुणित्वादिति न्यायात्। व्याधितः कुपितश्चैव
विषयासक्तमानसः। अन्यथाशास्त्रकारी च न विभागे पिता प्रभुरिति स्मरणात् व्याध्याभावे पितृस्वातंत्र्यनिराकरणेनैवेच्छिक
वैषम्यनिराकरणसिद्धेः। पुत्रानित्यनेन स्वार्जितपितृकपौत्रविभागे न वैषम्यमित्युक्तं। पितृतो भागकल्पनेत्यविशेषस्मरणा
त्। अविभक्तेषु सुतेषु प्रेतेषु तत्सुतं रिक्थभागिनं कुर्वीतेति कात्यायनीयाविशेषस्मरणात्। पुत्रविभागेपि विशेषमाह योगी
श्वरः। शक्तस्यानीहमानस्य किंचिद्दत्वा पृथक्क्रियेति। इच्छावचनं केवलं पुत्रविभाग एव किंतु स्वविभागेपि विशेषमाह यो
गीश्वरः। स्वल्पेन वा संविभज्य भूयिष्ठमादाय वसेदिति। भूयिष्ठताया अनियमेन प्राप्तौ नियममाह बृहस्पतिः। जी
वद्विभागे तु पिता गृह्णीतांशद्वयं स्वयमिति। अंशद्वयमर्धस्याप्युपलक्षणं। यथाह कात्यायनः। द्व्यंशहरोर्धहरो वा पुत्रवित्तार्ज
नात्पिता। इति पुत्रस्य वित्तं चेति पुत्रवित्ते तयोरर्जनात्। पुत्रश्चात्र औरस एव। स यद्येकपुत्रः स्याद् द्वौ भागावात्मनः कुर्यादिति

२१

वि॰टी॰२
१६९

शंखलिखितस्मरणात्। एको मुख्यः पुत्रो यस्येति औरसपुत्रवानित्यर्थः। एके मुख्यान्यकेवला इति त्रिकांडीस्मरणा
त्। इयं च द्व्यंशकल्पना औरसपुत्रनामेव विभागे। अन्य विभागे तु ततोप्यधिकेन स्वांशकल्पना तेषां चतुरादिभागभा
गित्वस्योक्तत्वात्। इयं च द्व्यंशकल्पना औरसपुत्राणामेव विभागे। अन्य विभागे तु ततोप्यधिकेन स्वांशाक
ल्पना तेषां चतुरादिभागभागित्वस्योक्तत्वात्। विशेषांतरमप्याहतुः। शंखलिखितौ। यद्युपद्रव्ये तु न स्ते
भ्योपि गृह्णीयात् स्त्रीणां स्त्रविभृयादिति। उपद्रव्ये तु मध्याभावेन क्लिश्यते तदा तेभ्यः पुत्रेभ्यो जीवनं गृह्णीयात्।
स्त्रीणां स्वपुत्राणां पिता विभृयादित्यर्थः। मातृकवचस्याति। भ्रातृविभागे ज्येष्ठस्यापि द्व्यंशमाह वसिष्ठः। येन चै
षां स्वयमुपार्जितं स्यात् स द्व्यंशमेव लभेतेति। अर्थ इति साभान्यो गदाने द्विजंगमस्यैवैच्छिको विभागो न स्थावर
स्य। पितृप्रसादाद्भुज्यंते वस्त्राण्याभरणानि च। स्थावरं तु न भुज्येत प्रसादे सति पैतृक इति नारदस्मरणात्। ऐच्छि
क विभागस्यापि प्रसादहेतुकत्वात् न चेदं पैतामहस्थावरविषयं। स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितं। असंभू
य सुतान् सर्वान् न दानं न च विक्रय इति स्मरणात्। अस्यापवादमाहतुः शंखलिखितौ। गृहं यवीयसोन्यत्र पितुरव
स्थानात्। वसिष्ठोपि। अजावयो गृहे च कनिष्ठस्येति। यद्येकमेव गृहं विभागाय योग्यं च तदा कनिष्ठायैव तद्देयमि १६९

त्यर्थः। परंतुपित्र्यवस्थितिगृहंविनातज्ज्येष्ठस्यैवेति। यथाहहारीतः। ज्येष्ठायदद्युर्देवताःगृहंचेतरेनिष्क्रमंकुर्युरितिदेवताः
पितृपूज्यविद्यादिप्रतिमाः। गृहंपैतृकं। निष्क्रमंकुर्युरिति। आत्मवासार्थंगृहांतराणिकुर्युरित्यर्थः। दक्षिणांशंश्र॰घाया
नुपूर्व्येमितरेषामिति। दक्षिणांशं। इतरेषांआनुपूर्व्येउदक्संस्थता। दिक्क्रमःभागकल्पनावित्यर्थः। दक्षिणंश्रेष्ठमंशमितिक
ल्पतरुः। अनेनबहुषुगृहेषुपैत्रंज्येष्ठस्यैवेत्यर्थःसिद्धमेवेत्यलंबहुना। अथपैतामहद्रव्यविभागमाह॥ ॥पैतामहे
त्वर्थेपितृपुत्रयोस्तुल्यंस्वामित्वं॥२॥ ॥पितामहेनार्जितःपैतामहस्तस्मिन्नर्थेस्थावरेजंगमेवापितृपुत्रयोस्तुल्यं
स्वामित्वं। यथाहयोगीश्वरः। भूर्यापितामहोपात्तानिबंधोद्रव्यमेववा। तत्रस्यात्सदृशंस्वाम्यंपितुःपुत्रस्यचैवहीति। निबं
धोनामैकस्यान्नादिभारस्येयदन्नाद्यस्मैदेयमितिराजदत्तोवृत्तिविशेषः। पैतामहइत्यनेनप्रपितामहादिक्रमागते
पितुल्यस्वाम्येनसमांशित्वमनिच्छत्यइति। क्रमोत्रप्रपितामपितामहपितॄणांविवक्षितः। प्रपोत्रपर्यंतंदायसंबंध
स्मरणात्। यथाहदेवलः। अविभक्ताविभक्तानांकुल्यानांवसतांसह। भूयोदायविभागःस्यादाचतुर्थादितिस्थि
तिः। तावत्कुल्याःसपिण्डाःस्युःपिण्डभेदस्ततःपरं। समभिछेतिपिण्डानांदायार्थस्यविभाजनं। विधिरेषसवर्णानांच
हनांसमुदाहृतः। एकएवसवर्णःस्याद्यत्रनविभज्यतइति। अयमर्थः। अविक्तानांविभक्तानांवासहवसतांकु

ल्यानां भेदाय विभागः अथ संभूयो वा सत्त्वाचतुर्थाच्चतुर्थपुरुषमपि व्याप्य स्यादिति स्थितिर्मर्यादा तत्र हेतुम
हातावदिति । तावच्चतुर्थपुरुषपर्यंतमेव कुल्याः सपिंडा एकपिंडदानक्रियान्वयिनो भवंति त्रयाणां संप्रद
नेता चतुर्थस्त्र च दातृत्वात् तद्व्यतिरेकमाह ॥ तत अनुर्भोनां पंचमस्य पिंडभेदः । पिंडदानक्रियान्वयत्वेन
न दायभागित्वमित्यर्थः ॥ नियममाह । पिंडानां पिंडसंबंधानां सममन्वयव्यतिरेकनियतं दायविभाज
नमिति । अपरमपि विधिः सवर्णानामौरसानां नासवर्णाकानीनादीनां चेति । अयमभिसंधिः । येषामे
क पिंडदानक्रियान्वय [illegible] भवति मतुरपि [illegible] उदकं कार्यं त्रिषु पिंडः प्रवर्त्तंते । चतुर्थः
संप्रदाता तेषां पंचमो नोपपद्यते । अयमपि विधिः सपिंडाद्यसत्त्वासत्त्वे धनं भवेत् । अतऊर्ध्वं सकुल्यः स्यात्
वाचार्यः शिष्यः एव चेति । चतुर्णां सपिंडत्वात्त्वाम्यभावेन दीयं दायं पुत्रपौत्रप्रपौत्राः पूर्वपूर्वाभावे गृह्णीयुः
न पंचमस्य संतत्यभावे [illegible] पितामहप्रपितामहसंतानो गृह्णीयात् पूर्वपूर्वाभावे सपिंडाभावे तु
कुल्यो वृद्धप्रपितामहसंतानं गृह्णीयादित्यर्थः । षड्कृतं पंचमो न दायभागिति तत्पिंडं गमनविषयमेव
स्यावरं तु पंचमादिरपि लभत एवाय याहवृहस्पतिः । तृतीयः पंचमश्चैव सप्तमो वापियो भवेत् । ज

न्मनापरिज्ञानेलभतांस्तत्रभागतं॥यंपरंपरयामौलाःसामंताःस्वामिनंविदुः।तदन्वयस्यागतस्यदातव्यागोत्रजैर्म
हीति।चकारेणवाशब्देनचचतुर्थषष्ठयोर्ग्रहणं।महीतिद्रव्यादिस्थावरमात्रोपलक्षणं।पैतामहेपिपित्रानष्टेछ्रानपि
तृपुत्रयोस्तुल्यंस्वामित्वंकिंतुपितुरेवेतिवक्ष्यति।जीवतितुपितृपुत्रयोरुभयोरप्यस्वातंत्र्यमित्युक्तमेव।पितामहस्या
पिमणिमुक्तादिषुस्वातंत्र्येपिस्थावरेपुत्रपौत्राणांपारतंत्र्यमित्युक्तमेव।पितामहस्यापिमणिमुक्तादिषुस्वातंत्र्येपिस्था
वरेपुत्रपौत्रपारतंत्र्यमेवमणिमुक्ताप्रवालानांसर्वस्यैवपितामहेपि।स्थावरस्यतुसर्वस्यनपितानपितामहइति
स्मरणात।पैतामहेर्थेपितृपुत्रयोःतुल्यस्वामित्वप्रतिपादनेनचसमांशित्वमुक्तंभवति।अन्यथातुल्यस्वामित्वेन
दानविक्रयादिनिषेधएवसिद्धोनतुसमांशित्वं।अतएवबृहस्पतिः।द्रव्येपितामहोपात्तेजंगमेस्थावरेपिवा।सममंशि
त्वमाख्यातंपितुःपुत्रस्यचैवही॥ति।अथविभागानंतरोत्पन्नस्यविभागमाह॥ ॥पितृविभक्तानंतरोत्पन्नस्यभागं
दद्युः॥३॥ ॥येपित्रासमेर्विषमेर्वाअंशैर्विभक्तास्तेविभागकालेमातुरस्पष्टगर्भतयाविभागानंतरोत्पन्नस्यभ्रा
तुःस्वस्वेभ्योंशेभ्यःआयव्ययविशोधितेभ्यःस्वांशानुरूपंकिंचित्किंचिदुद्धृत्यस्वसमीकृतंभागंदद्युः।यथाहयो
गीश्वरः।दृश्याद्वातद्विभागःस्यादायव्ययविशोधितादिति।दृश्याद्वात्तद्विभागात्तदूर्ध्वमायंदृष्ट्वादिव्ययंप्रवे
शव्ययंपित्र्याणिपाकरणादिद्रव्यंचापनीयावशिष्टाद्विभक्तजभागंकल्पयेयुरित्यर्थः।इदमपिपितृपितृसंसृष्ट

आरब्धनाभावे तत्सत्वे तु तत एवांशकल्पना स्येति। यथाह मनुः। ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव धनं हरेत्। संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह॥ इति। पित्र्यमेवेत्येवकारेण विभक्तपुत्रांशात् न्यूनत्वेऽधिकत्वे वा विभक्तजस्तदेव लभते न तत्पूर्वजाभ्रा[illegible]कं दद्युरन्ये नैवापरयेयुः। अनीशाः पूर्वजाः पित्र्ये भ्रातृभागे विभक्तजा इति बृहस्पतिस्मरणात्। विभक्तजा इति बहुवचनाद्बहूनामपि विभक्तजानामेवमेवेति बोद्धव्यं। पित्र्ये मातापितृधने तदुहित्रभावे मातृधनं विभक्तज एवाप्नोति। मातुर्दुहितरः शेषमृणात्ताभ्य ऋते ऽन्वय इति यो [illegible] एव [illegible] भक्ते सर्वे मेदा। यद्यप्यन्वयत्वेन पूर्वजा [illegible] विभक्तज [illegible] मातरं [illegible] पित्र्यं तु तस्यैव। पुत्रैः सह विभक्तेन पित्रा यत्स्वयमर्जितं। विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृता इति बृहस्पतिस्मरणात्। अत्रार्जितमिति सामान्योपादाना[illegible]धनं चेत्युभयमपि गम्यते। यथाह स एव। यथा वने तथैव पितृदाना धान ऋयेषु च परस्परमनीशास्ते मुक्त्वा शौचोदकक्रियामिति। विशेषान्तरमाह योगीश्वरः। पितृभ्यां यस्य यद्दत्तं तत्तस्यैवेत्यपि वेष्टितद्धं पितामहेन यद्दत्तं पित्रा वा प्रीतिपूर्वकं। तस्य तन्नापहर्तव्यं मात्रा दत्तं च यद्भवेदिति व्यासस्मरणात्। पितृविभक्ता इति परस्परविभक्तानामप्युपलक्षणं। तेन पितुरूर्ध्वं परस्परविभक्ता

अपि भ्रातरो विभक्तजस्य भ्रातुर्यथाक्रमं संदद्युः। विभागानंतरोत्पन्नस्येति सामान्यनिर्देशादेवं विभक्तस्य भ्रा
तुः पुत्रस्याप्यंशं पितृव्या दद्युरिति सिद्धांतिस्यैतु गर्भे यावत्प्रसवं प्रतीक्षैव कार्या। यथाह वसिष्ठः। अथ भ्रातॄ
णां दायविभागो याश्चानपत्याः स्त्रियस्तासामापुत्रलाभादिति प्रतीक्ष्येति शेषः। पुत्रपौत्रप्रपौत्राणां दाया
दत्वं निरूपितं। तदभावे प्रमीतस्य दायादानाह केशवः॥ ॥अपुत्रधने पत्न्यधिगामिनः४॥ ॥न विद्यंते पू
र्वोक्ता द्वादश पुत्रा यस्यासावपुत्रः। पुत्रश्चात्र [illegible]
[illegible]
नाभिः [illegible] मेयेव पितृन्नरकत्राणसामर्थ्यात् पुत्र [illegible]
रूपत्वान्न [illegible]
वद्या पुत्रपौत्र [illegible] पुत्रः भूयो दानविभागः स्यादा चतुर्थादिति स्थितिरिति देवलेन प्रपौत्रस्या वि
दायसंबंधाभिधानात्। अपुत्रपौत्रसंताने दौहित्रा धनमाप्नुयुरित्यपुत्रदायाधिकारे पुत्रपौत्रसंतानाभावस्या
भिमतत्वाच्चात्र दौहित्रपदं अपुत्रधनग्राहिमात्रोपलक्षणं। पूर्वोक्तन्यायात्। अत एव बौधायनः। पिता

वि॰टी॰१२७
१२१

सवर्णायाः पुत्रः पौत्रः प्रपौत्रः इत्युपक्रम्य सत्स्वन्येषु तद्गामी ह्यर्थो भवतीति स्पष्टमेवाभिहितत्वात्।
अन्येषु पत्न्यादिषु तद्गामी पुत्रादिगामी। किंवा पुत्रपदस्य सुख्ययोगेण पुत्रमात्रपरत्वेप्यनपुत्राया
पौत्रवत्याः पत्न्याः एव धनग्रहणप्रसंगः। न चेष्टापत्तिः। पितृपितामहमरणानन्तरं पौत्रे विभागे क्रि-
यमाणे मातृरिव पितामह्या अप्यंशकल्पने विरोधात्। पितामहानन्तरं पितामह्या एव सकलधनसं-
बन्धेन पौत्राणां तस्यारतंत्र्येणांशकल्पनायोगात्। तच्चाग्रे स्पष्टयिष्यते। न च पैतामहे धने पौत्राणाम-
विभक्तविभागः। किंत्वेवं पितृवद्यापितामहे पितामह्यापि पौत्राणां पारतंत्र्यात्। तस्मात्पुत्रपौत्र-
प्रपौत्राभाव एव पत्न्या धनाधिकार इति सिद्धम्। ... नतस्यापुत्रस्य पुत्रपौत्ररहितस्यास्था-
स्य धनं स्थावरजंगमादि सर्वं पत्नी विवाहसंस्कृता सवर्णाभार्या गृह्णीयात्। तत्र वृद्धमनुः। अपुत्रा
शयनं भर्तुः पालयन्ती व्रते स्थिता। पत्न्येव दद्यात्तत्पिंडं कृत्स्नमंशं लभेत चेति। कृत्स्नं स्थावरं जंगमं चाय-
था बृहस्पतिः। जंगमं स्थावरं हेम कुप्यं धान्यं रसाम्बरम्। आदाय दापयेच्छ्राद्धं मासषाण्मासिका-
ब्दिकादिकम्। पितृव्यगुरुदौहित्रान् भर्तुः स्वस्त्रीयमातुलान्। पूजयेत्कव्यपूर्ताभ्यां वृद्धानाथातिथीं।

२

न्स्त्रियः। सपिंडाभावे भर्त्रा वा यतेत स्याः स्त्रः परिपंथिनः। हिंसुर्धनानि ताश्चाराजा चौरदंडेन शासये
दिति। स्थावरं गृहक्षेत्रग्रामहट्टादि। जंगमं गवाश्वादि। हेमकुप्यादीनामुभयात्मकत्वात्पृथगुक्तनिर्देशः। पि
तृभ्रातृपतिपुत्रादीनां पूजनेनवकारेणोच्यते न तन्नैरपेक्ष्यं। स्थावरेऽपि विद्यमाने स्त्रीस एव। यदि भर्त्तुर्धनं
किंचिदाध्यादिविधिसंभवं। तज्जाया स्थावरमुत्काल भर्त्तेगतभर्तृकेति। अस्यार्थः। आधिः प्रणष्टस्तत्त्वः
आधिः प्रणश्येद्द्विगुणे धने काले कालकृतो न श्यपदित्याद्युक्तः। अयमभिसंधिः। यद्भर्त्रा परकीयं स्थाव
रं हेमाधीकृत्य धनं प्रयुक्तं तस्मिन्कलावृद्ध्या द्विगुणमापन्ने तस्मिन्नाधौ स्वामिनः स्वत्वनाशेन धन
प्रयोक्तुर्भर्तुः स्वत्वमुत्पन्नमिति स्थितिः। भर्तृमरणानंतरं तस्मिन्नाधौ स्त्रियां संक्रांते प्रयोगान्तरेण त
त्स्थावरं द्विगुणातिक्रमेण कलायां वर्द्धमानायामाधिनाशो नास्तीति सिध्यति। ततश्च मरणादूर्ध्वं
पि नष्टे कलावृद्ध्यावस्त्रियाः स्वत्वानुत्पत्तेर्गतदृशस्य स्थावरस्य पर्युदासो युक्त एवेति। आदिपदाद्भर्तुः
प्रीतिदानं तद्भयविधिनायत्तं भर्तुः स्थावरं तन्मुत्कान्यस्थावरं जंगमं वा धनं लभत इति। तत्तस्माद्विन
नेऽस्थावरविषयमिदं वचनं हीनपत्नीविषयं चेत्यपि व्याख्यानं प्रशस्तं दुहितृरहितपत्नीविषयमर्थाद्

वेदितिवाच्यं।दौहित्रवत्मित्र्यादीनामपिस्वजनस्य वर्णानंतरस्याप्यधिकारापत्त्यातदभावे वद्विषयता
प्याप्रद्येत।नचपितृव्यादपेक्षयादौहित्रस्यसंनिहितत्वेनाधिकारापादकत्वमितिवाच्यं।संनिहित
त्वेदौहित्रापेक्षयाप्यवर्णापत्नीदौहित्रोपयधिकारमापादयेत्।नचेष्टापत्तिः।स्त्रीविशेषणत्वाभावेनदौहित्र
स्याधिकारापादकत्वासंभवात्।तस्मान्नकिंचिदेतत्।किंचलोयत्तुस्थावरंतु नैकेतिवचनेदायादानु
मतिंविनास्थावरदाननविक्रयादिनिषेधपरमितितदपिप्रमाणाभावग्रस्तं।यत्तुस्मृतेभर्तृर्भर्त्रे
शेलभतेकुलमालिका।यावज्जीवंहिनस्त्रीभिर्दानाधमनविक्रय इतिकात्यायनीयंवचन
मत्रप्रमितितदपिनतत्रस्थावरपदाश्रवणात्।भर्तृदायेतिदत्तविषयत्वस्यवक्ष्यमाण
त्वात्।सवर्णाभावेत्वसवर्णाअपिसर्वेधनंगृह्णीयुः।सवर्णाभावेत्वनंतरयेतिवक्ष्यमाण
त।समवायेतुसर्वोविभज्यगृह्णीयुः।यथागौतमः।पिंडगोत्रर्षिसंबंधारिक्थंभजेरन्
स्त्रीचानपत्यस्येति।अनपत्यस्यधनंसपिंडाद्याः प्रत्यासत्तिक्रमेणभजेरन् स्त्रीचअ

त्रसपिंडादिभ्यः स्त्रियाः पृथङ्निर्देशादर्द्धं सपिण्डाद्यत्यतमोऽर्द्धं स्त्री इति सिध्यति। स्त्रीग्रहणं चेदं शूद्रा
यां विशेषमाह। अन्यत्र ब्राह्मणात् किंतु राजा धर्मपरायणः। तत्स्त्रीणां जीवनं दद्यादेष दायविधिः स्मृतः। अत्र
न्नार्थं तंडुलप्रस्थमपराह्णे तु सेंधनं। वसनं त्रिपणक्रीतं देयमेकं त्रिमासतः। एतावदेव साध्वीनां चोदितं विधवाधनं। व
सनस्याशनस्यैव तथैव रजकस्य वा धनं यपोह्यतच्छिद्रं दायादानां प्रकयेदिति। अत्र यावज्जीवमन्नाच्छादनं दे
यमिति प्रथमः कल्पः। स्त्रद्शक्तौ तावत्पर्याप्तं धनं वा देयमित्यनुकल्पः। यथाह कात्यायनः। स्वर्याते स्वामिनि
स्त्री तु ग्रासाच्छादनभागिनी। अविभक्ते धनांशं तु प्राप्नोत्यामरणांतिकमिति। अविभक्तपदमविभक्तेपि ध
नांशप्राप्त्यर्थं न विभक्तनिरासार्थं। तु शब्दो विकल्पार्थः। धनाभावे तावद्धनोत्पत्तिकं क्षेत्रांशं वा दद्युः। प्र
दद्यात्स्त्रीवपिण्डं वा क्षेत्रांशं वा यदीच्छतीति बृहस्पतिस्मरणात्। तथान्यैर्नापहर्त्तव्यं स्थावरादिधनं स्त्रीभ्यो
यद्दत्तं स्वश्वशुरेण तु। न तच्छक्यमपाहर्त्तुं दायादैरिह कर्हिचिदिति तस्यैव स्मरणात्। स्थावरस्य श्वशुरशब्दो धन
भरणकारिमात्रोपलक्षणं पणो त्रकार्षापणः। साध्वीनामिति विशेषणादसाध्वीनां तदपि नेति ज्ञेयं। नि
ताभरणं वास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात्। रक्षंति शय्यां भर्तुश्चेदाछिंद्युरितरासु चेति ना

वि॰री॰
१२४

रदस्मरणात्।क्रयक्रीतापुनर्भूस्वैरिण्यपवरुद्धादिभ्यस्त्वाढकमात्रमेवदेयंनान्यत्पत्नीत्वाभावस्यसर्वा
स्वपितृतुल्यत्वात्।आढकंभर्तृहीनायाद्द्यादामरणात्स्त्रियाइतिप्रजापतिस्मरणाच्च।एतस्मादेवगौत
मबृहस्पत्यादिवचनत्तापिताच्छायादत्ताभाधदासवर्णादुहिताअत्रसवर्णाचस्त्रीसमवयाते।तदोभयोः
समांशित्वंपुत्राभावउभयोर्विधानात्।पुत्रपत्न्यभावेदुहितापुत्रसवर्णाभावेअत्रसवर्णापत्नीतिद्वयंतरित
लस्ताम्याच्च।यथाहनारदः।पुत्राभावउभयोर्विधानात्।पुत्रपत्न्यभावेदुहितापुत्रसवर्णाभावेअत्रस
वर्णापत्नीतिद्वयंनरितात्सामान्याच्च।यथाहनारदः।पुत्राभावेतुदुहितातुल्यसंतानदर्शनादिति।सदृ
शीसदृशेनोढासाध्वीशुश्रूषणेरता।इतिबृहस्पतिः।सवर्णाभावेअसवर्णातुक्रमेवा।एवसुतमकणाकन्या
वमवर्णासीसमवायेन्यथापृथ्वात्।इदंचपत्न्यादीनांधनग्रहणंविभक्तेपत्यावसंसृष्टिनिज्ञेयंवद्रष्टव्यंवि
भागस्यपूर्वमुक्तत्वात्।संसृष्टिनांचाग्रेवक्ष्यमाणत्वात्।ननुपुत्रस्यत्वपत्रपुत्रपदेनस्नुषापिकृतोनविवक्ष्यते
तस्याअपत्यत्वात्।एषआत्मनोयत्पत्नीतिश्रुत्यापुत्रार्द्धशरीरत्वावगमात्।सत्यं।पत्नीमात्रविषयज्ञानयात्त्र
त्याश्वश्रूश्चात्रपितृश्वशुरशरीरार्द्धताप्रतिपादनात्वाभिधारीरार्द्धतयाश्वश्रूरेवस्नुषापेक्षयासन्निकर्षेणवि

वृद्धाफलाभावात्। पत्न्यभावे त्वपुत्रधनं स्नुषैव लभते नदुहिता। तदधिकारस्य पुत्रपत्न्यभावे पितुरर्द्धशरीरत्वेन
पुत्राभावविरहात्। तथा च बृहस्पतिः। यस्य नोपरता भार्या देहार्धं तस्य जीवति। जीवत्यर्धशरीरे तु कथमन्यः समा
प्नुयादिति। न च दुहितुः साक्षात् पित्रवयवारब्धत्वेन पित्रवयवारब्धपुत्रसदृक्षात् स्नुषापेक्षया सन्निकृष्टत्वमिति वा
च्यं। केवलसपिण्डदुहितृपेक्षया सगोत्रसपिंडायाः स्नुषायाः प्रत्यासत्त्यतिशयात्। यद्येवं पित्रादिष्वतिप्रसंगः स
त्यं। तेषां वचनेनैव स्थानविशेषस्य नियमितत्वात्। यत्रापि पतिमरणानंतरं पत्न्येव लभते तत्रापि मातृधनं त्वे
न तद्धनं दुहितृगामीति नियमितं चेत् जन्मना पुत्रस्येव विवाहात् स्नुषायाश्चापि भर्तृद्वारा श्वशुरधने स्वत्वोत्पत्त्या श्व
शुरमरणे श्वश्रूस्नुषयोः स्वत्वसाम्येन श्वश्रूमरणे स्नुषाया एवासाधारणस्वाम्यात्। तदभावे कस्य तत्राह॥ ॥
तदभावे दुहितृगामि॥५॥ ॥तेषां पुत्रादिस्नुषान्तानामभावे दुहितरो धनं गृह्णीयुः। पूर्वपूर्वाभावसहकृतोत्तराभाव
स्यैवोत्तरोत्तरोत्तराधिकारापादकत्वात्। अत्र च दुहितृसामान्यनिर्देशेपि प्रत्यासत्तिसाम्येप्युपकारातिशयेन
धनाधिकारोभिहितो भवति। यथा पुत्रत्वसाम्ये पत्नीवादीनां। एतदेव स्पष्टीकृतं पुत्रसदृक्तेनैव। अन्यथा जीव
दिपर्युदासस्याद्दष्टार्थतापत्तेः। यदप्यपुत्रस्यापितुरादेर्धनग्रहणं तदपि योग्यतामादायेव नायोग्यता निष्ठ

योंततश्च विषवादीनां अयोग्यता। निश्चयेन धनाधिकारः। किंतु वादीनां अयोग्यता निश्चयेन धनाधि
कारः किंतु स्त्रीवादीनामिवतासामपिपिधनग्राहिभिर्भरणमात्रं कार्यमिति। तत्र सवर्णा तदभावे अस
वर्णापि समवायेपि समवायेतु स्वस्वजात्यनुरूपेणांशेन पितृधनं गृह्णीयुः। यथाह बृहस्पतिः। भर्तुर्ध
नहरी पत्नी तां विनादुहिता स्मृता। सदृशी सदृशेनोढा साध्वी शुश्रूषणे रतेति। सदृशी सवर्णा। सा चासवर्णो
पलक्षणं। पुत्राभावात्तु सारभागापहारिण्योनूढाश्च दुहितर इति वक्ष्यमाणलिंगात्। ऊढेत्यनूढोपलक्षणं।
पत्नी भर्तुर्धनहरी या स्यादव्यभिचारिणी। तदभावे तु दुहिता यद्यनूढा भवेत्तदेति कात्यायनस्मरणात्। ततश्च स
वर्णा असवर्णा ऊढा अनूढाश्च समवाये यथांशं समं च विविभज्य गृह्णीयुः। पूर्वपूर्वाभावे तत्तत्रैवेति। यत्तूढाऽनूढा
समवाये अनूढैवेति तन्न। तादृशकामकल्पने प्रमाणाभावात्। यत्तु। यद्यनूढा भवेत्तदेति यद्यनूढा न भवेत्त
दानूढावस्थायां पितृभागं न लभते। किंतु यावद्विवाहं भरणं विवाहोपयुक्तं च द्रव्यं पितृभागं तु विवाहानं
तरमेव लभत इति। तथा च नारदः। स्यात्तु चेद्दुहिता तस्याः पित्र्योंशो भरणे मतः। आसंस्काराद्भरेद्भागं प
रतो बिभृयात्पतिरिति। अस्यार्थः। यद्यनूढा भवेत्तदा तस्याः आविवाहं पित्र्यंशेन भरणं कार्यं परतो विवा

हानंतरेपित्रंभागंदद्यात्तस्यभरणंपतिरेवकुर्यात्नपित्रंशेन।देवलोपि।कन्याभ्यश्चपितृद्रव्याद्देयंवैवाहिकंवसु
।अपुत्रस्यतुकन्यास्वाधर्मजापुत्रवद्भवेत्।।वैवाहिकंविवाहोपयुक्तं।देयंकन्यादानाधिकारिणा।स्वासवर्णा
धर्मजाऔरसी।यदपिपराशरवचनं।अपुत्रमृतस्यकुमारीऋक्थंगृह्णीयात्तदभावेवोढेतिपठंतितदपिवचन
मंतरेणानूढकन्यायाऋतुदर्शनेपित्रादीनांनरकपातश्रुतेस्तद्विवाहःप्रथमंकर्तव्यअनंतरमंशदानात्त
दभावेविवाह्यकुमार्यभावेऊढासपुत्रासंभावितपुत्रावागृह्णीयात्।यद्यपिसंनिकृष्टोपकारकत्वात्सपु
त्रायाएवप्रथमंधनग्रहणंप्राप्नोतितदभावेविवाह्यकुमार्यभावेसंभावितपुत्रायाअपियोग्यतयापुत्रव
त्वाद्दुहितृत्वाविशेषाच्चउभयोरपिविभज्यैवधनग्रहणमुक्तमुत्पश्यामः।एतेनस्त्रीधनंदुहितृणामप्र
त्तानामप्रतिष्ठितानांचेतिगौतमीयस्यपितृधनेपिसमानत्वात्प्रत्तासमवायेअप्रत्तैवप्रतिष्ठितासमवा
येचाप्रतिष्ठितैवेत्यपिव्याख्यानंपरास्तं।वाक्यस्यस्त्रीधनविषयत्वात्न्यायस्यचपितृधनविषयेदुष्टत्वा
दित्यलंप्रसंगेन।तुल्यसंतानदर्शनादितिहेतूपन्यासेनपुत्राभावेपौत्रस्येवदुहित्रभावेदौहित्रस्याधिका

148

मि॰टी॰१७
१३८

रः। यथाह बृहस्पतिः। यथा पितृधने स्वाम्यं तस्याः सत्स्वपि वंशजेषु। तथैव तत्सुतोपीष्टः मातृमातामहे धने। माता
त्र मातामही। तदभावे कस्त्यत आह॥ ॥तदभावे पितृगामि॥ ६॥ तेषां पुत्रादिदौहित्रान्तानामभावेऽपुत्रधनं
पितृगामि। यथाह देवलः। तुल्या दुहितरो वापि ध्रियमाणः पिता पि वेति। कात्यायनोपि। अपुत्रस्य कुलजा
पत्नी दुहितरोपि वा। तदभावे पिता माता भ्राता पुत्राश्च कीर्तिता इति। इति तदभावे कस्त्यत आह॥ ॥तदभावे
मातृगामि॥ ७॥ ॥तेषां पित्रन्तानामभावे माता मात्यसांगर्भ इति यो मातृजननी धनं गृह्णीयात्। यथाह बृहस्पतिः
भार्यासुतविहीनस्य तनयस्य मृतस्य तु। माता रिक्थहरी ज्ञेया भ्राता वा तदनुज्ञयेति। एतेन पितरो भ्रातरश्च
थेति योगिवाक्यमपि व्याख्यातं। यत्त्वेकशेषेक्रमाप्रत्ययाद्धि द्वन्द्वे वा क्वेमातृशब्दस्य पूर्वनिपातादेकशेषा
भावे च मातापितराविति मातृशब्दस्य पूर्वश्रवणात् पाठक्रमादेवार्थक्रमकल्पनेति प्रथमं माता गृह्णीयात्
पश्चात् पितेति व्याख्यानं तदसत्। मूलवाक्ये तदभावेन पिता मातेति कात्यायनवाक्ये च। आ श्विनाद्दश
मो गृह्यते तं तृतीयं जुहोतीतिवत् प्रतीयमानश्रौतक्रमविरोधेन पाठक्रमस्यातन्त्रत्वात्। यदपि पिता पु
त्रान्तरेष्वपि साधारणो माता त्वसाधारणीति प्रत्यासत्त्यतिशयान्मातुः प्रथमं धनग्रहणं युक्तमिति त

११

प्ययुक्तं। पितृवचनाधिक्येन पितुः प्रत्यासन्नतरत्वात्। अवयवप्रत्यासत्तेश्चोक्तप्रत्यासत्त्यतिशयाधायकत्वाभिहितत्वात्। अ-
न्यथा दुहितृहरणं मातृधनग्रहणं पुत्राणां च पितृधनग्रहणं न स्यात्। किंचापत्योत्पत्तौ शुक्रस्य प्राधान्यं शोणितस्य च तदुप-
ष्टंभकत्वेन गुणभाव इत्यपि पितुः प्रत्यासन्नतरत्वात् तदाह बौधायनः। अपत्यजनने मातुः प्राधान्यं पितुरित्येके बीज-
स्य प्राधान्यादयोनिजा अपि पुत्रा दृश्यंते द्रोणागस्त्यादय इति एतदेवाभिप्रेत्य स्पष्टमाह मनुः। उपसर्जनं प्रधानस्य
धर्मतो नोपपद्यते पिता प्रधानं प्रजनने तस्माद्धर्मेण तं भजेदिति। उपसर्जनं प्रधानस्य धर्मतो नोपपद्यते। पिता प्रजनने त-
स्माद्धर्मेण तं भजेदिति। उपधर्मेण पुत्रधनेन तमेव पितरमेव भजेत न मातरमिति। तस्मात्पितैव प्रथमं गृह्णीयात्पश्चा-
न्मातेति। मातुरभावे पितामही धनं गृह्णीयात्। अनपत्यस्य पुत्रस्य माता दायमवाप्नुयादिति। मातर्यपि च वृत्तायां पि-
तुर्माता हरेद्धनमिति मनुना मातुरभावे पितामह्या धनसंबंधबोधनात्। अत्र केचित्। सत्यमनेन मातुरनंतरं पिता-
मह्या धनग्रहणं प्राप्तं तदनंतरं तु पित्रादीनां भ्रातृसुतपर्यंतानां वक्ष्यमाणक्रमत्वेन मध्ये तु प्रवेशाभावात्पितुर्मातेति वच-
नस्य धनग्रहणाधिकारमात्रपरत्वादुत्कर्षे तत्सुतानंतरं पितामही गृह्णात्यविरोधादित्याहुः। तद्विरुद्धं। वक्ष्यमा-
णाभिप्रायानां वृत्तीनां मध्ये नारंभाधीतानां विज्ञानेश्वरादीनामष्टकानां यां वै कां चिद्ब्राह्मणवत्तीमिष्टकामभि-

जानीयात्तां मध्यमायां मिताक्षरायां पितरावुपदद्युरादिति वचनेन यथा सवितारावुपपन्नानं तथा वक्ष्यमाणानामपि पित्रादीनां मध्ये मातर्यपि चरितार्था इति वचनेन मात्रनंतरं पितामह्या धनग्रहणाधिकारि मात्रनंतरं पितामह्या धनग्रहणं संभवात् यदप्यस्य धनग्रहणाधिकारिणां मात्रपरत्वान्न क्रमपरत्वमिति। तदपि न। विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत्। भ्राता वा जननी वापि माता वा तत्पितुः क्रमादिति श्रौतक्रमपरमत्वमिति। तदपि न। विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत्। भ्राता वा जननी वापि माता वा तत्पितुः क्रमादिति श्रौतक्रमविधायक कात्यायनवचनेकवाक्यतया क्रमपरत्वसंभवात्। पुत्रपदं चात्र दौहित्रांतसन्निहितोपलक्षणं। अनेनानपत्यस्य पुत्रस्येत्यपि व्याख्यातं शृङ्खलातीति सिद्धं। तदभावे क इत्यत आह॥ ॥तदभावे भ्रातृगामि॥८॥ ॥तेषां पितामहांतानामभावे भ्रातरः। स्वसारश्च भ्रातरश्चेति भ्रातरः। भ्रातृपुत्रौ स्वसृदुहितृभ्यामित्येकशेषात्। योगिव्याक्येपि तरो भ्रातरस्तथेत्येकशेषोपक्रमाच्च। ततश्च भ्रातरो भगिन्यश्च भ्रातृधनं गृह्णीतिप्रत्यासन्नि साम्यात्। भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभय इति संसृष्टिधने भगनीनामप्यंशभागिनानामप्यंशभागित्वदर्शनाच्च। तत्र प्रथमं समानमातापितृका भ्रातरो गृह्णीयुः। पित्रदयया वा भिन्नेनप्रत्यासन्नतरत्वात्। तदभावे समा

न मातापितृका भगिण्यो गृह्णीयुः। तासां भिन्नमातृकाद्भ्रातुरपेक्षया सन्निहितत्वात्। भिन्नोदराणां मात्रा भिन्नवीजानां
च पित्रा विप्रकर्षात्। तदभावे तु ता इति गृह्णीयुः। सोदर्याः संत्यक्तोदर्या भ्रातरो द्विविधा यदा। विद्यमानेऽप्यसोदर्ये सोद
र्या विभागिन इति स्मरणात्। तत्रापि प्रथमं समानपितृकाः पश्चात्समानमातृकाः वीजस्य प्राधान्यात्तथा
न प्रत्यासत्तेश्च क्रमनियामकत्वात्। तद्यथा। एकस्य द्वे पत्न्यौ तत्रैकस्यां द्वौ पुत्रावन्यस्यामेकः। पुत्रस्ते न ज
नितोनंतरं द्वे पुत्रान्यपतिमाश्रित्य पुत्रांतरं जनयामासेति तस्यास्त्रयः पुत्रा बभूवुः। तत्र पूर्वयोरन्यतरस्मिन्
मीते तद्धने समानपितृक एव प्रथमं गृह्णीयात्तदभावे समानपितृको भिन्नपितृकोपीत्रपितृको पीति। तत्रापि ज्येष्ठ
एव प्रथमं गृह्णीयात्तदभावेऽन्यः। असंसृष्टिविभागः प्रेतानां ज्येष्ठस्येति गौतमस्मरणात्। सवर्णभ्रात्रभावे सवर्णासपत्न
माता गृह्णीयात्। सवर्णा भ्रातरो माता भार्या चेति यथाक्रममिति देवलस्मरणात्। अत्रांते भार्योपादानं शंकितव्यभि
चारिणी विषयमित्युक्तं प्राक्। सवर्णसपत्नमात्रभावे असवर्णा भ्रातरो गृह्णीयुस्तदभावे असवर्णासपत्नमातेति
तदभावे क इत्यत आह। तदभावे भ्रातृगामि॥ए॥ ११ तेषां भ्रातॄणामभावे भ्रातृपुत्रा धनं गृह्णीयुः। अत्राप्येक

शेषः पूर्ववदेव। तथा च भ्रातृपुत्राणामभावे भगिनीपुत्रा गृह्णीयुः पूर्ववदेव प्रत्यासन्नत्वात्। तस्मात् भ्रातॄणां पूर्व
प्रमीतत्वेन भ्रातृधने स्वत्वात् तत्पत्न्या भ्रातृपुत्राणामेव वस्त्वाभिन्नांशेन स्वत्वे तत्पुत्रा पितृक्रमेण विभागा
र्हत्वात्। पितृतो कल्पनात्तस्याः पैतृकस्वत्वास्यदद्रव्यविषयत्वात्। यदा तु पुत्रे भ्रातरि मृते त्वन्येषां तद्भ्रा
तॄणां तद्धने स्वत्वं उत्पन्ने यदि कश्चित्तद्धनं विभागात् प्रागेव क्षीयते तदा तत्पुत्राणां पितृतो भागकारणाभावेः पितृ
तो भागकल्पनेति स्वत्वं नान्यथेति। समवाये तु भ्रातॄणामेव। तत्पुत्राणां तदभावस्याधिकारिविशेषण
त्वात्। अत्रापि भ्रातृवदेव प्रत्यासत्तिर्वर्णनीया। तदभावे क इत्यत आह॥ ॥तदभावे कुल्यामासि॥१०॥ ॥ते
षां भ्रातृपुत्राणां तानामभावे बांधवः सपिंडास्ते च सगोत्रा असगोत्राश्च। तत्र प्रथमं सगोत्राः सपिण्डा गृह्णी
युः। ते च पितृपितामहप्रपितामहास्त्रयस्तेषां चापत्यानि त्रीणि। तत्रायं क्रमः। पितृसंताने भ्रातृपुत्राभा
वे भ्रातृपौत्रस्तदभावे पितामहस्तत्पुत्रस्तत्पौत्रस्तत्पौत्र। तत्पौत्रश्च तदभावे प्रपितामहस्तत्पुत्रस्तत्पौत्रस्त
त्पपौत्रश्चेत्येवं चतुर्णामेवाधिकारेण पंचमस्येति त्रयाणामुदकं कार्यं त्रिषु पिण्डः प्रवर्त्तते। चतुर्थः संप्र

[illegible]दुहितृदौहित्राः पितामह — २

दातेषां पंचमो नोपपद्यत इत्यभिप्रायात् [illegible]रः सपिंडाद्यस्तस्य तस्य धनं भवेदिति मनुस्मरणादिति। सगोत्रसपिण्डा
भावे असगोत्रा अपि सपिण्डा गृह्णीयुः। ते च पितृदुहितृदौहित्राः प्रपितामहदुहितृदौहित्राः च पूर्वपूर्वाभावे वेदितव्याः।
पुत्राभावे च दुहितातुल्यसंतानदर्शनादित्यस्मात् [illegible]दुहितृदौहित्राः प्रपितामहदुहितृदौहित्राः स्वपितृसपिण्डाभावे मा
तृसपिण्डा मातामहमातुलतत्सुताद्या गृह्णीयुः बीजस्य प्राधान्यात् तदभावे मातृष्वसृतत्सुताद्याः। यत्त्वात्मपितृमा
तृबंधूनामात्मपितृष्वस्रेयादीनां धनग्रहणमनौचिती पराहतं विप्रकर्षा मेणैवेतियुक्तं। तदभावे क इत्यत आ
ह।। तदभावे सकुल्यगामि।।१२।। ।।तेषां वंशतानामभावे सकुल्याः पंचमादि संततिस्तद्गामि। यथाह बौधाय
नः। प्रपितामहः पितास्वयं सोदर्या भ्रातरः सवर्णायाः पुत्रः पौत्रः प्रपौत्रस्तान विभक्तदायादान् सपिडानाचक्ष
ते विभक्तदायादान् सकुल्यानाचक्षते सत्सु सपिण्डेषु तद्गामी ह्यर्थो भवति सपिण्डाभावे सकुल्यास्तदभा
वे त्वाचार्योंतेवासी ऋत्विग्वा हरेत् तदभावे राजेति। दायोत्र पिण्डो दीयत इति मुख्यतः सत्राभिमुख्येन दीयते पि
त्रादिभ्य आदीयते गृह्यते च पुत्रादिभ्यो यस्मिन् कर्मणि तद्दायादं श्राद्धं तद् विभक्तमेकं दातृदेवताभावेन येषां
ते अविभक्तदायादा एकश्राद्धान्वयिन इत्यर्थः ते चत्वारः सपिण्डास्ततोन्ये पंचमादयः सकुल्या इत्यर्थः। सस

कुल्यः सपिण्डाभावे धनं गृह्णीयात्। सकुल्याभावे आचार्यो गृह्णीयात्तदभावे शिष्यः पुत्राभावे यः प्रत्यासन्नः स
पिण्डस्तदभावे आचार्य आचार्याभावे अंतेवासीत्यापस्तंबस्मरणात्। शिष्याभावे क इत्यत आह॥ ॥तदभा
वे सहाध्यायिगामि॥ २२॥ तस्य शिष्यस्याभावे सहाध्यायी गृह्णीयात्। येन सहैकस्माद्गुरोरधीतं स सहाध्या
यी। अध्ययनमुपनयनस्याप्युपलक्षणं। तेनैकाचार्योपनीतोपि लभते शिष्यस्तब्रह्मचारिण इति योगिस्म
रणात्। तदभावे ऋत्विक् हरेत्। अंतेवासी ऋत्विक् वा हरेदिति शंखस्मरणात्। ऋत्विजोप्यभावे क इ
त्यत आह॥ ॥तदभावे ब्राह्मणधनवर्जंगामि॥ २३॥ ॥तेषां पुत्रादीनामृत्विगंतानामभावे तद्धनं राजा
गृह्णीयाद्ब्राह्मणधनं वर्जयित्वा। यथाह बृहस्पतिः। येऽपुत्राः क्षत्रविट्शूद्राः पत्नीभ्रात्रादिवर्जिताः। ते
षां धनहरो राजा सर्वस्याधिपतिर्हि सः इति। तर्हि ब्राह्मणधनस्य का गतिरित्यत आह॥ ॥ब्राह्मणार्थो ब्रा
ह्मणानां॥ २४॥ ॥ब्राह्मणस्यार्थो धनं श्रोत्रिया ब्राह्मणा गृह्णीयुः। श्रोत्रिया ब्राह्मणस्यानपत्यस्य ऋक्थं
भजेरन्निति गौतमस्मरणात्। तदभावे ब्राह्मणमात्रं। यथाह मनुः। सर्वेषामप्यभावे तु ब्राह्मणा ऋक्थभा
गिन इति। यदुक्तं पुत्रादयस्तदभावे पत्न्यादयस्त्वधनभाज इति तदुभयापवादमाह॥ ॥वानप्रस्थधनमाचा

योगृह्णीयात् ॥१५॥ वानप्रस्थ इति यहति रिक्ताश्रमत्रयोपलक्षणं। आचार्येति शिष्याद्युपलक्षणं। तेन
च वानप्रस्थयतिब्रह्मचारिणां धनं क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनो गृह्णीयुः। यथाह योगीश्वरः
वानप्रस्थयतिब्रह्मचारिणामृक्थभागिनः। क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिन इति। आचार्योत्र वान
प्रस्थाश्रमेदातयितादीक्षितो गुरुणाज्ञातो दिशस्त्रु पनिक्रमेति हृद्धहारीतीयलिंगात्। भारतेपि। तत्रैनं विधि
वज्ञानाश्रत्यगृह्णात्कुरुद्वहः। सदीक्षांतत्र संप्राप्य राजा कौरवनंदनः। शतयूपाश्रये तस्मिन्निवासमकारोत्तदा।
तस्मै सर्वविधिं राजेराजा चख्यौ महामतिरिति। स्तत्राज्ञा स्यवानप्रस्थयतिब्रह्मचारिणामृतस्यवार्यत्वं लिंगा
च्छास्त्रगुणवान्निर्दोषः शिष्यः। धर्मभ्राता प्रतिपन्नो भ्राता। एकतीर्थी समानाचार्यकः। धर्मभ्राता वासा
वेकतीर्थी चेति एकाचार्येषु आतृत्वेन प्रतिपन्न इति यावत्। एतेत्रयस्त्रयाणां क्रमेण धनभाजाः। यद्वा
एकतीर्थी वाराणस्याद्येकतीर्थवासीत्यपि गोवर्द्धनाश्रयणात्। तेचत्वारस्त्रयाणां क्रमेण पूर्वपूर्वाभावे
परः परो धनभागित्यर्थः। यतेस्त्वाचार्यो महावाक्योपदेष्टा सन्यस्याचार्यमुपतिष्ठेत ब्रह्मजिज्ञासाया

वि०टी०१३

१८०

इति शंखस्मरणात्। यत्तु यातिवनितो राचार्यो भावमभिप्रेत्य जातिलोपक्रमेणेति व्याख्यानं तद्दार
तद्दारीति विष्णुशंखवाक्यादर्शनमूलकमित्युपेक्षणीयं। आचार्याभावे कस्त्यत आह॥ ॥शिष्यो वा॥१६॥॥
सच्छिष्यो वा वानप्रस्थादिधनं गृह्णीयात्। वाशब्दः धर्मभ्रात्रेकतीर्थिनो ग्रहणं। [illegible]
ति तस्यापवादमाह॥ ॥संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः। दद्यादपहरेच्चांशं जातस्य च मृतस्य च॥
॥१३८॥ ॥विभक्तं धनं पुनर्मिश्रीकृतं संसृष्टं। संसृष्टं धनमुभयं समाकृतमिति श्रुतेः। यदेकं सदुभयोयाति
तदुभयं विभक्तमिति यावत्तत्समाकृतं साधारणीकृतं संसृष्टं तदस्यास्तीति संसृष्टी। यथाह बृहस्पतिः। विभक्तो
यद्विपुनः। पित्रा भ्रात्रा वैकत्र संस्थितः। पितृव्येनाथवा प्रीत्या स तत्संसृष्टिरुच्यत इति। एकत्र स्थितिरत्र विभ
क्तानां धनानामिति व्यवहारप्रयोजकधर्मोपनयनेन पूर्ववत्सर्वेषां साधारण्येनोपभोगयोग्यतापादनं। त
च्च यावद्भूतानां विभक्तधनं तावतन्मात्रापि यावद्भूतादर्शां मनसितन्वापीत्युच्यते मतिः। सा तु वक्तविद्वाच निकाले
चित्वन्यथा सिद्धव्यवहारगम्या। अथ तु कथमपि वचः किं चित्कृतं भवति कर्मणेति विष्णुपुराणात्। पित्रा

१८०

दिगणनं तु प्रपंचार्थं नान्यं परिसंख्यार्थं दोषापत्तेः। विभक्ताः सहजीवंत इति मानवीयसामान्याभिधानाच्च न च विशेषेणोपसंहारः। विभजेरन्पुनर्यदीति पुनःशब्देनाद्वित्रिवाविनाद्यविभागपूर्वावस्थां द्योतयता यत्प्रतियोगिकस्याद्यो विभागस्तत्प्रतियोगिकस्यैव संसर्गस्यैव प्रदर्शनेनान्यस्पृष्टताभावात्। किंच। पित्रादिकमात्रसंसर्गे च न पत्यस्य धर्मोऽयमित्यादि वक्ष्यमाणवहेस्पत्यसंसृष्टिक्रमानुपपत्तिस्तस्माद्यैः सह विभागस्तैरेव सह संसर्ग इति स्थितं। तेन पित्रा विभक्तः पुत्रः एवं विभक्तेन पितृव्यादिना सह संसृष्टो न भवति। किंतु यैः पितृव्यादिभिः सांप्रतं विभक्तस्तेषामेवान्यतमेन विभागस्योपलक्षणत्वे संभूय समुत्थानादावतिप्रसंगात्। तस्य संसृष्टिनो मृतस्यांशभागं संसृष्टी दद्यात्। कस्य दद्यादित्यपेक्षायामाह। जातस्येति। संसृष्टत्वेन संबंधितयेति विशेषः। स च त्रिधा संभवति संसर्गावस्थोत्पन्नः। संसृष्टिपितृसंसर्गेण विभक्तश्चेति। तद्यथा। यः संसर्गावस्थायामुत्पद्यते पुत्रो यो वा पूर्वं विभक्तो भ्रात्रादिसंसृष्टेन पित्रा पश्चात्संसृज्यते। यो वाऽत्र विभक्तः पितृकृतसंसर्गेणैव संसृष्टी भवति तस्य त्रिविधस्यापि। यथाह मनुः। ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनं संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सहेति। य इति सामान्यनिर्देशात्पितृपुत्रभ्रातृभ्रातृव्यादयो ये तेन पित्रा संसृष्टास्तैः सह विभजेत्तेभ्योंऽशं गृह्णीयात्ते तस्मात्त्वंशं दद्युरित्यर्थः।

नं २

१५१

तादृशपुत्राभावे मृतस्य संसृष्टिनोंऽशं संसृष्टो वा परोपहरेत् गृह्णीयात् नत्वसंसृष्टः पुत्र आत्रादिः पूर्वविभागेन
संसृष्टानां स्वसर्गेण स्वत्वोत्पत्त्यासत्सु चैतेषु धनस्वामित्वं कस्येदं धनं भवतीत्याकांक्षायामनुदयेण संसृष्टिगा
मित्वसंकाननुक्ताख्यात। एवं च विभक्तानेकपुत्रसत्वे पि यदा केनचिदेकेनैव पुत्रेण पिता संसृज्य पुनरकृत
विभाग एव क्रियमाणेन तद्भागं संसृष्टो वा पुत्रो गृह्णातीति ना संसृष्टः पुत्रः एवमेव यदा कश्चिद्भ्राता भ्रातृन्स्व
पुत्रांश्च विभज्य केनचिद्भ्रात्रा भ्रातृपुत्रेण वा संसृष्टः संसर्गावस्थायां च पुत्रांतरमनुत्पाद्यैव मृतस्तदा सं
सृष्टो वा भ्राता यो वा तद्धनं गृह्णीयात् असंसृष्टः संसृष्टादी। संसृष्टिनस्तु संसृष्टाद्वनारंभसामर्थ्यात्। उक्तान्या
यवत्वात्। संसृष्टिनां तु यो भागस्तेषामेव स मृज्यते। अतोऽन्यथा नंशभाजो निर्बीजेष्वितराण्वियादिति ना
नारदवचनाच्च। तेषां संसृष्टिनामेव। अतः संसृष्टिभ्योऽन्यथा ये असंसृष्टिनस्ते अनंशभाजोऽनर्हाः। कं
दा पुनस्तेंऽशभाज इत्यत आह। निर्बीजेषु निरपत्येषु पुनः संसृष्टिषु मृतेषु तद्भाग इतराणि संसृष्टिनोपि याज्ञ
छेत्। अयमर्थः। संसृष्टिधनं पूर्वोक्तस्त्रिविधोपरसंसृष्टिपुत्रस्तस्याप्यभावे असंसृष्टी स्वामिपुत्रभ्रात्रा
दिः। निर्बीजत्वविशेषणस्याभयसंसृष्टिनोपि याज्ञ्छेत्। अयमर्थः। संसृष्टिधने पूर्वोक्तस्त्रिविधो मृत

संसृष्टिपुत्रो गृह्णीयात्तदभावेऽपरः संसृष्टी पितृभ्रात्रादिस्तस्याप्यभावे पूर्वोक्तस्त्रिविधोऽपरसंसृष्टिपुत्रस्तस्याप्यभा
वेऽसंसृष्टी स्वामिपुत्रभ्रात्रादिः निर्बीजत्वविशेषणस्योभयसंसृष्टिपुत्रस्याभावात्त्रे संसृष्टी स्वामिपुत्रभ्रा
त्रादिः। निर्बीजत्वात्। न त्वेतदसंगतं। विभक्ता भ्रातरो ये च संप्रीत्यैकत्र संस्थिताः। पुनर्विभागकरणे ज्यै
ष्ठ्यं तत्र न विद्यते। यदा कश्चित्प्रमीयेत प्रव्रजेद्वा कथंचन। न लुप्यते तस्य भागः सोदरस्य विधीयते। या तस्य
भगिनी सा तु ततोंऽशं लब्धुमर्हति। अनपत्यस्य धर्मोऽयमभार्यापितृकस्य चेति बृहस्पतिना पुत्रपत्नीपितृरहित
स्य संसृष्टिनो भ्रातुरंशं संसृष्टी भ्राता गृह्णीयादिति बोधनात् कथमसंसृष्टिनि पुत्रे विद्यमाने संसृष्टी भ्राता
भ्रातृव्यो वा धनभागिति उच्यते। नेदमपत्यादिसामान्याभावं बोधयति। पत्न्याद्यपवादकसंसृष्टिवा
क्यशेषत्वविरोधात्। किंतु संसृष्टानां तु यो भाग इति नारदवचनैकवाक्यतया संसृष्टिवाक्यशेषतया च सं
सृष्टिनां पुत्रपत्नीपितॄणामभावं गमयति। तथा च यत्रैकस्य कस्यचित्पुत्रभार्यापितृभ्रातृभिः समं संस
र्गस्तत्र तस्मिन्मृते संसर्गविशेषेण सर्वेषां सममंशग्रहणे प्राप्ते संसृष्टिवाक्योपोद्घात्वेन तद्विषयाप्रवृत्त्यात्र

वि॰दा॰१३
९८२

नेकसंसृष्टिविषयेक्रमाकांक्षायामस्यप्रवृत्तेः।अन्यथासंसृष्टिवाक्यस्यपत्न्याद्यपवादकत्वानुपपत्तेःप्रत्यु
तविकल्पापत्तेःप्रत्युतविकल्पापत्तेः।सत्यामपिपत्न्यांसंसृष्टीवरृह्णीयात्सत्यांपत्न्यांसंसृष्टीवरृह्णी
यादितिपरस्परविरोधात्।अपवादकत्वस्यचअतोन्यथानेशभाजइत्यनेनावश्यकत्वात्।तस्मात्तु
त्रोद्यनेकसंसर्गप्रत्यासत्तिविशिष्टसंसृष्टिक्रमेणप्रथमंसंसृष्टीपुत्रस्तदभावेसंसृष्टिनीस्त्रीतद
भावेसंसृष्टिनीमातातदभावेसंसृष्टाभगिनीतदभावेसंसृष्टीभ्रातृव्यइत्यादिद्रष्टव्यं।तेननक्वापि
विरोधः।संसृष्ट्यभावेत्वसंसृष्ट्यपित्रपुत्रादिर्यथोक्तक्रमेणलभतेनिर्वीजेष्वतरानियादितिवृहस्पति
स्मरणाच्च।नतुपुत्रादिभिरनेकैःसंसर्गेपुत्रसत्वाद्भ्रातृर्धनग्रहणंप्राप्नोत्येवन।नभ्रातरोनपितरःपुत्रा
ऋक्थहराःपितुरितिस्मरणात्।संसृष्टिवाक्यस्यापुत्रधनंपत्न्यभिगामीत्यस्यापवादत्वेनोत्सर्गस
मानविषयतयाअपुत्रविषयत्वाच्च।तस्मादत्रक्रमाकांक्षाविरहेणैतद्वाक्यारंभोनिरर्थकइतिचेत्।
मैवं।संसृष्टिवाक्येनाऽपुत्रधनंपत्नीगामीत्यस्यविशिष्टस्यापवादंब्रूतेतापुत्रपत्नीसद्भावेपिसंसृष्टि

नोधनग्रहणं बोधितं। तथा च संसृष्टिनो धनग्रहणं बोधितं। तथा च संसृष्टिपुत्रसत्वेपि पुत्रत्वमनादृत्य
संसर्गविशेषात्तेन सह भ्रातुरपि धनग्रहणं ज्ञापितं तत्र क्रमविधानायापत्यस्येति वचनारंभसार्थक्यात्। वि
शिष्टापवादेच संसृष्टानां तु यो भागस्तेषामेव स इष्यते। अतोन्यथानंशभाजो नारदवाक्यमेव प्रमाणं। अन्य
थापत्न्याद्यपवादोपि न स्यात्प्रमाणांतराभावात्। यदि वेदमेव प्रमाणं। अन्यथा पत्न्याद्यपवादत्वे च न स्या
त्प्रमाणांतराभावात्। यदि च मेव इष्यते। अतोन्यथा पत्न्याद्यपवादोपि न स्यात्प्रमाणांतराभावात्
न च पुत्रांशे प्रतिप्रसवोस्ति। यत्त्वनपत्यस्येति तदन्येकसंसृष्टिनां क्रमपरमन्यथा विशेषः पत्न्यामपि
तुल्यत्वादिति युक्तमेव। न त्वनपत्यस्येत्यस्य सामान्याभावपरत्वानंगीकारे महद्वैशसं। तथाहि। अतो
न्यथानंशभाज इत्यनेन पूर्वविभक्तस्य पुत्रस्यापवादः। संसर्गावस्थोत्पन्नस्य तु संसृष्टास्तेन ये वा सु
रित्यनेनांशग्रहणं बोधितं। संसृष्टिनस्त्वनपत्यस्येत्यनेन धनसंबंधो बोधितस्तथा च सति यदा अ
कृतविभागेन पुत्रेण सहैव पिता भ्रात्रादिभिः संसृज्यते तदा तादृशपुत्रस्य कोटिद्वयेप्यनंतर्भावात्का

वि॰टी॰१७
१८३

गतिरितिचेन्नासंसृष्टत्वंतद्भावएवात्रगतिरितिक्रमः।अविभक्तेधनेपितापुत्रयोःस्वत्वस्यतुल्यतयातादृशध
नेनान्यसंसर्गेपितृत्वत्पुत्रस्यापिसंसृष्टित्वस्यशब्दस्यतत्रैवसिद्धत्वात्।नचैवंदंपतीधनस्येसातइत्यापस्तं
वेनपाणिग्रहणादेवपत्न्याअपिभर्तृधनेस्वत्वेधनादकृतविभागभार्येणान्यसंसर्गेभार्यापिभर्त्रंशं
लभेततथाचापवादोनिर्विषयइतिवाच्यं।अकृतविभागायाःकृतविभागायाःसंसर्जितधनायाश्चोक्त
रीत्यासंसृष्टित्वेप्यपवादस्यकृतविभागासंसर्जितधनपत्नीविषयत्वसंभवात्।पत्नीवाक्येउभयवि
धायाअपिग्रहणात्।नचैवमपिभगिन्याःसंसृष्टित्वंनसंभवत्येवभ्रात्रासत्वेनस्याविभागानर्हतया
तदभावेनसंसर्गासंभवादितिचेन्न।असंस्कृतभगिन्याअंशदानपूर्वकंसंसर्गावस्थोत्पन्नपुत्राभाव
विषयतयानपत्न्यपदंसवर्णापरतयाव्रतस्यास्थाचरतयावाभार्यापदंकुतोनेष्यतेवृद्धैस्तथाव्या
वस्थापनादितिचेतान्न।पत्नीपदेविषयविशेषपरताऽसंभवेनविरोधतादवस्थ्यात्।अपत्यपदस्य
तुपुत्रदुहितृपरतावस्थाप्युपेयेव।दुहितुरप्यैच्छिकविभागसंभवेनसंसर्गासंभवात्पत्न्याःस्त्रीकपाढिकं

विभागं वक्ष्यत्येवानव भ्रातृमात्रविषयमनपत्यस्येति वाक्यं प्रकरणादिति वाच्यं। वाक्यान्तरैकवाक्यता
यां प्रकरणाद्बलवत्वात्। अन्यथा मूलान्तरकल्पनाक्लेशापत्तेः। पत्न्याद्यपवादस्यास्य वाक्यस्य पत्न्या
द्यभाव एव विशेषणमिति विरोधात्। असंसृष्टस्यापि भ्रातुर्धनग्रहणे पुत्रपत्न्याद्यभावो विशेषणं स ए
व संसृष्टस्यापि पत्न्यविशेषेणेतद्वाक्यारंभानर्थक्यात्। तस्मादनपत्यस्येत्यादिसंसृष्टिमात्रशेषः। वि
भक्तो यः पुत्रः पत्न्यादिना पितृभ्रातृपितृव्यैः संसर्गाभिधानस्यानर्थक्यापातात्। न हि संसृष्टिवाक्ये पि
त्रादयो विषयास्तस्य भ्रातृमात्रविशेषाभिधायकत्वात्। किं च पुत्राद्यपि पित्रन्तानामभावे स्य पत्नीवा
क्येनैव भ्रातृमात्रे प्राप्तत्वात् संसृष्टिभ्रातृरितदभिधानायानपत्यस्येतिवाक्यारंभोनर्थकः। अपवाद
त्वेपि नादृष्टार्थता पत्न्यादेः संसर्गोत्पन्नस्य स्वत्वात्तस्यापि दृष्टस्यैव निर्णयादित्यलं विस्तरेण। संसृष्टिन
स्तरेण। संसृष्टिनं स्त्रकसंसृष्टीत्यस्यापवादमाह। सोदरस्य तु सोदर इति। सोदरस्य तु सोदर इति। सोद
रस्य संसृष्टिनो मृतस्य धनं सोदरः संसृष्टी जातस्य दद्यात् तदभावे स्वयमुपहरेत्। न तु संसृष्ट्यपि भिन्नोदर

वि॰दा॰१३
१८८

र्थः। भिन्नोदरे संसर्गमात्रसत्त्वात् सोदरे तु संसर्गसोदरत्वयोर्द्वयोः सत्त्वात्। यद्वा तु सोदरः संसृष्टी न
स्ति एतदेव संसृष्टी गृह्णीयात्। यदा पुनः सोदरोऽसोदरश्चोभावपि संसृष्टिनौ न स्तस्तदा त्वसंसृष्ट्य
पि वा दद्यात् संसृष्टो नान्यमातृज इति। अस्यैवं व्याख्या। अन्योदर्यस्तु संसृष्टी वा नं हरेत् नान्योदर्य
स्वेन। नत्वन्योदर्यो नान्योदर्यो मृतस्य सोदर इति यावत्। मृतस्य संसृष्टिनः। सोदरः संसृष्टो वेन्ना
स्ति न दा भिन्नोदरोपि संसृष्टी हरेदित्यर्थः। असंसृष्ट्यपि चादद्यात् संसृष्टो नान्यमातृज इत्येतत्।
सोदरसंसृष्ट्यभावे असंसृष्ट्यपि पुत्रादिर्गृह्णीयादित्यर्थः। संसृष्टिनां तु योभागस्तेषामेव
सहृष्यते। अतोन्यथा नं शभाजो निर्वीजेष्वितरानियादिति नारदस्मरणात्। निर्वीजेषु निरप
त्येषु अपत्यानि च त्रिविधान्यपि संसृष्टानां तु क्रोः। इतरान संसृष्टिनः। संसृष्टिनोऽपत्याभा
वे दत्ता संसृष्ट्यभावे वर्गे वा क्रः। न देतत्सष्टमाह कात्यायनः। संसृष्टानां तु संसृष्टाः पृथक्

१८४

स्थानां पृथक्स्थिताः। अभावे शब्दरास्तेषां निर्बीजान्योन्यभागिन इति। अयमर्थः। संसृष्टानामंशं संसृष्टा
एव गृह्णीयुस्तदभावे पृथक्स्थिताः। अभावे शब्दराज्ञेयाः पृथक्स्था असंसृष्टिन एव गृह्णीयुस्तदभावे संसृष्टाः
न केवलं स्वाम्यभाव एवान्यस्यार्थहरत्वं किंतु त्रिविधसंसृष्टपुत्राभाव इत्याह। निर्बीजेति त्रिविधसंसृष्ट
भावेन्योन्यस्यार्थहरत्वं न तु तत्सत्त्वे। अस्य चोभयशेषतया संसृष्टा गृह्णीयुस्तेषामभावे तदपत्याभावे च पृथ
क्स्थिता इत्यर्थः पर्यवस्यति। एवं यशेषतया संसृष्टानामभावे तदपत्याभावे च पृथक्स्थिता इत्यर्थः।
पर्यवस्यति। एवं पृथक्स्थितानामपि द्रष्टव्यं। यत्तु अन्योदर्यस्य संसृष्टानान्योदर्यो धनेहरः संसृष्टीत्यन्व
यव्यतिरेकाभ्यामन्योदर्यस्य संसृष्टित्व एवांशभाक्त्वस्य साधारण्येन पृथगन्योदर्ये तदभिधानं वैयर्थ्या
च्च। न वान्योदर्यस्यैव संसृष्टित्वे नांशभाक्त्वं नान्यस्येति नियमाय वचनारंभः पित्रादीनां संसर्गिणाम
पि धनभाक्त्वाप्रसंगात् संसर्गिणामपि धनभाक्त्वप्रसंगाच्च। न चेष्टापत्तिः अग्राह्ये पित्रादिसंसर्गिविधान
वैयर्थ्यात्। अंत्ये तदभावात्त्वविरोधाच्च। यद्येवं सोदरवाक्यस्यापि संसृष्टिवाक्यापवादकत्वारंभेरोवसो

वि॰टी॰१७
२५

र्यात्सोदरसंसृष्ट्यभावे चासंसृष्टी हरेदित्यर्थः सिद्धावेतद्वाक्यानर्थक्यं तदवस्थमेवेति चेत् नासो
दरभ्रातृभ्रात्रन्योदर्यभ्रातृसत्त्वे किं द्वयोरप्युतान्यतरस्यांशभाक्त्वमित्यपेक्षायां पूर्वार्द्धप्रवृत्तेः। मा
तृपृथक्त्वात्सत्त्वभावेपि पित्रापृथक्त्वात्सन्नत्वे नांशभाक्त्वौचित्यात्। उत्तरार्द्धं त्वपवादापवादकशास्त्रम
न्तरेणोत्सर्गाप्रवृत्तेरारभ्यत इति नानर्थक्यं। अपवादकविषयाभावमात्रेणैवोत्सर्गप्रवृत्त्यंगीका
रे वानप्रस्थादिधनाधिकार्यभावेपि गुर्वादीनामधिकारापत्तेरित्यलं। यदपि संसृष्टिनो भिन्नो
दरस्यासंसृष्टिनो भिन्नोदरस्यासंसृष्टिनश्च सोदरस्य सद्भावे उभयोर्विभज्य धनग्रहणमित्युत्त
रार्द्धव्याख्यानं तदपि तथैव। अतोन्यथानंशभाजो अभावे शहराज्ञे या इति नारदकात्यायनवाक्य
विरोधात्। असंसृष्टिसंसृष्टपदयोः पूर्वत्रान्वितयोरुत्तरत्राप्यनुषंगस्य संसृष्टपदे संसृष्टित्वसो
दरत्वपरं भ्रातरोद्वयोकल्पनस्येव कोराध्याहारस्येव प्रमाणकत्वाद्वा। यच्च विभक्ताः सह जीव
न्तो विभजेरन्पुनर्यदि। समस्तत्र विभागः स्याज्ज्यैष्ठ्यं तत्र न विद्यते। एषां ज्येष्ठः कनिष्ठो वा ही

१८

येतांशप्रदानतः। म्रियेतान्यतरो वापि तस्य भागो न लुप्यते। सोदर्या विभजेरंस्तं समेत्य सहिताः समं। भ्रातरो
ये च संसृष्टा भगिन्यश्च सनाभयः। मनुवाक्ये सोदर्य इति मसंसृष्टि सोदरपरं भ्रातरो ये च संसृष्टा इत्येतच्च संसृष्टि
भिन्नोदरपरमिति व्याख्यानं प्रमाणवदाभासते तदपि न। सोदरभ्रातृपदयोर्विशेषणविशेष्यभावमात्रेण
क्तो दूरस्यापि तिवाक्यस्य सोदरपदे नैकार्थत्वसंभवे र्थांतरकल्पनाया अन्याय्यत्वात्। चवारद्वयानन्वयकल्प
नेऽपि नारदकात्यायनवाक्यविरोधापत्तेः। चकारद्वयस्याप्यवधस्वरवदिश्चेतिवदुत्तरविवक्षया भगिनी
समुच्चयार्थत्वात्। न च विशेषणानर्थक्यं भगिनीविशेषणवत् भिन्नोदरभ्रातृवारणार्थत्वात्। तस्माद्यथोक्तैव
व्याख्या साधीयसीति। अत्रापरार्कः। अपुत्रधनं भ्रातृगामीत्युक्तं तत्रायं विशेषः। संसृष्टिनः सोदरस्य मृतस्यांशं सो
दरः संसृष्टो गृह्णीयात् तस्मिन्मृते जातस्य पुत्रस्य दद्यादिति उप्रासंगिकं। सोदर्यत्वाभावे तु नांशभाक्त्वमिति। अ
न्योदर्यस्तु संसृष्टी नान्योदर्याद्धनं हरेदिति। यदा त्वन्योदर्य एव संसृष्टो न सोदरस्तदाह। असंसृष्ट्यपि वादद्या
त्सोदर्य एव नान्यमातृजः। संसृष्ट्यपीति। तदा मूलशिप्पिलं। संसृष्टिवाक्यस्य भ्रातृमात्रविषयत्वे पितृभ्र

रपित्र्यैः संसर्गाभिधानमनर्थकं तत्संसर्गेनिर्णायकवाक्यांतराभावात्। प्रकरणविच्छेदकतुशब्दवैयर्थ्या
च्च। सोदर्यनियमादेवान्योदर्यव्यावृत्तिसिद्धेर्व्यतिरेकाभिधानवैयर्थ्याच्च। संसृष्टित्वेप्यसंसृष्टित्वेप्यसंसृ
ष्टिनोंशभाक्त्वेनारदकात्यायनवचोविरोधश्चेत्फलं हृद्विरोधेन। अंशमितिसामान्योपादानेपिस्याव
रेविशेषमाहबृहस्पतिः। संसृष्टीगृह्णातिस्थावरवर्ज्जंस्थावराणांसपिण्डसमतेति। अस्यार्थः। सोदरासो
दरसंसर्गेसोदरः संसर्गेसोदरः संसृष्टिनोंशंगृह्णीयात्परंत्वविभक्तंस्थावरंवर्ज्जयित्वातस्यसोदरासोदर
साधारण्यात्। तदाहयमः। अविभक्तंस्थावरंयत्सर्वेषामेवतद्भवेत्। विभक्तंस्थावरंग्राह्यंनान्योदर्यैः
कथंचनेति। अविभक्तमाद्यविभागेयत्स्थावरंयत्सर्वेषामेवतद्भवेत्। विभक्तंस्थावरंग्राह्यंनान्योदर्यैः क
थंचनेति। अविभक्तमाद्यविभागेयत्स्थावरंतत्सर्वेषांसंसृष्टिनांसोदराणामसोदराणांचविभक्तंतुना
न्योदर्यैर्ग्राह्यंकिंतुसोदरैरेव। तदाहमनुः। एकोदरेजीवतितुसापत्नोनलभेद्धनं। स्थावरेप्येवमेवस्यान्न
देशोवेलभेनवै इति। यदपिप्रजापतिस्मरणमनर्हेनंतुयद्द्रव्यंसंहृष्टानांचतद्भवेत्। भूमिंगृहंचसंसृष्टाः प्र

गृह्णीयुर्यथांशतः इति तदपि संसृष्टानां सोदराणां भूमिं गृहं चाविभक्तमिति व्याख्येयं। एवं पुरुषधनविभागं सप्रपंचमभिधा
य स्त्रीधनविभागं विवक्षुस्तल्लक्षणमाह॥ ॥पितृमातृसुतभ्रातृदत्तमध्यग्न्युपागतमाधिवेदनिकं बंधुदत्तं शुल्कम
न्वाधेयकमिति स्त्रीधनं॥१८॥ ॥पित्रामातृसुतभ्रातृदत्तमध्यग्न्युपागतमाधिवेदनिकं बंधुदत्तं शुल्कमन्वाधेयकं
यच्च विवाहकालेग्निमधिकृत्य पितृव्यादिभ्योधिगतं तदध्यग्न्युपगतं आधिवेदनिकमधिवेदनं भार्यांतरपरिग्रह
स्तदर्थं पूर्वपत्न्यै यद्दत्तं बंधुभिर्मातुलादिभिर्यद्दत्तं तत्प्रीतिदत्तं शुल्कं पित्रादिदत्तगृहादिमूल्यं स्वकन्यामूल्यं वा। अ
न्वाधेयकं विवाहानंतरं भर्तृकुलात् पितृव्यादिभ्योधिगतं इतिकरणादध्यावहनिकं रिक्थक्रयसंविभागपरिग्र
हाधिगमहस्तांभरणलाभादिलब्धं च तत्सर्वं स्त्रीधनं ज्ञेयं। स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमहस्ताभरण
लाभादिलब्धं च तत्सर्वं स्त्रीधनं ज्ञेयं। स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमहस्ताभरणलाभास्त्रीधनं
स्मृतमिति देवलीयाच्च। तल्लक्षणमाह कात्यायनः। ऊढया कात्यायन वा पि पत्युः पितृगृहेपि वा। भ्रातुः सका
शात्पित्रोर्वा लब्धं सौदायिकं स्मृतं। ऊढया पत्युः सकाशात् कन्यया पितृगृहे पैतृकमित्रादिभ्यः पित्रादिभ्यो वा।
विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसन्निधौ। तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्त्तितं। विवाहकाले कन्यादा

नकाले। अग्निसंनिधौ होमकाले। आधिविन्नस्त्रियै दद्यादाधिवेदनिकं समं। न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं
प्रकीर्त्तितं। प्रीत्या दत्तं तु यत्किंचिच्छ्वश्र्वा वा श्वशुरेण वा। पादवंदनिकं यत्तु प्रीतिदत्तं तदुच्यते। गृहोप
रवाह्यानां दोह्याभरणकर्मिणां। मूल्येलब्धं तु यत्किंचिच्छुल्कं तत्परिकीर्त्तितं। पित्रादिदत्तस्य गृहादेः। आ
त्रादिगामित्वश्रवणात्। उपस्करः उलूखलादिः। वाह्यो वृषभादिः। दोह्यो गवादिः। आभरणं विवाह
कालीनं। कर्मिणो दासाद्याः। मूल्यं भाटकादि वा। विवाहात्परतो यत्तु लब्धं भर्तृकुलात्स्त्रिया। भर्तुः पित्रोः
सकाशाद्वा अन्वाधेयं तदुच्यते। यत्पुनर्लभते नारी नीयमाना पितुर्गृहात्। अध्यावहनिकं नाम स्त्रीधनं
तदुदाहृतमिति। व्यासोपि विवाहकाले यत्किंचिद्वरायोद्दिश्य प्रदायते। कन्यायास्तद्धनं सर्वमविभाज्यं स्व
बंधुभिरिति। कन्यायामित्युद्दिश्य अन्यथोद्वाहिकस्य पृथगभावेन विभागनिषेधानुपपत्तेः। बंधुव
चनात्तु तैर्विभाज्यमेव। यद्दत्तं दुहितुः पत्ये स्त्रियमे[illegible]दंन्नियात्। मृते जीवति वा पत्यौ न तदपत्य मृते
स्त्रिया इति स्मरणात्। स्त्रिया इति तद्धनं तदपत्यं प्राप्नोति। पित्रादिदेये विशेषमाह कात्यायनः। पितृ
मातृपतिभ्रातृज्ञातिभिः स्त्रीधनं स्त्रियै। यथाशक्त्या द्विसाहस्रो दातव्यः स्थावरादृते इति। द्विसाह

स्वं कार्षापणानां द्विसहस्रपणो दायः स्त्रियै देयो धनस्येति व्यासस्मरणात्। इयमपि संख्या प्रत्यब्ददेये सकृदे
वानेकाब्दपर्याप्तधनदाने तु नेयं संख्या नापि स्थावरपर्यन्तदासः। दद्याद्वृत्तेनापर्याप्तं क्षेत्रांशं वा यदीच्छतीति वाईस्मृत्यात्।
उक्तलक्षणे च स्त्रीधने स्त्रीणां स्वातंत्र्यमेव। सौदायिके सदा स्त्रीणां स्वातंत्र्यं परिकीर्तितं। विक्रये चैव दाने च यथेष्टं स्थावरेष्व
पीति कात्यायनस्मरणात्। सौदायिकं च स्त्रीधनमात्रोपलक्षणं। सौदायिकं धनं प्राप्य स्त्रीणां स्वातंत्र्यमिष्यते। यस्मा
त्तदानृशंस्यार्थं तैर्दत्तं तत्प्रजीवनमिति हेतोः सर्वत्र सत्वात्। आनृशंस्यमनुकंपा सेवा वार्थः प्रयोजनं यस्य। प्रजीवनं जी
वनप्रकर्षोपायकं। यत्तु भर्तृदायं मृते पत्यौ विन्यसेत्स्त्री यथेष्टतः। विद्यमानेषु संरक्षेत् क्षपयेत्तत्कुलेऽन्यथा। अपुत्रा शय
नं भर्तुः पालयंती गुरौ स्थिता। भुंजीतामरणात् क्षांता दायादा ऊर्ध्वमाप्नुयुरिति तन्नैवोक्तं। तदुभयमपि भर्तृदत्तद्विविधसौदा
यिकविषयं भर्तृदायोपक्रमात्। तत्राद्येन जंगमव्यवस्था मृते स्वातंत्र्याज्ञापितेति गम्यते। स्वातंत्र्यापवादमाह।
विद्यमानेषु दुहित्रादिदायादेषु तं संरक्षेन्न स्वेच्छया व्ययाकुर्यात्। पितृधने पुत्राणामिव मातृधने पुत्रीणामपि जन्म
नैव स्वत्वेन साधारण्यात्। न चैवं पुत्रीच्छया विभागः पित्रर्जिते पुत्राणामिव मात्रर्जिते पुत्रीणामपि पारतंत्र्यात्।
अन्यथा दुहित्रभावे तत्कुले दुहितृकुले दौहित्रादौ वा क्षपयेद्दद्यात्। अन्यथेति वचनात् दुहितृसत्वे दौहित्रादीनाम

नधिकारेणपैतामहे पौत्राणामिव मातामहीधने दौहित्रीदुयानविभागः। मातुर्दुहितरोऽभावे दुहितॄणां तदन्वय
इति नारदस्मरणात्। भर्तृग्रहणाच्छ्वशुरदत्तेस्यावरेस्याः तंत्रमेवा यथाह बृहस्पतिः। स्थावरादिधनं स्त्रीभ्यो यदत्तं श्व
शुरेण तु। न तच्छक्यमपाकर्तुं पुत्रैरपि हि कर्हिचिदिति। अनेन मृते भर्तरि भर्तृशीलं भजेत्कुलपालिका। यावज्जीवं
हि न स्वाम्यं दानाधमनविक्रय इति। कात्यायनवाक्यमपि व्याख्यातं भर्तृदत्तस्य स्थावरस्य भ्रातृगामित्वे न भर्तृ
दत्तस्य तद्भ्रात्रादिगामित्वस्यैवौचित्यात्। अपुत्रेति विशेषणात्तु न पौत्रदौहित्रयादुहितृसत्त्वेपि दायादाएवातु
युर्न दुहितरः। अपुत्रपदसामर्थ्यात्। अन्यथा प्रजेत्येवावदिष्यदित्यलं विस्तरेण। पित्रादिदत्तस्यापि क्वचित्स्त्री
धनत्वापवादमाह। कात्यायनः। तत्र सोपाधि यदत्तं यत्स्त्रयोगवशेन वा। पित्रा भ्रात्राथवा पत्या न तत्स्त्रीधनमि
ष्यत इति। उत्सवादौ शोभार्थं दानमुपाधिः। योगः संभोगाद्यर्थः छलं। तथा स्वयमपि शिल्पैर्यदर्जितं तेन स्वातंत्र्यं
प्राप्तं शिल्पैस्तु यदत्तं प्रीत्या चैव यदन्यतः। भर्तुः स्वाम्यं सदा तत्र शेषं तु स्त्रीधनं स्मृतमिति कात्यायनस्मरणात्। भ
र्तुः शिल्पैः तंतुवायादिस्त्रीभिर्यद्वस्त्रवानादिभिः प्राप्तं। भर्तुः प्रीत्या च यद्दत्तं तत्र शेषं तु स्त्रीधनं स्मृतमि
ति व्याख्येयं। अन्यथा स्वार्जनस्य स्वत्वानापादकत्वापत्तेः। स्त्रीधनमुक्त्वेदानीं तद्विभागमाह॥ ॥ब्राह्म

दिषुचतुर्षुविवाहेष्वप्रजायामतीतायांतद्भर्तुः॥१४५॥ ॥ब्राह्मदैवार्षप्राजापत्यैश्चतुर्भिर्विवाहैरूढायामप्रजायांव
द्यमाणदुहित्रादिसंततिरहितायामतीतायांमृतायांतत्पूर्वोक्तंस्त्रीधनंभर्तुर्भवति।यथाहमनुः।ब्राह्मदैवा
र्षगांधर्वप्राजापत्येषुयद्धनं।अप्रजायामतीतायांमृतायांतत्पूर्वोक्तंस्त्रीधनंभर्तुर्भवति।यथाहमनुः।पुत्रिका
धनमपिभर्तुरेवेत्याहसएव।अप्रजायांमृतायांतुपुत्रिकायांकथंचन।धनंतत्पुत्रिकाभर्ताहरेदेवाविचारय
न्निति।पुत्रिकावास्यांयोजायतेपुत्रइत्येवंद्रष्टव्या।भर्त्रभावेभर्तृसपिण्डाःपूर्वोक्तप्रत्यासत्तिक्रमेणगृह्णीयुः
अप्रजायामतीतायांबांधवास्तदवाप्नुयुरितियोगिस्मरणात्।ब्राह्मादिविशेषणव्यावर्त्यमाह॥ ॥शेषे
षुचपिताहरेत्॥२०॥ ॥शेषेष्वासुरगांधर्वराक्षसपैशाचविवाहोढाष्वप्रजःस्त्रीधनंपिताचकारान्मातावा
हरेत्।तत्रप्रथमंमातापश्चात्पितेतिज्ञेयं।दुहितृषुमात्रवयवाधिक्येनमातुःप्रत्यासत्त्यतिशयात्।यथाह
कात्यायनः।आसुरादिषुयल्लब्धंस्त्रीधनंपैतृकंस्त्रिया।अभावेतदपत्यानांमातापित्रोस्तदिष्यतइति।पैतृ
कंपित्रादिभ्योलब्धं।शुल्काख्यस्त्रीधनेतुविशेषमाहगौतमः।भगिनीशुल्कंसोदर्याणामूर्ध्वंमातुः।पूर्वंचै

कश्चित्। इत्यत्रापेक्षो विकल्पः। यत्तु तेनैवोक्तं स्वं च शुल्कं वोढा हरेदिति तत्प्राक्संस्कारान्मृतायां ज्ञेयं। मृता
यां सर्वमादद्यात्परिशेषोभयव्यतियोगिस्मरणात्। तदुभयाभावे पत्युरेव। यथाह बौधायनः। ऋक्थं
मृतायाः कन्याया गृह्णीयुः सोदराः स्वयं। तदभावे भवेन्मातुस्तदभावे पितुर्भवेदिति। रिक्थं शुल्कं।
इयं मे पुत्र इत्येतस्यां पुत्रिकायां तु विशेषमाह पैठीनसिः। प्रेतायां पुत्रिकायां न भर्त्रा द्रव्यमर्हत्यपुत्रायां
कुमार्यां माता स्वमादानं कुर्यादिति। पित्राद्यभावे तु भर्तृगाम्येव। यथाह कात्यायनः। बन्धुदत्तं तु बन्धू
नामभावे भर्तृगामि तदिति। वैयवः पित्रादयः। प्रसूतायास्तूभयापवादमाह॥ ॥सर्वेष्वेव प्रसूतायां
यद्धनं तद्दुहितृगामि॥२१॥ ॥सर्वेष्वेवाष्टस्वपि विवाहेषु परिणीतायां यद्धनं तत्प्रसूतायां संततिमत्यां
तस्यां दुहितृगाम्येव भवति। न भर्तृगामि पितृगामि वा। दुहितृग्रहणान्न पुत्रादिगामि। दुहितॄणां प्र
सूता चेदिति योगिस्मरणात्। यच्च पत्न्यधनं दुहित्रोः सामान्येनोपादानं तदाविवाहवत्स्यादृष्टव्या। सा चे
त्स्यां। उक्तलक्षणेषु स्त्रीधनेषु यद्व्यतिरिक्तं तद्दुहितृ प्रविक्रमा[illegible]श्च लभन्ते नोढाः। मातुस्त्रीयौतकं

यत्स्यात्कुमारीभाग एव स इति स्मृत्यनुस्मरणात्। यौतकं विवाहकालेलब्धं। पारिणेयं स्त्रियो विभ
जेरन्निति वसिष्ठस्मरणात्। पारिणेयं परिणयनकालीनं। स्त्रियः कुमार्यः। कुमारीवदप्रतिष्ठितापि।
कुमार्यभावे तद्दापिकन्येवदभ्रतेन पुत्रः। गुणलोपे तु गुण्यस्येति न्यायात् दुहितृपदसामर्थ्याच्च। एवमप्रतिष्ठिताभा
वे प्रतिष्ठितापीति द्रष्टव्यं। अन्वाधेयं तु स्त्रीपुंनपुंसकसाधारणं प्रजायामेव। यथाह मनुः। अन्वाधेयं तु यद्दत्तं प्रत्या
प्रीतेन वा पुनः। पत्यौ जीवति वृत्ता याः स्त्रीधनं मेवेदिति। श्लोके तत्कमेव प्राकृ। सौदायिके स्थावरे जंगमे च विशेषमाह
कात्यायनः। पितृभ्यां चैव यद्दत्तं दुहितुः स्थावरं धनं। अप्रजायामतीतायां भ्रातृगामि तु सर्वदेति। चकाराद्भ्रा
तृपितृव्यादिदत्तमपि। अप्रजात्वविशेषणात्तत्सत्वे सैव लभ्यते न भ्रातरः। तत्रापि प्रथमं दुहितरस्तदभावे पुत्रादय
इति। सर्वदा सर्वविवाहेषु नासुरादिष्वेवेति। यत्तु पुत्रस्य पितुर्विभागकाले पत्युर्वीज्यत्वेन मात्रा लब्धं तत्सुतैर्दु
हितृभिश्च समं विभाज्यं। यथाह मनुः। जनन्यां संस्थितायां तु समं सर्वे सहोदराः। भजेरन्मातृकं रिक्थं भगिन्यश्च
सनाभय इति। भगिन्यश्च कुमार्यः। समं सर्वे सहोदरा मातृकं रिक्थमर्हन्ति कुमार्यश्चेति शंखलिखितस्मरणात्।

152

सामान्यं पुत्रकन्यानां मृतायां स्त्रीधनं स्त्रियामिति देवलस्मरणाच्च। ऊढास्तु चतुर्थांशमात्रं लभन्ते न सम
तदाहबृहस्पतिः। स्त्रीधनं तदपत्यानां दुहिता च तदंशिनी। अप्रत्ता चेत्समूढा तु लभते मानमात्रकमिति। अ
नूढानां पितृधनं दृष्टोढानां मातृधने चतुर्थांश इति शंखः। यत्त्वप्रत्तायास्तु दुहितुः स्त्रीधनं परिकीर्तितं पुत्रस्तु
नैव लभते प्रत्तायां तु समांशभागिति पारस्करवचनं तत्त्रिपाद्यायौतकं कुमारीभाग इत्याह। शेषेण च यौतका
तिरिक्ते स्त्रीधने प्रत्तापुत्रयोस्तुल्यांशभागित्वे प्राप्तत्वात्। भगिन्यो बांधवैः सार्धं विभजेरन् सभर्तृकाः। स्त्रीधन
स्येति धर्मोऽयं विभागस्तु समः स्मृत इति कात्यायनस्मरणाच्च। एतेन तत्र भ्रन्योः संभूयांशहरत्वं नास्ति। इतरेतरयोग
स्य द्वंद्वैकशेषाभावादप्रतीतेरिति पारास्तं चार्थे द्वंद्व इत्यनेन इतरेतरयोगस्य प्रथमं वाच्यत्वात् सामान्यं पुत्रकन्यानामि
ति द्वंद्वश्रवणाच्च। यौतकव्यतिरिक्ते तु सर्वत्र दुहितृदौहित्रीसमवाये दौहित्रीणामपि किंचिद्दातव्यं यथाह मनुः। यास्ता
सां स्युर्दुहितरस्तासामपि यथार्हतः। मातामह्या धनात्किंचित्प्रदेयं प्रीतिपूर्वकमिति। मृतमातृकाणां दौहित्रीणां तु
पितृतो भागकल्पनिन्यायात् पुत्रदुहित्रादिभिः समवाये समांशभाक् मे वा दुहित्रभावे तु रिक्थं पुत्र एव लभते न दौहि

नः। दुहितॄणामभावे तु रिक्थं पुत्रेषु तद्भवेदिति कात्यायनस्मरणात्। पुत्राभावे दौहित्रस्तदभावे च दौहित्रपुत्रस्तस्याप्यभावे
स्वस्रीयाद्या अविशेषेण सर्वधनभाज इत्याह बृहस्पतिः। मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा। श्वश्रूः पूर्वजपत्नी
च मातृतुल्याः प्रकीर्तिताः। यदासामौरसो न स्यात्सुतो दौहित्र एव वा। तत्सुतो वा धनं तासां स्वस्रीयाद्याः समाप्नुयुरि
ति। आदिशब्देन यस्य मातुलानी स इत्यादि द्रष्टव्यं। पूर्वजोऽग्रजः। यद्यप्यत्र पुत्राभावे दौहित्रः श्रूयते तथापि पुत्र इति स
द्भावेऽपि दौहित्रीणां किंचिद्धनसंबंधश्रवणात्तदभावे सर्वधनसंबंधस्याप्रतिबंधान्मातावयवाधिक्येन च दौहित्रापेक्ष
याप्रत्यासन्नत्वाच्च दौहित्र्यभावे दौहित्रो धनभागवधेयः। अत्राप्ययं विशेषः। पत्युः पितृकुलागतं तत्स्वस्रीयाद्याः। यद्भर्तृ
कुलागतं तद्देवराद्या गृह्णीयुर्जामातात्मजयमप्यविशेषात्। पितृधनविभागशेषमाह॥ ॥पत्यौ जीवति यः स्त्रीभि
रलंकारो धृतो भवेत्। न तं भजेरन्दायादा भजमानाः पतन्ति ते॥२३॥ ॥ष्टेऽपतिना स्वपत्न्यै स्नुषाभ्यो वा विवाहकाले
योऽलंकारो दत्तस्ताभिश्चासौ धृतः परिहितो भवेन्न तथैव स्थापितस्तं विभागकाले दायादाः पुत्रभ्रात्रादयो जीवति प
त्यौ न भजेरन्। किंतु यस्याः सोऽलंकारस्तस्या विभाग एव तं दद्युः। यथासौ वत्तं परिदध्यात्। न तु पत्यौ जीवति यो धृ
तः स मृतेऽप्यविभाज्य इति अदृष्टार्थतापत्तेः। एतेन सर्वथा सोऽविभाज्य इत्यपि निरस्तं। अथालंकारसौंदर्यलो

न्यूतेतस्मिन्नन्येनापियहलेन(

भेन भजं तेन तदा पत्तिता भवंति। जीवती ति विशेषणा[ं] दोषः। पैतामहद्रव्यविभागशेषमाह॥ ॥अनेक
पितृकाणां तु पितृतो भागकल्पना। यस्य यत्पैतृकं रिक्थं स तद्गृह्णीत नेतरः॥२३॥ ॥अनेके पितरो येषां पौ
त्राणां ते समा विषमा वा यदा पैतामहं धनं विभजेयुस्तदा तेषां पितृसंख्ययैवांशकल्पना भवति न स्वसंख्यया
प्रत्येकं समा। अयमर्थः। यदैकस्य त्रयः पुत्रास्तेषां च कस्य चिदेकः कस्यचित्द्वौ कस्यचित्त्रयस्तदा तेत्रीनेव समा
नभागान्कुर्युर्न तु षट् समानजातीयाश्चेत्पितरः। विजातीयानां तु पितृणां यस्य यावानंशोऽवस्यते तमेवांशं त
त्पुत्रो लभते न न्यूनाधिकमधमोऽत्र भसाम्येन। यथाह बृहस्पतिः। समवेतैस्तु यत्प्राप्तं सर्वैस्तत्र समांशिनः। तत्पुत्रो
स्मृता इति। यद्यप्यस्य पैतामहद्रव्यविषयत्वमाहत्य न प्रतीयते तथापि पितृतो भागकल्पनानुपपत्त्या यस्मिन्द्रव्ये पौ
त्राणां पितृद्वारकं स्वत्वं तद्विषयत्वं पर्यवस्यति। अत्रैव पुत्रपौत्रसमवाये विशेषमाह कात्यायनः। अविभक्ते सुते प्रे
ते तत्सुतं रिक्थभागिनं। कुर्वीत जीवनं येन लब्धं नैव पितामहात्। लभेतांशं तु पित्र्यं तु पितृव्यात्तस्य वा सुतात्। स एव
वांशस्तु सर्वेषां भ्रातॄणां न्यायतो भवेत्। लभेत तत्सुतो वापि निवृत्तिः परतो भवेदिति। अविभक्ते पितरि प्रेते पुत्रः
पितामहाद्यप्रांशः पितृव्यात्तत्पुत्राद्वान्यो वा स्वपित्र्यंशं गृह्णीयात्तमेवांशं भ्रातृभ्यो विभजेदेवं पुत्रस्तत्पौत्रो पिपं

विषमसमा:
भागहरा:

वमः पंचमान्न लभेतइत्युक्तं। यदा त्वविभक्तेषु भ्रातृषु केनचित्पुत्रमातामहाद्द्रव्यं लब्धं तदा तदपि सर्वैर्विभाज्यमिति वाहा। यस्य पि
त्रा पन्मातामहद्रव्यं लब्धं स एव तद्गृह्णीयान्नेतरभ्रातर इति। अनेनाविभक्तार्जितस्यापि तादृशस्याविभाज्यत्वमुक्तं। नक्थपद्र
णात्प्रतिग्रहाद्यर्जितं विभाज्यमेवेपरं कस्य भागद्वयं कल्प्यं। येन चैषां स्वयमुपार्जितं स्यात्स द्व्यंशमेव लभेतेति स्मरणात्। संभू
योत्याने तु समांशतैव। एवं प्रपितामहाद्धनविभागोपि पितामहसंख्यातः। यद्वा। एकस्यामेव योषिति यदा बहुभिः पु
त्रा जन्यंते तदा तेषां कथं विभाग इत्यत आह। अनेकपितृकाणामिति। यो येन जनितः स तस्यैव ऋक्थभागित्यर्थः। यथाह
बृहस्पतिः। यद्येकक्षेत्रिणौ स्यातामौरसक्षेत्रजौ सुतौ। यस्य यत्पैतृकं ऋक्थं स तद्गृह्णीत नेतर इति। नायं पारिभाषिकः
क्षेत्रजस्तस्य पूर्वं विभागान्तराम्नानात्। किंतु द्वे त्रमात्रोत्पन्न इति ध्येयं। द्वौ तु यौ विवदेयातां द्वाभ्यां जातौ स्त्रियां धनेत
योर्यद्यस्य पित्र्यं स्यात्तत्स गृह्णीत नेतर इति मानवात्। हद्वयाज्ञवल्क्यः। विभागधर्मसंदेहेवंधुसंदेहो दायादानां परस्परं
पुनर्विभागः कर्त्तव्यः पृथक्स्थानस्थितैरपीति। यत्र संदेहो युक्तिभिरपि नापैति। तत्र पुनर्विभागः कर्त्तव्य इत्यर्थः। एत
त्तेनैवोक्तं सकृदंशो निपतति सकृत्कन्या प्रदीयते। सकृदाह ददानीति त्रीण्येतानि सकृत्सकृदिति तद्यु
क्त्यादिभिर्निर्णेतुं शक्योऽसत्यां वेदितव्यं। स्वयंकृतस्य संदिग्धस्य पुनः प्रवर्त्तको राज्ञा दंडनीय इत्याहह

इस्पतिः। स्वेच्छाकृते विभागे यः पुनरेव विसंवदेत्। स शास्यः स्वके स्थाप्यः शासनीयोऽनुबंधकृत इति। अनु
बंधतो निर्बंधतः॥ ॥इति श्रीधर्माधिकारि विष्णुस्मृतिविवृतौ आमन्यां वै
जयंत्यां सप्तदशोऽध्यायः॥ ॥पूर्वाध्याये पित्र्यांशक्लृप्तिरुक्ता तत्र यज्जातीयस्य यावानंशस्तमष्टादशेनाभि
धातुं प्रक्रमते। तत्र ब्राह्मणपुत्राणां तावदाह॥ ॥ब्राह्मणस्य चतुर्षु वर्णेषु चेत्पुत्रा भवेयुस्ते पैतृकं रिक्थं दश
धा विभजेयुः॥१॥ ॥यदि विप्रस्य चातुर्वर्णिकस्त्रीशृक्लसंज्ञाः पुत्रा भवेयुस्ते पैतृकं रिक्थं पुत्राणामनित्यतो
क्तात इत्यनेन पुत्रकर्तृके विभाग एवेयमंशकल्पना नियता न पितृकर्तृके तत्र पितुरिच्छया एव नियामकत्वा
त्। पैतृकमिति पैतामहमपि तस्यापि पितृतो भागकल्पनात्। पैतृकमिति सामान्योपादानेपि प्रतिग्रहलब्ध
भूव्यतिरिक्तमिति ज्ञेयं। यथाह बृहस्पतिः। न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै। यद्यप्येषां पिता दद्यान्मृ
ते विप्रासुतो हरेदिति। प्रतिग्रहशब्दात् क्रयादिलब्धा देयैव। सापि न शूद्रापुत्राय यस्मान्न द्विजातिभिर्जातो न भूमेर्भा
गमर्हतीति स्मरणात्। भूमिः स्वयमर्जितं क्षेत्रं न क्रमागतं गृहं वा। ब्रह्मदायं गतां भूमिं यो ब्राह्मणीसुतः। गृहं द्वि
जातीयः सर्वं तथा क्षेत्रं क्रमागतमिति बृहन्मनुस्मरणात्। ब्रह्मदायः प्रतिग्रहः। दशानां विनियोगमाह॥ ॥तत्र

ह्मणीपुत्रश्चतुरोंऽशानादद्यात्॥३॥ ॥तत्र चातुर्वर्णिकेषु पुत्रेषु दशसु भागेषु विप्रस्य विप्रापुत्रश्चतुरोंऽशान् गृह्णीयात्॥
किं च॥ ॥क्षत्रियापुत्रस्त्रीन्॥३॥ ॥विप्रात् क्षत्रियोत्पन्नस्त्रीणंऽशानादद्यात्॥ किं च॥ ॥द्वावंशौ वैश्यापुत्रः॥४॥ ॥
विप्राद्वैश्योत्पन्नो द्वावंशौ गृह्णीयात्॥ अंशात्तु दत्तावप्यंशोपादाने विकृतस्यानुषंगाभावबोधनाय। सं ते वायुर्वा
तेन गच्छतां सं यजत्रैरंगानीतिवत् तेनोत्तरत्रैकवचनान्तस्याध्याहारः। मनुस्तु वैश्याजो ध्यर्द्धमेवांशमित्याह किं
च॥ ॥शूद्रापुत्रस्त्वेकं॥५॥ ॥विप्रात् शूद्रोत्पन्नस्त्वेकमंशं गृह्णीयात्। यत्तु ब्राह्मणक्षत्रियविशां शूद्रापुत्रो नऋ
क्थभाक्। यदेवास्य पिता दद्यात्तदेवास्य धनं भवेदिति मानवं तदनूढशूद्रापुत्रविषयं। ब्राह्मणस्यानुपूर्व्येण चतस्र
स्तु यदा स्त्रिय इत्युपक्रम्यांशं शूद्रासुतो हरेदिति तेनैवाभिधानात्। अत्र शंखलिखितौ विशेषमाहतुः। असवर्णस्त्रीजा
तानां दायाद्दर्द्धोद्धारान्निर्वर्णक्रमेणेति। अर्थः। ब्राह्मणीपुत्रात् क्षत्रियादिपुत्राणामर्द्धोद्धारान्यांशो देय इति। यथा।
अष्टावंशा ब्राह्मणीपुत्रस्य चत्वारः क्षत्रियापुत्रस्य द्वौ वैश्यापुत्रस्यैकः शूद्रापुत्रस्येति। सोयमंशभेदो गुणगुणा
भ्यां च वस्थाप्यः। अनयैव दिशा क्षत्रियादिष्वपि कल्प्यं। एवं चातुर्वर्णिकपुत्रचतुष्टयसमवाये विभाग उक्त इदानीं

त्रित्रिसमवायेतामाह।। ।।अथचेच्छूद्रवर्जं ब्राह्मणस्य पुत्रत्रयं भवेत्तदा तद्धनं नवधा विभजेयुः। ह।। ।।यदा पुनर्वि
प्रस्य शूद्रापुत्रवर्जं विप्रक्षत्रियवैश्यास्त्रय एव पुत्रा भावेयुस्तदा पितृधनं नवधा कुर्युः। तद्विनियोगमाह।। ।।वर्णा
नुक्रमेण चतुस्त्रिद्विभागीकृतानंशानाददीयुः।।७।। ।।विप्रक्षत्रियशूद्रा एव पुत्रा भावेयुस्तदा ते पितृधनमष्टधा कृत्वा
क्रमेण चतुरस्त्रीनेकं च गृह्णीयुः किंच।। ।।यदा विप्रस्य क्षत्रियवर्जं।। ।।विप्रवैश्यशूद्रा एव पुत्रा भवेयुस्तदा ते
पितृधनं सप्तधा विभज्य क्रमेण चतुरो द्वावेकं चांशं गृह्णीयुः किंच।। ।।ब्राह्मणवर्जं षड्भाकृतं त्रीन् द्वावेकं च।।९।।
यदा विप्रस्य क्षत्रियवैश्यशूद्रा एव पुत्रा भावेयुस्तदा ते पितृधनं षोढा विभज्य क्रमेण त्रीन् द्वावेकं वांशं गृह्णीयु
उक्तमर्थं क्षत्रियस्य त्रैवर्णिकपुत्रेषु यो विभागः स एव क्षत्रियस्यापि त्रैवर्णिकपुत्रेषु तत्स्यापि विप्रपुत्राभावा
त्। अयमर्थः। ते पितृषोढा पितृधनं विभज्य त्रीन् द्वावेकं चांशमाददीयुः अत्र विशेषो महाभारते। भीष्म उपाच क्ष
त्रियस्यापि भार्ये द्वे विहिते कुरुनंदन। तृतीया वा भवेच्छूद्रा न तु दृष्टा ततः क्वचित्। अष्टधा तु भवेत्कार्यं क्षत्रि
यस्य युधिष्ठिर। क्षत्रियायाहरेत्पुत्रश्चतुरोंशान्पितुर्धनात्। युद्धोपचारिकं यच्च पितुरासीद्धरेत्स तत्। वैश्यापुत्र

स्तं भागं स्त्रीन् शूद्राउत्तस्तथाष्टमांसो पि दत्तं हरेत् पित्रा नादत्तं हर्तुमर्हतीति। एवं त्रित्रिसमवाये विभाग उक्त इदानीं द्वि
द्विसमवायेतमाह॥ ॥अथ ब्राह्मणक्षत्रियोपुत्रो स्यातां तदा सप्तधा कृत्ताद्धनाद्ब्राह्मणश्चतुरोंशानादद्यात्॥१२॥ ॥यदा
विप्रस्य विप्रक्षत्रियावेव पुत्रौ स्यातां तदा पितृधनं सप्तधा कृत्वा तेषु विप्रश्चतुरोंशानादद्यात्। किंच॥ ॥त्रीन् राजन्यः
॥१३॥ ॥सप्तस्य वशिष्टान् त्रीनंशान् क्षत्रियश्चादद्यात्। किंच॥ ॥अथ ब्राह्मणस्य ब्राह्मणवैश्यौ तदा षड्धा विभक्त
स्य चतुरोंशान् ब्राह्मणस्त्वादद्यात्॥१४॥ ॥यदा विप्रस्य विप्रवैश्या स्यातां तदा पितृधनं षोढा विभज्य तत्र चतुरो
शान् विप्रः प्रथममादद्यात्। किंच॥ ॥द्वावंशौ वैश्यः॥१५॥ ॥षड्भ्य वशिष्टौ द्वावंशौ वैश्यो गृह्णीयात्। किंच॥ ॥अथ
ब्राह्मणस्य ब्राह्मणशूद्रौ पुत्रौ स्यातां तदा तद्धनं पंचधा विभजेयातां॥१६॥ ॥यदा विप्रस्य विप्रशूद्रावेव पुत्रौ स्या
तां तदा पितृधनं पंचधा विभजेयातां। तद्विनियोगमाह॥ ॥चतुरोंशान् ब्राह्मणस्त्वादद्यात्॥१७॥ ॥पंचसु च
तुरोंशान्। किंच॥ ॥एकं शूद्रः॥१८॥ ॥पंचस्य वशिष्टमेकमंशं शूद्रो गृह्णीयात्। एवं विप्रविषये विभाग उ
क्त इदानीं विप्रक्षत्रिययोर्द्विद्विसमवायेनमाह॥ ॥अथ ब्राह्मणस्य क्षत्रियस्य वा क्षत्रिवैश्यौ पुत्रौ स्यातां तदा

तद्धनंपंचधाविभजेयातां॥१९॥ ॥यदाविप्रक्षत्रिययोःक्षत्रियवैश्यावेवपुत्रौस्यातांतदापितृधनंपंचधाविभजे
यातांतद्विनियोगमाह॥ ॥त्रीनंशान्क्षत्रियस्तावद्दद्यात्॥२०॥ ॥पंचसुत्रीनंशान्क्षत्रियोगृह्णीयात्।किं
च॥ ॥द्वावंशौवैश्यः॥२१॥ ॥पंचस्ववशिष्टौद्वावंशौवैश्योगृह्णीयात्।किंच॥ ॥ब्राह्मणस्यक्षत्रियस्यवाक्ष
त्रियशूद्रौपुत्रौस्यातांतदातौपितृधनंचतुर्धाविभजेयातांतद्विनियोगमाह॥ ॥त्रीनंशान्क्षत्रियस्तावद्
द्यात्॥२३॥ ॥चतुर्ष्वंशेषुत्रीणंशान्क्षत्रियःप्रथममादद्यात्।किंच॥ ॥एकंशूद्रः॥२४॥ ॥चतुर्ष्ववशिष्टमे
कमंशंशूद्रोगृह्णीयात्।एवंविप्रक्षत्रियविषयेविभागमुक्त्वेदानींविप्रक्षत्रविशांद्विद्विसमवायेतमाह॥ ॥ब्रा
ह्मणस्यक्षत्रियस्यवैश्यस्यवावैश्यशूद्रौपुत्रौस्यातांतदातद्धनंत्रिधाविभजेयातां॥२५॥ ॥यदाविप्रक्षत्रवि
शांवैश्यशूद्रावेवपुत्रौस्यातांतदातौपितृधनंत्रिधाविभजेयातांतद्विनियोगमाह॥ ॥द्वावंशौवैश्यस्तावद्द्या
त्॥२६॥ ॥त्रिष्वंशेषुद्वावंशौवैश्यःप्रथममादद्यात्।किंच॥ ॥एकंशूद्रः॥२७॥ ॥एकैवहिभवेद्भार्यावैश्य
स्यकृतनंदना।द्वितीयापिभवेच्छूद्रानतुदृष्टांततःक्वचित्।पंचधातुभवेत्कार्यंवैश्यस्यभरतर्षभ।वैश्यापुत्र

स्त्व स्वक्षीयाञ्चतुरोंशान्पितुर्द्धनात् ।पंचमस्तु भवेद्भागः शूद्रापुत्राय भारत ।सोपि दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति ।इति ।एं
वंचातुमर्हतीति द्वित्वचतुःसमवाये शकल्पनास्तुक्तैदानीमेकाकिनां तदपवादमाह ॥ ॥ अथैकपुत्रा ब्राह्मणस्य ब्राह्
णक्षत्रियवैश्यास्तदा सर्वहराः ॥ १८ ॥ ॥ यदा विप्रस्य विप्रक्षत्रियविशामन्यतम एवैकपुत्रः स्याति यावत् तदा ते सर्वह
राः । यदा य एव पुत्रस्तदा स एव सर्वपितृधनं गृह्णीयादित्यर्थः । यद्यपि तत्स्वामिनाशादेव तत्सत्वोत्पत्तेर्न वक्तव्यं तथापि म
तस्वत्वाविशेषात्रिभागापवादायेति नानर्थकं । तेन चैकपुत्राया मातुर्यावज्जीवं भरणमेव नांशभाक्त्वमिति वक्ष्यते
किंच ॥ ॥ क्षत्रियस्य राजन्यवैश्यौ ॥ १९ ॥ ॥ यदा क्षत्रियस्य क्षत्रियो वैश्यो वा एक एव पुत्रस्तदा सो सर्व एव हरेत् । किंच ॥ ॥
वैश्यस्य वैश्यः ॥ २० ॥ ॥ वैश्यस्य वैश्य एवैकः पुत्रश्चेत्तदा सौ सर्वहरश्च हरेत् । किंच ॥ ॥ शूद्रः शूद्रस्य ॥ २१ ॥ ॥ शूद्रस्य शूद्र
एवैकः पुत्रश्चेत्तदा सौ सर्वमेव हरेत् । द्विजपुत्रा द्विजा एव सर्वहराश्चेच्छूद्रस्य का गतिरित्यत आह ॥ ॥ द्विजातीनां शू
द्रस्त्वेकः पुत्रोर्द्धहरः ॥ २२ ॥ ॥ द्विजातीनां विप्रक्षत्रविशां शूद्र एव चेदेकः पुत्रस्तदा सौ न सर्वहरः किंत्वर्द्धमेव हरेत् । इ
दं च गुणवच्छूद्रपरं । निर्गुणो तु निषाद एकपुत्रस्तु विप्रस्य तृतीयभाक् । द्वौ सपिंडः सकुल्यो वा स्वधादाता यवा

वि॰२।१८
१८५

हरेदिति देवलोक्तस्तृतीयांशो ज्ञेयः। अयं तु निर्गुणेन। यच्चापि स्यात्तु सत्पुत्रो यद्यपुत्रोथवा भवेत्। नाधिकं दश
मादद्याच्छूद्रापुत्राय धर्मविदिति मानववचनं इत्थं। यद्दाद्दद्यादित्यन्यकर्तृनिर्देशात् पित्रादिकर्तृके विभागे स्वद
शमांशभागित्वं स्वकर्तृकेत्वर्द्धादिहरत्वमिति विवेकः। यत्तु ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक्। यदेवा
स्य पिता दद्यात्तदेवास्य धनं भवेदिति मानवं तदनूढशूद्रापुत्रविषयमित्युक्तं। पितृप्रसादलब्धधनविषयं वा
ज्ञेयं। शूद्रस्य दासीपुत्रे विशेषमाह योगीश्वरः। जातोऽपि दास्यां शूद्रेण कामतोंऽशहरो भवेत्। मृते पितरि कुर्युस्तं भ्रातरस्त्व
र्द्धभागिकं। अर्द्धांतरस्य विनियोगमाह।। ।।अपुत्ररिक्थस्य या गतिस्तामार्द्धस्य द्वितीयस्य।।३३।। ।।अपुत्रधनं पत्न्यभि
गामीत्यादिना येऽपुत्रधनाधिकारिणोऽभिहितास्तेनैव क्रमेणेदमर्द्धं हरेयुः। पुत्रांशकल्पनायां मातृष्वतिदेश
माह।। ।।मातरः पुत्रभागानुसारभागभागापहारिण्यः।।३७।। ।।यज्जातीयस्य पुत्रस्य यो भाग उक्तस्तदनुसारेणै
व तज्जातीया माताप्यंशं हरेत्। ब्राह्मणी चतुरंशानादद्यात् क्षत्रिया त्रीन् वैश्या द्वौ शूद्रैकमिति समविषमस
र्व्वाणां विभागः पूर्ववदूहनीयः। मातृशब्दः सामर्थ्यात्पुत्रकर्तृके विभागेऽतासां नियतमंशभाक्त्वं न पतिकर्तृ

१८८

कइति। अत एव यदि कुर्यात्समानंशान्पत्न्यः कार्याः समांशकाः। न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वेति यो
गिना पाक्षिक एव तासां विभाग उपन्यस्तः। यद्यप्यत्र समानांशित्वे यद्युपबंधो नांशकल्पनायामित्यंशकल्पना
या न पाक्षिकत्वं गम्यते तथापाक्ष्येत्यनुवर्त्तनात्पत्नीनां सकारणस्येच्छिकत्वेन पाक्षिकत्वसिद्धेर्न दोषः। एतदेवाभि
प्रेत्याह विज्ञानेश्वरः। भर्तुरिच्छया भार्यायाश्च पित्र्यद्रव्यविभागो भवतीति हरदत्तो पि जायापत्योर्न विभागो विद्यत
इत्यापस्तंबेन स्वत्वेत्रात्मन एवांशान्तस्याश्च पातिमन्यते इति व्याचक्षाणः मात्रंशोक्तेः पाक्षिकत्वं गमयति। पुत्र
भागाद्धरणेन चैकपुत्रस्यैव सर्वहरतया विभागाभावेन तदनुसरणायोगादंशकल्पनानास्त्येक किंतु याव
ज्जीवं भरणमात्रमेव। तथा च देवलः। एक एव सवर्णः स्याद्दायो त्र न विभज्यत इति। सवर्ण इत्यसवर्णो पि शूद्र व्यति
रिक्तः। मातुरेव चायं विभागनिषेधः पर्यवस्यति। तस्या एव तत्र स्वत्वसद्भावात्। अन्येषामेकपुत्रत्वान्न स्याः।
अत एवानेकपुत्राणां विभाग एव मातुरंशकल्पनामाह योगीश्वरः। पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेदिति।
अनेकासां पत्न्येकमेकपुत्राणां न विभागः किंतु भरणमेव। मातर इति च पितामहीनामप्युपलक्षणं। तेनापैताम

इति विभागे तासामप्यंशो देयः। पश्चाद्व्यासः। असुतास्तु पितुः पत्न्यः समानांशाः प्रकीर्त्तिताः। पितामह्याः
श्च ताः सर्वा मातृतुल्याः प्रकीर्त्तिता इति। मातृतुल्या मातृवदंशभाजः। समांशाः स्त्रीधने दत्तेऽर्द्धः। अदत्ते
पूर्णः। दत्ते त्वर्द्धं प्रकीर्त्तितमिति योगिस्मरणात्। अर्द्धमित्युपलक्षणं। भागसामान्यापादानेपि स्थावरं विने
ति द्रष्टव्यं। दत्तस्यापि कृते पत्यंशेन स्त्री स्थावरमर्हतीति वृहस्पतिस्मरणात्। अतिदेशांतरमाह॥ ॥ अनूढा
श्च दुहितरः॥३५॥ ॥ यज्जातीयाः पुत्रा यमंशं लभंते तज्जातीया अविवाहिता दुहितरोपि तमंशं लभेरन्॥
योगीश्वरस्तु तत्तज्जातीयपुत्रांशाच्चतुर्थांशं तज्जातीयकन्याया आह। असंस्कृतास्तु संस्कार्या भ्रातृ
भिः पूर्वसंस्कृतैः। भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकमिति। पुत्राणां वत्र्यो भागः साम्यं तत्स्वधने स्मृतमि
ति। अयमर्थः। यदा ब्राह्मणस्य सजातीय एकः पुत्रः कन्या चैका तदा पितृद्रव्यं द्विधा विभज्य तत्रैकं भागं चतुर्धा कृ
त्वा चतुर्थांशं कन्यायै दत्वा स्वांशमवशिष्टं सांशत्रयं पुत्रो गृह्णीयात्। एवं सजातीयकन्यापुत्रयोः साम्ये
वैषम्ये वोहनीयं। तदेतद्बहुधने। स्वल्पधने तु समोंशः इति। यत्त्वंशाद्विवृत्या विवाहोपयुक्तं द्रव्यमात्रं ल

भेता। कन्याभ्यश्च पितृद्रव्यं देयं वैवाहिकं वस्त्विति देवलवचनादिति चंद्रिकाचमत्कृतौ। तन्न। विभज्यमाने दायाद्ये कन्यालंका-
रं वैवाहिकं स्त्रीधनं च लभेतेति शंखस्मरणविरोधात्। अलंकारं स्वदत्तं वैवाहिकं विवाहोपयुक्तं स्त्रीधनं पैतृकमंशं च-
तुर्थांशादि। एवं विजातीयपुत्रसमवाये विभागमुक्त्वेदानीं सजातीयसमवायेतमाह॥ ॥समानवर्णाः पुत्राः सम-
नंशानादद्युः। इदं वैकमातृकाणां भिन्नमातृकाणां तु समसंख्यानां मातृत एव विभागः। तदाह व्यासः। समान-
जातिसंख्याये जातास्त्वेकेन सूनवः। विभिन्नमातृकास्तेषां मातृतो भागकल्पनेति। बृहस्पतिरपि। यद्येकजाता
बहवः समाना जातिसंख्यया। सापत्नास्तैर्विभक्तव्यं मातृभागकल्पनेति। तदाह व्यासः। सवर्णा भिन्नसंख्याये
विभागस्तेषु शस्यत इति। अत्र पितृपुत्रनिर्देशात्पुत्रकर्तृक एव विभागे समत्वं न पितृकर्तृक इति। समांशत्वस्य ज्ये-
ष्ठपवादमाह॥ ॥ज्येष्ठाय श्रेष्ठमुद्धारं दद्युः॥२७॥ ॥सर्वस्मिन् पितृधने यत् श्रेष्ठं गोमिथुनमुभयतोदद्युक्तो रथो
गोवृष इति। मिथुनं गवादेः। उभयतोदन्ताः अश्वाश्वतरगर्दभास्तेषामन्यतमाभ्यां युक्तो रथः। गोवृषः पुंगवः। ज्येष्ठाय
श्रेष्ठवचनेन मध्यमाय मध्यमं कनिष्ठाय च कनिष्ठमुक्तं भवति। तदाह स एव। काणखोरकूटषंडा मध्यमाय।

निकाश्चेत्। अविभक्तान्यायासीगृह्णमनोयुक्तं चतुष्पदां वैकैकं यवीयस इति। काणएकनेत्रः खोरोहद्धः खंजो
वा। कूटः संगहीनः खंडोंडरहितः गवादिषे वंरूपोनेकश्चेन्मध्यमस्योद्धारः। अविकरश्चोयद्यप्येकस्तथापि यव
वीयस एव धान्यं व्रीह्यादि। अयश्चायसं दात्रादि। एतदुभयं सर्वमेव गृहमवसथः। अनः शकटं युक्तं। ज्येष्ठस्य विंश
तिभागवद्धनात्स्वत्वारिंशदंशा इति मोमागो मध्यमकनीयसोः सिध्यतः। तदाह मनुः। ज्येष्ठस्य विंशउद्धारः सर्वद्र
व्याच्च यद्वरां। ततोऽर्द्धं मध्यमस्य तु तुरीयं तु यवीयस इति। समासितरत्सर्वं। अयमेकमातृकाणामुद्धारोनेकमातृकाणां
त्वाह गौतमः। अषभोधिको ज्येष्ठस्य। यदा तु ज्येष्ठिनेयएव ज्येष्ठस्तदा तस्य अषभषोडशागावउद्धारः। अत्रैव पक्षां
तरमाह स एव। प्रतिमातृवा स्ववर्गे भागविशेष इति। मातृसंख्यया विभक्ते धने यस्या यो ज्येष्ठस्तस्य तदीयादेवांशा
दयमुद्धारो द्रष्टव्यो न पितृधनादिति। अयमपि समानजातीयमातृकाणामुद्धारो विजातीयमातृकाणां तु ना सा
वित्याह बृहस्पतिः। विप्रेण क्षत्रियाजातो जन्मज्येष्ठो गुणान्वितः। भवेत्समांशः क्षत्रेण वैश्याजातस्तथैव चेति। ए
वमन्यत्राप्यूह्यं। ज्येष्ठं च जन्मत एव न मातृतः। सदृशस्त्रीप्रजातानां पुत्राणामविशेषतः। न मातृतो ज्येष्ठमस्ति ज

न्मतोज्येष्ठ्यमुक्तमिति मानवात्। सदृशग्रहणात् सदृशस्त्रीजातानां जन्मतोपि ज्येष्ठ्यं तेनोक्तमेव बृहस्पतिना। अवि
शेषतः सर्ववर्णेष्विति शेषः। अस्यापवादमाह मनुः। जन्मज्येष्ठेन चाह्वानं सुब्रह्मण्यास्वपि स्मृतं। यमयोश्चैव गर्भतो जन्मतो ज्ये
ष्ठता स्मृतेति। यस्य प्रथमं गर्भो त्यनिःसृज्येष्ठो न तु जन्मत इति। यदा विशेद्विधाभूतं वीजं पुष्पं परिक्षरत्तात् तदा भवेद्विधा गर्भः सूति
वंशविपर्ययादिति श्रीधरस्मरणात्। अत्र विशेषमाह देवलः। वहिर्वर्णा अनुलोमजप्रतिलोमजास्तेषु यमयोश्चारित्यात्स
कर्मणा ज्येष्ठ्यं मातापितृसजातीययोर्गर्भेषु पूर्वजन्मतः। एकजरायुजयोस्तयोः प्रथमं यस्य मुखं दृश्यते तस्येत्यर्थः। समसं
ख्यविजातीयपुत्रसमवाये विभक्तस्यार्थस्य ब्राह्मणीपुत्रो वष्टौ भागानादद्यात् तामेकं शूद्रापुत्रः॥ ३८॥ ॥यदा विप्रस्य द्वौ वि
प्रावेकश्च शूद्र इत्येवं त्रयः पुत्राः स्युस्तदा ते पितृधनं नवधा विभज्य चतुरश्चतुरोंशान् ब्राह्मणस्त्वादद्यात् द्वावंशौ शूद्रापुत्रो
॥ ३९॥ ॥यदा द्वौ शूद्रावेको विप्रश्चेत्येवं त्रयः पुत्राः स्युस्तदा ते षोढार्थं विभज्य चतुरोंशान्विप्रो गृह्णीयादेकैकं शूद्रो गृह्णी
यात्। तांश्च प्रति वर्णं पुत्रसंख्याभेदेन समवायानन्त्याद्वक्तुमशक्नो त्यत्र प्रकारमाह॥ ॥अनेनोक्तक्रमेणान्यत्रापि अंशकल्पना भ
वति एवं प्राप्ते॥ ४०॥ ॥योयं विप्रस्य विषमसंख्यविप्रशूद्रसमवाये विभागक्रम उक्तस्तेनैव क्रमेण विप्रस्य द्वित्रविट्स
मवाये विट्शूद्रसमवाये विप्रक्षत्रसमवाये विप्रविट्समवाये विभागक्रम उक्तः शूद्राणामपि संसृष्टिविभागशेषमा

हा॥ ॥विभक्ताः सहजीवंतो विभजेरन्पुनर्यदि। समस्तत्र विभागः स्याज्ज्यैष्ठ्यं तत्र न विद्यते॥ ८१॥ ॥ये पित्रा स्वयं वा
विभक्ताः संतः सह संसृष्टीभूय जीवंति ते तदा पुनर्विभजेरन्तदा तेषां सम एव विभागो नाद्यविभागवत्पितृक्र
या। किंच ज्यैष्ठ्यं ज्येष्ठताप्रयुक्त उद्धारविशेषोपि तत्र संसृष्टिविभागे नास्ति अयं च ज्यैष्ठ्याय श्रेष्ठमुद्धारं दद्युरित्यस्या
पवादः। अत्रेन न विभक्तानामेकीभवनमेव संसर्गः। स च धनसाधारण्यापादनमति पर्यवसन्न इत्युक्तं प्राक्। समविधा
नादेव सिद्धो ज्यैष्ठ्यनिषेधो वक्तलघुनसंसर्गनिमित्तकभागवैषम्याउक्तार्थस्तेन संसर्गसमये येन यावद्धनं
संसृष्टं तस्य तावत एवोपचयापचयोदितार्थविभागः कार्यः। कचित्साम्यापवादमाह बृहस्पतिः। संसृष्टानां तु यः
कश्चिद्विद्याशौर्यादिनाधिकं। प्राप्नोति तस्य दातव्यो द्व्यंशः शेषाः समांशिन इति। प्रोक्तविभागशेषमाह॥ ॥
अनुपघ्नन्पितृद्रव्यं श्रमेण यदुपार्जयेत्। स्वयमीहितलब्धं तन्नाकामो दातुमर्हति॥ ८२॥ ॥पितृद्रव्यमनुपघ्नन्नपि
धनमनुपयुज्य यच्छ्रमेण कृषिसेवादिक्लेशेनार्जयेत् यच्च स्वयमीहितं वांछितं सन्मित्रादिभ्यो दातुं नार्हति। तदाह यो
गीश्वरः। पितृद्रव्याविरोधेन यदन्यत्स्वयमर्जितं। मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेदिति। व्यासोपि। विद्याप्राप्तं
शौर्यधनं यच्च सौदायिकं भवेत्। विभागकाले तत्तस्य नान्वेष्टव्यं सनाभिभिरिति। सौदायिकं साख्यायिकं का। अ

171

जुपपन्नेति शङ्कायामुपार्जने पितृद्रव्यानुपयोगस्तस्याविभाज्यत्वमुक्तं न तु द्रव्यापरिपुष्टेनार्जितस्येति व्याख्यानमयुक्तं परभ
क्तोपयोगेनेति वक्ष्यमाणविद्याप्राप्तलक्षणत्वात्। अन्यथैकस्मिन् वाक्ये समभिव्याहारानुपपत्तेस्तस्मात्पितृद्रव्या
परिपुष्टेनार्जितस्यैवाविभाज्यत्वमुक्तं पितृद्रव्यं च साधारणधनमात्रोपलक्षणं तेन भ्रातृधनाप्यतयाविधेनार्जितस्ये
वाविभाज्यत्वमित्यलं। पितृविभागशेषमाह॥ पैतृकं तु यदा द्रव्यमनवाप्तं यदाप्नुयात्। न तत्पुत्रैर्भजेत्सार्द्धमकामः स्व
यमर्जितं॥४२॥ यत्पैतृकं पितृसंबन्धि धनं नष्टं प्रयुक्तं वा पित्रा वा सामर्थ्येनानुद्धृतं पुत्रः स्वसामर्थ्यादुद्धरेत्। यच्च
स्वयं विद्याशौर्यादिनार्जितं तदकामः स्वपुत्रैः सह न विभजेत्। यथाह बृहस्पतिः। पैतामहं हृतं पित्रा स्वशक्त्याप
दुपार्जितं। विद्याशौर्यादिनाप्राप्तं तत्र स्वाम्यं पितुः स्मृतं। कात्यायनोपि। स्वशक्त्यापहृतं नष्टं स्वयमाप्तं च यद्भवेत्
। एतत्सर्वं पिता पुत्रैर्विभागे नैव दाप्यत इति। एतच्च भूमिव्यतिरिक्तेषु। भूमौ तु विशेषमाह शंखः। पूर्वनष्टां तु यो भूमिमे
कश्चेदुद्धरेत्क्रमात्। यथाभागं लभन्तेन्ये दत्वांशं तु तुरीयकमिति। सर्वस्या भूमेश्चतुर्थांशमुद्धर्त्रे दत्वाशेषं तेन स
हैव यथांशं गृह्णीयुरित्यर्थः। विद्याप्राप्तलक्षणमाह कात्यायनः। परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या। तया लब्धं
धनं यत्तु विद्याप्राप्तं तदुच्यते। अस्य च क्वचिदपवादमाह नारदः। कुटुंबं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः। भागं

विद्याधनात्तस्मात्स लभेतेति । इदमपि वैद्यामिश्रसमाधिकविद्यानां तु कुटुंबभरणक्षमेप्यंशो भवत्येव । यथाह
कात्यायनः । नाविद्यानां तु वैद्येन देयं विद्याधनात्क्वचित् । समविद्याधिकानां तु देयं वैद्येन तद्धनमिति । अकामश्चेतिव
चनात्कामनया तु देयमेव । अत एवोक्तं तस्यास्वेच्छात्स्वयमुपार्जितेर्थ इति । एवं भ्रातृपितृविभागेष्वविभाज्यमा
ह ॥ ॥ वस्त्रं पत्रमलंकारं कृतान्नमुदकं स्त्रियः । योगक्षेमं प्रचारं च न विभाज्यं च पुस्तकं ॥४४॥ ॥ वस्त्रं यद्येन प
रिहितं । पत्रं वाहनं यद्येनारूढं अश्वादि पत्रं वा । अलंकारः कुंडलमुद्रिकादिर्यो येन धृतः । कृतान्नं मोदकापूपादि ।
उदकं तदाश्रयादिः । स्त्रियो दास्यो वरूद्धाश्च । योगक्षेमम् इष्टापूर्ते राजाद्यो वा । प्रचारो गृहाराप्रवेशमार्गः । पुस्तकं प्र
सिद्धं । एतत्सर्वमविभाज्यं । चकाराद्धर्मार्थमद्वृतं च धनं । धनं पत्रनिविष्टं तु धर्मार्थं यन्निरूपितं । उदकं चैव दार
श्च निर्वंधो यः क्रमागत इति कात्यायनः पत्रनिविष्टं धर्मार्थत्वेन लिखितं । अयमभिसंधिः वस्त्रं समानजातीय
सर्वेषां चेद्यथावस्थमेव स्थाप्यं नान्यतरनिर्वंधेन विपरिवर्तनीयं । विषममध्ये तं बहुमूल्यं वा मूल्यादिकल्पन
या विभाज्यं । एवं वाहनालंकारावपि द्रष्टव्यौ । अन्नादिपत्रं तु समं चेत्तद्द्रव्यसाम्येन विभाज्यं । विषमं तुद्
द्धारेव विभाज्यं न स्वरूपतः कार्यो ऽक्षमत्वात् । कृतान्नं तु यावदुपयोगं भोक्तव्यमेव न सममपि स्वरूपतो विभाज्यं

172

विषमं तु उद्धारैरेव विभाज्यं न स्वरूपतः कार्याद्यसमत्वात्। कृतान्नं तु यावदुपयोगं भोक्तृत्वमेव न सममपि स्वरूपतो
विभाज्यं। रूपादिकं समश्चेत् स्वरूपेण विभाज्यो विषमस्तु पर्यायेण कृते तस्यैव नान्येन तन्मूल्यं यावनीयं। यथाह गोलाक्षिः
क्षेमं पूर्त्तं योगमिष्टमित्याहुस्तत्त्वदर्शिनः। अविभाज्यं ते चते प्रोक्ते शयनाशनमेव चेति। राजादेयस्तु न स्वरूपेण विभाज्यः
किंतु तदुत्पन्नो लाभ एव विभाज्यः सोपि विषमश्चेत्। योगक्षेमवतो लाभः समत्वेन विभज्यत इति बृहस्पतिस्मरणा
त्। प्रचारोपि सति संभवे न्याय एव कार्यो न तु स एव भित्त्यादिना छेत्तव्यः। किंतु सर्वैरुपभोग्यः। पुस्तकमपि समं विभाज्यं वि
षमं पर्यायेण। यद्येतद्येन तद्वा कार्यं स्वरूपनाशापत्तेः। तदेवं विधविभागसंदेहनिर्णयमाह नारदः। विभागधर्मसं
देहे दायादानां विनिश्चयः। ज्ञातिभिर्भागलेख्येन पृथक्कार्यप्रवर्तनात्। दानग्रहणपशुगृहक्षेत्रपरिग्रहाः। विभक्तानां पृ
थग्ज्ञेयाः पाकधर्मायव्ययाः। साक्षित्वं प्रातिभाव्यं च दानं ग्रहणं पशवन्नविभक्ताः परस्परं। येषामेताः क्रिया लोके प्रव
र्त्तन्ते स्वरिक्थतः। विभक्तानवगच्छेल्लेख्यमप्यन्तरेण तानिति। उक्तोपायैरप्यनिर्णये पुनर्विभागमाह मनुः। विभा
गे यत्र संदेहो दायादानां परस्परं। पुनर्विभागः कर्त्तव्यः पृथक्स्थानस्थितैरपीति। यत्तु तेनैवोक्तं। सकृदंशो निपतति
सकृत्कन्या प्रदीयते। सकृदाह ददानीति त्रीण्येतानि सतां सकृदिति तच्छलनादिभिर्निर्णीतं तु। शङ्को सत्यां द्रष्टव्यं

हिरी ·१८

२०७

स्वयंकृतास्वं रिक्थविभागातिक्रमे विशेषमाह स्वस्यातिः । स्वेच्छाकृतविभागो यः पुनरेव विसंवदेत् । स राज्ञांशे स्वके स्थाप्यः शासनीयोऽनुबंधत इति । अनुबंधतः धनाद्यपेक्षया । विभक्तकृत्यमाह नारदः । यद्येकजाता बहवः पृथग्धर्माः पृथक्क्रियाः । पृथक्कर्मगुणोपेता न चेत्कार्येषु संमताः । स्वभागान्यदि दद्युस्ते विक्रीणीयुरथापि वा । कुर्युर्यथेष्टं तत्सर्वमीशास्ते स्वधनस्य हि । आनृण्यमविक्तानामेको धर्मः प्रवर्तते । विभागे सति धर्मोऽपि भवेत्तेषां पृथक्पृथगिति ॥ ॥ इति श्री विष्णुस्मृतिविवृतौ श्रीमत्यां वैजयंत्यां मष्टादशोऽध्यायः ॥ १ ॥ एवं षोडशभिरध्यायैर्व्यवहारकांडं परिसमाप्य चतुर्दशभिरंत्यावारकांडं प्रारिप्सुः सर्वकर्मगशुद्धिनिरूपणाय पंचाध्यायीमारभते । तत्र पूर्वाध्याये विभागमभिधाय तत्समनियतं पैतृमेधिकमेकोनविंशेनाभिधातुमादौ निर्हरणविधिमाह ॥ ॥ मृतं द्विजं न शूद्रेण निर्हारयेत् ॥ १ ॥ ॥ द्विजं त्रैवर्णिकं मृतं शूद्रेण सपिंडेन वा न निर्हारयेत् । किं च । न शूद्रं द्विजेन ॥ २ ॥ ॥ तथा शूद्रमपि द्विजेन सपिंडेनासपिंडेन वा न निर्हारयेत् । एवं चोभयथा निषेधे के निर्हरेयुरित्यत आह ॥ ॥ पितरं मातरं च पुत्रा निर्हरेयुः ॥ ३ ॥ ॥ पुत्राः सवर्णाः असवर्णाश्च मातापितरौ निर्हरेयुः । वराग्नित्ता महादीनपि । पुत्रत्वेप्यपवादमाह ॥ ॥ न द्विजं पित

२००

रमपि स्वज्ञाः ॥४॥ ॥ स्वज्ञातपुत्रादिर्द्विजं पितरमपि न निर्हरेयुः । यत्तु न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण हारयेत् । अस्वर्ग्या ह्याहुतिः सा
स्याच्छूद्रसंस्पर्शदूषिते ति मानवे स्वेषु तिष्ठत्सु मृतं शूद्रेण हारयेत् । अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्पर्शेषां ते पितरस्यापहत इति
विजातीयपुत्रप्रसक्तौ वेदेवल स्मरणात् । पितृनिर्हरण निषेधादन्येषां सुतरां निषेधः । निर्हरणनिषेधस्य क्वचित्प्रतिप्र
सवमाह ॥ ॥ ब्राह्मणमनाथं ये ब्राह्मणा निर्हरंति ते स्वर्गलोकभाजः ॥५॥ ॥ अनाथं सपिंडादिरहितं ब्राह्मणं ये
ब्राह्मणा द्विजातयो निर्हरंति ते क्रतुफलस्वर्गलोकभाः । अनाथः ब्राह्मणं प्रेतं ये वहंति द्विजातयः । पदे पदे यज्ञफलमा
नुपूर्व्याल्लभंति ते इति स्मरणात् । बांधवनिर्हरणे विशेषमाह ॥ ॥ निर्हृत्य च बांधवं प्रेतं सत्कृत्य प्रेतं दक्षिणेन चिताम
ग्निं गम्याप्सु सवाससो निमज्जनं कुर्युः ॥६॥ ॥ बांधवं प्रेतं निर्हृत्य स्वशाखोक्तविधिना यथाविहिताग्निना संस्कृ
त्य चितामप्रदक्षिणेनाग्निं गम्याप्स्ववरुह्य ताः सवाससो वासः प्रथमं लेश्वकं निमज्जेयुः । बांधवग्रहणाद्बांध
वे पाराशर्यः प्राणायामो विकः । असगोत्रमबंधुं च प्रेतीभूतं द्विजोत्तमं । वहित्वा च दहित्वा च प्राणायामेन शुध्यतीति । न वस्त्रा
द्यकालं स्वरूपं चाह ॥ ॥ प्रेतस्योदकनिर्वपणं कृत्वैकं पिंडं कुशेषु दद्युः ॥७॥ ॥ वक्ष्यमाणमुदकदानं निर्वपणमवयवपि
ण्डं कुशेषु दद्युः । पिंडोदकदानानंतर्यविधानेन प्रथमदिनादिकर्तव्यता बोधिता । तत्र विशेषमाहांगिराः । प्रथमेह्नि

वि.१७
२०१

त्रतीयेच पंचमे सप्तमे तथा। नवचैकादशे चैव नवश्राद्धमुदाहृतमिति एकपिंडत्वेनैकोद्दिष्टत्वमुक्तं। तद्दाहप्रभृतिताः ए
कोद्दिष्टविधानेन श्राद्धं नवश्राद्धं प्रकल्प्य येत्कारयेदित्यर्थः। कारणविधानात्प्रेतावार्यस्यावश्यकत्वं गम्यते
कुशेषित्यचयचपिंडरूपमूपस्थुपलक्षणानां विकल्पो निवर्त्यते दद्युरिति वचनं सर्वेषामपि पुत्राणां प्रत्येकं नवश्रा
द्धादिविकाराभिप्रायेण सर्वैः पृथक्पृथगित्युक्तप्रचेतोवचनात्। एतेनाग्रेतनान्यपि वृद्धवचनानि व्याख्या
तानि। सर्वेसपिण्डसानि त्यार्थता। नवश्राद्धं सह दद्युरिति परिशिष्टात्। यद्वा प्रेतस्थाने केपुत्रा नवश्राद्धं सपिं
डत्वं श्राद्धान्यपि षोडश। एकेनैव तु कार्याणि संविभक्तधनेष्वपि। सर्वैरनुमतं कृत्वा ज्येष्ठेनैव च यत्कृतं। वने
न वा विभक्तेन सर्वैरेव कृतं भवेदिति। किंच॥ ॥परिवर्जितवासस्य निंवपत्राणि विदश्य दार्यस्य निपदन्यासं
कृत्वा गृहं प्रविशेयुः॥८॥ ॥ततो बालपुरस्सरं गृहं गत्वायेः साहाय्यमग्रंतानि वासांस्यिद्वारवासेंतरेः परिवर्त्यता
नि त्यक्त्वान्यानि धारयित्वेति यावत्। तत्रैव जिंवपत्राणि दंताग्रेर्विदश्य नियतादाविश्मनः। आचम्याग्न्यादि सलि
लं गोमयं गौरसर्षपान्। प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैरिति। शंखोपि। दूर्वाप्रवालमग्निं वृषभं वालभ्य
गृहं प्रविशेयुरिति। किंच॥ ॥अन्नं दातं प्राग्नोत्क्षिपेयुः॥९॥ ॥गृहं प्रविश्य दातान्यवानन्नो लोकिके त

२०१

स्यां प्रक्षिपेयुः । किंवा ॥ ॥ चतुर्थे दिवसेऽस्थिसंचयनं कुर्युः ॥ १० ॥ ॥ आहिताग्नेरनाहिताग्नेर्वा दाहाच्चतुर्थेऽह्नि अस्थिसंचयनं
कुर्युः । अग्निमतः श्रौतैः साग्नेः संस्कारकर्मणः । शुद्धिः संचयनं दाहान्ताहस्कं यथाह गोतमः । चतुर्थ इति प्रथमाद्युपलक्ष
णं । बहुवचनं च गोत्रजसाहित्यार्थं त्रिथिमेऽह्नि तृतीये वा सप्तमे नवमे तथा । अस्थिसंचयनं कार्यं दिने तद्गोत्रजैः सहेति संव
र्त्तस्मरणात् । संचितास्थ्नां प्रतिपत्तिमाह ॥ ॥ तेषां गंगांभसि प्रक्षेपः ॥ ११ ॥ तेषां संचितानामस्थ्नां कालांतरे गंगांभसि प्रक्षेपः
कार्यः । अरण्ये वृक्षमूले वा शुद्धे संस्थाप्य तानन्यथा । तत्स्थानाच्छुनकैर्नीत्वा कदाचिज्जाह्नवीजले । कश्चित्क्षिपति संतु
ष्टो दौहित्रो वा समाहिते इति ब्रह्मपुराणात् । अस्य फलमाह ॥ ॥ यावत्संख्यमस्थि पुरुषस्य गंगांभसि तिष्ठति तावद्व
र्षसहस्राणि स्वर्गलोकमधितिष्ठति ॥ १२ ॥ ॥ यस्य पुरुषस्य यत्संख्यकान्यस्थीनि गंगायां तोये तिष्ठंति स तावद्वर्ष
सहस्राणि स्वर्गलोके वसति । पिण्डोदकदानविधिमाह ॥ ॥ यावदाशौचं तावत्प्रेतस्योदकं पिंडमेकं च दद्युः ॥ १३ ॥ ॥
यस्य वर्णस्य यावदाशौचं विवक्षितं तस्य तावद्दिनं प्रेताय प्रथममुकगोत्रामुकप्रेतैतत्ते तिलोदकमुपतिष्ठत्वित्युदकं प्र
दद्याच्च यवनिषत्यर्थं स्मृत्यन्तरोक्तविधिना पिंडं दद्युः । यथाह शंखः । अपसव्ये वा सोयज्ञोपवीते कृत्वांजलिना श्वेतनोदकमित्युक्त्वा भूमौ माल्यपिंडपानीयमुपलेवा दद्युरिति । कुशच्छितिरद्भ प्रवेशः । तं सवाष्पमथादाय दर्भेषु विनिवेशये

दितियावदाशौचवचनात् ब्राह्मणस्य दश क्षत्रियस्य द्वादश वैश्यस्य पंचदश शूद्रस्य त्रिंशदित्यर्थः पर्यवस्यति। तावदस्या
रस्करः। ब्राह्मणे दश पिण्डाः स्युः क्षत्रिये द्वादश स्मृताः। वैश्ये पंचदश प्रोक्ताः शूद्रे त्रिंशत्प्रकीर्तिता इति। यदा तु स
र्ववर्णानां दशरात्रमेवाशौचं तदा दशैव पिंडा भवंति। अनेन चोदकदानेपि प्रथमतृतीयपंचमसप्तमनवमेषूदकक्रि
येति गौतमीयपद्धतिरस्य गौणता दर्शिता। एकमिति वचनात् प्रथमे द्वितीये दात्सप्तमे सप्तमेपि वा। द्वौ द्वौ पि
ण्डौ प्रदातव्यौ शेषास्त्वेकदशमेऽहनीत्यस्य देयस्त्वेकदशमः पिण्डो राज्ञां वै द्वादशेऽहनि। वैश्यानां पंचदशमे देयस्त्वे
दशमस्तथा। शूद्राणां दशमः देशमः पिण्डो मासे पूर्णे विधीयत इत्यस्य च गौणपद्धतिर्दर्शिता नात्यस्य दे
दशमः पिण्डो राज्ञां वै द्वादशेऽहनि। वैश्यानां पंचदशमे देयस्त्वेकदशमस्तथा। शूद्राणां दशमः पिण्डो मासे
पूर्णे विधीयत इत्यस्य च गौणपद्धतिर्दर्शिता। यावदाशौचमिति सामान्यवचनात् अनुपनीतस्यापि
अहाशौचे पिंडत्रयदानं गम्यते। तथा योगीश्वरः। पिंडयज्ञावृता देयं प्रेतायान्नं दिनत्रयमिति। तत्र धर्मविशेष
माह प्रचेताः। असंस्कृतानां भूमौ पिंडं दद्यात् संस्कृतानां कुशेष्विति। तत्र पिंडद्रव्याणि तत्रियमंवाचस्तुनः पुष्प
फलमूलैश्च पयसा शाकेन च गुडेन वा। तिलमिश्रं तु दर्भेषु पिंडं दद्यात् तोयेरेव शालिना सक्तुभिर्वापि शाके

२०२

र्वाप्यथ निर्वपेत्। प्रथमेऽहनि यद्द्रव्यं तद्देवस्या दशाह्निकमिति कर्तृनियमस्तु परिशिष्टे। असगोत्रः सगोत्रो वा यदि स्त्री
यदि वा पुमान्। प्रथमेऽहनि यो दद्याद् दद्यादग्निमिति शेषः। असगोत्रः सगोत्रो वा प्रेतायाग्निं ददाति यः पिंडं चोदकदा
नं च स दशाहं समापयेदिति स्मरणात्। देशनियमोपरिशिष्टे। यत्रैको दीयते पिंडस्तत्र पिंडान्समापयेदिति।
किंच।। ।।क्रीतलब्धाशनाश्च भवेयुः।।१४।। ।।क्रीतं मयाचितं लब्धं वा अन्नं तेन तथा भवेयुर्न पूर्वसंचितगृहस्थ
मश्नीयुः। चकारादारण्येन वर्जयेयुः। अक्षारलवणान्नाः स्युर्लब्धक्रीताशनास्तथेति स्मरणात्। गोक्षीरं गोकृतं चैव धा
नं मुद्गास्तिला यवाः। अक्षाराः कथिता ह्येते क्षाराश्चान्ये प्रकीर्तिता इति। इदं च प्रथमदिने तदुपवासाशक्तौ
नैतस्यां रात्रावन्नोपवेयुरित्याश्वलायनस्मरणात्। वसिष्ठस्तु त्र्यहमुपवासमाह। गृहाद्बहिश्च वाड्डित्वाऽद्य प्रस्तरे त्र्य
हमनश्नंतश्चासीरन् क्रीतोत्पन्नेन वा वर्तेरन्निति। अद्य प्रस्तरे आशौचिनां शयनादिकं तदाः। क्रीतादौ विशेष
माह।। ।।अमांसाशनाश्च।।१५।। ।।न मांसमश्नंतीत्यमांसाशना भवेयुः। चकारान्मस्यादि च। मत्स्यमांसादि न
भक्षयेयुरा पिंडदानादिति गौतमस्मरणात्। प्रदानमेकादशाहिकं श्राद्धं।। ।।स्थंडिलशायिनः। अनेन खट्वादि नि
वृत्तिः। अधःशय्यासनादीनां विवर्जिता इति स्मरणात्। तत्र विशेषमाह।। ।।पृथक्शायिनश्च।।१६।। ।।भूमावप्ये

कस्मिन्नकालादौ न सर्वे शयीरन्। किंतु पृथक्पृथगिति। पृथग्वचनान्मैथुनवर्त्तिभिः। ब्रह्मचारिणः सर्वे इति गौत
मस्मरणात्। चकारात्तौचूडादिभिरपि निम्बा। मातापित्रोः स्वयशाद्धे तथैव कृच्छ्रसूतके। तांबूलं चर्वयेद्वस्त्रपि
रहासं निगद्यत इति स्मरणात्। आशौचांतदिनकर्त्तव्यमाह॥ ॥ग्रामान्निष्क्रम्याशौचांते कृतश्मश्रुक
र्माणस्तिलकल्कैः सर्षपकल्कैर्वा स्नाताः परिवर्त्तितवाससो गृहं प्रविशेयुः॥१८॥ ॥आशौचस्यांते
यस्मिन्नुतदाशौचांतमंत्यदिनं तस्मिन्ग्रामान्नगराद्वा निवासस्थानान्निष्क्रम्यांत्यपिण्डदानानंतरं मुंड
नं श्मश्रुकर्म वा यथाधिकारं कारयित्वा तिलकल्के गौरसर्षपकल्के न गौरसर्षपकल्केन गौरस
र्षपकल्केन वा तिलतैलसंयुतेन मलस्नानं कृत्वा तत्रैवाशौचवासांसि परित्यज्य नववस्त्राणि प
रिधाय गृहं प्रविशेयुः। यथाह ब्रह्मपुराणे। यस्य यस्य तु वर्णस्य यद्यत्स्यात्पश्चिमं त्वहः। तत्र वस्त्रावि
शुद्धिं च गृहशुद्धिं च कारयेत्। समाप्य दशमं पिंडं यथाशास्त्रमुदाहृतं। ग्रामाद्बहिस्ततो गत्वा धृष्टे च वास
सी। अंत्यानां माश्रितानां च त्यक्त्वा स्नानं चरेत्। समाप्य दशमं पिंडं यदत्याज्यं तज्जहात्यपि। गौरसर्षपकल्केन
न तिलतैलेन संयुताः। मलस्नानं ततः कृत्वा तोयेनाचम्य वाग्यतः। वासोयुगं नवं शुक्लं मत्रासुद्धमेव

176

वागृहीत्वा गांसुवर्णेव मंगलानि शुभानि चास्पृष्ट्वा कीर्तयित्वा वपश्चात्तु होममेवं तत्र इति देवलोपि दशमे
ऽहनि संप्राप्ते यावदेकादशेऽहनि एव तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि चेति। द्वोरेति विशेषो मेधायनार्थं प
रिशिष्टे। गंगायां पश्चिमात्तापित्रोर्गुरौ मृते। आधाने सोमयागे च वपनं सप्तसु स्मृतमिति। स्मृतावितिस्पष्टम्। मात्रापि
त्रादि मरणानंतरमेव वपनं कार्यमित्युक्तं भवति। नैमित्तिकस्य निमित्तानंतर्यनियमात्। अत्रैव पक्षांतरमा
ह देवलः। क्रियां कुरुते यस्तु तद्दिने तस्य मुंडनं। लघ्वीयसां दशाहे तु पुत्राणां वपनं स्मृतमिति। अनेन क्रिया
णा एव निमित्तत्ववचनात्तु त्रापि रिक्तस्यापि प्रथमेह्नि क्रियानिमित्तं वपनं भवतीत्युक्तं। अन्येषां त्वंते एव। पु
त्रः पत्नी च वपनं कुर्यात् दूत्येयथाविधि। पिंडदानोचितो न्योपि कुर्यादित्यं समाहितः इति व्यासस्मरणात्। तत
दपि प्रेतकर्त्रीयसामेवं न्यायसाम्यनुभाविनां वपरिवापनमित्यापस्तंबस्मरणात्। अनुपश्चाद्भवंतीत्य
नुभाविनः कनिष्ठाः। तेषां वपनविधानात्। तज्ज्यायसां श्मश्रुमैव पर्येव स्यतिकिंच।। तत्र शांतिं कृत्वा ब्रा
ह्मणानां प्रसादेन दिवि तिष्ठंति देवताः। ब्राह्मणाभिहितं वाक्यं न मिथ्या जायते क्वचित्। २२। ब्राह्मण
निष्ठित नित्यनैमित्तिकादिकर्मोप्पायतां देवा दिवि तिष्ठंति। ब्राह्मणाभिहितशापानुग्रहादिवाक्य

वि॰टी॰२२५
२०५

ईष्टनिनियत्स्थिरिष्टानुग्रहाभ्यामनुगृहीताज्जनात्स्वयं वीति लोकचारणमुपपन्नं वा कस्मात्तस्य क
र्मफलसाधकत्वेनेत्यत आह ॥ ॥ यद्ब्राह्मणास्तुष्टतमा वदंति तद्देवताः प्रत्यभिनंदयंति । तुष्टेषु
तुष्टाः सततं भवंति प्रत्यक्षदेवेषु परोक्षदेवाः ॥ २३ ॥ ॥ पूजादिनोत्तुष्टतमा विप्रा यत्स्वैयत्पत्रप
त्रवचनात्स्वस्ति तिवदंति तद्देवतास्तथास्त्विति वाक्यैः प्रत्यभिनंदयंति स्वार्थेन च प्रत्यभिनं
दंती नित्यपरिच्छिन्नैर्येती । अपभिनंदने हेतुमाह । प्रत्यक्षदेवेषु विप्रेषु तुष्टेषु परोक्षदेवा ब्रह्माद
यो निरंतरमेव तुष्टा भवंति । तदाप्यायक क्रियाणां ब्राह्मणाधीनत्वात् । अभिमायाप्रतिपादयंप्र
स्तौति ॥ ॥ दुःखान्वितानां मृतवांधवानां आमाश्वासनं कुर्युरदानसत्वाः । वाक्यैस्तथैव भृमितवा
भिधास्ये वाक्यान्यहं तानि मनोभिरामे ॥ २४ ॥ ॥ नदीनं सत्वं वेयुर्येषां ते भेये वतः पुरुषा बांध
व वियोगेन दुःखार्तानां नराणामाश्वासनं शोकापनोदनं यैर्वाक्यैः कुर्युस्तान्यहं भूमि
मनोभिरामे पञ्च १ प्रहन्नेन यामन्य नोत्कले तवनुभ्यमभिधास्ये कथयिष्यामि । भूमीशग्रू
स्सनयंत तावद्गुणत्वं ॥ ॥ इति श्री विद्य । स्मृति विवृत्तौ श्रीमत्या

२०४

वैजयंत्यामेकोनविंशोऽध्यायः ॥१९॥ ॥ पूर्वाध्यायांते प्रसक्तशोकापनोदकवाक्याभिधानाय विंशाध्यायमार
भते ॥ तस्य च जगदनित्यताज्ञानाय तत्र तया जगत्कर्तुर्ब्रह्मण एव नित्यतां वक्तुं कालविभागमाह ॥ ॥ यदुत्तरा
यणं तदहर्देवानां ॥१॥ ॥ उत्तरस्यामयने रवेरुत्तरायणं मकरसंक्रांतिमारभ्य कर्कसंक्रांतिपर्यंतः का
लः तद्देवानामहर्दैवकर्मानुष्ठानयोग्यत्वात् ॥ ॥ दक्षिणायनं रात्रिः ॥२॥ ॥ दक्षिणस्यामयने रवेर्दक्षिणाय
नं कर्कसंक्रांतिमारभ्य मकरसंक्रांतिपर्यंतः कालः सा देवानां रात्रिर्निद्राकालः विष्णुः स्वपिति कर्कट इत्यादिस्म
रणात् ॥ वस्तुतस्तु मेरुगतानां देवानां नाडिकामंडलं क्षितिजं तस्मादुपरि स्थिताः क्रांतिवृत्ते मेषादयः षड् राश
यो दृश्याः तुलादयः षडधःस्थितास्त्वदृश्याः अतो मेषादिषट्के स्थितेऽर्के देवानां दिनं दृश्यत्वात् तुलादिषट्के
स्थिते रात्रिरदृश्यत्वादित्यहोरात्रं गोलवासनासिद्धं तस्य च स्मृत्याविरोध एवं परिहार्यः मेषादेर्दिनस्य कर्कसंक्रा
मे मध्याह्नस्तदुपरि राज्युन्मुखत्वादर्कस्य रात्रिरित्युच्यते ॥ एवं मकरसंक्रामे मध्यरात्रस्तदुपरि दिनोन्मुखत्वाद्दिन
मेवेति तदेतत्फलकथनाय न त्वावास्तवं ॥ तदुक्तं सिद्धांते ॥ दिनं सुराणामयनं यदुत्तरं निशेतरस्या इति केः प्रेका

त्रितं। दिनोऽस्य केर्दिनसरवत्समरं ति। दिनवदित्यमनेन दिवसे प्येषैव कल्पना। अत एकेश्चिद्दर्शमाष्य
पिन्द्राक्का पालिकोवेधविधिर्निरुक्त इति। एवं कृष्णशुक्लपक्षयोरपि अहोरात्रत्वं द्रष्टव्यं॥ ॥संवत्सरो होरात्रः
॥३॥ ॥दक्षिणोत्तरायणः रूपः कालः संवत्सरः स देवानामहोरात्रः॥ ॥तत्रिंशता मासः॥४॥ ॥तेषां संवत्स
ररूपाहोरात्राणां त्रिंशता मासः॥ ॥मासा द्वादश वर्षं॥५॥ ॥ते द्वादश मासाः षष्ठ्यधिकशतत्रयारूपादि
व्यं वर्षं भवति॥ ॥द्वादशवर्षशतानि दिव्यानि कलियुगं॥६॥ ॥उक्तरूपाणि दिव्यानि द्वादशवर्षशतानि
कलियुगं भवति। तत्र शतद्वयं संध्या संध्यांशयोर्वर्षसहस्रमेव चतुर्युगं युगस्य पूर्वभागः संध्या उत्तरः संध्यांशो
मध्यभागस्तु युगमिति। तदुक्तं विष्णुपुराणे। तत्प्रमाणैः शतैः संध्या पूर्वा तत्राभिधीयते। संध्यांशकश्च तत्
तुल्यो युगस्यानंतरेण यः। संध्यासंध्यांशयोरंतर्यः कालो मुनिसत्तम। युगाख्यः स तु विज्ञेयः कृतत्रेता
दिसंज्ञितः इति। एवमग्रेऽपि ज्ञेयं॥ ॥द्विगुणानि द्वापरं॥७॥ ॥चतुर्विंशतिशतानि दिव्यानि वर्षाणि संध्या
संध्यांशशतं द्वापरयुगं ज्ञेयं॥ ॥त्रिगुणानि त्रेता॥८॥ ॥षट्त्रिंशच्छतानि दिव्यानि वर्षाणि संध्यासं

ध्यांशसहितं त्रेतायुगं ज्ञेयं॥ ॥चतुर्गुणानि कृतयुगं॥ण॥ ॥अष्टाचत्वारिंशच्छतानि दिव्यानि द्वादश वर्षशता
नि वा तुर्ययुगं चतुर्णां युगानां समाहारश्चातुर्युगं दश सहस्राणि चतुर्णां युगानां द्वे सहस्रे संध्यासंध्यांशयोरिति द्वा
दश॥ अनुवृत्तावपि तुं नर्दिव्योपादानं मानुषभ्रमनिरासाय॥ ॥चतुर्युगानामेकसप्ततिर्मन्वन्तरं॥११॥ ॥एक
सप्ततिमावृत्तानि वृत्ताये पि युगानि कल्पः॥ ॥चतुर्युगसहस्रं च कल्पः॥१२॥ ॥सहस्रवारमावृत्तानि वृत्तायेपि
युगानि कल्पः कल्पते जगदस्मिन् वा काल इत्यर्थः॥ ॥स च पितामहस्याहः॥१३॥ ॥यः कल्पस्तूक्तः स एव पि
तामहस्य ब्रह्मणोऽहः संज्ञो भवति॥ ॥तावती चास्य रात्रिः॥१४॥ ॥कल्पपरिमितैव ब्रह्मणो रात्रिर्निद्राकालः
॥ ॥एवंविधेनाहोरात्रेण मासवर्षगणनया सर्वस्यैव ब्रह्मणो वर्षशतमायुः॥१५॥ ॥एवंविधेन कल्पद्वयप
रिमितेनाहोरात्रेण त्रिंशत्संख्येन मासस्तैर्द्वादशभिर्मासैर्वर्षं तास्यायुर्भवति। शतायुर्वै पुरुष इति श्रुतेः॥
ब्रह्मायुषा च परिच्छिन्नः पौरुषो दिवसः॥१६॥ ॥या निशतं वर्षा ब्रह्मायुस्तैरेव परिमितः पुरुषस्य भग
वतोऽनाद्यंतस्य श्रीवासुदेवस्य दिवसः॥ ॥तस्यांते महाकल्पः॥१७॥ ॥तस्य पौरुषदिवसस्यांते म

ध्येमहाकल्पो महान्ब्रह्मा कल्पते यस्मिन्निति॥ ॥तावत्येवास्य निशा॥१८॥ ॥अस्य पुरुषस्य ताव
त्येव ब्रह्मायुःपरिच्छिन्नैव निशा निद्राकालः॥ ॥पौरुषाणां महोरात्राणां मतीतानां संख्यैव नास्ति॥१९॥
भगवतोऽन्यतीतायाहोरात्रितान्यसंख्यानीत्यर्थः॥ ॥न च भविष्याणां॥२०॥ ॥संख्यास्तीति शेषोऽनु
वर्त्तते॥ तत्र हेतुमाह॥ ॥अनादित्वात्कालस्य॥२१॥ ॥अनादिरेष भगवान्कालोऽनंतोऽजरः परः॥ सर्वग
त्वात्स्वतंत्रत्वान्नदायुः॥ यदुक्तं कलयितृत्वेन भगवतो नित्यत्वं तदुपपादनाय कलयितव्यस्यानित्यता
माह॥ ॥एवमस्मिन्निरालंबे काले सततयायिनि॥ तस्मिन्काले भगवति नतद्भूतं स्थिर्याद्यन्यतममप्यस्ति यस्य
स्थितिः सना ध्रुवा कालरयावाध्यास्यादेवं भूतानामनित्यत्वो न्यायो भौतिकानां स्तुतरामनित्यमुक्तं
भवति॥ ननु यदि भूतानित्यतयाभौतिकानित्यता वा त्वित्यत आह॥ ॥गंगायाः सिकताधाराः वा
लुका॥ शक्या गणयितुं लोके न च यः पितामहाः॥२३॥ ॥या गंगायाः सिकता वालुका कणाः॥ या
वा वासवे वर्षति जलधारास्ता अपि लोके गणयितुं शक्यं न त्वतीताः पितामहा ब्रह्माणः॥ तथा च

ब्राह्मणएवानित्यत्वेतन्निर्मितानांभूतानांकथंनित्यमितिभावः।कैमुतिकन्यायेनमानुषानित्यतांवक्तुमि
न्द्राद्यनित्यतामाह॥ ॥चतुर्दशाविनश्यंतिकल्पेकल्पेसुरेश्वराः।सर्वलोकप्रधानाश्चतुर्दश॥२४॥ ॥एकैकस्मि
न्कल्पेब्रह्मदिवसेचतुर्दशदेवप्रधानाइंद्रामनुष्यप्रधानामनवश्चविनश्यंति।किंच॥ ॥वह्नीनींद्रसहस्राणिदैत्ये
द्रनियुतानिच।विनष्टानीहकालेननष्टानिहकालेनमनुकालताकथा॥२५॥ ॥एकैकस्मिन्कल्पेचतुर्दशच
तुर्दशेत्येवंकल्पानामानंत्याद्बहूनींद्रसहस्राणितुकस्यैवप्रपंचः।तथादैत्येंद्राणांहिरण्यकशिपुहिरण्याक्षा
दीनांनियुतानिलक्षाणिस्वस्वावधिभूतेनकालेननष्टानितत्राल्पतरायुषांमनुष्याणांविनाशेकथैवकेत्यना
स्थावशात्तेषामनादरणीयतैवाभिहिता।किंच॥ ॥राजर्षयश्चबहवःसर्वेसमुदितागुणैः।देवाब्रह्मर्षयश्चैव
कालेननिधनंगताः॥२६॥ ॥राजर्षयःप्रभुत्वेपिविक्रांतचित्ताःसगरादयःसर्वैःशौर्यौदार्यादिभिर्गुणैःसमु
दिताअभ्युदयवंतस्तथादेवाअग्निवरुणाद्याब्रह्मर्षयःकश्यपादयश्चकालेनस्वस्वावधिभूतेननिध
नंपंचत्वंगतास्तत्रमनुजानांकाकथेति।किंच॥ ॥येपिकालेननीयंतेकालोदुरतिक्रमः॥२७॥ ॥

वि०टी०२०

२०१

नकेवलमतीतकाल एव विशिष्टा नष्टाः किंत्विदानीमप्यस्मिन् सृष्टिसंहारकारणे । तेऽपि कालेन नीयंते का
लो हि दुरतिक्रमः । हि यतः कालोऽनतिक्रमनीय । किंच ॥ ॥ आक्रम्य सर्वः कालेन परलोकं च नीयते । कर्म
पाशवशो जंतुस्तत्र का परिवेदना ॥ १८ ॥ येन शरीरेण यावत्कालं यत्कर्म संप्राप्तो कालः भवति नार्वागिति
प्रकृतिं चैतज्ञैतमी ध्रुवकसंवादव्यासेन किंच । जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च । अर्थेऽपरिहार्येऽस्मिन्नापि
लोके सहायता ॥ १९ ॥ उत्पन्नस्य जंतोः शरीरारंभककर्मक्षये मृत्युर्निश्चितः । मृतस्य तद्देहकृतेन कर्मणा जन्मा
पि ध्रुवमेव । जन्मात्ययरूपेऽस्मिन्नर्थे सहाने निरन्तरोः सहायता सहकारिता कस्यापि नास्ति । यतो यमर्थोऽदुःखेना
भोगेन नाश्यत्वात् । किंच ॥ ॥ शोचंतो नोपकुर्वंति मृतस्येह जना यतः । अतो न रोदितव्यं हि क्रिया कार्या स्वशक्ति
तः ॥ २० ॥ ॥ शोचंतो जना मृतस्य नोपकुर्वंति प्रत्युत श्लेष्माश्रुमोचनेनापकुर्वंत्येव । श्लेष्माश्रु बांधवैर्मुक्तं प्रेतो भुंक्ते यतो
वशादिति योगिस्मरणात् । अतो न रोदितव्यं श्राद्धादिक्रियाः शक्त्यनुसारेण कार्याः । किंच ॥ ॥ सुकृतं दुष्कृतं वा भोः सहायो
गच्छतः । बांधवैस्तस्य किं कार्यं शोचद्भिरथवा न वा ॥ २१ ॥ ॥ इष्टानिष्टप्राप्तो धर्माधर्मौ पुरुषस्य सहायौ तावपि यस्य मृत

स्य सहैव गच्छतो नात्रैव स्वफलं प्रयच्छत:। शरीरारंभककर्मसमाप्तौ शरीरसमाप्ते: तस्य शोचद्भिरशोचद्भिर्वा
बांधवै: किं कार्यं प्रेतोपकारकक्रियाविधानाय तदर्थवादमाह॥ ॥बांधवानामशोचेतु स्थितिं प्रेतो न
विंदति। अतस्त्वभ्येति तानेव पिंडतोयप्रदायिन:॥३२॥ यावद्बांधवा: प्रेताशौचमाचरंति तावदस्मात्
पुन:पुनर्वासनाबांधनानेवाभ्येति तस्मात्पिंडतोयप्रदायिनो बांधनानेवाभ्येति तस्मात्पिंडदानादि
कार्यं विधेयमित्याशयमाह॥ ॥अर्वाक् सपिंडीकरणात्प्रेतो भवति यो मृत:। प्रेतलोकगतस्यान्नं सोदकुंभं प्रय
च्छत:॥३३॥ ॥वक्ष्यमाणेषु सपिण्डीकरणकालेषु यावत्सपिंडीकरणं भवति तावन्मृतो जंतु: प्रेत
स्तु तत्सज्ञानितदु:खानुभवनान्न भवति। प्रेतलोकं प्राप्तस्य दशाहिकैकादशाहिकाद्यपिंडाद्युपति
ष्ठते। तत: सपिण्डीकरणे इति प्रेतत्वानामनेकत्वान्न निवर्तकक्रियाणामप्यनेकत्वाद्वेदयति। नन्वेवं प्रे
तलोकात्पितृलोककार्यानायेतनीत्यत आह॥ ॥पितृलोकगतस्यान्नं श्राद्धे पार्वणादौ पुत्रादिदत्तम
न्नपानादि स्वधया पितृभोग्येण मृतविशेषेण समं तुल्यं भुंक्ते। तस्मात्पितृलोकगतस्यापि जंतो:

श्राद्धं कार्यं। ननु प्रातिस्विकशुभाशुभकर्मवशेन स्वर्गनारकादिगतस्य जंतोः कथं पुत्रादिदत्त
श्राद्धादिना तृप्तिरित्यत आह॥ ॥देवत्वे यातनास्थाने तिर्यग्योनौ तथैव च। मानुष्ये तथाप्नोति श्रा
द्धं दत्तं स्वबांधवैः॥३५॥ ॥स्वकर्मप्राबल्येन यद्यच्छरीरं जंतुः प्राप्नोति तत्तदुपतिष्ठते। तस्मान्मृतस्यापि तृ
प्तिसिद्धेः श्राद्धं कार्यमिति। ननु स्वप्रयोजनाभावे परतृप्तिमात्रोद्देशेन सार्वजनीप्रवृत्तिर्न स्यादित्यत आह
॥ ॥प्रेतस्माच्छ्राद्धं सदा कार्यं शोकं त्यक्त्वा निरर्थकं॥३६॥ ॥यथोक्तं दक्षेः श्राद्धकरणे पितॄणां तृप्तिविशे
षः कर्तुश्चायुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च प्रयच्छंति तथा राज्यं प्रीता नृणां पितामहा इत्यादिफल
प्राप्तिर्यतो निश्चिते संवलिताधिकारकत्वान्नित्यकाम्यत्वे नैमित्तिककाम्यत्वं च जातेष्टिवच्छ्राद्धस्यापि सि
ध्यति। उक्तमर्थमुपसंहरति॥ ॥एतावद्देवकर्तव्यं सदा प्रेतस्य बंधुभिः। नोपकुर्यान्नरः शोचन् प्रेतस्यात्म
न एव वा॥३७॥ ॥शोकेन श्राद्धमकुर्वन् विध्यतिक्रमनिमित्तप्रत्यवायेनात्मनः क्षुत्तलादिदुःखेन परतो
नोपकारं। तस्मान्नरभयान्निवृत्तिर्निवृत्तये एतावत्सर्वोक्तं श्राद्धादि प्रेतस्य बंधुभिः कार्यमेव। यदुक्तं त्रास्त्रिलो

७२

केसहायत्वेनेतितदुपपादयति॥ ॥दृष्ट्वालोकमनाक्रंदंम्रियमाणांश्चबांधवान्॥धर्ममेकंसहायार्थंवरयध्वंसदानराः॥३७॥
आक्रंदःशब्दरवः मृतस्यलोकेपश्चात्पितृतुष्टानेनोपकर्त्तातद्रहितोयंलोकोयतःप्रतिदिनंम्रियमाणाएवबांधवा
दृश्यंतेअतःस्वस्यासहायतांज्ञात्वाइहामुत्रचसहायार्थंधर्ममेवैकंभोनराःसदावरयध्वं॥ननुयदिस्नेहातिशयेनबांधवादृश्यंते
तदामुत्रसाहाय्यंकथंनकुर्युरित्यतआह॥ ॥मृतोहिबांधवैःशक्योनानुगंतुंनरंमृतं॥जायावर्ज्जंहिसर्वस्ययाम्यःपंथाविरुध्य
ते॥३८॥ ॥सहमृतानामपिप्रातिस्विककर्मार्जितलोकभोगावश्यकतयानेकत्रावस्थानमितिकसाहाय्योपयोगस्त
र्हिपत्न्याअपिसहगमनमित्यतआह॥जायायाःपत्येकशरीरत्वेनदिविज्योतिरजमारभेतांसहतेनैवमोदतइत्यादिश्रुतिस्मृतिभ्या
मवियोगश्रुतीत्याव्यालमुद्धरतेविलात्तातद्वदुद्धृत्यसानारीत्यादिशुपकारकत्वश्रवणाच्चतांविनान्यस्यसर्वस्यापियम
लोकमार्गानुसरणंविरुद्धमेव॥यदुक्तंधर्ममेवसहायार्थंवरयध्वमितितदुपपादयति॥ ॥धर्मएकोनुयात्येनं
यत्रक्वचनगामिनं॥नत्वसारेस्मिँल्लोकेस्मिन्धर्मंकुरुततमाचिरं॥४०॥ ॥प्रातिस्विकशुभाशुभकर्मवशेनजं
तुर्यासुयासुयोनिषुयेषुलोकेषुवागच्छतितत्रतत्रधर्मएवतमनुयाति॥यद्यप्यधर्मोप्यनुयातितथापितदनुग

(181

मनस्यदुःखहेतुत्वनयापरिहरणीयनैवनानुष्ठेयता। अविरत्वमुपपादयति॥ ॥श्वःकार्यमद्यकुर्वीतपूर्वाह्णेचा
पराह्णिकं। नहिप्रतीक्षतेमृत्युःकृतंवास्यनवाकृतं॥४२॥ ॥नश्वःश्वमुपासीतकोहिमनुष्यस्यश्वोवेदेतिश्रुत्या
संसारानित्यतोभतीत्यश्वःकर्तव्यंधर्मादिअद्यैवकार्यंतथापराह्णकर्तव्यंपूर्वाह्णएवकार्यंयतोस्यजंतोःकृतमकृ
तंचमृत्युर्नप्रतीक्षतेप्राप्तकालेनयत्येव। कृताकृताप्रतीक्षणमेवोपपादयति॥ ॥क्षेत्रापणगृहासक्तमन्यत्रग
तमानसं। वृकीवोरणमासाद्यमृत्युरादायगच्छति॥४३॥ ॥क्षेत्रमिदंकृष्टमिदमकृष्टंपण्येविवाहादौगतमा
नसमकृतकार्यमेवमृत्युरादायगच्छतियथाहवृकुरणंमेषमितिदृष्टांतेनमृत्युप्राणिनोःप्रबलदुर्बलभावोदर्शि
तः। तमेवोपपादयति॥ ॥नकालस्यप्रियःकश्चिद्द्वेष्यश्चाप्राप्तकालेमारणीयोवानास्ति। किंतर्हिजंतोरारब्धज
नकप्रारब्धकर्मणिक्षीणेप्रसह्याक्रियमाणमायुर्जनकंकर्मावमत्यैवजंतुंमृत्युर्हरति। रागद्वेषाभावंविविन
क्ति॥ ॥नाप्राप्तकालोम्रियतेविद्धःशरशतैरपि। कुशाग्रेणापिसंस्पृष्टःप्राप्तकालोनजीवति॥४४॥ ॥नप्रा
प्तःप्रारब्धकर्मक्षयकालोयस्यासौशरशतैर्विद्धोपिनम्रियतेयथाभीष्मःसएवप्रारब्धकर्मक्षयकालंप्राप्तकु

णायुसंस्पर्शमात्रेणाधिक्रियते यथा गौतमीयागो:। प्रारब्धात्क्रियमाणस्य कर्मणो दौर्बल्यं दर्शयति॥ ॥नौष
धानि न मन्त्राश्च न होमा न पुनर्जपाः। त्रायन्ते मृत्युनोपेतं जरया वापि मानवं॥४५॥ ॥औषधानि नीलकंठरसादीनि। मं
त्राम्त्युंजयादीनां। होमाज्जन्मदिनकर्त्तव्यादीनां। जपा महारुद्रादीनां। चकारात्सुवर्णदानादीनां। जरया मृत्यु
ना वा ग्रस्तं मानवं न त्रायंते। न चैवं विध्यानर्थक्यं प्राग्भवीयसजातीयकर्मांकुरसेचनेन विजातीयकुरसेचने न वा फ
लवत्वात्। इदमत्राकूतं। नानाजन्मसु पुत्रादिफलप्रतिबंधकानि तज्जनकानि च नानाकर्माणि ज्ञं तुनार्जितानि संते
वर्तते। तत्र देवस्वस्वकार्यफले तत्प्रतिबंधं वा जनयंति। तत्रेदानीं तत्तत्फलकामनया नुष्ठीयमानं कर्म प्राग्भवीयस
जातीयकर्मसंवलितं फलं जनयति तदभावे वेधकं दुर्बलं कर्मोपमर्द्य स्वफलं जनयति तत्त्वाबल्ये तु स्वयमेव नत्व
वहं तिष्ठति यावत्सजातीयविजातीयोभयाभावे। तु स्वयमेव सांगं चेत्फलं जनयति तत्प्राबल्ये तु सजातीयांतरमे
वापेक्षते इत्यनं किं विद्धि श्वामित्रमतंगादयुपाख्यानव्यासेन प्रपंचितं। औषधादीनां मंत्रान्तत्वे हेतुमाह॥ ॥आ
गामिनमनर्थं हि प्रविधानशतैरपि न निवारयितुं शक्तस्तत्र का परिदेवना॥४६॥ ॥भाविनोनर्थस्योपायश

तैरप्यन्यथयितुमशक्यत्वेकः शोकावसरः मा विनोर्थस्यगौरवात्हेतुमेवप्रपंचयति॥ ॥यथाधेनुसहस्रेषुवत्सो
विंदतिमातरं॥ तथापूर्वकृतंकर्मकर्तारंविंदतेध्रुवं॥४३॥ ॥जन्मांतरीयकर्मणसंबंधेनोत्तमवर्णाधमवर्णवासनाप्राब
ल्याद्धेनुसहस्रेषुवत्सोयथामातरमेवानुगच्छतिनान्यांधेनुंतथाशास्त्रफलंप्रयोक्तरीतिन्यायात्पूर्वकृतंकर्मक
र्तारमेवोपतिष्ठतइतिशास्त्रेनिश्चितं।नाभुक्तंक्षीयतेकर्मकल्पकोटिशतैरपीत्यादिवचनात्।एवंकर्मस्वभावंव
र्णयति॥ ॥अव्यक्तादीनिभूतानिपांचभौतिकानिशरीराणिकारणात्मनास्थितानामेवोत्पत्तेः।तथाव्यक्तं
दृश्यमानंमध्यंजन्ममरणांतरालस्थितिलक्षणंयेषामव्यक्तेनिधनंलयोयेषांतानीमान्येवंभूतान्येवते
षुपरिदेवनाविलापःकः॥ननुशरीरवर्जीवस्यापिनाशेविलापोर्थवानेवेत्यतआह॥ ॥देहिनोस्मिन्यथा
देहेकौमारावस्थादेहनिबंधनाएवनत्वात्मनः।पूर्वावस्थानाशेनावस्थांतरोत्पत्तावपिसएवाहमितिप्र
त्यभिज्ञानात्।तथैवतदेहनाशेदेहांतरप्राप्तिरपिलिंगदेहनिबंधनानतावतात्मनोनाशः।जातमात्रस्य
स्तन्यादौप्रवृत्तिदर्शनात्।अतोधीरोधीमान्तत्रदेहोत्पत्तिनाशयोर्नमुह्यति।आत्मैवजातोमृतश्चेतिन

मन्यतेनत्वात्मनोऽविनाशेपिदेहनाशएवशोकइत्यतआह॥ ॥गृह्णातीहयथावस्त्रंत्यक्त्वाशीर्णंपटंनरः।गृह्णात्येवंनवं
देहीदेहंकर्मनिबंधनं॥५०॥ ॥तत्तत्कर्मनिबंधनान्येवजीवशरीराणीतिशीर्णशरीरपरित्यागेनान्यशरीरग्रहणमाव
श्यमेवजीवद्वस्त्रयोर्वस्त्रग्रहणमिवेतिनित्यतामुपपादयति॥ ॥नैनंछिंदंतिशस्त्राणिनैनंदहतिपावकः।न
चैनंक्लेदयंतशोषयतिमारुतः॥५१॥ ॥शरीरवच्छस्त्रच्छेद्यग्निदाहलशार्णतोवायुशोषाद्यात्मनोनभवंती
त्यविनाश्ययमशोच्यइत्यर्थः।तत्रहेतुमाह॥ ॥अच्छेद्योयमदाह्योयमक्लेद्योशोष्यएवच।नित्यःसततगःस्थाणु
रचलोयंसनातनः॥५२॥ ॥अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते॥ ॥अच्छेद्योनिरवयवत्वात्ततएवाक्ले
द्योपिअदाह्योऽमूर्त्तत्वात्।अशोष्योद्रवद्रव्यत्वाभावात्।किंचनित्योऽविनाशी।सततगःसर्वकालवर्त्ती।स्था
णुःस्थिरस्वरूपोरूपांतरापत्तिशून्यः।अचलःपूर्वदेशापरित्यागी।सनातनोऽनादिः।अव्यक्तश्चक्षुराद्यविष
यःअन्यथाकर्त्तुमशक्यइत्यर्थः।उक्तमर्थमुपसंहरति॥ ॥तस्मादेवंविदित्वैनंनानुशोचिमर्हसि॥५३॥ ॥तदेव
मात्मनोजन्ममरणाभावाच्छरीरस्यावश्यनाशित्वाच्चशोकावेशविकलोभवितुमर्हसीति॥ ॥इतिश्री

विष्णुस्मृतिविवृतौ श्रीमत्यां वैजयंत्यां विंशोध्यायः॥ ॥पूर्वाध्याये क्रियाः का
र्याइत्युक्तं। ताश्च द्विविधाः शौचाशौचयोरधिकारात्। तत्रौत्थानवशाद्याः पूर्वमुक्ताः इदानीमेकविंशो
नाध्याय आह। तत्राशौचानंतरदिनकर्तव्यमाह॥ ॥अथाशौचव्यपगमे सुस्नातः सुप्रक्षालितपाणिपादः स्व
चांतः स्वेवंविधानेव ब्राह्मणान् यथाशक्त्युदङ्मुखान् गंधमाल्यवस्त्रवस्त्रालंकारादिभिः पूजितान् भोजये
त्॥१॥ ॥अथशौचनिर्हरणानंतरं तेद्वक्षत्रियो वाहनायुधं। वैश्यः प्रतोदं रथोक्तकालेन वापगमे। अयं च सा
र्ववर्णिकः साधारणः कालः। आशौचांते तत्र पिण्डदानं समाप्यते। ततः श्राद्धं प्रदातव्यं विधिरिति मरीचिस्म
रणात्। यत्तु एकादशे क्षत्रियद्वादशे तत्सामान्यमुदाहृतं। चतुर्णामपि वर्णानामाशौचं तु पृथक्पृथगिति त
द्दशपिण्डपक्षे इत्यविरोधः। तत्र सुस्नातो मंत्रवत्स्नानः स्नानः। नित्यानि निवर्तेरन्नित्याशौचे मंत्रवत्स्नानं नि
षेधादशौचांते तत्दृष्टानां वमायायोत्तेन नावश्युपसर्गो। तेन च यथोक्तविधिना पाणिपादं प्रक्षाल्याच
म्यानंतरमेवंविधान्स्वप्रमाणलक्षणात् पितृर्थानेवेति चान्तेन वैश्वदेवार्थविप्रनिवृत्तिः। चक्रुव

वचनेनायुग्मान् एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते । तदप्यदैवं कर्त्तव्यं अयुग्मानाशयेद्द्विजानिति शातातपस्मरणात्
तत्र संख्याविशेषविधानाय यथाशक्तीति । तं चाह बृहस्पतिः । एकोद्दिष्टविधानेन यदेकस्य प्रदीयते इत्युपक्रम्यस्त्रोत्रि
या भोजनीयाः स्युः पंचापि परिगृहीताः । नवत्रयोदशयोरंतर्वर्त्तिन्येकादशसंख्यापि ग्राह्या । दशम्यामतीतायां प्राप्ते
ऽह्नाय प्रेतब्राह्मणानेकादशानामंत्र्येति सत्यव्रतस्मरणात् । उदङ्मुखानिति पित्र्यर्थे दिङ्नियमः । गंधाश्चंदनादयः ।
माल्यानि शुक्लादीनि वस्त्रालंकारग्रहणं नियमार्थं यथा का एवमाह्वानिते गंधपुष्पधूपैः समर्चयेत् । ततो वस्त्रा
णि विप्राय सर्वाण्याभरणानि चेति दद्यादिति शेषः । आदिशब्दात्प्रदीपादिग्रहणं । गंधादीनां प्रकृतितः प्राप्तावपि
पुनर्वचनं प्रेतश्राद्धत्वाद्वानुदकमर्घ्यं पंचगंधपाद्यविवर्जितमित्यादिप्राप्तनिषेधपरिहाराय । तान्भोजयेद्यावद्वृ
त्तेति कर्त्तव्यतानैराकांक्ष्यादमंत्रत्वप्राप्तावाह ॥ ॥ एकवन्मंत्रानूहेदेकोद्दिष्टे ॥ २ ॥ ॥ प्रकृतौ पार्वणे ये बहुवचनां
ता मंत्रास्ते विकृतावेकोद्दिष्टे एकवचनांतत्वेनोह्याः । वचनमुपलक्षणं तेन प्रकृतेरप्यूहः । शुल्यहशार्थेनास्वार्थ
समवेतार्थतादीनामूहकारणानां तुल्यत्वात् । यथा स्वलायनानामर्घ्यपात्रे तिलावापे तिलोसि सोमदेवत्य इति

मंत्रे बहुवचनांतपितृशब्दस्थाने एकवचनांतप्रेतशब्दस्योहः। एवमन्येपि शाखाभेदेनोह्याः। एकवद्दुद्देश्यधर्मोना
हः॥ ॥उच्छिष्टसंनिधावेकमेव तन्नामगोत्राभ्यां पिंडं निर्वपेत्॥३॥ ॥उच्छिष्टसंनिधावरत्निमात्रादिदेशमुत्स
ज्यैकमेव प्रेतोपिद्देशेनैव न तत्पित्रादीनां नामगोत्राभ्यामेव नेत न्नेत्पित्रादीनां नामगोत्राभ्यामेवनेइति मंत्रे
ण एकपित्र्यप्रमाणं। एकोद्दिष्टे सपिंडे चैकपित्र्यं तु विधीयते। नारिकेलप्रमाणं तु प्रत्यब्दे मासिके तथेति स्मरणा
त्। निर्वपेत्कुशेषु पितृतीर्थेन दद्यात्। उच्छिष्टसंनिधावित्यनेन यत्र स्थालीपाकसद्भावस्तत्राग्निसमीप एव पि
ण्डदानमिष्टं भवति। न त्वाग्नेस्यष्टियिष्यते। धर्मांतरमाह। एकोद्दिष्टं दैवहीनमेकार्घैकपवित्रकं। आवाहनाग्नौ
करणस्थाने विप्रविसर्जने। अभिरम्यतामिति वदेद्ब्रूयुस्तेभिरताः स्मेति। किंच॥ ॥शुक्लपक्षे ब्राह्मणेषु दक्षिण
याभिष्ट्विते षु प्रेतनामगोत्राभ्यां दत्ताक्षय्योदकेष्वतुरंगुलहस्वाः स्तावदंतरास्तावदधः खाताविततस्मायता
त्तिस्तः कर्षूः कुर्यात्॥४॥ ॥नानाभक्ष्यान्नरसविन्यासैरेकैकमुद्दिश्य विधिवद्भोजयेदिति सत्यव्रतोक्तवि
धिना भुक्तवत्सु ब्राह्मणेषु वासोहिरण्यदासमुपानच्छत्रोदकुंभादक्षिणागुणवति पात्रे शय्याप्रदानमिति निर्ड्क्त

दक्षिणायैवाभिपूजितेषु प्रेतनामगोत्रेणाद्वार्येपतिष्ठतामित्यनेनयोदकंतेषुदत्वाभिरम्यतामित्विसृज्यकर्त्रीतिस्वः
कर्षूत्रयनुकुर्यात्।तत्परिमाणमाहचतुरंगुलपृथ्वीःचतुरंगुलविस्तृतास्तावदंतराश्चतुरंगुलांतरास्तावः
द्वःखातास्चतुरंगुलभीराविनिस्त्यायताद्वादशांगुलायामाइति।किंच॥ ॥कर्षूसमीपेत्वग्निस्त्रयमुपसमाधायतत्सं
परिस्तीर्यतेष्वग्निष्वेकस्मिन्नाहुतित्रयमोदनस्यजुहुयात्।तत्रमंत्रानाह॥ ॥पितृमतेस्वधानमः॥६॥ अग्नयेकव्यवाहना
यस्वधानमः॥७॥ ॥यमायांगिरसेस्वधानमः॥८॥ ॥पितृमत्वंसोमस्यकव्यवाहनत्वमग्नेरांगिरसत्वंचयमस्य
गुणोनश्यदेवतातेषुतथादर्शनात्।किंच॥ ॥स्थानत्रयेचप्राग्वत्तिडनिर्वपनंकुर्यात्॥९॥ ॥कर्षूमूलेयत्स्थलंस्था
पितंतेषुत्रिष्वपिप्राग्वत्कुशेषुप्रेतनामगोत्राभ्याम्एकैकंपिंडंदद्यात्किंच॥ ॥अन्नदधिघृतमधुमांसैःकर्षूत्रयं
पूरयित्वेमंत्रंयथाशाखंजपेत्।त्र
पूरयित्वैतत्तन्नइतिजपेत्॥१०॥ ॥अन्नमोदनस्तदुक्तैर्दधिघृतमधुमांसैःकर्षूत्रयंपूरयित्वेमंत्रंयथाशाखंजपेत्।त्र
त्रतत्रशब्दस्थानेप्रेतशब्दस्योहःप्रेतश्राद्धेषुपितृशब्दःस्वसंबंधःशर्मशब्दस्तथैवचेत्याद्यष्टादशपदार्थनिषेधात्।
मासिकान्याह॥ ॥एवंमृताहेप्रतिमासिकंकुर्यात्॥११॥ ॥एवमाद्येकोद्दिष्टविधिनासंवत्सरंयावत्प्रतिमा

संवत्सरमिति यो ऽसिस्मरणात्। सपिण्डीकरणमाह। संवत्सरांते श्रेतायत सित्रेत पितामहाय तत्पितामहायवब्राह्मणान् देवपूर्वान् भोजयेत्॥१४॥ ॥संवत्सरांते संवत्सरांतदिने तस्मिन् सत्यव्यवहिताग्रिमदिने इति वा सो ऽयं सार्ववर्णिकः साधारणः कालः। कालांतरमप्याह भविष्यन्तुराणं॥ तत्र प्रेतादिभ्यश्चतुर्भ्यश्चत्वारो दैवदेविके च द्वाविति षट् ब्राह्मणान् प्रेतस्यैकोद्दिष्टविधिना तत्पित्रादीनां च त्रयाणां पार्वणविधिना भोजयेत्। तदेतत्पार्वणैकोद्दिष्टात्मकं नरसिंहाकारवत्साम्प्रदायिकमेव सम्प्राहं। त्र्यस्य सपिण्डीकरणं वा हे संपूर्णे भ्युदये पि वा। पूर्वेद्युस्तानि वाह्न पाद्यानि कुर्यात्। नैकोद्दिष्टत्वेन तन्निवृत्तिः तस्य तु दैवतपार्वणत्वात्। यथोक्तं विशामितते। सपिंडीकरणं चाहे संपूर्णे भ्युदये पि वा। पूर्वेद्युस्तान वं प्रेतस्तु त्रयाणां प्रपितामहान्। चतुर्भिः पितृभिश्चोक्तं विधीयत इति। त्रैतिवचनात् पूर्वैकोद्दिष्टे ते पां निवृत्तिः। रिक्तमेवाचकारादेकपवित्रत्वादिकं भवति। तदिति कर्तव्यतां चाह बौधायनः। सं वैस्मात्संकृत्समवदाया सिद्धायं दद्रिणतो भस्मभिः स्महांगारान्निरूह्यते त्रुत्रुकुयात्रेतायात्रुष्यो यमायस्वाहेति तद्दुत्नमहुतं च भवती ति

186

प्रेतमावाह्यविप्रांश्चाप्युपवेश्यनिमंत्रणमितिनवायंपार्वणेशएवविधिःप्राप्तत्वात्तैनैकोद्दिष्टांशएवेतिमंत
व्यमप्राप्तत्वात्।किंच॥ ॥संसृजतुत्वापृथिवीसमानीवइतिचप्रेतपाद्यपात्रेपितृपाद्यपात्रत्रयेयोजयेत्॥१४॥
॥पाद्यंचपात्रंचपाद्यमात्रेप्रेतमाद्यंप्रेतपाद्योदकंपात्रोदकंतदुभयंपितृपाद्योदकेनपात्रत्रयेहुते संसृज
तुत्वापृथिवीतिवक्ष्यमाणेनमंत्रेणसमानीवआकूतिरित्यनेनचसंयोजयेत्।तत्रैवार्घदानानंतरमवशिष्टंप्रेता
र्घपात्रोदकंपित्रर्घपात्रत्रयेयोजयेत्।किंच॥ ॥उच्छिष्टसंनिधौपिंडंतुनुष्टयंकुर्यात्॥१५॥ ॥सपिंडीकरणपार्वणे
प्यग्रावग्नौकरणंनास्तीत्युच्छिष्टसंनिधावितिपुनरुक्तंतत्रैकोद्दिष्टविधिनाप्रेतनामगोत्राभ्यामेकंपिंडंदत्वापा
र्वणविधिनापिंडत्रयंदद्यात्।किंच॥ ॥ब्राह्मणांश्चस्वाचांतान्दत्तदक्षिणांश्चानुव्रज्यविसर्जयेत्॥१६॥ ॥ब्राह्मणा
नुपैतृकान्वैश्वदैविकांश्चस्वाचांतानुक्तेनस्वधावाचनानंतरदत्तायथाशक्तिदक्षिणायेभ्यस्ताननुव्रज्यासीमांतमनु
गम्यविसर्जनमंत्रेणविसर्जयेत्।किंच॥ ॥ततःप्रेतपिंडंपाद्यपात्रोदकवत्पिंडत्रयेनिदध्यात्॥१७॥ ॥यथाप्रे
तपाद्योदकंपितृपाद्योदकत्रयेणप्रेतार्घपात्रोदकत्रयेणयोविभज्यपित्रादिपिंडत्रयेताभ्यामेवमंत्राभ्यांयोज

वि०टी२२

२१८

येत्।तदुक्तं काठकगृह्ये।चतुर्थे पिण्डमुत्सृज्य त्रेधं कृत्वा पिंडेषु निदध्यात्। संसृजतु त्वा पृथिवी वायुरग्निः प्रजाप
तिः संसृज्यध्वं पूर्वेभिः सह स्वमानाः संवो मनांसीत्येवमुदकमिति।किंच॥ ॥कर्षू त्रयसन्निकर्षेप्येवमेव॥१८॥ ॥
प्रेतैकोद्दिष्टे यत्कर्षूत्रयं तत्सन्निकर्षे पिण्डीकरणयोः कालांतरमप्याह॥ ॥सपिण्डीकरणं मासिकार्थवद्द्वा
दशाहं श्राद्धं कृत्वा त्रयोदशेह्नि वा कुर्यात्॥१९॥ ॥मासि भवं मासिकं तदर्थः अन्नपायनादिः सोस्यास्मि
न्निति मासिकार्थवत् मासिककार्यकारि श्राद्धं माशौचव्यपगमे द्वादशाहं द्वादशस्वहस्सु कृत्वा त्रयोदशेह्नि वा य
थोक्तं सपिण्डीकरणं कुर्यात्।अस्मिन्पक्षे मासिकानि द्वादशाहः प्रशस्यत इति।कुलधर्मश्चेत्याद्विपोर्णमासी
षु दमनकादिना कुलदेवताराधनं।आयुः क्षयो मरणं शरीरास्थितिरेकदेशस्थित्यनियमः।द्वादशाह इत्या
शौचांते पलक्षणं।सर्वेषामेव वर्णानामाशौचांते सपिण्डनस्मरणात्।अस्मिन्पक्षे मासिकानि द्वादशाह एव का
र्याणि।मासिकानि स्वकीये तु दिवसे द्वादशे पि वेति पौठीनसिस्मरणात्।तदकरणे सपिण्डनानधिकारात्।
यथाह गोभिलः।श्राद्धानि षोडशादत्त्वा नैव कुर्यात्सपिण्डनमिति।अत्रान्यो विशेषः श्राद्धकल्पलतायां

मस्मामिरुपपादितमितिनेहोच्यते॥ शूद्राणांत्वत्र विशेषमाह॥ मंत्रवर्ज्जं हि शूद्राणां द्वादशेऽहनि॥२०॥ ॥शूद्राणां सपिण्डी
करणं द्वादशेऽह्नि भवति तत्रयोदशे यतस्तन्मंत्रवर्ज्जमयं चार्थवादो लौकिकत्वेच्युताकत्ववोधकेनायन हेतुरनैकांत्यात्तना
नापि गुणविधिः प्राप्तत्वाद्वाक्यभेदाच्च नापि गुणगुणिनोः सामान्यत एव प्राप्तत्वात् तस्मादर्थवादः मंत्रवर्ज्जनमपि नसा
मान्यतोपितु वैदिकानाममनुमतो स्यनमस्कारो मंत्रइति गौतमस्मरणात्। वैदिकानामपि स्वयं पाठो निषिध्यते न विधेः।
अमंत्रस्य तु शूद्रस्य विकल्पानुसंधानमूलकमित्युपेक्षणीयं। किंच वचनादाशौचेस्यानुष्ठाने प्रमावास्याश्राद्धस्या
नुष्ठानमेव वचनाभावादित्यास्तांतावत्। यदि च द्वादशाह विधान एवाग्रहस्तर्हि सार्ववर्णिकदशाहाशौचपदेश
द्राणां सपिण्डने द्वादशाह विधानमस्त्वप्राप्तत्वात्। यदुक्तं मासिकार्थं च द्वादशाहे श्राद्धमिति तत्र मासद्वयहीनो कथमित्यत
आह॥ ॥संवत्सराभ्यंतरे यद्यधिमासो भवेत्तदा मासिकार्थं दिनमेकं वर्द्धयेत्॥२१॥ ॥यस्मिन् संवत्सरे मासिकानि
कार्याणि तन्मध्ये चेदधिमासो भवति तदा तन्मासिकसिद्ध्यर्थमेकं दिनमधिकं कुर्यात् त्रयोदशे द्वादशाहं मासिकानि का
र्याणि इह द्विरर्थसिद्धेव। यत्साच्च सिद्धः। असंक्रांते विकर्त्तव्यमाह्निकं प्रथमं द्विजैः। तथैव मासिकं श्राद्धं सपिण्डीक

राणं तथेति। पुरुषोर्ध्वदैहिकीः क्रियाः स्त्रीषप्यातिदिशति॥ ॥सपिण्डीकरणं स्त्रीणां कार्यमेवं तथा भवेत्॥ ॥यदुक्तं
सपिण्डीकरणं तन्त्रथान्यदप्येवंशेन संस्कारकं दाहादि मासिकांतं यत्कार्यं तत्त्व स्त्रीणां भवेत्कुर्यात्॥ नवश्राद्धं दशाहानि नव
वमिश्रं तु षड्ऋतून्। अतः परं पुराणं स्यात्त्रिविधं श्राद्धमुच्यत इति परिशिष्टात्त्रिइति परिशिष्टात्त्रिविधं श्राद्धं। तत्र नवं पूर्वो श्राद्धे नवमि
श्रं वा स्मिन्नुक्तमिदानीं पुराणमाह॥ ॥यावज्जीवं तथा कुर्यात् श्राद्धं तु प्रतिवत्सरं॥२२॥ ॥यथा सपिण्डनांतानि कर्माणि स्त्रीपु
रुषयोः विधिनाकुर्यात्। अर्वाक्सपिण्डीकरणादित्यनेन सोदकुंभश्राद्धं विधाय संवत्सरांते सपिण्डनं वदता यावद्वर्षं नदित्युक्तं
तत्र सपिण्डनापकर्षे प्रेतत्वनिवृत्त्यात न्नूनिरूपद्वारलोन लोपप्राप्तावाह॥ ॥अर्वाक्सपिण्डीकरणं यस्य संवत्सरात्कृतं तात
स्याप्यन्नं सोदकुंभं दद्याद्वर्षं द्विजन्मने॥२३॥ ॥यस्य वृद्ध्यादिनिमित्तेन मासिकान्यपकृष्य तेन तस्यापि यावद्वर्षं विसोदकुं
भमन्नं दद्यात् देव सोदकुंभश्राद्धं। तत्स्वरूपमाह गोतमः अदैवं पार्वणश्राद्धं सोदकुंभमधर्मकं। कुर्यात्प्रत्याब्दिकाच्छ्रा
द्धात्संकल्पविधिनान्वहमिति॥ ॥इति श्री विष्णुस्मृतिविवृतौ श्रीमत्यां वै
जयंत्यामेकविंशोध्यायः॥ ॥पूर्वाध्याये यथाशौचव्यपगम इत्युक्तं तत्रापेक्षितत्वाद्वाविंशेनाशौचं क्रमेणाह॥ ॥ब्राह्म

णस्य सपिण्डानां जननमरणयोर्दशाहमाशौचं॥१॥ ॥सपिण्डाद्बिंजननमरणहितोशयेषत्र्याशौचं तद्ब्राह्मणस्य
सपिण्डजननमरणयोर्दशाहं दशाहोरात्रं भवति। तच्चज्ञातमेव निमित्तं निर्दशं ज्ञातिमरणंश्रु[illegible]त्वा पुत्रस्य जन्म चेति लिं
गात्। किंच॥ ॥द्वादशाहं राजन्यस्य॥२॥ ॥राजन्यः क्षत्रियस्तस्याशौचं द्वादशाहं गौतमः। एकादशाहं गौतमः। पं
चदशाहं वसिष्ठः षोडशाहं पैठीनसिः। तदेषां कल्पानां यथाचारं व्यवस्था ज्ञेया। किंच॥ ॥पंचदशाहं वैश्यस्य॥३॥ वैश्य
स्याशौचं पंचदशाहं। द्वादशाहं गौतमः। विंशतिरात्रं वसिष्ठस्तत्रापि पूर्ववद्व्यवस्था। किं च॥ ॥मासं शूद्रस्य॥४॥
शूद्रस्याशौचं मासं त्रिंशद्दिनानि भवति। सच्छूद्राणां पंचदशदिनानीति योगीश्वरः। सत्त्वं च द्विजातिपरिचर्यया तु
क्तो। विंशतिरात्रमिति देवलशातातपौ। शौर्वेषां दशाहमित्यंगिराः सर्वेषामेव वर्णानां सूतके मृतके तथा। दशाहाच्छु
द्धिरथवा इति शातातपोऽब्रवीदिति। सपिण्डानामित्युक्तं केते सपिण्डास्तेषां भावः सपिण्डता सा च कूटस्थमारभ्य स
प्तपर्यंतमेवानुवर्त्तते सप्तमे पुरुषे विनिवर्त्तते विशेषण निवर्त्तते विशेषश्चायमेव यद्विवाहे सा पञ्चपुरुषं सपिंड्यं

सप्तमादूर्ध्वमितिवक्ष्यमाणत्वादत्रतुषाट्पुरुषमेवसप्तमेनिवृत्तिस्मरणात्।नचातीतपदाध्याहारेणतदेकवाक्य
ताकार्या।तेनैवैतत्स्तेईमातृपितामहादिप्रपितामह्यादीनांपुंमात्रद्वारकसापिण्ड्याभावेनाशौचाभावप्रसंगः।त
थाचषट्पुरुषत्वमाविष्कर्तुंसकृत्तानेष्यतामूलांतरकल्पनाक्लेशादितिचेत्तुल्यमेतद्भवतोपियदिसप्तताचसा
प्तपुरुषीविज्ञायतइत्याशौचप्रकरणीयमनुगौतमवाक्यैकवाक्यतार्थंयथान्यासनैवास्का।नचतत्राप्यध्या
हारः।ऊर्ध्वंसप्तमात्पितृवंधुभ्यइतिविवाहप्रकरणीयेनपौनरुक्त्यात्।तस्माद्वसिष्ठवाक्यविरोधस्त्वाशौचकल्प
विकल्पव्यवस्थापनीयइत्यलं।पुरुषइत्यनेनपुंमात्रद्वारकताभिधानात्स्त्रीद्वारकंसापिण्ड्यंनिवर्त्यतेनस्त्री
सापिण्ड्यमातामहादीनांनदशाहाशौचप्रसंगः।नापितामह्यादीनांतदप्रसंगः।पुरुषेचसप्तमत्वविशेषणा
दप्रत्तानांस्त्रीणांसापिण्ड्यंतत्रप्रयुक्तं।तदाहवसिष्ठः।अप्रत्तानांस्त्रीणांत्रिपुरुषीविज्ञायतइति।सपि
ण्डतेत्यनुवर्त्तते।तस्याश्चोभयनिरूप्यत्वाद्द्वयोरपिपरस्परंत्रिपुरुषमेवसापिण्ड्यमिति।ततश्चाप्रत्तस्त्र्या
शौचंचतुर्थादीनांचतुर्थ्याद्याशौचंवातासांनभवति।मनुरप्याशौचेसापिण्ड्यमेवमेवाह।सपिण्डता

पुरुषे सप्तमे विनिवर्त्तते। समानोदकभावस्तु जन्मनाम्नोरवेदन इति। निवर्त्तेताचतुर्दशादिति वृद्धमनुः। गौतम
स्तु पंचमे प्याह। पिंडनिवृत्तिः सप्तमे पंचमे वेति पुत्रिकापुत्रविषयं द्रष्टव्यं। तस्य तु त्रिपुरुषमेव पिण्डान्वयात्। यथाह बौ
धायनः। कथमु खलु पुत्रिकापुत्रस्य पिण्डदानमेतन्नेमुख्ये पितर्मम पितामह ये च त्वा मनु एतन्नेमुख्ये पितामह मम प्र
पितामह ये च त्वामनु एतन्नेमुख्ये प्रपितामह मम प्रपितामह ये च त्वामन्विति। इदमनौरसानामुपलक्षणं तेषामपि त्रि
पुरुषमेव पिंडान्वयात्। यथाह मनुः। त्रयाणामुदकं कार्यं त्रिषु पिंडः प्रवर्त्तते। चतुर्थः संप्रदातैषां पंचमो नोपप
द्यत इति। तदनेनौरसानामवयवानुवृत्त्या षाट्पुरुषं साफिण्ड्यमनौरसानां निर्वाप्यपिण्डान्वयेन त्रिपुरुष
मित्युक्तं भवति। इदमपि सवर्णेषु। असवर्णेषु तु त्रिपुरुषमेव। सपिण्डता पुरुषे सप्तमे विनिवर्त्तते। सजातीयेषु व
र्णेषु चतुर्थे भिन्नजातिष्विति शातातपस्मरणात्। भिन्नजातयो विजातीयभार्योत्पन्नाः। यथोक्तं ब्राह्मणात्क्षत्रविट्शू
द्रजातीनां साफिण्ड्यं तु त्रिपुरुषं ब्राह्मणैरपि जातानामविभक्तार्थभागिनामिति ब्राह्मणेषु वर्णवचनं क्षत्रियादि
प्राप्त्यर्थं क्षत्रविट्शूद्रजातीनां त्वश्वेन्मृतकसूतके। तेषां तु पैतृकाशौचं विभक्तानां तु मातृकमिति। विभागोप

तमरणोपलक्षणंनानाजातिभुपारकंपैतृकंजीवतःपितुः।अतीतेमातृकंविंद्यात्यारव्यमुभयोरपीति।यदात्वे
कोनैःसंख्यमपरश्चवहिःसंख्येवर्त्तते।यथाषाड्पुरुषेसापिंड्येपंचमसप्तमोतदातयोःसापिंड्यंनिवर्त्तते।उभयनि
रूप्येतस्मापृथोन्यतरकेर्मादिनासंयोगादिनेस्यत्वेचमन्यतरसंख्यावहिर्भावेनसापिंड्यमपीत्यवगंतव्यंतेनव
तयोःपरस्परंसोदकाशौचमेवनतुसपिंडाशौचं।नचैवंविवाहप्रसंगस्तत्रोभयोरपसपिंडत्वेनोभयोरपिसंख्यानिहि
र्भावसापेक्षणात्तत्रैतन्नैवव्यवह्रते।आशौचापनोदमाह।।आशौचेहोमदानप्रतिग्रहस्वाध्यायानिवर्त्तंते।।६।।होमोवै
श्वदेवःविप्रोदशाहमासीतवैश्वदेवविवर्जितइतिसंवर्त्तस्मरणात्।नश्रौतःस्मार्त्तोवावैतानोपासनाःकार्याइति
प्रतिप्रसवात्स्वाध्यायोब्रह्मयज्ञः।सवान्येषांत्रयाणामुपलक्षणं।एतेननमरणाशौचेनिवर्त्तंते।यद्वाविधानंचन
कुर्यान्मृसाय८जन्मनोरितिस्मरणात्।चकारःस्मार्त्तकर्मपात्रोपसंग्रहार्थः।यथाहव्याघ्रपात्।स्मार्त्त
कर्मपरित्यागोराहोरन्यत्रसूतके।श्रौतेकर्मणितत्कालंस्नातःशुद्धिमवाप्नुयादिति।अत्रश्रौतस्मार्त्तयो
रेवनिषेधप्रतिप्रसवौनित्यानिनिवर्त्तेरन्वैतानवर्ज्जंनमितिपारस्करणात्।नैमित्तिककाम्ययोस्तुनिषेधः

स्मृत्यंतरे। वर्ज्जयेत्सूतके कर्म नित्यनैमित्तिकादिकमिति। अत्र नित्यनैमित्तिके सगतिके आदिशब्दात्काम्यं तद
पि सगतिकं। आशौचिनो भोजने आशौचविधानायतन्निषेधति॥ ॥नाशौचे कस्यचिदन्नमश्नीयात्॥७॥ ॥ ॥
आशौचिनः सवर्णस्यासवर्णस्य वा सपिण्डस्यान्नमन्यो नाश्नीयात्। सपिण्डस्य तु न दोषः। यथाह यमः। उभय
त्र दशाहानि कुलस्यान्नं न भुज्यते। सूतके तु कुलस्यान्नमदोषं मनुरब्रवीदिति। उभयत्र जननमरणयोः कुलस्या
शौचिनोऽन्नमन्यैर्न भुज्यते स्वकुले तु न दोष इत्यर्थः। कस्यचिदिति सामान्योपादानेप्यनग्निहोत्रिण इति द्रष्टव्यं
तदाहांगिराः। ब्रह्मक्षत्रविशांगिराः। सूतके शावआशौचे ह्यस्थिसंचयनात्परमिति। तदेवाह॥ ॥ब्राह्मणादीनाम
शौचे यः सकृदेवान्नमश्नाति तस्य तावदशौचं यावत्तेषां॥८॥ ॥ब्राह्मणाद्यन्यतमाशौचिनो योऽन्नमश्नीयात्सकृ
दपि सतन्नदाशौचमेव प्राप्नुयात्तावत्कालमशुचिर्भवतीत्यर्थः। इदं च कामतो नापदि भोजने ज्ञेयं। यस्तेषाम
न्नमश्नाति सकृदेवापि कामतः। तावत्त्यहान्यशौचं स्यात्सपिण्डानां कर्यं च नेति। विस्तरस्तु शुद्धिचंद्रिकायाम
वगंतव्यः। किंच॥ ॥आशौचापगमे प्रायश्चित्तं कुर्यात्॥९॥ ॥अन्नभोजनादिनिमित्तेन यस्य यावदाशौचं

प्राप्नं तदपगमे वक्ष्यमाणं प्रायश्चित्तं कुर्यात्॥ न देवात्॥ ॥सवर्णस्याशौचे द्विजो भुक्त्वा स्रवंतीमासाद्य तन्निमग्न
स्त्रिरघमर्षणं जप्त्वोत्तीर्य गायत्र्यष्टसहस्रं जपेत्॥१०॥ ॥द्विजो विप्रादिः सवर्णाशौचे भुक्त्वा नदीं गत्वा तत्र त्रि
मग्नस्त्रिवारमंत्रमघमर्षणं जप्त्वोत्तीर्याष्टाधिकं सहस्रं गायत्रीं जपेत्॥ ॥क्षत्रियाशौचे ब्राह्मणस्त्वेतदेवोपोषि
तः कृत्वा सिध्यति॥११॥ ॥विप्रस्तु क्षत्रियाशौचे भुक्त्वोपोष्य पूर्वोक्तमेव कृत्वा शुध्यति॥ ॥वैश्याशौचे ब्राह्म
णः त्रिरात्रोपोषितश्च॥१३॥ ॥विप्रो वैश्याशौचे भुक्त्वा त्रिरात्रोपोषितः पूर्वोक्तं कृत्वा शुध्यति ब्राह्मणाशौचे राजन्यः
क्षत्रियाशौचे वैश्यश्च स्रवंतीमासाद्य गायत्रीशतपंचकं जपेत्॥१४॥ ॥विप्राशौचे क्षत्रियः क्षत्रियाशौचे च वै
श्यो भुक्त्वा नदीं गत्वा गायत्रीशतपंचकं जपेत्। स्रवंतीमासाद्येत्यनुवृत्तावपि पुनर्वचनमघमघमर्षणनिवृत्त्य
र्थं शुनरत्रतावन्मात्रानुवृत्त्यर्थं च॥ ॥वैश्यस्य ब्राह्मणाशौचे द्विजो भुक्त्वा प्राजापत्यं चरेत्॥१६॥ ॥द्विजो वि
प्रादिः शूद्राशौचे भुक्त्वा नदीं गत्वा वक्ष्यमाणं प्राजापत्यं चरेत्॥ ॥शूद्रस्य द्विजाशौचे द्विजोऽर्धमाचरेत्॥
॥१७॥ ॥शूद्रस्य द्विजाशौचे भुक्त्वा नदीं गत्वा स्नानं कुर्यात्॥ ॥शूद्रः शूद्राशौचे स्नातः पंचगव्यं पिबेत्

॥१८॥ ॥शूद्रः शूद्राशौचे समुत्क्रान्ते नद्यां स्नातः पंचगव्यं पिबेत्। द्विजातीयाशौचमाह॥ ॥पत्नीनां दासानामानु
लोम्येन स्वामिनस्तुल्यमाशौचं॥ ॥विप्रादीनामानुलोम्येन वर्णानुक्रमेण याः पत्न्यः क्षत्रियाद्यास्तिस्रो वर्णा
नुपूर्व्येणेति स्मरणात्। एवं दासा वर्णानामानुलोम्येन दास्यं न प्रतिलोमत इति स्मरणात्। तासां पत्नीनां दासानां च स्वज
ननमरणयोरपि स्वामितुल्यमेवाशौचं यज्जातीयः स्वामी तदाशौचकालेनैव तेषामपि शुद्धिरित्यर्थः। एतच्च जीवति स्वामि
तुल्येनाशौचेन शुध्यंति मृतसूतक इति बृहस्पतिस्मरणात्। मृते तु स्वजातीयमेवेत्याह॥ ॥मृते स्वामिन्यात्मीयं॥
॥२०॥ ॥स्वामिमरणानंतरं श्यगवस्थितानां वा पत्न्यादीनां स्वस्वजातीयमेवाशौचं तदाह हारीतः। मृतसू
तेषु दासानां पत्नीनां चानुलोमतः। स्वामितुल्यं भवेच्छौचं मृते स्वामिनि यौनकमिति। स्वस्वजातीयं॥ ॥हीनवर्णानाम
धिकवर्णेषु सपिंडेषु तदशौचव्यपगमे शुद्धिः॥२१॥ ॥हीनवर्णानां क्षत्रियादीनामधिकवर्णेषु ब्राह्मणा
दिषु सपिंडेषु जातेषु मृतेषु वा यदुत्तमवर्णाशौचं तदपगमे एव शुद्धिः। तदाह ब्रह्मपुराणं। शूद्राविट्क्षत्रियाश्च
क्रमादुत्तरजातिषु। बांधवेषु चरंत्यत्र यत्संख्यं तेषु विद्यते इति। सापिंड्यात्तु हन्ता वर्षिसापिंड्योपादाने विजातीय

।तदुक्तमेव प्राक्‌ब्राह्मणस्य क्षत्रविट्शूद्रेषु सपिंडेषु षड्रात्रत्रिरात्रैकरात्रैः॥२२॥ ॥क्षत्रविट्शूद्रेषु सपिण्डेषु षड्
रात्रत्रिरात्रैकरात्रैः॥२२॥ ॥क्षत्रविट्शूद्रेषु सपिण्डेषु जातेषु मृतेषु वा विप्रस्य षड्रात्रत्रिरात्रैकरात्रैः क्रमेण शुद्धिः
॥ ॥क्षत्रियस्य विट्शूद्रयोः षड्रात्रत्रिरात्राभ्यां॥२३॥ ॥विट्शूद्रयोः सपिंडजातेषु मृतयोः क्षत्रियस्य षड्रात्रत्रि
रात्राभ्यां शुद्धिः॥ ॥वैश्यस्य शूद्रेषु षड्रात्रेण॥२४॥ ॥शूद्रेषु सपिंडेषु जातेषु मृतेषु वा वैश्यस्य षड्रात्रेण शुद्धिः॥ष
ड्रात्रत्रिरात्र इत्येकेनद्वा क्षत्रविट्शूद्रयोर्निर्दिष्टमिति।यत्तु ब्राह्मे।बांधवेषु च विप्रस्य क्षत्रविट्शूद्रजातिषु।मृतेषु वाथ ज
तेषु दशाहाच्छुद्धिरिष्यते।क्षत्रियस्याथ वैश्यस्य क्रवैश्यस्य च षलुस्तथा।जायते म्रियते वंधुस्तत्राशौचं स्वकंभ
वेदिति तद्दशानाराज्ञरोधेनप्यथस्यापयं।तदुक्तं नैवादेशधर्मप्रमाणत्वात्षड्रात्रं क्षत्रियेषु यथा।त्रिरात्रमपि वै
श्यस्य शूद्रे षट्काहमेव वेति।गर्भस्रावाद्दशौचमाह॥ ॥मासतुल्यैरहोरात्रैर्गर्भस्रावे॥२५॥ ॥यावंतो मासा
गर्भस्य तत्समसंख्यैरहोरात्रैर्गर्भस्रावे मातुराशौचं तत्पातेऽपि निर्दिष्टं।तत्राद्यमासत्रये मातुरेव त्रिरात्रं न सपिण्ड
नां चतुर्थपंचमषष्ठेषु च मासेषु मासमसंख्यैरहोरात्रैर्मातुः शुद्धिः पित्रादीनां तु तत्र त्रिरात्रमित्यर्थः।तदाह मरच।

गर्भस्रावेयथामाससमचिरेत्नृत्तमेत्र्यहः।स्रावेमातुस्त्रिरात्रंस्यात्सपिंडाशौचवर्जनं।पातेमातुर्यथामासंपित्रादीनांदि
नत्रयमिति।अचिरेआचमासत्रये।उत्तमेब्राह्मणजातो।यत्रापिसपिण्डाशौचाभावस्तत्रापिपितुःस्नानमस्त्येवा
गर्भस्रावेमासतुल्यारात्रयःस्त्रीणांस्नानमेवपुरुषस्येतिहृद्ववसिष्ठस्मरणात्।क्षत्रादीनांत्वाहमरीचिः।राज
न्येचतूरात्रंवैश्येपंचाहमेवच।अष्टाहेनतुशूद्रस्यशुद्धिरेषाप्रकीर्तिता।तदामाससमैस्तासांदिवसैःशुद्धिरिष्यतइति
ब्राह्मे।तच्छब्देनसर्ववर्णस्त्रीणांपरामर्शात्।तुल्यंवयसिसर्वेषामितिब्राह्मपादस्मरणाच्च।बालाशौचमाह।। ।।
जातमृतेमृतजातेवाकुलस्यसद्यःशौचं।।२६।। ।।जातएवमृतोजातमृतोनाभिच्छेदात्पूर्वमेवमृतइतियाव
त्।मृतएवजातोमृतजातस्तस्मिन्कुलस्यसद्यःशौचंतन्मरणनिमित्तंकुलस्यनाशौचमित्यर्थः।यथा
हहमनुः।दशाहाभ्यंतरेबालेप्रमीतेतस्यबांधवैः।शावाशौचंनकर्त्तव्यंसूत्याशौचंनकर्त्तव्यंविधाय
इति।सूत्याशौचेविशेषःस्मृत्यंतरे।जीवन्जातोयदिततोमृतःसूतकसकलंमातुः।पित्रादीनांदिनत्र
मिति।नालच्छेदात्पूर्वमित्यर्थः।पारस्करोपि।भ्रभ्रेयदिविपत्तिःस्याद्दशाहंसूतकंभवेदिति।। ।।ब्रदं

तैलालेप्रेतेसद्य एव॥१७॥ ॥जानादंतायस्यासौरंगजातः तद्भिन्नोऽदंतजातस्तस्मिन्बालेप्रेतेसपिंडानां सद्य
एव शुद्धिः। इदं च दाहाभावेन यावद्प्रमाणत्वात् दाहे तु रात्रमेकाहो दंतजन्मनः प्रागिति स्मृत्यंतरात्। पि
त्रोस्तु त्रिरात्रमेव सर्वत्र वैजिकादपिसंबंधाद्वतुरंथ्यादवंद्व्यहमितिमनुस्मरणात्॥ ॥नास्याग्निसंस्का
रो नोदकक्रिया॥१८॥ ॥अस्याजातदंतस्याग्निसंस्कारो दाहो न कार्यो नाप्युदकक्रियांजलिदानं न का
र्यं। निषेधश्चायं पाक्षिको ज्ञेयः। तत्कामे वोदकं कुर्यात्तत्कामे संस्कार एव च। सर्वेषां कृतचूडानामन्यत्रा
पि च वा द्व्यहमिति लौगाक्षिस्मरणात्॥ ॥कृतचूडे च संस्कृते त्रिरात्रेण॥२०॥ ॥चूडाकरणानंतरमसंस्कृ
ते उपनीते त्रिरात्रेण शुद्धिः सर्वेषां। अत्र दाहो नियत एव। तत्कामे वोदकं कुर्यादिति स्मरणात्। त्रिवर्षस्य तु चू
डाभावेपि दाह त्रिरात्रे नियते। चौलं न क्रियते यस्य स्वकाले तन्मृतावपि चतुर्थवर्षमारभ्य दादि त्रिदिनं स्मृ
तमिति। षडशीतिस्मरणात्॥ ॥ततः परं यथोक्तकालेन॥२१॥ ॥ततउत्पनयनात्परं स्वस्वकालेन
दशाहादिना सर्वे वर्णाः शुध्येयुः। संस्कृतास्तु स्त्री च्याशौचाभावं पितृपक्षे च स्पति। तत्र संस्कारः क

इत्यपेक्षायामाह ॥ ॥ स्त्रीणां विवाहः संस्कारः ॥ इति ॥ ॥ स्त्रीणामशौचं विवाहानंतरमेवोपनयनस्था
नीयत्वात्तस्य वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृत इति मानवात् । प्राग्विवाहात्तु विशेषो ब्राह्मे ।
आजन्मनस्तु चौलांतं कन्या यदि विपद्यते । सद्यः शौचं भवेत्तत्र सर्ववर्णेषु नित्यशः ॥ ततो वाग्दानपर्यं
तं यावदेकाहमेव हि । ततः परं प्रवृद्धायां त्रिरात्रमिति निश्चयः ॥ वाक्यदाने कृते तत्र ज्ञेयं चोभयतस्त्र्य
हं । पितुर्वरस्य च ततो दत्तानां भर्तुरेव हि ॥ स्वजात्युक्तमशौचं स्यान्मृतके जातके तथेति । पित्रोस्तु सर्वत्र त्रिरात्रमे
व तदाह कार्ष्णाजिनिः । प्रत्तासु योषित्सु संस्थितासु वा ॥ वाग्दत्ता ऽवाग्दत्ताकृतचौलास्त्वित्यर्थः । अत्र विशेषमा
ह तु शंखकार्ष्णाजिनी । अजातदंतासु पित्रोरेकरात्रमिति । देवस्वामी त्वप्रत्तास्वपि दशाहमाह । दशाहं सपिंडेषु
गुरौ वा सपिंडे ऽप्रत्तासु च स्त्रीष्वित्याश्वलायनस्मरणात् । वसिष्ठोपि दशाहं शा शा वमाशौचमित्युपक्रम्य अप्र
त्तानां स्त्रीणां त्रिपुरुषी विज्ञायत इत्यभिधाय जननेप्येवमेव स्यादित्युपसंहरन्नेवमेवाह । तच्च देशाचारतो व्यव
स्थाप्यं । विवाह इति सामान्योपादानेपि ब्राह्मदैवार्षप्राजापत्यानामेव ग्रहणं नामेव ग्रहणं तत्रैव पादानस्यैव वा ।

शौचविच्छेदकत्वात्। तथा च वसिष्ठः। पत्नीनामिति कुरे कृतस्मात्प्रदानमेव निमित्तं। तथा च गांधर्वासुरराक्षस
पैशाचेषु च प्रदानाभावे न सगोत्रसापिंड्ययोर्निवृत्त्या दशाहाशौचमेव सिध्यति। येन तु सपिंडता उक्ता विज्ञेया गोत्र
तः सा न पौरुषी। पिंडश्चोदकदानात्तु शौचाशौचं तदनुगमिति शंखलिखितवचनात् सापिंड्यविशिष्टं सगोत्र
त्वं दशाहाशौचनिमित्तमाह। तेषां सापिंड्योर्ध्वं सगोत्रे शौचमात्रपक्षस्य तु न सगोत्रत्वं सापिंड्यं यो विधमा
नत्वेन दशाहाशौचप्रसंगोऽत्र रुद्रधरः। स्वाशौचस्य पितृपक्षे नैमित्तिकपवादमाह॥ ॥संस्कृतासु स्त्रीषु ना
शौचं पितृपक्षे॥२२॥ ॥ब्राह्मादिचतुर्विवाहोढासु स्त्रीषु प्रत्तासु मृतासु वा पितृपक्षे नाशौचं भवति। तस्यै
व नैमित्तिकं प्रतिप्रसवमाह॥ ॥तत्र प्रसवमरणे चेत्पितृगृहे स्यातां तदैकरात्रं ज्ञेयं। यथाह ब्राह्मे। दत्ता कन्या
पितुर्गेहे सूयते म्रियते तथा। तद्बंधुवर्गस्त्वेकेन शुध्यते जनकस्त्रिभिरिति। एतेन प्रसवे एकरात्रं मरणे त्रिरात्रमिति
निरस्तं। एतत्तु प्रसवमरणे समुच्चिते निमित्ते द्वंद्वनिर्देशादिति तत्त्वं। गृहे मृतासु दत्तासु कन्यासु त्र्यहं पितुरिति
कौर्मविरोधात्। आशौचसन्निपाते विशेषमाह॥ ॥जननाशौचमध्ये यद्यपरं जननाशौचं स्यात्तदा पूर्वा

194

शौचव्यपगमे शुद्धिः॥२५॥ ॥प्रक्रांतजननाशौचस्यांतिमदिनीयसूर्योदयपर्यन्तमपरं जननाशौचं स्यात्तदा पूर्वाशौ
चशेषेणैव कालेन शुद्धिर्न पुनर्दशरात्रादि। यथाह बौधायनः। अथ चेद्यदि दशरात्राः सन्निपतेयुराद्यं दशरात्रमाशौ
चमानवमाद्दिवसादिति। आङ् भिव्याप्त्यर्थः। जननाशौचसामान्योपादानेपि दीर्घकालेनपि दीर्घकालेन स
मकालमल्पकालं वापैति॥ नतु स्वल्पकालेन दीर्घकालमिति द्रष्टव्यं। तदाह देवलः। अघानां यौगपद्ये
तु ज्ञेया शुद्धिर्गरीयसा। गुरुणा लघु सुध्येत लघुना नैव गुर्विति। किंच॥ ॥रात्रिशेषे दिनद्वयेन॥२६॥ ॥
अत्राशौचप्रकरणे निशाशब्दस्याहः शब्दस्याहोरात्रपरत्वेनांतिमाहोरात्ररूपे शेषे शौचांतरपाते दिनद्वयेन शुद्धि
र्न पूर्वशेषेणैवा किंच॥ ॥प्रभाते दिनत्रयेण॥२७॥ ॥प्रभाते रात्रेश्चरमे यामे त्वाशौचांतरपाते त्रिकेन दिन
त्रयेण शुद्धिः। तदाह देवलः। पुनः पाते दशाहात्प्राक् पूर्वेण सह गच्छति। दशमेह्नि पतेद्यस्य द्व्यहेन स विशुध्यति।
प्रभाते तु त्रिरात्रेण दशरात्रेष्वयं विधिरिति। शातातपोपि। रात्रिशेषे द्व्यहाच्छुद्धिर्यामशेषे त्र्यहा[illegible]च्छुरिति॥॥
मरणाशौचमध्ये ज्ञातिमरणेप्येवं॥२८॥ ॥जननाशौचसन्निपाते यो निर्णयः स एव मरणाशौचसन्निपा

तेऽप्युपवर्तेयः। विशेषस्तु शावाशौचेन सूत्याशौचमपैति न सूत्याशौचेन शावाशौचमिति। तदुक्तं चतुर्विंशतिम
ते। मृतजातकयोर्योगे या शुद्धिः सा तु कथ्यते। मृतेन शुध्यति जातं न मृतं जातकेन तु इति॥ अत्र विशेषान्तरं
षडशीतिमते। पूर्वाशौचेन या शुद्धिः सूतिनां मृतिनां च सा। सूतिकामग्निदं हित्वा प्रेतस्य च सुतानपि॥ पू
र्वेण वा परेणापि पित्रोः शावे न हीयते। आशौचं शुद्धिमायाति न पित्रोः शावमन्यतः इति। पित्राशौचस
न्निपाते तु शंखः। मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता। पितुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षि
णीमिति॥ देशान्तरस्थं प्रत्याह॥ ॥श्रुत्वा देशान्तरस्थो जननमरणे अशौचशेषेण शुध्येत्॥२०॥ ॥अ
शौचमध्य इत्यनुवर्तते। तेन देशान्तरस्थो दशाहान्तः सपिण्डजननमरणे श्रुत्वा शौचशेषकाले नैव शुध्येत्।
न दाहदहसतिः। अन्यदेशमृतं ज्ञातिं श्रुत्वा पुत्रस्य जन्म वा। अनिर्गते दशाहे तु शेषाहोभिर्विशुध्यति इति। तस्ये
वाशौचापगमे विशेषमाह॥ ॥अतीते शौचे संवत्सरान्तस्त्वेकरात्रेण॥४०॥ ॥दशाहाद्यशौचकाले तिक्रा
न्ते पुनर्वर्षमध्ये ज्ञातिमरणश्रवणे देशान्तरस्थो ह्येकरात्रेण शुध्येत्। यद्यपि शौच इति सामान्येनोपात्तं तथापि

मरणाशौचकालेतिमात्रे इदंज्ञेयंनाशुद्धिः प्रसवाशौचे व्यतीतेषु दिनेष्वपीति देवलस्मरणात् ॥ पुत्रजन्मश्र
वणेतु पितुः स्नानमस्त्येव ॥ दिवानिशमित्यनेनाहर्द्वयमुक्तं ॥ निशोच्यते ॥ षण्मासात्पक्षिणी भवेदिति स्मरणात् ॥
अन्यथाह ॥ संवत्सरादित्यपि षण्मासादूर्ध्वं नवमान्मासादर्वाक् द्व्यहं चोर्ध्वं नवमादूर्ध्वं स्नानमात्रं श्रवणा ॥ यथाह वृद्धव
सिष्ठः ॥ मासत्रये त्रिरात्रं स्यात्षण्मासात्पक्षिणी भवेत् ॥ अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुध्यतीति किंच ॥ ॥ ततः
परं स्नानेन ॥ ५१ ॥ ॥ ततो नवममासात्परं देशांतरमृतं श्रुत्वा स्नानमात्रेण शुध्येत् ॥ यत्तु नद्यादिव्यवहितदेशां
तरमृते तत्सपिंडानां दशाहादूर्ध्वं मासत्रयादर्वागपि सद्यः शौचमिति मिताक्षरोक्तं तद्विस्तादिवाक्यविरोधा
दुपेक्षणीयं ॥ यच्च देशांतरमिते श्रुत्वा क्लीवे वैखानसे यतौ ॥ असगोत्राशौचमाह ॥ ॥ आचार्ये मातामहे च व्यती
ते त्रिरात्रेण ॥ ५२ ॥ ॥ आचार्यो वक्ष्यमाणलक्षणः ॥ मातामहो मातुः पिता तस्मिन् व्यतीते मृते त्रिरात्रेण शुद्धिः ॥ च
कारान्मातामह्यामपि ॥ मातामहे च तत्पत्न्यामाचार्ये च त्रिवासरमिति षडशीतिस्मरणात् ॥ अनौरसाद्याशौचमा
ह ॥ ॥ अनौरसेषु पुत्रेषु जातेषु च मृतेषु च ॥ परपूर्वासु भार्यासु प्रसूतासु मृतासु च ॥ ५३ ॥ ॥ अनौरसाः पुत्राः द्वौ

त्रेजसहजकानीनसहोढजपुत्रिकापुत्रिकाद्याः। अन्येषामहोरात्रमेव। यथाह मरीचिः। सूतके मृतके चैव त्रि
रात्रं परपूर्वयोः। एकाहस्तु सपिण्डानां त्रिरात्रं यत्र वै पितुरिति। परः पूर्वः पतिः पिता वा ययोः स्त्रीभार्यापुत्रौ
परपूर्वे तयोरन्याश्रितायाः स्वभार्यायाः उपलक्षणं। अन्याश्रितेषु दारेषु परपत्नीसुतेषु च। गोत्रिणः स्नानशु
द्धाः स्युस्त्रिरात्रेणैव तत्पितेति प्रजापतिस्मरणात्। पूर्वशेषमेवाह॥ ॥आचार्यपत्नीपुत्रोपाध्यायमातुल
श्वशुरश्वशुर्यसहाध्यायिशिष्येष्वतीतेष्वेकरात्रेण॥४८॥ ॥आचार्यो वक्ष्यमाणलक्षणस्तत्पत्नी विवाहसं
स्कृता। पुत्रश्चौरसः तत्सेवकः उपाध्यायो वक्ष्यमाणलक्षणः। मातुलो मातुः सोदरो भ्राता॥ श्वश्रूश्च श्वशुरश्च श्वशुरौ।
श्वशुर्यः स्यालकः। सहाध्यायी सहाध्ययनकारी। शिष्योऽध्यापितः एतेष्वतीतेष्वेकरात्रेण शुद्धिः॥ ॥स्वदेशराजाज
नि च॥४९॥ ॥यस्मिन् देशे स्वयमुषितस्तस्य स्वदेशस्तस्य राजनि च प्रेते एकरात्रेण शुद्धिः॥ ॥असपिण्डे स्ववेश्म
नि मृते च॥५०॥ ॥सपिंडः पूर्वोक्तः तद्भिन्नोऽसपिण्डस्तस्मिन् स्ववेश्मनि मृते एकरात्रेण शुद्धिः। मरणविशेषे
णाशौचापवादमाह॥ ॥श्वग्मनाशकांवसंग्रामविद्युन्नृपहतानां नाशौचं॥५१॥ ॥मृगुर्भिःकिरटकः अग्नि

रग्निप्रवेशः। अनाशकमनशनं अंबुजलघातः संग्रामो युद्धं विद्युद्वज्रो नृपो राजा एतैर्बुद्धिपूर्वं हतानां नाशौचं। यद्य
प्येतेभ्यस्त्वबुद्धिपूर्वमरणं संभवति निषिद्धं नैमित्तिकं काम्यमभ्यनुज्ञातं चेति। तथाप्याद्येषु त्रिष्वेवायमाशौचाभावः। त
त्र निषिद्धे शंखः। भृग्वग्न्यनाशकाम्भोभिर्मृतानामात्मघातिनां। न पिण्डं तस्य नाशौचं शस्त्रविद्युद्धताश्च यः इति। नैमि
त्तिके गौतमः। यस्य प्राणान्तिकं प्रायश्चित्तं स मृतः शुध्येत्सर्वाण्येवैतत्काम्यमभ्यनुज्ञातकर्म्माणि कुर्युरिति। प्राणांति
कप्रायश्चित्तप्रस्तावे सुमन्तुरपि। भृग्वग्निजलसंपातदेशान्तरस्थसंन्यास्यनशनादिभिः। शास्त्रविश्रंभवीरेण मनसा
क्रियते यतः॥ एतेष्वुत्तमोपायं कथमप्यवलंब्य वा षडंगसिद्धिं विधिवत्प्राज्ञो वा म्रियते यदि। स द्यएव विमुच्येत नात्राका
र्या विचारणा। पश्यन्नापि वत्स्येह न कुर्याद्दीर्घदैहिकं। नैवाशौचं प्रसज्येत तत्रार्विशेषतः। अथैनमपि चोद्दिश्य कर्म
चेत्कर्तुमीप्सितं। कल्याणमेव कुर्वीत भव्याभव्यांश्च पूजयेदिति। कल्याणं शिवमहोत्सवः। एतेषु त्वनेन काष्ठपाषाण
जलप्रवेशाद्योऽपि काम्यमरणोपायाः परामृश्यन्ते तेन तत्राप्याशौचादिनिवृत्तिः। तथा च हारीतपराशरः। जलमध्यगतो
वापि काष्ठमध्यगतोऽपि वा। वाराणस्यां मृतो जंतुर्न संस्कारमर्हतीति। अभ्यनुज्ञाते मनुशातातपौ। वृद्धः शौनकस्मृतौ

प्र॰ प्रायश्चित्तमिष्क्रियः। आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः। तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसं
चयः। तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमाचरेदिति। आशौचमित्यौर्ध्वदैहिकस्याप्युपलक्षणं। यथाहापस्तंबः। य
पादयेदिहात्मानं स्वयं योऽग्न्युदकादिभिः। विहितं तस्य नाशौचं नाग्निर्नाप्युदकक्रियेति। प्रमादमृते त्वस्ये वस
र्णात्र्यकस्थि। प्रमादेन म्रियेताग्न्युदकादिभिः। विहितं तस्य नाशौचं नाग्निर्नाप्युदकक्रियेति। प्रमादमृते त्वस्मे
व स्मरणात्। अथ केषांचित्कर्मविशेषेणापवादमाह। ॥ नराज्ञां राजकर्मणि ॥४८॥ ॥ राज्ञामभिषिक्तादी
नां राजकर्मणि प्रजापालनोपयुक्तहोमदानव्यवहारदर्शनादौ नाशौचं॥ ॥ नव्रतिनां व्रते ॥४९॥ ॥ व्रतं कृच्छ्रचां
द्रायणादि विद्यते येषां ते व्रतिनस्तेषामात्मव्रतानुष्ठाने नाशौचं। यद्वा व्रतिनो ब्रह्मचारिणस्तेषामपि नाशौ
चं परं तु पित्रोरन्यत्र। यथाह वसिष्ठः। ब्रह्मचारिणः शवकर्मणा व्रतान्निवृत्तिरन्यत्र मातापित्रोरिति। यद्वा व्र
तिनः प्रकीर्णकप्रायश्चित्तप्रवृत्तानां दानिब्रह्मविदां तथेति ब्राह्मणात्॥ ॥ नसत्रिणां सत्रे ॥५०॥ ॥ सत्रं गवामय
नाद्यन्नसत्रादि च तद्विद्यते येषां यजमानानां ते सत्रिणस्तेषां सत्रे गवामयनाद्यन्नसत्रादौ नाशौचं। अन्नसत्रप्रवृत्त

नाम्नममन्नमगर्हितंइतिस्मरणात्। सत्रकाहादीनांउपलक्षणं। नराजाज्ञाकारिणांतदिच्छया॥५३॥ ॥राजाज्ञा
कारिणोराजसेवकास्तेषांराजेच्छयानाशौचं। राज्ञःपुरोहितोमात्यःशुद्धिस्तस्यतदाश्रयाशंखलिखितस्मरणा
त्॥ ॥नदेवप्रतिष्ठाविवाहयोःपूर्वसंभृतयोः॥५३॥ ॥विष्ण्वादिमूर्तिप्रतिष्ठायांविवाहेचनाशौचंपूर्वमाशौचात्संभा
रःशारंभश्चेत्तएवंश्राद्धादिष्वपिज्ञे। यज्ञेसंभृतसंभारेविवाहेश्राद्धकर्मणीतिस्मरणात्। प्रारंभलक्षणंचाहविष्णुः। प्रारं
भोवरणंयज्ञेसंकल्पोव्रतसत्रयोः। नांदीमुखंविवाहादौश्राद्धेपाकक्रियेति॥ ॥नदेशविभ्रमे॥५४॥ ॥देशोपप्लवेना
शौचंस्यात्दुर्भिक्षेराष्ट्रसंपातेआपदांचसमुद्भवे। उपसर्गमृतेचैवसद्यःशौचंविधीयतइतिपराशरस्मरणात्॥ ॥आपद्य
पिचकष्टायां॥५५॥ ॥कष्टापत्सुदुर्भिक्षरोगादिस्तत्रप्रतिग्रहदानादौनाशौचंजन्मप्रभृतिपापानांनिरासेचमरिष्य
तःउत्क्रांतिवैतरणीपाडदानेप्रेताङ्गतिषपि। सद्योऽप्रस्यलुडुंवार्थप्रतिगृह्णतोनत्थैतिषडशीतिमतात्। और्ध्वदेहिका
पवादमाह॥ ॥आत्मत्यागिनःपतिताश्चनाशौचोदकभाजः॥५६॥ ॥आत्मत्यागिनःपूर्वोक्ताःपतितामहापातकिप्र
भृतयस्तेषामाशौचदकदानादिनकार्यं। आत्मत्यागिनांनस्तिपतितानांतथाक्रिया। तेषामपितथागंगातोयेसंस्थापनंहि
तमितिस्मरणात्। यद्यप्यात्मघातिनामाशौचाभावःपूर्वमेवोक्तस्याप्युदकदानादिनिवृत्त्यैपुनरुपन्यासः। कथंत

ह्रितस्य तत्पत्निः स्यादित्यत आह॥ ॥पतितस्य दासी घटं क्षिपेदार्यां वटमपवर्ज्जयेत्॥५७॥ ॥मरणदिने दासी अपां घटं पदा
पवर्ज्जयेत् पर्यस्येदिदं त्वं पिबेति॥ तदुक्तं ब्राह्मे॥ पतितस्यातु कारुण्याद्यस्तु पिण्डं कर्त्तुमिच्छति॥ स हि दासीं समाहूय सर्व
गां दत्तवेदिनां॥ अशुद्धहस्तांतां यत्नं ब्रवीत्यपि॥ हे दासि गच्छ मूल्येन तिलानानाय सत्वरं॥ तोयपूर्णं घटं चैव मंसति
लं दक्षिणामुखी॥ उपविश्यातु वामेन चरणेन ततः क्षिपेः॥ कोन्यः पतितां संज्ञां त्वं पिबेति मुहुर्वदेदिति॥ शुद्धस्त्रिः
सप्तम्यां पतितवहिष्कारः॥ जीवदवहिष्कारस्तु वर्ष्यातेश कारान्तरमप्युक्तं तत्रैव॥ क्रियते पतितानां तु गते संवत्सरे क्व
चित्॥ देशधर्मप्रमाणत्वाद्‌याकृपेषु वेदुभिः॥ मार्कंडपादमूले च शाहं हरिहरं स्मरन्निति॥ आत्मघातिसंस्कारा
दो प्रायश्चित्तमाह॥ ॥उद्बन्धनमृतस्य यः पाशं छिंद्यात्स तप्तकृच्छ्रेण शुध्यति॥५८॥ ॥उद्बन्धनं गलपाशस्तेन मृतस्य
यस्तं पाशं छिंद्यात्स तप्तकृच्छ्रेण वक्ष्यमाणेन शुध्यति॥ ॥आत्मत्यागिनां संस्कर्त्ता च॥५९॥ ॥पूर्वोक्तानामात्म
घातिनां दाहक वाहकादिरपि तप्तकृच्छ्रेण शुध्यति॥ वोढारश्चाग्निदातारः पाशच्छेदकरास्तथा॥ तप्तकृच्छ्रेण शुध्यन्ती
त्येवमाह प्रजापतिरिति पराशरस्मरणात्॥ ॥तदश्रुपाते कारी च॥६०॥ ॥तेषामात्मघातिनामर्थे योश्रुपातं करो
ति सोपि तप्तकृच्छ्रेण शुध्यति॥ प्रसंगादन्यार्थाश्रुपातेपि प्रायश्चित्तमाह॥ ॥सर्वस्यैव प्रेतस्य बांधवैः सहाश्रुपातं कृ

राम
२२५

त्वास्नानेन॥ ६१॥ ॥सर्वस्य चातुर्वर्णिकस्य प्रेतस्य प्रसंगान्मिलितैर्बांधवैः सहाश्रुपातं कृत्वा सर्वोपि स्नानमात्रेण शुध्यति॥
तद्गृहगमनादौ त्वाशौचं तत्स्मरणात्॥ तच्च शुद्धिचंद्रिकायामुक्तमिति नेहोच्यते॥ यद्वा सर्वस्य ब्राह्मणब्राह्मरिक्तरोदने इदं
द्रष्टव्यं॥ यथाह ब्राह्मे॥ सचैलं स्नानमन्येषां भक्षकृते तत्वास्थिसंचये॥ कृते तु केवलं स्नानमात्रं द्रष्टव्यं॥ अनुगमनाशौचमाह॥ ॥
द्विजः शूद्रप्रेतानुगमनं कृत्वा स्रवंतीमासाद्य तन्निमग्नस्त्रिरघमर्षणं जप्त्वोत्तीर्य गायत्र्यष्टसहस्रं जपेत्॥ ६३॥ ॥द्विजस्त्वेवं ऐ
कः शूद्रं प्रेतमनुगम्य नदीं गत्वा तस्यां निमज्य त्रिरघमर्षणं जप्त्वोत्तीर्याष्टाधिकं सहस्रं गायत्रीं जपेत्॥ ॥द्विजप्रेताधि
कं यात्॥ ६४॥ ॥द्विजो द्विजप्रेतमनुगम्यश्चेदघमर्षणं जप्त्वाष्टाधिकं शतं गायत्रीं जपेत्॥ ॥शूद्रः प्रेतानुगमनं कृत्वा स्नान
माचरेत्॥ ६५॥ ॥शूद्रो द्विजं प्रेतमनुगम्य स्नायात्॥ ॥चिताधूमसेवने सर्वैर्वर्णैः स्नानमाचरेयुः॥ ६६॥ ॥चिताप्र
सिद्धात् धूमसेवने सर्वे वर्णाः स्नानं कुर्युः॥ प्रसंगात् स्नाननिमित्तान्याह॥ ॥मैथुने दुःस्वप्ने रुधिरोपगतकंठे वमनवि
रेकयोश्च॥ ६७॥ ॥स्त्रीसंभोगे दुःस्वप्ने गद्देभाघारोहणे कंठतो रुधिरनिर्गमे वांतेतिसारे च सर्वे स्नानं कुर्युः॥ ॥
श्मश्रुकर्मणि कृते वा॥ ६८॥ ॥श्मश्रुकर्म क्षौरं तस्मिंश्च कृते स्नानं कार्यं॥ ॥शवस्पृष्टं चस्पृष्ट्वा रजस्वलाचांडालयू
पांश्च॥ ६९॥ ॥शववाहकं रजस्वलां सुदक्यां चंडालं तत्समानधर्मं श्वपचादिकं च यूपं यज्ञस्तंभं च स्पृष्ट्वा स्नायात्॥

॥ ॥नेदष्यवर्ज्जं पंचनखं शावं तदस्थि स्नेहाक्तं ॥७०॥ ॥मनुष्याः पंचनखाः शशादयः पंचतद्वर्ज्ज्यं शवादि पंच
नखवमोर्ज्जं तदस्थिवस्पृष्ट्वा स्नायात् ॥ खुस्नानेषु विशेषमाह ॥ ॥सर्वेष्वेतेषु स्नानेषु वस्त्रं नाप्रक्षालितं विभृ
यात् ॥७१॥ ॥एतेषु पूर्वेषु सर्वेष्वपि स्नानेषु स्पर्शकाले नानं वस्त्रं प्रक्षाल्येव विभृयान्नाप्रक्षालितं ॥ रजःशुद्धिमा
ह ॥ ॥रजस्वला चतुर्थेह्नि स्नाना च्छुध्यति ॥७२॥ ॥रजस्वलोदक्यादिनत्रयं व्रतेनातिब्राह्मश्चतुर्थेह्नि प्रा
तः संगवेवा मृद्भिः शौचं कृत्वा सचेलं स्नात्वा शुध्यति स्पर्शेनार्हा परिचरणे च योग्या भवति दैवपित्र्ययोस्तु
पंचम एवा चतुर्थेह्नि कुर्वीत प्रातः स्नानं यथाविधि संगवे वा मृदाद्भिश्च शौचं कृत्वा रजस्वलेति स्मृत्यंत
रात् ॥ आपस्तंबोति ॥ शुद्धा भर्तुश्चतुर्थेह्नि स्नाता नारी रजस्वला दैवे कर्मणि पित्र्ये च पंचमेह्नि शुध्यतीति ॥ रजस्वल
योरन्योन्यस्पर्शे शुद्धिमाह ॥ ॥रजस्वला हीनवर्णां रजस्वलां स्पृष्ट्वा न तावदश्नीयाद्यावन्न शुद्धा ॥७३॥ ॥
ब्राह्मण्यादिः रजस्वला हीनवर्णां क्षत्रियादि स्वलां स्पृष्ट्वा न तावदश्नीयात् ॥७४॥ ॥सवर्णां ब्राह्मण्यादि
कामधिकवर्णां क्षत्रियादिर्ब्राह्मण्यादिकां वा रजस्वलां स्पृष्ट्वा सद्यः स्नात्वाश्नीयान्नोपवसेत् ॥ इदं तु भयम

पकामतः स्पर्शे कामतः स्पर्शे तु यावच्छुद्ध्युपवासोंते प्रायश्चित्तं च वसिष्ठपराशराद्युक्तं अन्वेष्यं । तच्च परा
शरः स्मृति विहितो विद्वन्मनोहरायामुक्तमिति नेहोच्यते । आचमनशुद्धिमाह ॥ ॥क्षुत्वा सुप्त्वा भुक्त्वा भोजना
ध्ययनेप्सुः पीत्वा स्नात्वा निष्ठीव्य वासः परिधाय रथ्यामाक्रम्य मूत्रपुरीषं कृत्वा पंचनखास्थ्यस्नेहं स्पृष्ट्वा चाचा
मेत् ॥७५॥ ॥क्षुतस्वापभोजनानंतरं भोजनाध्ययनादौ च पानस्नाननिष्ठीवनवासःपरिधानरथ्याक्रम
णमूत्रपुरीषोत्सर्गास्नेहपंचनखास्थिस्पर्शेष्वाचामेत् । चकारः पुनरुक्त्यर्थः । यथाह योगीश्वरः । स्ना
त्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे । आचांतः पुनराचामेद्वासो विपरिधाय चेति । आपस्तंबः । भोक्ष्यमा
णोप्येवमाचम्य प्रयतोपि द्विराचामेत् । प्रचेताः । मूत्रपुरीषोत्सर्गनिष्ठ्यूतशुक्रवाच्याभिधाने पुनरुपस्पृशेदि
ति ॥ ॥चंडालम्लेच्छसंभाषणे च ॥७६॥ ॥चंडालशुक्लदाराः म्लेच्छाः किरातादयस्तेषां संभाषणे द्वि
राचामेत् । प्रक्षालनशुद्धिमाह ॥ ॥नाभेरधस्तात्प्रबाहुषु च कायिकैर्मलैः सुराभिर्मद्यैश्चोपहतो मृ
त्तोयैस्तदंगं प्रक्षाल्य शुध्येत् ॥७७॥ ॥नाभेरधोभागे प्रबाहुप्रकरणे च कायिकैर्मलैः सुराभिर्म

वि० टी० २२

२२७

द्येसुवक्ष्यमाणलक्षणैरुपहतोमृत्तोयैर्गंधलेपक्षयंयावत्तदंगंप्रक्षाल्यशुध्येत्।स्नानस्थहिमाह॥ ॥ऊ
र्ध्वंनाभेः? न्यत्रोपहतोमृत्तोयैस्तदंगंप्रक्षाल्यस्नानेन॥७८॥ ॥वक्त्रोपहतस्तूपोष्यस्नात्वापंचगव्येन॥ ॥सूवै
कैरेवदृष्टो वक्त्रे उपहतउपोष्यस्नात्वापंचगव्यपानेनशुध्येत्।वक्त्रुषीत्यपिपाठः॥ ॥दशनच्छदोपहत
स्त्व॥७९॥दशनच्छदावोष्ठौ तत्रोपहतस्त्वोपोष्यस्नात्वापंचगव्येनशुध्येत्।कायिकैर्मलैरित्युक्तान्नाह॥
॥ ॥वसाशुक्रमसृङ्मज्जामूत्रंविट्कर्णविड्नखाः।श्लेष्माश्रुदूषिकास्वेदोद्वादशैतेनृणांमलाः॥८१॥
॥ ॥वसामांसस्नेहः।शुक्रंरेतोसृग्रक्तंमज्जास्थिस्नेहःशिरगतोरसः मूत्रंप्रस्रावः।विट्पुरीषंकर्णविट्क
र्णच्छिद्रमलः।नखाः नखराः।श्लेष्माकफः।अश्रुनेत्रजलंदूषिकानेत्रमलंस्वेदोंगजलमेतेद्वादशनृणां
मलाः।नखग्रहणंपंचनखोपलक्षणं।स्वसृगालादीनांमस्थ्युपन्यासात् विण्मूत्रे च सर्वस्याजाविकगोश्वे
भ्योन्यतिस्मरणात्।सुराभिरित्युक्तं तद्भेदानाह॥ ॥गौडीमाध्वीचपैष्टीचविज्ञेयात्रिविधासुराय
थैवैकातथासर्वानपातव्याद्विजातिभिः॥८२॥ ॥गौडीगुडविकारः।माध्वीमधुविकारः।पैष्टीपिष्ट

२२

विकारः सेयं त्रिविधा सुरा विज्ञेया विज्ञेयतानावचनाच्चैतत्त्रये सुराशब्दस्य शक्तिं गमयति । अन्यथा कथा
मानर्थक्यात् नन्वनेकार्थत्वं तालादिमध्ययष्टनमदविशेषशक्तेरेकस्याः प्रवृत्तिनिमित्तत्वात् । यत्तु व
दन्तं तु सुरामद्यामिति पुलस्त्येन गौडीमाध्वीभ्यामपि सुरायाः पृथग्निर्देश इति प्राचोक्तं तदेतावमन्तव्यं यो मेद्य
यो गौडीमाध्वीत्वं भ्रमेणेति मंतव्यं । अन्यथा मूलवाक्येतावन्तयोः पृथगुद्देशानुपपत्तेः परिगणनादेव त्रै
विध्यसिद्धौ पुनर्वचनं प्रत्येकं विध्यप्रतिपादनाय यथाहारीतः । गौडी तथा पैष्टी निर्यासः कथिता परा ।
एवं त्रिविधा ज्ञेया सुरास्तासां प्रभेदकाः । भेदेन द्वादश प्रोक्ताः सुरा सौवीरकारसैः । सीधुगौडी च प्रभ
वा स्त्रियः । अतो ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति मनुस्मरणात् तत्र याद्विजातिभिर्ब्राह्मणक्ष
त्रवैश्यैर्मूर्द्धावसिक्ताद्यनुलोमजैश्च सर्वा गौड्यादिर्नव विधापि वर्जनीया । यथैवैका तथा सर्वा न
पेया ब्रह्मवादिभिरिति मानवात् । ब्रह्मवादिन स्त्रैवर्णिकाः । वेदाध्येतृत्वात् नाध्यापनयोगिनो ब्रा
ह्मणादेरुच्चारणमात्रार्थत्वेनाध्यापनाभिपरत्वाभावात् । एका माध्वी च गौडी च पैष्टी च त्रिविधा सु

वि॰ टी॰ २२
२२८

द्विजातिभिर्नपातव्या कथं विदपि कर्हिचित् । अज्ञानाद्वारुणीं पीत्वा प्राश्य मूत्रपुरीषयोः । पुनः संस्का
रमर्हंति त्रयो वर्णा द्विजातय इति यमस्मरणाच्च । कथं विद्रोगादिष्वपि । मद्यं तावत्त्रिविधं गौडी माध्वी
च पैष्टी चेत्युपक्रम्य मद्यप्रयोगं कुर्वंति शूद्रादिषु महान्निषेधो द्विजैस्त्रिभिरन्नं न ग्राह्यं यद्यप्युक्तं वयेन्द्य
तमिति यन्त्वत्रिस्मरणं तत् । यदपि कामादपि हि राजन्यो वैश्यो वापि कथंचन मद्यमेवासुरं पीत्वा न दो
षं प्रतिपद्यत इति वृद्धयाज्ञवल्कीयमभ्यनुज्ञानं तदप्युक्तनिषेधवशीकृतं सत्तालादिमद्यमात्रविषय
मेवात्र सुरापदेन त्रिविधाया अपि सुराया व्याख्यावर्तनात् । यत्तु भीमधात्रासवक्षीवाव भौ चंदनचर्चितौ
एकपर्यंकशयनौ दृष्टौ मे केशवार्जुनौ इति लिंगं तदपि मधुमद्यस्य परत्व इति केशनयदपको
षपांसुभ्यां सिद्धं मध्वाद्यासत्रा सत्वकृत्यायुर्वेदे न गौडीमाध्वीव्यतिरिक्ततालादिमद्यासवपानगम
कं न गौडीमाध्वीपानस्य तयोस्तत्रैव स्यायुर्वेदप्रसिद्धत्वात् । यदपि यन्मात्स्यमासीनं तस्मात्त्वयौ
हृत्तपुराणवैमाल्यं ततो राजन्यमसृजत्स्माज्यायांस्त्वकनीयांस्त्व श्वशुरस्त्व स्नुषा रक्षस्यसुरां पीत्वा विल

२२८

पंतत्रास्तेपाप्मावैमाल्पंतस्माद्ब्राह्मणः सुरांनपिबतिपाप्मनानसंसृज्यतइति।तदेतत्क्षत्रियोब्राह्मणं
श्रुतंमैनंसुरापीवनस्तोनितिश्रुतावन्यार्थदर्शनंतिसुपक्रमेककवाक्यतार्थंसुराशब्दोतालादिमद्यपरोवक्तव्यः।
अन्यथाब्राह्मणवाक्येसुराशब्दस्त्रिविधसुरापरः क्षत्रियवाक्येचगौडीमाध्वीपरइत्युपक्रमोपसंहारयोरर्थ
भेदेनवाक्यभेदेनवाक्यभेदापत्तेः।तालादिमद्यपरत्वेतुयदेवब्राह्मणस्यनिषिद्धंतदेवक्षत्रियस्याभ्यनुज्ञात
मित्येकवाक्यत्वंप्रयुक्तञ्चतालादिमद्येपिसुराशब्दोहारीतेनागौडीमाध्वीतथापैष्टी।निर्यासस्याकथितापु
रा।एवंचतुर्विधाज्ञेयाःसुरास्तासांप्रभेदकाः इत्युपक्रम्यमृद्वीकारससंभूतातालमाडरसोद्भवा।निर्यासस्या
कथितातासांचत्रिगुणाक्रमणमित्युपसंहारात्।प्रपंचितंचैतत्प्रपितामितावरायामस्माभिरितिनेहोच्य
ते।कल्पतरुनाकृतोपसंग्रहः।गौडीमाध्वीचपैष्टीविज्ञेयात्रिविधासुरा।चातुर्वर्ण्यैरपेयासातथैवाभिश्रद्वि
जोत्तमाइतिवृहन्नारदीयात्।शूद्रस्यवेदशंपापंमद्यपस्यदुरात्मनः।काकोभूत्वाचिरंदेविविष्ठामदत्स
जायतइत्युमामहेश्वरसंवादाच्च।मद्यशब्दोत्रत्रिविधसुरापरःसर्ववाक्याविरोधात्।अन्ययाक्षत्रियादे
र्मद्याभ्यनुज्ञानेशूद्रस्यवत्तन्निषेधइतिमहावैशसापत्तेरतेननपातव्याद्विजोत्तमैरित्यपिव्याख्यातमेषो

वि॰टी२२

२२९

त्तमैत्याहिस्मुत्सोत्तमशब्दस्यांत्यप्रयोगात्सप्रमात्स्मुरुषाद्दंदूस्यलब्धुत्वाद्धेत्पलं विस्तरेण। मधौरिश्च नोता
द्धानाह॥ ॥माधूकमैक्षवंटांकंकौलं खार्जूरंपानसं। मृद्वीकारसमाध्वीकंमैरेयंनालिकेरजं॥[illegible]॥ ॥अ
मेध्यानिदशैतानिमद्यानिब्राह्मणस्यच। राजन्यश्चैववैश्यश्चस्पृष्ट्वैतानिनदुष्यतः॥[illegible]॥ ॥माधूकं मधू
कपुष्पोद्भवं। ऐक्षवमिक्षुरससंभवंगौडीव्यतिरिक्तं। टांकं टंकः कपित्थस्तज्जं। कौलं कोलं बदरं तज्जातं। खा
र्जूरं खर्जूरफलोद्भवं। पानसं पनसफलोद्भवं। मृद्वीकाद्राक्षातदुद्भवं। माध्वीकं मधूद्भवं। माध्वीकं व्यति
रिक्तंमैरेयं धातकीपुष्पजं। गुडधान्याम्बुसहितमितिशब्दार्णवेवाचस्पतिः। नारिकेलजं नारिकेलद्रवोद्भवं ज
लमेतानिदशमद्यानिमद्यजनकानिब्राह्मणस्यामेध्यान्यस्पृश्यानि। स्पर्शनिषेधादर्थसिद्धः पाननिषे
धः। नित्यंमद्यंब्राह्मणोवर्जयेदितिगौतमायात्। राजन्यवैश्ययोः पुनस्तत्स्पर्शेनदोषः। स्पर्शः पानोपलक्षणं
मद्यमेवास्तु तयोः पीत्वेत्यपत्तुल्लानात्रनचैवमाध्वीकयोरेवमद्ययोर्गौडीमाध्वीत्वंशंकनीयं पूर्वेणपौन
रुक्त्यात्। राजन्यवैश्ययोस्तन्निषेधाभावस्तुल्लानविरोधात्। एतत्स्यात्त्वेकादशेत्याह। पानसंद्राक्षमाधू
कंखार्जूरंतालमैक्षवं। मध्वीकंसैरमारिष्टंमैरेयंनारिकेलजं। समानानिविजानीयान्मद्यान्येकादशै

२२९

वत्विति तिता लंतालुहस्तोद्भवं। सिरां सिंदी हस्तस्तद्भवं सैरं। अरिष्टः फेनिलस्तद्भवमारिष्टं। एवं प्रासंगिकं
परिसमाप्य प्रकृतां पितृशुद्धिं पुनराह। गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरेत्। प्रेताहारैः समं तत्र दशरात्रे
ण शुध्यति॥८५॥ ॥मृतस्य गुरोः कर्त्रंतराभावे यदि शिष्यः पितृमेधं करोति तदासावपि प्रेताहारैः प्रेताहा
रैः प्रेतसपिंडैः समं दशरात्रेण शुध्यति। इदं च तदन्नभोजनतद्गृहवासाद्यभावे पि गुरुशिष्यसंबंधमात्रेणैव
दाहादिकरणे द्रष्टव्यं। किंच॥ ॥आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुं। निर्हृत्य तु व्रती प्रेतान्न व्रतेन वि
युज्यते॥८६॥ ॥आचार्योपाध्यायगुरवो वक्ष्यमाणलक्षणाः। स्वग्रहणाद्गुरुर्वादो निर्हृतो व्रतलुप्यत ए
वेति गम्यते। एतान्प्रेतान्निर्हृत्य व्रती ब्रह्मचारिणी व्रतेन ब्रह्मचर्येण न वियुज्यते न भ्रश्यति। किंच॥ ॥आ
दिष्टी नोदकं कुर्यादाव्रतस्य समापनात्। समाप्ते तूदकं कृत्वा त्रिरात्रेणैव शुध्यति॥८७॥ ॥आदिष्टं व्रतं य
र्ये ब्रह्मचार्यमाचार्य सीत्याद्यादेशोस्ति तदस्यास्तीत्यादिष्टी ब्रह्मचारी प्रक्रांतप्रायश्चित्तस्त्वन्ये स प्रेतानां स
पिंडादीनां माशौचनिमित्तमुदकदानं न कुर्याद्यावद्ब्रह्मचर्यं। समाप्ते व्रते समावृत्तः सन् सर्वेषां प्रेता
नां प्रत्येकमुदकदानं कृत्वा त्रिरात्रमाशौचं कुर्यादिति। उक्तं वक्ष्यमाणशुद्धिसाधनान्याह॥ ॥ज्ञानं

पोऽग्निराहारो मृन्मनो वार्युपाञ्जनं। वायुः कर्मार्ककालौ च शुद्धेः कर्तॄणि देहिनां॥ १०५॥ ज्ञानमाध्यात्मि
कं तु वेदः शुद्धिहेतुः तपो वेदविदामग्निः भूमयानामाहारः पंचगव्यादिनाममेध्यभक्षणादेः मृद्वारिणी अ
मेध्याद्युपलिप्तस्य मनो वैकल्पिकविषयस्योपादानेन वारि क्षालनादौ उपाञ्जनं गोमयादिना लेपनं भू
मेः। वायुरुर्णादेरथ्याद्युद्धृततोयादेश्च कर्म संध्यादि अज्ञानकृतपापस्य अर्कोऽर्कतापः शोषयितृ
कं पेशेति। कालश्च आशौचस्य दशाहादिरिति मेध्यातिमेध्यातिथिप्रभृतयः। तच्चिन्त्यं देहिनामिति वाक्यशे
षासंगतेः। न चोपलक्षणतया देहिप्रभृतीनां ग्रहणं देहिशुद्धिप्रक्रमविरोधात्। तत्त्वतेनैव तु द्रव्याभिधाने
तपोऽनन्तत्वाच्च। तस्मादेवं व्याख्येयं ज्ञानमात्मनः सर्वपापक्षयहेतुत्वात्। यथोक्तं भगवता। ज्ञानाग्निः
सर्वकर्माणि भस्मसात्कुरुतेऽर्जुनेति तपः कृच्छ्रादि तन्निमित्तेषु अग्निरुपस्पर्शनादौ। यथाह पराश
रः। नाभ्यामावलीढस्य नखैर्विलिखितस्य वा। अद्भिः प्रक्षालनं प्रोक्तमग्निना चोपस्पर्शनमिति। आहा
रः पंचगव्यादेरभक्ष्यभक्षणादौ मृच्छौचादौ। मनः शोधितस्यापि द्रव्यस्य मनःप्राशस्त्यमेवोपाद
नेऽदोषात्। मनःपूतं समाचरेदिति स्मरणात्। वारि स्नानादौ। उपाञ्जनं भस्मादि स्नानादौ। वायुः वायुभ

द्यो दिवा तिष्ठेदित्यादौ। कर्म संध्यादिः संध्याहीनोऽशुचिर्नित्यमिति स्मरणात्। तोवारि स्नानादौ। कालश्चाग्नौ च स
दशाहादिरेतानि देहिनां मानुषाणां शुद्धिजनकानि तत्राहारशुद्धेरप्यहिंतत्वात्।। एवं सर्वेषामेव शौचानां
मध्ये अन्नस्यादनीयस्य शौचं तत्परमभ्यर्हितं स्मृतं पूर्वैः तदधीनत्वान्मनःकायशुद्धेः। अन्नोपचितानां काय
वयवानां मांसादीनां प्रायश्चित्तरूपकर्मणापनोद्यत्वात् तदेवोपपादयति। योऽन्ने शुचिः शुच्यन्नादः स शुचिः
गो न साध्यादृष्टभाक् तद्व्यतिरिक्ते मृद्वारिमात्रेण तददृष्टाशुद्धेः। अर्थशौचमिति पाठेप्याह। स्वद्रव्यार्थमेवार्थशौ
चापेक्षेति। उक्तवक्ष्यमाणशुद्धिसाधनानामधिकारिभेदेन व्यवस्थामाह।। ।।क्षांत्या शुद्ध्यंति विद्वांसो दाने
नाकार्यकारिणः। प्रच्छन्नपापा जप्येन तपसा वेदवित्तमाः।। ९०।। ।।विद्वांसो विधिनिषेधज्ञा द्वेषपर्षामत्स
रादिजन्यदुरितात् क्षांत्या क्षमया शुद्ध्यंति। अकार्यं निषिद्धं तत्कारिणो दानेन। प्रच्छन्नं रहस्यं पापं येषां ते ज
प्येन गायत्र्यादीनां। वेदं मंत्रब्राह्मणात्मकमतिशयेनार्थतो ये विदंति ते तपसा वेदाभ्यासेनैव। वेदाभ्या
सरतं शांतं महायज्ञक्रियापरं। न स्पृशंतीह पापानि महापातकजान्यपीति योगिस्मरणात्। शुद्ध्यंतीति
सर्वत्रान्वेति। किंच।। ।।मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुध्यति। रजसा स्त्री मनोदुष्टा संन्यासेन द्विजो

मा॰॥१०७॥ ॥बोध्य ममेत्यादि लिङ्गमंगं भृत्तोयैः शुध्यति । नदः प्रवाहः सोऽस्यास्तीति नदी । नाभ्यूर्ध्ववर्ती
प्रसवदिंद्रियग्रामो घ्राणरसनचक्षुःश्रोत्रात्मको मेध्येनस्नेहेष्वाद्दत्यागेनेव शुध्यति नमृदाद्यपेक्षा । ऊर्ध्वनाभे
र्यानि खानि तानि मेध्यानि सर्वशः इति मानववात्ता । इदं चेत्थमेव व्याख्येयं न सक्तिपरतया शारीरशुद्धप्रसंहारविरो
धात् । मनसाऽदुष्टा यभिचारसंकल्पवती स्त्री रजसा रजो दर्शनेन शुध्यति रजोभावे रजोभावे रजः प्रतीक्षा संभ
वेवा मनसा भर्तुरतिचारे त्रिरात्रं यावकं क्षारोदनं भुंजाना धः शयीतेत्यादिना वसिष्ठेन प्रायश्चित्तेन । द्विजोत्तमा ब्रा
ह्मणाः संन्यासेन मानसत्यागेन कामक्रोधलोभदोषात् शुध्यंति । किंच ॥ ॥अद्भिर्गात्राणि शुध्यंति मनः स
त्येन शुध्यति विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति ॥१०९॥ ॥गात्राणि शरीराणि लिप्तान्यद्भिः स्नानैः शु
ध्यंति मनः सदसत्संकल्पात्मकमसत्संकल्पादसुष्टं सत्येन सत्संकल्पेन शुध्यति पापं व्यापुण्यकृतो ध्याये
दिति स्मृतेः । भूतान्यनतीति भूतात्मा पंचभूतात्मकशरीराभिमानी आत्मा क्षेत्रज्ञो वस्तस्य विद्यातपोभ्यां शुद्धिः वि
द्यात्त्वपदार्थनिरूपक वाक्यार्थज्ञानं तपः तपसा ब्रह्म विजिज्ञासस्वेत्यात्मज्ञानसाधनतया विहितं कृ
च्छ्रादि ताभ्यां शुद्धिः शरीराभिमानजन्य दुरितनिवृत्तिः । देहाभिमाने यत्पापं न तत्क्षेत्रज्ञो बध्यको दिभिरिति

त्राशुद्धिः संशयविपर्ययात्मिकाज्ञानेन प्रमारूपेण शुध्यति असत्कोटिनिरसनात्॥ ॥एष शौचस्य ते प्रोक्तः
शारीरस्य विनिर्णयः। नानाविधानां द्रव्याणां शुद्धेः शृणु विनिर्णयं॥ ॥१३॥ एष ब्राह्मणस्येत्यारभ्योक्तं
शारीरस्य शरीरसंबंधिनः शौचस्य शुद्धेः विशिष्टोवांतरभेदभिन्नो निर्णयस्तेतुभ्यं प्रोक्तं उत्तराध्यायार्थं
प्रतिजानीते। नानाविधानामनेकप्रकाराणां द्रव्याणां धात्वादीनां वक्ष्यमाणं शुद्धिनिर्णयं शृणु इति धर
वचनविधानाय॥ ॥इति श्री

विष्णुस्मृतिविवृतौ श्रीमत्यां वैजयंत्यां
द्वाविंशोध्यायः॥ ॥पूर्वाध्यायंते प्रतिज्ञातां नानाद्रव्यशुद्धिं त्रयोविंशेनाभिधातुमत्यंतोपहतस्य शुध्यभि
धानाय स्वरूपं लक्षयति॥ ॥शारीरैर्मलैः सुराभिर्मद्यैर्वा यदुपहतं तदत्यंतोपहतं॥१॥ ॥शारीरसंभवा मल
वसादयः। सुरा गौड्यादयो मद्यानि माध्वीकादीनि वा शब्दात् कुणपग्रहणं। एतैः सर्वोक्तलक्षणैः प्रत्येकं
यदुपहतमत्यंतसंसृष्टं तदत्यंतोपहतं। तेषु शुद्धिमाह॥ ॥अत्यंतोपहतं सर्वलोहभांडमग्नौ क्षिप्तं शुध्येत्॥२॥
॥ ॥लोहानि सुवर्णरजतताम्रायस्त्रापुरंगसीसकानि सप्तविधा धातवः सर्वशब्दात्तद्विकाराः पित्तला
दयश्च तन्मयं भांडमत्यंतोपहतमग्नौ प्रक्षिप्तमाचरितं शुध्येत्। तैजसानां कुणपमद्यैरत्यंतं वासितानामाव

वि·टी२३

२३२

र्त्तेन मिति नैबौधायनीयात्। इदं चसुराद्युपहतिशुद्धिविधानं येषां सुरादयस्पृश्यंते तद्विषयं तत्स्पर्शिनां तु न दोषः
॥ ॥मणिमयमश्ममयमब्जं चसत्पराग्यं महानिधानेन॥३॥ ॥मणयः करिकुंभवंशावराहदंष्ट्राद्युद्भवा मुक्ताः॥
यथोक्तं रत्नपरीक्षायां। करींद्रजीमूतवराहशंखमत्स्याहिशक्त्युद्भवेणुजानि। मुक्ताफलानि प्रथितानि लो
के तेषां तु शुक्त्युद्भवमेव भूरीति। माणिक्यादीनामश्मपदेनैव ग्रहणात्। अश्माः स्फटिकमरकतादिः तन्म
यमलंकारपात्रादि। अब्जं शंखशुक्त्यादि वा त्यंतोपहतं लक्षणेन शुध्येत। शृंगदंतास्थिमयं तक्षणेन॥४॥ ॥
शृंगं खड्गादीनां दंतो गजादीनां अस्थि कूर्मादीनां दंतो गजादीनां अस्थि कूर्मादीनां तन्मयं पात्राद्यत्यंतोपह
तं चेन्नेन तावदवयवापनयनेन शुध्येत्॥ ॥दारवमश्ममयं वा जह्यात्॥५॥ ॥दारुमयं कमंडल्वादि मृन्म
यं च यद्यत्यंतोपहतं जह्यात्। चकारादलाबुवैदलानां ग्रहणं। अलाबुदारुपात्राणां वैदलानां तथैव चात्र
त्यंतोपहतानां तु परित्यागो विधीयत इति यमस्मरणात्॥ ॥अत्यंतोपहतस्य वस्त्रस्य यत्प्रक्षालितं सद्वि
रज्यते तच्छिंद्यात्॥६॥ ॥प्रक्षालनासहस्य कुसुंभादिरक्तवस्त्रस्य यावदत्यंतोपहतं तावदपनयेत्। तेन व
सर्वोपघातेत्यागः। प्रक्षालनेतरहस्य प्रक्षालनमेव वेराज्ञाभावा। यदि मंत्र[?]ब्राह्मणायां भूयारेतसा रुधिरेण वा॥
चैलं समुपहन्येत अद्भिः प्रक्षालयेत्तु तदिति यक्षिति स्मरणाच्च। अत्यंतोपघात स्याज्जहनावपि पुनरुपादाने प्रकरणसमाप्तेः।

२३२

अलेपवतां शुद्धिमाह॥ ॥सौवर्णराजताब्जमणिमयानां निर्लेपानामद्भिः शुद्धिः॥७॥ ॥सौवर्णं सुवर्णकृतं राज
तं रजतकृतं अब्जं शंखशुक्त्यादि मणिमयं पद्मरागादिकृतं एतेषां निर्लेपानामुच्छिष्टादिस्पर्शमात्रेऽद्भिः
प्रक्षालनेन शुद्धिः सुवर्णकांस्याद्युपलक्षणं कांस्यायस्ताम्ररैत्यानि त्रपुसीसमयानि च निर्लेपानि वि
शुध्यंति केवलेन जलेनेत्युक्तं ब्रह्मांडपुराणे॥ ॥अश्ममयानां ग्रहाणां वा॥८॥ ॥अश्मा पाषाणस्त
न्मयानि पात्राणि चमसा होत्रचमसादयः सोमपात्राणि ग्रहाः षोडशपादयस्तेषां निर्लेपानामद्भिरेव शुद्धिः
सलेपानां त्वश्मानामौशनसं भस्मना निर्मार्जनमश्मघर्षणं वा पाषाणे तु पुनर्घर्षः शुद्धिरेषा समुदाहृतेति परा
शरं ज्ञेयं ग्रहचमसयोस्तूच्छिष्टलिप्तयोरपि मार्जालिये अद्भिः प्रक्षालनमाह॥ ॥चरुस्रुक्स्रुवाणामुष्णेनांभ
सा॥९॥ ॥चरुः स्थालीपाकः स्रुवो याज्ञिकप्रसिद्धो द्वंद्वनिर्देशात् प्राशित्रेडादीनां चरुस्रुक्स्रुवसस्नेह
पात्राण्युष्णेन वारिणेति योगिस्मरणात् एतेषां चर्वादिलेपरहितानामाज्यमात्रस्नेहाक्तानामुष्णोदकेन
शुद्धिः चर्वादिलेपे तु कुशैर्घर्षणेन कर्मांगशुद्धिमाह॥ ॥यज्ञकर्मणि यज्ञपात्राणां पाणिना सम्मा
र्जनेन॥१०॥ ॥यज्ञकर्मणीत्यादौ प्रयुक्तानां यज्ञपात्राणामेतानि वैदशयज्ञायुधानि त्याद्युक्ता

वि॰टी॰२३

नांस्तु वादीनामेवनस्तुनः सोकर्योपात्रानां संदेशादानामपीतिपुनर्यज्ञग्रहणंतेषांपात्राणामेलानि
सेदग्निणेनकुशेर्दशापवित्रेणवसम्यग्यथाविधि मार्ज्जनेनस्तुद्धिः॥ ॥स्फसूर्पशकटमुसलोलूखः
लानांप्रोक्षनेनं॥ ११॥ स्फ्यः काष्ठखङ्गः।सूर्पंप्रस्फोटनेशकटमनः॥मुसलोलूखलेप्रसिद्धेतेप्रोक्ष
णीजलैः प्रोक्षणेनशुद्धिः।इह निर्देशादजिनधान्ययोर्ग्रहणं।स्फसूर्पाजिनधान्यानिमितियोगिस्म
रणात्।धान्यंपुरोडाशाद्यर्थंनिरुप्तंव्रीह्यादि।एतेनैषांतुस्नेनवारिणाशुद्धिरितिमिताक्षराव्याख्या
नप्रासादिकमपगम्यते।स्फसूर्पाजिनधान्यानांमुसलोलूखलानसां।प्रोक्षणंसंहतानांचवहूनांधा
न्यवाससामिति।अप्रोक्षणस्यवकारेणअयत्रान्वयावगमाच्च।स्पर्शशुद्धिमाह॥ ॥शयनयानास
नानांच॥१२॥ ॥शयानंपल्यंकतूलिकादि।यानंरथशिविकादि।आसनंरोमवद्धस्कलंतंतुनि
र्मितादि।चकाराद्दृषत्यादिग्रहणं।तथावदेवलः।वसतिस्थापिसोपानंवाहनंसाधनानि च।क्षुराणोरा
सनंचेतिस्वयंशुद्धमितिस्मृतं।भितिवसतिईष्टका।वाहनमश्वादि।साधनंखङ्गादि।एषांचांडालादि
स्पर्शेविप्रोक्षणेनैवशुद्धिः॥ ॥वहूनांच॥१३॥ ॥वहूनांयेषांक्षालनेनशुद्धिस्तेषामपिवहूनामनेकशु

२३३ २२३ १२

रूपोद्धार्याणां प्रोक्षणेनैव शुद्धिः। यथाह बौधायनः। चंडालादिस्पर्शे नैकपुरुषोद्धार्याणां प्रोक्षणमिति शुद्धिः। म
नुरपि। अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससां। प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयत इति। चकाराद्द्रव्यमा
णे धान्याद्यतिरिक्तानां कुसुंभादीनां ग्रहणं। बहूनां कुसुंभकार्पासलवणानां सर्पिःकाकठिनीभूतानां चंडालादि
स्पर्शे प्रोक्षणेनैव शुद्धिरिति बौधायनस्मरणात्। अत्र बहूनां कुसुंभादिविशेषणे अन्यथा कुसुंभादीनामल्पानां
क्षालनापत्तेः कुसुंभेनातसीसर्षपादीनां ग्रहणं। कठिनीभूता गुडादयः। बहुत्वं चानेकपुरुषोद्धार्यत्वे॥ ॥धा
धान्याजिनरज्जुतांतववैदलसूत्रकार्पासवाससां च॥१४॥ ॥धान्यं व्रीह्याद्यष्टादशविधं। अजिनं हारिणं रौरवा
दि चर्ममात्रं तेन च तद्विकाराणामुपानहत्त्रादीनामपि ग्रहणं। रज्जुर्मुंजादिमयी। तांतवं टसरीपट्टादि तंतुनि
र्मितं कौशेयपट्टकूलक्षौमादि। वैदलं वेणुविदलकृतं व्यजनशूर्पादि। सूत्रं कार्पासतंतुः कर्पासमूलं सास्था
नस्थि च वासो नवमरी चियंत्रनिर्मुक्तं क्षालनासहं कौसुंभादिरक्तं च। चकारान्निर्यासादिग्रहणं। एतेषामब
हूनामपि चंडालादिस्पर्शे प्रोक्षणेन शुद्धिः। यथाह शंखः। निर्यासानां गुडानां च लवणानां तथैव च। कुसु
भकुंकुमानां च ऊर्णाकार्पासयोस्तथा। सेकात्तु कथिता शुद्धिरित्याह भगवान्यमः। देवलोऽपि। और्णकौशेय
कुतपपट्टक्षौमदुकूलकाः। अल्पशौचा भवंत्येते शोषणप्रोक्षणादिभिः। आपस्तंबोऽपि। नवानां वाससां

वे०टी२३
२३४

प्रोक्षणमिति॥ कुशंकोपि। कुसुंभकुंकुमैरक्तां तथा लाक्षारसेन च। प्रोक्षणेनैव शुध्येत चंडालस्पर्शने सदेति
षट्त्रिंशन्मतेपि॥ अरक्ताऽनवानां क्षालनमेवेति। चंडालाद्यैः स्पृष्टं धान्यं वस्त्रमथापि वा। प्रक्षाल
नेन शुध्येत परित्यागान्महीमयमिति पाराशर्यात्। धान्यक्षालनं सम्यक्कृविरस्पर्शविषयं पाकाद्यर्थं वा
॥ ॥शाकमूलफलपुष्पाणां च॥२५॥ ॥शाकं वास्तूकादि मूलमार्द्रकादि फलमाम्रादि पुष्पं जात्या
दि। एतेषां चंडालादिस्पर्शेपि संदेति॥ ॥तृणकाष्ठशुष्कपलाशानां च॥२६॥ ॥तृणं कुशदूर्वादि काष्ठमेधः
शुष्कं गोमयपिण्डः पलाशं पर्णं मधूकपलाशादेः। एतेषां चंडालादिस्पर्शेपि प्रोक्षणेन शुद्धिः। लेपशुद्धिमा
ह॥ ॥एतेषां प्रक्षालनेन॥२६॥ ॥एतेषां शयनादीनां पलाशानां विष्ठादिलग्नानां प्रकृष्टेन लेपापनोदके
न द्रव्याविनाशेन च क्षालनेन शुद्धिः। यथाह देवलः। और्णकौशेयाद्युपक्षमयतान्येतामेध्ययुक्तानि क्षालये
च्छोधनैः स्वकैरिति॥ ॥अल्पानां च॥२७॥ ॥येषां धान्यवासःप्रभृतीनां बहूनां स्पर्शे प्रोक्षणमुक्तं तेषामे
वाल्पानां तत्रैव क्षालनेन शुद्धिः। नेदं लेपशुद्धौ पूर्वसूत्रेणैव विधानात्। तेन चाल्पानां बहूनां वा लेपे क्षालनमे
व क्षालनप्रकर्षायगुणनियममाह॥ ॥ऊषैः कौशेयाविकयोः॥२८॥ ॥ऊषः क्षारमृत्तिका तया कौशेय
स्य टसरीपट्टादिमयस्य आविकस्य च कंबलादेः शुद्धिः। यत्तु सोपेक्षेक दक मा मूत्रैः शुद्धत्याविककौशिकमिति

२३४

गोमूत्रग्रहणं शुध्यतिशयार्थं ॥ ॥अरिष्टैः कुतपानां ॥१९॥ ॥अरिष्टैः फेनिलैः कुतपाः पार्वतीयच्छागरो
मनिर्मिताः कंबलास्तेषां शुद्धिः ॥ ॥श्रीफलैरंशुपट्टानां ॥२०॥ ॥अंशुपट्टाः वल्कलतंतुनिर्मिताः शाणीपट्टाः दद्य
स्तेदां षं श्रीफलैर्बिल्वैः शुद्धिः ॥ ॥गौरसर्षपैः क्षौमाणां ॥२१॥ ॥क्षुमा अतसी तत्तंतुनिर्मितानां श्वेतसिद्धार्थैः शुद्धिः ॥
॥ ॥शृंगास्थिदंतमयानां च ॥२२॥ ॥शृंगादीनि विर्षवंयाख्यातानि तेषामपि गौरसर्षपकल्केन शुद्धिः ॥ ॥पश्चाद्वैर्मृगलोमिकानां ॥
॥२३॥ ॥मृगलोमिकानि मृगलोमोद्भवानि रांकवादीनि तेषां पश्चाद्वैः कमलबीजैः शुद्धिः ॥ ॥ताम्ररीतित्रपुसीसम
यानामम्लोदकेन ॥२४॥ ॥रीतिः पित्तलं त्रपु जसदमिति लोके प्रसिद्धं तेषामम्लोदकेन अम्लं तिंतिणीदि तत्
सहितोदकेन शुद्धिः ॥ अत्रोदकग्रहणं सर्वत्र पुष्पादिषु तद्द्रव्यघर्षणपश्चोदकप्राप्त्यर्थं ॥ ॥भस्मना कांस्यलोहयोः
॥२५॥ ॥कांस्यलोहयोः पात्रयोर्भस्मना शुद्धिः ॥ ॥तक्षणेन दारवाणां ॥२६॥ ॥दारु काष्ठं तन्मयानां पात्रादीनां प्र
क्षालनानंतरं वास्यादिना तावन्मात्रावयवापनयनेन शुद्धिः ॥ ॥गोवालैः फलसंभवानां ॥२७॥ ॥फलानि नारिकेलालाबुबिल्वा
दीनि तत्संभवानां पात्राणां गोवालैर्गोपुच्छकेशैर्घर्षणेन शुद्धिः प्रक्षालनापवादमाह ॥ ॥प्रोक्षणेन संहतानां ॥ ॥उक्तामेध्यत्वलि
प्तैर्द्रव्यैरेकराशीकरेण संहतानां महतामित्यमरणात् ॥ ॥उत्पवनेन द्रवाणां ॥२८॥ ॥द्रवाणां घृततैलदुग्धादीनां शुद्धि
वनेन च स्वांतरितरितपात्रांतरप्रक्षेपेण शुद्धिः श्वकाकाद्युपहतत्यज्जुष्टानां नेशुद्धिः ॥ ह्यावोऽद्रवस्यत्विति स्मरणात् ॥शा

वो नाम सजातीयेन द्रव्येण भांडस्यातिपूरणं यावन्निःसरणमुच्यते । द्रवोपादानात्कठिनानां तावन्मात्रोद्धरण
मेव । तत्र शातातपः । तन्मात्रमुद्धृत्य शेषस्य कठिनं तु पयो दधि । अविलीनं तथा सर्पिर्विलीनं पवनेन तु इति ॥ ॥गुड
दीनां मिक्षुविकाराणां प्रभूतानां गृहनिहितानां वाय्वग्निदानेन ॥ ३० ॥ ॥आवर्त्तनेन पिंडीकृतमिक्षुरसो गुडः सत्त्वादि
येषां ते तदादयस्तथा भूता ये इक्षुविकाराः फाणितशर्करादयस्तेषां प्रभूतानां द्रोणाधिकानां गृहनिहितानां स्वगृ
हावस्थितानां वाय्वग्निदानेन वारिदानं प्रोक्षणं तत्पूर्वकमग्निदानं पर्यग्निदानेन शुद्धिः । अप्रभूतानां तु कीटादिदु
ष्टावयवापनयनं प्रोक्षणं च सेकात्तु कथिता शुद्धिरित्यभिधानात् । गृहनिर्देशात् हट्टादिस्थितानां शुद्ध्यतिरेको दर्शितः ।
तत्र हारीतः । केशकीटपिपीलिकादिभिरन्नाद्युपघाते काचनभस्मरजतताम्रवज्रवैडूर्यगोवालाजानामन्यतमेन संसृष्टं प्रोक्षणं पर्यग्नि
करणादित्वदर्शनाच्छुद्धं भवतीति । आदिशब्दाद्गुडादिग्रहणं ॥ ॥सर्वलवणानां च ॥ ३१ ॥ ॥सर्वेषां भलसामुद्रसैंधवसौवर्चलादीनां
लवणानां कीटाद्युपहतौ प्रोक्षणपर्यग्निकरणाच्छुद्धिः । पुनर्लेपस्य शुद्धिमाह ॥ ॥पुनः पाकेन मृन्मयानां ॥ ३२ ॥ ॥मृन्मयानां घ
टकरकादीनां शुद्धिः श्लेष्मादिलेपे पुनःपाकेन पुनः भर्जनेन शुद्धिः । तत्र बौधायनः । मृन्मयानां पात्राणां शुद्धिः मूत्रसमन्वास्त्वानामव
धूपनं शुद्धिर्लेपोपहतानां पुनर्दहनं मूत्ररेतःप्रभृतिभिरुत्सर्गो । अवधूपनं धूपेन स्वेदनं प्रभृतिशब्दाच्चंडालादिस्पर्शो । चंडाल
घैरत्र संसृष्टं परित्यागान्महीमयमिति पाराशरस्मरणात् । लेपस्पर्शयोः शुद्धिमाह ॥ ॥द्रव्यवत्कृतशौचानां देवताद्यानां भूयः प्रति

२०४

स्थापनेना॥ २३॥ ॥देवतार्च्चादिचता प्रतिमास्तासाममेध्यादिलेपे यद्यद्व्यंतत्प्रकृतितत्तच्छुद्धिविहितैर्द्रव्यैस्ततद्रीत्याकार्या शुद्धि
नां पुनः प्रतिष्ठया शुद्धिः पूर्ववत्॥ अयमभिसंधिः सुवर्णादिधातुप्रकृतिकायाः सुवर्णादिवद्वस्तुशुद्धिः शिलाप्रकृतिकायाः शि
लावद्दारुप्रकृतिकाया दारुवन्मणिप्रकृतिकायां मणिवदिति॥ २१॥ ॥असिद्धस्यान्नस्य यन्मात्रमुपहतं तन्मात्रं परित्य
ज्य शेषस्य कंडनप्रक्षालने कुर्यात्॥ २४॥ ॥असिद्धस्यापक्वस्यान्नस्यादनयोग्यस्य तंडुलमुद्गादेर्यावन्मात्रमुपहतं तावन्मा
त्रं परित्यज्य शेषमवघातप्रक्षालनाभ्यां शुध्येत्॥ यथाह बोधायनः॥ स्त्रादिसंपर्के तन्मात्रापहारोऽस्थ्यादिद्रव्यसंयोगे नि
स्तुषीकरणमिति॥ यत्तु तंडुलांस्तु परित्यजेदिति तदाढकाल्पतमविषयं॥ अन्नपदसामर्थ्यादोदनदनीयस्य व्रीह्यादेरुद्दा
शवघातयोरन्यतरेणैव शुद्धिः॥ तत्र बोधायनः॥ व्रीहयः प्रोक्षणाद्भिः शाकमूलफलानि च तन्मात्रस्यापहारो द्वा वितु
षीकरणेन चेति॥ ॥द्रोणाभ्यधिकं सिद्धमन्नमुपहतं न दुष्यति॥ २५॥ ॥सिद्धमन्नमोदनादि श्वकाकाद्युपहतं न दुष्यति
न त्यज्यते यदि द्रोणादभ्यधिकं भवति द्रोणवचनात् न्यूनस्य त्यागः॥ यथाह पराशरः॥ काकश्वाद्यवलीढं गवाघ्रातं ख
रेण वा॥ स्वल्पमन्नं त्यजेद्विप्रः शुद्धिर्द्रोणाढके भवेदिति॥ आढकचतुष्टं देशकालाद्यपेक्षया॥ यथाह बोधायनः॥ देश
कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं॥ उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेदिति॥ द्रोणाढकौ च स्मृत्यंतरे पलं च कुडव
प्रस्थश्चाढको द्रोण एव च॥ धान्यमानेषु बोद्धव्याः क्रमशोऽमी चतुर्गुणा इति॥ आदौ षाय शुद्धिमाह॥ ॥तस्योपहतमान्नम

वि०टी २३
२३६

पारस्यगायत्र्याभिमंत्रितं सुवर्णांभः प्रक्षिपेत् वस्त्रं च प्रदर्शयेद्भक्ष्या॥२६॥ ॥तस्य सिद्धान्नस्य यावदुपहतं तावन्मात्रमुद्धृत्योपरि
गायत्र्याभिमंत्रितं हेमांभः प्रक्षिपेदनंतरं छागस्य सुवर्णस्य शेयेदग्नेर्ज्वालाभिश्च पर्यग्निकुर्यात्। गायत्रीपवमानानुवा
पलक्षणी यथा। हेबौधायनः। सिद्धहविषामस्तां वा वायसप्रभृतिभिरुपहतानां तद्देशपिंडमुद्धृत्य पवमानानुवाकेना
भ्युक्षणमिति। हेमरजतोपलक्षणं। हेमोदकेन चाभ्युक्षेद्रजतेनाभ्युनाथवेति परमारस्मरणात्। अजोश्वोपलक्षणं। अजो
श्वं सुखतो मेध्यमिति वृद्धप्रमाणात्। भोज्यशुद्धिमाह॥ ॥पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम् दुष्टं। दूषितं केशकीटैश्च मृ
त्प्रक्षेपेण शुध्यति॥२७॥ ॥पक्षिणः सूपशुकादयो भक्षयाश्वलावकादयस्तैर्यज्जग्धं भक्षितं गवाघ्रातं न तु भक्षितमवधूतं मुख
वातेन वा सम्मार्जनी वा निर्वापितपादेन चापहतमवक्षुतं क्षुतविद्गुष्टं केशैर्मानुषैः कीटैरन्नोत्पन्नैर्मृतैश्च दूषितमन्नैः भोज
नकाले मृत्प्रक्षेपेण शुध्यति भोज्यं भवति। केशोमक्षिकात्वक्केशलोमनखाखुपुरीषाणि। दृष्ट्वान्नं तद्देशपिण्डमुद्धृत्याद्भि
रभ्युक्ष्य भस्मनाभिघार्य पुनरद्भिः प्रोक्ष्य वाचा प्रशस्तमुपयुंजीतेति बौधायनायात्। मृद्भस्मसलिलयोरुपलक्षणं। गो
घ्रातेऽन्ने तथा केशमक्षिकाकीटदूषिते। सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धय इति योगिस्मरणात्। उक्तशुद्धिशेषमाह
॥ ॥यावन्नापैत्यमेध्याक्तात् गंधो लेपश्च तत्कृतः। तावन्मृद्वारि देयं स्यात्सर्वासु द्रव्यशुद्धिषु॥२८॥ ॥अमेध्याविष्ठादि
मानुषास्थिसर्वविक्षारेतो मूत्रश्लेष्मवसा। स्वेदाश्रुदूषिका श्लेष्मा मद्यं चामेध्यमुच्यत इति देवलीयात्। तेनाक्तालि २३

प्राक्षोध्याद्योक्तात्क्तावमेध्यक्तौ गंधलेपौ नापगच्छतः स्थितस्तत इति यावत्तावन्मृद्वारिदेयमिति सर्वास्वस्तुवस्तुष्वमाण
सुवङ्गध्याशुद्धिसुज्ञेयं। अमेध्याक्तस्य मृत्तोयैः शुद्धिर्गंधापकर्षणादि इति योगिस्मरणात्। तेन च कालेन गंधलेपापगमे मृद्वार्य
दत्रि निरर्थकैरर्थे सिद्धावपि सकृदुपादानं भवत्येव नियमार्थत्वात्। तत्कृतत्वोपादानममेध्यसंसृष्टद्रव्यांतरीयगंधलेपापनायेप्य
शुद्धिज्ञापनार्थो वकारान्मृद्वायेनं तरं तत्राद्भ्यावयपप्पादेया निर्दिष्टाद्दृष्टरूपकार्यवैलक्षण्येन तैर्विना अदृष्टासिद्धेः॥ ॥अजाश्वं
मुखतो मेध्यं न गौर्न नरजा मलाः। पंथानश्च विशुध्यंति सोमसूर्यांशुमारुतैः॥३९॥ ॥अजाश्वो मुखे पवित्रौ तेनाजाश्व मु
खदर्शनेस्पुद्धिः। न गौर्मुखे मेध्या तेन गवाघ्रात मश्रुचि न नरजा मनुष्यदेहजातयो सादयो मलामेध्यातेन तत्स्पर्शोस्यंतोप
घातः। एवमुक्तशुद्धिशेषमुक्त्वा प्रकृतमाह। पंथानो मार्गाश्चंडालादिस्पृष्टा अशुचिद्रव्याक्रांता वा रात्रौ सोमांशुभा सातामा
दिवा सूर्यांशुमारुताभ्यां च शुध्यंति॥ रथ्याकर्दमतोयानि स्पृष्टान्यंत्यश्ववायसैः। मारुतेनैव शुध्यंति पक्वेष्टकचितानि
च॥४०॥ ॥रथ्या मार्गस्तत्र स्थितानि कर्दमतोयानि वङ्क्रकपालशर्करयोर्ग्रहणं तान्यंत्यादिभिः स्पृष्टानि मारुतेनैव शु
ध्यंति। अंत्याश्चंडालादयः श्वा कुक्कुरो वायसः काकः। तथा पक्वेष्टकैश्चितानि धवलगृहादिना एवकारः कर्तव्यशु
ध्यंतरनिरासार्थः। पक्वपदं तृणमृन्मयव्युदासार्थं तस्य स्वभावशुद्धत्वात्॥ ॥प्राणिनामथ सर्वेषां मृद्भि
रद्भिश्च कारयेत्। अत्यंतोपहतानां च शौचं नित्यमतंद्रितः॥४१॥ ॥अत्यंतोपहतानां विण्मूत्रादियोगिनां सर्वेषां च

त्याद्यवस्थानादोषेण प्राणिनां मनुष्याणां यावज्जीवस्य सुदस्य भुक्तोलेः कर्तव्यं शोचं कारयेदुपशिष्टो दावार्यः॥
भूमिष्ठमुदकं पुण्यं वैतृष्ण्यं यत्र गोर्भवेत्। अव्याप्तं चेदमेध्येन तद्वद्देवशिलागतं॥४१॥ ॥अमेध्येन केशादिना। केद
शास्थि शव विण्मूत्र संयोगे कद्दितं यदीति व्याह्यात्। अव्याप्तं चेदमेध्येन तद्वद्देवशिलागतं। अक्षीणाश्चेव गोपाना
द्यापः शुद्धा इति स्मृताइति देवल स्मरणात्। अमेध्याव्याप्तिरूपाश्च नन्यत्वोपलक्षणं रूपगंधरसान्विताइतिमान
वात्स भूमिसंस्कारोपलक्षणं स्वभावस्थुवयोह्यापो भूमिगता आकाशगताश्चेति शंखस्मरणात्। आकाशोन्निर्मे
घः नवर्षधारादिः तत्र भूमिप्राप्तं नंतरं शरा अत्रैणशुद्ध। मिधानात्मयथाह देवलः। अजा गावो महिष्यश्च प्रसूति
काः दशरात्रेण शुध्यंति भूमिष्ठं च नवोदकमिति। भूमिग्रहणमशुचिभूमिष्ठस्यापि शुचित्वार्थं। अमेध्याव्याप्तत्व
वसार्थक्यादिति प्रांचः शुचिभूमिः प्राप्त्यर्थमित्यन्ये। तेनोद्धृतस्य नाशुचित्वं। उद्धृताश्चापि शुद्ध्यंति शुद्धैः पात्रैः
समुद्धृताः एकरात्रोषिताश्चापस्त्याज्याः शुद्धा अपि स्वयमिति देवलस्मरणात्। त्यागो व्यतेर्थस्य। तोयथं तोयं न
दुष्येन विस्कालमभिपिस्थितमिति स्मरणात्। उक्तार्थमिति दिशति। तद्वद्देवभूमिष्ठवद्देवशिलागतं पर्वतादि शि
लागतमपि ज्ञेयं। भूमिग्रहणात् सिद्धावपि शिला ग्रहणात् स्फटजलनिराशाय। यथाह यमः प्रपा श्वरणे कटके च क्व
पत्रमने घिश्रद्धानदपेयमाङ्गिरिति। करकोस्रीनिर्मितोद्रेः जलाशयस्तु द्धमाह॥ ॥मृतपंचनाखात्कूपादत्यंतोप

हामनया। आपः समुद्धरेत्सर्वाः शेषं वस्त्रेण शोधयेत्॥७३॥ ॥मृताः शीर्णाः पंचनखाः मनुष्यादयो ऽत्र मद्यपाय
स्मिन्नज्ञातस्मात्स्थलचरदृष्प्राणिशवे क्लिन्ने जीर्णे वितत ज्जलं येषामभक्ष्यं मांसं वतच्छरीरयुतं यदिति ब्राह्मात्। दाम
रणमात्रेण शतं षष्ट्यथवा त्रिंशज्जलकुंभान्समुद्धरेदिति ब्राह्मात्। ज्ञेयं तथा अत्यंतोपहतात्तु कूपात्सर्वमुपहतं ज
लमुद्धृत्य शोषमपां वस्त्रेण शोधयेदपनयेत्त्वा त्वेणेति पाठ इत्यहल्यादिनाख्यनेत॥ ॥वह्निप्रज्वालनं कुर्यात्कूपे
पक्वेष्टकाचिते। पंचगव्यं न्यसेत्पश्चान्नवतोयसमुद्भवे॥७४॥ ॥पक्वेष्टकाबद्धे कूपे विशोषिते यन्मध्ये वह्निप्रज्वा
लनं कुर्यात्कूपे लक्षणं। शर्करादिवद्विरासाय्या पाषाणेष्टकाभिर्बद्धे नत्वस्य नमेव वा शर्करद्धेतु संप्रोक्षणवि
विप्राशीर्वचनं तयेति जामदग्न्यात्। सामान्यशुद्धिरुक्ता सर्वत्रोद्धृष्टजलापनयने नवजलोद्गमे तन्नन्मे च पूर्ववत्पं
चगव्यं न्यसेत्तस्मिंस्तत मंत्रपूर्वकमिति ब्राह्मात्। कूपशुद्धिमन्यत्रापि तिदिशति॥ ॥जलाशयेषु यथाल्पेषु स्थावरे
षु वसुंधरे। कूपवत्कथिता शुद्धिर्महत्सु च न दूषणं॥७५॥ ॥या कूपे शुद्धिरुक्ता सैवाल्पेषु यथान्येषु स्थावरेषु वाप्या
दिषु जलाशयेषु ज्ञेया। स्थावरग्रहणाद्गलंतिजरादि निवृत्तिः महत्स्वाह। न दोषणमिति दोषाभावश्चात्र तीर्थप्रतिहा
रेण। यथाह देवलः। अक्षोभ्याणि तटाकानि नदीवापीसरांसि चाकश्मलाश्चिसंस्पर्शे तन्नीर्थपरिवर्जयेदि
ति। अल्पग्रहणादेव शुद्धो महत्सु दोषाभाववचनं मध्यमेषु शुद्ध्यंतराभिधानाय तत्र पराशरः। वापीकूपतडागे

ष्ट इति केषु कथं चन। उच्छृतवैकुंभशतं पंचगव्येन शुध्यतीति। अनुक्तशुद्धिमाह॥ ॥त्रीणि देवाः पवित्राणि ब्रा
ह्मणानामकल्पयन्। अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते॥८६॥ ॥देवा ब्रह्मादयस्त्रीन्शुद्धिहेतून् कल्पयंस्ता
नाह। अदृष्टमुपभोगानंतरमप्यज्ञातोपघातमुपयोगेनादृष्टदोषं द्रव्यमुक्तशुद्धिसाधनं जलक्षालनेन यथोक्तकृ
तशौचमपि मनस्तुष्ट्यभावे शुद्धमेतदस्त्विति ब्राह्मणानां वाचा यत्स्तूयते तच्च भावशुद्धिमाह॥ ॥नित्यं शुद्धः कारुहस्तः
पण्यं यच्च प्रसारितं। ब्राह्मणांतरितं भक्ष्यमाकराः सर्व एव च॥८७॥ ॥कारूणां सूपकारादीनां हस्तोंगः कंडु
यनादिसंपृक्तोप्यप्रक्षालित एव शुचिः। यच्चापण्ये प्रसारितं विक्रेयं पण्यं तदनेकक्रेतृकरकलितमपि शुचि। ब्राह्म
णेनांतरितं व्यवहितं ब्राह्मणहस्तेन दापितं दात्रियादिभैक्ष्यमपि यतिवनिब्रह्मचारिणां शुचि। शूद्रान्नं विना। ब्रा
ह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत्। तावुभावप्यभोज्यान्नौ भुक्त्वा चांद्रायणं चरेदिति स्मरणात्। आकराः
गुडलवणाद्युत्पत्तिस्थानान्यनेकास्पृश्यसंपृक्तान्यपि सर्वाणि सुराकरातिरिक्तानि शुचीनि। आकराः शुचयः स
र्वे वर्जयित्वा सुराकरमिति बोधायनीयात्॥ ॥नित्यमास्यं शुचि स्त्रीणां शकुनिः फलपातने। प्रस्रवे च
शुचिर्वत्सः श्वा मृगग्रहणे शुचिः॥८८॥ ॥स्त्रीणामास्यं सर्वोपलक्षणं चुंबनालिंगनादौ शुचि
च दाराश्च स्पृहस्थानामिति सर्वगात्राणि योषितामिति च लैगवार्हस्पत्यस्मरणात्। रतिसंसर्गे इति स्मृता।

रसंबंधिनीनामिति निष्कर्षः। नित्यं रजो निरिक्तकाले रजस्वला मुखास्वादः सुरापानसमानत्विति सुराशास्या
त्। स्त्रीमुखमेध्यत्वं दातोत्रा एपाखुलस्य च। सुरहत्ता निहरत्येन इत्यमेध्यत्वापवादोयं। खाणां मुखरसस्थैवर्गमो निश्च
सएव चेतियमस्मरणात्। शकुनिः पक्षिमात्रं हत्ततस्य फलपातने शुचिः। श्वकाक गृध्रोपघात इत्यस्यापवादोयं। हन्ता
त्पाननेन तु भूमिस्थग्रहणे। प्रस्नवे कु योगतस्तन्याकर्षणे वत्सो वत्सतरी वा लोचा शुचिः। गावो मेध्या मुखादृते।
इत्यस्यापवादोयं। हन्ता त्यानेन तु भूमिस्थग्रहणे। प्रस्नवेकु योगतस्तन्या तापवादोयं॥ ॥श्वभिर्हतस्य यन्मांसं
शुचितन्मनुरब्रवीत्। क्रव्याद्भिश्च हतस्यान्यैश्चण्डालाद्यैश्च दस्युभिः॥१३१॥ ॥श्वभिर्ग्रहणानंतरमेव हतस्य
मारितस्य पशोः स्वदंशात्यरितोयन्मांसं तच्छुचि। कीर्तितमनस्य निषेधात्। तेनन पोनरुक्त्यं। ज्ञावदजीवन्मृग
वस्थया भेदोपपत्तेः। न केवलं श्वहतत्वे किं त्वन्यैरपि क्रव्याद्भिर्व्याघ्रशृगालश्येनादिभिश्चण्डालाद्यैः। चंडालः
श्वपचः। दासास्तो वैदेहकास्तथा भागवा योगतस्थैवसभैते तेत्यजाः स्मृताः इत्युक्तोदस्युभिर्यावैश्च हतस्य मांसं चा
तस्यानातिरिक्तं शुचीति॥ ॥ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि निर्दिशेत्। यान्यधस्तान्यमेध्यानि देहाच्चैव
मलाः स्मृताः॥१३२॥ ॥नाभ्यूर्ध्वं देहस्थानि खानि छिद्राणि नासादीनि सप्र मेध्यानि। नवेगेनत्रश्लेष्मादियो
गेपि शुद्धिर्छिद्राणि त्वाचमनानंतरं स्पर्शार्थमित्यपोनरुक्त्यं। ये चाधोपादानाद्दहारंध्रस्तनछिद्रयोरपि ग्रह

णांपानिपुनर्योनाभेर्गुदीपस्थोवक्तृवचनमागंतुकमगांदेहि इत्यग्रहणार्थं तान्यमेध्यानि स्पर्शेआचमनवि
धानं ।। स्वशब्दः स्वेंद्रियपरतया पादाभिप्रायेण वक्तृवचनमस्तु क्रं पादस्पर्शे विधेः । बाह्यवर्णनं । शारीरमलो
हेतुमाइदेहात्स्वस्वस्थानच्युता एवमला अमेध्यान स्वस्थानस्थिताः ।। ।।मक्षिकाविप्रुषः छाया गोर
जाश्वमरीचयः रजो भूर्वायुरग्निश्च मार्जारश्च सदा शुचिः ।।५१।। ।।मक्षिकाः प्रसिद्धा विप्रुषो जलबिंदवोऽदृश्य
मानरूपविशेषाः स्पर्शमात्रवेद्या अवश्याय बिंदवो आनषादिच्युतव्यतिरिक्ताः । नखाग्रकेशानिर्धूतस्ना
नवस्त्रदशोद्भवः । बिंदकोशुव्वो श्रीका अप्रसिद्धस्नानस्य शेयादीतिलैंगात् । छाया दृष्टादेर्दीपमंचकादि व्य
तिरेकेण । दीपमंचकयोश्छायाहं तिपुराणं पुराकृता अभिनिस्यरणा । गो अजा महिष्यो रूपलक्षणं । अग्रहणनद्यश्व
दीनामपि ग्रहणं । गजाश्वौ प्रसिद्धौ । मरीचयः सूर्यादेः । रजः खरादिव्यतिरिक्तं । श्वकाकोष्ट्रकाअशुद्धिक
रान भवंति ।। ।।नोच्छिष्टं कुर्वते मुख्या विप्रुषोंगेन यांतियाः । न श्मश्रूणिगतान्यास्यं न दंतांतरवेष्टितं ।
।।५२।। ।।मुखाद्उदया विप्रुषोंगेन पतंति किंतु लोमभिरेव धार्यंते ता उच्छिष्टमंगस्वस्थापनस्य वा न कुर्वंतितं
तनंतःप्रक्षालनादि तथा परस्यानिश्मश्रूणिमुखं प्रविष्टान्यपि नोच्छिष्टं कुर्वंति तथा दंतांतरे दंतसंश्लिष्टं वेष्टि
तं लक्ष्मन्नादि नोच्छिष्टं करोति यादव जिह्वया मिमर्शनात् । प्राक्च्युतेत्विति केचित् । च्युतेत्वाचमेदिति

२३८

श्चिगिरीन्निवतत्र विरितिशोत मीयात्। चर्वतांत्वाच्च मेन्नित्यमुक्तानां शूलच वर्णमिति स्मृतेः॥ ॥स्पृशंति द्वः पादौ
य आचामयतः परान्। भौमैस्ते समाज्ञेयान तैरप्रयतो भवेत्॥५३॥ ॥परानन्यैर्मणि कांचन म्लेच्छादीन् आचामय
तोएवनाशुचित्वंमाचमनं दद स्तस्यान्यहस्तेन निषेधात्तये भूमौ पतितोत्थितस्य जलस्य विंदवः पादवः पादौ स्प
शंतिते ः पायथिता अशुचिर्न भवेद्यतस्तेनु पहत भूस्पुत्थितजलविंदुभिस्तुल्याः। यथापरांपरं भूमिस्पृष्टागतेतो
यथाश्चान्योन्यास्य विप्रुषः। मुक्तोच्छिष्टं तथास्ते इन्नोच्छि मनुरप्यवादिति। परिग्रहणात्त्व स्यावामेतोऽशुचित्वमि
तिप्राप्तेवमनं मुखजा विप्रुषो मेध्यास्तथाचमनविंदवः इति योमिस्मृतेः। आचामयत एव नाशुचित्वं पार्श्वस्थितस्य
तु भवत्येवा पादग्रहणं दंगांतरेष्वशुचित्वंविंदुग्रहणं डषादिमेवा। पुनस्य शुद्धिमाह॥ ॥उच्छिष्टेन तु संस्पृष्टो द्रव्य
हस्तः कथंचन। अनिधायैव तद्द्रव्यमाचांतः शुचितामियात्॥५४॥ ॥ऊर्ध्वमधो वा उच्छिष्टेन क
थंचन प्रमादेन संस्पृष्टः साक्षात्स्पृष्टोद्द्रव्यहस्तो भक्ष्य भोज्यादि द्रव्यं हस्ते यस्यान्नदानतत्र कोष्ठोत्तंमादो कृत्वा.
चामेत्। अत्रभूमौत न्निधाय प्रोक्ष्याचामेत्। अवरंनान्न पानेषु उच्छिष्टं संस्पृशे द्यदि। आचामेद्द्रव्यमाचमप्रवरे
तुन शिति चाभि श्रृंतत्व वद्द्रव्याणि धेयं स्वमंगांतरे कार्यमिति च्यवस्था त्वय मुक्तंतु गौतमः हस्तउच्छिष्टोनिधि

वि०२१२३
२४०

याचामेद्द्व्यतिद्रव्यः हस्तः सन्न् उच्छिष्टेनप्रायठच्छिष्टस्तद्द्रव्यं हस्तस्थं निधायेति मद्यपादिनिषेधं बद्धदंड्यानिषेयमि
तिनव्याः । गृहाद्यशुद्धिमाह । मार्जनोपांजनैः वेश्म प्रोक्षणेन च पुस्तकं ॥ ॥मार्जनं संमार्जन्या पांशवाद्यपनय
नं उपांजनं गोमयेन लेपनं ताभ्यां प्रत्येकं वेश्म शुध्येत् । बहुवचनं लिप्तस्यापि पुनर्मार्जने लेपार्थं पुस्तकं ताडप
त्रशाणशरादिनिर्मितं तत्प्रोक्षणेन शुध्येत् क्षालनेन द्रव्यनाशात् ॥ ॥मार्जनेनोपांजनेन पूर्वोक्तिसेकः पार्जन्यं वर्ष
पंचगव्येन वा उल्लेखनं अपपरिभाषा तद्राणं चकारात्जंभीर्थेण वननं दाहः तत्रेण काष्ठादिभिश्च कारात्कालपर
एणगवामेकरात्रं वासो वस्थापनं ऋषिशब्दात् लं वारमात्रं वा ॥ अथ वेति क्षाग ग्रहणं यथायमः । खननात्तरणा
द्दाहाद् अद्भिर्वर्षणलेपनात् । गोभिराक्रमणात्कालाद्भूमिः शुध्यति सप्तभिरिति । संवर्त्तः । पंचगव्येन संप्रोक्ष्य क्षा
मेनांक्रामयेद्बहुवन्हिना । एतैर्वा स्तेः समस्तैर्वा यथायथं भुवः शुद्धिः । तदाह देवलः । यत्र प्रसूयते नारी म्रियते दह्यते थ
वा चंडाला ध्युषितं यत्र विष्ठादिसंगतिः । एवं कश्मलपृथिव्यां भूरमेध्याप्रकीर्त्तिता । श्वसूकरखरोष्ट्राद्यैः संस्पृष्टा दु
ष्टतां व्रजेत् । अंगारतुषकेशास्थिभस्माद्यैर्मलिना भवेदिति । एवं त्रैविध्येन शुद्धिमाह । दहनं खननं भूमेरुपलेपनवा
पने पर्जन्यवर्षणं चेति शौचं पंचविधं स्मृतं । पंचविधां व्यवस्थामाह । पंचविधा व्यवस्था स्वतुर्भिः । या पुनः श्वादि
भिश्चतुर्भिरधिष्ठिता सा उपलेपनादिभिस्त्रिभिर्या पुनः श्वयामकुक्कुटैरधिष्ठिता सा वापनादिद्वाभ्यां । या त्वंगार

२४०

र्थवादमाह ॥ ॥गावः पवित्रं मंगल्यं गोषु लोकाः प्रतिष्ठिताः ॥५३॥ ॥गावो वितन्वते यज्ञं गावः सर्वाघसूदनाः ।
गोमूत्रं गोमयं सर्पिः क्षीरं दधि च रोचना ॥५७॥ ॥षडंगमेतत्परमं मंगल्यं सर्वदा गवां ॥ गावः पवित्रं सर्वे
वेदाद्विजास्तथा यज्ञ इति । सर्वकालं मंगल्यं पापनिहन्तृ पुण्योत्पन्नो च निमित्तमिति ॥ ॥शृंगोदकं गवां पुण्यं सर्वाघविनि
षूदनं ॥५८॥ गवां कंडूयनं चैव सर्वकल्मषनाशनं । गवां ग्रासप्रदानेन स्वर्गलोके महीयते ॥५९॥ ॥गोशृंगोदकेन
स्नानं मार्जनं वा पुण्यं पूतेनाननं कंपुन कामस्य सर्वपापनाशकं पापघ्नं वार्थं गोग्रासप्रदानं स्वर्गसाधनं ॥ ॥गवां हि तीर्थे
वसति हि गंगा पुष्टिस्तथासां रजसि प्रसिद्धा ॥६०॥ ॥तीर्थं गोमूत्रे गंगा रजसि प्रणतौ धर्मस्तासां गवां प्रणामं सर्वकालं कु
र्यादिति विधिः श्रौतविधिप्रदर्शयितुमिति ॥ इति श्री विष्णुस्मृतिविवृतौ वैजयंत्यां
त्रयोविंशोध्यायः ॥ ॥एवमाचारकांडादौ संस्काराभिधित्सया चतुर्विंशे विवाहमादौ निरूपयति । अथ ब्राह्मणस्य
वर्णानुक्रमेण चतस्रो भार्या भवंति ॥१॥ ॥संस्कारप्रकरणार्थोयमादः वर्णानां विवाहोन्यथा राजन्यापू
र्वादिनिमित्तप्रायश्चित्तप्रसंगः ॥ तिस्रः क्षत्रियस्य ॥२॥ ॥क्षत्रियस्य वर्णानुक्रमेण क्षत्रिया वैश्या शूद्रेति ति
स्रो भार्या भवंति ॥ ॥द्वे वैश्यस्य ॥३॥ ॥वैश्यस्य वर्णानुक्षत्रिया वैश्या शूद्रेति द्वे भार्ये भवतः ॥ ॥एका शूद्रस्य ॥४॥
॥ ॥शूद्रस्य वर्णानुक्रमेणैका शूद्रा भार्यादिति । क्षत्रियादिषु वर्णानुक्रमाद्युपादाने ब्राह्मण्युपादाने नापि

वि० दी २४

२४१

त्रित्वादिसंख्यापूर्त्तिः स्यात्तादीनां न प्रातिलोम्येन ब्राह्मणादिविवाहः। तथा च वर्णाश्रमासु हेत्तोदद्नः॥
त्रयाणामानुलोम्यं स्यात्प्रातिलोम्यं न विद्यत इति त्रयाणां गार्हस्थ्याद्याश्रमाणां च। तासां भार्यात्वोत्पादकम
ह॥ ॥तासां सवर्णावेदनोपाणिग्राह्यः॥५॥ ॥तासां सवर्णा सर्वब्राह्मणादिभिः पाणिग्राह्यः॥ ॥असवर्णा चे
दनेष्यरः क्षत्रियकन्यया॥६॥ ॥सवर्णावेदने पाणिग्रहणविधानात् क्षत्रियायाः शरग्रहणमसवर्णावि
षयमिति सिद्धे पुनरसवर्णावेदनग्रहणमुत्तरविवक्षयेति गम्यते। अत्र वचनं क्षत्रियादीनां परिणेतॄणां पाणिशरादिवि
कल्पनिरासार्थं क्षत्रियकन्यायाश्चासवर्णे ब्राह्मण एव न वैश्यादिरानुलोम्येन विवाहविधानात्। तत्रश्च क्षत्रियाकन्य
या ब्राह्मणेन परिणीयमानया शरो ग्राह्यः कन्यायाः कर्तृत्वनिर्देशात्पूर्वं ब्राह्मणेन गृहीतस्य शरस्य कन्यया ग्रहणं
कर्त्तव्यं न तु कन्यया गृहीतस्य वरेण। कन्याग्रहणात्तदा तत्पुनर्भूसंस्कारेव वधूगृहीतस्य वरेण ग्रहणं गम्यते॥ ॥प्रतो
दो वैश्यकन्यया॥७॥ ॥असवर्णावेदन इत्यत्रापि तिष्ठते असवर्णेन ब्राह्मणेन क्षत्रियेण वा परिणीयमानया वैश्यया
प्रतोदो ग्राह्यः। अत्राप्युर्ववत्॥ ॥वसनदशांतः शूद्रकन्यया॥८॥ ॥असवर्णावेदन इत्येव असवर्णैर्ब्राह्मणक्षत्रियवैश्यैः
परिणीयमानया शूद्रया वसनस्य प्रावरणवस्त्रस्य दशांतो ग्राह्यः शेषं पूर्ववत्। कन्यातिप्रसंगमाह॥ ॥न सगोत्रां
न समानार्षप्रवरां भार्यां विंदेत॥९॥ ॥गोत्रमगस्त्याष्टमसप्तर्षिपत्यं तत्समानमेकं वंशप्रवर्त्तकं स्वस्य यस्याः सा

२४१

षयत्वात्। अन्येतु सान्नपुरुषं सापिण्ड्यं चातुर्वर्ण्यविषयं तद्विषयमेव चानुकल्पविधानं तच्च द्विजेष्वपोद्यते पंच
मात्सप्तमाद्वी ।इत्यनेन। ततश्च द्विजानामेवायमनुकल्पनिषेधे नात्येषामिति द्विजातिमात्रविषयतया चा
तुर्वर्ण्यविषयत्वासंभवात्। द्विजातिमात्रविषयत्वे च विधिनिषेधयोरष्टदोषदुष्टविकल्पापत्तेः। न चास्मिन्न
तिसा विधिर्वैरनुकल्पविषयत्वेन निषेधस्य च मुख्यकल्पविषयत्वेनैकविषयत्वाभावात् तस्माद्यथोक्तमेवस
मीचीय इति। नन्वनुकल्पोद्वाहे दोषाभावानेरकोन स्यात्लोकविद्विष्टत्वं मधुपर्के गोवधवत्स्याद्देवेत्यतआ
ह। देशकालाचाराभ्यामनुकल्पस्य च व्यवस्थितत्वान्न लोकविद्विषविषयता। तत्र प्रमाणमाह वेदादिति। तत्त
ये संगच्छावहै स्वतुर्थ संगच्छावहै इति वेदवक्ता। यवतुर्थयोकद्वाहे प्रमाणं। ते नद्यावंतेवततउ नोऽधिवोच
तामानः पथः पित्र्यान्मानवादधिदूरं नैष्टपरावतः इति वेदः। कुलाचारे प्रमाणमाह मो देवाः ते यूयं नद्यावंपा
लयथते यूयं न अस्मा नत्रवततवद्वात तने यूयं नः अस्मान अधिकोरा अधिकं हितं ब्रूत मानवान्मनुष्यो नुष्ठेयात्।
परावतः परलोकसंबंधिनः पित्र्यापितृपरंपरागतात्पथो दूरं नो अस्मान्मा नैष्ट मा नयतेति देवाः प्रतिप्रार्थ्यंते
तस्मात्कुलपरंपरागतेन मार्गेण सप्तमाद्वीगप्युद्वाहे न दोष इति भावः। नन्वेवं संभ्रमानांताना मस्त्वनु

धिः। सप्तमी च तथा षष्ठी पंचमी च तथैव च। एवमुद्वाह्य कन्यां न दोषः। शाकटायनः। त्यक्तायां वा चतुर्थी वा पंच
योरुभयोरपि। विवाहयेन्मनुः प्राह पाराशर्यो गिरा यमः। असपिण्डा च या मातुरसगोत्रा च या पितुः। सा प्रश
स्ता द्विजातीनां दारकर्मणि मैथुने। यस्तु देशानुरूपेण कुलमार्गेण चोद्वहेत्। नित्यं स व्यवहार्यः स्यात् द्वेदा
चैतत्प्रतीयत इति। सप्तमाद्यर्द्धमिति मुख्यः कल्पस्तदभावे पंचमीमिति पक्षद्वये पर्यवसर्क... मतेनानुकल्पः।
(तु)शब्देन पक्षान्तरं परिगृह्णाति। पितृपक्षे त्वियं वक्ष्यमाणे पिविधिः सप्तमीं षष्ठीं पंचमीं च तथा पूर्वपूर्वाभाव एवउ
द्वहेदेवमुद्वाहे न दोष इति शाकटायनमतम्। एवं स्वमतेन पक्षद्वयेप्युद्वहेदिति मनुपराशरांगिरोयमानां मतं
कन्यागतमेव सप्तमत्वादि विशेषणं वरेपि ज्ञेयं। असापिंडो सपिंडामुद्वहेदित्ति मनुरोषणत्वात्तेन सप्तमः
सप्तमीं षष्ठः षष्ठीमित्यादि सिद्धो। नन्वनुकल्पेपि यदि दोषाभावस्तत्कल्पस्तत्र हि को विशेषो मुख्यकल्पादि
त्यत आह। शास्त्रशक्तेति। सातीत सप्तमादिः प्रकर्षेण शस्ता दारकर्म गृहकार्यं मैथुनमाधानादि। अनेन
नुकल्पस्य द्विजातीनां दोषाजनकत्वेपि प्राशस्त्यमुक्तं भवति लोकविद्विष्टा तत्र न्येतु नाप्राशस्त्यमपु
क्तं रीत्या सा प्रकर्षशापिण्डा द्विजातीये चिच्छूद्रे ष्वपि संकोचावरपंभावे न द्विजातिमात्रवि

वि॰ द्र॰ २४

२४२

ति।मनुनाऽत्रविप्लुतब्रह्मचर्यस्यतूपक्रमपंचमात्सप्तमादूर्ध्वमितियोगिनाचावांतरप्रकरणेनसप्तमा
द्यतिक्रमस्यद्विजमात्रविषयत्वाभिधानाच्चातुर्वर्ण्योपक्रमेपुनर्द्विजग्रहणस्यनियमपरिसंख्यान्यत
रार्थत्वाच्चनशूद्रस्यसप्तमादूर्ध्वतानियमःसिध्यति।द्विजातिष्विवशूद्रेष्वेतादृशनियामकवचनाभावा
दसपिंडाक्वचनस्यात्तुद्विपुरुषादिसप्तपुरुषपर्यंतसापिंड्यषट्पक्षान्यतरपक्षाश्रयणेनापिचारितार्थ्या
त्सदसत्कूटयोर्गुरुलघुपक्षाश्रयणेनाव्यवस्थानिरासाच्चेत्पलंविस्तरेण।।उद्वहेतद्विजोभार्यानाद्येनवि
धिनान्वितेतिपुराणीयवचनेतरस्तुकल्पाविधानेनार्थवत्।अन्यथान्याय्यत्वविशेषणानर्थक्यात्।अत्रानु
कल्पस्यैवन्याय्यप्राप्तत्वात्तत्तुल्यकल्पस्यतुख्यासंभवहेतुकमपरानुष्ठानमनुकल्पःसचक्वचिदाप
कचिद्वादः।यथानदीक्षितस्यान्नमश्नीयादितिनिषेधेऽत्रमीषोमीयसंस्थितेदीक्षितस्यान्नमश्नाति
त्यस्यगुरुपक्षस्यप्रतिप्रसवस्यासंभवेक्रीतराजकोभोज्यान्नइतिलघुपक्षस्याभ्यनुज्ञानं।शाट्येय
था।एषामसंभवेकर्यादिष्टिंवैश्वानरींद्विजस्त्वादिः।तथाचतुर्विंशतिमते।दशभिःपुरुषैःख्याते
ऽत्रियाणांमहाकुलात्।उद्वहेत्सप्तमादूर्ध्वंतदभावेतुसप्तमीं।पंचमींतदभावेतुपितृपक्षेत्वयंवि

२४३

सप्तमात्पुरुषात्भार्यांनविंदेत्तेषुमध्यत्रानुपश्यन्तो।एकस्यामेवकन्यायांनिषेधद्वयसमुच्चयार्थश्चकारः।नन्वाङ्मर्या
दायांकिंत्वभिव्याप्तौ।पंचमात्सप्तमादूर्ध्वंमातृतःपितृतस्तथेतियोगिस्मृतेः।पुरुषःशीर्षमातृतः।मातरमारभ्यपं
चमोमातामहादीनांकुलेपितृतःपितरमारभ्यसप्तमःपितामहादीनांकुलेतत्संततौयोत्पन्नाकन्यातांनोद्वहेदि
ति।मातापितृतश्चापंचमादिग्रहणान्मातापितृद्वारकःपंचसप्तमावधिकःसमानपुरुषावयवसंबंधोवरस्यकन्या
परिहारेनिमित्तमितिगम्यते।सएवचसापिंड्यप्रयोजकः।एतत्षाट्कौशिकंशरीरंत्रीणिपितृतस्त्रीणिमातृतत्रास्थि
स्नायुमज्जानःपितृतस्त्वङ्मांसरुधिराणिमातृतइतिश्रुतेः।तदतिप्रसंगनिवृत्त्यैचापंचमादासप्तमादिति।या
नितुपंचमींसप्तमींचैवमातृतःपितृतस्त्वेत्यादीनिवसिष्ठादिवाक्यानितानिद्विजात्यतिरिक्तविषयाणीति
ज्ञेयं।पंचमात्सप्तमादर्वाक्यःकन्यामुद्वहेद्द्विजः।गुरुतल्पीसविज्ञेयःसगोत्रांचैवमुद्वहन्निितिविष्णुना।पं
चमेसप्तमेचैवयेषांवैवाहिकीक्रिया।क्रियापरास्त्रपिहितेसर्वेतेशूद्रतांगताइतिमरीचिनाचद्विजपुरस्का
रेणैवतन्निषेधात्।नचद्विजपदंचातुर्वर्ण्योपलक्षणंवाक्यद्वयेपिवाक्यशेषासंगतेः।नहिशूद्रस्यसगोत्रो
द्वहनेशूद्रत्वाभिधानेनवानिंदाप्रतीयते।किंच।उद्वहेद्द्विजोभार्यामित्युपक्रम्यासपिंडाचयामातुरि

गोववैतहव्यसावेतसेतिप्रवरैक्यं। तथा प्रवरभेदेपि गोत्रैक्यं। यथा तित्तिरिकपिभूमिस्वदितखंडितानां गोत्राणा
मांगिरससैन्यगार्ग्येति। अंगिरास्तित्तिरिः कपिभूमिरिति वेति गोत्रैक्येपि प्रवरभेदः। एवमन्यचापूह्यं। यद्यपि
क्षत्रियवैश्ययोः परिगणितपत्यत्वात्प्रातिस्विकगोत्रप्रवरौ न स्तस्तथापि पुरोहितगोत्रप्रवरौ वेदि
तव्यौ। पौरोहित्यान्राजविशामित्याश्वलायनस्मरणात्। ननु क्षत्रियवैश्ययोरपि प्रातिस्विकगोत्रप्रवरौ स्म
र्येते। तथा च बौधायनः। क्षत्रियाणामार्षेयप्रवरो भवति। मानवैलपौरूरवसेति। वैश्यानामार्षे
यः प्रवरो भवरो भवति। भालंदनवात्सप्रमांकिलेति तत्कथं तयोः पुरोहितगोत्रप्रवरावितिचेत्सत्यं। द्विविधा हि
क्षत्रियाः विद्यमानमंत्रदृशोऽविद्यमानमंत्रदृशश्चेति तत्र ये विद्यमानमंत्रदृशस्तेषां प्रातिस्विकगोत्रप्र
वरौ ये त्वविद्यमानमंत्रदृशो[illegible]स्तेषां पुरोहितगोत्रप्रवरादिति न विरोधः। उक्तसगोत्री मातृरपि केनचि
द्वाह्यकर्मणि [illegible] इति स्मरणात् तन्माध्यंदिनीयानामेव। अथ मातृगोत्रं माध्यंदिनीयानां। एकं त्वविशेषादिति
सत्याषाढस्मरणात्सपिण्डातिप्रसंगवारणायाह॥ मातृतः पंचमात्पुरुषात्पितृतश्चासप्तमात्॥ १८
॥ सवो गोत्रादिविशेषणानान्निरासाय तु शब्दः। तेन [illegible] निषेधः। मातृतश्चापंचमात्पुरुषात्पितृतश्च

सासगोत्रा तां न विंदेत्तपरिणयः। नन्वेवं केवलभृग्वंगिरोपत्यानामगोत्रत्वेनासमानगोत्रत्वान्निषेधाप्रवृत्त्या वि
वाहः प्रसज्येतेत्यत आह। न समानार्षेति। आर्षं भृगोरंगिरसश्च यदंशाकरमपत्यं जमदग्निगौतमभरद्वाजप्रभृति
रिक्तमार्ष्टिषेणमुद्गलादि तदार्षं समानमार्षमुक्तरीत्या यस्याः सा समानार्षा तां च नोद्वहेत्। यया आह्वो बोधायनः।
भृग्वंगिरसोऽभिन्नविवाहं कुर्वत इति। भृग्वंगिरस्त्वेन साम्येपि वा तत्र वंशभेदे विवहंतीत्यर्थः। नन्वेवं गोत्रार्षभेदे
पि प्रवरैक्ये विवाहः स्यादित्यत आह। प्रवरेति। आर्षं च प्रवरश्चार्षप्रवरो यस्याः सेति द्वंद्वगर्भबहुव्रीहिणा समानप्र
वरा लभ्यते तां च नोद्वहेत्। आर्षप्रवोक्तप्रवरास्तत्तद्वंशोद्भवमंत्रकृतो मंत्रद्रष्टार ऋषयः। यथार्षि मंत्रकृतो वृणीत
इति श्रुतेः। ऋषिदर्शनादिति यास्कस्मृतेश्च। यदा तु माठरादिमतेन दशानामपि गोत्रकरत्वं तदार्षपदं [illegible] विशे
षणं देवमानुषप्रवरनिरासार्थं ध्येवसेयं। न देवैर्न मनुष्यैरार्षेयं वृणीतेऽऋषिभिरेवार्षेयं वृणीत इति श्रुतेः। गोत्रप्रवरयोर्न
प्रत्येकं परिहार्यत्वमिति प्रत्येकं निषेधः। अन्यथा त्र समानगोत्रजामिति विशिष्टदर्शनेन विशिष्टनिषेधप्राप्तेः
तत्र च गोत्रभेदेपि प्रवरैक्ये न विवाहः। यथा यस्कवाधूलमौनमौकोदीनां गोत्राणां भेदेपि भार्गववैतहव्यसा
वेतसेति प्रवरैक्यं। तथा प्रवरभेदेपि गोत्रैक्ये। यथा तित्तिरिकपिभूसिस्वदित्तरवंडितानां गोत्राणां भेदेपि भा

कल्पत्वं सप्तमोर्ध्वानां दशमादर्वाचीनानांऽङ्कं यद्दशपुरुषस्यापि सापिण्डस्य स्मरणात्। तथा च चतुर्थः स्मृतिः
सवर्णा भार्या सुद्वेहा। अतीत्य मातृतः पितृतः पंचमीं दशमीं मतीत्येत्यन्वयः। स्वयं भ्रूस्त्वस्यैव सापिण्ड्यस्य विवाहाशौ
चयोर्द्वयोरप्यावश्यकत्वमाह। तत्र ब्राह्मणानामेकपिण्डस्वधानामादशमाद्धर्मे विच्छित्तिर्भवेत्। आसप्तमाद्धस्य
विच्छित्तिर्भवति। आतृतीयात्स्वधाविच्छित्तिर्भवति। अन्यथा सपिण्डाशौचक्रियाविच्छेदाद्विवाहे तुल्या भवंतीति अ
स्यार्थः। पिंडो जनकदेहः स्वधा श्राद्धं तत्र नयतः किं चित्र किं तु प्रोष्ठपद्यां विहितं प्रपितामहपित्रादीनां नांदीमुखं
श्राद्धं तत्र प्रपितामहपित्रादयस्त्रयः पिंडभाजस्तत ऊर्ध्वं त्रयो लेपभाजः स्वपित्रादयस्त्रयस्तन्निरूपकाः
वान्नवित्येवं दशमं तस्मादादस्मादादशमादृशमाद्धर्ममिति यावत्। अत्रेदं पूर्वमयादावचनः। अ
डेन्मशुद्धा नायावत्। धर्मस्य विवाहे सपिण्डो वर्जनस्य जननमरणयोः संध्यास्नानादिवर्जन
स्य विच्छित्तिर्निवृत्तिर्भवति। तथा आसप्तमात्सप्तमात्सप्तमोर्ध्वं अवश्य निवृत्तिः। तथा तृतीयोर्ध्वं स्वधानि
वृत्तिः। अन्यथा दशमपुरुषादर्वागेव अविवाह्यता। परिहारे जननमरणयोः संध्यास्नानादिवर्जनस्य जन
नमरणयोः संध्यास्नानादिवर्जननिवृत्तिः सपिण्डानामाशौचस्य तन्निमित्तायाः पिण्डदानादिक्रियाय।

आदिशब्दाद्विवाहनायाश्चोच्छेदादूर्ध्वमतुल्या भवंति नन्वेवमप्येकपिण्डत्वधानामित्यत्र विशेषणद्वयोपा
दानं व्यर्थं अन्यतरविशेषणेनैवावयवपिंडान्वयरूपेणैकतरसापिंड्यसिद्धेरिति चेन्न। दत्तपुत्रे सत्यपि
जनकावयवान्वये तत्कर्तृकश्राद्धसंबंधाभावान्न दशपुरुषं सापिंड्यसिद्धेरिति चेन्न। दत्तपुत्रे सत्यपि
जनकावयवान्वये तत्कर्तृकश्राद्धसंबंधाभावान्न दशपुरुषं सापिंड्यं किंतु दत्तकोनाद्विपुत्राणां
बीजवप्तुः सपिंडता पंचमी सप्तमी या भवतु न दशपुरुषं सापिंड्यं। किंतु यावंतः पितृवर्गाः सुतस्ता
वद्भिर्दत्तकादयः प्रेतानीयाजनं कुर्युः स्वकीयैः पितृभिः सह। द्वाभ्यां सहायं तत्पुत्राः पौत्रास्त्वेकेन
तत्समं। चतुर्थपुरुषे छेदं तस्माद् षाट्त्रिपौरुषीति कार्ष्णाजिनिवचनात्। त्रिपुरुषमेव पितुः प्रतिगृही
तुः वर्गपितरः गौणामुख्या[illegible]ताताद्व्यामुष्यायणस्य यावंतस्त्रयः षड्‌तावद्भिः सहदत्तकादयः
मृतानां पितृमेधादौ नीयाजनं कुर्युः। एवं दत्तकस्य पौत्रादिरपि दत्तकं पर्यगृहीत्[illegible]तदग्रेनतत न चैकेन
तादृशेन सह स्वपितृयोजनं कुर्युः। यत्तत्स्माद् षाट्त्रिपौरुषीत्यर्थः। विशेषांतरमस्माभिस्तत्कनायां दत्तक
मीमांसायामवधेयं। दशपुरुषमेव सापिंड्यं श्रुतिरप्युपोद्बलयति। दशैवं तमासमते योऽजुवोन्दश

सुसगोत्राणां न विंदेत् [illegible]
मेयुगे। अपामर्थयतीनं ब्रह्मा भवति सारथः। मैमताया अपत्यप्रभोग्यामतेयः। दीर्घतमानाऋषिः क्रूरस्या दशमेयुगे
हृद्धेमाता पितृलक्षणे अतीते संततिं कुर्वीन्न भार्ययासह योगः प्रीतिं प्रशस्तान्। ऋषी प्रीतिसेवनयोरित्यस्यायं प्रयोगः
कृतश्चेत्तत्राह। अर्थं गर्भलक्षणं प्रभोजनेत्रासादयितुं यतीनां गहंतानात्र पां शुक्रशोणितरूपाणां जलानां सा
रथिमेत्ता ब्रह्मा जीवो भवेत्। स्त्रीपुंसयोश्च संगो विशुद्धेः शुक्रशोणितेन। पंचधातून्स्वयं षष्ठ आदत्ते युगपत्प्रभुरिति
स्मृतेः। तस्माद्व्ययवान्वयरूपं सापिण्ड्यं दशपुरुषमनुवर्त्तत इति तात्पर्यम्। इदमेव च सापिण्ड्यमाशौचयोर्द्वयोरपि
प्रयोजकमित्याह भगवान्बौधायनः। प्रपितामहः पिता स्वयं सोदर्या भ्रातरः सवर्णा याः पुत्रः पौत्रः प्रपौत्रस्तत्पुत्र
वर्गं तेषां च पुत्रपौत्रमविभक्तदायं दायोऽत्र पिण्डः एकपिण्डान्वयी त्वर्थः। एतच्च दशपुरुषमेवेत्युक्तमेव प्राक्। न चेदेकं
वलं क्वथयग्रहणमेवं दशपुरुषं सापिण्ड्यं। आशौचे सपिण्डेषा सप्तमादिति नैव पृथक्कसप्तपुरुषादिधा नादि
ति मंतव्यं। सपिंडेषा दशाह भिन्नुपक्रमं जननमरणयोः सन्निपातइत्युपसंहारात् मध्यपठितयोः सां
प्तपुरुषयोः सापिण्ड्ययोः संदंशपतितत्वेनोभयत्राप्युभयोरपि वैकल्पिकांगत्वसिद्धेः। तच्चासप्तमा

रुक्स्थविछित्तिरिति स्वयंभुवाक्ये सा मातृपुरुषस्य सप्तमे निवृत्ते । तन्नाभीत्यर्थो भवतीति बौधायनवदयासघस्या । अ
था हस्तु सुमन्तुः । मातृपितृसंबन्धा आसप्तमाद् विवाह्याः कन्या भवंति । आ पंचमादन्येषामिति । तस्मा
न्मातृतः सप्तमाद् ऊर्ध्वं पितृतश्च दशमाद् ऊर्ध्वं विवाह्यं तत्स्मरणात् कथमर्वाग्विवाह्यत्वं । अनुकल्पत्वेनापि वि
श्यमा वा इति चेत् सत्यं नवा च तिक एवानुकल्पो ऽपितु न्यायसिद्धापीनुक्रमे वक्षीन राजको भोज्यान्न
ह्तेयत्र । तस्माद्यथा पंचमा[illegible]त्सप्तमाद् ऊर्ध्वमप्यनुकल्पत्वं तथा पंचमात्सप्तमादर्वाग् अप्यस्तु । अ
नुपपन्ने स्वकल्पत्वात् । अयमप्यनुकल्पो ब्राह्मणातिरिक्तविषय एव । ब्राह्मणानामादशमाद् धर्मवि
छित्तिर्भवतीति स्वयंभूस्मरणादिति सर्वमनवद्यं । प्राच्यास्तु पंचमसप्तमावर्वाग्विवाहप्रतिपादक
वाक्यानं त्रिगोत्रांतरिते त्वविधयतया व्यवस्थामाहुः । तथा च वृहन्मनुः । असंबद्धा भवेद्या तु पिंडे
नैवोदकेन वा । सा विवाह्या द्विजातीनां त्रिगोत्रांतरिता च या इति । त्रिगोत्रांतरिता मूलपुरुषगोत्रा
त् चतुर्थगोत्रोत्पन्नेति यावत् । तथा च सएव । नवरक्तिकर्षकर्तव्यं त्रिगोत्रात्परतो यदीति ॥

कन्यायां विशेषमाह॥ ॥नाकुलीनां॥२१॥ ॥कर्षकराजसेवकादीकुलमकुलं। कुलान्यकुलतां यांति कृष्या राजोपसेवये
तिस्मरणात्। तत्र भवा अकुलीना तां नोद्वहेत्॥ ॥न च व्याधितां॥२२॥ ॥व्याधयः कुष्ठापस्मारादयस्तद्युक्तां च न। वकारादा
लोमकातिलोमकादीनां ग्रहणं॥ ॥नाधिकांगी॥२३॥ ॥अधिकमंगमंगुल्यादिकं यस्यास्तां षडंगुल्यादिकां न॥ ॥न ही
नांगी॥२४॥ ॥हीनमंगमंगुल्यादिकं यस्यास्तां चतुरंगुल्यादिकां न॥ ॥नातिकपिलां॥२५॥ ॥अतिशयितकपिलवर्णां नि
अतिशब्दादीषत्कपिला न दुष्टा॥ ॥न वाचाटां॥२६॥ ॥वाचाटां बहुभाषिणीं नोद्वहेदिति प्रत्येकमन्वयः। विवाहभेदानप्रतिजा
नीते॥ ॥अथाष्टौ विवाहा भवेति॥२७॥ ॥अथेत्यंतरप्रकरणारंभः। विवाहो नाम भार्यात्वोत्पादको विधिः सोऽष्टधा॥ ॥ब्राह्मो दै
व आर्षः प्राजापत्यो गांधर्व आसुरो राक्षसः पैशाचश्चेति॥२८॥ ॥ब्रह्मणोऽयं ब्राह्मः। एवं दैवादयो व्याख्येयाः प्रतिज्ञातानां
मुष्टानामिमाः संज्ञा व्यवहारसौकर्याय। यथोद्देशं लक्षणान्याह॥ ॥आहूय गुणवते कन्यादानं ब्राह्मः॥२९॥ ॥स
वर्णश्रोत्रियसुपरीक्षितपंसत्वासगोत्रासपिण्डत्वादयो गुणास्तद्वते आह्वानपूर्वकं यदयाचितकन्यादानं स ब्राह्मो वि
वाहः। आह्वानमलंकारोपलक्षणं। आच्छाद्य चार्हयित्वा चेति मानवात्। आच्छादनार्हणं चाविशेषादुभयोः॥ ॥
यज्ञस्थ ऋत्विजे दैवः॥२०॥ ॥यज्ञे ज्योतिष्टोमादौ तिष्ठतीति ततः सत्कर्म कुर्वद्वादि करोतीति यज्ञस्थस्तस्मै दशाय त्वि

जेऽलंकृत्य शक्तये नैपुण्यप्रदर्शनेऽद्भुतसंतोषविशेषणान तु कृत्वर्थतया यत्कन्यादानं दक्षिणादानकाले स दैवः। दक्षिणा
स्तुनीयमानास्त्वतवैदियहत्विजे स दैव इति बोधायनीयात्। एतद्धि विवलादेवदीक्षितस्य दाननिषेधो यन्त्याविषय
इति सिद्धं।। गोमिथुनग्रहणेनार्षः।।२१।। गोजातीयं मिथुनं स्त्रीपुंसं तत्स्य तयो वापत्यर्पणाय ग्रहणेन यत्क
न्यादानं स आर्षः। एकं गोमिथुनं द्वे वेति मानवात्। प्रदानं यत्तु कन्यायाः सह गोमिथुनेन तु शास्त्रायवास्तेगो
त्रायतमार्षमृषयो विदुरिति नारदीयात्।। प्रार्थितप्रदानेन प्राजापत्यः।।२२।। प्रार्थितायायाचितायाः कन्या
या यत्त्रिप्रकर्षेणोक्तविधिना दानं तेन प्राजापत्यः प्रदानमिति वक्तव्ये तृतीयानिर्देशो लक्षणांतरसूच
नार्थः। तदाह मनुः। सहोभौ चरतं धर्ममिति वाचानुभाष्य तु। कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृत इति। य
द्यपि विवाहांतरेष्वपि सहधर्मचरणमस्त्येव तथापि यावज्जीवं सहधर्मचरणमेव नाश्रमांतरगमनेनापि स्वयं त
रपरिणय इति विशेषः। यत्तु धर्मशब्दोऽर्थकामयोरुपलक्षणार्थः। धर्मे चार्थे च कामे च नातिचरितव्या त्वियमि
ति स्मृतेरिति। तन्न। प्राजापत्ये सह धर्मं चर्यतामिति मंत्र इति गोतमवाक्यविरोधेन तस्य विवाहांतरविषयत्वा
त्। अन्ये तु सह धर्मं चरतामिति प्रार्थितायप्रदानमित्येकार्थतां वर्णयंति।। द्वयोः सकामयोर्मातापितृरहिते

योगो गांधर्वः॥२३॥ ॥द्वयोः कन्यावरयोः सकामयोरन्योन्यानुरक्तयोर्मातापितृभ्यां रहितो नत्वनुज्ञातो योगः परस्परा
नुमतिर्गांधर्वः॥ ॥क्रयेणासुरः॥२४॥ ॥क्रयः कन्यापितृप्रार्थितमूल्यदानं तेन कन्याग्रहणमासुरः॥ ॥युद्धहर
णेन राक्षसः॥२५॥ ॥युद्धे कन्याया हरणेन राक्षसः॥ ॥सुप्तप्रमत्ताभिगमनात्पैशाचः॥२६॥ ॥सुप्ता निद्रिता
प्रमत्ता मदातिशयेन नष्टचेतना तस्या अभिगमनं मैथुनं तस्मात्पैशाचः॥ ॥सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपग
च्छति। स पापिष्ठो विवाहानां पैशाचः कथितोऽष्टम इति मनुस्मरणात्। असंविज्ञातोपसंगमनात्पैशाच इति गौतम
स्मरणात्। ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति। स्वस्थः सन्नोपगच्छति। मत्तां तु पेयादितपादिद्वियोगप्राचुर्येण
उपगमनाभिगमने मैथुनमेवाभिदधाति। तदवस्थाया हरणमित्यन्ये। सुप्तानां प्रमत्तानां वापहरेत्स पैशाच
इत्याश्वलायनस्मरणात्। अत्र गांधर्वादिचतुष्टये दानाश्रवणात्तस्यानीयेगादिभिरेव स्वत्वोत्पत्तिरनंतरं संस्का
रेण तावन्मात्रेणैव भार्यात्वमिति। गांधर्वासुरपैशाचा विवाहा राक्षसाश्च ये। पूर्वं परिग्रहस्तेषां पश्चाद्धोमो वि
धीयत इति परिशिष्टात्। बलादपहृता कन्या यदि मंत्रैर्न संस्कृता। अन्यस्मै विधिवद्देया यथा कन्या तथैव सेति
वासिष्ठाच्च। इदमपि क्षत्रियादिविषयं प्रशस्तत्वादर्शनात्। ब्राह्मणानां तु गांधर्वादिष्वपि प्रतिग्रह एव स्व

त्वोत्पत्तिः परस्य वराऽनुमत्यादिकं मंगलार्थं स्वस्त्ययनं यज्ञश्चासां प्रजापतेः । प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारणं
। ब्राह्मादिषु विवाहेषु पंचस्वेष विधिः स्मृतः । गुणापेक्षं भवेद्दानमासुरादिषु च त्रिष्विति मनुनारदाभ्यां विशेषाभ्याम
पि विवाहेषु दानप्रतिपादनात् । एवं विधिर्दानलक्षणः गुणो ब्राह्मणं प्रति स्वैव संप्रदानविशेषणेषु प्राधान्यात् प्रति
ग्रहलब्धस्यासाधारण्याच्च तदपेक्षयाऽऽसुरादिष्वपि त्रिषु दानं भवतीति तेषु वर्णव्यवस्थामाह ॥ ॥ एते ब्राह्मश्चत्वारो धर्म्याः
॥२७॥ ॥ एते पूर्वोक्तेषु षट्सु विवाहेषु आद्याश्चत्वारो ब्राह्मदैवार्षप्राजापत्या धर्म्या धर्मजनका ब्राह्मणस्य । ब्राह्मण
स्याद्याः शस्ता इति स्मरणात् ॥ ॥ गांधर्वोऽपि राज्ञानां ॥२८॥ ॥ राजन्यानां क्षत्रियाणां गांधर्वोपि शब्दाद्राक्षसश्च धर्म्यः
गांधर्वराक्षसौ राज्ञ इति स्मृतेः । परिशिष्टावासुरपैशाचौ । तत्रासुरो वैश्यशूद्रयोः । तथासुरो वैश्ये शूद्रे वा तत्स्मृतो ग
र्हित इति नारदस्मरणात् । अंत्यः पैशाचः सगर्हितो न कस्यापि योग्य इत्यर्थः । पैशाचश्चासुरश्चैव न कर्तव्यौ कदाच
नेति मनुस्मरणात् । यद्वा । योगर्हितः पैशाचः स अंत्यः । अंत्याः शूद्राः प्रतिलोमजादयश्च तद्योग्य इत्यर्थः । पैशाचः
शूद्रस्येति पैठीनसिस्मरणात् । पैशाचो संस्कृतप्रसूतानां प्रतिलोमजानां चेति प्रचेतःस्मरणात् । वक्ष्यमाणतत्फलार्थ
ताहेतुमाह ॥ ॥ ब्राह्मीपुत्रः पुरुषानेकविंशतिपुनीति ॥२९॥ ॥ ब्राह्मोढापुत्रो दशावरान्दशपरान्दातास्वैकविंशं पुन

छतिच॥ ॥गांधर्वेण गंधर्वलोकं गच्छति॥३७॥ गांधर्वेण कन्यादः गंधर्वलोकं स्वयमेव गच्छति पुरुषसंख्याविशे
षाश्रवणेन गमयतेरनन्वयात्। अत्र फलवचनं ब्राह्मणाभिप्रायेण षडानुपूर्व्या द्विजस्येति मानवात्॥ तत्रत्येव व
दानस्य प्रागभिधानात् नेह क्षत्रियाभिप्रायेण तत्रत्यस्यासुख्यपात्। आसुरादिलोका नाम काम्यत्वादवचनं। का
न्यादातॄनाह॥ ॥पिता पितामहो भ्राता सकुल्यो मातामहो माता चेति कन्याप्रदाः॥३८॥ ॥पिता जनकः माता
महः पितृपिता भ्राता सोदर्यः तेषु ज्येष्ठस्तदभावेन्यः सकुल्यः सपिण्डा आसप्तमाद्याः सन्निकर्षी मातामहो मातुः पिता
स च मातुः पिता स च मातुलमात्रस्य कल्पानामुपलक्षणं माता जननी॥ चकारात्सजायत इति चकारात्सजातय इ
ति चकारादेवं विधसंबंधिनो मातृपितृष्वस्रीयाः॥ एते पित्रादयः कन्यायाः संबंधिकत्वात्प्रदातारो ज्ञेयाः॥ त
दाह नारदः॥ पिता दद्यात्स्वयं कन्यां भ्राता वानुमते पितुः। मातामहो मातुलश्च सकुल्यो बांधवास्तथा॥ माता त्वभा
वे सर्वेषां प्रकृतौ यदि तिष्ठति। तस्यामप्रकृतिस्थायां दद्युः कन्यां स्वजातय इति॥ तेषां क्रममाह॥ ॥पूर्वाभावे प्रकृ
तिस्थः परः पर इति॥३९॥ ॥एषां पित्रादीनां मध्ये पूर्वस्याभावे परः परो दाता। विकारी प्रकृतिस्थोऽविक्षिप्तचित्तश्चे
त्। तथात्वेधिकारिणापि कृतमकृतमेव। यथा नारदः। स्वतंत्रोऽपि हि यत्कार्यं कुर्यादप्रकृतिं गतः। तदप्यकृतमेव

तिवक्ष्यमाणलोकार्हां करोति। द्वादशावरान्द्वादशपरान्पुनात्युभयत इति शौनकः। उभयतो मातापितृकुले। दातुरात्म
नश्च दातारमात्मानं च पंचविंशमर्थात्सहैतेभ्यो न। आत्मानं चैकविंशकं। ब्राह्मीपुत्रः सुकृतकृदिति मानवात्॥ ॥दैवी
पुत्रश्चतुर्दश॥२०॥ ॥दैवोढाउत्रश्चतुर्दश सप्त पूर्वान्सप्तावरान्दातारं पंचदशमर्थाद्धुना। ति। दशावरान्दशपरान्
पुनात्युभयत इति शौनकः। व्याख्या च प्राग्वत्॥ ॥आर्षीपुत्रस्त्रयः सप्त॥२१॥ ॥आर्षोढाउत्रस्त्रीन्पूर्वान्स्त्रीन्परान्दा
तारं च सप्तमं पुनाति। आर्षोढाजः सुतस्त्रीस्त्रीनिति मानवात्। सप्तावरान्सप्तपरान्पुनात्युभयत इति शौनकः॥ ॥
प्राजापत्यश्चतुरः॥२२॥ ॥प्राजापत्ये भवः प्राजापत्यः सद्यावरेहो परो दातारं च पंचमं पुनाति। षट् षट् कायोढजः
सुत इति मनुः। अष्टावरानष्टपरान्पुनात्युभयत इति शौनकः। गांधर्वादिषु फलावचनं दुष्टतामभिप्रेत्य तदा
ह मनुः। इतरेषु तु शिष्टेषु नृशंसानृतवादिनः। जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुता इति॥ ॥ब्राह्मेण विवाहेन कन्यां
ददद्ब्रह्मलोकं गमयति॥२३॥ उक्तलक्षणेन ब्राह्मेण विवाहेन कन्यां ददद्दाता पूर्वोक्तसंख्याकान्पितॄन्ब्रह्मलोकं
गमयति स्वयं च गच्छतीति वक्ष्यमाणेन संबंधः॥ ॥दैवेन स्वर्गं॥२४॥ ॥दैवेन कन्यां दददुक्तसंख्यान्पितॄन्स्व
र्गं गमयति गच्छति च॥ ॥आर्षेण वैष्णवं॥२५॥ ॥आर्षेण कन्यां दददुक्तसंख्यान्पितॄन्विष्णुलोकं गमयति।

स्यादस्वातंत्र्यहेतुत इति।दातृभिरदानेकस्यैतत्तत्राह॥ ॥स्तत्र्वगुणास्यैवकन्याकुर्यात्स्वयंवरं॥ऋतुत्रयेव्य

तीतेतुप्रभवत्यात्मनःसदा॥४०॥ ॥ऋतवस्त्रीन्तवस्त्रऋतवस्त्रेतिऋतवोवर्षाणितेषांत्रयम्ऋतुत्रयंवर्षत्रयमिति

यावत्।षण्णामृतूनामेकवर्षात्मकत्वादेकशोषेणोपात्रानांत्रित्वान्वयात्।उपास्यैवदातृशासनंप्रतीक्ष्यैवनां

तराऋतुमतीकन्यास्वयमेवस्वसमानजातीयमुत्कृष्टजातीयंवावरंकुर्वीत।यतोवर्षत्रयापगमेकन्यात्रात्मनो

दानेप्रभुर्भवति।यथाहबौधायनः।त्रीणिवर्षाण्यृतुमतीकांक्षेतपितृशासनं।ततश्चतुर्थेवर्षेतुविंदेतसदृशंपतिमि

ति।सदृत्स्पृतुदर्शनेक्रिनापिवर्षत्रयमप्रतीक्ष्यैवदात्रभावेस्वयंवरंकुर्यादितिदर्शयति।तदाहयोगी।गम्यंत्वभावे

दातृणांकन्याकुर्यात्स्वयंवरमिति।यद्वत्रुत्रयंऋतोदर्शनत्रमितितन्नबौधायनविरोधात्।इदंचब्राह्मणातिरि

क्तविषयः।स्वयंवराभावेकयमित्यतत्राह॥ ॥पितृवेश्मनियाकन्यारजःपश्यत्यसंस्कृता।साकन्यावृषली

ज्ञेयाहरंस्तांनविडुष्यति॥४१॥ ॥याकन्यानूढैवपितृगृहेरजस्वलाभवेत्सावृषलीतद्धर्तुःपातकंराजदंडो

वानास्तिसजातीयानुलोमावाचेत्।सकामास्वनुदोषस्त्वन्यथादमइतियोगिस्मरणात्अदोषाभावव

वि॰टी२५

२५०

वेनं हरणाभट्तुज्ञानार्थं। रजस्वला तु या कन्या पितृवेश्मनि तिष्ठति। पित्रादयो न्यकृंतिहरेत्ताम् विशंवि
नइति ब्राह्मात्। इदमप्यब्राह्मणविषयं। यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः। स ततं सूतकं तस्य ब्रह्महत्या
दिने दिन इति ब्राह्मणस्य दोषश्रवणात्। एतेन यत्करोत्येकरात्रेण वृषलीसेवना द्विजः। तद्भैक्षभुग्जपन्नित्यं त्रिभि
वर्षैर्व्यपोहतीति द्विजपदं व्याख्यातं॥ ॥इति श्री विष्णुस्मृतिविवृतौ श्रीमत्यां वैजयंत्यां
चतुर्विंशोऽध्यायः॥२४॥ ॥विवाहानंतरं स्त्रीधर्मान् पृथग्विशेषेनाभिधातुं प्रतिजानीते॥ ॥अथ स्त्रीणां धर्माः॥
॥१॥ ॥अथ विवाहानंतरं विवाहादेव स्त्रीणां धर्माधिकारात् वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृत
इति स्मरणात्। स्त्रीणामविशेषेण सर्वासां धर्माः कर्त्तव्यानुच्यंत इति शेषः॥ तानाह॥ ॥भर्तुः समानव्रतचारि
त्वं॥२॥ ॥भर्तुः व्रतेन भर्तृसंकल्पानुसरणशीलास्यादित्यर्थः। मदेति रक्षां दात्वा स्त्रीभिर्भर्तृवचः कार्यमेष ध
र्मः परः स्त्रिया इति योगिस्मरणाच्च॥ ॥श्वश्रूश्वशुरगुरुदेवतातिथिपूजनं॥३॥ ॥श्वश्रूश्वशुरौ प्रसिद्धौ। गुरु
र्ज्येष्ठादिः। देवताः सोमागपदानी गौर्यादिः। अतिथिरध्वनीनः। तेषां पूजनं पादवंदनादिना। कुर्यात् श्वशुरयोः
पादवंदनं भर्तृतत्परा इति योगिस्मरणात्। स्त्रीपुंयोगे मिवादतोऽनियममेके इति स्त्रीपुंयोगे जाया पति

समवाये अभिवादतः अभिवादनेऽप्यत्रेऽपि नियममेके मन्यंते। एक इतिवचनाज्ञातमेते नियमएव॥ ॥
सुसंस्कृतोपस्करता॥७॥ ॥सौष्ठवेन संस्कृता अनुलेपनादिभिरुपस्कराः शूर्पादयो यया तथात्वं तथा वशी
खलिखितो। खः पचनभांडानामुपलेपनं सुसंमृष्टगृहद्वारोपलेपनमग्निपरिचर्या गृहांगणवलिकर्म पूर्वो
त्थानजघन्यशायित्वं देवपूजोपकरणसंपादनं पाकक्रियाकौशल्यं व्यंजनपरिष्कारो भर्तृवचनसंपादनं श्वश्रु
रयोरभिवादनं मान्यमाननं वेति। ॥अमुक्तहस्तता॥५॥ ॥वलयाद्यशून्यहस्तता असद्व्ययपराङ्मुखता च। व्य
येयामुक्तहस्तयेति मानवात्॥ ॥गुप्तभांडता॥८॥ ॥अनरामन्यापेक्षया अतिशयेन गुप्तानि गोपितानि भांडा
नि गृहोपकरणानि मुसलोलूखलादिनि यया तथात्वं। भांडसंरक्षणेति शायितयत्नवती त्यर्थः। तथा च हा
रीतः। पतितानि भांडानि गृहोपकरणानि मुसलोलूखलादीनि यया तथात्वं। भांडसंरक्षणेति शायितयत्नव
तीत्यर्थः॥ ॥मूलक्रियास्वनभिरतिः॥९॥ ॥मूलक्रियावशीकरणादिकार्मणान्यत्र अस्य भर्तृद्वेषेति भवति
हारीतस्मरणात्। पानाटनदिवास्वप्नमक्रियाइर्षणं स्त्रियाः इति वार्हस्पत्याच्च अत्र आपन्नः संस्कारान्मार्जनशाल

त्रि १

नादिसंस्कारं यावदक्रियागृहकार्या न भिक्षुभिः। व[illegible]ष्ठोपि न भर्तारि तिष्ठन्त्या दिष्यादिति॥ ॥मंगलार्थं रत
परता॥५०॥ ॥मंगलं हरिद्राकुंकुमांजनादि॥ श्री वारो हस्तयोः पणांवलंबावलेनदीपमिर्वेपिणादि स्त्र्यन्ततत्परता। सा
दस्यादरातच्छील त्वं। तथा च स्कंदे। अथवा मनसि ध्यात्वा पतिं भांडं विलोकयेत्। कुर्यात् कंचनं तांबूलं मंगलाभरणं
युतं। केशसंस्कारकबरीकरकर्णविभूषणं। भर्तुरायुष्यमिच्छंती दूषयेन्न कदाचन सती॥ इति॥ अष्पश्यंगोपि। स्नानाय
श्चैतेषु तथा वेणीबंधानंतरं स्नानादगमादशिरस्कस्नानमवगम्यते। तथा च व्यासः। सधवा सशिरःस्नानं नि
त्यमेव विवर्जयेत्। अन्यत्र मलवद्वाससः स्नानं पर्वणि चेति। शंखोपि। नानुज्ञाता शूद्रादिगृहं गच्छेत्। ताउत्तरीया न त्व
रितं व्रजेन्न परपुरुषमभिभाषेतान्यत्र वणिक्प्रव्रजितवृद्धवैद्येभ्यः। न नाभिं दर्शयेत्। आगुल्फाद्वासः परिदध्यान्न स्तनौ
विवृतौ कुर्यान्न हसेदपावृतं न भर्तारं तद्बंधून् वा द्विष्यान्न गणिकाधूर्ताभिसारिणीप्रव्रजिताप्रेक्षणिकामायामू
लकुहककारिकादुःशीलादिभिः सहैकत्र तिष्ठेत्। संसर्गेण हि चारित्रं दुष्यतीति प्रोषितपतिकाप्रत्याह॥
॥ ॥भर्तरि प्रवसिते प्रतिकर्मक्रिया॥५१॥ ॥भर्तरि प्रत्यो प्रवसिते देशांतरगते। न विद्यते प्रतिकर्मालंकरणं
क्रियाक्रीडादिश्च यस्याः सा तथोक्ता पतिप्रवासे लंकरणादि न कुर्यादित्यर्थः। तदाह योगीश्वरः। क्रीडाश

रीरसंस्कारं समाजोत्सवदर्शनं। हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृकेति हारीतोपि। नप्रोषिते लंकुर्यान्न वेणीं मुंचेदिति वे
णीमोक्षाभावेन केशप्रसादननिषेधः। तदुक्तिमाह मनुः। विधाय प्रोषिते वृत्तिं जीवेन्नियममास्थिता। प्रोषिते त्वविधायैव
जीवेच्छिल्पैरगर्हितैः। शिल्पैः कर्तनादिभिः। शंखलिखितावपि। प्रेंखा तांडव विहार चित्रदर्शनांगरागोद्यानयानविवृतश
यनोत्कृष्टवासो भोजनकंडुकक्रीडाधूपगंधमाल्याप्रोषितभर्तृकाणामनारंभ इति। प्रेंखा दोला। तांडवं नृत्यं विहारः
क्रीडा एषां चित्रानां च दर्शनं। दर्शननिषेधादनुष्ठाननिषेधोर्थसिद्धः। विवृतं निष्प्रावरणं शयनं प्रसाधनादीनामना
रंभोस्वतंत्रादीनामित्यन्वयः।। ।।परगृहेष्वनभिगमनं।।१०।। ।।भर्तर्यप्रवसिते परेषां पितृश्वशुरभ्रातृमातुलादि
व्यतिरिक्तानां गृहेष्वनभिगमनं तत्र भिक्षार्थागमनाभावः। परगृहगमननिषेधात्तत्रवासनिषेधोर्थसिद्ध एवाय। यथाह बृ
हस्पतिः। पित्रा भ्रात्रा सुतेनैव स्त्री चतुष्पथसमाजप्रव्रजितालापोञ्च नाभिगच्छेत्कूपपथसंस्थानं संधिवेलासंचरणं
च वर्जयेदिति हारीतस्मरणान्तप्रकांतमाह।। ।।द्वारदेशगवाक्षेष्वनवस्थानं।।११।। ।।द्वारदेशो द्वारचत्वरं। ग
वाक्षो वातायनं तत्रानवस्थानमस्थिरत्वं। बहुवचनात्कूपपथगृहणं हारीतवाक्यात्। अवस्थानमुपवेशोप

नादिसंस्कारं यावदक्रियागृहकार्यान्निरुक्तिः। व[illegible]ष्ठापि नभर्तारितद्धू भूत्वा दिष्यादिति॥ ॥मंगलाचारत
त्परता॥८॥ ॥मंगलं हरिद्राकुंकुमाञ्जनादि॰श्रीवारो हृदयं वाणींवस्त्रावलेन दीपनिर्वापणादिस्वतत्परता सा
दरादरा तच्छील त्वं। तथा चस्कंदे॥ अथवा मनसि ध्याना पतिभांड्ं विलोकयेत्॥ कुर्यात्सकंचनां वा मंगलाभरणं
युतां केशसंस्कारकवरी करकर्णविभूषणं। भर्तुरायुष्यमिच्छंती इषयेन्न कचित्सती तिाअप्यस्थे गोपि। स्नानाय
तेतु न्या वेणीबंधानंतरं स्नानादगमादशिरस्कं स्नानमवगम्यते। तथा च व्यासः। सधवा सशिरः स्नानं नि
त्य[illegible]विवर्जयेत्। अन्यत्र मलवद्वासस्नी थे धपि च पर्वस्विति। शंखोपि। नागुल्काश्रद्धा त्रिगंधीन्ना उन्नराया न त्व
ति व्रजेन्न परपुरुषमभिभाषेतान्यत्र वणिक्प्रव्रजितवृद्धवैद्येभ्यः। न नाभिं दर्शयेदागुल्फाद्वासः परिदध्यान्न स्तनौ
विवृतौ कुर्यान्न हसेदपावृतं न भर्तारं तद्बंधून्वा द्विष्यान्न गणिकाधूर्ताभिसारिणीप्रव्रजिताप्रेक्षणिका मायामू
लकुहककारिकादुःशीलादिभिः सहैकत्र तिष्ठेत्। संसर्गेण हि चारित्रं दुष्यतीति प्रोषितपतिकाप्रत्याह॥
॥ ॥भर्तरि प्रवसिते प्रतिकर्मक्रिया॥९॥ ॥भर्तरि प्रत्योप्रवसिते देशांतरगते। न विद्यते प्रतिकर्मालंकरण
क्रियाक्रीडादि च यस्याः सा तथोक्ता पतिप्रवासे लंकरणादि स्त्न्यात् नभवेदित्यर्थः। तदाह योगीश्वरः। क्रीडाश

रीरसंस्कारंसमाजोत्सवदर्शनं।हास्यंपरगृहेयानंत्यजेत्प्रोषितभर्तृकेति।हारीतोपि।प्रोषितेलंकुर्यान्नवेणींमुंचेदिति।वे
णीमोक्षाभावेनकेशप्रसादननिषेधः।तदुक्तमाहमनुः।विधायप्रोषितेवृत्तिंजीवेन्नियममास्थिता।प्रोषितेत्वविधायैव
जीवेच्छिल्पैरगर्हितैः।शिल्पैःकर्तनादिभिः।शंखलिखितावपि।प्रेंखातांडवविहारचित्रदर्शनांगरागउद्यानयानविवृतश
यनोत्कृष्टवासोभोजनकंडुकक्रीडाधूपगंधमाल्यप्रोषितभर्तृकाणामनारंभइति।प्रेंखादोला।तांडवंनृत्यं।विहारः
क्रीडा।एषांचित्रतानांदर्शनं।दर्शननिषेधादनुष्ठाननिषेधोर्थसिद्धः।विवृतंनिरावरणंशयनंप्रसाधनादीनामना
रंभोस्वतंत्रादीनामित्यन्वयः॥ ॥परगृहेष्वनभिगमनं॥१०॥ ॥भर्तरिप्रवसितेपरेषांपितृश्वशुरभ्रातृमातुलादि
व्यतिरिक्तानांगृहेष्वनभिगमनं।तत्राभिक्षार्थागमनाभावः।परगृहगमननिषेधात्तत्रवासनिषेधोर्थसिद्धः।एवं।यथाहबृ
हस्पतिः।पित्राभ्रात्रासुतेनैवस्त्रीचतुष्पथसमाजप्रव्रजितालापांश्चनाभिगच्छेत्कूपपथसंस्थानंसंधिवेलासंचरणं
चवर्जयेदितिहारीतस्मरणात्तत्प्रकृतमाह॥ ॥द्वारदेशगवाक्षेष्वनवस्थानं॥११॥ ॥द्वारदेशोद्वारचत्वरं।ग
वाक्षोवातायनंतत्रानवस्थानमस्थिरता।बहुवचनात्कूपपथग्रहणं।हारीतवाक्यात्।अवस्थानमुपवेशोप

लक्षणं। नूखलेन मुसलेन वर्द्धन्यां हेषद्वापि न यंत्रकेन देहल्यां सती चोपविशेत्क्वचिदिति स्कांदात्॥ स
र्वकर्मस्व स्वातंत्र्यं॥१२॥ ॥सर्वेषु नैमित्तिककाम्येषु कर्मसु स्वातंत्र्याभावः। भर्त्राद्यनुज्ञापेक्षेत्यर्थः। बाल
यया वा युवत्या वा वृद्धया वापि योषिता॥ न स्वातंत्र्येण कर्तव्यं कर्म किंचिद्गृहेष्वपीति मनुस्मरणात्। किं वैदि
कमलौकिकं चेति। न त्वेहेवः॥ ॥बाल्ययौवनवार्द्धकेष्वपि पितृभर्तृधीनता॥१३॥ ॥बाल्यादिषु पित्राद्यधीनतानां
यथाक्रममन्वयः। अपिशब्दात्तेषामभावे ज्ञात्यधीनता तेषामप्यभावे राजाधीनतेति। रक्षेत्कन्यां पिता विन्नां पतिः पुत्रास्तु
वार्द्धके। अभावे ज्ञातयस्तेषां न स्वातंत्र्यं क्वचित्स्त्रियाः॥ ॥मृते भर्तरि ब्रह्मचर्यं तदन्वारोहणं वा॥१४॥ ॥पतिमरणानंतरं याव
ज्जीवं ब्रह्मचर्यं। ब्रह्मणि वेदे गृह्यमाणे यदाचर्यते व्रतं तद्ब्रह्मचर्यं तच्च मधुमांसादिवर्जनं ब्रह्मचारिधर्मप्रकरणोक्तमवगंत
व्यं॥ यथाह गौतमः॥ वर्जयेन्मधुमांसगंधमाल्यदिवास्वप्नांजनाभ्यंजनयानोपानहच्छत्रकामक्रोधलोभमोहवादवा
दनहर्षगीतनृत्यपरिवादनभयानीति। भरद्वाजोपि। यावज्जीवं प्रेतपत्न्युदकस्पर्शनमेकभक्तमधःशय्या ब्रह्मचर्यं क्षारल
वणमधुमांसवर्जनं चेति प्राह प्रचेताः। तांबूलाभ्यंजने चैव कांस्यपात्रे च भोजनं। यतिश्च ब्रह्मचारी च विधवा च विव

र्जयेत्॥ एकाहारः सदा कार्यो न द्वितीयः कदाचन। पर्यंकशायिनी नारी विधवा पातयेत्पतिं। गंधद्रव्यस्य संभोगो नैव
कार्यस्तया पुनः। तर्पणं प्रत्यहं कार्यं भर्तुः कुशतिलोदकैः। वैशाखे कार्त्तिके माघे विशेषनियमं चरेत्। स्नानं दानं तीर्थ
यात्रां विष्णोर्नामग्रहं पुनः रिति। तर्पणं पुत्राद्यभावविषयं। तत्र॰ नित्यवत्कुर्वाणा विरोधात्। अपुत्रा पुत्रवत्पत्नी पुत्रवत्
वत्पिभर्त्तरि। श्राद्धं पिंडोदकं कुर्यात्तलमात्रं तु पुत्रिणीति रत्नावलीस्मरणाच्च। स्कांदेपि। विधवा कवरीबंधो भर्तृ
बंधाय जायते। शिरसो वपनं कुर्यात्। नैवांगोद्वर्तनं कार्यं स्त्रिया विधवया क्वचित्। नाधिरोहेदनड्वाहं प्राणैः कंठगतै
रपि। कंचुकं न परीदध्यान्न वासो विकृतं वसेदिति। विकृतं मांजिष्ठादि। तद्दाहे अग्निनिर्णयमाह हारीतः। आहिताग्निश्चेत्प्र
मीयेत तदोपासनावह्निना अग्निं परिगृह्य सभार्याग्निभिस्तु सवनमिष्ट्वा वसेद्भर्तुः पितुः रक्षस्तस्य वा गृहमाश्रित्येति। अदोषा
निर्नं मृतमाहिताग्निं त्रेताग्निना दग्ध्वा तत्पत्न्योपासनावह्निना तद्दाहः। विधुरस्याहिताग्नेरप्येवमेव। तदाह भरद्वाजः। त
योः पूर्वो म्रियेत यजमानः पत्नी वा तस्याग्निहोत्रेणायां पितृमेधः संपद्यते। यः पश्चात्तस्योपासनेनेति। तस्य च परिचरणेनि
त्यं कार्यं स्त्री चेदेवं भर्तरि प्रमीतइति भरद्वाजस्मरणात्। परिच्छेदित्वेषत्स्मृते। अनाहिताग्नेः पत्नीप्रत्याह हारीतः। अन

वि॰टी॰२५
२५३

हिताग्निश्चेदन्यस्मादथाजनाग्निं वा परिगृह्येति। उभौ येनेत्यनुषंगः। तदा तत्पत्नी स्वगृह्योक्तविधिनान्यमग्निमादध्या
त्। आजनाग्निं लौकिकं वा परिगृह्य परिचरेत्। निर्मथ्यमिति भरद्वाजः। औपासनेनानाहिताग्निं दहंति निर्मथ्येन पत्नीमि
ति। सर्वो वाग्निपत्न्यपित्रेताग्निभिः पतिं दग्ध्वा निर्मथ्यं परिचरेदाजीवनमंते तेनैव तद्दाहः। निर्मथ्येन पत्नीमिति भरद्वा
जस्मरणात्। तत्र तदन्वारोहणं वा तत्पतिमृतकुलदेपत्रारोहणमग्नेः। न तु पश्चात् पत्न्यवरोपो विशेषवाधकसंगात्। १ थ कीर्ति
समासृष्टि न विप्रा गंतुमर्हतीति स्मरणात्। ऐच्छिकोयं विकल्पः। अन्वारोहणे महानभ्युदयः। नैमित्तिकाम्यत्वात्। जा
तिश्चैवं। तत्र गर्भिणी नाम बालापत्या नामा चांडालेस्मा धारणे धर्मः। बाले संवर्द्धने उक्त्वा बालापत्या न गच्छति।
रजस्वला सूतिका चैव रक्षेद्गर्भिणी तिष्ठहस्यादिति स्मरणात्। अख्यास्तोपि। दिनैकमदेशस्या साध्वी चेत्तावत्तन्निश्चयान्
दहेत्स्वामिनं तस्या यावद्गमनं भवेत्। बृहन्नारदीयेपि। बालापत्याश्च गर्भिण्यो ह्यदृष्टरजसस्तथा। रजस्वला राज
सुते नारोहंति चिताशनमिति। राजसुते इति संबोधनं सगरमातुरिति शाख्या। गर्भिण्या अन्वारोहणे गर्भहननप्रत्य
वायः। गर्भिणी गर्भहननप्रत्यवायेन दुष्यतीति स्मरणात्। वाराच्यत्रिभिजात्यावा स्त्रीणां चैवैकद इति बोधायनस्मरणात्

२

स्त्रियाः स्मृतौ वा शास्त्रे वा प्रज्ञाना विधीयत इति याम्यादेकीयत्वोपपत्त्वोपन्यासः॥ ॥नास्ति स्त्रीणां पृथग्यज्ञो न
व्रतं नाप्युपोषितं। पतिं शुश्रूषते यत्तु तेन स्वर्गे महीयते॥ २५॥ ॥यज्ञो महादानादिः। व्रतं कृच्छ्रचांद्रायणादि। उपोषितं मा
सोपवासादि। एतानि पृथक्स्वातंत्र्येण भर्त्राज्ञापालनापूर्वेणैव स्वर्गे महीयते भोगभाग्भवति न स्वातंत्र्यानुष्ठितैस्तैः
तथा चान्वयव्यतिरेकाभ्यां मत्स्यमार्कंडेयावाहतुः। न व्रतेनोपवासेन धर्मेण विविधेन वा नारी स्वर्गमवाप्नोति प्रति
पूजनात्। नारी खल्वननुज्ञाता भर्त्रा पित्रा सुतेन वा निष्फलं तु भवेत्तस्या यत्करोति व्रतादिकमिति। पृथग्व्रतादिनिषेधे हे
तुमाह॥ ॥पत्यौ जीवति या योषिदुपवासव्रतं चरेत्। आयुः सा हरते भर्तुर्नरकं चैव गच्छति॥ २६॥ ॥या जीवद्भर्तृका स्वा
तंत्र्येणोपवासरूपं व्रतं चरेत्तयोः समाहारस्तं कुर्यात्सा भर्तुरायुर्हरते तत्पुण्येन नरकभाक् भवति। अनुज्ञया तु न दोषः। ननु
ब्रह्मचर्यान्वारोहणयोः कथं विकल्पो ब्रह्मचर्यस्य नैमित्तिकत्वादन्वारोहणे च फलश्रवणेन काम्यतया विषम
शिष्टत्वादित्यत आह॥ ॥मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता। स्वर्गं गच्छति। न च पुत्रा या ब्रह्मचर्यमात्रे
णैकं यं स्वर्गमित्यत आह। यथा ते नैष्ठिकब्रह्मचारिणो अपुत्रा अपि ब्रह्मचर्येणैव स्वर्गभाजस्तथा साप्यपु

226

वि॰टी॰२६
२५४

वारस्वर्गमाप्नोति॥ अयं च हष्टांतो मनुना स्पष्टीकृतः। अनेकानि सहस्राणि कौमारब्रह्मचारिणां। दिवं गतानि वि
प्राणामकृत्वा कुलसंततिमिति॥ ब्रह्मचर्येण स्वर्गं गच्छंतीत्येव वक्तव्ये यदपुत्रा पीत्युक्तं तन्नापुत्रस्य लोकोस्तीति श्रुत्या
कर्णनभ्रांत्यविन्नयापत्यार्थं नयतितच्चमित्येतदर्थं। तथा च मनुः। अपत्यलोभाद्यातु स्त्री भर्तारमतिवर्तते। सेह निंदामवा
प्नोति पतिलोकाच्च हीयत इति॥ तस्मात्पुत्रोत्पत्त्या गृहस्थानामेव स्वर्गो न विधवादीनां। तत्र च पुत्रोत्पत्तिनिरपेक्षस्य ब्र
ह्मचर्यस्यापि स्वर्गसाधनतया तुल्यफलकत्वाद्विकल्पोयुक्तः॥ ॥इति श्री   विद्वत्तो श्रीमत्यां वैजयं
त्यां पंचविंशोध्यायः॥ ॥स्त्रीधर्मप्रसंगेन सवर्णासवर्णस्त्रीधर्मान् षड्विंशेनाह॥ ॥सवर्णासु बहुभार्यासु विद्यमाना
सु ज्येष्ठया सह धर्मकार्यं कुर्यात्॥ १॥ ॥सवर्णानेकभार्यासमवाये ज्येष्ठेव सह धर्मचारिणी प्रभुः। ज्येष्ठापवादमाह॥ ॥मि
श्रासु च कनिष्ठयापि समानवर्णया॥ २॥ ॥मिश्राणां सवर्णासवर्णसमवायः। तत्र कनिष्ठापि सवर्णैव सह धर्मचारिणी न
ज्येष्ठाप्यसवर्णा। चकारात्सवर्णज्येष्ठाव्यपेक्ष्यपि सवर्णकनिष्ठाधिकारिणीति। समानवर्णायाअभावे त्वनंतरयैवापदि॥ ३॥
सवर्णाभावे आपदि च सवर्णा प्रतीक्षणे प्रधानबाधप्रसंगे चानंतरैव विप्रस्य क्षत्रियैव क्षत्रस्य वैश्यैव नैकांतरा द्व्यंतरा वा। विप्रस्यैकांत

रान्यत्तद्दर्शनायाह ॥ ॥ नत्वेव द्विजः शूद्रया ॥४॥ ॥ द्विजस्य विप्रादेः शूद्रा सहधर्मचारिणी नैव । विप्रस्यानन्तरा नियमेनैव
गम्यते । स चायमापत्कल्पः । तर्हि किमर्थं शूद्रापरिणयनं द्विजस्येत्यत आह ॥ ॥ द्विजस्य भार्या शूद्रा तु धर्मार्थे न भवेत्क्वचि
त् । रत्यर्थमेव सा तस्य रागान्धस्य प्रकीर्तिता ॥५॥ ॥ द्विजस्य त्रैवर्णिकस्य शूद्रा क्वचिदापद्यनापदि च धर्मार्थे न भवति किं
तु रागातिशयेन रत्यर्थमेव कामवरः । पुत्रार्थता प्रतिषेधार्थः । तत्रात्मा जायते स्वयमिति स्मरणात् । सहाधिकारक धर्मस्य पूर्वेणैव
निषेधात्पुनर्वचनमाश्रमधर्मे निषेधार्थं पुत्रार्थं तदुद्वाहे फलमाह ॥ ॥ हीनजातिं स्त्रियं मोहादुद्वहन्तो द्विजातयः । कुलान्येव नय
न्त्याशु ससन्तानानि शूद्रताम् ॥६॥ हीनजातिं शूद्रां स्त्रियं मोहादुक्तदोषाज्ञानादुद्वहन्तो द्विजाः ससन्तानानि सान्वयानि कु
लान्येवाशु पुरुषसंख्यामनपेक्ष्यैव शूद्रत्वं प्रापयन्ति । धर्मनिषेधे धर्मशब्दार्थमाह ॥ ॥ दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु
नाश्नन्ति पितृदेवास्तु न च स्वर्गं स गच्छति ॥७॥ ॥ यस्य द्विजातेस्तत्प्रधानानि सैव शूद्रा प्रधानं सर्वोपक्रमित्रं श्राद्धादि आतिथे
यमतिथिसत्कारादि तस्य पितृदेवा वह्निवचनादतिथयश्च तदुपक्लृप्तं नैवेद्यपिण्डभोजनादि नाश्नन्तीति कर्मस्वर्गमप्यसौ न गच्छ
तीति फलाभिसन्धिः ॥ ॥ इति श्री

विष्णुस्मृतिविवृतौ श्रीमद्वैजयन्त्यां षड्विंशोऽध्यायः ॥ ॥

एवं विवाहं तत्प्रसक्तानुप्रसक्तं चाभिधायेदानीं तदनंतरभाविनो गर्भाधानादिसंस्कारानाह॥ गर्भस्येत्यस्यष्टता ज्ञा-
त्वा निषेको गर्भाधानाख्यं कर्म कार्यमिति संबंधः। इदं च क्षेत्रसंस्कारत्वात्सकृदेव कार्यं। अथ चानुमत्याः प्राजापत्यमृ-
तो प्रथम इति। यद्यपि निषेकाद्याः श्मशानांतास्तेषां वै मंत्रतः क्रियाः। निषेकाः श्मशानांतो मंत्रैर्यस्योदितो विधिः
यस्येत्येवं तावच्छ्रौतसंस्कारा इत्यादिभिर्योगिमनुगौतमादिभिर्वाक्यैर्गर्भाधानस्य गर्भसंस्कारत्वमवगम्यते तथा-
पि जायाया दक्षिणेनासारंभे सिंचेत्तु तद्रसो उदरस्थे रसे तस्मिन्नावातसलिलो सतो। उपगच्छेद्दशमे वं गर्भसंस्का-
रता भवेत्। विष्णुर्योनिं कल्पयत्विति योनिं स्पृष्ट्वा त्रिभिर्व्रतीत्यादि शौनकादिवाक्येषु हितः यानि दृष्टत्वेन च बोधादिसंस्कारत्व-
मेवोचितं। अन्यथा प्रतिगर्भमावृत्त्यापत्तेः। यत्त्वाधानेनाग्नेरिव गर्भस्य संस्कार इति तन्न प्रागाधानाद्भिन्नो गर्भस्ये-
वासिद्धा संस्कारासंभवेन दृष्टांतवैषम्यात्। मन्वादिवाक्यानं स्मरणादिबले॥ ॥स्पंदनात्पुरा पुंसवनं॥२॥ ॥स्पंद-
नं गर्भस्य चलनं तच्च चतुर्थे मासि भवति तस्माच्चतुर्थे मासि चलनादर्वाग्भिप्रायं करोतीति शारीरकातं तस्मात्पुरा प्रागेव
द्वितीये तृतीये वा मासि द्वितीये गर्भे द्वितीये वा तृतीये वा मासि पुंसवनं भवेदिति जातूकर्ण्यस्मरणात्। पुंसवनं गर्भस्य-

पुंरूपतापादकं कर्म। इदं च प्रतिगर्भमावर्त्तनीयं गर्भसंस्कारत्वात्। तस्मात्पुंसवनं संस्कारः प्रतिगर्भं प्रवर्त्तत इति शौन
कस्मरणात्। एतेन पुंसवनस्य क्षेत्रसंस्कारतया सकृत्करणं मन्यमानो विज्ञानेश्वरोऽपि परास्तः। यत्तु सीमंतो
न्नयनं पुंसवनवत्प्रथमगर्भ इति पारस्करवचनेन व्याख्याधारत्वेन प्रतीयते तत्रापि पुंसवनवदित्यतिदेशेन सकृ
त्करणप्रापणार्थः। पुंसवनसूत्रे एव तदनभिधानात् किंतु पुंसवनीयपुंनक्षत्ररूपकालातिदेशार्थ इति तद्भाष्यीय
धारव्याख्यानोदितफलं हृद्गमर्मभेदनेन॥ ॥षष्ठेऽष्टमे सीमंतोन्नयनं॥३॥ ॥गर्भग्रहणमासात्षष्ठेऽष्टमे वा मासि सीमंतो
न्नयनं सीमंतउन्नीयते यस्मिन्कर्मणि तत्तद्यथाकुलधर्मं विकल्पः। अस्य च क्षेत्रसंस्कारत्वमेके मन्यंते। सकृत्सं
स्कृतसंस्काराः सीमंतेन द्विजस्त्रियः। यं यं गर्भं प्रसूयंते स सर्वः संस्कृतो भवेदिति हारीतस्मरणात्। गर्भसंस्कार
त्वमपरे सीमंतोन्नयनं कर्मेन स्त्रीसंस्कार इष्यते। गर्भस्यैव तु संस्कारो गर्भे गर्भे प्रयोजयेदिति विष्णुस्मरणात्॥ ॥जा
ते च दारके जातकर्म॥४॥ ॥दारके कुमारे जाते गर्भकोशान्निर्गते सति जातकर्म जातकर्म मधुसर्पिर्हिरण्यनिक
षाणां हिरण्येन प्राशनं॥ ॥अशौचव्यपगमने नामधेयं॥५॥ ॥विप्रादीनां स्वस्वाशौचव्यपगमोत्तरदिने नामधेयं न

मकरणं। जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे पितानामकरणमिति परिशिष्टात्। दशरात्रस्याशौचोपल
क्षणं। नात्र दशरात्रस्याशौचांतत्वं क्षत्रियादिविषयमेवाह। जन्मनो दशमे वापि द्वादशे वापि तत्पुनः। विप्राणां नाम
कर्म स्यादाशौचांते तु शेषयोः। शूद्राणामपि चैवं स्यात्तत्तन्नाम सतामपीति॥ नाम्नि विशेषमाह॥ ॥मांगल्यं ब्रा
ह्मणस्य॥३१॥ ॥मंगलाय साधु मांगल्यं मंगलं नामोदर्कसुद्धिरूपकं वस्तु। तदभिधानमेव शब्दस्य तत्त्वं तादृशं
ब्राह्मणस्य नाम कार्यं। यथा लक्ष्मीधर इत्यादि। मांगल्यग्रहणात्कालशर्मादिव्युदासः॥ ॥बलवत्क्षत्रियस्य
॥७॥ ॥बलवद्बलपर्यायशब्दार्थोपेतं वैश्यस्य। यथार्थपतिरिति॥ ॥जुगुप्सितं शूद्रस्य॥१०॥ ॥जुगुप्सितं गर्हितं शू
द्रस्य। यथा लोकदास इति। यद्वा मंगलसुखादिपर्यायः शर्मादिशब्दस्तत्संबंधमात्रमुपपदीभूतमिति यावत्। ता
दृशं विष्णुशर्मेति ब्राह्मणस्य। बलं बलसाधनं वर्मादि तद्युक्तं क्षत्रियस्य भीमवर्मेति। धनं पुष्टं तदुपेतं इति। मंगला
दिपर्यायाणामानंत्येपि मानवो नियमः। शर्मांतं ब्राह्मणस्योक्तं वर्मांतं क्षत्रियस्य तु। पुष्टांतं वैश्यजातेस्तु दासांतं
शूद्रजन्मनः इति। ब्राह्मणादिपदेषूपलक्षणस्योद्देश्यगतत्वादविवक्षाते ने ततस्त्रीणामपि तन्नियमः॥ तथा वा

श्वलायनः॥ ततः स्त्रीणां तयात येति॥ न येति शर्माद्यंतं॥ तस्य च ह्रीत्वे पि मन इति नांतलक्षणस्य ङीपः प्रतिषेध
ङ्गार्गी शर्मेत्यादि पुंवत्प्रयोगः॥ डाबुभाभ्यामिति डाबंतत्वे टावंत वङ्गार्गी शर्मामित्यादिरिति विशेषः॥ विशेषांतरं चा
ह स एव युग्मानि त्वेव पुंसामयुजानि स्त्रीणामिति॥ युग्माक्षराणि पुंसामयुजानि स्त्रीणामिति॥ देवालयगजाश्व
नां हृद्यानां वापि कूपयोः॥ सर्वापणानां श्रेष्ठानां विप्राणां योषितां नृणां॥ काव्यादीनां कवीनां च पश्वादीनां विशेषतः॥
गजप्रासादयज्ञानां नाम कर्मयथोचितमिति स्कांदात्॥ ॥ चतुर्थे मास्यादित्यदर्शनं॥ १०॥ ॥ सूत्रद्वयमिदं साकांक्ष
मन्यत्तः श्रीकांतेन तत्र स्वजन्मतश्चतुर्थे मासि गर्भागाराच्छिशुं बहिष्कृत्य चंद्रदर्शनं कारयेत्॥ तृतीये मासि बहिः कृ
त्यादित्यदर्शनं कारयेदिति॥ यथाह यमः॥ ततस्तृतीये कर्तव्यं मासि सूर्यस्य दर्शनं॥ चतुर्थे मासि कर्तव्यं शिशोश्चंद्रस्य द
र्शनमिति॥ ॥ षष्ठेन्नप्राशनं॥ ११॥ ॥ जन्मतः षष्ठे मास्यन्नस्य प्राशनं कार्यं॥ तदभावेष्टमादौ॥ जन्मतो मासि षष्ठे स्यात् सौ
रेणोत्तममन्नदं॥ तदभावेष्टमे मासे नवमे दशमे पि वा॥ द्वादशे वापि कुर्वंति प्रथमान्नाशनं द्विजाः॥ संवत्सरे वा संपूर्णे
केचिदिच्छंति पंडिताः इति नारदस्मरणात्॥ नवम इति कन्याभिप्रायेण न रत्या न्नाशने युग्मं स्त्रीणां चान्नाशने युजमिति

गर्भस्मरणात्॥ ॥तृतीये ह्रे चूडाकरणं॥१३॥ ॥एता एव जातकर्मादिकाः क्रियाः स्त्रीणां कन्यकानाममंत्रकाः मंत्र
रहिताः कार्याः॥ यद्यप्येतच्छंदेन प्रक्रांतानां गर्भाधानादीनाममपि परामर्शः संभवति तथापि तदानीं गर्भस्य स्त्रीत्वा
निश्चयादविज्ञाता हि गर्भाः पुमांसो भवंतीति न्यायेन नामंत्रत्वं॥ अस्त्रु तु हि गर्भसंस्काराणां तु तत्कथं स्कादिवि
वाहमात्रे समंत्रत्वापत्तेः॥ एतदेव स्पष्टयितुमेवकारः॥ कुमारी नाभिति वक्तव्ये स्त्रीग्रहणं स्त्रीनपुंसके संस्काराभा
ववोधनाय॥ न मंत्रोन्मत्तमूकपंगुकुब्जवामनांधबधिराद्र संस्कुर्यादिति शंखेन सामान्याभिधानात्॥ समंत्रत्वे वधि
माह॥ ॥तासां समंत्रको विवाहः॥१४॥ ॥तासां स्त्रीणां विवाहमारभ्य संस्का[illegible]रः समंत्रकः॥ ॥गर्भाष्टमे ह्रे ब्राह्म
णस्योपनयनं॥१५॥ ॥गर्भधारणमारभ्याष्टमिति कात्यायनस्मरणात्॥ गर्भाष्टमं जन्माष्टमोपलक्षणं॥ गर्भाष्टमे
ष्टमे ह्रेवाब्दे[illegible] स्मरणात्॥ ॥गर्भैकादशे राज्ञः॥१६॥ ॥राज्ञः क्षत्रियस्य गर्भैकादशे ध्रसेके विशामिति स्मर
णात्॥ नियोयं कालः काम्यमाहापस्तंबः॥ अथ काम्यानि सप्तमे ब्रह्मवर्चसकाममष्टमआयुःकामं नवमे तेजस्का
मं दशमेन्नाद्यकाममेकादशे इंद्रियकामं द्वादशे पशुकाममुपनयेदिति॥ अयं चैवर्णिकसाधारणोऽविशेषात्॥

ब्राह्मणादीनामिति तु सप्तमादीनां नित्यकाम्यत्वसंयोगपृथक्त्वन्यायात्। आगर्भाष्टमात्काम्यकालमाह म
नुः। ब्रह्मवर्चसकामस्य कार्यो विप्रस्य पञ्चमे। राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोऽष्टम इति॥ ॥तेषां मुंजज्याव
ल्वजमय्यो मौञ्ज्यः॥१८॥ ॥तेषां ब्राह्मणादीनां मुंजइषीकात्वक्ज्यामूर्वा बल्वजो दीर्घस्तृणजातिस्तन्मयते।
बल्वजः शणस्तत्रा विलोलोपलक्षणं। शणतांतवा मौञ्जी मेखला त्री वी वैश्यस्येति मनुगौतमाश्वलायनस्मरणात्
मेखला इति वक्तव्ये मौंजीग्रहणं ज्याद्यभावे सर्वेषां मुंजप्राप्त्यर्थं। सर्वेषां वा मौंजीति शंखस्मरणात्॥ ॥कार्पास
शाणाविकान्युपवीतानि वासांसि वा॥१९॥ ॥कार्पासं तूलं शाणः शणत्वक्सूत्रं विस्तलोमेतन्निर्मितं वक्षत्रिय
स्यकौशेयं वैश्यस्येति। कार्पासं वा सर्वेषामिति गौतमः। उपवीते पोतत्समानं कार्पासं वोपवीतं सर्वेषामिति
पैठीनसिस्मरणात्॥ ॥मार्गवैयाघ्रवास्तानि चर्माणि॥२०॥ ॥मृगः कृष्णः व्याघ्रो द्वीपी वस्तः छागस्तेषां
चर्माणि क्रमेण। मनुः क्षत्रियस्यैरवमाह। गव्यं वस्ताजिनं वा वैश्यस्येति वसिष्ठः। सर्वेषां वा गव्यमिति पारस्क
रः। वस्त्राजिनयोः परिधानोत्तरीयत्वेन विनियोगः। तत्रादौ परिधानार्थं कल्पयेत्तत्र वस्त्रकं। यथोक्तमजिनं

वि॰टी॰२७
२५८

पिकल्पयेद्द्वेगुंठनमितिशौनकस्मरणात्॥ ॥पालाशखादिरौदुंबरादंडाः॥२१॥ ॥पलाशः किंशुकः खदिरो गायत्री
उडुंबरो जंतुफलस्तन्मयावादंडाः क्रमेण। मनुस्तु बिल्ववटपैलवाह॥ शौनकस्त्वौडुंबरः क्षत्रियस्य वैल्वो वैश्यस्ये
त॥ ॥केशांतललाटनासादेशतुल्याः॥२२॥ ॥केशांतदेशो निःक्षेशतोपलक्षितो ललाटांतः। ललाटदेशो भ्रूमध्यं ना
सादेशो नासाग्रंतत्तुल्याः स्युर्यथा भूतलमारभ्य क्रमेण॥ ॥सर्वएववा॥२३॥ ॥सर्वेषां सर्वएव वा दंडा भवंति उक्ता
नुक्तास्त्वा। सर्वेवा सर्वेषामिति शौनकः। एतेषामपलाभे तु सर्वेषां यज्ञियाः स्मृता इति यमः। वाक्षों वा दंड इत्यवर्ण
संयोगेनेति पारस्करः॥ ॥अकुटिलाः सत्वचस्च॥२४॥ ॥आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्त्तते। आद्वाविंश
त्क्षत्रबंधोरा चतुर्विंशतेर्विशः॥२६॥ ॥षोडशाद्वाविंशचतुर्विंशानिवर्षाण्यभिव्याप्य ब्राह्मणादीनां यथाक्रम
मुपनयनकालो नात्येति। आङ् यमभिविधौ न मर्यादायां। औपनायनिकः कालः परषोडशवार्षिकः। द्वाविंशतिः
परोन्यस्य चतुर्विंशतिमः पर इति व्यासस्मरणात्। सावित्री ग्रहणं गायत्र्यादीनियम प्राप्त्यर्थं। गायत्र्या ब्राह्मणमुप
नयीत त्रिष्टुभा राजन्यं जगत्या वैश्यं सर्वेषां वा गायत्रीति कात्यायनः। तथाह शातातपः। तत्सवितुर्वरेण्यमिति गा

२५८

यत्री ब्राह्मणस्य देवस्सवितृ इति त्रिष्टुभा राजन्यस्य विश्वा रूपाणीति जगती वैश्यस्येति। अथ व्रात्यतिक्रममाह॥
अतऊर्ध्वं त्रयोप्येते यथाकालमसंस्कृताः। सावित्रीपतिता व्रात्या भवंत्यार्यविगर्हिताः॥३७॥ ॥अतो गर्भाज्जन्म
तो वर्षात्षोडशद्वाविंशचतुर्विंशवर्षाद् ऊर्ध्वमेते ब्रह्मक्षत्रविशो यथाकालमविधिमंत्रअसंस्कृताः सावित्रीतः पतिता उप
नयनायोग्याः आर्याणां त्रैवर्णिकानां विगर्हिताः। निंद्या व्यवहारायोग्या इति यावत्। व्रात्यसंज्ञा भवंति। उपनयन
धर्मानतिदेशमाह॥ ॥यद्यस्य विहितं चर्म यत्सूत्रं या च मेखला। यो दंडो यच्च वसनं तत्तदस्य व्रतेष्वपि॥३८॥ ॥यानि ब्रा
ह्मणादीनां चर्मयज्ञोपवीतमेखलादंडवस्त्राण्युपनयने विहितानि तान्येव तेषां व्रतेषु महानाम्न्यादिषु भवंति
तेषामपि वेदाध्ययनांगोपनयनवन्महानाम्न्याद्यध्ययनांगोपनयनत्वात्॥ ॥मेखलामजिनं दंडमुपवीतं
कमंडलुम्। अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मंत्रवत्॥३९॥ ॥मेखलाजिनदंडोपवीतकमंडलून्विनष्टान
प्सु प्रास्य ब्रह्मचारी मंत्रपूर्वकमन्यानि गृह्णीयात्। ब्रह्मचर्यांगत्वात्तद्धारणस्य प्रतिपत्तिविधानादेवानुक्तस्यापि
कमंडलोः पूर्वग्रहणमवगम्यते। यथाहाश्वलायनः। अछिन्नान्धारयेन्नित्यं दंडाजिनकमंडलूनिति॥ ॥इति

श्री विष्णुस्मृतिटीकायां श्रीमत्यां वैजयंत्यां सप्तविंशोऽध्यायः ॥ ॥ अष्टाविंशेन ब्रह्मचा
रिधर्मानाह ॥ ॥ अथ ब्रह्मचारिणां गुरुकुलवासः ॥१॥ ॥ अथोपनयनानंतरं ब्रह्मचारिणां त्रैवर्णिकानां गुरोर
ध्यापकस्य कुले अध्यापकगेहे वा सन्निधि तिरध्ययनार्थं विधीयते गुरुरत्राध्यापकः। अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः।
तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तयेति स्मरणात्। न पितैव तत्राध्ययनाभावे दृष्टस्य निरदृष्टार्थताव च
स्यात्। गुरुं चैवाप्युपासीत स्वाध्यायार्थमिति गुरुकुलवासस्य दृष्टार्थत्वात्। एवं चाचार्यकुलवासस्मरणात्॥ यदा तु
पितैवाध्यापयति तदाप्यध्यापकत्वमेव गुरुत्वे निमित्तं न पितृत्वं। कुलं च शिष्यसमूहः। शौनकस्य कुलपतेरि
त्यादिदर्शनात्। तान्यावत्समर्थ्यते शिष्याणां दशसाहस्रीयोऽध्यापयति नित्यशः। संभावयति चान्नाद्यैः सो कुलपतिः
स्मृति॥ ॥ संध्याद्वयोपासनं ॥२॥ ॥ संधिरहोरात्रयोरुपक्रमावसाने। तत्र विहिता क्रिया संध्या। तयोर्द्वयं सायं प्रा
तः कालभेदात्। तस्योपासनमनुष्ठानं ब्रह्मचारी कुर्यादिति विधीयते। यद्यप्यहरहः संध्यामुपासीतेत्याश्रमविशे
षादरेण निहितं तथापि द्वयोपक्रमस्योपनयनानंतरं यत्नेनीय ब्रह्मचारिप्रकरणे समारंभः। उपायनादिमारभ्य सायं

प्रातस्त्वकालयोरितिप्रजापतिस्मरणात्। द्वयपदात्तृतीयानावश्यकीतिगम्यते। उभे संध्येनुकर्त्तव्ये ब्राह्मणैः स्वगृ
हेष्वपीत्यत्रिस्मरणात्॥ ॥पूर्वां संध्यां जपेत्तिष्ठन् पश्चिमामासीनः॥३॥ ॥पूर्वां सूर्योदयकालीनां संध्यां प्रागुदया
द्विप्रस्य द्विमुहूर्त्तकः। क्षत्रियस्य तदर्द्धं स्याद्विशोप्युत। अर्द्धास्तमयवेलादि सायं नक्षत्रदर्शनात्। विप्रादीनां त्रया
णां तु सामान्यकेवनेत्यत्रिस्मरणात्। तामभिव्याप्य द्वितीययात्यंतसंगात्तिष्ठन् स्थित एव पश्चिमां सूर्यास्तमय
कालीनामासीन एव गायत्रीं जपेद्यावत्स्वर्यं नक्षत्रदर्शनं। जपन्नासीत सावित्रीं प्रत्यगातारकोदयात्। संध्यां प्रा
क्प्रातरेवं हि तिष्ठेदासूर्यदर्शनादिति योगिस्मरणात्॥ ॥कालद्वयमभिषेकाग्निकर्मकरणं॥४॥ ॥कालद्व
यं सायं प्रातस्ताभ्यामितः सेकोभिषेकः परिसमूहनपर्युक्षणेन स्नानं तत्पूर्वकमग्नौ कर्मसमित्प्रक्षेपस्तत्क
रणं। अग्निकार्यं च निद्रायाः प्राक् पूर्वं वा तदिष्यते पर्यूहनोक्षणे स्यातामादावंते च कर्मण इति यमस्मरणात्। काल
द्वयासंभवे सायमेवेत्यापस्तंबः। सायमेवाग्निपूजेत्येक इति॥ ॥अप्सु दंडवन्मज्जनं॥५॥ ॥अप्सु जलाशये दंड
वत्स्नानीयमंत्रवर्जमेवमज्जनमाप्लवः। अश्वित्यनेनोद्धृतोदकनिषेधः। अर्जीवस्नानाभ्यंजनवर्ज्जीतिवसि

ष्ठस्मरणात्॥ अंजलीवत्सुहृतोदकं। मज्जनमित्यनेनांगघर्षणादिनिषेधः। नाप्सुश्लाघमानः स्नायादित्यापस्तंबः
स्नायमेवाभिस्नुवीयात्। गोदानाद्येवस्नानमित्येके। एके गोदानादिति गौतमस्मरणात्। नित्यस्नानस्यैवा
यंप्रतिषेधो न नैमित्तिकस्य प्रकरणात्। तस्येकवारमेव सकृत्तु ब्रह्मचारिण इति कात्यायनीयात्। त्रिषवणं स्ना
यीत च सदाशुचिरित्याश्वलायनस्मरणात्। नैष्ठिकानां तु नित्यं त्रिषवणे स्नात्वा योऽग्नयेधेव। तदाज्ञया त्रिषवणं स्नायीत
च सदाशुचिरित्याश्वलायनस्मरणात्। नैष्ठिकानां तु नित्यं त्रिषवणं। चिरज्ञोऽप्सुपेयादप इति वसिष्ठस्मरणात्॥
॥ ॥आहूताध्ययनं॥ ६॥ ॥गुरुणाहूतेनाध्ययनं कार्यं। यत्तु चोदितो गुरुणाभिप्रायेण॥ ॥गुरोः प्रियहिताचरणं॥ ७॥
॥ ॥गुरोः पूर्वोक्तस्य प्रियमनुकूलं हितमायत्यामुपकारकं तयोराचरणं। यावज्जीवं कार्यं हितं चास्याचरेन्नित्यमिति योगि
स्मरणात्॥ ॥मेखलादंडाजिनोपवीतधारणं॥ ८॥ ॥मेखलादीनि पूर्वोक्तानि तेषां धारणं। यमः। दंडकमंडलुं वेदं मौंजीं च
रसनां तथा। कौपीनं कटिसूत्रं च ब्रह्मचारी तु धारयेत्। वेदो दर्भमुष्टिः॥ ॥गुरुकुलवर्जं गुणवत्सु भैक्षचरणं॥ ९॥
॥ ॥गुरोः कुलस्य स्वज्ञातिकुलानि वर्जयित्वा गुणवत्सु वेदयज्ञादिसंपन्नेषु भैक्षं भिक्षासमूहस्तद्धं चरणं

मदनं। यथा मनुः। ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहमिति। वेदादियोगस्य त्रैवर्णिकसाधारण्येपि ब्राह्मणस्सं
भवेदत्रियादौ ज्ञेयं। ब्राह्मणेषु चरेद्भैक्षमनिंद्येष्वात्मवृत्तय इति योगिस्मरणात्। यत्तु सार्ववर्णं चरेद्भैक्षमिति तत्त्रैव
र्णिकाभिप्रायं। तत्राप्यलाभे चातुर्वर्ण्ये चरेद्भैक्षमिति द्रष्टव्यं॥ ॥गुर्वनुज्ञातं भैक्षाभ्यवहरणं॥ १०॥ ॥निवेदितस्य
गुरुणानुज्ञातस्य भैक्षस्याभ्यवहरणं भोजनं। गोतमः। निवेद्य गुरवेऽनुज्ञातो भुंजीतासंनिधौ गुरोस्तद्भार्यापु
त्रे सब्रह्मचारिभ्यश्चेति। योगीश्वरोपि। अपोशानक्रियापूर्वं सत्कृत्यान्नमकुत्सयन्निति। सत्कारमाह हारीतः। भैक्ष
मवेक्षितमवोक्षितं पर्यग्निकृतमादित्यदर्शितममृतं प्राङ्लो मृन्मये वा पात्रे भुंजीतेति। लोहग्रहणं कांस्यनि
षेधः। ताम्बूलाभ्यंजनं चैव कांस्यपात्रे च भोजनं। यतिश्च ब्रह्मचारी विधवा च विवर्जयेदिति प्रचेतस्स्मरणात्।
तच्च सायंप्रातः। सायंप्रातर्भुंजीतेति गोतमीयात्। तच्चाभिक्षाचरणपूर्वं। सायंप्रातर्भिक्षेतेति शौनकीयात्। नास्य ग्रा
सनियमः। अमितं ब्रह्मचारिण इति वासिष्ठात्॥ ॥आर्द्रकृत्तलवणस्रक्पर्युषितनृत्तगीतस्त्रीमधुमांसा
ञ्जनोच्छिष्टप्राणिहिंसाश्लीलपरिवर्जनं॥ ११॥ ॥श्राद्धं पित्रादेः। असमावर्तनस्यापि कर्त्तेरियं ब्रह्मचारिणः। श्रा

वि०टी०२७
२६१

दादिमातापितृभिर्नतु तेषांकरोति स इतिब्राह्मणात्। बहुवचनमाचार्यादिग्रहणार्थम्। इदमधिकार्यंतरसङ्ग्रा
वेतदभावे तु न निषेधः। निरन्वये सपिण्डे तु मृते सतिदयान्वितः। तदशौचं पुनश्चाप्युपैति कुर्यान्निति तत्रैव तत्क्रिया
इत्युक्तानंतरवाक्यात्। एतेनपंडितान्नाजिनो मूर्खाः स्त्रियो वा ब्रह्मचारिणः। क्षयाहं समतिक्रमपंडालाः को
टिजन्मस्थित्यादौ निप्रवेतः अभृतिवाक्यानि व्याख्यातानि। नतु श्राद्धभोजनं तस्य त्रैवर्णिकसाधारणाभावात्
ब्राह्मणः काममश्नीयात् श्राद्धे व्रतमपीडयन्निति ब्राह्मणस्याभ्यनुज्ञानाच्च। क्षारलवणं क्षारमलवणं शुक्तं नि
ष्ठुरवाक्यं। शुक्ता वाच इति गौतमीयात्। नतु कालेनाम्लीभूतं पर्युषितं निषेधनैवतत्। पर्युषितेवाल्पभूतत्वात् रि
तं। नृत्यं नाट्यं। गीतं गानं। स्त्रीस्पर्शालापादौ। स्त्रीप्रेक्षणालम्भने मैथुनशंकायामिति गौतमीयात्। मधुक्षौद्रं
मांसं मत्स्यमपि। अंजनं कज्जलादिना दृशोः। उच्छिष्टमगुरोः। प्राणिहिंसा प्राणिपीडा। न प्राणवियोगः तस्य न हिंसा
त्सर्वभूतानामित्यनेनैव निषेधात्। अश्लीलमसभ्यं परेषां परिवर्जनं। गौतमोपि। वर्जयेन्मधुमांसगंधमाल्यदि
वास्वप्नांजनाभ्यंजनयानोपानच्छत्रकाममन्युलोभमोहवाद्यवादनस्नानदंतधावनहर्षनृत्यगीतपरिवादभ

२६

यानीति॥ ॥अधःशय्या॥१२॥ ॥भूमौशयनं अधो विधानात्खट्वानिषेधः॥ ॥गुरोः पूर्वोत्थानं चरमं संवेशनं॥१३॥
॥ ॥गुरोः शयनोत्थानात्पूर्वमुत्थानं शयनात् गुरुसंवेशनादनंतरं च संवेशनं॥ ॥कृतसंध्योपासनश्च गुरोरभिवाद
नं कुर्यात्॥१४॥ ॥कृते संध्यायामुपासनं विहितयोः संध्यावंदनाग्निकार्ययोरनुष्ठानं येन स तथोक्तो गुरूणां मा
तापित्रादीनां वंद्यमानानामभिवादनं कुर्यात्। अभिवादनेनामगुरोः स्वाभिमुख्येनाशीर्वचनानुकूलीकरणं
तच्च नमस्कारविशेषेण। नमस्कारस्य पृथक्ता प्रयुक्तेः क्रियाविशेषः। अतएव शातातपोपि॥ अभिवाद्यो नमस्का
र्यः शिरसा एव च। ब्राह्मणैः क्षत्रियाद्यैस्तु श्रीकामैः सादरं सदेति भेदेन व्यवजहार। अभिवादनप्रकारमाह
॥ ॥तस्य च व्यत्यस्तकरः पादावुपस्पृशेत्॥१५॥ ॥व्यत्यस्तौ स्वस्तिकीकृतौ करौ येन स तथोक्तस्तस्य गुरोः
पादावुपस्पृशेत्। गुरुप्र[illegible]क्रमेपि तस्येति वचनमन्यनिरासाय। तस्य पादत उपरिष्टादाजानूपसंग्रहणं
त। यथाह बौधायनः। श्रोत्रे संस्पृश्य मनः समाधायाधस्ताज्जान्वोरापद्भ्यामन्योपसंग्रहणमिति। व्यत्य
सेकारतामाह॥ ॥दक्षिणं दक्षिणेनेतरमितरेण॥१६॥ ॥दक्षिणं पादं दक्षिणेन पाणिना संस्पृशेत् सव्येनोपस्पृ

वि०टी०२८
२६१

रोतान्स्वकरष्यतासेति। तद्धाकोभिवसमाह॥ ॥स्वंचनामास्याभिवादनांतेभोः[illegible]शब्दांतंनिवेदयेत्॥१७॥
अभिवादयेइतिशब्दांतेभोइतिशब्दांतेयस्यादृशं स्वंचनामनिवेदयेत् तान्या चाभिवादये विष्णुशर्मा अहं
भो इति तेनावचनयुक्तिर्भवति। असावहमितिविबन्निति योगिस्मरणादस्मच्छब्दः। अन्येगोत्रप्रवरादिपिकी
र्तयंति। स्वगोत्रनामशर्माभिवादयेइतिवाक्यं। तदाहमनुः। आयुष्मान्भवदेवदत्तशर्मा३न्इतिवाक्यं
संपद्यते। वस्तिष्ठस्त्वामंत्रितेयोन्त्यःस्वरःसप्लुयते सोध्यदोरमप्रगृह्यमाऽऽ्रआऽऽ्भावंवापद्यतइति। तत्रचा
युष्मान्भवपिनाकपाणा३यइतिविलास३वइतिप्रयोगः। शूद्रविषयेत्वापस्तंबः। नाशैःशूद्रःप्रांजलिरिति। तत्वान्य
भिवादेनस्तुतःप्रत्यभिवादेऽशूद्रेप्लुतिपालनीयात्। तेनायुष्मानेधिनुपंकज इति। स्त्रियामपिप्लुतोन।
स्त्रियामपिप्लुतिपेधोवक्तव्यइतिकात्यायनीयात्। तेनायुष्मतीभवगार्गीशर्मन्निति प्रयोगः। इति डी
पप्रतिषेधात्डावुभाभ्यामन्यतरस्यामिति डाप् पक्षे गार्गीशर्मन्निति प्रयोगः॥ ॥तिष्ठन्नासीनःश
यानोवंजानःपराङ्मुखस्वनात्पमभिभा[illegible]णं कुर्यात्॥२५॥ ॥तिष्ठस्थितःआसीनउप

२

विष्टः शयानस्तिर्यग्भूतो गुंतानो ऽप्यवहरन् पराङ्मुखो ऽनभिमुखः अकारादन्यदपि कर्म कुर्वन्नस्य गुरोर
भिभाषणं प्रत्युत्तरं दानं न कुर्यात्। प्रत्युत्तरं प्रतिश्रवणोपलक्षणं। प्रतिश्रवणसंभाषे शयानो न समाचरेदिति मानवा
त्। प्रतिश्रवणमाज्ञास्वीकारः। कथं तर्हि? यत आह॥ ॥आसीनस्य स्थितः कुर्यादभिगच्छंस्तु गच्छतः॥ आसीनस्य स्थि
तः प्रत्युद्गम्य धावतः पश्चाद्धावन्नु प्रत्युत्तरप्रतिश्रवणे कुर्यात्॥ ॥पराङ्मुखस्याभिगच्छन्॥२०॥ ॥पराङ्मुखस्य उप
विष्टस्य तिष्ठतो वाभिमुखो भूत्वा ते कुर्यात्॥ ॥दूरस्थस्यान्तिकमुपेत्य॥२१॥ ॥दूरस्थस्य निकटं गत्वा ते कुर्यात्॥
शयानस्य प्रणम्य॥२२॥ ॥शयानस्य तिर्यग्भूतस्य प्रणम्य ते कुर्यात्॥ तस्य चक्षुर्विषयेन यथेष्टासनः स्यात्॥२३॥
॥ ॥तस्य गुरोश्चक्षुर्विषये समक्षं यथेष्टासनो यथेष्टमवसक्थिकादिबंधेनासनं यस्येति स तथोक्तो न स्यात्। तदा
ह गौतमः। गुरुदर्शने कंठप्रावृतावसक्थिकापाश्रयपादप्रसारणानि वर्जयेदा[illegible] चकाराद्भिता॥ निष्ठीवितहसित
विजृम्भितावस्फोटनानीति गौतमीयात्॥ ॥न चास्य केवलं नाम ब्रूयात्॥२४॥ ॥अस्य गुरोः केवलं श्रीशब्दादिशू
न्यं नाम न ब्रूयात् समक्षं परोक्षं वा। नोदाहरेदस्य नाम परोक्षमपि केवलमिति मानवीयात्। यत्तु आत्मनाम गुरोर्नाम

मनातिक्रमणं स्यात्। आयुष्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोरिति। तत्कामस्य। आयुःकाम इति श्रवणात्
॥ ॥गतिं चैषां भाषितं चेष्टितं नास्यानुकुर्वीत॥२५॥ ॥गतिर्गमनं चेष्टा हस्तपादादिक्रिया। भाषितं वाक्यादि पाठः॥
आदिशब्दान्मनोरथादिकल्पनं एतानि परिहासेच्छया गुरोर्नानुकुर्वीत॥ ॥यत्रास्य निंदापरिवादौ स्या
तां न तत्रावतिष्ठेत॥२६॥ ॥निंदा अशब्दोषख्यापनं परीवादो विद्यमानदोषोद्घाटनं तद्द्वयं यत्र गुरोर्भवेत्तत्र न
तिष्ठेत् ततोऽन्यत्र गच्छेत् कर्णौ वा तत्पिधाय। कर्णौ तत्र पिधातव्यौ गंतव्यं वा ततोऽन्यत इति मानवात्॥ ॥नासेकासनो भवे
त्॥२७॥ ॥एकत्रासने गुरुणा समं तिष्ठेत्। यथाह मनुः। विद्यागुरुष्वेवमेव नित्या वृत्तिः स्वयोनिषु प्रतिषेधत्सु
चाधर्माद्धितं चोपदिशत्स्वपि। विद्याः पुराणाद्याश्चतुर्दश। अस्यापवादमाह॥ ॥अन्यत्र शिलाफलकनौयानेभ्यः॥२८॥
शिलाफलकं शिलापट्टः। नौस्तरिः। यानं रथाश्वादिकं विना। तत्रैकासने न दोषः। वस्त्रवेत्रनालासनादिग्रहणं
॥ ॥गुरोर्गुरौ सन्निहिते गुरुवद्वर्तेत॥२९॥ ॥गुरोर्गुरुः स्वाध्यापकस्याध्यापकस्तस्मिन्सन्निहिते समागते गुरुवदभिवा
दनादि सर्वं कुर्यात्। द्वयोः समवाये क्रम आपस्तंबोक्तः। आचार्यप्राचार्यसमवाये प्राचार्यायोपसंगृह्योपसंगृह्णे

दाचार्यमिति॥ ॥अनिर्दिष्टश्च गुरुणा स्वान्गुरूनभिवादयेत्॥३०॥ ॥अनिर्दिष्टोऽननुज्ञातः स्वान्गुरून्पितृव्यादी
न्नाभिवादयेत्। पित्राचार्ययोः समवाये विकल्पः। उत्थाय मातापितरौ पूर्वमेवाभिवादयेत्। आचार्यश्च ततो नित्यमभिवा
द्यो विजानतेति श्रवणात्। उत्पादको गरीयान्ब्रह्मदः पितेति मानवाच्च। गुणाधिकस्य प्राथम्यं वा। पुनरतिदेशमाह
॥ ॥बाले समानवयसि वाध्यापके गुरुपुत्रे गुरुवद्वर्तेत॥३१॥ ॥बालेन्यूनवयसि वात्र अध्यापयति गुरुपुत्रे गुरुवद्वर्तेत। न
चेदमखिलवेदाध्यापकत्वप्रयुक्तं। आचार्योपसदनविधिनैव सिद्धत्वात्। नाप्येकदेशाध्यापकत्वप्रयुक्तं। उपाध्यायोप
सदनविधिनागतत्वात्। तस्मादेवं व्याख्येयं। यो गुरोः स्नानादिव्यापृतत्वे वर्गं वर्गद्वयं वाध्यापयति तं प्रत्यादिश्यते। बाला
दिविशेषणमनुनाध्यापकगुरुपुत्रादस्य पृथगभिधानात्। वाशब्दाच्छिष्यस्यापि ग्रहणं। बालः समानजन्मा वा शि
ष्यो वा यज्ञकर्मणि। अध्यापयन्गुरुसुतो गुरुवन्मानमर्हति मानवात्। यज्ञकर्मणीति यज्ञकर्मविषयकत्वादिदं
यप्रदर्शनेनांगादीनुपलक्षयति। तेन शिष्योप्यध्यापितांगादिविद्योपि वेदाध्यापनेन गुरुवन्मान्यः। यदा तु गुरुपुत्रोप
स्मादेवाधीतवेदान्तरो वेदान्तरमध्यापयति तस्येन तदेव। उक्तापवादमाह॥ ॥नास्य पादौ प्रक्षालयेत्॥३२॥ ॥अस्य गुरु

पुनस्तपणदौनप्रक्षालयेत्॥ नोच्छिष्टमेस्मीयात्॥ ३॥ तस्योच्छिष्टं च नाश्नीयात्॥ एवं वेदं वेदौ वेदान्वा स्वीकुर्यात्॥ ३४
॥ ॥ एवमुक्तेन प्रकारेण लेकं द्वौ त्रीन्वा वेदान् स्वीकुर्यात्। वेदः शाखास्वीकारस्तच्चान्यानपेक्षपाठक्रमतः। स चार्थज्ञा
नावसायिनी तेन कर्मानुष्ठानासिद्धेः। यथा पराशरः। ज्ञातव्यः सर्ववेदार्थो देवानां कर्मसिद्धये। पाठमात्ररतो यः पं
के गौरिव सीदति कर्मानधिकारेण। यज्ञानवश्यकं ब्राह्मणे न निष्कारणः षडंगो वेदोऽध्येयो ज्ञेयश्चेति स्मरणात्। य
द्यपि प्रथमोपादानेनैकवेदाध्ययनस्यैव मुख्यकल्पत्वमवगम्यते तथापि त्र्यध्ययनं मुख्यकल्पत्वाम्नातवेतानिकक
र्मसिद्धेस्तत्र त्र्यध्ययनाशक्तस्यैकवेदाध्ययनमित्यनुकल्प एवात्र यथाचमनुः। वेदानधीत्य [illegible] वेदौ वा वेदं वापि
यथाक्रमशः। प्रथमोपादानं तु स्वशाखाभिप्रायेण। अधीत्य शाखामात्मीयां परशाखां ततः पठेदिति वसिष्ठात्॥ ॥ ततो वे
दांगानि॥ ॥ ततो वेदाध्ययनानंतरं वेदांगानि शिक्षादीनि स्वीकुर्यात्। यद्यप्येवं दंडादिकेऽर्थक्रमे सत्युत्पत्तयनं पितो। वेद
मध्यापयेत्तस्य शाखास्वमन्त्रादिकं तथेति बृहस्पतिना स्मृतीनामपि पश्चादध्ययनमुक्तं तथापि वेदाध्ययनांगस्मार्तयम
नियमादिज्ञानाय पूर्वमेवेति ध्येयं तेन स्मृतिपाठशिक्षाणां पुराणादीनां पश्चादध्ययनं सिद्धं। तद्वत् क्रमं निरं

ति॥ ॥यस्त्वनधीतवेदोन्यत्र श्रमं कुर्यात्सोसौ ससंतानः शूद्रत्वमेति॥३६॥ ॥नाधीतावेदा वेदौ वेदो वा येनासा
वनधीतवेदो वेदमनधीत्यैवेति यावत्। अन्यत्र शास्त्रादौ यः श्रममभ्यासं कुर्यात्स ससंतानः शूद्रत्वमेति शूद्रव
त्कर्मानधिकारी भवतीत्यर्थः। द्विजत्वमुपपादयति॥ ॥मातुरग्रेधिजननं द्वितीयं मौंजिबंधनं॥३७॥ ॥अग्रे प्रथ
मं विजननं जन्म मातुः सकाशात् द्वितीयं जन्म मातुः सकाशात् द्वितीयं जन्म मौंजिबंधनमुपनयनं तत्तृतीयं दी
क्षा पिंडश्राद्धादीक्षायां उत्तरक्रतुमात्राधिकारापादकत्वेनोपनयने च कर्ममात्राधिकारानापादकत्वात् तत्र
पितरावाह॥ ॥तत्रास्य माता सावित्री भवति पिता त्वाचार्यः॥३८॥ ॥तत्रोपनयनाख्ये द्वितीये जन्मन्यस्य त्रैवर्णिक
वर्णोः सावित्री माताचार्यः पिता भवति। निगमयति। एतेनैव तेषां द्विजत्वं॥३९॥ ॥एतेन द्वितीयेनोपनयनाख्येन
जन्मना तेषां त्रैवर्णिकानां द्विजत्वं। एवकारो निषेकादिश्मशानांतसंस्कारवतोप्यनुपनीतस्य द्विजत्वनिरास
र्थः। वक्ष्यमाणवचनादनुपनीतोत्पन्नानां पुत्रपौत्रप्रपौत्राणामपि द्विजत्वं गमयति। अत एवापस्तंबो यस्य पिता पि
तामहः इत्यनुपेतौ स्यातां तस्य संवत्सरं त्रैविद्यकं ब्रह्मचर्यं यस्य प्रपितामहादेर्नानुस्मर्येतोपनयनं तस्य दाह॥

प्राङ्मौञ्जीबंधनाद्द्विजः शूद्रसमो भवति॥४०॥ ॥उपनयनं यावत् द्विजस्त्रैवर्णिकः शूद्रसमः शूद्रवद्वेदानधिकारी
भवति न तु शूद्रधर्मो ऽनुपनीतस्य न मो मंत्रेण पंचयज्ञापत्तेः। न चोपनयनकालं लक्षयति कालात्यये धर्माधिकारप्रसं
गात्। न चेदं मुख्यगौणमनुपनीतत्वविशेषात्। अनत्यंतं परमधिकं अनापस्तो मातृनात्। नचोनयनेनैव नाप्यनुपनी
तत्वमपैति। आयश्चिन्नमुपनयनविधानुपपत्तेः। तस्माद्ब्राह्मणपरिव्राजकावत्सामान्यविशेषाविमौ। तेन नत्वैवं
न मेमिइत्यनवलिप्ताहारयेदन्यत्र स्वधानिनयनादित्यादिभयसाधारणं सिद्धं॥ ॥ब्रह्मचारिणा मुंडेन जटिलेन वा भाव्यं॥४१
॥ ॥त्रैवर्णिकेन ब्रह्मचारिणा मुंडेनो सर्वकेशेन जटिलेन जटया भास्वता वा भवितव्यं। जटा केशसंहतिः। वाशब्दश्छिखा
मुंडजटिलशिखाजटा चेति गौतमस्मरणात्। मुंडत्वं छंदोगविषयं। वापयेच्छिखावर्जमिति समावर्तनी परवादि
रस्मात्मा कृमुंडत्वसिद्धेः। जटिलत्वं नैष्ठिकविषयं। श्मश्रु लोमनकेनरवश्रुतिलेवले स्मरणात्। शिखामात्रमेव जयवय
वापयेदिति तत्रानित्यापत्तेर्दीर्घात् इतरविषयमिदं यथा वर्णितं॥ ॥वेदस्वीकरणाद्दौ गुर्वनुज्ञानत्स्नायादाः स्नायात्
॥४२॥ ॥वेदस्य वेदयोर्वेदानां वा स्वीकारः पूर्वोक्तस्माद्धर्गुणानुज्ञातो गुरवे वरमभिलषितं दत्वा स्नायात् समावर्ते

तोस्नानपदोपादानमपवर्गगोदानात्स्नानस्यानित्यताबोधनाय। अपस्तुस्मशनेमेके गोदानादीति गौतमीयात्। यद्यपि त्वा
प्रत्ययेन स्नानपूर्वकालत्वं वदानस्याविशेषेण गम्यते तथा विद्यास्नातकयोरेव तत्संभवः। वेदस्वीकरणोत्तरकालताया
स्तत्रैव संभवात्। ननु स्नातके ऽसमाप्तविद्यस्यैव व्रतमात्रेण स्नानविधानात् तत्र तु स्नानविद्यान्तकालयोर्विरोधेन
दक्षिणाकालेपि विकल्पः। स्नास्यं स्वविधिवद्भिः शक्त्या गुर्वनुज्ञाया एव साध्यत्वात्। अत एव गौतमः। कृतानुज्ञातस्य
वा स्नानमिति। वरदानमिति शेषः। तथाह मनुः। क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमं ततः। धान्यं वासांसि शाकं वा गुरवे प्री
तिमावहेदिति। नैष्ठिकं प्रत्याह॥ ॥मतो गुरुकुल एव वा जन्मनः शेषं नयेत्॥४३॥ ॥तत इति पंचम्या वेदस्वीकरणानि
त्यवपरामृष्यते न सन्निहितमपि स्नानं पंचमीकल्पनात्। उर्ध्वमित्यनुषज्यते ऽपेक्षितत्वात्। तेन वेदाध्ययनानंतरं न
स्नायात्किंतु गुरुकुल एवायुःशेषं नयेत्॥ ॥तत्राचार्ये प्रेते गुरुवद्गुरुपुत्रे वर्तेत॥४४॥ ॥तत्र गुरुकुलवासे क्रियमाणे
आचार्ये प्रेते प्रमीयते तत्र तदा गुरुपुत्रे गुरुवर्तितव्यं॥ ॥गुरुदारेषु सवर्णेषु॥४५॥ ॥गुरुपुत्रे प्रेते गुरुदारेषु दारशब्दोपा
दानं बहुत्वविवक्षार्थं सवर्णग्रहणमसवर्णानिरासाय वा शद्रेहद्रादिग्रहणाय तदभावे हस्ते सब्रह्मचारिण्यभो

२३

वेति गौतमीयात्॥ ॥तदभावेग्निशुश्रूषुर्नैष्ठिको ब्रह्मचारी स्यात्॥४६॥ ॥गुरुदाराद्यभावेग्निमेव शुश्रूषेत्समिदा
धानादिना। ब्रह्मचारी वेदोद्वहणशीलश्च नैष्ठिकः वन्नाविको ब्रह्मचर्यनियमो निष्ठा तद्वान् स्यात्। गुरोः कर्मशेषेण जपे
दिति गौतमीयात्। शुश्रूषातिरिक्तकाले वेदजपेदित्यर्थः। नैष्ठिकफलमाह। एवं चरति यो विप्रो ब्रह्मचर्यमतन्द्रितः। स गच्छ
त्युत्तमं स्थानं न चेहाजायते पुनः॥४७॥ ॥एवमुक्तरीत्या यो विप्रोऽतन्द्रितोऽनलसः सन् ब्रह्मचर्यं चरति स उत्तमं स्थानं स्थीयते
स्मिन् जगतेति स्थानं ब्रह्म गच्छति प्राप्नोति। ब्रह्मलोकमवाप्नोतीति योगिस्मरणात्। ब्रह्मैव लोको ब्रह्मलोक इति व्या
ख्येयं अन्यथा अनावृत्तिस्मरणविरोधात्। तामेवाह वाहनचेह संसारे पुनराजायते प्रभवतीति। विप्रग्रहणं तु ब्राह्मणस्ये
व नैष्ठिकत्वं नान्येषां। अनेनोपक्रमात्त्रैवर्णिकानामित्याहुः। प्रसंगान्नैमित्तिकं विधास्यन्नैमित्तिमाह॥ ॥कामतो रेतसः
सेकं अतिक्रमं व्रतस्याहुर्धर्मज्ञा ब्रह्मचारिणः॥४८॥ ॥त्रैवर्णिकस्य ब्रह्मचारिणो बुद्धिपूर्वं स्त्रीसंगमन्तरेण रेतःसेकं व्र
तस्य ब्रह्मचर्यस्य धर्मशास्त्राभियुक्ता ब्रह्मचर्यशी अतिक्रमं लोपमाहुः। ब्रह्मचारिपदं नैवानप्रस्थसंन्यासिनोरपि प्रा
प्त्यर्थं वानप्रस्थो यतिश्चैवं खण्डने सति कामतः। पराकत्रयसंयुक्तमवकीर्णिव्रतं चरेदिति शाण्डिल्यस्मरणात्। ब्रह्मचर्यस्य व्रत

शब्देनोपादानं व्रतान्तरेष्वप्यनिमित्तत्वज्ञापनार्थं नतुप्रायश्चित्तमस्त्विह॥ ॥एतस्मिन्नेव निमित्ते वसित्वा गर्दभाजिनं
सप्तागारांश्चरेद्भैक्षं स्वकर्मपरिकीर्तयन्॥४९॥ ॥तेभ्यो लब्धेन भैक्षेण वर्तयन्नेककालिकं। उपस्पृशंस्त्रिषवणं त्वब्देन स वि
शुध्यति॥५०॥ ॥एतस्मिन्कामतो रेतःस्कंदनरूपे पापकर्मणि प्राप्ते सति रासभीयं चर्म्मा रितेभ्योगारेभ्यो लब्धं भैक्षमेकका
लं भक्षयन् त्रिकालस्नानं कुर्वन्नब्देन विशुध्यति। तच्छस्कव्रतान्तरलोपेप्येतदेव ज्ञापयितुं व्रतान्तरेष्वपि चैवमिति वाशिष्ठ
तस्त्रीसंगमे विषये वा ब्रह्मचारी स्त्रियमुपेयाद्दरण्ये चतुष्पथे लौकिकेऽग्नौ रक्षोदैवतं गर्दभं पशुमालभेतेति चतुष्पथारण्य
योर्विकल्पः। काणेन रात्रौ चेति विशेषः। अवकीर्णी तु काणेन गर्दभेन चतुष्पथे पाकयज्ञविधानेन यजेत निर्ऋतिं निशातिमान
वा नपाकयज्ञविधानेन कार्यः। नैर्ऋतं वा चरुं निर्वपेत्तस्य जुहुयात् कामाय स्वाहा कामकामाय स्वाहा निर्ऋत्यै स्वाहा रक्षोदेव
ताभ्यः स्वाहेति वाशिष्ठात्। उक्तनिमित्तयोः समुच्चये तु नैमित्तिकस्यापि समुच्चयः। गर्दभावकीर्णी निर्ऋतिं चतुष्पथे जयेत्तस्याजि
नमूर्ध्ववालं परिधाय लोहितपात्रः सप्तगृहाद्भैक्षचरः कर्माचक्षाणः संवत्सरेण शुध्येदिति गौतमीयात्॥ ॥स्वप्ने सिक्त्वा ब्रह्म
चारी द्विजः शुक्रमकामतः। स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत्॥५१॥ ॥द्विजस्त्रैवर्णिको ब्रह्मचारी उपकुर्वाण

कोनैष्ठिकस्य स्वप्ने अकामतश्चास्वेन सिक्ते रेतः सिक्त्वाभ्यर्थायशातःस्नात्वार्कं गंधादिभिरभ्यर्च्य पुनर्मामैत्विंद्रियमित्येता
मृचं त्रिवारं जपेत्॥ ॥अकृत्वा भैक्षचरणमसमिध्य च पावकं। अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत्॥ ५१॥ ॥अनातुरः स्वस्थो ब्रह्म
चारी यदि सप्तरात्रं भैक्षचर्यामग्निकार्यं च न करोति तदावकीर्णी भवतीति तदुक्तं प्रायश्चित्तं कुर्यात् तत्र च गर्दभेज्या चरुश्च यो
गो वेति। एतच्च मत्र्यादि यत्तु स्वस्थेन त्वात्राज्ञवल्क्यः। भैक्षाग्निकार्ये त्यक्त्वा तु सप्तरात्रमनातुरः। कामावकीर्ण इ
त्याभ्यां जुहुयादाहुतिद्वयं॥ ॥तत्वेदभ्युदियात्सूर्यः शयानं कामकारतः। निम्लोचेद्वाप्यविज्ञानाज्जपन्नुपवसेद्दिनं॥ ५२॥ ॥तं ब्रह्म
चारिणमविज्ञानात् छास्त्रार्थापरिज्ञानात् कामकारतो वा दिवि शयानं सूर्यश्चेदभ्युदेति निम्लोचेद्वा गायत्रीं जपन् दिनमुपवसेद्दिवा
न भुंजीत दिनग्रहणाद्रात्रिमितेन नक्तं न भुंजीत। यथाह गौतमः। सूर्याभ्युदितो ब्रह्मचारी तिष्ठेदहरभुंजानोऽस्तमितश्च रात्रिं जपन् सावि
त्रीमिति। जपसंख्या चाष्टसहस्रं। गायत्र्यष्टसहस्रं तु जपेत्स्नात्वा समाहित इति संवर्तस्मरणात्। अकामतस्त्वष्टशतं स्कन्दुष्यं चारा
त्रमेव स्यात्॥ ॥इति श्री   विद्युत्स्तिविहतौ श्रीमत्पादेजयंत्यामष्टाविंशोऽध्यायः॥ ॥पित्रा वा
चार्यश्चक्तं तेनैको नविंशेनास्या यादि लक्षणं॥ ॥यस्तूपनीय व्रतादेशं कृत्वा वेदमध्यापयेत्तमाचार्यं विद्यात्॥ १॥ यो वेदमु

पनयगायत्र्यासंयोज्यव्रतानिमहानाम्न्याद्युपनिषदध्ययनांगान्युपदिश्यवेदमेकांशाखांसांगामध्यापयेदशाखा
विभिर्द्विशोदितिमावचनात्।कल्पांगान्तरोपलक्षणंरहस्यमुपनिषत्।यस्तूपनीयददद्वेदमाचार्यःसहृतात्।इतिवे
दपदेनैवसांगाशाखाभिप्रेतेतिनविरोधः।वेदान्तरपरिग्रहाभावेव्रतस्नातकत्वासिद्धेरुक्तक्रमेणाप्यध्ययनबोधना
र्थः।नेदमदवीयन्व्रतस्नातकोभवतीत्याश्वलायनस्मरणात्।नात्रव्रतादेशःप्रातःसमिधमाधेहीत्याद्युपदेशः
मेखलामावध्नदंडप्रदायब्रह्मचर्यमादिशेदित्याश्वलायनेनोपनयनभावनांतःपातेनैवाभिधानात्॥ ॥यस्त्वेनं
मूल्येनाध्यापयेत्सउपाध्यायमेकदेशंवा॥२॥ ॥यःपुनरेनमभोपनीतंमूल्येनभृतावावेदैकध्यायाद्यध्यापयेत्सउप
ध्यायंविद्यात्।वाशब्दादंगानिवा।एकदेशंतुवेदस्यवेदांगान्यपिवापुनः।योऽध्यापयतिवृत्त्यर्थमुपाध्यायःसउच्यतइतिमा
नवात्।ऋत्विक्कृतिः।भृतकाध्यापकोयस्तुसउपाध्यायउच्यतइतिशंखस्मरणात्।अन्येनमूल्यंविनाज्जीविकाहति
ति परास्तंमूल्येनेत्यभिधानात्।योगीश्वरस्त्वस्योपपाकत्तामभिप्रेत्यैकदेशमुपाध्यायइत्येवलक्षणंमन्वद
य त॥ ॥योयस्ययज्ञाणिकुर्यात्तमृत्विजंविद्यात्॥३॥ ॥योयस्ययाजनार्होयाजनार्हःसयश्रौतेज्योतिष्टोमादौ

वि॰टी॰२९
२६०

स्मार्तेन पाकयज्ञादौ दृष्टेन मंत्रेण मंत्रेण यज्ञकर्मणि न लौकिकानि कुर्यान्न त्वनेन कारयेन्मंत्रादि
ष्वेदितव्यः॥ यथा मनुः॥ अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान्मखान्॥ यः करोति वृतो यस्य स तस्यर्त्विगि
होच्यत इति॥ क्रियापुनर्वचनमेकान्तर विशेषणाभावेऽप्यन्त्विकार्यं॥ तदाह शानाः॥ अदेशकाले ऽविधिना यो
याजमुपयाजयेत्॥ ॥नापवादितं याजयेत्॥४॥ ॥कुलशीलहृदिभिरपवादितं न याजयेत्॥ ॥नाध्यापये
त्॥५॥ ॥उक्तगुणैरपरीक्षितं नाध्यापयेत्॥ नोपनयेत्॥६॥ ॥उक्तलक्षणं नोपनयेत्॥ योन स्तोव मुखेः पातित्या
भिधानात्॥ प्रकृतिमाह॥ ॥ अधर्मेण च यः प्राह यश्चाधर्मेण पृच्छति॥ तयोरन्यतरः प्रैति विद्वेषं वाधिगच्छति
॥७॥ ॥इदं मया न ज्ञायते तत्पदेष्टव्यमिति सविनयं प्रश्नो धर्मस्तद्विपरीतः छलेनाभवद्भिः कथं पव्यत इत्यधर्मस्ते
न यः॥ नापृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः॥ जानन्नपि हि मेधावी जडवल्लोक आचरेदिति॥ ॥धर्मार्थौ यत्र न
स्यातां शुश्रूषा वापि तद्विधा॥ तत्र विद्या न वक्तव्या शुभं बीजमिवोषरे॥८॥ ॥अनाथाध्यापने धर्मो धनिकाध्याप
नेऽर्थः सुतानाध्यापने शुश्रूषा तत्रयं पद ध्यापने नास्ति तस्मिन्विद्यावेदादिर्नदेया॥ यथोषरे शुभं फलजनकं बीजं

मेधाविनं ब्रह्मचर्योपपन्नं। यस्ते न द्रुह्येत्कतमच्चनाह तस्मै मां ब्रूया निधिपाय ब्रह्मन्॥१०॥ ॥यमथैतारंस्तुचिमकल्मषमप्रमत्तं

ब्राह्मादिवाशब्दादहत्तज्ञादावपिहन्तप्रयोगोहि मेधाविस्तुचिकल्पानस्यकाः। अध्याप्यावर्मतः साधुशक्त्या प्र
ज्ञानविन्नदा इतियोगिस्मरणात्। उक्तार्थे श्रुतिमाह॥॥ विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि
असूयकायानृजवेऽयतायन मां ब्रूयाः अवीर्यवती तथा स्यां॥ए॥ विद्यातदधिष्ठात्री देवता ब्राह्मणं प्रगामेगत्वा
इदमाह मां गोपाय पालय पालने प्रयोजनमाह। तेऽहं शेवधिर्निधिरस्मि। कथं पालनीयेत्यतआह। असूयका
यगुणेष्वीवते। अनृजवे कुटिलाय। अयतायावशाय मां न ब्रूयाः नाध्यापयेः। किं तथा स्यादित्यत आह। तथा
तादृशे स्वाध्यापनेनावीर्यवत्यहं स्यामिति। तस्मादेतेनाध्याप्या इति। अध्याप्यानाह॥ ॥यमेव विद्याः शुचिम
प्रमत्तं सावधाने मेधाविनं धारणावंतं ब्रह्मचर्येणोक्तेनोपपन्नं युक्तं विद्याः जानीयाः यश्च ते तुभ्यं न द्रुह्येदनि
ष्टकारी न स्यात् कतमच्च किमपि प्रियं प्राह न ब्रूते तस्मै निधिपाय निधिवद्विद्यापालकाय मां हे ब्रह्मन् ब्रूयास्तथा सत्य
हं वीर्यवती स्यामिति॥ ॥इतिश्री विज्ञानेश्वरविरचितायां मिताक्षरायां?

विद्वत्तोश्री मतापवेज
येत्यामेकोनविंशोऽध्यायः॥ ॥अथ विंशेनाध्ययनधर्माभिधानायादौ तदुपक्रममाह॥ ॥श्रावण्यां प्रोष्ठपद्यां

वाहं तं स्मृपाकृत्वार्द्धपंचमान्मासानधीयीत॥१॥ ॥ श्रावणीप्रौष्ठपद्योरुक्तत्वाद्विकल्पस्तद्दर्शार्षिकमित्याद्यस्तत्र शौ
नकीयात् प्रथमोपस्थितत्वात्सर्वोपादानं श्रावण्याः। वा शब्दो दोषादौ हस्तश्रवणेनानुपादाने तेषां दिनद्वयप्राप्तावुत्तरं
ग्राह्यं धनिष्ठाप्रतिपद्युक्तं त्वाकृत्वा दशसमन्वितं॥ श्रावणं कर्म कुर्वीतेत्यृग्यजुःसामपाठका इति स्मरणात्॥ तेषु ग्रहसंक्रांतिदुष्टे
षु नोपाकर्म उपाकर्म न कुर्वीत क्रमात्साम ऋग्यजुर्विदः। ग्रहसंक्रांतियुक्तेहस्तश्रवणपर्वस्विति निषेधात्। किंतु पंचम्यां हस्ता
न्वितश्रावण्युक्तपंचम्यां केवलहस्ते वा कार्यं श्रावणपौर्णमास्यामाषाढ्यां वोपाकृत्येति बोधायनीयात्। पंचम्यां हस्ते न वेति
शौनकीयात्। उपाकृतिस्तु पंचम्यां कार्या वाजसनेयिभिरिति स्मरणात्। हस्तेनौषधिभावे वेति योगिस्मरणाच्च। छंदोगैस्तु
रोपि वेदानुपाकृत्य प्रारभ्यार्द्धपंचमान् सार्द्धचतुरो मासानधीयीत ...त्याध्याप्याभावे तत्सद्भावे त्वध्यापयेदपि पौषे माघशुक्ल
प्रतिपद्युत्सर्गं ... पद्ने एतत् कालांतरोपाकर्मोत्सर्जनयोर्यथासंभवं द्रष्टव्यं॥ ॥ ततस्तेषामुत्सर्गं बहिः कुर्यात्॥२॥ ॥
तत उपाकर्मानंतरं तेन च कथंचित्स्वकालेऽनुपाकृता कृत्स्नगंकालप्राप्तावपि नोत्सर्गः किंतूपाकर्माकरणप्रायश्चित्तपू
र्वकमेव तदनुष्ठानं। तेषामिति त्येषामेवोपाकरणं तेषामेवोत्सर्गो नानुपाकृतानां। तत्तच्छाखानां स्ववेदांतरस्य तत्कालप्राप्ते
वपि नोत्सर्ग इति। उत्सर्गमुत्सर्जनाख्यं कर्म बहिर्ग्रामाज्जलांते कुर्यादित्याचार्यस्यैव प्राधान्यं नाध्येतॄणां। तत्र च काले

ईपंचमानित्यनेनैवोक्तः।तेनचश्रावण्युपाकरणेपौषशुक्लप्रतिपत्प्रोष्ठपद्युपाकरणेमाघशुक्लप्रतिपदुत्सर्गकालःसिध्यतिपौषे
तुछंदसांकुर्याद्बहिरुत्सर्जनंद्विजः।माघशुक्लस्यवाप्राप्तेपूर्वाह्णेप्रथमेहनीतिमानवात्।शुक्लप्रथमेहनीतिमानवात्।अ
ध्यायानाह॥॥नाधीयीताहोरात्रंचतुर्दश्यष्टमीषुच॥४॥॥चतुर्दश्यामष्टम्यांबहुवचनात्पंचदश्यांचकारात्प्रतिपदश्चाहोरा
त्रंनाधीयीततिथ्याचहारीतः।प्रतिपत्सुचतुर्दश्यामष्टम्यांपर्वणोर्द्वयोः।श्वोनध्यायेथशर्वर्यांनाधीयीतकदाचनेति॥॥नत्वे
तरयहस्तके॥५॥॥ऋतूनांचतुर्मासात्मकानांत्रयाणांमंतरेसंधौद्वितीयास्वनध्यायः।आषाढीकार्त्तिकीफाल्गुनीसमनंतरा
सुद्वितीयास्वितिस्मृत्यंतरात्।एतेनकार्त्तिकीफाल्गुन्याषाढीप्रभृतित्रिरात्रमितिगौतमीयमपिव्याख्यातंद्वितीयाभिप्रायेणम्
लोक्तमेकरात्रमत्रद्रष्टव्यं।नतुऋतुसंधिगतासुप्रतिपत्स्विव्याख्यानंभव्यं।तासांनित्यानध्यायत्वेनऋतुसंधित्वविशेष
णानर्थक्यात्।नापिसोऋतुसंधीनांकदाचित्स्वाध्यायेनविशेषणसार्थक्यंवाच्यं।निशाद्वयंदिवारात्रौसंक्रमेदिवसद्वयं
।त्रेनध्यायंकुर्वीतयावत्सोपपाद्यातिथिरितिनारदायेसंक्रांतिमात्रेनध्यायस्मरणंतदप्यस्माद्यथोक्तमेवसाधु।ग्रहोप
हणेतस्संभवस्सूतकमशुचित्वं।तत्रत्रिरात्रं।अहंनकीर्तयेद्ब्रह्मराज्ञोराहोश्चसूतकइतिमानवात्॥॥नेंद्रप्रयाणे॥६॥

वि॰टी॰३॰
२९०

इंद्रइंद्रध्वजस्तस्यश्रयानंपातनंतेनोच्छ्रयोपिलक्ष्यतेतत्रोमयत्राहोरात्रमनध्यायः।शक्रपातेतयोच्छ्रयइतिमानवात्॥ ।।मै
भाद्रशुक्लद्वादश्यांशक्रध्वजोत्थापनं।निपातनंचाश्विनकृष्णचतुर्थ्यां।द्वादश्यांभाद्रशुक्लस्येंद्रध्वजसमुच्छ्रयः।इषे
कृष्णचतुर्थ्यांतुसम्प्राहात्पातयिष्यतइतिआह्नात्॥ ।।नवातिरेणुपवने।।७।। ।।रेणुपवनोवात्यातस्यांवात्यायांतत्कालमन
ध्यायः।गीतवादित्ररुदितानिवातेऽपितत्कालमितिगोभिलस्मरणात्।अतिशयश्चाकर्णप्रवेशिनिलेरात्रौदिवापांसुसमूहनइ
तिज्ञेयः॥ ।।नाकालेवर्षविद्युत्स्तनितेषु।।८।। ।।अकालेवर्षाकालादन्यत्रदृष्टेविद्युद्द्योतनेगर्जितेचत्रिरात्रमनध्या
यः।विद्युत्स्तनितवृष्टिषुपञ्चेदिमित्यापस्तंबीयात्।वर्षाकालेत्वाकालिकोनध्यायः।विद्युत्स्तनितवर्षेषुमहोल्कानांच
संप्लवेआकालिकमनध्यायमेतेषुमनुरब्रवीदितिमानवात्।दृष्टादित्रयसंनिपातेतुकालेपिअहर्मेवावर्षविद्युत्स्तनयित्नु
सन्निपातेअहर्मितिगौतमीयात्॥ ।।नभूकंपोल्कापातदिग्दाहेषु।।९।। ।।भूकंपोभूमिचलनं।उल्कादिवंडपोतिस्तत्पातः।दि
ग्दाहोदिशांपीतिमदर्शनं।तत्राकालिकाहोरात्रयोर्विकल्पः।निर्घातेभूमिजलेनेड्यांपांसोपदर्शने।एतानाकालिकान्वि
द्यादनध्यायानृतावपीतिमानवात्।भूकंपोल्कानिपातने।समाप्यवेदंद्युनिशामितियोगिस्मरणाच्च।भूकंपादित्रयस

त्रिपाते तु त्रिरात्रं उल्काविद्युत्समासे त्रिरात्रमिति स्मरणात्॥ ॥नांतःशवे ग्रामे॥ १०॥ ॥ग्रामांतःस्थिते शवे तत्कालमनध्या
यः। शवश्चंडालोपलक्षणार्थं। अंतःशवे तच्चंडालस्यापि स्यादीयात्। शवानुगमनादौ त्वहोरात्रं शवाणपश्चिचरणेषु कोशश्शवदर्श
ने त्वहोरात्रमिति स्मृत्यंतरात्। कोशः शवपेटिका॥ ॥न शस्त्रसंपाते॥ ११॥ ॥शस्त्रसंपाते युद्धभूमिनृपवर्त्मनि तत्कालमनध्याय
मनुः। न विवादे न कलहे सेनायां न संगरे इति॥ ॥न श्वशृगालगर्दभनिर्ह्रादेषु॥ १२॥ ॥श्वादीनां निर्ह्रादे शब्दे श्रूयमाणे तत्का
लमनध्यायः। श्वादय उपलक्षणं। कोशः शवपेटिका। उलूककदंतिका कोलूकशब्दस्यापि स्यादीयात्॥ ॥न वादित्रशब्दे॥ १३
॥ ॥वादित्रं भेर्यादि तच्छब्दे नध्यायः। बाणभेरीमृदंगगर्त्तार्त्तशब्देषु इति गौतमीयात्। बाणो वीणाविशेषः। श
तंतुर्महाव्रते दर्शनात्। गर्त्तः शकटं गर्त्तसदमित्यादिदर्शनात्। वादित्रं गीताद्युपलक्षणं। नृत्यगीतवादित्ररुदितशब्देषु तावंतं का
लमिति बोधायनीयात्॥ ॥न शूद्रपतितयोः समीपे॥ १४॥ ॥शूद्रपतितयोः समीपे नध्यायः। अमेध्यशवशूद्रांत्यश्मशान
पतितांतिक इति योगिस्मरणात्॥ ॥न देवतायतनश्मशानचतुष्पथरथ्यासु॥ १५॥ ॥देवानां हरिहरादीनामायतनमाल
यः। श्मशाने पितृवनं चतुष्पथो मार्गचतुष्टयसन्निपातः। रथ्या राजमार्गः एतेषु नध्यायः। प्रचेताः चतुष्पथपथसंक्रमोद्या

वि॰टी॰उ॰
२७१

नेषु न देवसमीपेऽधीयीतेति मनुः॥ नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वेति। आपस्तंबः। नह्नुस्थो न तीर्थस्थो नाम
सु नेणु समो सुवे। अध्ययननिषेधाऽनुपाद्य निषेधः॥ ॥नोद्वर्कोतः॥१६॥ ॥न लमध्येनध्यायः। श्लेष्मातकस्य छाया
यां शाल्मलेर्मधुकस्य च। कदाचिदपि नाध्येयं कोविदारकपित्थयोरपि यमः॥ ॥नपाठो प्रसारितपादः॥१७॥ ॥पाठे श्रीपर्णादि
काष्ठनिर्मितेऽस्थापितपादतलस्यानध्यायः। एतेन भूमिस्थितपादस्यानानध्याय इति॥ ॥न हस्त्यश्वोष्ट्रनौगोयानेषु॥१८
॥ ॥हस्त्याद्यारूढस्य यानग्रहणानुष्ट्रारथादिद्योतनस्य चानध्यायः। मनुः। नाधीयीताश्वमारूढो न वृक्षं न च हस्तिनं
न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः॥ ॥नवांतः॥१९॥ ॥वांतः कृतवमनो नाधीयीताहोरात्रं॥ ॥न विरिक्तः॥२०॥ ॥वि
रिक्तो तिसारक्तच्छुक्तो नाधीयीताहोरात्रं॥ ॥नाजीर्णी॥२१॥ अजीर्णी यावदजीर्णपाकं नाधीयीत॥ ॥न पंचनखां
तरागमने॥२२॥ ॥पंचनखाः मार्जारादयस्ते पांशुकृशिष्ययोरंतरागमने होरात्रमनध्यायः। तत्र विशेषः। काको
लूकचूकुक्कुटमूषकमंडूकाद्यंतरागमने द्विदिनं। श्वनकुलसर्पमंडूकमार्जाराणां त्र्यहमुपवासो विप्रवासश्चेति गौतमः।
विप्रवास आचार्यकुलादन्यत्रवासः। अत्रापस्तंबो वसिष्ठः। मार्जारनकुलयोरहोरात्रमिति। अभोजनमनुवर्तते

खरखराहोष्ट्रचंडालसूतिकोदक्याशवादेमासं। अविगवयाजादिष्ठु नास्तिकादौ त्रिमासं। चंडालश्वपाकशासानां च

एमासान्। गजगंडसारसिंहाघ्रमहापापिकृतघ्नानां मष्टमासमिति शंखः। यूकमार्जारः। यदि दस्त्रीसंवत्सरो यदि व्याघ्रस्त

थैवेत्यापस्तंबः। व्याघ्रादीनां तरजातिभेदेन कालभेदः॥ ॥नराजश्रोत्रियगोब्राह्मणव्यसने॥२३॥ ॥राजाराष्ट्राधिपः श्रोत्रियएकशा

खाध्यायी गोब्राह्मणो जातिमात्रं तेषां व्यसने आपदि याव्दुपशममनध्यायः। मरणेत्वहोरात्रं। अहोरात्रानुवृत्तौ गोभिलः। प्रेते भू

मिपतावपीति। तयाहोरात्रमनूचान इति गोब्राह्मणमृतावेकाइति च शंखवयमौ। इदमल्पगुणेगुणातिशयवति त्रिरात्रं। सार्वभौ

मे त्रिरात्रे स्यादाशौचं संस्थिते सतीति भृगुः। अहोरात्रानुवृत्तौ स्वधार्वास्त्रोनियेतथेति योगीश्वरः। त्रिरात्रमिति स्मृत्यंतरमिति॥ ॥

नोपाकर्मणि॥२४॥ ॥उपाकर्माणंतरं त्र्यहमनध्यायश्चैनोत्सर्गे॥२५॥ ॥उत्सर्जने पित्र्यहं। त्र्यहानुवृत्तौ उपाकर्मणि चोत्स

र्ग इति योगीश्वरः॥ ॥न सामध्वनावृग्यजुषी॥२६॥ ॥सामवेदध्वनौ जायमाने ऋग्यजुषोरनध्यायः। ऋग्वेदो देव

दैवत्यो यजुर्वेदस्तु मानुषः। सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः इति मानवात्। उपलक्षणमेतदथर्वणो

पि। सामशब्दे नाथर्वयजुषी इत्यापस्तम्बात्। एवं वेदांतरध्वनौ साम्नोनध्यायः। शाखांतरध्वनौ सामान्यमनध्याय इत्या

वि॰टी॰उ॰
॰२७२

परतं वीयात्॥ ॥नापररात्रमधीत्य शयीत॥१९॥ ॥रात्रेरपरभागोऽपररात्रः। तत्राधीत्य न शयीत। किंतु यावत्सूर्यो
दयं जागृयात्। अपररात्रग्रहणात्पूर्वरात्रे न निषेधः। अदोषपश्चिमो यामो वेदाभ्यासेन योजयेत् यामद्वयं शया
नस्तु ब्रह्मभूयाय कल्पत इति मानवात्। अभियुक्तोऽप्यनध्यायेष्वध्ययनं परिहरेत्॥२०॥ ॥अभियुक्तोऽन्येन पृष्टोऽपि
अनध्याये [illegible] ष्वध्ययनं परिहरेत्। नाभियोगेनाभिनिविष्टः पठेत्। तत्र हेतुमाह॥ ॥यस्मादनध्यायाधीतं नेह
मुत्र फलप्रदं॥२१॥ ॥ऐहिकं फलमभियोगे जयप्राप्तिरामुष्मिकं फलं ब्रह्मलोकप्राप्तिस्तदुभयमनध्याया
ध्ययनेन संपततीति हेतुः॥ अनध्यायेष्वध्ययने प्रज्ञामायुः प्रजाः श्रियो ब्रह्मवीर्यं श्रियं तेजो निहंति तियमः स्वयमिति स्मर
णात् किंच॥ ॥तदध्ययनेनायुषः क्षयो गुरुशिष्ययोर्द्वयोः॥२२॥ ॥तेष्वनध्यायेष्वध्ययने गुरुशिष्ययोरायुः क्षयस्य
भवतीति हेतुत्वेन रंठकार्थं निनिगमयति॥ ॥तस्मादनध्यायं वर्ज्य गुरुणा ब्रह्मलोकश्चिरलेन संक्षिप्तपदे श्रेष्ठवन्दना॥२३॥
॥ ॥यस्मादनध्यायाध्ययने दोषोऽभिहितस्तस्मादनध्यायान्वर्जयित्वा ब्रह्मलोकाप्तये गुरुणोक्तलक्षणेषु शिष्येषु वि
द्यावेदादिस्थ तु हरावपन्या। अध्यापनमेवानध्यायनिषेधो दैन्यत्र दोषाभावः। वेदोपकरणे चैव स्वाध्याये चैव नैत्यके। नानुरोधे

२-

स्यनध्यायेहोममंत्रेष्वेवहीतिमानवात्।वेदोपकरणांगानि।वेदोपाकरणाइतिपाठेउपाकर्मणीत्यर्थः।नित्यस्वाध्या
योब्रह्मयज्ञः।होमोबल्याद्युपलक्षणं।चकारान्नैमित्तिकादिग्रहणं।नित्येनिमित्तकेकार्येव्रतयज्ञेकृत्तोतथा।प्रक्षेकाम
कार्येचनानध्यायःस्मृतस्तथेति।शिष्यधर्मानाह॥ ॥शिष्येणब्रह्मारंभावसानयोर्गुरोःपादोपसंग्रहणंकार्यं॥२२॥
ब्रह्मवेदस्तदध्ययनोपक्रमेऽध्ययनसमाप्तौवोक्तरीत्याशिष्येणगुरोरध्यापकस्यपादोपसंग्रहणमभिवादनंकार्यं।ब्रह्म
ग्रहणादंगादावनियमः॥ ॥प्रणवश्चव्याहर्त्तव्यः॥२३॥ ॥अध्ययनोपक्रमावसानयोरोंकारःपठनीयः।चकाराद्भूमि
स्पर्शश्चांतेकार्यः।ओंकारंप्रथमंकृत्वाततोब्रह्मप्रवर्तयेत्।ओंकारंपुनःकृत्वाभूमिंस्पृष्ट्वाविरामयेदितियमस्मरणात्।
तत्रग्रहणाध्ययनफलमाह॥ ॥तत्रचयदृचोधीतेतेनास्याज्येनपितॄणांतृप्तिर्भवति॥२४॥ ॥तत्रोक्तकालेयदृचोधीते
तेनास्याध्येतुःपितॄणामाज्येनतृप्तिर्भवति।बहुवचनादृचांदशसहस्राणिऋचांदशशतानिचऋचामशीतिःपादश्चैत
त्पारायणमुच्यतेइत्युक्तसंख्याग्रहणं।यदिचवेदोपक्रमादृगादिपदस्यतत्परत्वेवोक्तसंख्यालाभस्तदातावदध्ययनाभ्य
नुज्ञानार्थंबहुवचनासंभोक्त।यथाहपराशरः।अधीतव्योप्येकदेशोयदिसर्वंनशक्यतइति।एवंयजुरादावपिज्ञेयं।

॥ तत्त्वेनोक्तमेवं ... यद्यर्थं पितेन मनुना ॥२६॥ ॥ यदि यज्ञं ... नाधीतेनेमेन मखेन नापि तॄणां तृप्तिर्भवति ॥
यच्छ्राणेति हासवेदांगधर्मशास्त्राण्यधीते तेनास्यान्नेन ॥२७॥ ॥ आख्याधीइतिहासे महाभारतादिः वे
दांगानि शिक्षादीनि धर्मशास्त्राणि मानवादीनि इदं निर्देशात् न्यायमीमांसादीन्यपि गृह्यन्ते तदध्यय
नेन पितॄणामन्नं तृप्तिर्भवति यद्यपीदं सादृश्यं ब्रह्मयज्ञफलमिति प्रतिभाति तथापि ब्रह्मयज्ञेन तर्पितदेवा
श्च पितरस्तर्पयेत्यादिपाठानस्यादिवाकोर्ब्रह्मयज्ञस्य देवपितृतृप्त्यर्थत्वेनोभयदेवताकत्वावगमात् द्वे च पितृमात्र
द्विभिन्नवर्णेनैकदैवत्यत्वाद्विलक्षणस्य देवतान्तरस्योपलक्षणसंभवात्मकरणाभावाच्च करणं किंतूपक्र
मोपसंहारमध्यपठितत्वेन विध्यपेक्षितत्वाद्ब्रह्मग्रहणाध्ययनस्यैवेदं फलकथनमित्युक्तं एवं च फलवत्तोपसा
करणे दोषश्रवणान्नित्यविध्यादेः पाठे नित्यत्वमविरुद्धं ॥ ॥ यस्तु विद्यामासाद्य अस्मिन्लोके न याजीवेन्न तस्य
परलोके फलप्रदा भवेत् ॥२७॥ ॥ नेदं भृतकाध्यापनविषयं तस्योपपातके निषिद्धत्वात् नाप्यध्यापनादिविषयं
तस्यहन्त्रार्थं तथा मनुना तायो धनार्थं परो नेदं श्रावयेन्मा जना छूते। सवेदविक्रयी नामेहामुत्र च गर्हित इति व्या

स्मरणात्ताउक्तार्थमन्यत्रापि प्रतिदिशति ॥ ॥यश्च विद्यया यस्तु परेषां हन्ति ॥४०॥ ॥यश्च विद्यया वादजल्पाभ्यां परेषां
यशः पराजयेन नाशयति तस्यापि परत्राफलैव विद्या ॥ ॥अनुज्ञातश्चान्यस्मादधीयानान्न विद्यामादद्यात् ॥४१॥ ॥
गुर्वनुज्ञामन्तरेणान्यां धर्मवीयादपि गुरोर्विद्यां नाददीत अनुज्ञातस्यापाधीयीतेति स्मरणात् ॥ निषेधातिक्रमे फलमा
ह तदादानमस्य ब्रह्मस्तेयं नरकाय भवति ॥४२॥ ॥तस्मादननुज्ञाता या विद्या या अननुज्ञापयित्वा गुरोः सतयतो
कोशादादानमध्ययनं नरकफलकं ब्रह्मस्तेयं भवति ॥ गुरुद्रोहं निषेधति ॥ लौकिकं वैदिकं वापि तथाध्यात्मिकमेव वा । आ
ददीत यतो ज्ञानं न तं द्रुह्येत्कदाचन ॥४३॥ ॥लौकिकं काव्यालंकारादिविषयं ॥ वैदिकं सांगवेदविषयं ॥ आध्यात्मिकं वासि
ष्ठादिविषयं ॥ औपनिषदस्य वैदिकत्वेनैव सिद्धत्वात् ॥ एतदन्यतमं ज्ञानं यतो यस्मात् गुरोराददीतोत्पादयेत्तं कदाचन ॥ पि
लौकिकवैदिकविवादे न द्रुह्येत् ॥ द्रोहो निष्ठासंडनं ॥ त्रिष्वप्याचार्यातिशयमाह ॥ उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः
पिता ॥ ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतं ॥४४॥ उत्पादकः शरीरजनको मातापिता च ॥ ब्रह्मदाता गायत्र्युपदे
ष्टा नेत्रयोपि पितरः पात्रत्वात् तेषां मध्ये ब्रह्मदः पिता गरीयानतिशयेन गरिष्ठः ॥ अतिशयमेवाह ॥ ब्रह्मणि गायत्र्यां

म॰टी॰२॰
२७४

यज्ञन्मा विप्रस्य त्रैवर्णिकस्य तन्मेत्य मोऽन्नयोग्पतापातकत्वादिह च सर्वकर्माधिकारापादकत्वाच्छाश्वतं नित्यमित्युक्त
मधस्तात्। ब्रह्मजन्म जन्मनोऽनित्यतयोपपादयति॥ ॥कामान्माता पिता चैनं यदुत्पादयतो मिथः। संभूतिं तस्य तां वि
द्याद्यद्योनाविह जायते॥१४५॥ ॥यद्यस्मात्कारणान्मिथोऽन्योन्यं कामात्परस्पराभिलाषात्प्रवृत्तौ मातापितरावेनं पुत्र
मुत्निष्पादितया वाजिनवज्जनयतो न तु हेशपतया कामोपभोगस्यैवोद्देश्यत्वादतस्तस्य पुत्रस्य तां भूतिं संभवमात्रं
विद्यान्न तु नित्यामव्यभिचारिणीं मैथुनसंभवो पि पुत्रा उत्पन्नैः। तत्र हेतुः। यदिहास्मिन्संसारे पश्वादिसाधारण्ये
न योनौ जायत इति न तावच्छास्त्रेण हि कामुष्मिकफलसिद्धिः। किंतु॥ ॥उत्पादयति सावित्र्या सा सत्या साजरामरा
॥१४६॥ ॥वेदपारगोऽखिलवेदविदाचार्यस्तस्य वटोर्विधिवदुपनयनजन्म उत्पादयति संपादयति सा सम्यति नित्या
त्वकरणेनात्यतापन्नैः सर्वकर्माधिकारापादकत्वेन सैवाजरा चाविकृता यावज्जीवमेकरूपा सैवामरा परलोकसंबंधितया
श्चाविनाशिनी। तस्माद्ब्रह्मैव जन्मैव श्रेष्ठमिति। उक्तमर्थं श्रुत्योपसंहरति॥ ॥यश्चावृणोत्यवितथेन कर्णावदुःखं कुर्वन्नमृतं संप्रय
च्छन्। तं वै मन्येत पितरं मातरं च तस्मै न द्रुह्येत्कृतमस्य जानन्॥१४७॥ ॥वेदाध्यापनेनैहिकामुष्मिकसकलदुःखनिरासेनाध्य
नारमडुः

खं कुर्वंस्तेन तमोज्ञानाधिकारसंपत्त्या अमृतं मोक्षं महावाक्याध्यापनार्थप्रतिपादनद्वारा संशयच्छिन्नवितथेनावृतार्
ण्वं तयाय यथार्थेन वेदेनाध्येतुः कर्णौ य आवृणोति पूरयति तं पितृत्वेन पितरं मातृत्वेन मातरं च मन्येत तास्य कृतमुप
कारं वेदाध्यापनलक्षणं जानन् तस्मै गुरवे न द्रुह्येत्॥ ॥इति श्रीधर्माधिक
विष्णुस्मृतिविवृतौ श्रीमत्यां वैजयंत्यां त्रिंशोध्यायः॥ ॥गुरुभक्तेरर्थवादार्थमेकत्रिंशेनातिगुरूनाह॥ ॥त्रयः
पुरुषस्यातिगुरवो भवंति॥१॥ ॥त्रैवर्णिकप्रक्रमे पुरुषग्रहणं वर्णजातिप्राप्त्यर्थं तेन चतुर्णामपि वर्णानामनुलोम
जादिजातीनां चातिगुरवो गुरुभ्यो ज्येष्ठभ्रात्रादिभ्योतिशयिता अतिगुरवस्त्रयो भवंति तानाह॥ ॥माता पिता आचार्य
श्च॥२॥ ॥निषेक्तृत्वेन पितुः प्राधान्येप्यभ्यर्हितत्वान्मातुः पूर्वनिर्देशः। तेभ्यो माता गरीयसीति स्मरणात्। माता जननी
पिता निषेक्ता। आचार्य उक्तलक्षणः। यद्यप्ययं शूद्रादीनां न संभवत्युपनयनाभावात्तथापि याजकाभिप्रायेण तेषा
मपि त्रितयसंभवः॥ ॥तेषां नित्यमेव शुश्रूषुणा भवितव्यं॥३॥ ॥तेषां मात्रादीनां नित्यं सर्वकालं शुश्रूषणा सेवा नि
रतेन भाव्यं। एवकारो नियमचतुष्टयं गमयति। तच्च धर्मव्याख्योपाख्याने स्पष्टीकृतं॥ ॥यत्ते ब्रूयुस्तत्कुर्यात्॥४॥ ॥ते
मात्रादयो यत्कार्यं विहितमविहितं वा ब्रूयुस्तत्कुर्यात्। तच्च कुंतीवाक्यात्पंचभिर्द्रौपदीपरिणये जमदग्निवाक्या

त्परशुरामेणापिगुरुवाक्यमेवस्पष्टीकृतं॥ ॥तेषांप्रियहितमाचरेत्॥५॥ ॥तेषांमात्रादीनांप्रियमनुकूलंसद्यद्धितमाय
त्यांश्रेयस्करंकार्यंतदाचरेत्।परस्परविरोधेतुपैतृकंपरशुरामीयमातृवधलिंगात्॥ ॥नैतैरननुज्ञातःकिंचिद
पिकुर्यात्॥६॥ ॥तैर्मात्रादिभिरननुज्ञातोऽननुमतःकिंचिदल्पमपिकार्यंनकुर्यात्।उक्तोर्थोऽर्थवादमाह॥ ॥
एतएवत्रयोवेदाएतएवत्रयःसुराः।एतएवत्रयोलोकाएतएवत्रयोग्नयः॥७॥ ॥एतेमात्रादयएवत्रयोवेदाऋ
ग्यजुःसामाख्याअनुल्लंघनीयवाक्यत्वेनवेदसंस्तवः।त्रयःसुराब्रह्मविष्णुशिवाःपूज्यत्वेनसुरसंस्तवः।त्रयोलोका
नरसुरब्रह्मलोकास्तत्प्राप्तिसाधनत्वात्तत्संस्तवः।त्रयोग्नयोवह्नमाणानित्यपालनीयत्वेनाग्निसंस्तवः।अग्नित्रय
स्यविशेषनिर्देशेनतांस्तौति॥ ॥पितागार्हपत्योग्निर्दक्षिणाग्नित्वंपृथग्योनित्वेनदक्षिर्मातागुरुराहवनीयः
॥८॥ ॥पितुर्गार्हपत्यत्वमाहवनीययोनित्वेनतद्वयोनिरस्मीतिश्रुतेः।पूर्वोत्पन्नत्वेनचपूर्वनिर्देशः।मातुर्दक्षि
णाग्नित्वंपृथग्योनित्वेनदक्षिणाग्नेररणीपाणौकुरुतइतिमानवसूत्रात्।उलूखलमुसलाद्यनुपालक
त्वेनवा।उलूखलेमुसलेयच्चशूर्पेइत्यादिमंत्रलिंगात्।गुरोराहवनीयत्वंसर्वहवनीयद्रव्यभागित्वेन लब्धंचास्मै
निवेदयेदितिस्मरणात्।सर्वेतस्याहताधर्मायस्यैतेत्रयआदृताः।अनादृतास्तुयस्यैतेसर्वास्तस्याफलाःक्रियाः

वि॰टी॰
२७८

दन्वहमिति व्यवस्था॥ एतेन विप्रोष्य पादोपसंग्रहणं गुरुभार्याणां नैके युवतीनां व्यवहारज्ञानेनेति गौत
मीयो पि विकल्पो व्याख्यातः॥ तत्र प्रमाणमाह॥ सतां धर्ममनुस्मरन्निति॥ शिष्टाचार एवात्र व्यवस्थाहेतुः॥ गु
रुदारेष्विति सामान्योपादाने पि मात्रादीनामविप्रोष्याप्यन्वहं पादोपसंग्रहणं कार्यं॥ नाविप्रोष्य स्त्रीणा
ममातृ वा भार्याभगिनीनामिति गौतमीयात्॥ उपसंग्रहणं कुर्याद्भगिन्या मातुरेव च॥ तथा पितृव्यभार्याणां
समवाये न्वहं द्विज इति स्मृत्यंतराच्च॥ भ्रातृभार्यादीनां तु विप्रोष्यापि न पादोपसंग्रहणं॥ नोपसंग्रहणं भ्रातृ
न्नातृभार्यायाः श्वश्र्वाश्चेति गौतमीयात्॥ भ्रातृभार्यादीनां श्वश्र्वाश्च उपसंग्रहणं न कार्यं अभिवादनमात्रं तु
भवत्येव॥ तत्राप्यत्यंतगुरुस्थानीयानां मातुलान्यादीनामुपसंग्रहणं॥ अन्यासामभिवादनमिति हरदत्तः॥ मान्य
ताहेतन्नह॥ ॥वित्तं बंधुर्वयः कर्म विद्या भवति पंचमी॥ एतानि मान्यस्थानानि गरीयो यद्यदुत्तरं॥१६॥ ॥वित्तं
धनं बंधुरभिजनः॥ वयो जन्मतः कालः॥ कर्म श्रौतस्मार्तादि॥ विद्या वेदादिः॥ परिगणनादेव संख्यासिद्धौ पंचमीग्र
हणं वित्तबंधुकर्मजातिविद्यावयांसि मान्यानि परबलीयांसीति गौतमोक्तवयोबलीयस्त्वनिराकरणा
या॥ अतएव गौतमः॥ श्रुतं तु सर्वेभ्यो गरीय एतन्मूलत्वाद्धर्मस्येति॥ यत्तु विद्याकर्मवयोबंधुवित्तो मान्याययाक्रममि

राम
२७८

भोजनं उत्कर्षो महनं मत्सरः॥ ॥न चानभिप्रेतं॥१२॥ ॥गुरोरनभिप्रेतं अतिकालं न कुर्यात्॥ अतिकालं गुरोः
कृत्वा अस्माद्येव विशुध्यतीति योगिस्मरणात्॥ ॥गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः॥ पूर्णविंशतिव
र्षेण गुणदोषौ विजानता॥१३॥ ॥पूर्णतारुण्या गुरुभार्या पूर्णविंशतिवर्षेण शिष्येण गुरोः पादोपसंग्रह
णे स्त्री अदृष्टविशेषदोषो स्त्रीणां मोहकारकत्वं पुंसि इन्द्रियाणां दुर्निग्रहत्वं चेह लोके विजानता पादयोर्नोपसं
ग्राह्या॥ विंशतिवर्षत्वं व्यवहारक्षमत्वेन युवतीनां व्यवहारप्राप्तेनेति गौतमीयत्॥ तेन बालस्य युवत्यभि
वादने न दूनं हि अभिवादने न नायं दोषः। दोषो च स्त्रीभाव एव नारीणां नराणामिह दूषणं बलवानिन्द्रियग्रामो
विद्वांसमपि कर्षतीति मनुना स्पष्टीकृतो। पत्नीपदान्न शूद्रास्तु दासः इष्टदोषतोल्पात्॥ तर्हि कथमभि
वाद्येत्यत आह॥ ॥कामं तु गुरुपत्नीनां युवतीनां युवा भुवि विधिवद्वन्दनं कुर्यादसावहमिति ब्रुवन्॥१४॥
॥युवा शिष्यो युवतीनां गुरुपत्नीनां भुवि पादावनुपस्पृश्य असावहमिति अभिवादयेऽहं भो अमुकशर्म्मे
ति स्वनाम निर्दिश्य विधिवद्व्यत्यस्तपाणिनेत्याद्युक्तरीत्या कामं यथेच्छमभिवादं कुर्यात्॥१५॥ ॥
यद्यपि नो युवस्तु गुरुदारेषु पादग्रहणं निषिद्धं तत् द्विजो प्रवासादेत्य कार्यं यद्यपि तु अभिवादनं विहितं त

अधिकवयस्का मातेति। परपत्नी च या स्त्री स्यादसंबद्धा च योनितः। तां ब्रूयाद्भवतीत्येवं सुभगे भगिनीति चेति मानवात्॥ ॥नच गुरूणां त्वमिति ब्रूयात्॥८॥ ॥गुरूणां पूर्वोक्तानां त्वंकारमिति करणादेवंजातीयकमन्यदप्यपकर्षवचो हुंकारादि न ब्रूयात्। चकारादन्येषामपि मान्यानां प्रायश्चित्तस्मरणात्। तदेवाह॥ ॥तदतिक्रमे निराहारो दिवसान्ते तं प्रसाद्याश्नीयात्॥९॥ ॥तेषां गुरूणामतिक्रमे त्वंकारादिवचने आहाररहितः सायंतं गुरुं प्रसाद्यापराधं क्षमाप्याश्नीयात्। पुनस्तच्छब्दनिर्देशोऽन्यस्याप्यतिक्रमे उक्तप्रायश्चित्तविधानार्थः। गुरुं हुंकृत्य विप्रं निर्जित्य वादतः। वध्वा वा वाससा क्षिप्रं प्रसाद्योपवसेद्दिनमिति योगिस्मरणात्। दिवसान्ते ऽशनविधानाद्दिवसे द्वौ निराहारवचनं यावत्प्रसादनं निराहारत्वार्थं। कृते निःसंशये पापे न भुंजीतानुपस्थित इति लिंगात्॥ ॥नच गुरुणा सह विगृह्य कथाः कुर्यात्॥१०॥ ॥गुरुणा सह विगृह्य विजिगीषया कथा जल्पवितंडा न कुर्यात्। चकारादन्येनापि विप्रेण। विप्रं निर्जित्य वादत इति स्मरणात्॥ ॥नचैवास्य परिवादं॥११॥ ॥अस्य गुरोः परीवादं दोषाभिव्यक्तिं न कुर्यात्। चकारान्निंदादिग्रहणं। परीवादात्खरो भवति निंदकः परिभोक्ता कृमिर्भवति कीटो भवति मत्सरीति मानवात्। सद्दोषोक्तिः परीवादः। असद्दोषोक्तिर्निंदा। वचयित्वा भोजनं परि

मंतव्यो मनुष्य इति भूपतिरीरितिमानवात्॥ ॥हीनवर्णानां गुरुपत्नीनां दूरादभिवादनं न पादोपस्पर्शनं॥५॥ ॥
हीनवर्णाः क्षत्रियावैश्या बहुवचनान्मूर्द्धावसिक्ताद्याः न शूद्रा पत्नीत्वविशेषणात्तासां दूरादेवाभिवादनं कार्यं
न पादावुपस्पृश्य प्रत्युत्थानं त्वनुवर्त्तते। असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैरितिमानवात्। शूद्रायां तु प्र
त्युत्थानमेव नाभिवादनं। उदक्यां सूतिकां शूद्रां भर्तृघ्नीं ब्रह्मघातिनीं। अभिवाद्य द्विजो मोहाद्दिरात्रेण विशुध्यती
ति शातातपीयात्। गुरुशुश्रूषणं कामी चेत्तत्पत्नीष्वपवादमाह॥ ॥गुरुपत्नीनां गात्रोत्सादनांजनकेशसंयमनपा
दप्रक्षालनादीनि न कुर्यात्॥६॥ ॥अत्र पत्नीपदात्रैवर्णिकत्वमेपि न शूद्रापरिहारः दृष्टदोषस्तत्रापि समानत्वा
त्। गात्राणामुत्सादनमुद्वर्त्तनमभ्यंजनं च। अंजनं नेत्रयोः कज्जलादिना। केशानां संयमनं प्रसाधनं कबरीबंध
श्च। पादयोः प्रक्षालनमप्स्वादिना घर्षणेन मलापकर्षणं। आदिपदात्स्नापनादिग्रहणं। नोच्छिष्टाशनस्नापनप्र
साधनपादप्रक्षालनोन्मर्दनोपसंग्रहणानीति गौतमीयात्। गुरुपत्नीनामिति शेषः॥ ॥असंस्कृतापि परप
त्नी भगिनीति वाच्या पुत्रीति मातेति वा॥७॥ ॥असंस्कृता अपरिचिता। अपिशब्दादन्यसंबद्धा च परपत्नी न परद
स्यादिः भगिन्यादिशब्दैर्वाच्या। व्यवस्थितश्चायं विकल्पः। समानवयस्का भगिनीति न्यूनवयस्का पुत्रीति

न्याः। तेन च प्रत्युत्थानाभिवादनादिकं सिध्यति॥ ॥पत्न्य एतेषां सवर्णाः॥२॥ ॥एतेषां राजादीनां सवर्णाः पत्न्यस्त्र
तद्वदेव मान्याः। सवर्णाग्रहणादसवर्णासु वक्ष्यति॥ ॥मातृष्वसा पितृष्वसा ज्येष्ठा स्वसा च॥३॥ ज्येष्ठेति ति
सृणामपि विशेषणं। पितुर्भगिन्यां मातुश्च ज्यायस्यां च स्वसर्यपीति देवलीयात्। तेन स्वापेक्षया
ज्येष्ठा एतास्तिस्रोप्याचार्यवन्मान्याः। ज्येष्ठेति विशेषणात्कनिष्ठास्वभ्युत्थानमेव। चकारात्पि
तामह्यादीनां ग्रहणं। माता मातामही चैव तथैव च पितामही। मातृष्वसा मातुलानी श्वश्रूर्धात्री पि
तृष्वसा गुरुस्त्री मातृवत्स्मृतेति स्मरणात्। माता च सपत्नमाता ज्ञेया मातृवदित्यतिदेशात्॥ ॥श्व
शुरः पितृव्यो मातुलर्त्विजौ कनीयसां प्रत्युत्थानमेवाभिवादनं॥४॥ श्वशुरादीनां स्वापेक्षया कनीयसां
प्रत्युत्थानमेवाभिवादनकार्यं कारि न पुनरभिवादनं कार्यं। किंत्वसावहमिति ब्रूयात्। मातुलांश्च पि
तृव्यांश्च श्वशुरानृत्विजो गुरून्। असावहमिति ब्रूयात्प्रत्युत्थाय यवीयसः इति मानवात्। गुरवो ज्ञानवृद्ध
दयः। मर्षिथिष्यार्थं नंतो गुरव इत्युपक्रम्य ज्ञानवृद्धतपोवृद्धयोरिति हारीतस्मरणात्। तयोश्च क
निष्ठयोरपि संभवात् परिगणनं राजादिनिवृत्त्यर्थं तेषां कनीयसामपि मान्यत्वात्। बालोपि नाव

॥८॥ ॥यस्यैतेत्रयोमान्यापित्रादयआदृतास्तस्यसर्वेविधर्माआदृताः अनादृतस्यसर्वधर्ममूलत्वात्त्रयाणां॥ यस्यै
तेत्रयोनादृताअनादरणीयास्तस्यसर्वाःकृष्याद्यालौकिक्योनित्यनैमित्तिकाद्यावैदिक्यश्चक्रियानिःफलाः
मात्राद्यनादरणोत्पन्नाधर्मेणप्रतिबंधात्फलजननायोग्याः॥ मात्रादिशुश्रूषाफलमाह॥ ॥इमंलोकंमातृभक्त्या
पितृभक्त्यातुमध्यमं॥ गुरुशुश्रूषयात्वेवब्रह्मलोकंसमश्नुते॥१॥ इमंमनुष्यलोकंमातृभक्त्या॥ मध्यमंदेवलो
कंपितृभक्त्या॥ गुरोराचार्यस्यशुश्रूषयातुब्रह्मलोकमेवप्राप्नोति॥ ॥ ॥

विष्णुस्मृतिविवृतौश्रीमत्यांवैजयंत्यामेकत्रिंशोध्यायः॥ ॥द्वात्रिंशेनगुरुधर्मातिदेशविष
यानाह॥ ॥राजर्त्विक्श्रोत्रियाधर्मप्रतिषेद्धृउपाध्यायपितृव्यमातामहमातुलश्वशुरज्येष्ठभ्रातृसंबंधिनश्चाच
र्यवत्॥१॥ ॥राजाभिषिक्तःक्षत्रियः॥ ऋत्विगुक्तलक्षणः॥ श्रोत्रियएकशाखाध्यायी॥ अधर्मप्रतिषेधीनि
षिद्धकर्मणोनिवर्त्तकः॥ उपाध्यायउक्तलक्षणः॥ पितृव्यःपितृभ्राता॥ मातामहोमातुःपिता॥ मातुलोमातृभ्रा
ता॥ श्वशुरःपत्नीपिता॥ ज्येष्ठभ्राताअग्रजःसोदर्यः॥ संबंधिनौपुत्रदुहितृश्वशुरौ॥ चकारात्पितामहादीनांग्रहणं॥
पितामहोभयामाताचान्नदातातथैवच॥ वर्णज्येष्ठःपतिश्चैवसर्वेतेगुरवःस्मृताइतिस्मरणात्॥ एतेआचार्यवन्मा

तियोगिस्मरणं तत्रापि पूर्वपूर्वपाठक्रमेणैव बलवत्त्वमिति ध्येयं॥ संनिधावप्येतत्कष्टो गौतमोक्तजातिपरिग्रहायाए
तान्यात्मनोऽतिरिक्तानि मानस्याभिवादनादेः प्रत्येकं स्थानानि निमित्तानि। परस्परसमवाये तूत्तरोत्तरं गरीयो वेदि
तव्यं। अयमर्थः॥ अल्पधनस्य बहुधनेऽल्पबंधोर्बहुबंधुर्मान्य इत्यादि धनवद्बहुबंधुमतोः समवाये बंधुमान्। बंधुमद्व
योवृद्धयोः समवाये वयोवृद्धो मान्य इत्यादि। यदा तु द्वयोरपि तुल्यं धनादि तदोत्तरोत्तरगुणयोगेन मान्यस्तदाह मनुः।
पंचानां त्रिषु वर्णेषु भूयांसि गुणवंति च। यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गत इति। भूयांसि धनवंधू। धनवंधु
वयांसीत्यादि। तेषामपि तौल्ये धनादावेव गुणो वाणिज्याद्युपायेभ्यः प्रतिग्रहादिरेव श्रेष्ठः। दशमीं नवत्यूर्ध्ववय
सोऽर्वलीयस्त्वे उदाहरणं प्रत्युदाहरणं चाह॥ ॥ब्राह्मणं दशवर्षं तु शतवर्षं तु भूमिपं। पितापुत्रौ विजानीयाद्ब्राह्म
णस्तु तयोः पिता॥१७॥ ॥दशवर्षत्वमुपनयनोर्ध्वकालताप्रदर्शनाय। शतवर्षत्वं च मान्यतातिशयप्रदर्शना
य। शूद्रोऽपि दशमीं गत इत्यपि ग्राह्यात् क्षत्रियादीनां सुतरां तत्सिद्धेः। चकाराद्वैश्यशूद्रयोर्ग्रहणं। तेनाल्पवयाश्च
ब्राह्मणो वृद्धतमानामपि क्षत्रियादीनां पितेवाभिवादनीय इति। त्रैवर्णिकसाधारणं मान्यतानिमित्तमुक्त्वा प्रतिव
र्णमसाधारणं तदाह॥ ॥विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः। वैश्यानां धान्यधनतः शूद्राणामेव ज

न्मतः॥१८॥ ॥ज्ञानंवेदादिविद्याविषयकंये।वीर्यंयुद्धादौशौर्यंधान्यधनेप्रसिद्धं।जन्मोत्पत्तिः।एतैःक्रमेणविप्रादी
नांज्यैष्ठ्यं।एवकारोविप्रादिभ्यआहृत्यार्थः।तेनतेषांज्ञानादिनैवेतिनियमेनवित्तादीनामनियतत्वंगम्यते।ततश्चवि
त्तादिचतुष्टयवतोपिकेवलविद्यावानेवज्येष्ठइतिसिध्यति।नहायनैर्नपलितैर्नवित्तेर्नचबंधुभिः।ऋषयश्चक्रि
रेधर्मंयोनूचानःसनोमहानितिमानवात्॥ ॥३

विष्णुस्मृतिविवृतौश्रीमत्यांवैजयंत्यांद्वात्रिंशोध्यायः॥ ॥प्रक्रांतेआचारकांडेब्रह्मचारिव्रतलोपप्रायश्चि
त्तमुक्तंतत्प्रसंगाद्बुद्धिस्थंप्रायश्चित्तकांडंप्रारिप्सुस्तदुपोद्घातंत्रयस्त्रिंशेनाह॥ ॥अथपुरुषस्यकामक्रोधलो
भाख्यंरिपुत्रयंसुघोरंभवति॥१॥ ॥अथेतिप्रकरणांतरप्रस्तावः।पुरुषस्यमनुष्यस्यकामादिसंज्ञकंसुघोरं
दुर्जयंरिपुत्रयंभवतीतिप्रायोवादः।दोषबहुलत्वान्मनुष्याणां।तत्रकामोभिलाषः।क्रोधोजिघांसाहेतुरमर्षः
।लोभोलिप्सातिशयः॥ ॥परिग्रहप्रसंगाद्विशेषेणगृहाश्रमिणः॥२॥ ॥परिग्रहोगृहदारादिकार्यतांप्रद
र्शःस्वीकारस्तत्रप्रसंगोभिनिवेशस्तस्माद्धेतोर्गृहाश्रमिणोविशेषेणान्यापेक्षातिशयेनकामादयोभवंतीति
स्वभावानुवादः।कामादिकार्यतांप्रदर्शयत्रैवपातकगणस्योद्देशमाह॥ ॥तेनायमाक्रांतोतिपातकमहापा

तकानुपातकोपपातकेषु प्रवर्त्तेते॥३॥ ॥तेन कामादिरिपुत्रयेणाक्रांतोभिभूतोयं मनुष्योऽतिपातकादौ प्रवर्त्तते।अ
तिशयेन पातयति नरक इत्यतिपातकमतिशयश्च कल्पोपभोग्यत्वं तेन कल्पोपभोग्यमतिपातकं मन्वंतरोपभो
ग्यं महापातकं मन्वंतरोपभोग्यमेवानुपातकं चतुर्युगोपभोग्यमुपपातकमिति वदंति।अत्र प्रथमोद्दिष्टान्नरका
तिशयात्प्रायश्चित्तातिरेकाच्च महापातकादतिपातकं गरीयः महारुद्राद्भवा।तथा च हारीतः पंचविधमशुभं भ
वति आसंगिकोपपातकपातकमहापातकातिपातकानीति।मूलवचने पूर्वपूर्वं गरीयो न तु उत्तरोत्तरमिति।आसं
गिकं जातिभ्रंशकरादिपंचकं।पातकमनुपातकपर्यायः।महापातकतुल्यानि पापान्युक्तानि यानि तु।तानि पा
तकसंज्ञानि तन्न्यूनमुपपातकमिति स्मरणात्।यत्तु स्त्रीगोवृषलवैश्यक्षत्रियघाती सोमविक्रयी शूद्रसहभो
जी कन्यादूष्यगारदाही वृषलीपतिरग्न्युत्सादी चेति पातकानीति पैठीनसिना पृथक्पातकानि परिगणिता
नि तत्पापपर्यायत्वेन न संज्ञाकारणाय।उपपातकादिषु पाठेन तत्तत्संज्ञावरुद्धत्वात्।न च तुल्यकालनरक
फलत्वादेकप्रायश्चित्तत्वाच्च महापातकानुपातकयोरभेदापत्तिः।नरकानंतरोत्पन्नयोनिदिष्टाभ्यासभेदं कल्प्य
त्।किंच॥ ॥जातिभ्रंशकरेषु संकरीकरणेष्वपात्रीकरणेषु च॥४॥ ॥एते त्रयः संज्ञाशब्दा योगरूढास्तत्र जाते

रमिजनसम्बहाङ्कशामधः पातं कुर्वन्तीति जातिभ्रंशकराणि॥ असंकरं ब्राह्मणादिवर्णानपि संकरं संक
रसमानधर्माणं कुर्वन्तीति संकरीकरणानि॥ अनपात्रं प्रतिग्रहाद्यर्हमप्यपात्रं प्रतिग्रहाद्यनर्हं कुर्व
न्तीत्यपात्रीकरणानि॥ ॥मलावहेषु प्रकीर्णकेषु च॥५॥ ॥पूर्ववदेतावपि योगरूढौ शब्दौ मलमावहन्ती
ति मलावहानि। अमलिनं मलिनं कुर्वन्ति मलिनीकरणानीति वा। संज्ञान्तरं प्रकर्षेण कीर्णं व्याकुलमनायासे
पपन्नं प्रकीर्णकं तेषु च प्रवर्त्तते। उक्तार्थोपसंहारे गीतश्लोकमाह। ॥त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्॥६॥ ॥कामादि त्रिकमिदमुक्तपातकोत्पादनेन तत्फलीभू
तवह्न्यमानानरकस्य द्वारं प्रवेशनोपाय इत्यनुवादस्तस्मादेतत्त्रयं त्यजेदिति विधिः॥ ॥

विष्णुस्मृतिविवृतौ श्रीमत्यां वैजयन्त्यां त्रयस्त्रिंशोऽध्यायः॥ ॥उद्दिष्टातिपातक
स्य स्वरूपं प्रायश्चित्तं च चतुस्त्रिंशोनाह॥ ॥मातृगमनं दुहितृगमनं स्नुषागमनमित्यतिपातकानि॥१॥ ॥
माता जननी मातृस्यांगमं इति श्रुत्यन्तेः दुहिता सवर्णोढस्त्रीप्रसूता स्नुषा सवर्णौरसपुत्रपत्नी सवर्णा। पत
सांगमनं प्रत्येकमतिपातकं। हारीतोप्याह। मातृगमनं स्नुषागमनं चेत्यतिपातकानीति। इतिकाराद्भगिनीग

मनं चाजनन्याश्च भगिन्याश्च स्वसुतायां तथैव च। स्नुषायां गमनं चैव विज्ञेयमतिपातकमिति कात्यायनस्मरणा
त्। तत्र प्रायश्चित्तमाह॥ ॥अतिपातकिनस्त्वेते प्रविशेयुर्हुताशनं। न ह्यन्या निष्कृतिस्तेषां विद्यते हि कथंचन
॥२॥ ॥उक्तपातकयोगिन एवातिपातकिनोऽतिशयितपातकांतरयोगिनः इत्यभिप्रेत्यैतच्छब्दस्तेन चैत एव च
त्वारोऽप्यतिपातकिनोऽग्निप्रवेशं कुर्युः। यतः कथंचनेऽज्ञानतोऽज्ञानतः सकृदसकृद्वा कृतेऽस्मिन्पापे तेषामति
पातकिनामन्याग्निप्रवेशातिरिक्ता व्रतादिरूपा निष्कृतिः प्रायश्चित्तं नास्ति। अत एव संवर्त्तः। मातरं यदि गच्छे
त्तु स्नुषां वा पुरुषाधमः। न तस्य निष्कृतिः शक्या स्वकां दुहितरं तथेति। तथा सद्याङ्गिनीमपि। न निष्कृतिरनेन
शरीरेणेत्यर्थः। ननु मातरं यदि गच्छेत्तु भगिनीं स्वां सुतां तथा। एतास्तु मोहितो गत्वा त्रीणि कृच्छ्राणि संचरेत्। चांद्रा
यणत्रयं कुर्यात् छिश्नच्छेदेन शुध्यतीति पराशरेणाज्ञानतो व्रतरूपप्रायश्चित्ताभिधानादसंगतमिदमिति चेन्न। मैवं।
तस्य गमनशब्दस्यालीनस्मरणादिविषयत्वात्। यथोक्तं स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणं संकल्पोऽध्यव
सायश्च क्रियानिर्वृत्तिरेव च। एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः। विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणमि
ति। तत्राद्यं व्रतमल्पत्वादप्रवर्त्तकस्मरणादिपंचविधापराधविषयं द्वितीयं पूर्वस्माद्गुरुत्वात्प्रवर्त्तकसंकल्पा

द्विविधयां तृतीयं महत्वात् क्रियानिर्हृतिविषयमिति न विरोधः। नन्वेवमपि शिरश्छेदे पातकिजीवनसंभवान्नाग्ने
निशरीरे तातिविरुद्धमेवेति चेत्। न। तस्य लिंगप्रवेशमात्रविषयत्वकल्पनात्। अतः सर्वस्मिन्नपि पक्षेऽग्निप्र
वेश एवातिपातकिनां। तथा च भविष्यपुराणे। अतिपातकयुक्तानां प्राणांतिकमुदाहृतमिति। कात्यायनो
पि। अतिपातकिनस्त्वेते प्रविशेयुर्हुताशनमिति। हारीतोऽपि। सद्योऽग्निप्रवेशादतिपातकिनश्यति। इत्यंतद्
प्यनुभज्यते। सद्योऽतिपातकित्वं सहस्रं मनेनापीति तत्राप्यग्निप्रवेश इति व्याख्येयं। न सद्योऽग्निप्रवेशा दिति
तस्य न मुंजीतानुपस्थितइति सामान्येनैव प्राप्तत्वादतिपातकिपदवैयर्थ्यात्। नापि सद्यः शुद्ध्यतइति। मरणान्त
घः शुद्धेरर्थसिद्धत्वात्। तस्मादुक्तमेव साधु। षट्त्रिंशन्मतेऽपि। पितृभार्यां तु विज्ञाय सवर्णां योऽधिगच्छति। जन
नीं चाप्यविज्ञाय नामृतः शुद्धिमाप्नुयादिति। जननी दुहित्राद्युपलक्षणं। मातरं सुतपत्नीं च स्वसारं स्वसु
तां तथा। गत्वा तु प्रविशेदग्निं नान्या शुद्धिर्विधीयतइति चतुर्विंशतिमतात्। कामतो वासिष्ठं। निष्कालको घृ
ताभ्यक्तो गोमयाग्निना पादप्रभृत्यात्मानमवदाहयेदिति। अत्र मात्रादिशब्दानां संबंधिशब्दतया स्वप्रतियोगि
कं मातृत्वादि तद्रूपमनेनतासामपि तद्देवपातकं तदेव च प्रायश्चित्तमिति ध्येयं। एवं दोषस्य शुद्धिः स्यात्पतितानामुद

हृतास्त्रीणामपि त्रसक्ता नामेष एव विधिः स्मृत इति कात्यायनस्मरणात्। यत्तु पितुः स्वसारं मातुश्च मातुलानीं स्नु
षामपि। मातुः सपत्नीं भगिनीमाचार्यतनयां तथा। आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पग इति। यच्च सखिभार्याकु
मारीषु सयोनिष्वंत्यजासु च। सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतमिति। यच्च पितृव्यसखिशिष्य[illegible]भगिनीत
त्सखी स्नुषा दुहिताचार्यभार्या च सगोत्रा शरणागता। आसामन्यतमां गच्छन् गुरुतल्पग उच्यत इति योगिनारदा
भिहितं महापातकसमतया सुतादिगमनस्यानुपातकत्वं प्रतीयते। यच्च छित्वा लिंगं वधस्तस्याः सकामायाः स्त्रि
या अपि। शिष्यस्योत्कर्तनात्र नान्यो दंडो विधीयत इति योनोगिरदाभ्यां व्यवायश्चित्तमुक्तं तदसवर्णदुहितृसवर्णस
पत्नभगिन्यनौरसपुत्रभार्याविषयं द्रष्टव्यं। मातुः सपत्नीं भगिनीमिति साहचर्याद्भगिनी सापत्नतायाः सगोत्रासु सु
तस्त्रीष्विति साहचर्याच्च गोत्रमात्रसंबंधनौरसपुत्रभार्याश्च सिद्धेः। यत्तु चंडालीपुल्कसीम्लेच्छीस्नुषां च गिनीस
खीं। शिष्यभार्यां गुरोर्भार्यां गत्वा चांद्रायणं चरेदिति बृहद्यमोक्तं। यच्च भगिनीं मातुराप्तां च स्वसारं चान्यमातृजां।
एता गत्वा स्त्रियो मोहात् तप्तकृच्छ्रं समाचरेदिति संवर्तोक्तं तप्तकृच्छ्रस्तु भयमप्यसवर्णादिविषया कामतो रेतः
सेकादर्वाग्निवृत्तौ द्रष्टव्यं। एवमन्यान्यपि वाक्यस्याप्यानि॥ ॥

विष्णुस्मृतिविहितो श्रीमत्यां वैजयंत्यां चतुर्विंशोऽध्यायः॥ ॥महापातकस्वरूपं प्रायश्चित्तं च पंचविंशेनाह॥
॥ब्रह्महत्या सुरापानं ब्राह्मणसुवर्णहरणं गुरुदारगमनमिति महापातकानि॥१॥ ॥ब्राह्मणस्य हत्या हननं प्र
ाणवियोगफलको व्यापारः साक्षात्परंपरासाधारणः प्रायश्चित्ततारतम्यात्तत्तरतमभावापन्नः। यथापस्तंबः।
प्रयोजयितानुमंता कर्ता चेति स्वर्गनरकफलेषु कर्मसु भागिनो यो भूय आरभते तस्मिन् फलविशेष इति।
तत्र स्वतंत्रः कर्ता तत्प्रवर्तकः प्रयोजकः। प्रवृत्तप्रवर्तकोनुमंता। चकारादनुग्राहकनिमित्तिनोर्ग्रहणं। वध
सहायोनुग्राहको मरणहेतुमन्युत्पादको निमित्तीति। तत्र मनुः। बहूनामेककार्याणां सर्वेषां शस्त्रधारिणां। य
द्येको घातयेत्तत्र सर्वे ते घातकाः स्मृताः इत्यनुग्राहकं लक्षयति। निमित्तिनं च विष्णुराह। आक्रुष्टस्ताडितो वा
पि धनैर्वा विप्रयोजितः। यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातिनं। ज्ञातिमित्रकलत्रार्थं सुहृत्क्षेत्रार्थमेव च
। यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकमिति एवं पंचविधो वधः। तदवांतरभेदाश्चान्यतोवसेयाः। तानाह
पैठीनसिः। हंता मंतोपदेष्टा च तथा संप्रतिपादकः। प्रोत्साहकः सहायश्च तथा मार्गानुदेशकः। आश्रयः शस्त्र
दाता च भक्तदाता विकर्मिणां। उपेक्षकः शक्तिमांश्च दोषवक्तानुमोदकः। अकार्यकारिणस्तेषां प्रायश्चित्तं प्र

प्रकल्पयेदिति। व्यापाराधिक्ये दोषाधिक्यं तन्न्यूनतेति शापस्थित्ते गुरुलघुभावः। विकर्मिणामिति सामान्योपादानात

प्रमात्रेयं कर्तृभेदो व्यवस्थेयः। क्वचिद्दोषापवादमाह विष्णुः। उद्दिश्य प्रकुपितो हत्वा तोषितः श्रावयेत्पुनः। तस्मिन्मृ

ते न दोषोऽस्ति द्वयोरुक्त्वा श्रावणे कृते इति। भविष्येऽपि। पुत्रः शिष्यस्तथा भार्या शासतश्चेद्विनश्यति। न शास्ता त

त्र दोषेण लिप्यते सुरसत्तमेति। तथा। असंबद्धेन यः कश्चिद्द्विजः प्राणान्परित्यजेत्। तस्यैव तद्भवेत्पापं न

तु यं परिकीर्तयेदिति। तथाततायिवधेऽपि न दोषः। गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं। आततायिनमा

यांतं हन्यादेवाविचारयन्निति विष्णुपुराणात्। अस्यापवादः। नाततायिवधे दोषोऽन्यत्र गोब्राह्मणेभ्य इति सुमं

तुः। उपकारक्रियायां मरणेऽपि न दोषः। क्रियमाणोपकारे तु मृते विप्रे न पातकमिति योगिस्मरणात्। तथा बं

धने गोश्चिकित्सार्थं इत्यादि वक्ष्यते। सुरापानविंशाध्यायोक्ता। त्रिविधा। तस्याश्चातुर्वर्णिकैः पानं कंठाधोनयनं। त

त्र साक्षात् द्रव्यांतरसंसृष्टाया अल्पाया अधिकाया वा पतत्त्वं चातुर्वर्णिकाभिप्रायेण। ब्राह्मणानां तु मद्यमा

त्रपाने महापातकं ब्रह्महा मद्यपस्तेन इत्युपक्रम्य एते महापातकिन इति योगिना मद्यपानमात्रस्य महापात

कत्वाभिधानात्। तत्र नित्यं मद्यं ब्राह्मणो वर्जयेदिति मद्यमात्रनिषेधाद् कार्यमन्यत्तु याद्वा ब्राह्मणो मदमोहि

तइतितद्धेतोश्च ब्राह्मणमात्रविषयं पर्यवस्यतीति। इतरेषां तदभ्यनुज्ञानात्। एवं चानुपतस्क यो विप्रा मद्यं मोहाद्वि
षेवते। तस्य कृच्छ्रत्रयं कुर्यान्माता भ्राता पिताथवेति प्रायश्चित्तमुपपद्यते महापातकत्वात्। अन्यथापातको
तराणां कामचारत्वेनोक्तप्रायश्चित्तासंगतेः। तथा च देवलः। स्यात्कामचारवादोक्तिर्महतः पातकादृते इति। न
चानुपतवाक्ये मद्यशब्दः सुरापरो नित्यवाक्ये पितृश्च संभवात्। सुरापाने पादप्रायश्चित्ताम्नानात्कृच्छ्रत्रयासंग
तेश्च। न वा सोपपातकत्वस्मरणविरोधः द्विजादीनामभ्यनुज्ञानेन विप्राणां महापातकत्वेन मूर्द्धावसिक्ता
दीनां तूपपातकत्वोपपत्तेः स्तान्येतितन्निषेधाभ्यनुज्ञानयोरन्यतरस्याप्यभावादिति सिद्धं विप्राणां मद्यपान
मात्रं महापातकमित्यास्तां विस्तरेण तदेतत्स्पष्टीकृतं भविष्ये इति शेषः। सुरापाने मद्यस्य च सुराधिपादिजोत्त
मानां मे वोक्तः। स तत्र गौतमादिभिरिति। ब्राह्मणस्वामिकस्य सुवर्णस्य हरणमपहारः शास्त्रीयस्त्वहेतुं विनो
पादानं। न ब्राह्मणादेद्रव्यांतरसंसृष्टस्य वा ब्राह्मणग्रहणाद्ब्राह्मणी सुवर्णस्तेयेन महापातकं ब्राह्मणो वधव
दित्यपरार्कः। ब्राह्मणीवधस्योपपातकत्वोक्त्यात त्रिप्रतिर्न प्रक्तते तदभावात्। सुवर्णशब्दश्चात्र जातिमात्रव
चनः। रुक्मस्तेयी सुरापश्च हेमहारी च कुनखी। ब्राह्मणस्वर्णहारी तु रुक्मस्तेयस्य थविग्रहाः रुक्मस्तेयसंभ

स्मृतमित्यादिग्रंथे योगिमनुविश्वामित्रादिभिर्जातिमात्रोपादानात्। परिमाणविशिष्टद्रव्यवचने गौरवात् स्वर्णसु
वर्णकनकमित्यादिकोषविरोधाच्च। न च ते सुवर्णस्तेयोऽष्टौ इति परिभाषया विशिष्टवचनत्वं हेमरुक्मादिशब्देषु तु त
दप्रवृत्तेः स्वसंज्ञया विधानाभावात्। तदुक्तं चन्द्रिकायां गुणवृद्धीत्यत्र गुणवृद्धी स्वसंज्ञया विधीयमाने इक एव स्थाने
स्तु इति। एतेन संज्ञाकरणस्य विधिनिषेधमंतरेणानुपपद्यमानत्वाद्विशिष्टार्थत्वसंभवे इत्यपास्तं। न च सु
वर्णशब्दैकवाक्यतया हेमादिपदेष्वपि विशिष्टवचनत्वं हेमादिपदैकवाक्यतया सुवर्णपदस्यापि जातिवचनत्व
संभवेन विनिगमनाविरहात्। वस्तुत जातिवैशिष्ट्ययोः संदिग्धस्य सुवर्णपदस्यासंदिग्धजातिमात्रवचनेन हे
मादिपदेनैव पुरोडाशपदस्येव मेध्यपदेन निर्णयो नैय्यायिकः। न च पुल्लिंगं विनिगमकं ब्राह्मणसुवर्णहरणे सु
वर्णस्तेयहृद्विज इत्यादौ समासेन तदनिर्धारणात्। किंच विशिष्टवचनत्वे सुवर्णपर्यायो विस्तशब्दोपि क्वचित्स्
युज्येत सुवर्णविस्तो हेम्नोऽक्ष इति कोशात्। न चासौ क्वचिच्छ्रूयते। श्रूयते तु हेमादिशब्द एव ततोपि जातिवचनत्वं
। किंचासुवर्णस्यापहरणे वत्सरं यावद्व्रती भवेदित्यस्य प्रायश्चित्तस्यासंगतिः। किंचिन्मूने सुवर्णविषयत्वे तु ऊर्ध्वशा
णांतिकं ज्ञेयमित्यस्यासंगतिः। किंचिन्मूनाद्यर्धत्वविवक्षायामुभयत्र लक्षणापत्तिः। न चैवं माषाद्यपहारेऽतिमहा

पातकत्वापत्तेः। इष्टापत्तेः। सुवर्णस्यापहरणे माषके नापि पातकं। निष्कमात्रापहारे तु न विघ्नः किं भविष्यतीति
चेद्धि शङ्क्यते निष्कापहारे महापातकाधिकपातकाभावेन विस्मयकरणं माषापहार एव पातकाशङ्के
न महापातकाभिधानात्। अन्यथा पापसाम्याभावाद् द्विकस्य महापातकस्य निष्कापहारे संभवेन विस्मय
कारणं संगतेः। माषात्मकात्तु न महापातकं वचनाभावात्। किं तूपपातकमेव स्तेयसामान्यांतर्भावात्। प
रिमाणांविशेषेण ग्राह्यत्वे तु विशेषो वाचनिक एव। अपहृत्य सुवर्णं तु ब्राह्मणस्य सुराधिप। पंचनिष्क
प्रमाणं नु राजा नक्षत्रियोऽर्जेदिति भविष्यपुराणीयवचने सुवर्णशब्दादेव परिमाणलाभे पृथक्परिमाण
वचनं विरुध्येत प्रायश्चित्तविशेषादिप्रयोजनांतराभावात्। तस्माज्जातिवचन एवात्र सुवर्णशब्दो न परिमा
णविशिष्टे मवचनं इति परिमाणं वचनांतरादवगंतव्यं तच्चाग्रे वक्ष्यत इति सर्वं सुस्थं। गुरुर्निषेकासात्।
निषेकादिकृद्गुरुरिति त्रिकांडीस्मरणात्। एवं चात्र वर्णसाधारणः। तद्दारेषु सवर्णासवर्णासाधारणेषु
गमनं योनौ रेतःसेकः। यत्तु स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छतीति याज्ञवल्क्यीयं तत्र शक्तोपयोगि
त्वर्थस्य पितुः द्वितीयादेश्च वेदाध्यापकत्वाभावेन गुरुत्वापातात्। यश्च निषेकादीनि कर्माणि यः करोति

यथाविधिसंभावयतिचान्नेनसविप्रोगुरुरुच्यतइतिमानवंतदपिनप्रकृतोपयोगि अपोत्रकेपितर्यप्यामत्वा
त्रूपतेनआचार्यस्तुपिताज्येष्ठोभ्राताचैवमहीपतिः।मातुलःश्वशुरस्त्राताामातामहपितामहौ।वर्णज्ये
ष्ठःपितृव्यश्चपुंस्येतेगुरवोमाताइतिदेवलोक्तमपिपरासंनिषेकरूपशक्तिनिमित्ताभावात्।नचानेका
र्थत्वं।आचार्यस्त्रीपुत्रशिष्यभार्यासुचैवमित्यातिदेशासंभवात्।नचासवर्णास्त्रीविषयोतिदेशइतिवाच्यंप्र
माणाभावादन्योन्याश्रयाच्च।आचार्यादीनांगुरुपदशक्यत्वेतिदेशस्यासवर्णस्त्रीविषयत्वंतद्विषयत्वेचातिदे
शस्याचार्यादौगुरुपदशक्यत्वमिति।तस्मात्स्मृतीनांस्वशास्त्रेव्यवहारसिद्ध्योपरिभाषात्वंशक्तिग्रहस्तुको
शादेवेत्यलंवक्तुंना।इतिकारणंपातकांतरेमहापातकत्वनिरासाय।यत्तुच्यवनेनब्रह्महत्यासुरापानंगुरुतल्प
गमनंसुवर्णाहरणंद्विजातीनांमहापातकानि।अदंड्यदंडनंब्रह्महत्यागुरुशय्यारोहणंयुधिलायनंत्रिविपस्य।
मानतुलान्तत्वंचैश्यस्यमांसविक्रयोब्रह्महत्याब्राह्मणीगमनंकपिलापानंशूद्रस्यतत्संपर्कात्यंचमंम
हापातकमित्यदंड्यदंडनादीनांमहापातकत्वमुक्तंतत्रिंदा।इतिन्यायाय अन्यथाद्विविपस्यसुरापानसुव
र्णस्तेयेवैश्यस्यब्रह्महत्यादिपंचकंशूद्रस्यगुरुतल्पसुवर्णस्तेयेचमहापातकेनस्यातांवर्णिव्यवस्थास्याभि

ध्यानात्। न च नेयं व्यवस्था। किंतु पूर्वैः सहितानामुक्तेभ्योऽन्तर्गतेषु महापातकत्वाभिधानं तथात्वे ब्रह्महत्यादीनां
पुनः परिगणनमनर्थकं स्यात्। तस्मात्यं चैव महापातकानि। तच्चपंचमाहेमो॥ ॥तत्संयोगश्च॥१॥ ॥यद्य
पि महापातकानामेव ब्रह्मानुक्रमात्तद्धेतुनपरामर्शो युज्यते तथापि तत्संयोगस्य तत्त्वाविशेषात्तद्वत्संयोगोऽविवक्षि
तः। तद्वद्भिर्महापातकिभिः संयोगः संसर्गः सोऽपि महापातकं। तत्र कालावधिमाह॥ ॥संवत्सरेण पतति पति
तेन सहाचरन्॥२॥ ॥तद्धेतुनेव पूर्वपरामर्शोऽसिद्धोऽपतितश्चोपदानमुक्तातिरिक्तानामप्युपादानायातेच
ब्रह्महसुरापगुरुतल्पगमातृयोनिसंवद्दागस्तेननास्तिकनिंदितकर्माभ्यासिपतितात्याग्यपतितत्यागि
नः पतिताः पातकसंयोजकाश्चेति गौतमोक्तास्तेषामन्यतमेन सहैकीभावेनाचरन्व्यवहरन् संवत्सरेण प
तति द्विजातिकर्मानर्हो भवति हि जातिकर्मानर्हो भवति द्विजातिकर्मभ्यो हानिः पतनमिति गौतमस्मरणा
त्। संवत्सरश्चात्र सावनो न तरितद्दिवसगणानयायाधिकमात्रेयाहोरात्रात्मको ज्ञेयः। संवत्सरेणेति वच
नादर्वाक्न पातित्यं पंचाहादिसंसर्गेषु विरात्रादिप्रायश्चित्तस्य वक्ष्यमाणत्वात्। पातित्यमुपपातकादेस्त्वपु
पलक्षणं। तेनोपपातकादिसंसर्गे उपपातकित्वादि संवत्सरेण भवति। यस्त्वयेनपापात्मनेति वक्ष्यमाणत्वात्॥

तदपि कामतः संसर्गी पतितेन सहोषित्वा जानन् संवत्सरं नरः। मिश्रितस्तेन सोऽब्दांते स्वयं च पतितो भवेदिति देव
लस्मरणात्। अकामतस्तु न संवत्सरेण किंतु संवत्सराधिकसंसर्गेण। संसर्गमाचरन्विप्रः पतितादिष्वकामतः
इत्युपक्रम्य अब्दार्द्धमब्दमेकं वा भवेदूर्द्ध्वं तु तत्सम इति पराशरस्मरणात्। उक्तं धर्मसत्त्वकालेनापि। वर्षद्वयेनेत
न्यो हि द्विजैः पतितैः सह युगपत्संसर्गी षण्मासैरेव पतति। एभिः संसर्गमायाति यः कश्चित्काममोहितः। षण्मास
मब्दमेकं वा ब्रह्महत्याव्रतं चरेदिति संवर्त्तस्मरणात्। कामतः षण्मासादकामतो द्वे नेति ज्ञेयं। तमाचारमाह॥ ॥
एकयानभोजनासनशयनैः॥४॥ ॥यानादिभिः प्रत्येकमेकशब्दः संबध्यते। तत्र पतितेन सहैकस्मिन् रथा
दावुपविश्य यानं। एकस्यां पंक्तौ भोजनमेकभोजनं। नैकामत्रभोजने तत्र सद्यः पातित्यात्। याजनं योनिसंबंधं
स्वाध्यायं सहभोजनं। कृत्वा सद्यः पतत्येव पतितेन न संशय इति देवलस्मरणात्। सहभोजनं सहैकामत्रभोज
नं पृथग्येत्तोकामत्रभोजने तु संवत्सरेणैव। एकस्मिन्नासने पीठादावुपवेशनमेकासनं। एकस्मिन् शयने खट्वा
दौ शयनमेकशयनमेकैः प्रत्येकं संवत्सराभ्यस्तैः पततीति। यद्यप्यत्रेदं हि निर्देशात्साहित्यमवागम्यते तथा
पि कृते संभाषणाद्देवत्रेतायां स्पर्शनेन च। द्वापरे त्वन्नमादाय कलौ पतति कर्मणेति पराशरोक्त्या प्रत्येकमेव पा

५ वि॰टी॰
२८६

नित्यहेतुत्वमितरनिरपेक्षत्वं। अत्रश्च प्रत्येकमिति नियोगप्रमाणाभाव एव साहित्यविवक्षा। यथा दर्शपूर्णमासाभ्या
मित्यत्र तत्सद्भावे तु न साहित्यं। यथा उदङ्मुखो मूत्रपुरीषे कुर्यादित्यादौ उदङ्मुखो मूत्रं कुर्यादित्यापस्तंबवाक्यात्।
तत्स्थानंतरे योनाह्निकाकोप्यस्ति। तस्माद्दृष्टं तस्यावकुवचनसापत्येकमन्यपादम्पस्तानां पातकत्वमिति युक्तं।
अत एव व्यासः। योयेन संपिबेद्वर्षं सोपि तत्समतामियादिति सहपानमात्रस्यैव संवत्सराभ्यासेन पातित्यमाह। यु
क्तं चैतत् देवनिंदितकर्माभ्यासस्यैव गौतमेन पातित्यहेतुत्वाभिधानात्। आसनाच्छयनाद्यानात्संभाषात्स
हभोजनात्। संक्रामंति हि पापानि तैलबिंदुरिवांभसीत्यादिना पाहशस्यैव पापहेतुत्वं ताहशस्यैव पा
तित्यहेतुत्वमिति। अन्यथा यानशय्यासनैर्नित्यं जानन्पतितो भवेदिति कश्चिद्यात्रां मूलवाक्ये चतु
र्णां संलापस्पर्शनिःश्वाससहयानाशनासनादिति कचित्संपनाद्ध्ह अत्र गणत्साहित्येनानुगमापत्तेः। न
चपरित्तैगणितसंसर्गाणामन्योपलक्षणतया सर्वसंसर्गाणां साहित्यं विवक्षितमिति वाच्यं। अन्यतरसं
सर्गाभावे पातित्यादापत्तेः। तस्माद्यथोक्तमेव साधीयः। यानाद्युपलक्षणं। एकशय्यासनं पंक्तिर्भांडप
क्वान्नमिश्रणं। याजनाध्यापनं योनिस्तथा च सहभोजनं। नवधा संकरः प्रोक्तो न कर्त्तव्योधमैः सहेति हा

राम
२८६

हस्पतिस्मरणात्। एकशय्यादयः पंच लघुसंसर्गाः संवत्सरेण। याजनादयश्चत्वारो गुरुसंसर्गाः सद्यः पातयंति सहयानासनाभ्यामिति क्वचित्पाठः। तत्राप्यन्येषामुपलक्षणं संवत्सरस्यापवादमाह॥ ॥योनस्रौवमुख्यैः संबंधैस्तु सद्य एव॥५॥ ॥योनेर्भवो यौनः स च पतितस्य पतिता या वा गमनं पतितोत्पतिता यत्र वा कन्यादानमिति वा। स्रुवभवः स्रौवः स च पतितस्य पतितेन सह वा याजनं। मुखभवो मुख्यः स च पतितस्य पतितेन वाध्यापनं पतितेन सह वाध्ययनं। द्वंद्वनिर्देशात्सहैकामत्रभोजनं च। एतैः संबंधैस्तु कामतः कृतैः सद्य एव पतति। नात्र संवत्सरापेक्षा। अकामतस्तु संवत्सरेण। यथोक्तं कौर्मे। याजनं योनिसंबंधं तथैवाध्यापनं द्विजः। कृत्वा सद्यः पतेज्ज्ञानात्सह भोजनमेव च। अज्ञानाद्यवामोहात्कुर्याद्ध्यापनं द्विजः। संवत्सरेण पतति सहाध्ययनमेव चेति। अज्ञानं पतितत्वेनामोहः शास्त्रार्थापरिज्ञानं। अध्यापनं पूर्वोक्तानां त्रयाणामुपलक्षणं। एतेन संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद्यौनादेकशय्यैकभोजनादि तिहारीतवाक्यमपि व्याख्यातं। अन्ये तु गुरुलघुयाजनादिभिः सद्यः संवत्सरयोर्व्यवस्थामाहुः। एतेन ज्ञानतः सह कृत्वा तेन येन पतनं तेना

ज्ञानतो वा एतद्द्वयाभ्यासेन अज्ञानतो वा स्वैरेणापि न पतनं तेन ज्ञानतः षण्मासेनेति शिष्यव्याख्यावस्था
निरस्ता कौर्मवचनविरोधात्। षाण्मासिके तु संसर्गे याजनाध्यापनादिना। एकत्रासनशय्या
भिः शय्यास्थितार्द्धमाचरेदिति बार्हस्पत्यवचनविरोधाच्च। पतितै रजस्वलानु योगच्छेद्भिर्णां पतितो
तथा तस्य पापविशुद्ध्यर्थमतिकृच्छ्रं विशोधनमिति संवर्त्तीयं तदकामतः सकृद्गमने इष्टव्यं संवत्सराभ्या
से पतितत्वस्मरणात्। सत्यपि द्वंद्वनिर्देशे योनादिषु साहित्यमविवक्षितं कौर्मे प्रत्येकनिर्देशात्। यः पतिते
न सह योनस्रौवमुख्यानामन्यतमं संबंधं कुर्यात्तस्याप्येतद्देव प्रायश्चित्तमिति मिस्तु मंतुस्मरणाद्वा योनत्वे
वान्यौ वा त्सर्वं यात्सद्य एवेति पाठे स्पष्टमेव निरपेक्षाणां पातकत्वं यदा त्वज्ञानतो याजनादीनां छिन्नानि
सहकरोति तदा षण्मासेरेव पतति। एभिः संसर्गमायाति यः कश्चित्कामकोहितः। षण्मासानद्मेकं वा
ब्रह्महत्याव्रतं चरेदिति संवर्तस्मरणात्। उद्दिष्टानि पातकानि द्विधा। कामकृतान्यकामकृतानि चेति। तत्र
कामकृतेषु महापातकेषु साधारणं प्रायश्चित्तमाह॥ ॥अश्वमेधेन शुध्येयुर्महापातकिनस्त्विमे।
पृथिव्यां सर्वतीर्थानां तथानुसरणेन वा॥६॥ ॥कामपूर्वास्तु ते पंचापि महापातकिनोऽश्वमेधेन यद्यपि शोध

णाः शुध्येयुः। तथा पृथिव्यां मानुषसंचारयोग्यायां हिमवत्सेत्ववधिकायां वर्त्तमानानां सर्वेषां गमनार्हाणां तीर्थानां
तीर्थानुसरणेनाभिगमनेन शुध्येयुः। महापातकिपदेनैव सिद्धे वेतच्छब्दोपादानमुपपातकमभ्यस्तं महापातकतां
व्रजेदित्यादिवचनसिद्धमहापातकमुदासाय सर्वनाम्नां बुद्धिस्थोपस्थापकत्वात् तेन न तत्राश्वमेधादि किं तु द्वाद
शाब्दिकमेव। पृथिवीग्रहणमंतरिक्षनिरासाय तेन पुष्करनिवृत्तिः। पृथिव्यां नैमिषं तीर्थमंतरिक्षे च पुष्करमिति ब्र
ह्मस्कंदस्मरणात्। अत्राश्वमेधसर्वतीर्थानुसरणे द्वे प्रायश्चित्ते परस्परनिरपेक्षे विहिते अग्रे विकल्पदर्शनात्।
तथा शंखेनाश्वकारांतरवचने न शुद्धिसाधनांतराभिधानाच्चावकारः साधनता समुच्चयार्थः। तत्राश्वमेधः सार्व
भौमनृपविषय एव। यजेत वाश्वमेधेन राजा तु पृथिवीपतिरिति पराशरस्मरणात्। नासार्वभौमोऽश्वमेधेन
यजेतेति श्रुतेश्च। स च कामतो महापातके। महापातकिनस्त्वेते चत्वारो मतिपूर्वकं। अग्निं प्रविश्य शुध्येयुः स्थित्वा
वा महति क्रताविति यमस्मरणात्। चत्वारः पंचमस्याप्युपलक्षणं कामतः संसर्गसंसर्गिणो विप्राणामिति कामा
नात्। तथा च कौर्मे। ब्रह्महत्यां सुरापानं स्तेयं गुर्वंगनागमं। कृत्वा तैश्चापि संसर्गं ब्राह्मणः कामकारतः। कुर्या
दनशनं विप्राः पुण्यतीर्थे समाहितः। ज्वलंतं वा विशेदग्निं ध्यात्वा देवं कपर्दिनमिति। प्राणांतिकाश्वमेधयो

अतुल्यत्वात्तदनुसृतस्यैव व्रतं कुर्यादिति दिक्। व्रतशब्दोपादानान्मरणस्य च व्रतशब्दावाच्यत्वात्संसर्गिणो न मर
णान्तिकमिति तत्कर्मवाक्येनैव परिहृतं। कुशब्दादग्निप्रवेशलक्षणमावयोर्ग्रहणं। यथा भविष्यत्पुराणे ह
त्वा तु क्षत्रियो विप्रं गुणाढ्यमिह कामतः। प्रायश्चित्तं चरेद्धीरविधिवत्कायशुद्धये। लक्ष्यं शस्त्रभृतां वास्याद्वि
दुषामिच्छयात्मनः। प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः। यजेत वाश्वमेधेन क्षत्रियो विप्रघातकः। प्राय
श्चित्तं नयेद्येवं क्षत्रियस्य प्रकीर्तितमिति। विप्रघातो महापातकोपलक्षणं। पंचस्वप्यश्वमेधविधानात्। तेन चाग्नि
प्रवेशलक्षणमावयोरश्वमेधसाहचर्यान्महापातकमात्रविषयत्वं सिध्यति। तथा च देवलः। तीर्थे पुण्यतमे य
थावद्देहन्यासाद्ब्राह्मणो महापातकान्मुच्यते धर्मयुद्धे गोग्रहे ग्रामघातादिषु प्राणत्यागात्पूयते क्षत्रियः। श
स्त्रोपजीवी नश्यति। विदुषां प्रायश्चित्तनिमित्तेमयं लक्ष्यभावमापद्यत इति जानतां। आत्मेच्छया न राजप्रेरितः।
अंगिरा अपि। यः कामतो महापापं नरः कुर्यात्कथंचन। नानतस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते इति। अत्रैव
मरणावैकल्पिकं चतुर्विंशतिवार्षिकं वा कार्यं। यथाह व्यासः। गत्वैतदेव कुर्वीत गुरुतल्पमकामतः। का
मतो द्विगुणं प्रोक्तं पूर्वेत्तु च यदुच्यत इति। एतदेव द्वादशवार्षिकमेव द्विगुणं चतुर्विंशतिवार्षिकं। न केवलं गु

गुरुतल्पएवद्विगुणंकिंतुपूर्वस्यापिब्रह्महत्यादिष्वपित्रिषुतीर्थानुसरणमर्थात्क्षत्रियातिरिक्तविषयं।ततश्च
क्षत्रियातिरिक्तैर्महापातकिभिर्ब्राह्मणवैश्यशूद्रैःपूर्वोक्ततीर्थयात्राकार्या।तत्प्रकारमाहकश्यपः।पवित्रपा
णिर्दंडीचपंक्तदिग्घोरजस्वलःतीर्थावासीकुशोकरोजटिलोब्रह्महाभवेदिति।च्यवनोपि।आसेतुदर्शनात्पू
तोभवत्यश्वमेधावभृथाप्लुतोभवत्तुमयशिरसंवाप्रदायब्राह्मणेभ्यःपूतोभवतीति।आसेतुदर्शनादित्यने
नविंध्यांतरभागवर्तिनांसेतुपर्यंततीर्थदर्शनाच्छुद्धिरित्युक्तंभवति।विंध्यादुत्तरतोयस्यनिवासःपरिकीर्ति
तःपराशरमतेनतस्यसेतुबंधस्यदर्शनमितिभविष्यपुराणात्।उभयशिरससमुभयतोमुखीब्राह्मणेभ्यश्चित्रम
श्चितयीशदायेत्यर्थः॥ ॥ विष्णुस्मृतिविवृतौश्रीमत्पावेजयंत्यांपंच
विंशोध्यायः॥ ॥अनुपातकविभागंप्रायश्चित्तंचषट्त्रिंशाध्यायेनवक्तुमादौब्रह्महत्यासमान्याह॥ ॥
यागस्थस्यक्षत्रियस्यवैश्यस्यचरजस्वलायाश्चांतर्वत्न्याश्चात्रिगोत्रायश्चाविज्ञातस्यगर्भस्यशरणागतस्यच
घातनंब्रह्महत्यासमानीति॥१॥ ॥यागःसोमयागःतत्स्थत्वंचोभयोर्विशेषणं।चकारान्मूर्धावसिक्तांबष्ठ
योर्ग्रहणं।तयोनित्वात्ब्राह्मणात्क्षत्रियायामुत्पन्नःक्षत्रियएवभवति।वैश्यायामुत्पन्नोवैश्यएवेतिसंवि

यतत्वोपदेशस्यतद्धर्मातिदेशार्थत्वात्।अनेनवह्नविषयेवैश्यशूद्रीवसिष्ठोक्तांवस्थजातीयस्त्रीणामपिप्रागस्थानं
अहृतंसिद्धं।रजस्वलास्नानावधि।चकाराद्धेतुस्नाताच।अत्ररजस्वलेतिसामान्योपादानेपिगर्भधारणयो
ग्यरयौवनस्थविवक्षितारजस्वलास्नातुस्नातामात्रेयीमाहुरत्रैषष्पदपत्यंभवतीतिवासिष्ठहेतुनिर्देशात्
।ततश्चरोगजरोगजद्रव्यजरजोवतीवधेनवत्समतांप्रायश्चित्तमिति।यथाहबृहस्पतिः।रागजंरोगजंचै
वद्रव्यजंकालजंतथा।आर्त्तवंकसतेरूत्वेन्मेदोष्ठ्यागनासुपत्।तद्रागजमितिप्रोक्तंप्रजोद्रेदसमुद्भवं
।पित्तादिदोषवैषम्यादसकृत्संप्रवर्त्तते।रोगजंरोगजंचैवद्रव्यजंकालजंतथा।आर्त्तवंकस्रतेरूत्वन्मेदो
ष्ठ्यागनासुपत्।तद्रागजमितिप्रोक्तंप्रजोद्रेदसमुद्भवं।पित्तादिदोषवैषम्यादसकृत्संप्रवर्त्तते।रोगजं
त्समुद्दिष्टमथद्रव्यजमुच्यते।मन्त्रद्रव्यस्यवैषम्याद्धातुवैषम्यसंभवं।द्रव्यजंरजइत्युक्तंतत्कादाचित्कसं
भवं।आरभ्यचार्त्तवदिनादेकविंशतिवासरान्।मासाद्दोर्धरजोयत्स्यात्तत्कालजमुदाहृतं।यद्रागरोग
द्रव्योत्थंतदकंप्राहभार्गवः।कालजंतुरजःशंस्तंतस्मात्तेनैवसाशुचिरिति।अंतर्वत्नीस्वपतिनिहितगर्भ
वतीविशेष्यानुपादानात्स्वीयाप्राणेव·चकारात्साहिताग्निपत्नीच।अत्रिगोत्रा।अत्रिगोत्रोढा।अत्रिगोत्रोत्प

नावा। अत्रेर्गोत्रं यस्याः इति गोत्रसंबंधस्य जनकपरिणेत्रोर्विशेषात्। अत एवान्यगोत्रोद्भवां नारीं विनिपा
त्य द्विजोत्तमः। द्वादशाब्दं व्रतं कुर्यादत्रिगोत्रे च संस्कृतामिति सुमंतुनोभयोरप्युपादानं। चकारान्मंत्र
वत्सर्वसंस्कारैः संस्कृता चा यद्यपेता सांतिस्त्रणामपि रजस्वलामृतुस्नातामात्रेयीमाहुः। गर्भिणी
त्वथ वा या स्यात्तामात्रेयीं विनिर्दिशेत्। तथात्रेयीनिषूदक इत्यादिस्मृतिषु आत्रेयीत्वेन व्यवहारादात्रे
य्याः शुक्तेऽपि केनैव स्त्वेन वित्तयग्रहणसिद्धौ सत्त्वनितिपंचम्यर्थमिवशतिमातित तथाप्यत्रिगोत्रात्वरजस्वल
त्वयोः समवाये आत्रेयीत्वरूपनिमित्तैकादेकमेवैवं प्रायश्चित्तं स्यात्तन्माभूदित्येवमर्थं पृथक्स्वत्वेकरणं
ततश्च निमित्तद्वयसमावेशे प्रायश्चित्तद्वयमेव कार्यं यथा ब्राह्मणत्वसवनस्थत्वयोरिति। अविज्ञातः स्त्रीपुं
नपुंसकत्वेनानिर्णीतो यो गर्भस्तस्य। अविज्ञातस्येति पृथगुपादानमन्यस्याप्यविज्ञातजातिविशेषस्य हन
ने ब्रह्महत्यासममित्यभिधातुं। पाह्निकस्यापि ब्रह्मवधदोषस्य परिहार्यत्वात्। शरणं त्राणं तदर्थमागतस्या
ब्राह्मणस्यापि। चकाराद्बालस्याब्राह्मणस्यापि। एतेषां घातने ब्रह्महत्यासमं। बहुवचनं तेन समुत्कर्षो राज
गामि च पैशुनं। गुरोश्चालीकनिर्बंधः समानि ब्रह्महत्यया। गुरूणामध्यधिक्षेपो वेदनिंदा सुहृद्वधः। ब्रह्मह

त्यासमं ज्ञेयमधीतस्य च नाशनमिति मनुयोगीश्वराभ्युक्ताभिप्रायेणाध्ययनस्य प्रयानकत्वेनाप्रवचनमेषोत ह्ल
घुविषयत्वेन गुरुविषयत्वेनान्वेत विरोधः। इति करणमेवंविधानामन्येषामप्युपसंग्रहाय। यथाह मनुः।
उत्कोचे वानृतं साक्ष्ये प्रतिरम्भं गुरं तथा। अपहृत्य च निक्षेपं कृत्वा च स्त्रीसुहृद्वधमिति। ब्रह्महत्याव्रतं चरेदिति
शेषः। सुरापानसमान्याह॥ ॥कौटसाक्ष्यं सुहृद्वधपतो सुरापानसमो॥२॥ ॥कूटमसत्यं तस्माद्भवः कौ
टसाक्ष्यं मिथ्यासाक्ष्यमिति यावत्। वर्णिविषयमेतत्। सुहृन्मित्रम् ब्राह्मणोऽपि तद्वधः सत्रियादिवधोऽपि त
द्रोन्योपसंग्रहार्थः। यथाह मनुः। ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः। गर्हितान्नाद्ययोर्जग्धिः सुरापानस
मानि षट्। योगीश्वरोऽपि निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोऽनृतम्। रजस्वलामुखास्वादः सुरापानसमानि त्विति
यत्नेन योर्मनुयोगीश्वराभ्यां ब्रह्महत्यासाम्यमुक्तं तद्वक्ष्यमाणप्रायश्चित्तेनस्वोक्तप्रायश्चित्तस्य वि
कल्पार्थं। एवमन्यत्रापि। सुवर्णस्तेयसमान्याह॥ ॥ब्राह्मणस्व भूम्यपहरणं निक्षेपापहरणं सुवर्णस्तेय
समं॥३॥ ॥ब्राह्मणस्येति षष्ठ्यंतस्य पृथक्करणं त्रिपदेनापि संबंधार्थं। तेन ब्राह्मणस्वामिकाया भूमे
र्ब्राह्मणस्वामिकस्य सुवर्णातिरिक्तनिक्षेपस्य च हरणं ब्राह्मणस्वामिकसुवर्णस्तेयसमं। भूमिर्नराद्युपल

स
२

हरणं यथाह मनुः । निक्षेपस्यापहरणं नराश्वरजतस्य च । भूमिवज्रमणीनां च रुक्मस्तेयसमं स्मृतं । योगीश्वरो
पि । अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा । निक्षेपस्य च सर्वं हि सुवर्णस्तेयसंमितमिति । गुरुतल्पसमान्याह
॥ ॥ पितृव्यमातामहमातुलश्वशुरनृपपत्न्यभिगमनं गुरुदारगमनेन समं ॥४॥ ॥ पितृव्यादयश्चत्वारः प्र
सिद्धाः । नृपोभिषिक्तः क्षत्रियः । तेषां पत्नी यद्यसौ भर्तृभूता सवर्णा स्यात्तद्गमनं गुर्वीरुदारगमनसमं ।
अत्र केचित् पितृपदमधिकं पठंति । तेन पितृपत्न्यभिगमनं गुरुतल्पगमनसमं । सा च न जननी तद्ग
मनस्यातिपातकत्वात् । नापि सवर्णा त्वसवर्णा सपत्नमाता तद्गमनस्य महापातकत्वात् । किंतु हीनवर्णा स
पत्नमाता तद्गमनमनुपातकं । मातुः सपत्नीभगिनीमाचार्यतनयां तथेत्यतिदेशश्रवणात् । तस्य च हीन
वर्णाविषयत्वं विनानुपपत्तेः । तस्मात्तद्गमनमनुपातकमेवेति । पितृव्यो भ्रातुरुपलक्षणं । पितृव्यदारग
मने तथा । गुरुतल्पव्रतं कुर्यान्नान्या निष्कृतिरुच्यत इति संवर्तस्मरणात् । मातामहः पितामहोपलक्ष
णं । मातृमातुश्च गमने पितृमातृगमे तथेति बृहन्मानवात् ॥ ॥ पितृष्वसृस्वस्रगमने च ॥५॥ ॥
पितृमातृष्वसारौ साक्षात्सवर्णा वा । स्वसा सपत्नमातृजा सवर्णा । साक्षात्स्वस्रागमनस्यातिपातकत्वात् ।

६ वि॰ द्वी॰
२९१

चकाराद्भागिनेयीगमनं। भगिनीभागिनेयी। चंडालीगमने ष्विति षट्सु मंतुस्मरणात्॥ ॥श्रोत्रियर्त्विगु
पाध्यायमित्रपत्न्यभिगमनं च॥६॥ ॥श्रोत्रियः एकशाखाध्यायी। ऋत्विग्गुरू लक्षणैः। उपाध्यायोऽत्र वे
दः॥ आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पग इति स्मरणात्। पत्नीषु इत्युपलक्षणं। आचार्यतनयां तथेति
स्मरणात्। मित्रं सुहृत्। ब्राह्मणोऽपि तेषां पत्नी पूर्वोक्तातक ४/नो। चकाराद्धि व्यस्त्रीगमनं। पितृव्यस्य स्त्रियाश्च
इति नारदस्मरणात्॥ ॥स्वसुः सख्युः सगोत्रायाः उत्तमवर्णायाः कुमार्याः अंत्यजायाः रजस्वलायाः
शरणागतायाः प्रव्रजितायाः निक्षिप्तायाश्च॥७॥ ॥स्वसुः साक्षाद्भगिन्याः सर्वोपपतिपन्ना भगिनी स
ख्युः पृथग्मित्रैकदेशः स्वरव्यो अपि ग्राह्यार्थः। सखी मातृष्वसा सुतेति याज्ञ्यात्। सगोत्रापि सपिंडा वा सपिण्ड
पत्यदारेषु ग्राणात्या गोत्रविधीयते इति हृदयाम्नात्। उत्तमवर्णा ब्राह्मणादिः क्षत्रियादेः। कुमारी अनूढानुप
भुक्ता च ज्ञालणकन्या। अंत्यजा रजकादिः। रजक चर्मकारश्च नटो बुरुड एव च। कैवर्तमेदभिल्लाश्च
सप्तैते अंत्यजाः स्मृता इत्यंगिरस्मात्। अंत्यजा अंत्यावसायिनामप्युपलक्षणं। चंडालात्मस्त्रियो गत्वा भु
क्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति इत्यंगिरःस्मरणात्। चंडालपदात्सम्मानामप

असपि
दम
२९

गृहाणां चंडालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा मागधायोगवौ चैव सप्तैते त्यावसायिनः इति। रजस्वला स्नानाव
धीस्त्री यी परकीया वा। शरणागता वा गोत्रार्थिनी। प्रव्रजिता संन्यस्ता। निक्षिप्ता रक्षार्थं समर्पिता। एतासां गमनं गु
रुदारगमनसमं। चकारो राज्ञ्यादिग्रहणे। राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा चयेति नारदस्मरणात्। एवं
मनुपातकानि विभज्य तेषु प्रायश्चित्तमाह॥ ॥अनुपातकिनस्त्वेते महापातकिनो यथा। अश्वमेधेन शुध्यं
ति तीर्थानुसरणेन वा॥ ५॥ एतेनुपातकिन इति पूर्वोक्तसंज्ञाया विषयप्रदर्शनं महापातकिनो यथेति महापा
तकसादृश्यं संज्ञायां निमित्तं ब्रह्महत्यादिसाम्यव्यपदेशात्। साम्यं च तत्प्रायश्चित्तनरकपातित्यत्यागादि
कार्ययोगात्। न चैतावता महापातकत्वापत्तिः साम्येनैव भेदसिद्धेः तस्य भेदव्याप्यत्वात्। तेषां चाश्वमेधस्ती
र्थानुसरणं वा पूर्ववद्व्यवस्थापा शोधकं। इदं चेत्थमेवार्थवदन्यथा एतेश्वमेधादिना शुध्यंतीत्येतावतेव सि
द्धे शेषवैयर्थ्यापत्तेः। अत्र चेदं तत्त्वं त्रिविधं प्रायश्चित्तमनुपातकेष्वेकं साक्षाद्विहितं यथाश्वमेधो नेति द्वितीयं ब्रह्मह
त्याव्रतं कुर्यादित्याद्व्रतं कुर्यादित्यादि साक्षादतिदिष्टं तृतीयं ब्रह्महत्यासमं ज्ञेयमिति साम्येनातिदिष्टं तत्र
साक्षाद्विहितं संपूर्णमेव साक्षादतिदिष्टं पादोनमुपदेशादतिदेशस्य न्यूनत्वात्समशब्देनाभिहितमर्द्धं साम्ये

नव्रतानिदेशस्यैककालस्यांतरितत्वादितिनिबंधकृतः।न्यायविदस्त्वेतत्पक्षवचनान्नामधेयाद्वोद
नालिंगानुमितवचनाद्वातिदेशोयंवदंतःस्वविधेनापिप्रमाणेनाखंडातिदेशान्नष्कपतिदिश्यमान
स्यन्यूनोत्वाकुः॥ ॥ ॥ ॥विष्णुस्मृतिविवृतौश्रीमत्यां
वैजयंत्यांषट्त्रिंशोऽध्यायः॥ ॥उपपातकविभागंतत्प्रायश्चित्तंचसप्तत्रिंशाध्यायेनाह॥ ॥अनृतव
वचनमुत्कर्षे॥१॥ ॥स्वोत्कर्षनिमित्तंमिथ्यावचनं।मयेदंविहितंमयेदंदापितमित्यादि।यत्तु।महादान
दिप्राप्त्यर्थमचतुर्वेदस्यचतुर्वेदोहमित्यादि।तदपरस्यजातिविद्यासमुत्कर्षेसतिनायंब्राह्मणोनकिंचि
ज्ज्ञानातीतिवचवचनंमहादानादिप्राप्तिविघातकंतद्ब्रह्महत्यासमं॥ ॥राजगामिपैशुन्यं॥२॥ ॥राज
न्यविदितात्मपरदोषख्यापनं।यत्तुराजन्यविद्यमानपरकीयमहादोषवचनंतद्ब्रह्महत्यासमं॥ ॥गुरोश्चा
लीकनिर्बंधः॥३॥ ॥गुरोर्जनकस्यालीकोमिथ्यानिर्बंधोदोषारोपणं।त्वयेदंगृहंकार्यंनाशितमिति
अन्यस्यब्रह्महत्यासमः।यथास्माकंभ्रातृणांविभागेत्वयावैषम्यंकृतमितिमहापातकाद्यभिशंसनं
वा॥ ॥वेदनिंदा॥४॥ ॥परिहासेनवेदस्यार्थयोःकुत्सनं।अन्यस्यसुरापानसमः।यथानास्तिकेन

वेदस्य ग्रंथतोऽर्थतश्चाकृत्स्नं॥ ॥अधीतस्य च त्यागः॥५॥ ॥अधीतस्य वेदस्य कुटुंबभरणादिव्यासंगेन सच्छा
स्त्राभ्यासप्रसंगेन वा त्यागो विस्मरणं। यस्त्व सच्छास्त्राभिनिवेशेन दुर्व्यसनेन वा त्यागः स ब्रह्महत्यासमः॥ ॥
अग्निपितृमातृसुतदाराणां च॥६॥ ॥त्यागो चानुषज्यते। अग्नेः श्रौतस्य स्मार्तस्य वा त्यागोऽपरिचरणं। पितृ
मात्रोस्त्यागो जीवतोरपतितयोर्योगक्षेमाद्यकरणं मृतयोः श्राद्धाद्यकरणं च। सुतदारस्य तु संस्कारपोषणा
द्यकरणं। चकारात् पितृव्यमातुलादिबांधवानामपि त्यागः। बांधवत्याग एव चेति योगिस्मरणात्॥ ॥अभो
ज्यान्नाभक्ष्यभक्षणं॥७॥ ॥अभोज्याः गणरात्रिकादयस्तेषामन्नं। अभक्ष्यं चानर्चितादि तयोर्भक्षणं
कामतो लशुनादिभक्षणस्य सुरापानसमत्वं॥ ॥परस्वापहरणं॥८॥ ॥सुवर्णात्तत्समव्यतिरिक्तस्य पर
स्वस्य धान्यकुप्यादेरपहरणं तच्च दशधेत्याह हारीतः। अदत्तादानादनतिसृष्टग्रहणाद्निर्दिष्टोपभोगा
न्न्यस्तेभ्यो न्यस्तादानात् याचितानिर्यातनाद्व्यासापनयात् तस्करव्यंशनया अनुपायग्रहणात् स्तितिश्छत्म
दानाद्देवताभिसेवं याद्वेति दशविधं स्तेयमिति। परदाराभिगमनं॥९॥ ॥मातृतत्समव्यतिरिक्तासु परदा
राणामभिगमनं॥ ॥अयाज्ययाजनं॥१०॥ ॥अयाज्या जातिकर्मदुष्टाः शूद्रव्रात्यादयस्तेषां याजनं। पति

तयाजनस्यमहापातकत्वात्॥ ॥विकर्मणाजीवनं॥११॥ ॥विपरिष्टंकर्मविकर्म। यथाब्राह्मणस्यक्षत्रि
यवैश्यवृत्तितद्रूपजीवनं॥असत्प्रतिग्रहश्च॥१२॥ ॥असतःपतितादेःसकाशाद्दत्तोऽव्यस्यमेषांकला
जिनादेःअसतिदेशेकुरुक्षेत्रादौअसतिकालेसूर्यग्रहादौवाप्रतिग्रहः। चात्कारादसदध्यापनं। शूद्राध्यापक
याजकादितियास्यात्॥ ॥स्त्रीविट्शूद्रगोवधः॥१३॥ ॥स्त्रीविट्शूद्राणांगोश्चवधःसमासात्स्त्रियाश्चात्र
शूद्रविट्स्त्रीवधइतिगोमिस्मरणात्स्त्रीजातिमात्रं॥ ॥अविक्रेयविक्रयः॥१४॥ ॥अविक्रेयंलाक्षालव
णादितस्यविक्रयः॥ ॥परिवित्तितानुजेनज्येष्ठस्य॥१५॥ ॥अकृतदाराग्निहोत्रस्यज्येष्ठस्यकृतदाराग्नि
होत्रेणानुजेनपरिवित्तिताभवति। दाराग्निहोत्रसंयोगंकुरुतेयोऽग्रजेस्थिते। परिवेत्तासविज्ञेयःपरिवित्तिस्तु
पूर्वजइतिमानवात्। ज्येष्ठस्यसोदरस्येतिविवक्षितं। सोदर्येतिष्ठतिज्येष्ठेनकुर्याद्दारसंग्रहं। आवसथ्यंतथा
धानंपतितस्त्वन्यथाभवेदितिगार्ग्यस्मरणात्। सोदर्यत्वंचात्रविवक्षितं। पितृव्यात्मात्रैक्याद्दुभयैक्याद्वा
त्रापिक्षेत्रेकेनसोदरत्वंगर्भोपनिषत्सुप्रसिद्धं। महाभारतेचापितुःसजठरेस्थित्वाशुक्रद्वारेणमातरं। प्रवि
श्यशोणितात्सलक्ष्मःपंचधातुमार्ददइति। देवर्योनोअतिक्रमोनेष्टः। यस्मिन्नेवोदरेतातसावसस्त्वंशुभा

राम
२९३

न्ने।तस्मिन्नेवाहमवसंतेनत्वंभगिनीमस्मेत्यादिरेतुभिरविवाहोत्वाऽतिपादिका।मांचेत्यादिनासोदरत्वंस्पष्टमेव
।तत्रैकंकानिमित्तमादायनिषेधश्च।तत्रापवादमाहशातातपः।पितृव्यपुत्रसापत्नपरनारीसुतेषु च।ज्येष्ठेष्वपिस
निवृत्तश्चाद्दारांस्तुकनीयसां।दाराग्निहोत्रसंयोगेनदोषःपरिवेदनइति।पितृव्यस्यदेवरादिनापूर्वोक्तेनविधा
तेनदेवदत्तमातर्युत्पादितःपुत्रःपितृव्यपुत्रइत्युच्यते।तस्माच्चेत्केनदेवदत्तस्यसोदरः।तथादेवदत्तस्यसपत्नमातरिदे
वदत्तपित्रोत्पादितोदेवदत्तस्यसोदरः।तथादेवदत्तस्यपित्रापरस्यभ्रात्रादेर्भार्यायांनियोगेनोत्पादितोदेव
दत्तस्यसोदरः।सविदातृभग्योरितिगौतमस्मरणेनतस्याप्यामुष्यायणत्वात्।एतेषुत्रिष्वपिसोदर्यत्वेननिषेधप्रा
प्तावयमपवादः।अतएवापवादादपरित्तीतेपियुधिष्ठिरेभीमसेनस्यहिडिंबापरिणयेनदोषा।यायमापि।पितृ
व्यपुत्रास्तथैवचादाराग्निहोत्रधर्मेषुनाधर्मःपारिविंदत्तइति।अत्रापोह्यावपिव्याख्यातौ।परपुत्रःपरस्यवपुत्रार्थ
मुत्पादितोनस्वार्थमपिसोपिपितृत्रेकाद्देवदत्तस्यसोदरः।गौतमोपि।भिन्नोदरेदत्तकेचपितृव्यतनयेग्रजे।दाराग्निहो
त्रसंयोगेनदोषःपरिवेदनइति।दत्तःपित्रान्यस्मैपुत्रत्वेनतस्यसोदरज्येष्ठापेत्तयापरिवेदनशाण्णावग्रजपदेना
पवादः।तदेवमपवादतयावाक्यात्रयोपपत्तौदाराग्निहोत्रसंयोगंकुरुतेयोग्रजेस्थितइत्यत्राग्रजस्यव्यतिरेकमुखे

नसोदर्यत्वविवक्षार्थवाक्यत्रयारंभइतिचेरस्तां। सोदर्येतिष्ठति ज्येष्ठइत्यनेनैकवाक्यतयैवतत्सिद्धेः। नह्यग्रजस्य
सोदर्यत्वसिध्यर्थंवाक्यत्रयारंभोयुज्यते। नहिघटइतिवक्तव्येअनघटइतिवदंतिविद्वांसइतिन्यायापाता
त्। किंचसोदर्यत्वमात्रविवक्षार्थत्वेपितृव्यपुत्रादिपदानामविवक्षितार्थकतयामातृष्वसृपितृष्व
सृमातुलपुत्रादिपरिगणनमप्यापद्येत। तेषामप्यग्रजत्वेनदोषापादकत्वसंभवात्। संभवतिचापवा
दत्वेनविवक्षितार्थत्वेः विवक्षापारन्याय्यत्वात्। यच्च देशांतरस्थक्लीबैकवृषणानसहोदरान्। अतिवृ
द्धानभार्यांश्चकृषिसक्तान्नृपस्यच। धनवृद्धिप्रसक्तांश्चकामतःकारिणस्तथा। कुलटोन्मत्तचोरांश्च
परिविंदन्नदुष्यतीतिकात्यायनेनज्येष्ठमात्रएवविषयविशेषेणापवादोभिहितः सोपिसोदर्यविषयएव
अन्यथातिप्रसंगात्। अशास्त्रभावेनापवादत्वासंभवाच्चेत्यलंबहुना। ज्येष्ठानुजयोश्चपुंस्त्वंविवक्षितं। अ
ग्राह्योद्देश्यविशेषणत्वात्। अष्टवर्षब्राह्मणमित्यत्राष्टवर्षत्वादिवत्। तेनापरिणीतायामपिज्येष्ठभगि
न्यांकनिष्ठस्यभ्रातुःपरिवेदनंनभवति। तथाअपरिणीतेज्येष्ठभ्रातरिकनिष्ठायाभगिन्याःपरिवेदनं
नभवति। अतएवभगिन्योरपिपरिवेदनाभावप्राप्तौवचनारंभः। तदाहगार्ग्यः। एकमातृप्रसूतानांपुत्रिणा

परिवेदनो दोषः स्यात्सर्ववर्णेषु न दोषो भिन्नमातृष्विति मातृपदं पितुरप्युपलक्षणं तेन भिन्नपितृकाणामपि
न दोषः ततश्च पितृव्यपुत्रादिव्यावृत्तौ विशेषा अत्राप्यनुसंधेयाः। सोदर्यास्त्वपि क्वचिदपवादमाह हेमनुः
। विवाहे नाधिकारी स्याज्ज्येष्ठकन्या स्थिता यदा। तदनुज्ञां विना वापि कनिष्ठामुद्वहेत्तदेति। अनधिकारीति ज्ये
दर्शो लिंगव्यत्ययः वाशब्दोनुज्ञापकत्वं गमयति। ततश्चानधिकारिण्यां ज्येष्ठायां तदनुज्ञां विनापि क
निष्ठामुद्वहेत् अधिकारिण्यां तदनुज्ञयापि वेति वाशब्दार्थः। अनधिकारश्च कुष्ठापस्मारवैरूप्या
दिभिः। अरोगिण्यां भ्रातृमतिस्मरणात्। नाग्नयः परिविंदंति न वेदा न तपांसि च। न च श्राद्धं कनिष्ठ
स्यापि च कन्या विरूपितेति कात्यायनस्मरणाच्च। जातारणिपरिग्रहेण जातमात्राहिताग्नेरग्निहोत्र
वेदाध्ययनवेदव्रतैः परिवेदनदोषो नास्ति। उपनीतस्याध्ययनाधिकारादुपनयने परिवेदनदोषो
स्त्येवेति गमयितुं वेदग्रहणं। न जन्ममासे दिवसे च जाते ज्येष्ठे नुपेते परशाखया च॥ न चात्मगोत्रान्नवटुंव
कुर्यान्नवक्तुचाः पंचमषष्ठयोश्चेति ज्योतिर्निबंधात्। एतेन वेदपदमुपनयनपरमिति निरस्तं। किंतु दा
रेणापरिविद्यंतो ब्राह्मणाः इत्यग्न्यर्माः केषांचिज्जातमात्राणां केषांचित्कृतदाराणामाधानविधानात्।

अग्रजः श्येनचित्यादयो यज्ञा ज्योतिष्टोमविकारा नाग्निष्टोमातिरात्रौ प्रथमप्रयोगे परिवेदनापादकत्वात्। यथा
हविःकाण्डमेडनः। दर्शपौर्णमासेष्टिं सोमेज्यामग्निसंग्रहं। अग्निहोत्रे विवाहं च प्रयोगे प्रथमे स्थिते। न कुर्यी
त न के ज्येष्ठे सोदरे वा यः कुर्वतीति प्रयोगे प्रथमे स्थितमिति दर्शेष्ट्यादीनां यथा लिंगं विशेषणं तेन प्रथमप्रयो
गे वैषां परिवेदनापादकत्वं न द्वितीयादिप्रयोगे इति। तथा पिण्डपित्र्यज्ञप्रणयनादीनि। आद्धं दर्शादौ पार्वणादि।
एते कनिष्ठ भ्रातरं न परिविंदंति। विरूपितांगेंद्रियादिविकलो ज्येष्ठः कनिष्ठं भगिनीं च न परिविंदतीति वा
चाक्य ह पार्थः॥ ॥परिवेदनं॥१६॥ ॥अकृतदाराग्निहोत्रे ज्येष्ठे कनिष्ठस्य तदुभयसंयोगः॥ ॥तस्य च कन्या
दानं॥१७॥ ॥तस्य परिवेत्तुः स्वकारात्परिविन्नेयाकृतदारपरिविन्नेयमवतुर्थ्यर्थे गच्छुत्तरसंबंधाय कन्यादानं गु
रुरुपपातकं॥ ॥याजनं च॥१८॥ ॥तस्य परिवेत्तुः परिविन्नस्य याजनं विवाहकारणं कारयितुः परिवेत्तः
परिवेत्ता च यया च परिविद्यते। सर्वे ते नरकं यांति दातृयाजकपंचमाः इति स्मरणात्। तदेतत्स्पष्टमाह हारी
तः। ज्येष्ठेऽनिर्विष्टे कनीयान्निर्विशमानः परिवेत्ता भवति परिविन्नो ज्येष्ठः परिवेदनी कन्या परिदायी दाता
परिपच्छायाजकस्ते सर्वे पतिता इति॥ ॥व्रात्यता॥१९॥ ॥यथाकालमनुपनयनं। तस्मात्मया जितं वेतित्वन्नाय यस्य पिता पि

तामहोवासोमंनपिवेत्सब्रात्यइतिश्रुत्वेपौत्रयोरेवब्रात्यताश्रवणात्तस्मादसोमपीथिपितृकत्वमितिध्येयं॥ भृतकाध्यापनं॥२
॥ ॥भृतएवभृतकोध्येतुर्वेतनग्राहीतेनाध्यापनंतस्योपपातकं।यद्यप्युपाध्यायलक्षणोस्याभ्यनुज्ञागम्यतेतथाप्यापद्विषयासोमं
तथांराजांतेवासियाज्ञेसःसीरविन्स्तेद्दनंक्रषेतियोगिस्मरणात्तानवापणपूर्वमेवायंधनाममोभ्यनुज्ञायतेअध्यापाधर्मतःसाधुश
क्तान्भज्ञानविन्नदाइत्यपणपूर्वस्यतस्यज्ञोवानुज्ञानात्तस्मादापदितस्याप्यभ्यनुज्ञेतिमंतव्यंअनापदिभृतकाध्यापनमुपपातकमितिन
विरोधः।यद्यप्यंतेवासीशिल्पशिक्षार्थमुच्यतेतथाप्युक्तन्यायाद्विशेषाद्वेदविद्याशिष्यस्यापिवेरोधः॥ ॥भृताध्यापनादाने॥२५॥भृताद्वेत
नग्राहिणोयदध्ययनंशिष्यस्यतथावकारादध्येतुरनुयोगदानंतचोत्कर्षार्थमधीयानस्यावहंपठमीत्यादिपर्यनुयोगःदत्ताउयोगानध्येतुःप
तिनाभ्यनुरवब्रवीरितिस्मरणात।भृतकाध्ययनंकृत्वाभृतकाध्यापनंतथा।अनुयोगप्रदानेनव्रीडपञ्चांकविवेद्यवानितिहारीतस्मरणाच्च॥ ॥
सर्वाकरेष्वधीकारः॥२४॥सर्वेष्वेवतेष्वाकराःसुवर्णरजताद्युत्पत्तिस्थानानितेषुराजादेशेनाधिकारः।सर्वशब्दात्कृत्रिमाणांवस्त्राद्युत्पत्तिस्थाना
नामपिग्रहणं।संकोचेमानाभावात्सर्वाकरेष्वधीकारइत्यविशेषेणमानवाच्च॥ ॥महायंत्रवर्त्तनं॥२३॥एकप्रयोगेणानेकहिंसाकरंतत्रादि
महायंत्रं।तस्यप्रवर्त्तनंनिर्माणंतस्यैवाभिसंयोगकरणेनगोलकमोचनंवा।हिंस्रयंत्रविधानंचेतियोगिस्मरणात्।युक्तंचैतदेवहिंसासंवं

घेनपातकत्वोचित्यात्। यन्मनुः शूद्राणां कर्त्री चेति तत्। न तु तिलेक्षुयंत्रप्रवर्त्तनं हिंसासंबंधाभावेन पात
कत्वानौचित्यात्। न च तिलादिनिष्पीडनमेव हिंसेति युक्तं चवर्णस्यापि तत्वापत्तेरित्यलं॥ ॥द्रुमगुल्म
वल्लीलतौषधीनां हिंसा॥२४॥ द्रुमाः पनसाम्रादयः। गुल्मा अनतिदीर्घनिविडलताः मालत्यादयः। वल्ल्यो वे
ष्टनयाभिन्यो गुडूच्यादयः। लता दीर्घयायिन्यो द्राक्षादयः। ओषध्यः फलपाकान्ताः शाल्यादयः। समासादु
क्ष क्त पप्रतानादीनां ग्रहणं। गुच्छाः कुरंटकादयः। क्षुपाः करवीरादयः। प्रतानाः सारिवादयः। तेषामार्द्राणां
हिंसा छेदः। इध्मनाद्युद्देशेन। इध्मनार्थमशुष्काणां द्रुमाणामवपातनमिति मनुस्मरणात्। हलाद्यर्थव्यतिरे
केण। फलपुष्पोपगान्पादपान्न हिंस्यात्कर्षणकरणार्थं चोपहन्यादार्हस्थ्यांगे चेति वसिष्ठस्मरणात्। कर्ष
णकरणं हलः। गार्हस्थ्यस्यांगमग्निपालनं तदुपयोग्यरणीपात्रादिकरणं च तदर्थछेदनेन दोषः॥ ॥स्त्र्या
जीवनं॥२५॥ ॥स्त्रियाः आभिमुख्येनान्यं प्रति संमुखीकरणेन तेन संयोज्यति यावत्। तदुत्पन्नेन धनेन जीव
नं॥=॥ अभिचारबलकर्मसु च प्रवृत्तिः॥२६॥ ॥परमरणाय जपहोमादिरभिचारः। अनिषिद्धस्यापि परानभि
मतस्य बलावष्टंभेन करणं बलकर्म। मूलकर्मेति मनुः। मूलैरौषधीनां वशीकरणादिकरणं मूलकर्मेति। अ

स्यार्थः। तेषु प्रवृत्तिरुद्योगः। प्रवृत्तिग्रहणमनिष्पन्नेपि प्रयोजने प्रवृत्तिमात्रेणापापसंबंधप्रदर्शनार्थं ॥२४॥ ब्राह्म
णवधे ब्रह्महत्यापातित्यलिंगात्। चकारादहीनयाजनादि। व्रात्यानां याजनं कृत्वा परेषामंत्यकर्म च। अभिचारमही
नं च त्रिभिः कृच्छ्रैर्विशुध्यतीति मानवात्॥ ॥आत्मार्थे क्रियारंभः॥२६॥ ॥अत्र क्रिया सामान्यापि पचनक्रिया
गृह्यते। अघं स केवलं भुंक्ते यः पचत्यात्मकारणादिति स्मरणात्। तस्मादात्ममात्रोद्देशेनारंभः॥ ॥अनाहिताग्
निता॥२८॥ ॥आधानाधिकारेपि श्रौतस्मार्ताग्न्यपरिग्रहः॥ ॥देवर्षिपितृऋणानामनपाक्रिया॥२९॥ ॥
देवर्षिपितॄणामृणानि जायमानो वै ब्राह्मणस्त्रिभिः ऋणवान् जायत इत्यादिश्रुत्युक्तानि तेषामनपाक्रिया अपरि
हारः। यज्ञाकरणस्वाध्यायानध्ययनप्रजानुत्पादनानीति यावत्। यत्तु गृहीतस्य सुवर्णादेरप्रदानमृणानां च
नपाक्रियेत्यस्य व्याख्यानं। तन्न सुंदरं। तस्य पूर्वोदाहृतहारीतवाक्याभिहितस्तेयावांतरभेदत्वेन पौनरुक्त्यान्मूल
वाक्यविरोधाच्चेत्यलं। बहुवचनान्मनुष्यऋणस्याप्यनपाकरणं। तथा च नारदः। इहैति पितरः पुत्रान्स्वार्थ
हेतोर्यतस्ततः। उत्तमर्णाधमर्णेभ्यो मामयं मोचयिष्यति। उत्तमर्णानि देवर्षिपितृऋणानि। अधमर्णानि मनु
ष्यर्णानि सुवर्णधान्यादीनीति कल्पतरुः॥ ॥असच्छास्त्राभिगमनं॥३०॥ ॥असतां वेदबाह्यानां बौद्धादीनां शा

वि॰टी॰३१
२९७

स्त्रेवमिगमनस्याम्नः। असछास्त्राभिगमनमितिस्मरणात्॥ ॥नास्तिकातो॥२३॥ ॥नास्तिचतस्यानिषेवनम
भिगमनं।मद्यशद्वोत्रमद्यसुरासाधारणोस्तेनयासांमद्यमात्रंनिषिद्धंयासांचसुरामात्रंतदुभयग्रहणायामद्य
पशद्वप्रयोगः।नात्रमद्यपस्यभार्येत्यर्थः।समयोतिग्रसंगात्।पश्चार्थलक्षणाश्चानापिमद्यपस्त्रास्त्रूद्रेतिसाधुहो
नयोनिनिषेवतोनपोलक्स्यात्।स्त्रीग्रहणंस्वपरस्त्रीसाधारण्यायात्तत्रकृतप्रायश्चित्तायाएवअकृतप्रायश्चि
त्तायाएवभिगमनस्यमहापातकत्वात्।अतएवसुराप्याधिवेदनीयेति।सुराप्याश्चअधिवेदनंकृतप्रायश्चित्ताया
अप्यगम्यत्वएवदृष्टं।तेअन्यथाधिवेदनस्याहष्टार्थतापत्तेः।पतत्यर्द्धंशरीरस्ययस्यभार्यासुरांपिवेत्।पति
तार्द्धशरीरस्यनिष्कृतिर्नविधीयतइतिमानववचनात्।मद्यापभार्यात्कृतप्रायश्चित्तायाअप्यव्यवहार्यत्वसिद्धे
श्चेत्यलं॥ ॥इत्युपपातकानि॥२५॥ ॥उक्तिग्रहः।प्रकारवचनस्तेनेदंप्रकाराणामन्येषामपिग्रहणंयथायो
गीश्वरः।वार्द्ध्यंलवणक्रियाणिदितार्थोपजीवनंतुलोपस्त्रसुतानांचैवविक्रयस्तडागारामविक्रयः।कन्या
संदूषणंचैवकौटिल्यंहिंसोपजीवनंव्यसनान्यात्मविक्रयः।शूद्रप्रेष्यंहीनसख्यंहीनयोनिनिषेवणंत
थैवानाश्रमेवासःपरान्नपरिपुष्टता।भार्यायाविक्रयश्चेणामेकैकमुपपातकमिति।वार्द्धुष्यं॥[illegible]॥र्द्धप्रहर्दत्तुपजी

राम
२९७

267

वनोल्लवर्णा। स्थैर्येवाना अश्रमे वासः परान्नपरिपुष्टः क्रिया उत्पादनं। निंदितस्य राजकृतस्यार्थस्य मल्ल... पजीवनं। व्र
तलोपो ब्रह्मचारिणः स्त्रीप्रसंगः। अन्यस्यापि व्रतस्य नियमस्य लोपः। सुताश्च सुताः कन्यापुत्रास्तेषां विक्र
यः। तडागो जलाशयः। आराम उद्यानं तयोः स्वकृतयोः पितृकृतयोर्वानुत्सृष्टयोर्विक्रयः उत्सृष्टयोः स्वत्व
भावात्। कन्यायाः संदूषणं मेगुल्यादिना योनिविदारणम कन्येत्युक्तिरपस्मारादि घारोपणं वा। न संभोग
स्तस्य गुरुतल्पसमानत्वात्। कौटिल्यमगुरोः गुरुकौटिल्यस्य सुरापानसमत्वात्। हिंसया प्राणिवधेन जीव
नं। औषधेन रसक्रियादिना जीवनं वैद्यवृत्तिरिति पाठः। व्यसनानि मृगयादीन्यष्टादश। आत्मन्नल्पक
रणं न परदारस्य करणं। शूद्रस्य द्वेष्यसेवकी भावश्चैवर्णिकस्य। हीनैश्चौरादिभिर्मैत्रीकरणं। अन्त्यसवर्ण
दारस्य केवलासवर्णदारोद्वहनं। अनाश्रमे विधुरत्वादौ वासो रतिः। नित्यं परान्नसेवनं। भार्याया ऊढायाः
अऊढाया अपि विक्रयः। वकारार्थमाह प्रवेताः। अनृतवाक् तस्करो राजभृत्यो वृक्षारोपकः वृत्तिर्गरदो भि
देश्वरथगजारोहणात् हन्तारं गोपजीवी श्वगणिकः शूद्रोपाध्यायो वृषलीपतिर्मौण्डिकोन्नस्तेत्रोपजीवी
चरवधान्ते ब्रह्मजीवी चिकित्सको देवलकः पुरोहितः कितवो मद्यपः कूटकारकोपत्यविक्रयी मनुष्यप

शुद्धिकेतावेति हारीतोपि। कन्यादूषी सोमविक्रयी परिवेत्ता कौमारदारत्यागप्रसूरामद्यपः शूद्रयाज
को गुरोः प्रतिहंता नास्तिको नास्तिकवृत्तिः कृतघ्नः कूटव्यवहारी ब्राह्मण इति मिथ्याभिशंसी पतितसं
व्यवहारी मित्रध्रुक् शरणागतघाती प्रतिरूपकवृत्तिरिति। एतान्युपपातकसंज्ञानि उपसमीपे पातकिनो
नरकेषु पातयंतीति संव्यवहारी त्युपपातकानि। एवमुपपातकानि विभज्य तेषु प्रायश्चित्तमाह॥ ॥उपपा
तकिनस्त्वेते कुर्युश्चांद्रायणं नराः। पराकं च तथा कुर्युर्यजेयुर्गोसवेन च॥२६॥ ॥एते सर्वेप्युपपातकि
नो नराश्चांद्रायणं मासमात्रेण कुर्युः। चशब्दो विकल्पार्थः। तथा तेष्वेवोपपातकेषु पराकं वत्स्यामा
त्रमेव वा कुर्युः। अथवा गोसवेन यज्ञेन वा यजेयुः। तथाशब्दान्मासं पंचगव्याशनेन मासं पयोव्रतं वा इति।
उपपातकशुद्धिः स्यादेवं चांद्रायणेन वा। पयसा वापि मासेन पराकेणाथवा पुनरिति योगिस्मरणात्। अ
त्रायमभिसंधिः। येषूपपातकेषु वक्ष्यमाणं प्रतिपदोक्तं प्रायश्चित्तं नास्ति तेष्वेतेषां त्रयाणामन्यतमदेश
कालाद्यपेक्षया योज्यं। येषु पुनः प्रतिपदोक्तं स्वीयमन्यदपि वा प्रायश्चित्तमस्ति तेषु तदेवेति। तत्र परा
कचांद्रायणादीनामकामकामकारे कामकारे तु गोसवः स्वल्पमात्रेषु कं वा। यथाऽहमनुः स्मो मा॰ कोपकर्मा।

एतदेव व्रतं कुर्युरुपपातकिनो द्विजा इति। एवमन्यदप्यूह्यं॥ ॥इति श्री
विष्णुस्मृतिविवृतौ श्रीमत्यां वैजयन्त्यां सप्तत्रिंशोऽध्यायः॥ ॥जातिभ्रंशकरविभागं तत्प्रा
यश्चित्तं चाष्टत्रिंशाध्यायेनाह॥ ॥ब्राह्मणस्य रुजःकरणं॥१॥ ॥विप्रस्यांगपीडाकरणं॥ ॥अघ्रेयमद्यघ्रा
घ्रातिः॥२॥ ॥अघ्रेयं विण्मूत्रादि मद्यमुक्तालशुनं तयोर्घ्रातिर्गन्धोपलब्धिः॥ ॥जैह्म्यं॥३॥ ॥जैह्म्यं वंचक
त्वं॥ ॥पशुषु मैथुनाचरणं॥४॥ ॥पशुषु गवादिषु मैथुनस्य ग्राम्यधर्मस्याचरणं॥ ॥पुंसि च॥५॥ ॥पुरुषे मैथुना
चरणं। चकारात्स्त्रियामपि अयोनौ गमनं। अयोनौ गच्छतो योषां पुरुषं चाभिमेहतः। चतुर्विंशतिको दंड उ इति यो
गिस्मरणात्॥ ॥इति जातिभ्रंशकराणि॥६॥ ॥एवं प्रकाराणि जातिभ्रंशकरशब्दाभिधेयानीति स्ववृत्ति
निमित्तं प्रागुक्तं। तत्र प्रायश्चित्तमाह॥ ॥जातिभ्रंशकरं कर्म कृत्वान्यतममिच्छया। चरेत्सांतपनं कृच्छ्रं प्राजापत्यम
निच्छया॥७॥ ॥इच्छया कामतः पूर्वोक्तमन्यतमं जातिभ्रंशकरं कर्म कृत्वा सांतपनं कृच्छ्रं सप्ताहसाध्यं चरेदनि
च्छयाश्च कामतः पुनः प्राजापत्यं वस्त्रमात्रां चरेदिति। यत्तु ब्राह्मणस्य रुजः कृत्वा रासभादिप्रमापणं। दिनितेभ्यो
धनादानं कृच्छ्रार्द्धं व्रतमाचरेदिति बृहस्पतिनोक्तं तदल्परुजःकरणजातमाचरासमव्रमापणाद्यल्पविषयेड

ष्टव्यं ॥ ॥ विष्णुस्मृतिवृत्तौ श्रीमत्यां वैजयंत्यामष्टत्रिंशोऽध्यायः ॥
संकरीकरणविभागं तत्प्रायश्चित्तं चैकोनचत्वारिंशाध्यायेनाह ॥ ॥ ग्राम्यारण्यानां पशूनां हिंसा संकरीकरणं ॥१॥ ॥
ग्राम्या अश्वादयः। आरण्या महिषादयस्तेषां पशूनां हिंसा संकरीकरणं। यथाह पैठीनसिः। ग्राम्यारण्याश्चतुर्दश। गौ
रविरजोऽश्वोऽश्वतरो गर्दभो मनुष्यश्चेति सप्त ग्राम्याः पशवः। महिषवानरऋक्षसरीसृपरुरुपृषतमृगाश्चेति सप्त
ग्राम्याः पशवः। महिषवानरण्याः पशव इति। तत्र गोमनुष्यवधस्योपपातकादिपाठात्तदितरहिंसा संकरीकर
णं। अत एव मनुः। खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा। संकरीकरणं ज्ञेयं मीनाहिमहिषस्य चेति। गो
मनुष्येतरानेव संजग्राह। चकारात् श्वादीनां ग्रहणं। पशुग्रहणं पक्षिनिरासार्थं तद्धिंसायां मलिनीकरणात्व
त्। तत्प्रायश्चित्तमाह। संकरीकरणं कृत्वा मासमश्नीत यावकं। कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तं तु कारयेत्
॥२॥ ॥ इच्छानिकेतुवृत्तेते। तत्रैकस्या संकरीकरणं कृत्वा मासमविच्छेदेन यावकं यवौदनमश्नीयात्। अथवा
निच्छया तत्करणे कृच्छ्रातिकृच्छ्रं कुर्यात्। अस्यासामर्थ्ये ब्राह्मणद्वारादिकारयितुं णिचूप्रयोगः। प्रायश्चित्तप
दोपादानं तत्र न केवलमनेनैवेदं किं त्वन्यत्रापि प्रायश्चित्तमिति ज्ञापयितुं व्याधिव्यसनिनि श्रांते गुर्वर्थे डामरे पव

उपवासोव्रतंहोमःस्नानंतीर्थंजपस्तपः।विप्रैःसंपादितंयस्यसंपूर्णंतस्यतत्फलमितिपराशरस्मरणाद्धोअमरो
महामारी॥ ॥
विष्णुस्मृतिविष्टतोश्रीमत्यांवैजयंत्यामेकोनचत्वारिं
शोध्यायः॥ ॥अपात्रीकरणविभागंतत्रायश्चित्तंचचत्वारिंशाध्यायेनाह॥ ॥निंदितेभ्योधनादानंवाणिज्यंकु
सीदजीवनसमसत्यभाषणंशूद्रसेवनमित्यपात्रीकरणं॥१॥ ॥निंदितेभ्योम्लेछादिभ्योविनापिशतिग्रहंहत्या
दिरूपेणधनादानं।वाणिज्यमनिषिद्धस्यापिवस्तुनःक्रयविक्रयौ।कुसीदमनिषिद्धयापिवृद्ध्याजीवनं।असत्य
भाषणंसाक्ष्यमंतरेणापि।शूद्रसेवनंप्रेष्यतांविनाप्याज्ञाकरणंत्रैवर्णिकानामित्येवंजकारकामपात्री
करणं।असत्प्रतिग्रहनिषिद्धविक्रयनिषिद्धवृद्धिसाक्ष्यानृतशूद्रप्रेष्यत्वानामुपपातकत्वात्।तत्रप्राय
श्चित्तमाह॥ ॥अपात्रीकरणंकृत्वातप्तकृच्छ्रेणशुध्यति।शीतकृच्छ्रेणवाभूयोमहासांतपनेनवा॥२॥ ॥
इच्छयाअपात्रीकरणंकृत्वावक्ष्यमाणेनतप्तकृच्छ्रेणशुध्यति।अनिच्छयातत्करणेतुशीतकृच्छ्रेणभूयोभ्या
सेनतत्करणेमहासांतपनेनशुध्यति।तत्राकामतोभ्यासेसप्ताहिकंकामतोभ्यासेपंचदशाहिकंज्ञेयं।
तत्रैवकामतोत्यंताभ्यासेसंकरापात्रीकृत्यासुमासःशोधनपंदवइतिमानवंद्रष्टव्यं॥ ॥

वि॰टी॰४०
३००

विष्णुस्मृति विवृतौ श्रीमत्यां वैजयंत्यां चत्वारिंशोऽध्यायः ॥ ॥मलावहं विम
ांतत्वाय श्चित्तं वैकं चत्वारिंशाध्यायेन ह॥ ॥पक्षिणां जलचराणां जलजानां च घातनं॥१॥ ॥पक्षिणो ज
चराः स्थलचराश्च जलचराः ये जलं प्रविश्य मत्स्यादीन् गृह्णंति ते ऊदादयो जीवविशेषाः जलजा मत्स्या
दयस्तेषां घातनं॥ ॥कृमिकीटानां च॥२॥ ॥कृमयो गोमयादिसंभूताः कीटाः पिपीलिकादयस्तेषां च
घातनं॥ ॥मद्यानुगतभोजनं॥३॥ ॥मद्येन पूर्वोक्तेन द्वादशविधेनानुगतं मद्यं मदजनकतया जाती
फलादि तस्याशनं। यद्वा मद्यस्य सुराया अनुपश्चाद्गतं मुत्पन्नं भंगादि तदशनं। यथोक्तं केदारखंडे।
लशुनं गृंजनं चैव पलांडुर्मद्यमेव च। सुरया सह जातानि तेषां भंगा च पंचमीति॥ ॥इति मलावहानि
॥४॥ ॥इति शङ्कः प्रकारं वक्ति। तेन फलादिस्तेयस्यापि ग्रहणं। यथाह मनुः। कृमिकीटवयोहत्या मद्या
नुगतभोजनं। फलैधः कुसुमस्तेयमधैर्यं च मलावहमिति। कुसुमादिस्तेयमात्मार्थं देवतार्थं सर्वतो ग्राह्य
त्वात्। द्विजस्तृणैधः पुष्पाणि सर्वतः स्ववदाहरेदिति योगिस्मरणात्। अधैर्यं लोलुपता। तत्र प्रायश्चित्तमा

राम
३००

हा ॥ मलिनीकरणीयेषु तप्तकृच्छ्रं विशोधनं । कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तं विशोधनं ॥ ५५ ॥ ॥ कामकृते पुमलिनी
करणीयेषु तप्तकृच्छ्रेण द्वादशाहिकेन शुद्धिः । अकामतः पुनस्तत्करणे कृच्छ्रातिकृच्छ्रेण तावद्भिरेव शुद्धिः
यद्यप्युभयोः स्वल्पकालतया नकामाकामविषयता घटते तथापि तप्तकृच्छ्रे त्र्यहोपवासेन कष्टाधिक्या
त्कामविषयत्वं युक्तमिति ध्येयं । अथवा अकामकृते प्रायश्चित्तांतरमेव विशोधनं ज्ञेयं । यथाह मनुः । मलि
नीकरणीयेषु तप्तः स्याद्यावकं त्र्यहमिति । अनयोश्च सकृदभ्यासाद्यपेक्षया व्यवस्था ॥ ॥ ३ ।
विष्णुस्मृतिविहितो मत्यां वैजयंत्यामेकचत्वारिंशोध्यायः ॥ ॥ प्रकीर्णकप्रायश्चित्त
मभिधित्सया द्विचत्वारिंशेन तल्लक्षयति ॥ ॥ यदनुक्तं तत्प्रकीर्णकं ॥ १ ॥ ॥ अतिपातकत्वादिनाष्टविधेनोपा
धिना यदसंगृहीतं तत्प्रकीर्णकमिति ज्ञेयं । तच्च रथ्यानोदपानादि ॥ ॥ तत्र प्रायश्चित्तमाह ॥ ॥ प्रकीर्ण
पातके ज्ञात्वा गुरुत्वमथ लाघवं । प्रायश्चित्तं बुधः कुर्याद्ब्राह्मणानुमतो यथा ॥ २ ॥ ॥ प्रकीर्णमुक्तलक्षणं
यत्पातकं तस्मिन्नर्थवादतारतम्यगौरवलाघवे ज्ञात्वा बुधो गुरुणि गुरु लघुनि लघु नीति प्रायश्चित्त
व्यवस्थाभिज्ञः सन् यथाविधि ब्राह्मणानुमतः प्रायश्चित्तं कुर्यात् । तच्च यत्र प्रतिपदोक्तमस्ति तत्र तदेव का

धीयथाप्राणायामी जले स्नात्वा व्यपानेष्ठ्यानगः नग्नः स्नात्वा च मुक्ता च मत्वा सैव दिवा स्वप्यमिति। यत्र च नि
षेधमात्रं श्रूयते न प्रायश्चित्तं तत्र सामान्यप्रायश्चित्तं देशकालादिव्यवस्थया कल्प्यं। यथा नोदन्वतोंभसि
स्नायन्न च श्मश्रूणि कर्तयेत् अंतर्वत्न्याः पतिः कुर्वन्नप्रजा भवति जातमिताशौत त्र प्रायश्चित्तमाह ये
गीश्वरः। प्राणायामशतं कार्यं सर्वपापापनुत्तये। उपपातकजातानामनादिष्टस्यैव चैव हि। इति। उक्तनाः प
नौक्तं यत्र चानोक्तमिह पातकनाशनं। प्राजापत्येन कृच्छ्रेण शुध्यते नात्र संशय इति। कामाकामाभ्यामन
यो व्यवस्था ज्ञेयेति॥ ॥ विष्णुस्मृतिविवृतौ श्रीमत्यां वैजयंत्यां द्विचत्वा
रिंशोध्यायः॥ ॥प्रायश्चित्तविधिषु द्विजग्रहस्थ्यर्थमकृतप्रायश्चित्तानां नरकांश्चत्वारिंशाध्यायेनाभिधातुं
प्रतिजानीते॥ ॥अथ नरकाः॥१॥ ॥अथेत्यधिकारः। नरकाः दुःखैकभोगस्थानान्युच्यंते॥ ॥तामिस्रं॥२॥
तामिस्रमंधकारस्तत्प्रचुरं तामिस्रं॥ ॥अंधतामिस्रं॥३॥ ॥निबिडतरांधकारप्राचुर्यं॥ ॥रौरवं॥४॥ रुरुरि
ति सर्पीवांतरजातिस्तत्प्रचुरं स्थानं॥ ॥महारौरवं॥५॥ महत्त्वयोगितदेव॥ ॥कालसूत्रं॥६॥ अयुतयोजनं ता
म्रमयं तप्तं खलमंडलं॥ ॥महानरकं॥७॥ महादुःखानुभवस्थानं॥ ॥संजीवनं॥८॥ यातनाभिर्मृतानां पुनः सं

प्रा॰टी॰४३ २०२

चवाकाशेषोनुषज्यते॥ ॥अनुपातकिनश्च॥२५॥ ॥अनुपातकिनोमहापातकतुल्यपातकिनोमन्वंतरमेव॥ ॥उ
पपातकिनश्चातुर्युगं॥२६॥ ॥उपपातकिनोगोहंत्रादयश्चतुर्युगपर्यंतंकालं॥ ॥कृतसंकरीकरणस्यसंवत्सरस
हस्रंच॥२७॥ ॥संकरीकरणकारिणोयुगादिसाहचर्यात्द्विवर्षसहस्रं॥ ॥कृतजातिभ्रंशकरणस्य॥२८॥ ॥
जातिभ्रंशकरकर्मिणोप्युक्तमेवकालं॥ ॥कृतापात्रीकरणस्य॥२९॥ ॥अपात्रीकरणकारिणोप्यमुमेवकालं
॥ ॥कृतमलिनीकरणस्य॥३०॥ ॥मलिनीकरणकारिणोपिवर्षसहस्रं॥ ॥प्रकीर्णपातकिनश्चबहून्वर्षयु
गान्॥३१॥ ॥प्रकीर्णपापकारिणोबहून्त्रीणिवर्षयुगान्वर्षशतानिप्रक्रमवशादुक्तनरकेषुक्रमेणपच्यंते।य
तु॰पातकेषुसहस्रंस्यान्महत्सुद्विगुणंस्मृतं।उपपापेतुरीयंस्यान्नरकंवर्षसंख्ययेतिकात्यायनवचनात्तत्रपातका
दिशब्दानपारिभाषिकाननुपातकादिवचनामूलविरोधात्।किंतुपातनादिगुणयोगेनयौगिकास्ततश्चसंकरी
करणादिचतुर्षुपातकेषुसहस्रं।महत्सुतदपेक्षयाधिकेषूपपातकेषुद्विगुणं।गुणास्त्रयः।गुणाश्चगुणाश्चगु
णाः।षट्द्विगुणायस्मिन्सहस्रेतद्द्विगुणंसहस्रंद्वादशसाहस्रीचातुर्युगमितियावत्।पद्धागुणाःसंख्यादयः
षट्द्विगुणायस्मिन्नितिद्विगुणमिति।उपसमीपेसंकरीकरणादीनांचतुर्णांपापंप्रकीर्णकमितियावत्।उपपा

राम २०२

जीवघातनानुभावनं॥ ॥अवीचिः॥९॥वीचिरहितेयनो दर्पणमनादेः तरेवावस्थानं॥ ॥तपनं॥१०॥अग्निसंनिकर्षे
णतापानुभवः॥ ॥संप्रतापनं॥११॥अग्निनाभर्जनं॥ ॥संघातकं॥१२॥अत्यंतसंहतदेशे बहूनामवस्थापनं॥ ॥
काकोलः॥१३॥द्रोणकाकैर्भक्षणं॥ ॥कुड्मलं॥१४॥गोण्यादिषु प्रक्षिप्य तन्मुखबंधनं॥ ॥पूतिमृत्तिकं॥१५॥
दुर्गंधिमृत्तिकास्थलं॥ ॥लोहशंकुः॥१६॥ ॥सूचीभेदनं॥ ॥अवीसं॥१७॥पुटपाकः॥ ॥विषमपंथानं॥१८॥
॥उच्चावचो मार्गः॥ ॥कंटकशाल्मलिः॥१९॥कंटकयुक्तशाल्मलिवृक्षप्रचुरो देशः॥ ॥दीपनदी॥२०॥उष्ण
तोयवहा नदी वैतरण्याख्या। नदी वैतरणी नाम दुर्गंधा रुधिरावहा। उष्णतोया महावेगा अस्थिकेशतरंगिणी
ति॥ ॥असिपत्रवनं॥२१॥खड्गपत्रवृक्षवनं॥ ॥लोहचारकमिति॥२२॥निगडबंधः लोहमयो वा इति करणा
त्सलिलमहापथकुंभीपाकतप्तवालुकादीनां ग्रहणं॥ ॥एते एकैकशः पापिनां अतिपातकिनः पर्यायेण कल्पं
पच्यंते॥२३॥ ॥प्रमादालस्योद्भवादिना अकृतयथोक्तप्रायश्चित्ता अतिपातकिनो मात्रादिगंतारः पूर्वोक्तेषु
तामिस्रादिनरकेषु कल्पं पूर्वोक्तलक्षणं कालं पर्यायेण क्रमेण पच्यंते यातनामनुभवंति॥ ॥महापातकिनो मन्वं
तरं॥२४॥ ॥महापातकिनो ब्रह्महादयो मन्वंतरं मुक्तेषु नरकेषु पर्यायेण पच्यंते॥ उत्तरेष्वपि सप्तसु कुंभीपाकेष्वेषु

तकानांमहच्छब्देनाभिधानात्।तत्र तुरीयं द्वादशानां चतुर्थांशस्त्रीणि शतानि सहस्रार्वाचीनतया गम्यं तद्दत्य
र्थकल्पनया विरोधः परिहार्यः।एवं नरकस्वरूपं तद्भोगकालं चोक्त्वा इदानीं नरकगमनकालीनं दुःखमाह।। ।।
कृतपातकिनः पापाः प्राणत्यागादनंतरं।याम्यं पंथानमासाद्य दुःखमश्नंति दारुणं।।३२।। ।।कृतानि नवविधानि
पातकानि यैस्ते अकृतप्रायश्चित्ता अतएव पापाः पापाक्रांताः प्राणानां त्यागात् निर्गमनादनंतरं याम्यं यमपुरीसंबंधि
नं पंथानं प्राप्य वक्ष्यमाणं दारुणं दुःखमनुभवंति।तदेवाह।। ।।यमस्य पुरुषैर्घोरैः कृष्यमाणा यतस्ततः।सकृत्कु
णानुकारेण नीयमानाश्च ते यथा।।३३।। ।।भयानकैर्यमदूतैः समविषमेषु देशेषु कृष्यमाणाः कष्टानुकारिणा
कारविशेषेण नरकं नीयमानास्ते यथा दुःखमनुभवंति।एवं नरकोपभोगानंतरमपि तिर्यग्योनौ उत्पद्यंते दुःखा
नि विविधानि चेत्यध्यायांतेनान्वयः।किंच।। ।।श्वभिः शृगालैः क्रव्यादैः काककंकवकादिभिः।अग्नितुंडैर्भ
क्ष्यमाणा भुजंगैर्वृश्चिकैस्तथा।।३४।।क्रव्यादैरिति काकादीनां विशेषणं।अग्निस्तुंडे येषां ते मल्लूकादयः
शेषं प्रसिद्धं।किंच।।४ ।।कृधपाम्यमानाश्च घोरैर्व्याघ्रगणैस्तथा।पूयशोणितगंधेन मूर्छमानाः पदे पदे।।
।।३५।। ।।ककचाः करपत्राणि।किंच।। ।।कृ घेत्यावंतो निशादिशोतिवत्त।व्यर्थं तत् इति बध्यमानाः मूर्छमाना इति
x अग्निना दह्यमानाश्च तुद्यमानाश्च कंटकैः।ककचैः पाट्यमानाश्च पीड्यमानाश्च तत्र च।।३६।।ककचाः करपत्राणि।किंच।।२

क्षीरस्य यद्वत्पयः। लिंगं॥ ॥परान्नपानं लिप्संतस्ताड्यमानाश्च किंकरैः। काककंकवकादीनां भीमानां सह
शानने॥३७॥ ॥परेषामन्नपाने लिप्संत इत्यत्रापि पदव्यत्ययः। काकाद्याननत्वं किंकरविशेषणं॥ ॥क्वचि
त्क्वाथ्यंते तैलैनताड्यंते मुसलैः क्वचित्। आयसेषु च वध्यंते शिलासु च तथा क्वचित्॥३८॥ ॥वध्यंत इति वध्यवे
ष्टन इति भ्वादेः कर्मणि रूपं। वध्यंते पिष्यंते आयसीषु लोहस्थस्थलीषु शिलासु चेते पेषणाहत्तिस्वष्टार्थः॥
॥क्वचिद्वांतमथाश्नंति क्वचित्पूयमसृक्क्वचित्। क्वचिद्विष्ठां क्वचिन्मांसं पूयगंधि सुदारुणं॥३९॥ ॥वांतमु
द्गीर्णं। पूयं रक्तपाकः। असृक्रक्तं। पूयगंधीति मांसविशेषणं सुदारुणत्वे हेतुः॥ ॥अंधकारेषु तिष्ठंति दारु
णेषु तथा क्वचित्। कृमिभिर्भक्ष्यमाणाश्च वह्नितुंडैश्च दारुणैः॥४०॥ ॥दारुणेषु निविडेष्वंधकारेषु
कृमिभिर्विष्ठादिसंभूतैः प्राणिभिः। वह्नितुंडैः श्वावादिभिः॥ ॥क्वचिच्छीतेन बाध्यंते क्वचिच्चामेध्यमध्यगाः
परस्परमथाश्नंति क्वचित्प्रेताः सुदारुणाः॥४१॥ ॥अमेध्यं विष्ठादि। परस्परं प्रेताः प्रेतानश्नंति सुदारुणा बुभु
क्षातिशयेन॥ ॥क्वचिद्धतेन ताड्यंते लंबमानास्तथा क्वचित्। क्वचित्क्षिप्यंति बाणौघैरुत्कृत्यंते तथा क्व
चित्॥४२॥ ॥हतेन पूर्ववद्धतेन लंबमाना हन्तादो वं घनेन क्षिप्यंतीति पदव्यत्ययः॥ ॥कंटकेषु दत्तपादाश्चमु

मिति योगिस्मरणात्। प्रमीशब्दस्यांवर्थनद्यो ईश्वइति संबोधने ह्रस्वः॥ ॥इति श्रीधर्माधिकारिरामपंडितात्मजश्री
विष्णुस्मृतिविवृतौ श्रीमत्यां वैजयंत्यां सप्तचत्वारिंशोऽध्यायः॥ ॥अथा
ष्टचत्वारिंशेन निमित्तविशेषेण नैमित्तिकं यावकव्रतमाह॥ ॥अथ कर्मभिरात्मकृतैर्गुरुमात्मानं मन्येतात्मा
र्थं प्रसृतियावकं श्रपयेत्॥१॥ ॥अथेत्यधिकारः। आत्मकृतैरिति परकृतकर्मसंसर्गेणेदमिति गमयति।
अत एव यावकोपक्रमे हारीतः। अयाज्ययाजनं कृत्वा भक्ष्य मूत्रपुरीषके। अप्रतिग्राह्यमादाय याजयि
त्वा तु निंदितान्। निंतिस्वकृतमेव कर्माभिहितवान्। कर्मभिरयाज्ययाजनादिभिर्गुरुमात्मानं मन्येत स्वकृ
तशुभकर्मणः स्वांतरात्मसाक्षितया तत्कृतात्मगौरवलाघवे स्वप्रत्यये इति तज्ज्ञानं निमित्तमत्र दर्शितं। यद्यातु
लापुरुषकृच्छ्रोक्तप्रकारेण परात्मप्रतिकृतितोलने आत्मप्रतिकृतेर्गौरवं मन्येतेति व्याख्येयं। यदा तु गुरुमात्मा
नं सहकृतुलयाश्वते परं लाघवं मन्येत ततः कर्मसमारंभेदिति हारीतस्मरणात्। आत्मार्थमित्यात्ममात्रा
र्थं प्रसृतियावकं प्रसृतिपरिमितयवसाध्यं चरुं श्रपयेत्स्वयं नान्यश्रपितं प्राह्नीत। अत्रोशनसो विशेषः स्नातः
शुचिर्भूत्वोदितेषु नक्षत्रेषु ताम्रभाजने प्रसृतियावकं श्रपयेद्यायवागूर्भवतीति। आत्मप्रदक्षावल्कमाह॥

वि॰ टी॰ ४८ ३२२

।।नत तो मे जुहुयात्।।४।। ।।ततः प्रभृतियावत्कादग्नौ होमं वैश्वदेवं न कुर्यात् न चासंस्कृतान्नभोजनदोषः
वैश्वदेवानंतरं पुनः पाकस्य दोषाभावात्। किंच।। ।।न चात्र बलिकर्म।।७।। ।।बलिकर्म च रात्रादिभोजभोज
नकालीनं बलिदानं न भूतयज्ञः तस्याहुतस्य होमद्रव्यकत्वेन होमनिवृत्तेनैव निवर्त्तनात्।। ।।अश्रृतं श्रपयमाणं
श्रृतं चाभिमंत्रयेत्।।८।। ।।अश्रृतमग्नावनधिश्रितं श्रपयमाणमधिश्रयणानंतरं श्रृतं पक्वं च कारादवरो
पणं च यवोसीति सार्द्धमन्त्रं स्वपमाणोऽभिमंत्रयेत्। श्रृतवरोपदेशस्य त्वा सवितुरित्यादिनोत्पूय साविच्या
भिघार्य ततोऽभिमंत्रयेत यवोसीत्यादि द्विरित्याशनसात्।। ।।अप्रमाणे रेखां कुर्यात्।। ।।श्रपमाणे चरौ
वक्ष्यमाणमंत्रेण रेखां कुर्यात्। तत्र मंत्रः।। ।।ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणां
श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन्निति दर्भं च ग्राति।।९।। ।।अनेन मंत्रेण चरुस्था
लीकंठे दर्भं च बध्नीयात्। अशनमसि त्वन्ये मंत्राः। तस्य श्रपणकाले रेखां कुर्यात्। नमो रुद्राय भूताधिपतये
पर्वतानां पतये त्वामिमं रक्षस्वेति। अस्मिन्नुपदेशे मंत्रेणामात्रेन दर्भबंधनमिति विशेषः।। ।।श्रृतं चरुं
मश्रीपात्याग्रे निदध्यात्।।१०।। ।।श्रृतं चरुं रूपा वांतरे निदध्यादश्रीपात्। तत्र मंत्रः।। ।।येदेवा मनोजाता म

रा ३

नो जुषः सुदन्नादन्नपितरः। तेनः पांतु ते नो वंतु तेभ्यो नमस्तेभ्यः स्वाहेत्यादिभिर्यत्मनिशुहुत्वा यात्॥८॥ ॥अनेन मं
त्रेनं चरुं प्राश्नीयात् मंत्रांतरेण। तत्रोशनसो विशेषः। ततो ब्रह्मादेवानामिति प्राश्य ततः प्राणाय स्वाहेत्यादि
भिर्यथोक्तं सर्वं प्राश्नीयादिति॥ ॥अथाचांतो नाभिमालभेत॥९॥ ॥चरुप्राशनानंतरं यथोक्तमाचम्य नाभि
मालभेत। तत्र मंत्रः॥ ॥स्नाताः पीता भवत यूयमापो अस्माकमुदरे यवाः। ता अस्मभ्यमनमीवा अयक्ष्मा अना
गसः संतु देवीरमृता ऋतावृध इति॥१०॥ ॥अनेनाभिमालभेत्। उक्तकर्मणो यथाधिकारं विनियोगमाह॥ ॥
त्रिरात्रं मेधार्थी॥११॥ ॥मेधाधारणावती बुद्धिस्तदर्थी त्रिरात्रं प्राश्नीयात्॥ ॥षड्रात्रं पापकृत्॥१२॥ ॥महा
पातकादर्वाचीनं पापं कृत्वा षड्रात्रं प्राश्नीयात्। षड्रात्रं ततो नियमातिक्रमजात्स्मृतिविरुद्धसेवनजादभक्ष्यभक्षणा
जाच्च सर्वस्मात्पापात्प्रमुच्यत इत्युशनः स्मरणात्॥ ॥सप्तरात्रं पीत्वा महापातकिनामन्यतमं पुनाति॥१३॥ ॥
सप्तरात्रपानेन ब्रह्महादीनामेकं पुनाति। सप्तरात्रं पीत्वा भ्रूणहत्यां गुरुतल्पं सुवर्णस्तेयं सुरापानं च पुनाती
त्युशनः स्मरणात्॥ ॥द्वादशरात्रेण पूर्वपुरुषकृतमपि पापं निर्दहति॥१४॥ ॥द्वादशाहं पीत्वा पित्रादि
कृतमपि पापं निर्दहति। अपि शब्दात्मनोपि पूर्वकृतं। एकादशरात्रं पीत्वा पूर्वकृतं पापं नुदतीत्युशनः स्मरणा
त्॥ ॥मासं पीत्वा सर्वपापानि॥१५॥ ॥मासं त्रिंशद्दिनं पीत्वा सर्वाणि महापापोपपापादीनि सर्वेषां स्वस

पित्रादीनां च पापानि निर्दहन्ति। तत्र महापातकादौ अवस्था कल्पनीया॥ ॥गौ॥ निराहारस्तु त्रीन्यवानेक
विंशतिरात्रं वा॥१६॥ ॥गो॥ निहारो गोमयं तेन सह भुक्ता गोनिहारस्तु तास्तेषां यवानामेकविंशतिरात्रमे
व यावकप्राशनेन सर्वपापानि निर्दहन्ति। तेषु द्वयवेभ्यो विशेषः। कुशानामेकविंशतिरात्रं गोत्वागणान्य
रूपाणि गणाः शिवातिं वस्यति विप्राः शिवातिं पश्यत्येव महर्हरं नन्दा गणो यज्ञांशभागी वा दिति। शंखस्तु मास
माहां गोमूत्रेणापि यावान्नं च मासं नित्यं समाहितः। भुञ्जीत तु पावकं कुर्यात्सर्वपापापनुत्तये। इति। अश्वत्थादिमि
मे तेन मे स्नानं हि॥ ॥यवोसि धान्यराजोसि वारुणो मधुसंयुतः। निर्णोदः सर्वपापानां पवित्रमृषिभिः स्मृ
तः॥१७॥ ॥स्मृतमित्योडशनस्मि॥ ॥घृतं यवा मधु यवा आपो वा अमृतं यवाः। सर्वं पुनीत मे पापं यन्मे किंच
दुष्कृतं॥१८॥ ॥वाचा कृतं कर्मकृतं मनसा दुर्विचिन्तितं। अलक्ष्मीं कालकर्णीं च नाशयध्वं यवा मम॥
१९॥ ॥श्वकीस्तालकंठी च सर्वं पुनन्तु मे यवाः इत्योशनमे। श्वसूकरावलीढं च उच्छिष्टोपहतं च यत्। माता
पित्रोरशुश्रूषितं तत्पुनीध्वं यवा मम॥२०॥ ॥केशकीटावपन्नं च कारुकोच्छिष्टमेव च। सर्वं पुनन्तु मे यवाः इत्यो
शनमे। गणान्नं गणिकान्नं च शूद्रान्नं श्राद्धसूतकं। चौरस्यान्नं नवश्राद्धं पुनीध्वं च यवा मम॥२१॥ ॥श्राद्ध

राम
३२४

जगाभोगवेष्टिताः पीड्यमानास्तथा यंत्रैः कृष्यमाणाश्च जानुभिः॥४३॥ ॥कंटकाढ्यैः कंटकास्तेषु। भुजगाभोगाः
सर्पशरीराणि। यंत्रैः तिलेक्षुनिष्पीडनयंत्रैः पीड्यमानाः कंटकाक्रांतपादत्वेन गमनाशक्त्या जानुभिः कृष्य
माणाः॥ ॥भग्नपृष्ठशिरोग्रीवाः सूचीकंठाः सुदारुणाः। कूटागारप्रमाणैश्च शरीरैर्यातनाक्षमैः॥४४॥ भग्न
पृष्ठपृष्ठभागाः। शिरो मस्तकं ग्रीवा शिरोधिर्येषां ते। प्राण्यंगत्वादेकवद्भावः। सूचीसदृशोल्पप्रमाणः कंठनालो येषां।
कूटाख्यमगारं गृहविशेषस्तत्प्रमाणैस्तत्प्रयोजनैः यातनाक्षमैरिति। यातनासु दुःखानभवेयुरिति स्थूलान्येव
शरीराणि क्रियंते न सूक्ष्माणि स्वल्पदुःखेनैव तेषां विनाशात्॥ ॥एवं पातकिनः पापमनुभूय सुदुःखिताः।
तिर्यग्योनौ प्रपद्यंते दुःखानि विविधानि च॥४५॥ ॥पातकिनो नरकं नीयमाना यथा दुःखान्यनुभवंति एव
मेव नरकेषु पापफलमनुभूय पापशेषेण तिर्यग्योनिप्राप्त्यनंतरमपि विविधानि दुःखानि प्रपद्यंते॥ ॥

विष्णुस्मृतिविवृतौ श्रीमत्यां वैजयंत्यां त्रिचत्वारिंशोऽध्यायः॥ ॥पूर्वाध्यायांते
प्रतिज्ञातां तिर्यग्योनिप्राप्तिं चतुश्चत्वारिंशेन प्रपंचयति॥ ॥अथ पापात्मनां नरकेष्वनुभूतदुःखानां तिर्यग्योन
यो भवंति॥१॥ अतिपातक इत्यधिकारांतरं। अतिपातकादीनां पापात्मनां तामिस्रादिनरकेष्वनुभूतयातना

वि·टी४४
३०४

दुःखानोतिरश्चांयोनयोभवंति॥१॥ ॥अतिपातकिनांपर्यायेणसर्वाःस्थावरयोनयः॥२॥ ॥मातृगंत्रादी
नांवृक्षगुल्मलतादिकाःस्थावराणांयोनयःक्रमेणभवंतिावकुत्वंचज्ञातपर्यवसायि।दोषैःअयाति
जीवोधमवंद्यो निशतेषु चेति योगिस्मरणात्।तत्रापिपातकतारतम्येनयोनिसंख्यातारतम्यंमूढी
परिगृह्यततोभूयोजन्मनामेकविंशतिंक्रमिकीटपतंगेषुस्थितस्तोपचरेषुचेतिशिवधर्मात्।एवमु
तरत्रापिवकुत्वंव्याख्येयं॥ ॥महापातकिनांचक्रमियोनयः॥३॥ ब्रह्महंत्रादीनांकृमीणांमुक्तरूपाणां
योनयः॥ ॥अनुपातकिनांपक्षियोनयः॥४॥ ॥पितृव्यादिपत्नीगामिनांकाकभासादिपक्षियोनयः
॥ ॥उपपातकिनांजलजयोनयः॥५॥ ॥गोघ्नादीनांमत्स्यादिजलजयोनयः॥ ॥कृतजातिभ्रंशक
राणांजलचरयोनयः॥६॥ ॥ब्राह्मणरुगादिकारिणांवकवलाकादिजलचरयोनयः॥ ॥कृतसंक
रीकरणकर्मणांमृगयोनयः॥७॥ खराद्दिघातिनांहरिणादिमृगयोनयः॥ ॥कृतपात्रीकरणकर्म
णांपशुयोनयः॥८॥ ॥निंदितधनग्राहादीनांगवादिपशुयोनयः॥ ॥कृतमलिनीकरणकर्मणांम
नुष्येष्वस्पृश्ययोनयः॥९॥ ॥कृमिकीटादिघातिनांमनुष्येष्वस्पृश्याश्चंडालाद्यास्तद्योनयः॥ ॥प्रकी

याम
३०

तोऽनुभक्षीणीहिंस्राःक्रव्यादाभवंति॥१०॥ ॥चरमानोऽशुच्यानगमनादिषुनानाविधाहिंसाशीलाश्चाममांसादाव्या
घ्रादयोभवंति॥ ॥अभोज्यान्नाभक्ष्याशीकृमिः॥११॥ ॥अभोज्यागणगणिकादयःतेषामन्नमभक्ष्यंचानर्चितादि
तदुभयंयोऽश्नातिसकृमिरुक्तलक्षणोभवति।एकत्वनिर्देशादेकस्मिन्नेवजन्मनिसकृत्कृतेपापेमहापातकि
नोऽकृमियोनयइतिबहुत्वश्रवणात्॥ ॥स्तेनःश्येनः॥१२॥सुवर्णातिरिक्तद्रव्यापहारीश्येनोभवति॥ ॥व
र्त्मापहारीविलेशयः॥१३॥ ॥चलत्स्यमहतोवर्त्मनोपहारीभूमिग्रहणेनसंकोचकोविलेशयः
सर्पादिः॥ ॥आखुर्धान्यहारी॥१४॥ ॥यवव्रीह्यादिधान्यहारीमूषकः॥ ॥हंसःकांस्यापहृहारी॥१५॥ ॥रंग
ताम्राभ्यामुत्पन्नोधातुःकांस्यंतदपहारीहंसश्चक्रांगः॥ ॥जलंहृत्वाभिप्लवः॥१६॥ ॥पानीयापहर्त्ताभिप्लवो
जलकुक्कुटः॥ ॥मधुदंशः॥१७॥ ॥माक्षिकापहारीदंशोवनमक्षिका॥ ॥पयःकाकः॥१८॥ ॥दुग्धापह
रीकाकःकरटः॥ ॥रसंश्वा॥१९॥रसमिक्ष्वादेरपहृत्यश्वाकुक्कुरः॥ ॥घृतंनकुलः॥२०॥ ॥सर्पिर्हारी
नकुलोबभ्रुः॥ ॥मांसंगृध्रः॥२१॥ ॥पललंहृत्वागृध्रोदात्वाप्यः॥ ॥वसांमद्गुः॥२२॥ ॥वसांमांसपा
कलंहृत्वामद्गुःपक्षिविशेषः॥ ॥तैलंतैलपायिकः॥२३॥ ॥तैलंहृत्वातैलपायिकःपयोष्णीनामकोम

त्तिकाविशेषः॥ ॥लवणं चीरीवाकः॥२४॥ ॥लवणं सैंधवादि हृत्वा चीरीत्यनुकारिणी वाक्यस्य स चीर्यो व्योम
त्तिकाविशेषः॥ ॥दधि बलाका॥२४॥ दधि हृत्वा बलाका बिसकंठिका॥ ॥कौशेयं हृत्वा भवति तित्तिरिः॥२५॥
॥कौशेयं टसरीपट्टादि हृत्वा तित्तिरिर्भवति। अत्र हृत्वा भवत्योरुपादानं पूर्वापरवाक्येष्वनुषंगार्थं॥ ॥क्षौमं दर्दु
रः॥२६॥ ॥क्षौमम् अतसीतंतुभवं हृत्वा दर्दुरो भेकः॥ ॥कार्पासतांतवं क्रौंचः॥२७॥ ॥कार्पासतंतुभवं हृत्वा
क्रौंचः कुंझ भवति॥ ॥गोधा गां॥२८॥ ॥गोजातीयं हृत्वा गोधा कृकलासानुकारिणी॥ ॥वाल्गुदो गुडं॥२९॥
॥गुडं हृत्वा वाल्गुदो वल्गुल्यवांतरजातिः पक्षिविशेषः। वागुद इति वा पाठः॥ ॥छुछुंदरिर्गंधान्॥३०॥ ॥
गंधान् चंदनादींश्च हृत्वा छुछुंदरिर्गंधमुखी मूषिकाविशेषः॥ ॥पत्रशाकं तु बर्ही॥३१॥ ॥पत्रात्मकं शाकं
हृत्वा बर्ही मयूरः॥ ॥कृतान्नं सेधा॥३२॥ ॥कृतान्नमोदनादि हृत्वा सेधा श्वावित्॥ ॥अकृतान्नं तु शल्यकः
॥३३॥ ॥अकृतान्नं तंडुलादि हृत्वा शल्यकः शल्ली॥ ॥अग्निं बकः॥३४॥ अग्निं हृत्वा बकः प्रसिद्धः॥
॥गृहकाः प्रसिद्धः॥ ॥गृहकारी ह्युपस्करं॥३५॥ ॥गृहोपस्करमुलूखलमुसलादि दृषत्पाषाणादि वा हृत्वा
गृहकारी वरटाख्यः कीटविशेषः॥ ॥रक्तवासांसि जीवंजीवकः॥३६॥ ॥मंजिष्ठादिरक्तवासो हृत्वा जीवंजी

वकश्चकोरः॥ ॥गजंकूर्मः॥३७॥ ॥हस्तिनंहत्वाकच्छपः॥ ॥अश्वंव्याघ्रः॥३८॥ ॥हयंहत्वाव्याघ्रोद्वीपी॥
॥फलंपुष्पंवामर्कटः॥३९॥ ॥फलमाम्रादिपुष्पंमल्लिकादिहत्वामर्कटोवानरः॥ ॥ऋक्षःस्त्रियं॥४०॥ ॥स्त्रिय
मविवाहितांकन्यामपहरन्ऋक्षत्वोभल्लूकः॥विवाहितापहरणेब्रह्मराक्षसः॥परस्ययोषितंहत्वाब्रह्मस्वमपह
त्यच॥अरण्येनिर्जलेदेशेभवतिब्रह्मराक्षसइतियोगिस्मरणात्॥ ॥यानमुष्ट्रः॥४१॥ ॥यानंशिविकादिहत्वा
उष्ट्रःक्रमेलकः॥ ॥पशून्गर्दभः॥४२॥ ॥पशून्महिष्यादीन्हत्वागर्दभोदाक्षाय्यः॥द्रव्याणामानंत्यात्प्रत्येकं
वक्तुमशक्तेःसंक्षेपेणाह॥ ॥यद्वातद्वापरद्रव्यमपहृत्यवलान्नरः॥अवश्यंयातितिर्यक्त्वंजग्ध्वाचैवाहुतंह
विः॥४३॥ ॥यद्वातद्वेत्यनिरूपितजातिविशेषंयत्किंचित्द्रव्यमपहृत्यप्रच्छन्नंचोरयित्वावलाद्वाछित्वाव
श्यंतिर्यक्त्वंपशुपक्षिकृमिकीटान्यतमत्वंप्राप्नोति॥नकेवलंद्रव्यापहारेणैव॥किंतुवैश्वदेवेअहुतमसंस्कृ
तमपिद्रव्यंभुक्त्वातिर्यक्त्वंप्राप्नोति॥तस्मादेतन्नकार्यमित्युक्तनिषेधानामेतेर्थवादाः॥कर्तृफलयोःपुंस्त्व
श्रवणात्स्त्रीणामतथात्वशंकायामाह॥ ॥स्त्रियोप्येतेनकल्पेनहृत्वादोषमवाप्नुयुः॥एतेषामेवजंतूनां
भार्यात्वमुपयांतिताः॥४४॥ ॥स्त्रियोप्येतेनकल्पेनप्रच्छन्नंप्रकाशंवाअन्यद्रव्याण्यपहृत्यतमेवदोषंप्राप्नु

ष्टुरतस्तेषामेव जंतूनां स्वात्वं प्राप्नुवंति दोषफलभोरकरूपत्वात्॥ ॥

विष्णुस्मृतिविवृतौ श्रीमल्लांवजयंत्यां चतुश्चत्वारिंशोऽध्यायः॥ ॥त्रिविधं पापफलं नरकास्ति
र्यक्त्वं रोगश्चेति। तत्र भेदद्वयं विवृतं। इदानीं पापविशेषेण रोगविशेषं पंचचत्वारिंशेनाह॥ ॥नरकाभिभूता दुःखा
नां तिर्यक्त्वमुत्तीर्णानां मानुषेषु लक्षणानि भवंति॥१॥ ॥नरकेषु तामिस्रादिषु भिन्नतः सर्वेषु भूतान्युत्पन्नानि
दुःखानि येषामनंतरं कर्मशेषेण तिर्यक्त्वमनुभूय योनीर्णानां मनुष्यजन्मसु वक्ष्यमाणानि ब्रह्महादीनि लक्षणा
नि तत्पापसूचकानि भवंति। मानुष्येष्विति बहुवचनेन तत्संख्याभिप्रायेण। यथाह शातातपः। महापातकजं
चिह्नं सप्तजन्मानि जायते। उपपापोद्भवं पंच त्रीणि पापसमुद्भवमिति। महापातकापेक्षयोपपातकादि
षु हि चिह्नजन्महानिदर्शनादतिपातके नव जन्मानीति सिध्यति। महापातकमनुपातकस्याप्युपलक्षणं
तुल्यनरकप्रापकत्वात्॥ ॥कुष्ठ्यतिपातकी॥२॥ ॥मातृगंत्रादिस्तु कुष्ठवान्भवति। तत्र मातृ
दुहितृस्नुषाभगिनीगामिनः। क्रमाद्गलत्कुष्ठरक्तकुष्ठपीतकुष्ठिनो भवंति। तथा च शातातपः। मातृगामी

भवेद्यस्कतस्यलिंगंविनश्यति।स्वसुतागमनेचैववरक्तकुष्ठंप्रजायते।स्ववधूगमनेचैवकृष्णकुष्ठंप्रजायते।
भगिनीगमनेचैवपीतकुष्ठंप्रजायतइति॥ ॥ब्रह्महायक्ष्मी॥३॥ ॥यस्मात्पापात्स्वस्त्वान्ब्रह्महाभवति।
पापतारतस्मैनरोगोपितारतमंद्रष्टव्यं॥ ॥सुरापःश्यावदंतकः॥४॥ ॥सुरायाःत्रिविधायाःअपिपाताश्यावाः
स्वभावकृष्णाद्शनायस्यताद्दग्भवेत॥ ॥सुवर्णहारीकुनखी॥५॥ ॥ब्राह्मणस्वामिकसुवर्णापहारीकुनखी
कुत्सितानिदंतुराणिनखानियस्यसः॥ ॥गुरुतल्पगोदुश्चर्मा॥६॥ ॥गुरुतल्पगामीदुश्चर्मीत्वग्दोषीभव
ति।ब्रह्महादिसंसर्गिणस्कतत्तद्रोगिणएवभवंतीतिनरकगभिधानं।यथाहयोगीश्वरः।योयेनसंवसत्येषां
सतल्लिंगोभिजायतइति।एवमतिपातकीमहापातकेषूक्तेदानींपातकांतरेष्वाह॥ ॥सूतिनासःपिशुनः॥
॥७॥ ॥अविद्यमानपरादोषवक्तापिशुनःसपूतिनासोदुर्गंधिनासिकः॥ ॥पूतिवक्त्रःसूचकः॥८॥ ॥
विद्यमानमेवपरदोषमन्याज्ञातंप्रकाशयतियःससूचकोदुर्गंधिवदनः॥ ॥धान्यचोरोंगहीनः॥९॥ ॥
धान्यस्यव्रीहियवादेश्चोरोंगेनहस्तपादादिनाहीनः॥ ॥मिश्रचोरोतिरिक्तांगः॥१०॥ ॥धान्येष्वेवोत्कृष्ट

मपहृत्य रिमाणपूरणाय पक्कं तन्मध्येऽवक्षिपति स मिश्रचौरो तिरिक्तांगः षडंगुल्यादिः यान्यमिश्रातिरि
क्तांग इति योगिस्मरणात्॥ ॥अन्नापहारकस्त्वामयावी॥११॥ ॥अन्नस्यादनीयमन्नस्यापहर्त्ता मयावी आ
मयाधिमानजीर्णान्नः। तुशब्दः परान्नविघ्नकरणोपसंग्रहार्थः। तथा च शातातपः। परान्नविघ्नकरणाद
जीर्णमपि जायत इति॥ ॥वागपहारको मूकः॥१२॥ ॥अननुज्ञाताध्यायी पुस्तकापहारी संदेशाव
क्ता वा मूको वागिंद्रियहीनः॥ ॥वस्त्रापहारकः श्वित्री॥१३॥ ॥वस्त्रापहर्त्ता श्वित्री कुष्ठविंदुमान्॥ ॥
अश्वापहारकः पंगुः॥१४॥ ॥अश्वहर्त्ता पंगुः पादहीनः॥ ॥देवब्राह्मणाक्रोशको मूकः॥१५॥ ॥विपरा
र्धं देवद्विजयोर्गालिप्रदाता मूकः॥ ॥लोलजिह्वो गरदः॥१६॥ ॥परस्मै मरणानुपहितविषप्रयोगकर्त्ता
वचनावसरे चलजिह्वो भवति॥ ॥उन्मत्तोऽग्निदः॥१७॥ ॥प्राणिव्यतिरिक्तसामग्रीसहितपरगृहदाहक
उन्मादवायुमान्॥ ॥गुरोः प्रतिकूलोऽपस्मारी॥१८॥ ॥पितृप्रतिकूलकर्त्ताऽपस्मरी॥ ॥गोघ्नस्त्वंधः॥
१९॥ ॥गोहंता अंधश्चक्षुर्भ्यां हीनः। तुशब्दो मातृघ्नपरिग्रहार्थः। मातृहांधः प्रजायत इति शातातपस्मरणा

त॥ ॥दीपापहारकश्च॥२०॥ ॥देवद्विजगृहादिस्थदीपहर्त्ताचायः॥ ॥काणश्चदीपनिर्वापकः॥२१॥ ॥
पूर्वोक्तदीपत्रशामकः काणः एकनेत्रहीनः। चकारात्तिमिरवांश्च देवद्विजगृहे तीर्थपुण्यस्थाने च संस्थि
तं दीपं भंजयित्वा तु तिमिरव्याधिमान् भवेदिति शातातपस्मरणात्॥ ॥त्रपुचामरसीसकविक्रयी रज
कः॥२२॥ ॥त्रपु ताम्रसहभावेन पित्तलोत्पादको धातुः टिन्वटापरपर्यायः। चामरं बालव्यजनं सीसकं ना
गस्तेषां विक्रयी रजको वस्त्ररागकरः। प्रतिलोमजः॥ ॥एकशफविक्रयी मृगव्याधः॥२३॥ ॥एक
शफा अश्वादयस्तद्विक्रेता मृगव्याधो मृगहननोपजीवी॥ ॥कुंडाशी भ्रातास्यः॥२४॥ ॥कुंडस्यान्नं कुंड
परिमितं वाश्नाति कुंडाशी। मृगवद्दास्वं यस्येति मैथुनापत्नुत्वसमर्पकः॥ ॥घांटिकस्तेनः॥२५॥ ॥स्व
र्णातिरिक्तद्रव्यस्तेनो घांटिको वैतालिकः॥ ॥वार्द्धुषिको भ्रामरीभ्रमणवातवान्॥ ॥कृष्णाश्वेपकाकीव
न्॥२६॥ ॥वार्द्धुषिको निषिद्धवृद्ध्युपजीवी भ्रामरी भ्रमणवातवान्॥ ॥कृष्णाश्वेपकाकीवातगुल्मी॥२७॥
एकाकी कृष्णाशनो वातगुल्मवान्॥ ॥समये मैत्राखल्वाटः॥२८॥ ॥संविघातिक्रमकारी खल्वाटः शिर
श्चंडिकावान्॥ ॥श्लीपद्यवकीर्णी॥२९॥ ॥अवकीर्णी क्षतव्रतः श्लीपदी उच्छूनजंघचरणः॥ ॥परवृत्तिघ्नाद

रिङ्गारुण ॥ ब्राह्मणहन्ति क्षीमिस्त्वः॥ ॥परपीडाकरो दीर्घरोगी॥२१॥ ॥निष्कारणं परपीडाकरोऽसाध्य
व्याधिमान्॥ निषिद्धकर्म्मणामानंत्यात्प्रतिकर्मफलकथनाशक्तेः संक्षेपेणतदाह॥ ॥एवंकर्मविशेषेणजा
यंते लक्षणान्विताः रोगान्विता स्तथा चाश्वकुणिखंजैकलोचनाः॥२२॥ वामनावधिरामूकादुर्वलाश्च
नरा परे॥ ॥एवमुक्तप्रकारेण तत्तत्कर्मविशेषेण तत्तल्लक्षणैः श्यावदंतत्वादिभी रोगैश्च कुष्ठादिभी
रोगैश्च कुष्ठादिभिस्तथा शोभयविलक्षणैर्देहविकारैः खल्वादिभिरन्विताजायंते। श्वः पूर्वोक्तः। कुणिः
एकहस्तगरुमान्। खंजएकपादः। काणएकलोचनः। वामनो ह्रस्वदेहः। वधिरः श्रोत्रेंद्रियहीनः। मूकः पू
र्वोक्तः। दुर्वलः कृशः। तथा परेऽपि कुणित्वखंडत्वादयो जायंते। इदंच कर्मविपाकानुकीर्तनमैहिकस्वप्राग्भ
वीयपि व्ह्ययरोगाद्यनुमितेब्रह्महत्यादेर्द्वादशवार्षिकादिव्रतप्राप्त्यर्थं। यथाह्यातातपः। महापापेषुस
र्वेस्यात्तदर्धं तूपपातके। दद्यात्पापेषु षष्ठांशं कल्प्यं व्याधिवलावलादिति। सर्वं द्वादशाब्दं तदर्धमुप
पातकव्रतार्धं। पापेषु सकरीकरणादिषु। एतेन व्ह्यपित्वादिलक्षणकथनेन तद्युक्तानां द्वादशवार्षि
कादिव्रतप्राप्त्यर्थमिति प्राचां प्रौढिवचनमप्यपास्तं। व्रतविधेः प्रत्यक्षत्वात्। नापिप्रयोजनाभावः॥

प्रतिजन्मभवेत्तेषां चिह्नं तत्पापसूचकं। प्रायश्चित्ते कृते याति पश्चात्तापवतां नृणामिति तेनैव रोगनिवृत्तेः
प्रजौ जनकत्वेनाभिधानात्। एतेनारब्धफलपापनाशेन किंचित्प्रयोजनमित्यपास्तं। सर्वत्र हृदाहानुतापस्य
थं गृहैकदेशलग्नाग्निनिर्वापणवदनेकजन्मानुवर्तिष्यमाणव्याधिनिवृत्तेरेव प्रयोजनत्वात्। यद्वा तद
रब्धफलनाशार्थोप्यपूर्वनाशेनान्वेषणीयो निमित्तकारणनाशेन कार्यनाशाभावादिति तदप्यपास्तं ततः।
दुरितैकनिदानत्वव्याध्यादेर्दुरितनाशे कनाश्यत्वस्यापि प्रत्यक्षसमधिगम्यत्वेन लौकिकत्त
कीनवसरात्। अपेक्षाबुद्धिनाशेन द्वित्वनाशस्य लोकेप्यनुसरणाच्च तदप्याह शातातपः। दुष्कर्मजा नृ
णां रोगा यांति चैव क्रमात्क्षयं। जपैः सुरार्चनैर्होमैर्दानैस्तेषां शमो भवेदिति। यथैव दुरिताद्व्याधिरेवं
तन्नाशे व्याधिनाश इति क्रमः। दुरितनाशश्च जपादिभिरिति। यदप्युक्तं नैसर्गिकं कौनख्यादि नश्यताने
यमिति तदपि प्रत्यक्षविरुद्धं। प्रायश्चित्तेन रोगनिवृत्तेः प्रत्यक्षोपलंभात्। अनिवृत्तौ वैगुण्यकल्पना
त्। यदप्युक्तं नरकतिर्यग्योन्याद्यनभूतवतः कौनख्यादिकं चरमं फलं तेन चोत्पन्नमात्रेणास्वकार
णापूर्वनाशान्न प्रायश्चित्तेनार्थ इति। तदपि न। सत्यं नाश्यते परं तु नरकत्वं तथात्वेऽनेकजन्मरोगा

चुष्टत्ति विरोधात्। यथा मंथनजनिताशुशुक्षणिना रोगः क्षयो न तु कृत्स्नायाः। यदप्युक्तं नापि सव्यवहारार्थत्वि
हे स्त्लेषामपरिहारादिति। तदपि न। सर्वसंचारिणो नैनेत्वग्निकारादिप्रभृतेरुत्पत्तिरोगमात्रस्य संचारि
त्वात् तथा व्याधितेन च संविष्टादिति योगिनारोगिपरिहाराभिधानाद्य यद्ययं दृष्टार्थः परिहारस्तर्हि रोगीहीना
तिरिक्तारोगः कुनखी श्यावदंतक इत्यादि आदेः परिहारमदृष्टार्थमप्यवेहि। तस्माद्रोगाद्ययं नु मितेषु प्राग्भ
वीयेष्वपि ब्रह्महत्यादिषु पापद्वयार्थं श्राद्धादिषु स्वव्यवहारार्थं च प्रायश्चित्तमिति युक्तमन्यथा कर्मविपाक
शास्त्रानर्थक्यमिति। यदप्युक्तं कौनख्यादौ वाशिष्ठं कृच्छ्रप्रायश्चित्तं तदपि नैमित्तिकमेव न पापद्वयार्थमि
ति। तदपि न संभवति प्रायश्चित्तस्य कौनख्याद्यनुमितपापद्वयार्थत्वे नैमित्तिकत्वायोगात्। एतद्दाहस्य तु पा
पजन्यत्वे प्रमाणाभावेन तन्निमित्तकज्ञानवत्त्वाः पापद्वयार्थत्वाद्योगाद्युक्तं नैमित्तिकत्वमिति विषमो दृ
ष्टांतः। अथ गृहदाहेऽपि पापसामान्यहेतुः कल्प्येत तर्हि तन्नाशार्थते वज्ज्ञानवत्त्वाः स्याच्च नैमित्तिकत्वमित्यल
मेवं मर्मविभेदनेन। एवं त्रिविधपापफलभूतेन कौनख्यादि [illegible] कं निमित्तिनं प्रत्याह॥ ॥तस्मात्सर्वप्रयत्ने
न प्रायश्चित्तं समाचरेत्॥३३॥ ॥यस्मादकारणे प्रायश्चित्तस्यैवं विधानिनरकतिर्यग्योनिकुष्ठरोगादी

निदुःखानि भवंति तस्मात्तन्निदानपातकनाशेन तदनुत्पादाय तदुत्पन्नस्य रोगादेर्ध्वंसाय वाश्रयतेन कृते निःसंशयोप्या
पेन भुंजीतानुदुःखानि भवंति तस्मात्तच्छिद्रापस्थितउत्यालस्येवाधकदर्शनादालस्यमुदस्य सम्यक् कृसभ्योप
स्थानादिविधिपूर्वकं प्रायश्चित्तं पापनाशकं कर्माचरेत्। प्रायः पापं विजानीयाच्चित्तं तस्य निरोधनमित्यं
गिरःस्मरणात्॥ ॥इ विष्णुस्मृतिविष्टतौ श्रीमत्यां वैजयंत्यां पंच
चत्वारिंशोऽध्यायः॥ ॥पूर्वाध्याये विहितं प्रायश्चित्तं षट्चत्वारिंशेन प्रपंचयितुं प्रतिजानीते॥ ॥अथ कृच्छ्रा
णि भवंति॥१॥ ॥अथेत्यधिकारः कृच्छ्रसाध्यकृच्छ्राणि वक्ष्यमाणव्रतानि कानि क्व्यानि भवंति। तत्राघमर्षण कृच्छ्र
माह॥ ॥त्र्यहं नाश्नीयात्॥२॥ ॥त्रीण्यहोरात्राणि न किंचिदश्नीयात्। किंच॥ ॥त्र्यहं च त्रिषवणं स्नानं
माचरेत्॥३॥ ॥त्रिरात्रं प्रत्यहं त्रिषवनं च कुर्यात्। स्नाने गुणविशेषमाह॥ ॥त्रिःप्रतिस्नानमाप्सु मज्जनं॥४॥ ॥
त्रिरात्रं प्रतिस्नानं त्रिवारमप्सु मज्जनं कार्यं। अप्स्विति वचनादुद्धृतनिरासः। मज्जनविधानाच्छिरस्यं जलिनाप्र
क्षेपनिरासः। किंच॥ ॥मग्नस्त्रिरघमर्षणं जपेत्॥५॥ ॥प्रतिस्नानं त्रिरात्रमप्सु मग्न एव त्रिवारमघमर्षण
सूक्तं जपेत्। किंच॥ ॥दिवा स्थितस्तिष्ठेत्॥६॥ ॥सूर्योदयमारभ्य यावत्सूर्यास्तं त्रिरात्रं कर्माविरुद्धे काले।

उत्थितएवतिष्ठेत्नोपविशेत्।किंच॥ ॥रात्रावासीनः॥७॥ ॥त्रिरात्रंरात्रावासीतनस्वपीत।किंच॥ ॥क
र्मणांतेपयस्विनींदद्यात्॥८॥ ॥त्रिरात्रांतेपयस्विनींगांब्राह्मणायदद्यात्।कृच्छ्रव्रतसंज्ञामाह॥ ॥इत्य
घमर्षणं॥९॥ ॥इत्युक्तप्रकारकंव्रतमघमर्षणसंज्ञंभवतिभेदव्यवहारायसंज्ञाकरणं।इतिशब्देनप्रकारां
तरमप्युक्तं।तदाहशंखः।अहंत्र्यवसेद्युक्तस्त्रिरह्नोऽभ्युपयन्नपः।मुच्यतेपातकैःसर्वैस्त्रिर्जपित्वाघमर्षणमि
ति।प्राजापत्यमाह॥ ॥त्र्यहंसायंत्र्यहंप्रातस्त्र्यहमयाचितमश्नीयादेषप्राजापत्य॥१०॥ ॥सायंदिवाभोजनपरि
हारेणनक्तकाले।प्रातःरात्रिभोजनपरिहारेणमध्याह्नकाले।त्र्यहमनक्ताशी॥अदिवाशीततस्त्र्यहमित्यापस्तं
बस्मरणात्।दिवारात्रौवाएकवारमयाचितंस्वीयंपरकीयंवायाचनव्यतिरेकेणोपस्थितं।अथापरंत्र्यहंनकं
चनयाचेतितिगौतमस्मरणात्।त्र्यहंत्र्यहमश्नीयात्।त्र्यहंनाश्नीयादित्यप्यनुवर्त्तते।तेनांतेत्रिरात्रमुपवसेत
सोयंप्राजापत्यः।अथापरंत्र्यहंनक्तंत्र्यहंप्रातस्त्र्यहंसायंत्र्यहमद्यादयाचितं।त्र्यहंपरंचनाश्नीयात्प्राजापत्यंच
रन्द्विजइतिमनुस्मरणात्।अनेनचप्रातरुपक्रमेणमनूक्तःसायमुपक्रमोविकल्पते।अयमेवप्रकारांत
रेणशिशुकृच्छ्रोबालादौवसिष्ठेनोक्तः।त्र्यहंप्रातस्त्र्यहंनक्तमहरेकमयाचितं।अहःपराकंतथैकमेवंचतुरहोप

रो॥ अब्द्गमहार्थं विप्राणां मनुर्द्दृष्टं मन्त्रतां वरः। बालवृद्धातुरेष्वेवं शिशुकृच्छ्रमुवाचेहेति। पराकमुपवासः। एक
भक्तादीनां चतुर्णां ग्रहमाह न्तो हि द्वकृच्छ्र इति शंखलिखितौ। पादोनप्राजापत्याभिधानं त्ववांतरविधानां पादो
नतापर्यंततताभिधानाद्यात तथा च पादकृच्छ्रोऽर्द्धकृच्छ्रः पादोनकृच्छ्रश्चेत्यस्यैवांतरविधाः सिध्यंति। यथाह योगीश्व
रः। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन चैकेन पादकृच्छ्र उदाहृत इति। तथापस्तंबः। सायंप्रातर्वि
नार्द्धं स्यात्पादोनं नक्तवर्जितमिति। अयाचितोपवासपादाभ्यामर्द्धकृच्छ्रः। एकभक्तायाचितोपवासपादोऽस्य
पादोनकृच्छ्र इति। प्रकारांतरेणाप्यर्धकृच्छ्रमाह स एव। सायंप्रातस्तथैकैकं दिनद्वयमयाचितं। दिनद्वयं च ना
श्नीयात्कृच्छ्रार्द्धं तद्विधीयत इति। अनेन कृच्छ्रप्राजापत्ययोरभेदो द्वादशाहसाध्यः प्राजापत्यश्चाभिहितः।
पराशरस्तु तमेव षोडशाहसाध्यमुक्त्वा पादकृच्छ्रादिप्रकारभेदमाह। एकाहमेकभक्ताशी एकाहं नक्तभो
भोजनः। अयाचिताश्येकमहरेकाहं मारुताशनः। दिनद्वयं चैकभक्तो द्विदिनं नक्तभोजनः। दिनद्वयमयाची
स्याद्द्विदिनं मारुताशनः। त्रिदिनं चैकभक्ताशी त्रिदिनं नक्तभोजनः। दिनत्रयमयाची स्यात्त्रिदिनं मारुताश
नः। चतुरहं त्वेकभक्ताशी चतुरहं नक्तभोजनः। चतुर्दिनमयाची स्याच्चतुरहं मारुताशन इति। तत्र व्यासः संख्यामाह

सपवासापंतु द्वादशग्रासाः प्रातः पंचदश स्मृताः। एकविंशतिरायाच्ये परं निरशनं स्मृतमिति। अशक्तस्याह आपस्तं-
बः सायं द्वाविंशतिग्रासाः प्रातः षड्विंशतिः स्मृताः। चतुर्विंशतिरायाच्याः परे निरशनास्त्रयः। कुक्कुटांडप्रमाणा-
स्तु यथावास्यं विशेन्मुखमिति। तप्तकृच्छ्रमाह॥ ॥त्र्यहमुष्णाः पिबेदापस्त्र्यहमुष्णं घृतं त्र्यहमुष्णं पयस्त्र्यहं च नाश्नी-
याद्येष तप्तकृच्छ्रः॥११॥ ॥जलघृतदुग्धानामुष्णानि त्रीणि त्र्यहं पीत्वा त्र्यहमुपवसेत्स तप्तकृच्छ्रः। मनुस्तु त्र्यहव्यत्ययेना-
ह। तप्तकृच्छ्रं चरन्विप्रो जलक्षीरघृतानिलान्। प्रतित्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहित इति। जलादिपरिमाण-
माह पराशरः। अपां पिबेत्तु त्रिपलं द्विपलं तु पयः पिबेत्। पलमेकं पिबेत्सर्पिस्त्रिरात्रं चोष्णमारुतमिति। उष्णमारु-
तमुष्णोदकबाष्पमास्यपूरणं। अशक्तस्याह ब्रह्मपुराणं। षट्पलानि तु तप्तस्य तोयस्य तु समाहितः। प्रभाते त्रीणि दुग्ध-
स्य तु तप्तस्य पिबेत्त्र्यहं। पलं घृतस्य तप्तस्य मध्याह्ने त्रिदिनं पिबेत्। वायुमत्त्र्यहं चात्र निर्दहेत्पातकं द्विज इति। चतुर-
हं तप्तमाह योगीश्वरः। तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत्। एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृत इति। पतैर-
व द्रव्यैः समस्तैः सोपवासैर्द्व्यहसाध्यस्तप्तकृच्छ्र इति मिताक्षरा। शीतकृच्छ्रमाह॥ ॥एष एव शीतैः शीतकृच्छ्रः॥१२॥ ॥
एतैरेव द्रव्यैः शीतैस्त्र्यहं त्र्यहं पीतैः शीतकृच्छ्रः। इदं कृच्छ्रद्वयमेकोपवासकर्मतेतेन दशाहसाध्यमिति केचित्। कृच्छ्रातिकृ-

च्छ्रः पयसा दिवसैकविंशतिक्षपणं॥२३॥ ॥एकविंशतिरात्रं पयसा दुग्धेन वर्त्तनं कृच्छ्रातिकृच्छ्रः। जलेनेति ब्राह्मे। वरं न
कृच्छ्रातिकृच्छ्रं तु पिबेत्तोयं च शीतलं। एकविंशतिरात्रं तु नियतात्मा जितेंद्रियः कालेष्वेतेषु संयत इति। एतेषु प्रातर्मध्याह्नसा
यंकालेषु। यमस्तु चतुर्विंशतिरात्रमाह। एकैकं ग्रासमश्नीयादित्यनुवृत्तौ। चतुर्विंशतिरात्रं तु नियतात्मा जितेंद्रियः। कृच्छ्रा
तिकृच्छ्रं कुर्वीत एकस्थाने द्विजोत्तम इति। एकस्थाने एकवारमेकभक्तकाले वा। द्वादशरात्रमुदकेन वर्त्तनं कृच्छ्राति
कृच्छ्र इति गौतमः। उदकं च सहे कृच्छ्र इस्तेन यावद्ग्रहीतुं शक्यते तावदेव ग्रहणं तत्संततीयः कृच्छ्रातिकृच्छ्रो यावत्सकृदादद्या
तेति वासिष्ठात्। द्वादशरात्रं निराहारः कृच्छ्रातिकृच्छ्र इति सुमंतुः। उदककृच्छ्रमाह॥ ॥उदकसक्तूनां मासाभ्यवहा
रेणोदककृच्छ्रः॥२४॥ ॥मासमुदकमिश्रसक्तुप्राशनेनोदककृच्छ्रः॥ अयमेव वारुणकृच्छ्रः॥ सक्तूंश्चासोदकान्मासं
कृच्छ्रो वारुण उच्यत इति ब्राह्मात्। मासानुवृत्तौ तोयकृच्छ्रो जलेन त्विति मार्कंडेयः। अनश्नन् जलमध्यस्थ अहोरात्रं ज
पन्बुधः। संवत्सरकृतं पापं जलकृच्छ्रो व्यपोहतीति जाबालिः। जपो वारुणसूक्तानां गायत्र्या वा। वायुभक्षो दिवा तिष्ठे
द्रात्रिं नीत्वाप्सु सूर्यदृक्। सहस्राष्टाधिकां जप्त्वा गायत्रीं जलकृच्छ्रक इति योगियाज्ञवल्क्यः। मूलकृच्छ्रमाह॥ ॥
विसाभ्यवहारेण मूलकृच्छ्रः॥२५॥ ॥मृणालस्य मासं भोजनेन मूलकृच्छ्रः। मूलकृच्छ्रः प्रकृच्छ्र इति स्मृतो मूलैरिति मार्कं

उयः।पक्वानि सात्मनेमं ज्ञीतरंत्राहो।विसान्युदकानि द्वानि मासमश्नीत संयतः।कृच्छ्रं वारुणमुच्यत इति ज्ञेयः।श्री
फलकृच्छ्रमाह॥ ॥बिल्वाभ्यवहारेण श्रीफलकृच्छ्रः॥१६॥ ॥मासं बिल्वफलभक्षणेन श्रीफलकृच्छ्रः।श्रीकृ
च्छ्रः।श्रीकृच्छ्रः फलैः प्रोक्त इति मार्कंडेयः।तस्यैव प्रकारांतरमाह॥ ॥पद्माक्षैर्वा॥१७॥पद्मबीजैर्मासं भक्षिते
र्वा श्रीफलकृच्छ्रः।वाशब्दादामलकैर्वा।बिल्वैरामलकैर्वापि पद्माक्षैरथवा शुभैः॥मासेन लोके श्रीकृच्छ्रः
कथ्यते द्विजसत्तमैरिति जाबालात्।पराकमाह॥ ॥निराहारस्य द्वादशाहेन पराकः॥१८॥द्वादशाहं जपहो
मात्मकस्याहारमात्रत्यागः पराकः।जपहोमरतः कुर्याद्द्वादशाहमभोजनं।पराक एष विख्यातः सर्वपापप्रणा
शन इति बृहस्पतिस्मरणात्।सांतपनमाह॥ ॥गोमूत्रं गोमयं क्षीरं दधिसर्पिः कुशोदकान्येकदिवसमश्नी
या द्वितीयमुपवसेदेतत्सांतपनं॥१९॥ ॥गोमूत्रादि साहचर्यात्तद्ब्रह्मकूर्चदर्शनाच्च क्षीरादिकमपि गव्यमे
व।क्षीरादि साहचर्याद्वा गोमूत्रादिकमपि स्त्रीगव्यमेव।पूर्वेद्युः पंचगव्यं कुशोदकमिश्रमाहारांतरेणै
रपेक्ष्येण पीत्वा परेद्युरुपवसेदेतत्सांतपनं कुशोदकानीति बहुवचनं कुशानेकत्वज्ञापनाय।सप्तपत्रा
स्तु ये दर्भा इति दर्शनात्।एतदेव समंत्रकं ब्रह्मकूर्चमुच्यते।यथाह पराशरः।गोमूत्रं गोमयं क्षीरं दधिसर्पिः

कुशोदकं। निर्दिष्टं पंचगव्यं तु पवित्रं कायशोधनं। गोमूत्रं ताम्रवर्णायाः श्वेतायाश्चापि गोमयं। पयः कांचनवर्णायाः
नीलायास्तथा दधि। घृतं च कृष्णवर्णायाः सर्वं कापिलमेव वा। अलाभे सर्ववर्णानां पंचगव्येष्वयं विधिः। गोमूत्रे माषकास्त्व
ष्टौ गोमयस्य तु षोडश। क्षीरस्य द्वादश प्रोक्ता दध्नः दश कीर्तिताः। गोमूत्रवद् घृतस्योक्तास्तदर्द्धं तु कुशोदकं। गायत्र्याद
द्य गोमूत्रं गंधद्वारेति गोमयं। आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि। तेजोसि शुक्रमित्याज्यं देवस्य त्वा कुशोद
कं। पंचगव्यमृचा पूतं होमयेदग्निसंनिधौ। सप्तपर्णास्तु ये दर्भा अच्छिन्नाग्राः शुकत्विषः। एतैरुद्धृत्य होतव्यं पंचगव्यं
यथाविधि। इरावती इदं विष्णुर्मानस्तोके च शंवतीः। एताभिश्चैव होतव्यं हुतशेषं पिबेद् द्विजः। प्रणवेन समालोड्य
प्रणवेनाभिमंत्र्य च। प्रणवेन समुद्धृत्य पिबेत्तत्प्रणवेन तु। मध्यमेन पलाशस्य पद्मपत्रेण वा पिबेत्। स्वर्णपात्रेण
रौप्येण ब्रह्मतीर्थेन वा पुनः। यत्त्वगस्थिगतं पापं देहे तिष्ठति मानवे। ब्रह्मकूर्चोपवासस्तु दहत्यग्निरिवेंधनमिति
। ब्रह्मकूर्चोपवास इति। अयमर्थः। पूर्वेद्युरुपोष्य परेद्युः प्राशनमिति पूर्वस्माद्विशेषः। चतुर्दश्यामुपोष्याथ पौर्णमा
स्यां विशेषतः। पंचगव्यं पिबेत्प्रातर्ब्रह्मकूर्चमिति स्मृतमिति जाबालिस्मरणात्। विशेषतस्तूक्तविधिना। तदुक्तम
प्याह शातातपः। नदीतीरेषु गोष्ठेषु पुण्येष्वायतनेषु च। तत्र गत्वा शुचौ देशे ब्रह्मकूर्चं समाचरेदिति। त्रिरात्रं पंचगव्या

शुनियतिसांतपनं। एतदेव त्र्यहाभ्यस्तं यतिसांतपनं स्मृतमिति शंखस्मरणात्। महासांतपनमाह॥ ॥गोमूत्रादि-
भिः स्मृतपहाभ्यस्तैर्महासांतपनं॥२०॥ ॥गोमूत्रादिभिः षड्भिर्द्रव्यैः प्रत्येकं प्रत्यहमभ्यस्तैर्महासांतपनं षडहेसाध्यं
भवति। योगीश्वरस्तु तद्देवांतोपवासं सप्ताहसाध्यमाह। पृथक्सांतपनद्रव्यैः षडहः सोपवासकः। सप्ताहेन तु कृ-
च्छ्रोयं महासांतपनः स्मृत इति। एतदेवाद्योपवासकं कृच्छ्रसांतपनं ब्राह्मे। प्रथमेह्नि निराहारो यद्गोमूत्राशी ततः
परं। चतुर्षु गोमयं क्षीरं दधि चाज्यमहः क्रमात्। कुशोदकं सप्तमे च कृच्छ्रसांतपने विधिरिति। तैरेव प्रत्येकं त्र्यहा-
भ्यस्तैः पंचदशाहिकं महासांतपनं। त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं पिबेत्। त्र्यहं दधि त्र्यहं क्षीरं त्र्यहं सर्पिस्ततः
शुचिः। महासांतपनं ह्येतत्सर्वपापप्रणाशनमिति यमस्मरणात्। अत्र कुशोदकाभावः। छू तां तैरेव षड्भिरभि-
धानात्। षण्णां प्रत्येकं त्र्यहाभ्यासे त्र्यहमुपवासे चैकविंशाहिकं महासांतपनं। षण्णां प्रत्येकमेतेषां त्रिरात्रमुप-
योजयेत्। त्र्यहं चोपवसेदंते महासांतपनं स्मृतमिति जाबालिस्मरणात्। अतिसांतपनमाह॥ ॥त्र्यहाभ्य-
स्तैश्चातिसांतपनं॥२१॥ ॥तैरेव गोमूत्रादिभिः षड्भिः प्रत्येकं त्र्यहाभ्यस्तैरष्टादशाहिकमतिसांतपनं भवति
तैरेव द्व्यहाभ्यस्तैर्द्वादशाहिकं यम आह। एतान्येव तथा पेयान्येकैकं तु द्व्यहं द्व्यहं। अतिसांतपनं नाम श्वपाकम-

पिशोधयेदिति। तुलापुरुषकृच्छ्रमाह॥ ॥पिण्याकाचामतक्रोदकसक्तूनामुपवासांतरितोभ्यवहारस्तुलापुरुषः॥ २२॥ ॥पिण्याकस्तिलखलिः। आचाम ओदननिस्रावः। तक्रमुदश्वित्। उदकं जलं। सक्तवो भर्जितयवपिष्टानि तेषां प्रत्येकमुपवासानंतरदिने भोजनं द्वादशाहिकस्तुलापुरुषः। योगीश्वरस्त्वेतमेव पंचदशाहिकमाह। यमस्त्वेकविंशाहिकमाह॥ आचाममथ पिण्याकं तक्रं चोदकसक्तुकान्। त्र्यहं त्र्यहं प्रयुंजानो वायुभक्षस्त्र्यहं द्वयं। एकविंशतिरात्रस्तु तुलापुरुष उच्यत इति। अयमेव सैकोपवासः षडहः सौम्यकृच्छ्रः पिण्याकाचामतक्रंबुसक्तूनां प्रतिवासरं एकरात्रोपवासश्च कृच्छ्रः सौम्योपमुच्यत इति योगिस्मरणात्। पर्णकृच्छ्रमाह॥ ॥कुशापलाशोदुंबरपद्मशंखपुष्पीवट ब्राह्मी सुवर्चला। पत्रैः क्वथितस्यांभसः प्रत्येकं पानेन पर्णकृच्छ्रः॥ २३॥ ॥पलाशः किंशुकः। उदुंबरो जंतुफलः। पद्ममब्जं। शंखपुष्पी म्रसंलघासूक्ष्मश्वेतकुसुमा। ब्राह्मी सुवर्चला अर्कभक्ताभिध ओषधिविशेषः। कपोतवंकापाठार्कभक्ताब्रह्मीसुवर्चलेति निघंटुस्मरणात्। तल्लक्षणं तु शिग्रुपत्रसमं पत्रं मूलं विद्रुमसंनिभं। पुष्पं तु श्यामलं प्रोक्तं भवत्येषा सुवर्चलेति। ब्राह्मीति सुवर्चलाविशेषणं। तेनापरब्राह्मीभ्युदासः। सिद्धं प्रसिद्धं। एषां सप्तानां पत्रैः क्वथितमंभः सप्ताहं पीत्वा पर्णकृच्छ्रः। योगीश्वरः प्रकारांतरेणाह। पर्णोदुंबरराजीव

वि॰टी॰४६
२१४

बिल्वपत्रकुशोदकैः॥ प्रत्येकं प्रत्यहं पीतैः पर्णकृच्छ्र उदाहृत इति। त्रिरात्रोपवासान्ते समस्तैतत्पानं पर्णकूर्चः
एतान्येव समस्तानि त्रिरात्रोपोषितः शुचिः। क्वाथयित्वा पिबेदद्भिः पर्णकूर्चोभिधीयत इति। मैत्रकृच्छ्रमाह
यमः। कपिलायास्तु दुग्धायां धारोष्णं तु पयः पिबेत्। एष मैत्रकृतः कृच्छ्रः सर्वपापप्रणाशन इति। उक्तवक्ष्यमा
णव्रतानां पूर्वांगमाह॥ ॥कृच्छ्राण्येतानि सर्वाणि कुर्वीत कृतवापनः॥ ॥एतानि पूर्वोक्तानि सर्वाणि वक्ष्यमा
णानि च कृच्छ्राणि व्रतानि पूर्वांगभूतकृतवापनः कृतं वापनं केशश्मश्र्वादीनां येन तादृशः सन् कुर्वीत। वपन
मार्धं तां गोपलक्षणं। तानि चाहांगिराः। व्रतकर्ता प्रवक्ष्यामि उपस्थानस्य लक्षणं। उपस्थितो हि न्यायेन व्रता
देशनमर्हति। कृतैर्निःसंशये पापे न भुंजीतानुपस्थितः। भुंजानो वर्द्धयेत्पापं सत्यं पर्षद्विवर्जयेत्। संशये तु न
भोक्तव्यं यावत्कार्यस्य निर्णयः। संशयः पापस्य कार्यस्य प्रायश्चित्तस्य। प्रमादश्च न कर्त्तव्यो पथ्ये वा संशये
तथा। प्रमादः उपेक्षा। असंशयः इव सम्योपस्थितिस्तात्कालिकी। कृत्वा पापं न गूहेत गूहमानस्य वर्द्धते। बहु
वाल्पं वाथ वापि धर्मविद्भ्यो निवेदयेत्। धर्मविदः सभ्याः। तानाह पराशरः। त्रैविद्यो हेतुकस्तर्की अंगाविद्ध
र्मपाठकः। त्रयश्चाश्रमिणः पूर्वे पर्षदेषा दशावरा। पूर्वैपतिव्यतिरिक्ताः। त्रयश्चाश्रमिणो वृद्धा इति मते

राम
२१४

ब्रह्मचारिव्रति कृतः। तत्र यति प्रायश्चित्ते पतितोन्यो वा न्य इति ज्ञेयं। स्मृत्यंतरे। पातके तु शतं पर्षत्सहस्रं महदादि
शाह्यादति पातके। उपपापे तु पंचाशत्स्वल्पे स्वल्पे स्वल्पा तथा भवेत्। अंगिराः। पर्षद्या ब्राह्मणानां तु सा राज्ञां द्वि
गुणा मता। वैश्यानां त्रिगुणा प्रोक्ता पर्षद्वद्व्रतं स्मृतं। पराशरः। राज्ञश्चानुमते स्थित्वा प्रायश्चित्तं विनिर्दिशेत्। स्व
यमेव न कर्त्तव्यं कर्त्तव्या स्वल्पनिष्कृतिः। अंगिराः। प्रायश्चित्ते समुत्पन्ने ह्रीमान्सत्यपरायणः। मृदुरार्जवसंपन्नः
शुद्धिं याचेत मानवः। सचैलं वाग्यतः स्नात्वा क्लिन्नवासाः समाहितः। क्षत्रियो वापि वैश्यो वा पर्षदं ह्युपतिष्ठति।
सर्वे धर्मविवेक्तारो गोप्तारः सकला द्विजाः। मम देहस्य संशुद्धिं कुर्वंतु द्विजसत्तमाः। मयाकृतं महाघोरं ज्ञा
तमज्ञातकिल्बिषं। प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छथ। पूज्यैः कृतः पवित्रोहं भवेयं द्विजसत्तमैः। उपस्था
य ततः शीघ्रमार्तिमान्धरणीं व्रजेत्। गात्रैश्च शिरसा चैव न च किंचिदुदाहरेत्। ततस्ते प्रणिपातेन दृष्ट्वा
तं समुपस्थितं। वृद्धाः पृच्छंति किं कार्यमुपाच्छूपाग्रतः स्थितं। किं ते कार्यं वदास्माभिः किं वा मृगयसे द्विज।
तत्वतो ब्रूहि तत्सर्वं संहितातिरात्मनः। सत्येन द्योतते राजा सत्येन द्योतते रविः। सत्येन द्योतते वह्निः सर्वं सत्ये
प्रतिष्ठितं। भूर्भुवः स्वस्त्रयो लोकास्तेपि सत्ये प्रतिष्ठिताः। अस्माकं चैव सर्वेषां सत्यमेव परं बलं। यदि चेदृश्यसे स

२८८

त्यं नियतं प्राप्यसे शुभं। यद्यागतो स्य सत्येन न त्वं शुध्यसि कर्हिचित्। सत्येनैव हि शुध्यंति शुद्धिकामस्त्वमानवाः। तस्मा
त्तद्धृदयत्सम्यादि मध्यावसानिकं। एवं तैः समनुज्ञातः सर्वं कुर्यादशेषत इति। पापश्च वचनं च पर्षदं निवेदनं धेनुं च संपूज्य
पर्षद्दक्षिणां च दत्त्वा कार्यं। तदाह शातातपः। धेनुं दद्याद्द्विजेभ्यो थ दक्षिणां च स्वशक्तित इति। धेनुं निवेद्य पूजा
र्थं दद्याद्यथानंतरं द्विजेभ्यः सभ्येभ्यः शक्तितो दक्षिणां वक्ष्यमाणां दद्यात्। तामाह पराशरः। पापं विख्यापयेत्पापी द
त्वा धेनुं तथा वृषमिति। गोमिथुनं च न स्वरूपतः पर्षद्भिः मा ग्रासहत्यादिक्रयनिषेधाच्च किंतु निष्क्रयरूपेणेतो
निश्चयः। इदं च कृच्छ्रव्रतेतोधिके तु स्वाशक्तित इति वचनाद्विकल्पना कार्या। न्यूने तु विशेषमाह विष्णुः। पाद
व्रते वस्त्रदानं कृच्छ्रार्द्धे इति लकांचनं। पादहीने तु गामेकां कृच्छ्रे गोमिथुनं स्मृतमिति। प्रकीर्णके तु किंचिद्देयं
। विख्याप्य पापं वक्तव्यः किंचिद्दत्वाव्रतं चरेदिति स्मरणात्। पर्षद्दक्षिणामंतरेण प्रायश्चित्तं न देयं। तत्रांगि
रः। अनर्चितैरनाहूतैरपृष्टैः श्वयथाविधि। प्रायश्चित्तं न दातव्यं जानद्भिरपि कल्प्यत इति। अर्चितानामवचनेपि
दोषः। आर्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः। जानंतो न प्रयच्छंति ते तेषां समभागिनः। तस्मादर्चितैस
मासाद्य ब्राह्मणं च विशेषतः। जानद्भिर्हि धर्मपंथानं न भाव्यं तु पराङ्मुखैः। जानद्भिरिति वचनादज्ञैर्न देयं। पथ्या

शातातपः। यद्विना धर्मशास्त्रेण प्रायश्चित्तं विधीयते। न तेन शुद्धिमवाप्नोति प्रायश्चित्ते कृतेपि सः। अदृष्ट्वा धर्मशास्त्रा-
णि प्रायश्चित्तं वदन्ति ये। तत्पापं शतधा भूत्वा तद्वक्तॄनधिगच्छति। प्रायश्चित्तदानमाहाङ्गिराः। तस्मिन्निवेदिते
कार्ये तत्सार्थो हि सकार्यवान्। तस्मिन्नुत्सारिते पापे यथा ये धर्मपालकाः। ते तथा तत्र जल्पेयुर्विमृश्य तः
परस्परं। आपद्धर्मेषु यत्रोक्तं पथ्यं सानुग्रहं भवेत्। पर्षदः संपश्येद्व कार्याणां च बलाबलं। यथादेशं यथा-
कालं यद्वत्कार्यं तत्तं भवेत्। कार्यान्तरं ह्यद्य मातापितृशुश्रूषादि। पर्षत्संचिन्त्य तत्सर्वं प्रायश्चित्तं विनिर्दिशे-
त्। तत्राह पराशरः। वचः पूर्वमुदाहार्यं यथोक्तं धर्मवक्तृभिः। पश्चात्कार्यानुसारेण शक्त्या कुर्युरनुग्रहं। दु-
र्बलेनुग्रहः कार्यस्तथा वै बालवृद्धयोः। अतोन्यथा भवेद्दोषस्तस्मान्नानुग्रहः स्मृतः। हारीतः। पादत्रयमथार्ध-
मेकपादं वापि विधानतः। ज्ञात्वा बलाबलं कार्यं प्रायश्चित्तं प्रकल्पयेत्। अङ्गिराः। आहूय श्रावयेदेकः प-
र्षदां यो नियोजितः। ब्राह्मणो ब्राह्मणानां तु क्षत्रियाणां पुरोहितः। वैश्यानां याजकश्चैव प्रायश्चित्तं समादिशे-
त्। शृणु भोस्त्वमिदं विप्रैर्यत्त आदिश्यते व्रतं। तत्तेपत्त्वेन कर्त्तव्यमन्यथा तद्वृथा भवेत्। यदा त्वया भवेच्चीर्णं त-
दा शुद्धिप्रकाशनं। कृत्वा कुर्याः श्रपत्वेन शक्त्या विप्राभिपूजनमिति। अत्र सम्यानामिवशाड्डेवा कस्यापि देहि

वि॰टी॰

२१६

णागम्यते। प्रायश्चित्तोपदेशस्य लोपमूलकत्वात्कुर्याः अपत्नेन शक्त्या विप्राद् अन्यथा निषिद्धप्रहत्यनुप
पत्तेः साध्वाङ्गुल्मपरिमाणत्वात् यथापापं कल्पनीया। प्रायश्चित्तोपदेशो देशमाह पराशरः। प्रायश्चित्तं प्र
दातव्यं देवतायतनाग्रत इति। सम्प्रत्यायश्चित्तमाह स एव। आत्मकृच्छ्रं ततः कुर्याज्जपेद्वा वेदमातरमिति। आ
त्मार्थं कृच्छ्रमात्मशोधकमित्यर्थः। प्राड्विवाकप्रायश्चित्तमाहाङ्गिराः। प्रायश्चित्तं समादिश्य पतन्नकृच्छ्रं
समाचरेदिति। रागद्वेषादिना पर्षदं समवेस्तु मंतुः। अथवा रागद्वेषादलभ्यमानेषु प्रायश्चित्तेषुपत्तहवना
ध्ययनब्रह्मचर्यपरो मेखलाजी दंडी मेखली स्वयमेव संवत्सरेण महापातकानि तरत्यपोहति किल्बिषं न
ब्राह्मणस्य पतितमिच्छन्त्याचार्या इति। अस्यार्थः। रागादिवशात् प्रायश्चित्तमलभमानः स्वयमेव शास्त्रपर्या
लोचनयाऽन्यापदेशेन वा विदुषः श्रुत्वा तत्समाचरेत्। किं तदित्यत आह। यज्ञहवनादीति। उपलक्षणमेत
त्। तत्त्वहुतानामन्यश्चोपपादकादिष्वप्यश्वमेधादियज्ञः प्राप्नुयात्। यज्ञोऽश्वमेधादिः। हवनं कोटिहोमादिरध्य
यनं संहितापारायणादि ब्रह्मचर्यं प्रसिद्धं। तत्र कालमाह। संवत्सरेणेति। उदकमपि तत्र त्कालोपलक्षणं। अन्यथा
महापातकप्रकीर्णकयोरविशेषेण संवत्सरापत्तेः। उक्तेऽर्थे हेतुमाह न ब्राह्मणस्येति। पर्षदुपदेशमन्तरेण

राम

२१६

प्रायश्चित्तानाचरितो ब्राह्मणस्यावंतिकं पातित्यं स्यात्तत्वार्यानेनर्च्छति । अनेनाशक्तांगांतरहानेनापि प्रायश्चित्त
चरणमुक्तं भवति । ब्राह्मणग्रहणान्नद्वित्रियादेस्तादृशानुष्ठानसंभवइति । व्रतग्रहणप्रकारमाह विष्णुः । सर्वपा
पेषु सर्वेषां व्रतानां विधिपूर्वकं । ग्रहणं संप्रवक्ष्यामि प्रायश्चित्ते चिकीर्षिते । दिनांते नखरोमादि प्रवाप्य स्नानमा
चरेत् । नखरोमादिप्रवापने विशेषमाह पराशरः । ग्रहणं संप्रवक्ष्यामि प्रायश्चित्ते चिकीर्षिते । दिनांते नखरोमा
दि प्रवाप्य स्नानमाचरेत् । नखरोमादिप्रवापने विशेषमाह पराशरः । पादं गारोमवपनं द्विपादे श्मश्रुणोपि च । त्रि
पादे तु शिखावर्जं सशिखं तु निपातने इति । निपातनः कृच्छ्रः । स्त्रीणां विशेषः । केशानां नास्ति नारीणां वपनं
द्विपादे श्मश्रुणोपि च । त्रिपादे तु शिखावर्जं सशिखं तु निपात व्रतयज्ञयोः । गोवधादिषु सर्वेषु छेदयेदंगुलत्रयं
नारी सधवा । सधवानां तु नारीणां मलंकाराय सर्वदा । केशसंधारणं प्रोक्तं प्रायश्चित्ते द्विजोत्तमैरिति स्मरणा
त् । तेन विधवानां तु वपनमेव । सधवेति कुमार्या अप्युपलक्षणं । सर्वान्केशान्समुद्धृत्य छेदयेदंगुलद्वयं । एवं
नारीकुमारीणां शिरसो मुंडनं स्मृतमिति पराशरस्मरणात् । नारीपदस्य सधवापरत्वेन कुमारीणामज्ञाती
श्चथगुपादानमर्थवत् । राजादीनामपि विशेषः । राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः । अकृत्वा वपनं तेषां

निर्णी ४९
२१७

प्रायश्चित्तं तेन निर्दिष्टमिति गार्ग्यस्मरणात् ॥ तेषां वपनाभावे व्रते द्विगुणं प्रोक्तं ॥ केशानां रक्षणार्थाय द्विगुणं
व्रतमाचरेत् ॥ द्विगुणे व्रत आचीर्णे दक्षिणा द्विगुणा भवेदिति तत्रैव स्मरणात् ॥ इदमपि महापातकादिव्य
तिरेकेण विद्वद्विप्रनृपस्त्रीणां ॥ केशवापनं कार्यं महापातकिनो गोहंतुश्चावकीर्णिन इति स्मरणात् ॥ अत
एव गालवः ॥ राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः ॥ केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेदिति ॥ तद
नंतरं माहाभिरा ॥ भस्मगोमयमृद्वारि पंचगव्यादि कल्पितैः ॥ आदिशब्दात्कुशोदकं मलापकर्षणं कार्यं
वा घृष्टो वापसिद्धये मलापकर्षणमित्यनेन दृष्टार्थता वगमान्मंत्रादिनिवृत्तिः ॥ दंतधावनपूर्वेण पंचगव्येन
संयुतं ॥ यद्यपि स्नानानंतरं दंतधावनमुक्तं तथाप्याह्निके वक्ष्यमाणत्वात् स्नानात्प्रागेव कार्यं ॥ तेन तत्र
य मंत्रसिद्धिः ॥ स्नानानंतरं वैष्णवं श्राद्धं कार्यं ॥ श्राद्धं कुर्याद्व्रतांते च गोहिरण्यादि दक्षिणेति जाबालिस्मरणा
त् ॥ श्राद्धं च विष्णुदैवत्यं नव्यवरादिविप्रभोजनं विधायैव वैष्णवं श्राद्धं साकल्यं निजकामस्तु ॥ ति शातातपीयात् ॥ श्रा
द्धानंतरमादि गोदानं कार्यं ॥ व्रतांते चेति चकारादादाव पित्यसिद्धेः ॥ तत्र विधिर्गोदानिक एव ॥ तदनंतरं
शालाहोमः कार्यः ॥ आरंभे सर्वकृच्छ्राणां समाप्तौ च विशेषतः ॥ आज्येनैव हि शालाग्नौ जुहुयाद्व्याहृतीः

राम
२१७

पृथगिति जाबालिस्मरणात्॥ आरंभे च कारेणैश्चादि निष्ठत्वात् तत्रैव निष्ठत्तिः। तदनंतरं पंचगव्यप्राशनं का
र्यं। तत्प्रकारश्च ब्रह्मकूर्चविधावुक्तः। तदसंभवे त्वमंत्रकमेव पंचगव्यं पेयं सांतपने तथा दर्शनात्॥ वि
ष्णुरपि। पंचगव्येन संयुक्तां व्रतं निश्चामुखे यथा। स्वं बहिस्तारकादर्शने। आ सप्मातः परं मौनी ध्यायन् दुष्कृ
तमात्मनः। मनःसंतापनं तीव्रमुद्वहेच्छोकमंततः इति। बहिर्ग्रामाद् इहाद्वा। पंचगव्यप्राशनाद् असत्व एव
व्रतग्रहणं करिष्य इति ब्राह्मणाननुपृष्ट्वा तदनुज्ञातस्तत्प्राशनं कुर्यादिति संयुतशब्दार्थः। पंचगव्यासं
भवे घृतमात्रप्राशनमेव। तथा संवर्तस्मृतौ। वाप्य केशनखान् पूर्वं घृतं प्राश्य पापावहा निशि। प्रत्येकनिय
तं कालमात्मना व्रतमादिशेदिति। प्रत्येकमिति प्रतिव्रतं नियतं कालमात्मना तत्करणे नोद्दिशेत्संक
ल्पयेदित्यर्थः। स्त्रीणां विशेषमाह जाबालिः। स्त्रीणां होमो न दातव्यः पंचगव्यं तथैव चेति। होमं पंचगव्यं
गमेत। तयोरेवप्रक्रमात्। स्त्रीशूद्रस्याप्युपलक्षणं। पंचगव्यं पिबेच्छूद्रो ब्राह्मणश्च सुरां पिबेत्। ता
बुभौ तुल्यदोषौ हि पूयाख्ये नरके गताविति वृद्धस्मरणात्॥ तथा शुद्रं समासाद्य सदा धर्मपथे स्थितां प्रा
यश्चित्तं प्रदातव्यं जपहोमविवर्जितमित्यत्रिस्मरणात्। एवं तेष्वव श्राद्धगोदानहोमाः प्रातिलोम्येन व्रतो

वि॰ टी॰ ६
३१८

तेपि कार्याः होमव्रतयोरुपक्रमे सन्निधानादंते विसर्गस्योचितत्वात् व्रतांते च गोहिरण्यादिदक्षिणो
ति द्वचनाच्छ्राद्धानंतरमेव गोदानं भवति। ततश्च व्रतसमाप्यनंतरं प्रथमं होमस्ततो वैश्वदेवः श्राद्धमंते च
गोदानमिति शिष्टसांप्रदायिकः क्रमः पाठक्रमान्यत्वेपि द्रष्टव्यः। एवं व्रतस्य पूर्वोत्तरांगानि वापनश्रा
द्धे नोपलभ्यंते इदानीं व्रतचरणकालीनान्यंगान्याह॥ ॥नित्यं त्रिषवणस्नायी अधःशायी जितेंद्रियः॥२
४॥ स्त्रीशूद्रपतितानां च वर्जयेच्चाभिभाषणं। पवित्राणि जपेन्नित्यं जुहुयाच्चैव शक्तितः॥२५॥ ॥
सवनशब्देन स्नानकालत्रयं लक्ष्यते। तेन च नित्यं व्रतग्रहणोत्तरदिनमारभ्य यावद्व्रतसमाप्तिदिनं ताव
त्रिष्वपि सवनकालेषु प्रातर्मध्याह्नसायाह्नेषु स्नानशीलो भवेत्। तदेतत्प्रकृष्टव्यतिरिक्तविषयं। न
च कृच्छ्रस्नायी समाहित इति मानवोपविशेषात्। यत्तु चिरं क्लिन्निर्निष्ठायां च सवासा जलमाविशेदि
ति मानवं तत्पिपीलिकामध्यचांद्रायणव्यतिरिक्तेषु शान्तविषयं। तत्र उपस्पृशंस्त्रिषवणमिति
विरोधात्। विजयाणां वेदशक्तस्य द्विकालस्नानमाह वैशंपायनः। स्नानं त्रिकालमेव स्याद् द्विकालं वा
द्विजन्मन इति। यत्तु गार्ग्येणोक्तं वासार्द्रे क्लेदं स्नात्वा वाससा न पीडयेदित्युक्तं तद्ग्रीष्मकालशक्त

राम
३१८

स्परकवासाईवासावलघाशी स्थंडिलेशयइतिशंखेनैकवस्त्रतामाःपाद्विकत्वाभिधानात्॥ अधःशायी
खट्वादिपरिहारेणभूमिशायी॥ अधःशयनंचस्थानासनाशक्तस्य॥ स्थानासनाभ्यांविहरेदशक्तौ
अधःशयीतवेतिमानववात्॥ जितेंद्रियोहिंसादिवर्जी॥ अहिंसासत्यमक्रोधमार्जवंचसमाचरेदितिमान
वात्॥ स्त्रियापरस्पाभाषणांस्पर्शाद्युपलक्षणं॥ स्त्रीणांसंप्रेक्षणालंभस्पर्शताभिःसंकथनादपिब्रह्मचर्यं
विनश्यतेनदारेषुतुसंगमादितिशातातपीयात्॥ अतिशब्दोन्यरागोत्पादकतामाचष्टे॥ ततश्चपर्या
णानोत्पद्यतेतथाभाषेतेति॥ यावदर्थंभाषेतनमंत्रलोपोभवतीतिविज्ञायतइत्यापस्तंबीयात्॥ पवित्र
णि॥ अघमर्षणंदेवकृतःशुद्धवत्यस्तरत्समंदीत्यादिनिर्दिष्टविसिष्ठाद्युक्तानिनित्यकर्मविरुद्धेकालेज
पेत्॥ अनुवर्तमानेनित्यशब्देपुनर्वचनंत्रिषवणाद्यसंभवेपिजपावश्यकताबोधनार्थं॥ अतएव
शंखः॥ गायत्र्यादशसाहस्रमाह्निकोजपउच्यतइतिजपाधिक्यमेवाह॥ पवित्राणीतिबहुवचन
गायत्रींचसावित्रींच जपेन्नित्यंपवित्राणीतिवमानवात्॥ होमेपिनित्यमितिसंबध्यते॥ सचकूष्मांडै
व्याहृतिभिःसावित्र्याबातिलया॥ वाज्यानामन्यतमेन॥ कूष्मांडैर्जुहुयाद्घृतमितिशंखस्मरणात्॥

शक्तित इति वचनाद्बालवृद्धादिभिः शक्त्या महानेनापि व्रतं कार्यं। तथा च लघुविष्णुः। असंस्कृतो
स्त्रिया हारा रोगी न व्रतिवाविधाः। यथाशक्ति च कुर्वीत व्रतं दोषु न लुप्यत इति। षट्त्रिंशन्मते पि
जपहोमादियत्किंचित्कृच्छ्रोक्तं संभवेन्न चेत्। सर्वं व्याहृतिभिः कार्यं गायत्र्या प्रणवेन वेति। स्त्रि
या रात्मावन्नदारापि कार्यं। यथा ज्ञाने रोगी हृद्रोगपीडितः कुर्वीतान्येन व्रतं सदा। गर्भिणी वृत्तावत्सा च
प्रसूता च धर्मांतरा हृत इति योगडोवालः। अर्थांतरा एतेन न्यसाध्यकार्यव्यापृतः कुर्वीत कारयेत्॥ ॥
विष्णुस्मृतिविवृत्तौ श्रीमत्सां वैजयंत्यां षट्चत्वारिं
शोऽध्यायः॥ ॥पूर्वाध्याये कृच्छ्रलक्षणमुक्तमिदानीं चांद्रायणलक्षणं सप्रपंचत्वात्पृथङ्नाभिधातुं प्रतिजा
नीते॥ ॥अथ चांद्रायणं॥१॥ ॥अथेत्यधिकारः चांद्रायणमुच्यत इति शेषः। तत्र ग्रासपरिमाणमाह॥
॥ग्रासानविकारानश्नीयात्॥२॥ ॥ग्रस्यंत इति ग्रासाः कवलाः तान् अविकारान् ग्रासैकपरिमाणा
दन्यूनाधिकान् एवं ग्रासविधानं तत्र अश्नीयात्। तथाह योगीश्वरः। तिथिवृद्ध्याचरेत्पिंडान् शुक्ले शि
ख्यंडसंमितानिति। तत्परिमाणं शनाशक्तावाह गौतमः ग्रासपरिमाणमास्याविकारेणेति। आस्याविका

राः शाकृतु विकासात्वं कौ च विकासातिशयः। पराशरोपि कुक्कुटांडप्रमाणं वा ग्रासं तु परिकल्पयेदिति। शंखो
पि। आर्द्रामलकमात्रास्तु ग्रासा इंदुव्रते स्मृताः इति। ग्रासद्रव्याण्याह गौतमः। चरुभैक्ष्यसक्तुकणयावकशा
कपयोदधिघृतमूलफलोदकानि हवींषि उत्तरोत्तरप्रशस्तानीति। पयोग्रासपरिमाणं त्वावर्तनेन घनीभूत
स्य घटते यथा घृतस्यात तत्परिमाणपर्णपुटिकयेति शेषः। यच्च पीदं चांद्रायणोपक्रमेभिहितं तत्यापि वा
कपवलादाकां। त्रितत्वा[illegible]रुद्धादावप्युपतिष्ठते। एवमध्यं चांद्रायणमाह॥ ॥तान् चंद्रकलाभिर्वृद्धौ व
र्धयेत् हानौ ह्रासयेत् अमावास्यायां नाश्नीयादेष चांद्रायणो यवमध्यः॥३॥ ॥चंद्रकलानामाभि
वृद्धिर्यस्मिन्नुपपद्यते तत्र पूर्वोक्तकुक्कुटाद्युपरिमाणान् ग्रासान्वर्धयेत्। अयमर्थः। शुक्लपक्षे यथा चंद्रकला ए
कैकोपचयेन वर्धते तथैवैकैकोपचयेन ग्रासान्वर्धयेत्। प्रतिपद्येको द्वितीयायां द्वौ तृतीयायां त्रय इत्य
दिहैवं पौर्णमास्यां पंचदश भवंति। ततः पुनश्चंद्रकलाहानौ कृष्णपक्षे एकैकापचयेन ग्रासान् ह्रास
येत्। प्रतिपदि चतुर्दश द्वितीयायां त्रयोदश तृतीयायां द्वादशेति हान्या चतुर्दश्यामेको भवति ततोमा
वास्यायां नाश्नीयादुपवसेत्। अत्र शिष्टग्रासाभावादेवानशने प्राप्ते पुनर्वचनं नियमार्थं एकैकं वर्धयेत्

इं सुक्ले कृष्णे च ह्रासयेत्॥ इंदुं दृष्ट्वा न भुंजीत एष चांद्रायणो विधिरिति वसिष्ठस्मरणात्॥ ग्रासह्रासनकालश्च
संध्योदयकाल एव रात्रिंदिवसाधारणः॥ तथा च हारीतः॥ ज्योत्स्नायां मासि विद्यमिमं त्रिंतान्पिंडानूर्ध्वग्रासाया
दिति॥ एवं पूर्वं पौर्णमासादिदर्शांतमाससाध्यश्चांद्रायणः॥ चंद्रस्यायनमिवायनं यस्येति चांद्रायणं श्चंद्रक
लोपवृद्ध्यापचयाभ्यां ग्रासोपचयापचयवत्त्वात्॥ संज्ञायां दीर्घः॥ यवमध्यतातुवद्दैपते पुल्लिंगनिर्देशश्चएष
चांद्रायणो मासहृतिगोतमीयेमा सह सामानाधिकरण्यात्॥ तस्यैव गुणविशेषात्संज्ञांतरमाह॥ ॥पिपी
लिकामध्यो वा॥४॥ ॥यदा ग्रासहानिमेवादौ कृष्णे कृत्वा पश्चाद्वृद्धिं तदा सोपि पिपीलिकामध्यो भवति॥ तद्य
था॥ कृष्णप्रतिपदि चतुर्दश ग्रासान्भुक्त्वा एकैकापचयेन चतुर्दश्यामेकं ग्रासं भुक्त्वामावास्य
यामुपोष्य पुनः शुक्लप्रतिपदमारभ्यैकैकोपचयेन पौर्णमास्यां पंचदश भवंतीति॥ यथाह वसिष्ठः॥ मास
स्य कृष्णपक्षादौ ग्रासानद्याच्चतुर्दश॥ ग्रासापचयभोजी सन्पक्षशेषं समापयेत्॥ एवं तत्पिपीलिकाम
ध्यं चांद्रायणमुदाहृतमिति॥ संज्ञाद्वयेपि निमित्तमाह॥ ॥यस्याममावास्या मध्ये भवति स पिपीलिका
मध्यः॥५॥ ॥उपक्रमे कृष्णप्रतिपदि चतुर्दश ग्रासा मध्येमावास्यायामुपोषणमंते पौर्णमास्यां पंचदश ग्रासा

साइति पिपीलिकावन्मध्ये क्षीणो भवतीति पिपीलिकामध्या॥ किंच॥ ॥यस्य पौर्णमासी स यवमध्यः॥६॥ ॥शुक्ल
पति पद्येको ग्रासः पौर्णमास्यां पंचदश अमावास्यायामुपोषणमेवं यववन्मध्ये स्थवीयः प्रांतयोश्चाणीयो भवती
ति यवमध्यः यथाह वसिष्ठः। तथैव शुक्लपक्षादौ ग्रासं भुंजीत वापरं। ग्रासोपचयभोजी सन्पक्षशेषं समापयेत्
एतच्चांद्रायणं नाम यवमध्यं स्मृतमिति। यद्यपि लक्षणाभिधानापवायमर्थो लभ्यते तथापि लक्ष्यतावच्छे
दकलक्षणयोरभेदापत्त्या पृथगभिधानमुभयोः तत्र पौर्णमासीमध्यत्वं लक्ष्यतावच्छेदकं वृद्धिपूर्वकह्रासवत्त्वं
सवत्त्वं लक्षणं यवमध्यस्य तथा पिपीलिकामध्यस्यामावास्यामध्यत्वं लक्ष्यतावच्छेदकं ह्रासपूर्वकवृद्धिम
त्त्वं सवत्त्वं लक्षणमिति। यदा त्वन्यतरस्मिन्पक्षे तिथिह्रासवृद्धिभ्यां षोडश चतुर्दश वा दिनानि वा भवंति त
दा ग्रासानामपि वृद्धिक्षयौ वेदितव्यौ। तिथिवृद्ध्या चरेत्पिंडानिति योगिस्मरणात् वक्ष्यमाणब्रह्मोनविंश
तीवृत्तं व्याघ्राच यावत्त्रयणी चा यतिचांद्रायणः। ग्रासाशनं च मध्याह्ने। यथा मनुः। अष्टावष्टौ समाह॥ ॥
अष्टौ ग्रासान्प्रति दिवसं मासमश्नीयात्स यतिचांद्रायणः॥७॥ ॥मासं प्रतिदिनमष्टानां ग्रासानां अपर्या
येरष्टाष्टाविति वीप्सा कल्प्यते। ततश्च मासं प्रतिदिनमष्टावष्टौ ग्रासानश्नीयात्स यतिचांद्रायणः। अष्टौ ग्रा
सान्मुनेर्भैक्ष्यमिति यातवल्क्यसनियमाद्यतिचांद्रायणः। ग्रासाशनं च मध्याह्ने। यथा मनुः। अष्टावष्टौ स

मश्नीयात्पिंडान्मध्यंदिने रवौ। नियतात्मा हविष्यस्य यतिचांद्रायणं चरन्निति पूर्वं चाऽमासोपक्रमात्सहस्रैर्निमि
मित्तं विना चांद्रायणशब्दप्रवृत्तेः प्राकृतादेकारान्त्वाच्चात्रापि चांद्रमाससाध्यत्वमेवावसीयते न सावनादिमा
ससाध्यत्वमतश्च तिथिह्रासवृद्ध्योरत्रापि ग्रासह्रासवृद्धी कल्पनीये। मासमित्यत्यंतसंयोगे द्वितीयाश्रवणात्। वि
कृतित्वादेव प्रकृतिशेषे मासे पुनर्ग्रासग्रहणं हि पिपीलिकाद्यर्थमन्यथा स्थूलादेरेव प्राप्नुयात् प्रकृतिस
मवायात्। यद्वामावास्यायामुपोषणाभावाय पुनर्मासग्रहणं तेनोपक्रमतिथिरनस्थूलात्कृष्णा वा प्रतिपद्भ
वति। शिशुचांद्रायणमाह॥ ॥सायं प्रातश्चतुरश्चतुरः स शिशुचांद्रायणः।८॥ ॥मासं प्रत्यहं सायंतर्यास्ता
नंतरं प्रातस्त्रिमुहूर्तमध्ये चतुरश्चतुरः पिंडानश्नीयात्स शिशूनामिवात्यंताल्पाशनेन शिशुचांद्रायणः। च
तुरः प्रातरश्नीयात्पिंडान्विप्रः समाहितः। चतुरोऽस्तमिते सूर्ये शिशुचांद्रायणं चरन्निति मनुस्मरणात्। अनया
वसमाप्यायावालानामिदमेव गम्यते। तथा च यमः। चतुरः प्रातरश्नीयाच्चतुरः सायमेव च। पिंडानेतद्धि बा
लानां शिशुचांद्रायणं स्मृतमिति। नियतग्राससाम्यत्वेनान्यदपि स्मृतिचितं। यथाऽऽह यमः। त्रीस्त्रीन्पिंडान्समश्नी
यान्नियतात्मा दृढव्रतः। हविष्यान्नस्य वै मासमृषिचांद्रायणं स्मृतमिति। सामान्यचांद्रायणमाह॥ ॥यथाक

यंवित्वष्ट्योनांत्रिशतींमासेनाश्नीयात्ससामान्यचांद्रायणः॥८॥ ॥यथाकथंचिदुक्तप्रकारातिरिक्तेनये
नकेनापिग्राससंख्याविनियोगेनैकस्मिंश्चतुरोऽपरस्मिन्द्वादशैकाहमुपोष्यापरस्मिन्षोडशद्व्यहमुपोष्यतृ
तीयेचतुर्विंशतिस्त्र्यहमुपोष्यचतुर्थेद्वात्रिंशदित्येवंमासेनषष्ट्योनांत्रिशतींग्रासानांमासेनाश्नीयाद्
यात्ससामान्यचांद्रायणः।यद्यपियतिशिशुचांद्रायणयोरपीयंसंख्यावर्त्ततेतथापिनानियतविनि
योगेतिनतयोरत्रांतर्भावः।अत्रैतत्संख्यान्यूनात्यवमध्यपिपीलिकामध्ययोर्नेयंसंख्यातत्रपंचवि
शत्यधिकशतद्वयसंख्यासिद्धेः।प्रकृतिग्रासेऽपिमासेपुनर्वचनंनियमार्थं।यथाकथंचित्पिंडानांचत्वा
रिंशाद्धिकंतद्वयं।मासेनैवोपभुंजीतचांद्रायणमथापरमितियोगीश्वरेणात्रान्यथाद्वादशभिरेवदिनैः
प्रत्यहंविंशतिग्रासाशनेनचतुर्विंशतिदिनसाध्यसोमायनवच्चांद्रायणमपिस्यात्।यदात्वस्मिन्नपिव्रते
तिथिह्रासवृद्धीभवतस्तदातद्दिनग्रासह्रासायाएवसंख्यायाद्वैगुण्यमर्द्धत्वंवाकार्यांषष्ट्योनत्रिशतीपूरण
स्यावश्यकत्वात्।एतन्मध्येत्वेकादशीपातेदिनोपवासलोपः।एकादश्यामपिविलोपेनापिग्राससंख्यापूरण
संभवात्।यथाकथंचिदितिवाक्यात्।यवमध्यादौत्वेकादश्युपवासलोपएवातस्तामेकादशग्रासानश्ने

कालात्पूर्वमाघनं तु स्वरतो न ब्रूतस्यरूपं तोमवसंगात् । तत्र पूर्वार्धे स्वमेकादशीव्रतमन्यद्वाकारणीयमिति
तत्त्वं । मासमासाख्यमेव सोमायनं तदाह मार्कण्डेयः । गोक्षीरं सप्तरात्रं तु पिबेत्स्तनचतुष्टयात् । स्तनत्रया
त्सप्तरात्रं सप्तरात्रं स्तनद्वयात् । स्तनेनैकेन षड्रात्रं त्रिरात्रं वायुभुग्भवेत् । एतत्सोमायनं नाम
व्रतं कल्मषनाशनमिति । अत्रापि चान्द्रायणीयणीया एव धर्माः । हारीतेनैवं सोमायनमिति चान्द्रायण
धर्मातिदेशात् । अथ कृच्छ्रप्रकारान्तरमाह स एव । कृष्णचतुर्थीमारभ्य शुक्लद्वादशीं यावच्चतुःस्तनेन त्रि
रात्रं त्रिस्तनेन त्रिरात्रं द्विस्तनेन त्रिरात्रमेकस्तनेन त्रिरात्रमेवमेकस्तनप्रभृति पुनश्चतुःस्तनान्तं पाते
सोमचतुर्थीतन्त्रस्तपानः पाहि निसृष्टे स्वाहा पातेसोम पंचमी षष्ठ्यां त्वेवं यथार्थ्यां तिथिहोमाः एकमाघ्र
ऐनोस्मः प्रतङ्कंदमसः साधोकांसा पुल्यं गच्छातीति । इदं वत्सरविंशतिरात्रं साधं वक्ताविशेषग्रहेर्यमावादमाह ।
उत्तमेन तु मासे न लोकान्तरे ह्यात्वा समर्षिनिवसत्यवाप्तं स्थानं प्रापुः सप्तर्षि कृत्वा समर्षयो मताः । प्राप्नवतः परं स्थान
ब्रह्मणः सह यैस्तैव च ॥१०॥ ॥ एतदुक्तविधिमेदं चान्द्रायणं पुराकल्पान्तरे कृत्वा सप्तर्षिब्रह्म सुरङ्गत
लं स्थानं प्रापुः । प्राप्तवन्तस्मादेतद्धर्मार्थमपि कार्यमित्युक्तं । धर्मार्थं यश्चरेदेतच्चन्द्रस्यैति स लोकता

रहितं स्नातकं तं यानस्थं सर्वे पुनन्ति मेध्यवायुत्यौशनसे॥ ॥बालघ्नं तं मयूखं च राजद्वारस्तं तं वर्धयेत्॥ सुवर्णस्ते
न्यमब्राह्मणमयोऽप्यस्य च पाजनं॥२२॥ ॥सूर्त्तामित्यवभावप्रधानो निर्देशः॥ अथवा तत्समूहो ब्राह्मणस्य सुवर्ण
स्तैन्यं महापातकोलक्षणं॥ महापातकसंयुक्ते दारुणं राजकिल्विषमित्यौशनात्॥ ॥ब्राह्मणेनापरिवा
देपुनीध्वं च यथामम॥२३॥ ॥परीवादो निंदा॥ ॥ विष्णुस्मृ
तिविवृतौ श्रीमत्यां वैजयंत्याम् ष्टाचत्वारिंशोऽध्यायः॥ ॥अथैकोनपंचाशेन वैष्णवव्रतान्याह॥ ॥मार्ग
शीर्षशुक्लैकादश्यामुपोषितो द्वादश्यां भगवंतं वासुदेवमर्चयेत्॥१॥ ॥मार्गशीर्षशुक्लयुक्तापोर्णमासी य
स्मिन्मासे स मार्गशीर्षः॥ तस्य शुक्लैकादश्यां यथा विष्णुर्पोषितः पापभोगराहित्येन भगवन्नामकीर्तनादि
युक्तैः स्थित्वा द्वादश्यां प्रातर्भगवंतं श्रीवासुदेवं षोडशोपचारैः पुरुषसूक्तेनावाहनादिविसर्जनांतैः षो
डशाभिरुपचारैः पूजयेत्॥ यद्वा वासुदेवद्वादशाक्षरेण गंधादिपंचोपचारैरेवार्चयेत्॥ उपचारानाह॥ ॥
पुष्पधूपानुलेपनदीपनैवेद्यैर्ब्राह्मणतर्पणैश्च॥ ॥पुष्पं जात्यादि॥ धूपो गुग्गुलादिः॥ अनुलेपनं चंदना
दि दीपो घृतादिनैवेद्यं पायसं॥ अनुलेपनस्य पश्चात्पाठो दानमादावेव॥ एतैरुपचारैर्यथाशक्ति होमे

ब्राह्मणभोजनेस्त्वार्चयेत्। तत्र होमः पुरुषसूक्तेन वासुदेवद्वादशाक्षरेण वा तिलयवाज्यानामन्यतमेन
कार्यः। उक्तव्रतस्य कालं फलं विनियोगं चाह॥ ॥व्रतमेतत्संवत्सरं कृत्वा पापेभ्यः पूतो भवति॥३॥ ॥मार्गशीर्षशु
क्लैकादशीमारभ्य कार्त्तिकशुक्लद्वादशीपर्यंतं द्वादशस्वपि शुक्लद्वादशीषु पूर्वोक्तं व्रतं कृत्वातिपातकादि
भ्यो नवविधेभ्यो पि पापेभ्यो मुक्तः पूतो भवति। यथोक्तं स्कांदे। पापं च विविधं ज्ञेयं पातकं चातिपातकं। उपपातकसंज्ञं
च महापातकमेव च। प्रकीर्णकं चान्यदपि नराणामिह जायते। अभोज्यभोजनाज्ञातमगम्यागमनाद्यथा। अया
ज्ययाजनाद्यैश्च अभक्ष्याणां च भक्षणात्। अस्पृश्यस्पर्शनाद्यैश्च परेषां निंदनाद्यथा। आत्मसंस्तवनाद्यैश्च पारदार्या
त्कर्तव्यथा। विहिताकरणाद्यैश्च परवित्तापहारतः। ज्ञानाज्ञानकृतं यच्च स्वयमन्येन कारितं। तत्सर्वं विलयं याति एका
दश्यामुपोषणात्। एकादशी महापुण्या मार्गशीर्षस्य शुक्लगा। तस्यामुपोषितो यस्तु द्वादश्यां पूजयेद्धरिं। तस्य पापा
निश्यंति विष्णोर्भक्तिश्च जायते। ज्ञानं च शाश्वतं येन संसारान्मुच्यते नरः इति। अगम्यागमनं निषिद्धदेशाभिमुख्येन
गमनं वा। माताद्यगमनस्यातिपातकत्वेन परदारागमनस्य च स्वातंत्र्येणैवोपादानात्। न चेदमर्थवादमात्रं मूल
वाक्येन फले विनियोगात्। तत्र च यत्र फले विनियोगो नास्ति तत्रापि रात्रिसत्रन्यायेनार्थवादिकमेव फलं कल्पनी

याःयया॥ नाशोस्मयावतीशक्तिःपापनिर्हरणेहरेः॥ तावत्कर्तुंनशक्नोतिपातकंपातकीजनइत्यादौनचैवमन्यानर्थक्यं
धनिकसमर्थादिविषयत्वेनद्वादशवार्षिकाद्युपपत्तेः॥ निर्द्धनासमर्थभक्तविषयत्वेनचभवेगोत्रामस्मरणसेत्फलमतिशु
भनिजसर्वस्वप्रकाशनेन॥ उक्तव्रतस्यकालविशेषेणफलांतरमाह॥ ॥यावज्जीवंकृत्वाश्वेतद्वीपमाप्नोति॥४॥ ॥
उक्तमेवव्रतंयावज्जीवंव्रतग्रहणदिनमारभ्यामरणंकृत्वाश्वेतद्वीपंहरिवंशादिप्रसिद्धंभगवदधिष्ठानंप्राप्नोति॥ उक्तव्रत
धर्मकंव्रतांतरमाह॥ ॥उभयपक्षद्वादशीष्वेवंसंवत्सरेणस्वर्गलोकमाप्नोति॥५॥ ॥संवत्सरंयावत्कृष्णशुक्लद्वादशी
ष्वेवंपूर्वोक्तप्रकारकंव्रतंकृत्वास्वर्गलोकमिंद्रादिस्थानंप्राप्नोति॥ अस्यापिकालविशेषेणफलांतरमाह॥ ॥यावज्जी
वंकृत्वाविष्णुलोकं॥६॥ ॥चतुर्विंशतिद्वादशीषुयावज्जीवमुक्तव्रताचरणेविष्णुलोकंप्राप्नोति॥ उक्तव्रतेकालांतरम
प्याह॥ ॥एवमेवपंचदशीष्वपि॥७॥ ॥एवमेवचतुर्दश्यामुपोष्यपंचदशीषुपौर्णमासीष्वमावास्यासुचभगवंतंवासुदेव
मुक्तविधिनाभ्यर्च्योक्तकालेनोक्तमेवफलमाप्नोति॥ तत्रैवगुणफलमाह॥ ॥ब्रह्मभूतममावास्यांपौर्णमास्यांतथैवच॥
योगभूतंपरिचरन्केशवंमहदाप्नुयात्॥८॥ ॥तत्रैवपंचदशीव्रतेयद्यमावास्यायांब्रह्मभूतेनित्यनिरतिशयानंद
रूपंपौर्णमास्यांचयोगभूतेयोगशायिनंकेशवमर्चयतितदामहद्ब्रह्मरूपतामाप्नोति॥ अनेनब्रह्मकेशवयोगकेशवा

वि॰टी॰प॰
३२६

भिधं विशिष्टं देवताद्वयमभिहितं तेन च पूजायां ब्रह्मकेशवायनमो योगः केशवायनम इति प्रयोगः तत्र व्रतेषु फल
विशेषाय कालविशेषमाह॥ ॥हस्तेपतेसहितौ यस्यां विधुचंद्रबृहस्पती॥ पौर्णमासी तु महती प्रोक्ता संवत्सरे तु सा॥९॥
तस्यां दानोपवासाद्यमक्षयं परिकीर्तितं॥ तथैव द्वादशी शुक्ला यास्याच्छ्रवणसंयुता॥१०॥ ॥यस्मिन्संवत्सरे स्यां पौर्ण
मास्यां गुरुचंद्रावेकनक्षत्रे एकराशौ वादिविहस्पते। यावच्छुक्लाद्वादशी श्रवणनक्षत्रयुक्ता भवति सो मयद्यपि तस्मिन्सं
वत्सरे महतीत्युच्यते स्नानदानव्रतोपवासादेरक्षय्यताहेतुत्वात्॥ यथा गार्ग्यः॥ मासंसंज्ञे यदा नक्षत्रे चंद्रः संपूर्णमंड
लः॥ गुरुणा याति संयोगं सा तिथिर्महती स्मृता॥ शंकरगीतास्वपि॥ एकराशिगतौ स्यातां यदा गुरुनिशाकरौ॥ पौ
र्णमासी महती सर्वपापहरा स्मृतेति॥ शुक्लेति कृष्णाव्युदासः॥ यत्सामान्योपादानं भाद्रशुक्लातिरिक्ताया अपि ग्रा
ह्यर्थं॥ यथा ब्रह्मवैवर्त्ते॥ नभस्ये फाल्गुने वापि यदि वा द्वादशी भवेत्॥ शुद्धश्रवणसंयुक्ता महती विजया च सेति॥ ॥
॥इतिश्री विष्णुस्मृतिविवृतौ श्रीमत्यां वैजयंत्यामेकोनपंचाश
त्तमोध्यायः॥ ॥पंचत्रिंशोध्याये कामकृतेषु महापातकेषु प्रायश्चित्तमुक्तमिदानीमकामकृतेषु प्रायश्चित्तं वक्तु
पंचाशत्तमेन ब्रह्महत्यायां तावदाह॥ ॥वने पर्णकुटीं कृत्वा वसेत्॥१॥ ॥ब्राह्मणं हत्वा द्वादश संवत्सरमित्यग्रेतने
नानुषंगस्ततश्च ब्रह्महा द्वादशाब्दमरण्ये पर्णशालां कृत्वा तत्र वसेत्॥ वनाभावे वग्रामांतरमाह मनुः॥ कृतवापो वा निव

राम
३२६

सिद्धांमांते गो व्रजेपिवा। आश्रमे वृक्षमूले वा सर्वभूतहिते रत इति। कृतवापो वेति विकल्पाद्धारणं गम्यते। ब्रह्महा द्वा
दशाब्दानि वाल्कवासा जटी ध्वजीति संवर्तस्मरणात्। वालवासाः कवलच्छन्नः। परिधानार्थं तु शाणी। अर्द्धशाणी पुत्रमधे
नाप्युपरि जान्वाच्छाद्योत्पापस्तंवीयात्॥ ॥त्रिषवणं स्नायात्॥२॥ ॥त्रिकालं स्नायात्। स्नानविधानान्तरं दर्गमंत्रप्रा
प्तिर्भावनायाः स्वप्रशस्त्वात्। त्रिकालग्रहणात् त्रिकालसंध्योपासनमपि गम्यते। संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्म
सु। यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेदिति दक्षेण सर्वकर्मणि ताभिधानात्। न च द्विजातिकर्मभ्यो हानिः पतन
मिति गौतमवाक्येन शौर्यशाद्ध संकोचः। तस्मा प्रायश्चित्तानंगमत्तद्विजातिकर्मपरत्वादिति प्रांचः। वस्तुतस्तु महापा
तकेषु पुनः संस्कारविधानान्यथानुपपत्त्या पूर्वसंस्कारनाशावगमात् सावित्र्यंतरोपदेशश्रवणाच्च न संध्यावंदनेऽधिका
रः। संध्यावंदनाधिकारापादकसंस्कारनाशात् सावित्र्यंतरोपदेशजन्यसंस्कारानुदयाच्च। किं च यथा शौचे नित्यानि
निवर्तेरन्नित्यनेन सर्वकर्मापवादे कृते यस्य तिप्रसूतमग्निहोत्रहोमादि तावदेवानुष्ठेयं न पंचयज्ञादि प्रतिप्रसवा
भावात्। तथा अपतिताधिकारिणां सर्वेषां संध्यावंदनादिकर्मणां द्विजातिकर्मभ्यो हानिरित्यनेनापवादात् कूष्मांडीजप
दिवद्विना प्रतिप्रसवमनुष्ठानासिद्धेः न संध्यावंदनाद्यधिकार इति प्रतिभाति। विशेषांतरमस्माभिः पराशरस्मृतिटीका
यां विद्वन्मनोहरायामुक्तमिति नेहोच्यते॥ ॥स्वकर्म चाचक्षाणो ग्रामे ग्रामे भैक्षमाचरेत्॥३॥ ॥स्वकर्म विज्ञानहत्या

तामाख्यायैव प्रतिग्रामं भैक्षं चरेत्। यथा पराशरः। विश्रमद्वारेषु तिष्ठामि भिक्षार्थी ब्रह्मघातक इति। चकारात्षष्ठापक्रामे सं
दर्शनादार्यस्येति गौतमीये। ग्रामद्वारगृहणान्तं वेश्मप्रवेशः। ब्राह्मणावसथांश्चैवागाराणि वर्जयेदिति यमस्मरणात्।
ग्रामे ग्राम इति वीप्सयनेकस्मिन्नेव ग्राम इति गम्यते। यथा पराशरः। गोकुलेषु च वेषु ग्रामेषु नगरेषु चा तपोवनेषु तीर्थे
षु नदीप्रस्रवणेषु च। एतेषु ख्यापयन्नेनः पुण्यं गत्वा तु सागरमिति। ग्रामे भैक्षमिति वचनाद्भैक्षार्थमेव ग्रामप्रवेशो नान्य
देति। भिक्षार्थे ग्रामं प्रविशेदिति गौतमीयात्। भैक्षविधिमाह यमः। मृन्मयेन कपालेन स्वकर्म श्रावयंस्तथा। सप्तागा
राण्यपूर्वाणि यान्यसंकल्पितानि वै। संचरेत् निशानेके विधूमे भुक्तिवर्जिते। एककालं चरेद्भैक्षमलब्ध्वोपवसेद्दिन
मिति। तच्च ब्राह्मणेष्वेव। ब्राह्मणेषु चरेद्भैक्षं स्वकर्म ख्यापयन् शुचिरिति पाराशर्यात्। तदसंभवे चातुर्वर्ण्येषु। चातुर्वर्ण्ये
चरेद्भैक्षं खट्वाङ्गी संयतः पुमानिति संवर्तस्मरणात्। तदपि वन्ये न जीवनाशक्तौ। भिक्षार्थे प्रविशेद्ग्रामं वन्ये यदि न जीव
तीति संवर्तस्मरणात्॥ ॥तृणशाय्यी च स्यात्॥४॥ ॥तृणेष्वेव शयीत न शय्यादौ। इदं च वीरासनासंभवे। स्थानवीर
रासनी मौनीति शंखस्मरणात्। दिवा स्थानं रात्रौ वीरासनमिति व्यवस्था। रात्रौ वीरासनं वसेदिति स्मरणात्। चकाराद
न्यदपि ब्रह्मचर्यादि ग्राह्यं। द्वादश संवत्सरान् ब्रह्मचारीति गौतमीयात्। तथाह शंखः। मौंजीदंडकमंडलुः। भिक्षाच

वर्याग्निकार्यं चरूण्यांडीभिः सदाजपश्चति। दंडो जिनस्याप्युपलक्षणं। तथा च गार्ग्यः खट्वांगी गर्दभाजिनीति शंखस्म-
रणात्। तथा मधुमांसादिवर्जनमपि ब्रह्मचर्याक्रमेव। तथा शिरःकपालादिकमपि धार्यं। शिरःकपाली ध्वज-
वानिति योगिस्मरणात्। हतस्यैव शिरःकपालं। ब्राह्मणो ब्राह्मणं हत्वा तस्यैव शिरःकपालमादाय तीर्था-
न्यनुसंचरेदिति शातातपीयात्। ध्वजो न्यस्य शवशिरसः कृत्वा शवशिरोध्वजमिति मानवात्। तदुभयं पाणिभ्यां
धार्यं। खट्वांगकपालपाणिरिति गौतमीयात्। तत्र कपालं दक्षिणे वामे ध्वजः। कपालं दक्षिणपाणौ वामे शवशिरो
ध्वजमिति स्मरणात्॥ कपालं च भिक्षार्थं न भोजनार्थं। पुरुषशिरः प्रतिदिनार्थं खट्वांगदंडार्थं इत्यापस्तंबी-
यात्। प्रतिपादनं ब्रह्महत्याज्ञापनं दंडो ब्रह्मचर्याङ्गत्वेन कृतस्तदर्थं तेन न पृथग्दंडदंडप्राप्तिः। उक्तव्रतसंज्ञा-
माह॥ ॥१तन्महाव्रतं॥५॥ ॥एतदुक्तं महाव्रतसंज्ञं कृच्छ्रादिभ्योऽधिककालत्वान्महत्वात्तस्य निमित्तविशेषेण का-
लविशेषविनियोगं चाह॥ ॥ब्राह्मणं हत्वा द्वादशसंवत्सरं कुर्यात्॥६॥ ॥यः साक्षादकामतो ब्राह्मणं हन्ति स द्वाद-
शाब्दान्येतद्व्रतं चरेत्। अकामकृते ब्रह्मवधे ब्रह्महार्षदानुमते खट्वांगी गर्दभाजिनी द्वादशे वर्षे शुद्धिमाप्नोतीति
शंखलिखितस्मरणात्। अस्मामाघव्रतोप्यंतरा ब्राह्मणमोचनादिनैव शुध्यति। द्वादशे वर्षे शुद्धिं प्राप्नोत्यंतरा वा ब्र-

वि·टी·५०
३२८

ह्मणं शोचयित्वा गवां द्वादशानां परित्राणात्सद्य एवाश्वमेधावभृथस्नानाद्वा पूतो भवतीति शंखस्मरणात्। ब्राह्मणं
हन्यमानं गां वा हन्यमानानामिति ज्ञेयं। अश्वमेधो नस्या। अश्वमेधावभृथं गत्वा तत्रानुज्ञातः सद्यः पूतो भवतीति
तस्यैव स्मरणात्। तथा स्मृतो पि शुध्यति। प्रायश्चित्ते व्यवसिते कर्त्ता यदि पद्यते। शुद्धस्तदहरेवासाविहलोके परत्र चे
ति यमस्मरणात्। इदं च गुणदोषरहितब्राह्मणकर्तृकतादृशब्राह्मणहनने। तत्र सामान्यतो हत्वा ब्राह्मणं सुर
सत्तम। प्रायश्चित्तं तु वै कृत्वा विधिवद्द्वादशाब्दिकं। प्राप्नोति शुद्धिं जीवन्वै संगं च स्वजनैः सहेति भविष्यात्। का
मतो निर्गुणकृतगुणवद्ब्राह्मणवधे तु प्राणांतिकं। यावज्जीवव्रतं वा। यथाह भविष्ये। गुणाढ्यब्राह्मणवधे वह्निप्र
वेशकृते गुह। ब्राह्मणो हि यदा हंता गुणैश्च परिवर्जितः प्राणांतिकं महाबाहो न जीवन्शुद्धिमाप्नुयात्। आ उत्त
माह्वा निश्वासादवस्थानमिति स्मृतिरिति। अकामतस्तु चतुर्विंशतिवार्षिकं। सवनस्थवधे पित्रादिवधे च चतुर्विं
शतिवार्षिकं। यज्ञसंस्थौ च पितरौ राजानं चाप्यनागसं। हत्वा चरेद्व्रतं सम्यक् चतुर्विंशाब्दसंमितं वत्सरानिति ब्राह्मात्।
यज्ञसंस्थावितिनापितृविशेषणं अविशेषणं तात्। इदमकामतः। ब्राह्मणो ब्राह्मणं हत्वा सवनस्थमकाम
तः। प्रायश्चित्तद्वयं कुर्यादिति भविष्यात्। प्रायश्चित्तद्वयं द्वादशाब्दद्वयं। द्विगुणं सवनस्थे तु ब्राह्मणे व्रतमादिशे

राम
३२८

दितियोग्निस्मरणाश्वातेष्वाभेवकामतोवधेमरणश्ववमेधादिपूर्वोक्तंतदंशक्रोयावज्जीवव्रतंपथ्यान्तरेषु।मातरं
पितरंहत्वासोदर्यंभ्रातरंतथा।गुरुंहत्वाश्रोत्रियंचआहिताग्निमथापिवा।जातिमात्राद्वाविंशत्पाद्कृतंचीर्त्वाविशु
ध्यतीति।शुध्यतिपात्रनास्यास्मिन्लोकेश्चापपत्योर्विद्यतइत्यापस्तंबीयात्।व्रतस्यापत्तिर्न्येवहारः।इदंचसर्वंव
र्णजातिसाधारणं।वर्णापेक्षानकर्त्तव्यामातरंपितरंघ्नतीतिविष्णुधर्मोत्तरात्।एवंचात्रादिष्वपिमातापितृषुयद्व्रतंत्र्यं
र्दष्णुस्वसुतासुच।जायात्मजेषुयद्व्रतंसोनिंद्यःस्वर्गसंक्रमइतिव्यासोक्तदानफलविशेषेणाहिंसायामपिदोष
विशेषसिद्धेः।दानेफलविशेषःस्याद्धिंसायां।दानेफलविशेषःस्याद्धिंसायांतद्वदेवहीतिदद्वेणोभयव्याप्तिप्रदर्श
नात्।एवमन्यत्रापिदानफलविशेषोह्यं।जातिमात्रब्राह्मणहननेभविष्ये।जातिमात्रंयदाहन्याद्ब्राह्मणंब्राह्म
णंगुह।वेदाभ्यासविहीनोवैधनवानग्निवर्जितः।प्रायश्चित्तंतदाकुर्यादिदंपापविशुद्धये।धनंवाजीवनायालं
गृहंवासपरिच्छदमिति।इदमकामतः।कामतस्तुतत्रैव।जातिमात्रेहतेविप्रेकामतोथमवेष्टणां।चरेद्द्वाद
शवर्षाणिकृत्वाशवशिरोध्वजमिति।तस्यैवगुणवतोऽकामतोवधेतत्रैव।जातिमात्रंतुयोहन्याद्विप्रंत्वमति
पूर्वकं।ब्राह्मणोत्पत्तिगुणवांस्तदेदंपरिकल्पयेत्।जपेद्द्वानियताहारस्त्रिकृत्वोवेदसंहितामिति।तस्यैवताद्दशेनै

प्रा·टी·प·
३२९

वकामतो वधेऽपि तत्रैव। ब्राह्मणं जातिमात्रं तु कामतो विनिपात्य वै। चरेद्द्वादश वर्षाणि गुणिनि निर्गुणे मेवहीति। आततायि
गुणि विप्रवधेऽपि तत्रैव। हत्वा तु प्रहरन्तं वै ब्राह्मणं वेदपारगं। कामतोऽपि चरेद्वीर द्वादशाब्दान्यसंशयमिति। अकामतो
निर्गुणे चार्द्धं। पतितविप्रवधे प्रायश्चित्तम्ः। वेदपूर्णं शूद्रक्रियासक्तं विकर्मस्थं द्विजोत्तमं। हत्वा चान्द्रायणं कुर्यात् त्रीन् शू
द्रांश्चैव दक्षिणामिति। आत्मा विप्रवधे शंखलिखितौ। शूद्रवदेवाव्रते सर्वेषामविशेषेणेति। अज्ञातो व्रात्यः। द्विजा
तयः सवर्णासु जनयन्त्यव्रतांस्तु यान्। तान् सावित्रीपरिभ्रष्टान् व्रात्यानिति विनिर्दिशेदिति मानवात्। षंढविप्र
वधे षड्विंशन्मते। षंढं तु ब्राह्मणं हत्वा शूद्रहत्याव्रतं चरेत्। चान्द्रायणं वा कुर्वीत पराकद्वयमेव वेति। कामतः
शूद्रहत्याव्रतमकामतश्चान्द्रायणादि। मानसविश्ववधे वसिष्ठः। अथापरं भ्रूणहत्यायां द्वादशरात्रमत्र
तौ द्वादशरात्रमुपवसेदिति। अकामतो युगपदनेकविप्रवधे यावज्जीवव्रतं यथा भविष्ये। अकामतो य
दा हन्याद्युगपद्ब्राह्मणान् बहून्। चरेद्धनेतदा घोरं आत्मनः पापशुद्धये मिति। कामतस्तद्वधेऽपि तत्रैव। का
मतश्च यदा हन्याद्ब्राह्मणान् सुबहून् नृप। तदात्मानं दहेदग्नौ कारीषाग्नौ घृतप्लुत इति। अत्र बहुत्वं द्वित्वस्या
प्युपलक्षणं। ब्राह्मणो ब्राह्मणौ वापि ब्राह्मणीं न्नसुबहून् नपि। निहत्य युगपद्वीर एवं प्राणान्तिकं चरेदिति तत्रैवा

राम
३२९

मिधानात्।सुवर्णस्तेयचतुरादीन्।अन्यथा कपिंजलन्यायेन ब्राह्मणानिति बहुवचनेन त्रयाणामेव प्राप्तिः स्या
त्।अकामतः क्रमिकानेकब्राह्मणवधे मनुदेवलौ॥विधेः प्राथमिकादस्माद्द्वितीये द्विगुणं भवेत्।तृतीये त्रि
गुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिरिति।अत्र वचनारंभसामर्थ्यान्नैतत्प्रायश्चित्तस्य द्विगुणादिविधिसामर्थ्या
च्चत्वारि हत्याविधिः।न्यायप्राप्तत्वादाहतैः।किंतु द्विगुणादिविधिः।तथा च द्वितीये ब्रह्मवधे प्रथमस्य द्वादश
वर्षं द्वितीयस्य द्विगुणं चतुर्विंशतिवार्षिकमित्येवमेककालेनुष्ठीयमाने षट्त्रिंशदाब्दिकं कार्यं एवं
तृतीये ब्रह्मवधे द्विसप्तत्यब्दं।चतुर्थे विंशोत्तरशताब्दकालाभावाद्द्विगुणतद्रूपनिष्कृत्यभावो मरणांतिकाभ्य
नुज्ञानायेति।तदाहांगिराः।शरीरं न दहेद्यावद्ब्रह्महा पापकृत्तमः।तावत्तस्य न शुद्धिः स्याद्भगवान्मनुरब्र
वीदिति।अत्र तमप्प्रत्ययेन ब्रह्महत्यापापमावृत्तिरूपातिशययावगम्यमानत्वाच्चतुर्थब्रह्मवधादौ तद्रूपप्रा
यश्चित्ताभावो बोध्यते तच्चानेन मरणांतिकं प्रायश्चित्तं विधीयत इत्यवश्यं वाच्यं।अन्यथा पापकृदिति पु
यश्चिज्ञापनं तमप्प्रत्ययश्च नोपपद्येत न च कामकृतत्वमेव तमप्प्रत्ययार्थः।तत्र अपः कामतो महापा
नरः कुर्यात्कथंचन नानृतस्य निष्कृतिर्दृष्टा भाग्वपतनादृते इति तेनैव पृथक्प्रायश्चित्ताभिधानेनास्यै

नरुत्सापत्तेः। नचाकामविषयत्वं मरणस्य संभवति। नचसवनस्थश्रोत्रियादिविषयत्वं द्विगुणा। ब्रुवे इति विधानाच्च
तस्मीद्यथोक्तमेवसाधीयः। सचशरीरदाहो निष्कालकोघृताभ्यक्तो गोमयाग्निनापादप्रभृत्यात्मानमवदाहये
न्मरणात्पूतो भवतीति वासिष्ठो विधेयः। गुरुतल्पी गूढूणीति न्यायात्। ब्रह्मणावधार्थमुद्योगोऽकृतवधस्यापि प्राय
श्चित्तं महतोमः। स्पष्टश्चेद्दृष्टामणवधे ब्रह्मत्यापीति। इदं च द्वाशेदेहादि व्रतजातं साक्षाद्धंतुरेव व्यापाराधिक्यात्। अ
नुग्राहकादीनां तु ततो न्यूनं कल्प्यं व्यापाराल्पत्वात्। तत्रानुग्राहकस्य नवाब्दं प्रयोजकस्य षडब्दं अनुमंतुः सार्द्धवत्स
रद्वं निमित्तिनस्त्र्यब्दं। तत्र शुमंतुः। तिस्रः स्फुतोयदा विप्रो हत्वात्मानं मृतो यदि। निर्गुणः सहसा क्रोधाद्धन्तेत्यादिकार
णात्। नैवार्षिकं व्रतं कुर्यात्प्रतिलोमां सरस्वतीं। गच्छेद्वापि विशुध्यर्थं तत्पापस्येति निश्चितमिति। इदं निर्गुणक्रोधकृतवि
षयं। अत्यर्थं निर्गुणो विप्रो ह्यत्यर्थं निर्गुणोपरि। क्रोधाद्वै म्रियते यस्तु निर्निमित्तं तु भर्त्सितः। वत्सरत्रितयं कुर्यान्नर
कृच्छ्रं विशुद्धये इति तस्यैव स्मरणात्। गुणवत्या क्रोधेऽर्धाब्दं। कोशेऽप्यश्रुनखादीनां कृत्वा तु वपनं वने। ब्रह्मचर्य
वान्विप्रो वर्षेणैकेन शुध्यतीति तस्यैव स्मरणात्। शुष्कवादविषयमिदमिति भविष्ये। संबंधेन विनादेव शुष्कवादेन
कोपितः इत्यस्यानंतरमस्य पाठात्। संबंधो धनादेः। इदमेव व्रतजातं श्रोत्रियादावकामतो हंतरि द्विगुणादिकल्प्यं। यथा।

हांशिरः।पर्षद्या ब्राह्मणानांतुसाराज्ञां द्विगुणामता।वैश्यानांत्रिगुणाप्रोक्ता शूद्राणांतुचतुर्गुणा।पर्षदुक्तव्रतंज्ञेयं
शुद्धयेपापकर्मिणामिति।निर्गुणस्याकामतोगुणिविप्रवधेवाजिमेधः।यथाभविष्ये।यदातुगुणिनंविप्रंनिर्गुणोहं
तिपार्थिवः।तदासौवाजिमेधेनयजेदमतिपूर्वकमिति।अमतिपूर्वकंहंतीत्यत्रयः कामतोनिर्गुणस्यसगुणवधे
पिमनुविष्णू।हत्वातुक्षत्रियोविप्रंगुणाढ्यमिहकामतः।प्रायश्चित्तंचरेद्धीरविधिवत्कायशुद्धये।लघ्वंशस्त्वमतोवा
वास्याद्विगुणमिच्छयात्मनः।आसीदात्मानमग्नौवासमिद्धेत्रिरवाक्शिराः।यजेतवाश्वमेधेनक्षत्रियोविप्रघातकः
।प्रायश्चित्तत्रयंह्येतत्क्षत्रियस्यप्रकीर्तितमिति।कामतोगुणिनोनिर्गुणवधेपिवाजिमेधस्तत्रैव।निर्गुणंब्राह्मणंह
त्वाकामतोगुणवान्गुरुः।सयजेताश्वमेधेनक्षत्रियोयोमहीपतिरिति।विट्शूद्रयोस्तुकामतोनिर्गुणविप्रवधेपि
मरणमेवतत्रैवोक्तं।विट्शूद्राणांविशेषेणहन्तांकामतोद्विजान्।प्राणांतिकोभवेत्तुचब्राह्मणोनिर्गुणोहतइति।
अत्रनिर्गुणत्वस्यब्राह्मणविशेषणत्वात्तदतिरिक्तद्विजयोःसगुणत्वंगम्यते।यतःसगुणविप्रवधेनिष्कृत्यभाव
माहतत्रैव।सगुणेतुहतेकामान्निष्कृतिर्नविधीयतइति।निष्कृतिर्यथाकथंचिन्मरणेननः।किंतुगोमयाग्निना
पादप्रभृतिदाहेनेत्यर्थः।अन्यथामरणांतिकप्रायश्चित्ताभावपरत्वेप्रायश्चित्ताभावएवापद्येत।तच्चानिष्टं।निषेध

स्यप्रायश्चित्ताविनाशभावात्। न चाकामकृतप्रायश्चित्ते द्विगुणाभावपरं निष्कृत्यभाववचनं। बालस्यवत्सप्रायश्चित्तस्याशक्ता
यः पुरुषानुष्ठेयता संभवात्। तस्माद्यथोक्तमेव साधीयः तथाश्रमविशेषेणापि द्विगुणादिकल्प्यं। यथाहांगिराः गृ
हस्थोक्तानि पापानि कुर्वंत्याश्रमिणो यदि। शौचवच्छोधनं कुर्युरर्वाक् ब्रह्मनिदर्शनादिति। शौचवदित्येतच्छौचं गृ
हस्थानां द्विगुणं ब्रह्मचारिणां। त्रिगुणं तु वनस्थानां यतीनां तु चतुर्गुणमित्युक्तं। तत्र ब्रह्मचारिणो द्विगुणं षोडश
वर्षादूर्ध्वमवाक्त्वाई वक्ष्यति। अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः। प्रायश्चित्तार्द्धमर्हंति स्त्रियो रोगिण एव चे
ति। बालोप्युपनीतः अनुपनीतस्य पादः। पादो बालेषु दातव्यः सर्वपापेष्वयं विधिरिति स्मरणात्। स्त्रियो युवत्यः। व
लवद्वयोस्त्वपादः। अर्वाक् द्वादशाद्वर्षाद्दशौतेरूर्ध्वमेव वा। अर्धमेव भवेत्पुंसां तुरीयं तत्र योषितामिति तस्यैव स्म
रणात्। बालस्य प्रायश्चित्तं पित्रादिः कुर्यात्। ऊनैकादशवर्षस्य पंचवर्षात्परस्य च। प्रायश्चित्तं चरेद्भ्राता पिता वान्यः
सुहृज्जनः। अतो बालतरस्यास्य नापराधो न पातकं। राजदंडो न तस्यास्ति प्रायश्चित्तं न विद्यत इति शंखस्मरणात्।
अष्टमांश इति प्रचेताः। प्रायश्चित्ताभाव एवेति शास्त्राः। एवं ब्रह्महत्याप्रायश्चित्तमुक्त्वेदानीं तत्समेषु प्रायश्चित्तमा
ह॥ ॥यागस्थं क्षत्रियं वैश्यं च॥७॥ ॥यागोत्र सोमयागः सवनगतौ च राजन्यवैश्यावितिवासिष्ठात्। तस्मिन्दीक्षित

३०७

लीयाघुदवसानीयांते प्रयोगे स्थितं क्षत्रियं वैश्यं वा हत्वा पूर्वोक्तं द्वादशवार्षिकं व्रतं कुर्यात्। वाग्भट्टान्मूर्द्धावक्तो
वष्ठयोर्ग्रहणमित्युक्तं। तत्र ब्राह्मणान्न्यूनं क्षत्रियादधिकमष्टादशाब्दिकं कल्प्यं। सवनस्थविट्वधे चतुर्विंश
तिवार्षिकं श्रवणात्। इदं चाकामतः कामतो द्विगुणं। एवमन्येपि पूर्वोक्ता विषयास्तद्भूतानि च तथैव योज्यानि
। एवमग्रेपि। आपदेशिकत्वाद्व्रतस्य न न्यूनतेति। आपस्तंबोपि। पूर्वयोर्वर्णयोर्वेदाध्यायिनं हत्वा द्वादश
वर्षाणीत्युक्तवान्। एतच्चाकामतः कामतो वधे पि नमरणांतिकमनुपदेशात्किंतु द्विगुणं व्रतमेव। विहितं प
दकामानां कामान्तु द्विगुणं चरेदित्यंगिरःस्मरणात्। किंच॥ ॥गुर्विणीं रजस्वलां वा॥ ०॥ ॥गुर्विणी स्वपति
निहितगर्भवती स्त्री गौर्य्यरजस्वलोदक्या वा शब्दादृतुस्नाता जन्मप्रभृतिसंस्कृता सवनस्थाहिता सवनस्था
हिताग्निभार्या च गृह्यते। तामकामतो हत्वा पूर्वोक्तं द्वादशवार्षिकव्रतं कुर्यात्। तथा च प्रचेताः। स्त्री गर्भिणी
बालवधे च ब्रह्महा भवतीति। वासिष्ठोपि रजस्वलामृतुस्नातामात्रेयीमाहुरत्र ह्येष्यदपत्यं भवतीति। त्रिदिनं रजस्वे जे
ला स्नानानंतरं च षोडशदिनान्यृतुस्नाता। यमोपि जन्मप्रभृतिसंस्कारैः संस्कृता मंत्रवत्तया गर्भिणी त्वथवापि
स्यात्तामात्रेयीं विनिर्दिशेदिति। पराशरोपि। सवनस्थां स्त्रियं हत्वा ब्रह्महत्याव्रतं चरेदिति। अंगिराः। आहिताग्नेर्द्विजा

ग्रस्यहत्वापत्नीमनिंदितां।ब्रह्महत्याव्रतंकुर्यादात्रेयीघ्नस्तथैवचेति।अत्रगर्भिणीग्रहणंगर्भवधेप्येतदेवव्रतमितिबोधयि
तुंसच्चस्वपतिनिहितोनुपजातस्त्रीपुंनपुंसकव्यंजनस्त्रीहत्वागर्भमविज्ञातमितिमानवात्।नचब्रह्मवधनिषेधेनैवास्य
पिकौडीकारात्पृथगारंभोनर्थकइतिवाच्यंपुंस्त्वसंदेहेपितुवधप्रायश्चित्तंप्राप्त्यर्थत्वेनसार्थकात्।यथाहापस्तंबः।अ
विज्ञाताहिगर्भाःपुमांसोभवंतीति।तत्रचोभयत्रयथावर्णंतथात्रेयीनिष्कृदकइतियोगिस्मरणात्।ततश्चयद्वर्णपुरुषव
धेयत्प्रायश्चित्तंतदेवतद्वर्णगर्भगर्भिणीवधेकार्यं।जारगर्भेतुविशेषस्तुविंशतिमते।गर्भपातेविनिर्दिष्टंयथाव
र्णविधिव्रतं।जारगर्भेविशेषःस्याद्यथोक्तमृषिभिःपुरा।ब्रह्मगर्भवधेकृच्छ्रेमहत्सांतपनाधिकं।क्षत्रगर्भवधेचैवचरे
च्चांद्रायणद्वयं।वैश्यस्यचैंदवंप्रोक्तंगर्भपातेविशोधनइति।प्रतिलोमगर्भवधेतुचांद्रायणं।चांद्रायणंचरेत्सर्वा
नवकृष्टान्निहत्यात्तिमितियोगिस्मरणात्।किंच॥ ॥अत्रिगोत्रांवानारीं॥८॥ ॥अत्रिगोत्रोत्पन्नात्रिगोत्रोढा
वत्रैवर्णिकस्त्री।रजस्वलात्वेनात्रेयीत्वंतुशूद्रादिस्त्रीसाधारणंवाशब्दादितिसंनिकृष्टानांसपत्नमातृ
दुहितृभगिनीस्नुषामातृपत्नीनांसवर्णानांग्रहणं।जननीवधेचतुर्विंशतिवार्षिकस्याकामतश्चप्रावज्ञा
वश्रुतस्याविधानात्।अन्यत्रतुसोदर्यंभ्रातरंतथैतिभविष्यवाक्योक्त्यासत्त्वमितिशयद्योतकंसोदर्यपद

मेवमूलं उपपादितं चैतत्त्यागे वदानेफलविशेषेण हिंसायामपि दोषाधिक्यसिद्धेरित्यादिना। तासामकामतो
वधे सर्ववर्णेषु द्वादशवार्षिकं। याः पुनर्विशिष्टाः सपत्नभगिनीपितृष्वसृमातृष्वसृमातुलानीपितृव्यपत्नीभ्र
ातृभार्यापितामहीमातामह्यस्तासां वधे नववार्षिकं गमनेन महापातकतुल्यत्वाभिधानात्। मातृष्वसा स्वसा चै
यतश्चैव च पितृष्वसा। मातामही भागिनेयी भागिनेयसुतैव च॥ दौहित्री विट्पतिश्चैव तेषु दत्तं तथाक्षयमिति वि
सुधर्मोत्तरे दानेफलविशेषेण हिंसायामपि दोषाधिक्यसिद्धेः। विट्पतिर्जामाता। एवमन्यत्राप्यूह्यं। किंच॥ ॥
मित्रं वा॥१०॥ ॥मित्रं सुहृत् जातिविशेषानादरेण। वाशब्दाद्बालग्रहणं। बालवधे चब्राह्मणहा भवतीति प्रचेतःस्म
रणात्। सुरापानसमस्यापि सुहृद्वधस्यात्राभिधानं ब्रह्मवधप्रायश्चित्ताभिधानाय ततश्च सुरापानप्रायश्चित्तेना
स्य विकल्पः। तमकामतो हत्वा द्वादशाब्दं व्रतं कार्यं मौपदेशिकत्वात्। यानि पुनः पूर्वोद्दिष्टान्यप्यविद्वातगर्भव
धादीन्यत्र नाक्रन्दितानि तेषामप्येतदेव प्रायश्चित्तं। तत्सहपठितेषु यागस्थक्षत्रादिवधेषु द्वादशवार्षिकाभिधा
नात्। अनुपातकिनस्त्वेत इत्यनेनकामतो वधे तुल्यप्रायश्चित्तं। तत्सहपठितेषु यागस्थाभिधानाच्चात एवोक्त
मेव प्राक्। शरणागतबालयोरब्राह्मणयोरपि वधे द्वादशाब्दं। अत्र कृतप्रायश्चित्तस्याप्यसंग्राह्यत्वमिति वि

शेषः। शरणागतबालस्त्रीहिंसकान्न संविशेत्। चीर्णव्रतानपि सतः कृतघ्नसहितानिमानिति योगिस्मरणात्।
वध्यातिचरितिच स्वयमपि तालव्यं ग्रामं ग्रामं कृतघ्नं इत्यादिना। यानि चोत्कर्षेऽनृतवचनादीनि मन्वाद्युक्तानि ते-
षामपि विषयविशेषे ब्रह्महत्यासाम्ये नेदमेव प्रायश्चित्तं पादोनं वोध्यं। मूलेनैषामुपपातकेषु परिगणनेन द्वाद-
शाब्दोपदेशाभावात्। एवं ब्रह्महत्यासमेषु प्रायश्चित्तमुक्त्वा निमित्तांतरे तदाह॥ ॥नृपतिवधे महाव्रतमेव द्वि-
गुणं कुर्यात्॥११॥ ॥नृपतिरत्राभिषिक्तः क्षत्रियो न नृपतिमात्रं तस्यायुध्यमानस्यात्यंतगुणवतो वधे द्वा-
दशवार्षिकमेव द्विगुणं कुर्यात्। यज्ञसंस्थोऽतितरो राजानं वाप्यनागसं। हत्वा चरेद्व्रतं सम्यक् चतुर्विंशतिवत्स-
रानिति स्मरणात्। इदं चाकामतः। बालवाक्ये राजसह पठितस्य सवनस्थस्य कामतः प्रायश्चित्तद्वयं कुर्यादिति
भविष्ये ब्रकामाभिधानात्। कामतो द्विगुणं विहितं यदकामानामिति वचनात्। राजन्यवधे षड्वार्षिकं प्राकृतं
ब्रह्मचर्यं ऋषभैकसहस्राश्च गा दद्यादिति गौतमोक्तं वा द्रष्टव्यं। वधव्रतप्रसंगाद्धोपपातकेष्वपि केषुचित्त-
दाह॥ ॥पादोनं क्षत्रियवधे॥१२॥ ॥यागस्थनृपतिव्यतिरिक्तसद्गुणश्रोत्रियक्षत्रियवधे पादोनं द्वादशा-
ब्दं नववार्षिकं व्रतं कुर्यात्॥ ॥अर्द्धं वैश्यवधे॥१३॥ ॥अदीक्षितसद्गुणवैश्यवधेऽर्द्धं षडब्दं व्रतं कार्यं॥ ॥त

दर्द्वंश्रूद्रवधे॥१४॥ ॥सद्गुणाच्छूद्रवधे तदर्द्धमर्द्धार्द्धं चतुर्थांशं त्र्यब्दं व्रतं कार्यं। इदं चाकामतः कामतो द्विगुणं सर्व
त्रा। यानि पुनश्च नरकामतस्तत्र राजन्यं विनिपात्य द्विजोत्तमः। ऋषभैकसहस्रा गा दद्यात्सुअर्थमात्मन इत्यादीनि म
न्वाद्युक्तानि तान्यग्निहोत्रिश्रोत्रियाभिषिक्तक्षत्रादिविषयाणि योज्यानि। निर्दोषद्विगुणवत्क्षत्रवधे वसिष्ठः। ब्रा
ह्मणो राजन्यं हत्वाष्टौ वर्षाणि व्रतं चरेदिति। यत्तु षड्वर्षाणि राजन्ये प्राकृतं ब्रह्मचर्यं त्रीणि वैश्ये सार्द्धं शूद्र इति हा
रीतोक्तं तत्स्वधर्मनिष्ठक्षत्रादिविषयं। ईषद्वृत्तहीनक्षत्रियादिविषये तु मनुः। तुरीयो ब्रह्महत्यायाः क्षत्रि
यस्य वधे स्मृतः। वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडशः इति। एवमेतान्यपि न्यपिव्रतानि व्यवस्थाप्यानि।
एवं च यादृशक्षत्रियादिवधे यत्प्रायश्चित्तमुक्तं तत्तादृशमूर्द्धावसिक्ताद्यनुलोमजवधे ब्राह्मणाद्यपेक्षया न्यू
नं क्षत्रियाद्यपेक्षया चाधिकं कल्प्यं। प्रतिलोमवधे ब्रह्मगर्भः। प्रतिलोमप्रसूतानां स्त्रीणां मासावधेः स्मृताः। अंत
रथमयाणां च प्रसूतादीनां चतुर्द्विषडिति। सूतवैदेहचंडालानां वधे क्रमेण षट्चतुर्द्विमासाः। मागधक्षत्तोग्र
तु द्विमासाः। आयोगववधे द्वौ मासौ। अत्रापि क्षत्रियादिषु हंतृषु पादपादहानिर्ज्ञेया। यथाह लौगाक्षिः। सर्वं
त्रिपादमर्द्धं च पादं चैव व्रतं चरेत्। वर्णक्रमादंतरजहत्यागमनभोजन इति। अन्त्यावपि अंतरजहत्यागमनभोजने

४

प्र

वि॰ टी॰ ५०
३२४

श्वपाकादिहानिः स्यात्तेतत्रापि सर्वत्रोपपातकादिविषयं द्रष्टव्यं। विप्रेतु सकलं देयं पादोनं क्षत्रिये स्मृतं। वैश्ये
ऽर्धं पादं शेषस्तु शूद्रजातिषु शस्यत इति स्मरणात्॥ ब्राह्मणेरापुत्यन्नानेस्मृतवेदेह चंडालानां वधे पादकृच्छ्रान्ये
कामतश्चेदमकामतः पूर्वोक्तं चांद्रायणं पराको वा। यथाहांगिराः। सर्वांत्यजानां गमने भोजने संप्रमापणे। पराके
ण विशुद्धिः स्यादित्यांगिरसभाषितमिति। अत्रापि पूर्ववद्देवकल्पना। चोरश्वपाकादिवधे पराशरः। चौरः श्व
पाकचंडालो विप्रेणाभिहतो यदि। अहोरात्रोषितः स्नात्वा घृतं प्राश्य विशुध्यतीति। स्त्रीवधप्रायश्चित्त
माह हारीतः। षड्वर्षाणि ब्राह्मण्यां तु पंचकं स्यात्त्रिवर्षाणि वैश्यवत् क्षत्रियायां शूद्रवैश्यायां शूद्रां
हत्वा नव मासानिति। एतच्चाकामतः श्रोत्रियसगुणापालीवद्विषयं। तदेवाकामतो द्वैधं। यथाह व्यासः
अकामतः स्त्रियं हत्वा ब्राह्मणीं वैश्यवद्व्रतं चरेदिति वैश्यवत्त्र्यब्दमित्यर्थः। अनयैव दिशा क्षत्रियायां सार्ध
वर्षं वैश्यायां नव मासाः शूद्रायां सार्धमासत्रयं सार्द्धमासं वा शूद्रां हत्वा सार्द्धमासं सार्द्धद्वा विंशत्यहा
निरर्हति। जातिमात्रब्राह्मण्यादिवधे चैवेताः। अन्ये तु मतं ब्राह्मणीं हत्वा कृच्छ्राब्दं षण्मासान् क्षत्रियां हत्वा व
ट्मासान्मासत्रयं वा वैश्यां हत्वा मासत्रयं सार्द्धमासं वा शूद्रां हत्वा सार्द्धद्वा विंशत्यहानि वेति। कामाकाम

राम
३२४

ण्यांपद्वद्वयं ज्ञेयांऽब्दमभिचरितब्राह्मण्यादिवधे याज्ञवल्क्यः। अप्रदुष्टां स्त्रियं हत्वा शूद्रहत्याव्रतं चरेदिति
। षाण्मासिकमित्यर्थः। इदं चाकामतः कामतः प्रतिलोमप्रसूतब्राह्मण्यादिवधे ब्रह्मगर्भः प्रतिलोमप्रसूतानां
स्त्रीणां मासावधे स्मृताः। अन्तरप्रभवाणां च सूतादीनां चतुर्विधषाडिति। ब्राह्मणीवधे षण्मासाः त्रैत्रियावधे द्वाविति।
अस्यं तव्यभिचरितस्त्रीवधे याज्ञवल्क्यः। दुष्टं तब्रह्मविट्क्षत्रशूद्रयोषाः प्रमाप्य तु। दृतिं धनुर्बस्तमविं क्रमाद्द्या
द्विशुद्धयइति। दृतिश्चर्मकोशः। वेश्यावधे गौतमः। वैशिके न किंचिदिति। वेश्यकं वेश्याकर्म तेन जीवंतीं हत्वा किं
चिदनुष्ठमनुष्ठिधान्यं दद्यात्॥१५॥ ॥पूर्वं जलमित्यन्ये। अज्ञायामविकं वेश्यां हत्वा दद्याज्जलं नर इति गिरःस्म
रणात्। उक्तव्रतशेषमाह॥ ॥सर्वेषु शवशिरोध्वजी स्यादित्यादि स्मरणात्। गोवधे॥१५॥ ॥सर्वेष्वपि ब्रह्महत्या
दिव्रतेषु शवशिरोयुक्तध्वजधारी स्यात्। ध्वजः ककपालादि सर्वधर्मोपलक्षणं। शिरःकपाली ध्वजवानित्यादि
स्मरणात्। गोवधप्रायश्चित्तमाह॥ ॥मासमेकं कृतवापनो गवानुगमनं कुर्यात्॥१६॥ ॥कृतं वापनं केशश्म
श्रूणां येनासौ तथा स एकं मासं वक्ष्यमाणप्रकारेण गवामनुगमनं सेवां कुर्यात्। सामान्यतः प्राप्तस्य वपनस्य पु
नर्वचनं सशिखत्वार्थं। सशिखं वपनं कृत्वा त्रिसंध्यमवगाहनमिति पराशरस्मरणात्। अनुगमनप्रकारमा

ह॥ ॥आसीनास्वासीत॥१७॥ ॥गोष्वासीनास्वेव स्वयमासीत न स्थितासु तेन यावद्वासनं स्थानमेव नासनं। बहुवचनात्सर्वास्वनुगम्यमानास्वासीनासु नैकस्यामपि स्थितायामासीनायामिति गम्यते। किंच॥ ॥स्थितासु स्थितस्त्व स्यात्॥१८॥ ॥गोषु स्थितासु स्वयमपि तिष्ठेदेव नोपविशेत्। बहुवचनादेकस्यामपि स्थितायां नोपविशेत्। चकारात् पिबंतीषु पिबेत्तोयं संविशंतीषु संविशेदिति पराशर्य आह। किंच॥ ॥सन्नां चोद्धरेत्॥१९॥ ॥अनुगम्यमानासु गोषु यासन्नापतिता पंकलग्ना वा तामुद्धरेत्। पतितां पंकलग्नां वा सर्वप्राणैः समुद्धरेदिति पराशर्यात्। सन्नोद्धरणविधानाद्यथा न सीदेत्तथा रक्षेदिति गम्यते। नातिविक्रमेण चतारयेन्नाल्पोदके पाययेदिति काश्यपीयात्। चकारादात्मनो यदि वान्येषां गृहे क्षेत्रे खले वा भक्षयंतीं न कथयेत् पिबंतीं चैव वत्सकमिति पराशर्य आह। किंच॥ ॥भयेभ्यश्च रक्षेत्॥२०॥ ॥सिंहव्याघ्रादिजनितेभ्यो भयेभ्यो रक्षेत्। चकारादुद्धरणाशक्तौ स्वप्राणांस्त्यजेत्। गवार्थे ब्राह्मणार्थे वा सद्यः प्राणान् परित्यजेदिति पराशर्यात्। किंच॥ ॥नासां शीतादित्राणमकृत्वात्मनः कुर्यात्॥२१॥ ॥नासां गवां शीतोष्णवातादिभ्यस्त्राणमकृत्वात्मत्राणं न कुर्यात्। यथा पराशरः। उष्णे वर्षति शीते वा मारुते वाति वा भृशं। न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तित इति॥ किंच॥ ॥गोष्व

त्रेण स्नायात् ॥२२॥ ॥त्रिकालं गोमूत्रेण स्नानं त्रिषवणं तस्येति संवर्त्तस्मरणात्। किंच॥ ॥गोरसैश्च वर्त्तेत ॥२३॥
॥ ॥गोमूत्रादिभिः पंचभिर्गव्यैर्वर्त्तेत जीवेत्। चकाराद्गोमतीं च जपेत्। यथा शातातपः। पंचगव्येन गोघाती मा
सेनैकेन शुध्यति। गोमतीं च जपेद्विद्वान्गवां गोष्ठे च संवसेदिति। गोमती च विद्या। गावः सुरभयो नित्यं गावो गु
ग्गुलगंधिकाः। गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महदित्यादिका यमोक्तान्यत्र द्रष्टव्या। उक्तव्रतस्य विनि
योगमाह॥ ॥एतद्व्रतं गोवधे कुर्यात्॥२४॥ ॥एतदुक्तं गोव्रतसमाख्यं व्रतं गोवधे कुर्यात्। एतच्चाकामतः
क्षत्रियस्वामिकगोवधे। अत्रैव पंचगव्यपानाशक्तौ काश्यपीयं मासं पंचगव्येनेति प्रतिपाद्याथैककालपयोभ
क्तो वा गच्छंतीष्वनुगच्छेत् तासु स्थितासूपविष्टासु चोपविष्टो न्नाति विषमेणावतारयेत् नाल्पोदकं पाययेदंते ब्राह्म
णान्भोजयित्वा तिलधेनुं दद्यादिति द्रष्टव्यं। अकामतो ब्राह्मणस्वामिकगोवधे तु याज्ञवल्क्यः। दद्यात्त्रिरा
त्रं चोपोष्य वृषभैकादशाश्च गा इति। अकामतो वैश्यस्वामिकगोवधे प्रचेताः। गोघ्नः पंचगव्याहारः पंच
विंशतिरात्रमुपविशेत् सशिखं वपनं कृत्वा गोचर्मणा प्रावृतो गाश्चानुगच्छन् गोष्ठे शयो गां च दद्यादिति। अ
कामतः शूद्रीस्याद्गोप्रदानेन शुध्यतीति। अत्र वृषभैकादशगोदानस्यैकादशप्राजापत्यप्रत्याम्नायत्वात्मा

संपंचगव्याशने षडुपवासात्मकप्राजापत्यप्रत्याम्नायकल्पनया पंचधेनवो व्रतांते धेन्वेकेति षड्धेनवः। पंचविंशतिरात्रं पंचगव्याशने चतस्रः व्रतांते धेन्वेकेति पंचधेनवः। मासं प्राजापत्ये सार्धधेनुद्वयं व्रतांते धेन्वेकेति षड्धेनसार्धधेनुत्रयमित्यकामतः प्रायश्चित्तं। कामतस्तु तत्तद्द्विगुणं। गोगुणब्राह्मणादिगुणविशेषेण प्रायश्चित्ते गौरवं तद्दोषविशेषेण प्रायश्चित्तलाघवं चोन्नेयं। यथाह बृहस्पतिः। गार्भिणीं कपिलां दोग्ध्रीं होमधेनुं च सुव्रतां। खड्गादिना घातयित्वा द्विगुणं गोव्रतं चरेदिति। अतिबालामतिकृशामतिवृद्धां च रोगिणीं। हत्वा पूर्वविधानेन चरेदर्धं व्रतं द्विज इति। क्वचिद्धापवादमाह संवर्तः। दाहच्छेदशिराभेदप्रयोगैरुपकुर्वतां। द्विजानां गोहितार्थं च प्रायश्चित्तं न विद्यत इति। अस्मिन्नेव विषये हननसाधनविशेषेण प्रायश्चित्तविशेषोपि समुच्चीयते। यथाह यमः। काष्ठलोष्टाश्मभिर्गावः शस्त्रैर्वा निहता यदि। प्रायश्चित्तं कथं तत्र शास्त्रे शास्त्रे विधीयते। काष्ठे सांतपनं कुर्यात्प्राजापत्यं तु लोष्टके। तप्तकृच्छ्रं तु पाषाणे शस्त्रे वाप्यतिकृच्छ्रकमिति। तथा भिन्नविशेषेण व्रतविशेषमाहापस्तंबः। पादमेकं चरेद्रोधे द्वौ पादौ बंधने चरेत्। योजने पादहीनं स्याच्चरेत्सर्वं निपातने इति। वधोविशेषेण प्राह बृहत्प्रचेताः। एकवर्षे हते वत्से कृच्छ्

नि॰२

पादो विधितैयेऽत्रवृद्धिपूर्वं पुंसः स्याद्द्विपादस्तद्द्विहायने। त्रिहायने त्रिपादः स्यात्प्राजापत्यमतः परमिति। गोगर्भव
धे पराशरः। पिंडस्थे पादमेकं तु द्वौ पादौ गर्भसम्मिते। पादोनं व्रतमुद्दिष्टं हत्वा गर्भमचेतनं। निष्पन्नसर्वगात्रस्त्व
दृश्यते वा सचेतनः। अंगप्रत्यंगसंपूर्णे द्विगुणं गोव्रतं चरेदिति। गर्भिणीवधे तु गर्भिणीं कपिलां दोग्ध्रीं होमधेनु
मित्यादिवार्हस्पत्यं। तत्रैव बार्हस्पत्ये सर्वविशेषणविशिष्टगोगर्भिणीवधे प्राचेतसं प्रोक्तं ब्रह्महत्याव्रतं गोग
र्भिणीस्त्रीगर्भिणीवधे च भ्रूणहा भवतीति। एकस्या बहुभिर्हनने प्रायश्चित्तमाहापस्तंबः। एका चेद्बहुभिः कापि
दैवाद्व्यापादिता क्वचित्। पादं पादं तु हत्यायाश्चरेयुस्ते पृथक्पृथगिति। एकप्रयत्नेनानेकगोवधे त्वाह
संवर्तः। व्यापन्नानां बहूनां तु रोधने बंधनेऽपि वा। भिषङ्मिथ्योपचारे च द्विगुणं गोव्रतं चरेदिति। भिषग्व्यतिरिक्त
स्त्वाह व्यासः। औषधं लवणं चैव पुण्यार्थमपि भोजनं। अतिरिक्तं न दातव्यं काले स्वल्पं तु दापयेत्। अतिरिक्ते विप
त्तिश्चेत्कृच्छ्रपादो विधीयतां इति। हननव्यापाराभावे स्वामित्वेनैव प्रायश्चित्तमाह व्यासः। जलौघपल्वले
मग्ना मेघविद्युद्धतापि वा। श्वभ्रे वापतिता कस्माच्छ्वापदेनापि भक्षिता। प्राजापत्यं चरेत्कृच्छ्रं गोस्वामी व्रतमुत्त
ममिति। आपस्तंबः। अतिदाहातिवाहाभ्यां नासिकाछेदनं तथा। नदीपर्वतसंरोधे मृते पादोनमाचरेदित्याघन्या।

तोवगंतव्यांएवंवधोपपातकप्रायश्चित्तमुक्तातत्प्रसंगात्संकरीकरणादिवधेष्वपिप्रायश्चित्तमाह॥ ॥गजंह
त्वापंचनिलवृषभान्दद्यात्॥२५॥ ॥गजमुत्कृष्टं कामतोहत्वापंचनीलवृषभान्दद्यात्।नीललक्षणमुक्तं
यत्पाद्वेलोहितोयस्तुवर्णेनमुखेपुच्छेचपांडुरः।श्वेतःखुरविषाणाभ्यांसनीलोवृषउच्यतइति।अकामतस्त
प्ततातपः।दंत्यश्ववधेमासंपयोव्रतमिति।जातिमात्रगजवधेपूर्वोक्तोमासयावककृच्छ्रोतिकृच्छ्रोवाका
मकामाभ्यांज्ञेयो॥ ॥तुरंगेवासः॥२६॥ ॥तुरगमपकृष्टमश्वंहत्वावासःपरिधानयोग्यंदद्यात्।इदम
कामतः।कामतोजाबालिः।हस्तिनंतुरगंहत्वामहासांतपनंचरेदिति।महासांतपनंसप्ताहिकं।उत्कृष्टहय
हननेकामाकामाभ्यांपूर्वोक्तौमासयावककृच्छ्रातिकृच्छ्रौज्ञेयौ॥ ॥पंचाहापनमनड्वाहं खरवधे॥२७॥ ॥
खरवधेष्टवर्षमेकर्षंदद्यात्।इदंकामतः।अकामतस्तुविष्णुः।हयकागाविकोष्ट्रखुगर्दभेषुवसारणात्।प्राजा
पत्याईमेवेहप्रायश्चित्तंविधीयतइति।उत्कृष्टखरवधेकामाकामाभ्यांपूर्वोक्तौयावककृच्छ्रातिकृच्छ्रौ॥
॥मेषाजवधेच॥२८॥ ॥मेषउरभ्रः।अजःछागः।तद्वधेप्येकवर्षोवृषोदेयः।अत्रापिकामाकामादिव्यव
स्थापूर्ववत्॥ ॥सुवर्णकृष्णलमुष्ट्रवधे॥२९॥ ॥कामतउष्ट्रंहत्वाकृष्णलपरिमितंसुवर्णंदद्यात्।अकामतो
ऽश्ववत्प्रायश्चित्तं।उत्कृष्टोष्ट्रवधेतुपूर्वोक्तामासयावककृच्छ्रातिकृच्छ्रौज्ञेयौ।श्वानंहत्वात्रिरात्रमुपवसेत्॥३०॥ ॥श्ववधेत्रिरात्रोपवा

राम
३३७

सः। उपवासाशक्तौ त्र्यहं क्षीरपानं। श्वपतत्रिणः। हत्वा त्र्यहं पिबेत्क्षीरमिति योगिस्मरणात्। त्रिरात्रोपवासस्यार्द्धकृच्छ्रत्वात् कामविषयमिदं। अकाम
तो विष्णुः। मार्जारसर्पनकुलश्वशृगालमृगेष्वपि। अप्रमादाद्धनने कार्यः कृच्छ्रपादो विशुद्धय इति। उत्कृष्टहनने पूर्वोक्तौ वा
यावककृच्छ्रातिकृच्छ्रौ कामाकामाभ्यां ज्ञेयौ॥ ॥हत्वा मूषकमार्जारनकुलमंडूकडुंडुभाजगराणामन्यतममु
पोषितः कृसरान्नं तिलमुद्गमिश्रमोदनं ब्राह्मणं भोजयित्वा लोहमुक्तो दंडो लोहदंडः खनित्रं तं दक्षिणां दद्यात्। अकृ
भोजयित्वा लोहदंडं दक्षिणां दद्यात्॥३१॥ ॥डुंडुभो राजिलः। शेषाः प्रसिद्धाः। एषामन्यतमं हत्वा पूर्वेद्युरुपोष्य परे
द्युः कृसरान्नं तिलमुद्गमिश्रमोदनं ब्राह्मणं भोजयित्वा लोहमुक्तो दंडः खनित्रं तं दक्षिणां दद्यात्। अकामत
श्चेदं कामतो वसिष्ठः। मार्जारमंडूकनकुलसर्पदहरमूषकं हत्वा कृच्छ्रं द्वादशरात्रं चरेत् किंचिद्दद्यादिति। दह
रः छुछुंदरिः। उत्कृष्टवधे श्वा नो कामाकामाभ्यां यावककृच्छ्रातिकृच्छ्रौ ज्ञेयौ॥ ॥गोधोलूककाकझषव
धे त्रिरात्रमुपवसेत्॥३२॥ ॥गोधारण्यपल्ली उलूको मेचकः काकः प्रसिद्धः। झषो मत्स्यः। एषां प्रत्येकं वधे त्रि
रात्रोपवासाशक्तौ पयःपानं पादकृच्छ्रं वा। मार्जारगोधानकुलमंडूकश्वपतत्रिणः। हत्वा त्र्यहं पिबेत्क्षीरं कृ
च्छ्रं वा पादिकं चरेदिति योगिस्मरणात्। इदं च कामतः त्रिरात्रोपवासस्यार्द्धकृच्छ्रप्रत्याम्नायत्वात्। अकामतः पाद
कृच्छ्रो विज्ञेयः। मलिनीकरणवधे प्रायश्चित्तमाह॥ ॥हंसबकबलाकामद्गुवानरश्येनभासचक्रवाकान्॥

वि॰टी॰ प॰
३३८

मन्यतमं हत्वा ब्राह्मणाय गां दद्यात् ॥३३॥ ॥हंसादयः प्रसिद्धाः पक्षिषु वानरोपन्यासः खगत्वसामान्यात् । एतेषां
प्रत्येकं वधे गां दद्यात् । कामतश्चेदं । अकामतः शंखलिखितौ । क्रौंचशुकभासमयूरश्येनगृध्रसिंहवकवला-
कादिवधे वत्सतरीं दद्यात् । यत्तु मत्स्याह हंसं वलाकां वकवाविलुरटवर्हिणः । वानरं श्येनभासौ च हत्वा द्वारं प-
येत्प्रह मिति संवर्तस्मरणं तद्बालादिविषयं योज्यं । यो पुनः पूर्वोक्तौ तप्तकृच्छ्रकृच्छ्रातिकृच्छ्रौ तौ कामाभ्यामनेक-
वधे द्रष्टव्यौ । उपक्रमे पक्षिणामिति वक्तुवचनश्रवणात् । पुनः संकरीकरणवधे प्रायश्चित्तमाह ॥ ॥सर्पं हत्वा-
भ्रीं कार्ष्णायसीं ॥३४॥ ॥कार्ष्णायसीं लोहमयीमभ्रीं खनित्रीं सर्पवधे दद्यात् ॥ ॥षंढं हत्वा पलालभारकं
॥३५॥ ॥षंढो नपुंसकः । षंढको लिंगहीनः स्यात्संस्कारार्हश्च नैव स इति देवलस्मरणात् । अत्र जातिविशे-
षानुपादानेपि समभिव्याहारात् पशुपक्ष्यादिजातिरेव ज्ञेया । न गोब्राह्मणयोस्तयोर्लिंगाविशेषानादरेण जा-
तिमात्रवधनिषेधात् । षंढं तु ब्राह्मणं हत्वा शूद्रहत्याव्रतं चरेदिति षट्त्रिंशन्मते प्रायश्चित्तांतरविधानाच्च । तस्मा-
द्ब्राह्मणव्यतिरिक्तषंढवधे पलालस्य व्रीहितृणस्य भारं पुरुषवाह्यं दद्यात् । तदलाभे त्रपुसीसक-
माषं दद्यात् । षंढके त्रपुसीसकमिति योगिस्मरणात् । इदं चाकामतः । कामतस्तु हारीतः । त्रिरात्रोपोषि-

राम
३३८

नः षंढवधे पलालभारकं सीसकमाषकं च दद्यादिति ॥ ॥ वराहं त्वोहे घृतकुंभं ॥३६॥ ग्राम्यमारण्यं वा सूकरं हत्वा घृत
पूर्णं कुंभं दद्यात् । कामतश्चेदमकामतः काश्यपः । मृगा महिषवराहकुंजरांगुक्करभच्छवानरसिंहव्याघ्रवृ
षतचमररुरुकादीनामन्येषां चतुर्षु अहोरात्रोषितः श्रीपर्णेन घृतं दद्यादिति ॥ ॥ तित्तिरिं तिलद्रोणं ॥३७॥ ॥ तित्ति
रिवधे प्रायश्चित्तमहोरात्रोषितः सर्वबीजानि दद्यादिति ॥ ॥ शुकं द्विहायनं वत्सं ॥३८॥ ॥ शुकवधे द्विवर्षो
वत्सो देयः । कामतश्चेदमकामतः शंखलिखितौ क्रौञ्चवत्सतरी देया ॥ ॥ क्रौंचं त्रिहायनं ॥३९॥ ॥ कामतः क्रौंच
वधे त्रिवर्षो वत्सो देयः । कामतोश्वै त्रापि वत्सतरी ॥ ॥ क्रव्यादमृगवधे पयस्विनीं गां दद्यात् ॥४०॥ ॥ क्रव्यमाम
मांसं तद्दन्तीति क्रव्यादाः ते च ते मृगाश्च व्याघ्रादयस्तेषां वधे पयस्विनी गौर्देया । अत्र पयस्विनीति विशे
षणात् । हंसादिवधे गोमात्रं गमयति । इदमकामतः कामतः सुमंतुः व्याघ्रसिंहश्वगालांश्च मृगखड्गरुरु
द्वीपान् हत्वा सांतपनं कुर्यात् ज्ञानकृते क्रव्यादेष्वेतेषु चेति । सांतपनमत्र समाहरध्यां तस्य प्राजापत्यस्य द्वयस्थानीय
त्वात् । चरेत्सांतपनं कृच्छ्रं प्राजापत्यमनिच्छयेति लिंगात् ॥ ॥ अक्रव्यादमृगवधे वत्सतरीं ॥४१॥ ॥ अक्रव्या
दा मृगा हरिणगवयादयस्तेषां वधे वत्सतरी देया । इदं चाकामतः कामतो गौर्देया ॥ ॥ अनुक्तमृगवधे त्रिरात्रं

310

मयसा वर्तेत ॥४२॥ ॥ एषां मृगाणां वधे प्रायश्चित्तं नोक्तं तत्र त्रिरात्रं पयःपानं कार्यं । कामतश्चेदकामतः संवर्तः
। सर्वेषामेव जातीनां मृगाणां वनचारिणां । अहोरात्रोषितस्तिष्ठेज्जपन्वै जातवेदसमिति ॥ ॥ पक्षिवधेन क्षी
रीस्यात् ॥४३॥ ॥ एषां च पक्षिणां वधे प्रायश्चित्तं नोक्तं तत्र नक्ताशी स्यात् । तत्राशक्तावाह ॥ ॥ रूप्यमाषकं
वा दद्यात् ॥४४॥ ॥ उक्तपक्षिवधे रूप्यमाषं रजतं वा दद्यात् । अकामतश्चेदं कामतो योगीश्वरः पतत्रिणः हत्वा
त्वहं दिवे त्रिरं नक्तं वा पादिकं चरेदिति । पुनर्मलापहेष्वाह ॥ ॥ हत्वा जलचरमुपवसेत् ॥४५॥ ॥ जलचरो मत्स्या
दयस्तान्हत्वाहोरात्रमुपोष्य लवणं दद्यात् । यथाकश्यपः । मंडूकमत्स्यशिशुमारादीनां वधे एकरात्रमुपो
ष्य चीर्णे तैलवणं दद्यादिति । अकामतः सकृद्वधे चैतत् मेनेकवधे कामाकामाभ्यां तप्तकृच्छ्रकृच्छ्रातिकृच्छ्रा
वदितव्यो ॥ ॥ अस्थन्वतां तु सत्वानां सहस्रस्य प्रमापणे । पूर्णे चानस्यनस्थ्नां तु शूद्रहत्याव्रतं चरेत् ॥४६॥ ॥ अ
स्थन्वतां सास्थ्नां सत्वानां कृकलासादीनां सहस्रस्य प्रमापणे अस्थिशून्यानां शकटमितानां च वधे प्रत्येकं
शूद्रहत्याव्रतं कार्यं कामतश्चेदकामतोर्द्धं । अत्र च सहस्रस्य प्रमापणकर्मता अवगा देकप्रयत्नेन सहस्र
प्रमापणं शूद्रहत्याप्रायश्चित्तनिमित्तं गम्यते । न तु प्रमापणं सहस्रमतश्च सहस्रार्वाचीनसंख्याकसास्थन्वध

धेप्रायश्चित्तांतरमेवात देवाह॥ ॥किंचिद्देयं तु द्विजाय दद्यादस्थिमतां वधे। अनस्थ्नां चैव हिंसायां प्राणायामेन शुध्य
ति॥४७॥ ॥सहस्रेण संख्याकास्थिमद्वधे विप्राय किंचिद्दृष्टमुष्टिधान्यं देयं तादृशानामेवानस्थ्नां वधे एकः
प्राणायामः कार्यः। एकैकवधेप्येतदेयं वा। अपि वास्थिमतामेकैकस्मिन् किंचिद्दद्यादिति गौतमीयात्।
अकामतश्चेदं। कामतो द्विगुणं। अनस्थिमतां वधे प्राणोदेव। अपि वास्थिमता इति सुमंतुस्मरणात्। पुनरुप
पातके द्रुमादिछेदे प्रायश्चित्तमाह॥ ॥फलदानां तु वृक्षाणां छेदने जप्यमृक्शतं। गुल्मवल्लीलतानां च
पुष्पितानां च वीरुधां॥४८॥ ॥फलदा वृक्षाः पनसाम्रादयः। गुल्मादयः पूर्वोक्ताः। पुष्पिता वीरुधो माल
त्यादयः। तेषां छेदने अचो गायत्र्याः शतं जप्यं। अकामतश्चेदं कामतः शंखः। त्रिरात्रं तु व्रतं कुर्याच्छि
त्वा वृक्षं फलप्रदमिति शंखो। दुर्लभवृक्षादिस्थिछेदने यमः। वृक्षगुल्मलतादिछेदने वृद्धकहुः फल
वतां प्राजापत्यमिति। यत्तु संवत्सरं व्रतं कुर्याच्छित्वा वृक्षं फलप्रदमिति शंखोक्तं तद्बाल्यादिस्थि
तद्वृक्षविषयं चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये। जातद्रुमाणां द्विगुणो दमो वृक्षे च विश्रुते

वि॰ टी॰ प॰
२४०

घोषितमातत्त्वदंडद्विगुणाभिधानात् दंडवत्प्रायश्चित्तानीतिवचनाच्च तडागादिभेदनेतु कश्यपः वापीकूपतडागारामे
सेतुसभातडागवप्रदेवायतनभेदने प्रायश्चित्तं ब्राह्मणो भोजनीयेत्याहुतीः शुद्धयाह इदं विष्णुरितित्र्यमाःमानस्तो
क इति द्वितीया विष्णोःकर्माणीति तृतीया पादोस्येति चतुर्थी ततो यां देवतामुत्सादयतितस्यै देवतायै ब्राह्मणा
न्भोजयेदिति प्रायश्चित्तं च तत्संस्कारानन्तरं कार्यं तत्र द्वौ खलिखितौ आरामकूपसंक्रमध्वजसेतुनिपात
नभंगेषु तत्समुत्थानं प्रतिसंस्कारो द्रष्टातं च निपातितानामिति समुत्थानं प्रतिक्रिया प्रतिसंस्कारो लेपना
दि द्रष्टान्तं पातननिमित्तो दंडः पुनर्मलाद्दह्रे प्रायश्चित्तमाह ॥ ॥ अथ जानां सत्वानां रसजानां च सर्वशः
फलपुष्पोद्भवानां च घेद्रुतप्राशोनेन शुद्धिः विशोधनं ॥ ४८ ॥ ॥ अत्र मोदनादि आद्यं मोदकादिरसा गुडादयः
फलान्यौदुंबरादीनि पुष्पाणि मधूकादीनि तेषु जातानां प्राणिनां वधे घृतप्राशोनेन शुद्धिः सर्वशःशब्देन जल
दिजातानामपि वधे एतदेवाऽकामतः ष्वेदं कामतो द्विगुणं पवनरूपपातके प्रायश्चित्तमाह ॥ ॥ कष्ठजानामोषधी
नां जातानां च स्वयं वने ॥ वृथालंभेनुगच्छेद्रां दिनमेकं पयोव्रती ॥ ५० ॥ ॥ कष्ठजा यवव्रीह्यादयः वने स्वयमेव काष्ठ
जा नीवारादयः तासां वृथा हरणे एकयोजनं विनाछेदनं पयोव्रतो दिनमेकं गामनुगच्छेत् अकामतस्त्वे

राम
२४०

म

५०

वि·टी·

३५१

हे कामक्रोधमः वृक्षगुल्मलतानानावधिच्छेदनेऽर्द्धकृच्छ्रः फलव
तां प्राजापत्यमिति धर्म स्मृतिः श्रीमन्महाराजाधिराजश्रीवासिष्ठवं
शावतंसश्रीकोंडपनायकात्मजनम्मनायकापरनामधेयश्री
केशवनायकप्रोत्साहितश्रीवाराणसीवासिधर्माधिकारिरामपं
डितात्मजश्रीनंदपंडितकृतौ श्रीविष्णुस्मृतिविवृतौ श्रीमत्यां
वैजयन्त्यां पंचाशत्तमोध्यायः ५० पूर्वार्द्धमेतत् ॥ ॥ ॥

गलन्ताएषांच॥ ॥कर्मकारनिषादरंगावतारिवेणशस्त्रविक्रयिणां च॥१४॥ ॥कर्मकारो लोहकारः। निषादो मत्स्य
घातजीवी। रंगावतारी मल्लादिः। वेणो वेणुच्छेदजीवी जातिलोमजः। शस्त्राणामसिशरादीनां विक्रेता। एषां च॥ ॥
श्वजीविशौंडिकतैलिचैलनिर्णेजकानां च॥१५॥ ॥श्वजीवी कुक्कुरपोषणवृत्तिः। शौंडिकः सुराकारः। तै
लिकस्तैलकृत्। चैलानां वस्त्राणां निर्णेजको धावकः। एषां च॥ ॥रजस्वलासहोपपतिवेश्मनां च॥१६॥ ॥रज
स्वलोदक्या तत्स्वामिकं तदर्थं पक्वं च उपपतिना जारेण सह वर्त्तमानं वेश्म यस्यासौ सहोपपतिवेश्मा स्वगृहे स्थि
तजारः। बहुवचनाच्छंसादीनां। नृशंसराजरजककृतघ्नवधजीविनामिति योगिस्मरणात्। एषां च॥ ॥
भ्रूणघ्नावेक्षितमुदक्यासंस्पृष्टं पतत्रिणावलीढं शुना संस्पृष्टं गवा घ्रातं च॥१७॥ भ्रूणघ्नो ब्रह्महा गर्भहा च तेनावे
क्षितं दृष्टं। उदक्या रजस्वला तया सम्यगसंदिग्धतया स्पृष्टं संदिग्धे शुद्धिविधानात्। स्पृष्टं दृष्टयोरुपलक्ष
णं। उदक्यास्पृष्टं संघुष्टं संहृष्टं चाप्युदक्ययेति मनुयोगिस्मरणात्। संघुष्टं कुकुरुवारितं। पतत्रिणा काकेनावली
ढमास्वादितं। शुना संस्पृष्टमसंदिग्धतया स्पृष्टं संदिग्धे शुद्धिविधानात्। गवा गोजातीयेन घ्रातं। एषां च॥ ॥कामतः

पदास्पृष्टमवक्षुतं ॥१८॥ ॥बुद्धिपूर्वं त्वताहतं अवक्षुतं विड्वराहश्च । तयोश्च ॥ ॥सुतकं कृष्णातुराणां च ॥१९॥ ॥मत्तो मद्यादिना ॥ क्रुद्धो नित्यस्तोपवासान्[?] आतुरो रोगग्रस्तः पर्णाच ॥ ॥अनर्चितं वृथामांसं च ॥२०॥ ॥अर्च्चा गावक्षा देवादिकिं प्रति अहितं हथा देवातिथ्याद्यर्थं विनासाधितं मांसं प्राणात्ययादिव्यतिरेकेण च तद्योक्षणात्समारभ्य हथामांसानां भक्षणे सप्ताहं पयः पावर्त्तेतेति । कामादिप्यवस्थायामपूर्वोक्तेव ॥ मत्स्यभक्षणेज्ञानादप्येवमाह ॥ ॥पाठीनरोहितराजीवसिंहतुंडसल्कवर्जं सर्वमत्स्यमांसाशने त्रिरात्रमुपवसेत् ॥२१॥ ॥पाठीनादिपंचकवर्जमितरमत्स्यसंबंधिमांसाशने त्रिरात्रोपवासः कामतस्त्वेदं मत्स्यान्कामतो जग्ध्वा सोपवासस्त्र्यहं वसेदिति योगिस्मरणात् । अकामतोऽपि अभ्यासे मासं यावकं व्रतं स्यात् । कामतोऽभ्यासे दंतस्त्रांश्चतथामत्स्यनिति । अत्यंताभ्यासे प्राण्मासिकं तदुक्तमेव तत् ॥ ॥सर्वजलजमांसाशने च ॥२२॥ सर्वे जलजाः नक्रशिशुमारादयः तन्मांसाशने च त्रिरात्रोपवासोऽप्यवस्थांतरं च पूर्वोक्तमेव ॥ नारा मांडोदकपाने प्रायश्चित्तमाह ॥ ॥आपः सुरापां मांडस्थाः पीत्वा सप्तरात्रं शंखपुष्पीशृतं पयः पिबेत् ॥२३॥ ॥सुरावि

भांडोदकपाने सप्ताहं शंखपुष्पीपक्वं पयः क्षीरं पिबेत्। कामतस्त्वेतदकामतो बौधायनः सुरापानस्य यो भांडे अ-
पः पर्युषिताः पिबेत्। शंखपुष्पीविपक्वं तु क्षीरं स तु पिबेत्त्र्यहमिति। अकामतोऽभ्यासे सुमंतुः। अपः सुराभाजनस्था म-
द्यभांडस्थिता स्तथा। पंचरात्रं पिबेत् पीत्वा शंखपुष्पीशृतं पय इति। कामतोऽभ्यासे यमः। सुराभांडस्थितं तोयं यदि कश्चि-
त्पिबेद्द्विजः। स द्वादशाहं क्षीरेण पिबेद्ब्राह्मीं सुवर्चलां। गायत्र्यष्टसहस्रं च जप्यं कुर्वीत मानसमिति। सुराभांडस्थो-
दके सुरागंधरसोपलब्धौ सुरापानप्रायश्चित्तमेव। मद्यभांडोदकपाने आह॥ ॥मद्यभांडस्याप्यपं चवेरो॥२४॥
॥मद्यभांडोदकपाने पंचरात्रं शंखपुष्पीपक्वं पयः पिबेत्। कामतस्त्वेतदकामतो यमः। मद्यभांडस्थितं तोयं यदि क-
श्चित्पिबेद्द्विजः। कुशमूलविपक्वेन त्र्यहं क्षीरेण वर्तयेदिति। अकामतोऽभ्यासे शंखः मद्यभांडस्थितं तोयं पीत्वा सप्त-
रात्रं गोमूत्रयावकं पिबेदिति। कामतोऽभ्यासे हारीतः। मद्यभांडस्थितं तोयं यदि कश्चित्पिबेद्द्विजः। द्वादशाहं तु पयसा
पिबेद्ब्राह्मीं सुवर्चलामिति॥ ॥सोमपः सुरापस्याघ्राय गंधं सुरकामग्निरघमर्षणं जप्त्वा घृतप्राशनमाचरेत्
॥२५॥ ॥सोमपः सुरापमुखगंधाघ्राणे जलमग्निरघमर्षणं जप्त्वा घृतं प्राश्नीयात्। अघमर्षणं प्राणायामोपलक्ष-

वि॰ टी॰ ५१

णां ज्ञाणां न स्तु ज्ञेयायस्येति मानवात् । कामतो हि गुणं अभ्यासे त्रिगुणं सोमपस्य कल्प्यं । खरादिमांसा
शने चांद्रायणं आह ॥ ॥ खरोष्ट्रकाकमांसाशने चांद्रायणं कुर्यात् ॥२६॥ ॥ खरादयः प्रसिद्धाः । श्वादी
नामुपलक्षणं । श्वसृगालकाककुक्कुटदंष्ट्रिक्रव्यादशिशुमारवानरखरोष्ट्रगजवाजिविड्वराहगोमानुष
मांसाशने चांद्रायणं कुर्यादिति प्रचेतःस्मरणात् । कामतश्चेदकामतो याम्य..लमहकृच्छ्रः । कामाकामाभ्यासे सांव
त्सरिकमाग्नमासिकेशं बोध्यं ॥ ॥ अज्ञाताज्ञातसूनास्थं शुष्कमांसं च ॥२७॥ ॥ यो मे मत्स्याः तेनाज्ञातप्राणिसंबंधिमां
समज्ञातं अज्ञातं श्वसृगादिजातिनिर्घोषिस्मरणात् । न तु दुष्टसंपर्कादिदोषदूषितत्वेनाज्ञातं । अज्ञातं च सदा स्तु सूचि
तितस्यश्रुद्वत्वाभिधानात् । यत्र पशवो मार्यंते मांसविक्रयार्थं तत्स्थलं सूना । पशुशरीरे शस्त्रघातस्थलं वा । तत्रस्थं
शुष्कमातपादिना नीरसं । चकारान्मृष्टमांसादि । यथाऽऽह । दृष्टमांसं गर्भशय्यां शुष्कमांसमथापि वा । स्तेमरंत
र्गतं ज्ञात्वा मूत्रहि.... अज्ञातं चयत् । पक्वमांसमजीर्णे च यच्च यत्नाद्वतु मद्भयेदिति । गर्भशय्या गर्भाशयमांसं । अण्डी
प्रक्रमभांडं तत्रपक्वं । एतेषां मत्स्ये चांद्रायणं । इदं कामतो । तत्राभ्यासे त्रिकामतः षट्कृच्छ्राणि बालोपमादोद्भवेतेरे

६

मिर्वनेनासंवसेदहः॥ द्वितीये ह्नि शुध्येत्तु सोमाभ्युदेयान्वितं स्तथेति। एभिः रुक्मांसादिभिः। पूर्वं पूर्वनेउपोष्य परेद्युः
उमासहितदेवपितृ आद्यं कार्यमित्यर्थः। अकामतोभ्यासे योगीश्वरः। चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च। मं
त्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेदिति। वल्लूरं शुष्कमांसं। कामतोभ्यासे शंखः। सूनामांसं शुष्कमांसमात्मा
र्थं च तथापरं। भुक्त्वा मासं व्रतं कुर्यादेतत्पापं यत्नात्तु समाहित इति। व्रतं पावकं॥ ॥क्रव्यादमृगपक्षिमांसाशने तप्तकृच्छ्रं
॥२८॥ ॥क्रव्यमाममांसं तददंतीति क्रव्यादास्ते च ते मृगपक्षिणश्चेति। मृगा व्याघ्रादयः। पक्षिणः श्येनादयः
। तन्मांसाशने तप्तकृच्छ्रं। अकामतश्चेदं। कामतश्चांद्रायणं। कामकामाभ्यासे सांवत्सरिकं प्राग्मा
सिके शंखोक्तं॥ ॥कलविंकं प्लवं चक्रं बकं हंसं रज्जुदालं सारसं दात्यूहं शुकं सारिकां बकं बलाकां कोकिल
खंजरीटाशने त्रिरात्रमुपवसेत्॥२९॥ कलविंकश्चटकः। प्लवो जलकुक्कुटः। चक्रवाकश्चक्राह्वः। हंसश्च
कांगः। रज्जुदालो द्विकुट्टकः। सारसो लक्ष्मणः। दात्यूहः कालकंठकः। काकावांतरजातिः। शुकः कीरः। सारि
सारी। बकः कंकः। बलाका विसकंठिका। कोकिलः पिकः। खंजरीटः खंजनः। एषामशने त्रिरात्रो त्रिरात्रोपवासः।

कामतस्त्वेदमकामतोऽमत्स्यपादिपक्षिमेकरात्रोपवासोगायत्र्यष्टसहस्रजपइतिसोमंतवंप्रोज्यां अकामतो
त्यंताभ्यासेमनुः जग्ध्वा मांसममत्स्यंचसमरात्रंयवान्पिबेदितिमानवंज्ञेयं कामतोत्यंताभ्यासेत्वाहंसमद्गुंच
काकोलंत्रीसूद्भोछिष्टमेवच।काकांचुचक्रवाकंवाकंवाल्लवंवालंजरीटंकामतस्त्वादोश्वतथामत्स्यान्वलाकाशुकात्
टिकोरज्जुदालंचदात्यूहंमंडूकंभुजंगंतथा।मासंतुयावकंकुर्यादद्यश्वेतन्नमत्स्येदिति॥ ॥एकशफोभयतं
तासैनेवा॥३०॥ ॥एकशफाश्वखरादयः।उभयतोदंताः रोहितादयः।एषामशनेत्रिरात्रोपवासः।इदंचापिकामतः
कामतोयमः।वाराहैकशफानांचतप्तकृच्छ्रविधीयतइति।अकामतोभ्यासेयमः।उपोष्यद्वादशाहंवाकूष्मां
डैर्जुहुयाद्घृतमिति।कामतोत्यंताभ्यासेत्वाहवः।हस्त्युष्ट्रोभयतोदंतांस्तथाचैकशफानपि।श्रोत्रंगोव्यंतथा तु
त्वाषण्मासान्व्रतमाचरेदिति॥ ॥तित्तिरिकपिंजललावकवार्तिकाममयूरवर्जंसर्वपक्षिमांसाशनेचाहोरात्रं
॥३२॥ ॥तित्तिरिप्रभृतयःप्रसिद्धास्तान्रूपंचमयूरांतान्वर्जयित्वाऽन्यपक्षिमांसाशनेहोरात्रमुपवासः।अकामत
स्त्वेदंकामतोमत्स्येष्वेकरात्रोपवासोगायत्र्यष्टसहस्रजपइतिसोमंतवंज्ञेयः।अकामतोभ्यासेमानवंसमरात्रं

यवागूपानं। कामतोऽत्यंताभ्यासे शंखोक्तं मासं यावकाशनं॥ ॥कीटाशने दिनमेकं ब्रह्मसुवर्चलां पिबेत्॥३२॥ ॥की
टाः पिपीलिकादयस्तेषां प्राशनाद् अशने एकाहं ब्रह्मसुवर्चलापानं। एतच्च कामतः। अकामतः स्मृत्यंतरे। केशकीट
नखं वा यदि भक्षयेत् कंटकमेव वा हेमतप्तं घृतं प्राश्य तत्क्षणादेव शुध्यतीति। अकामतोऽभ्यासे हारीतः। कृमिकीटपिपीलि
काजलौकःपंचनखास्थिप्राशने गोमूत्रगोमयाहारस्त्रिरात्रेण विशुध्यतीति। कामतस्त्वेतदेव द्विगुणं। कीटयुक्तान्ना
शने तु योगीश्वरः। गोघ्राते चैव तथा केशमक्षिकीटदूषिते। सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये इति। कीटादुष्ट
हृत्य जलादिप्रक्षेपः कार्यः। कीटादिभिः सहपक्वे तु प्रचेताः। केशकीटावपन्नं तु पंचगव्येन शुध्यतीति। अवपन्नं सह
पक्वं। अकामतोऽभ्यासे शातातपः। केशकीटावपन्नं च रुधिरमांसास्थि शूद्रस्पृष्टं चान्नं भावदुष्टं पतत्र्यवलीढं श्वसू
करगवाघ्रातं तु सूतपर्युषितं तथा पक्वादेवान्नं हविषां भोजने उपवासः पंचगव्याशनं चेति। कामतोऽभ्यासे संवर्त्तः।
केशकीटावपन्नं च नीलीलाक्षोपघातितं। स्नायुचर्मास्थिसंस्पृष्टं भुक्त्वा कृच्छ्रं समाचरेदिति॥ ॥शुनां मांसाशने चा
द्रे॥ ॥शुनो मांसप्राशने त्वेते ब्रह्मसुवर्चलां पिबेत्। चकाराद्धस्तिमातंगमांसप्राशने च। अकामतस्त्विदं कामतः शंखः।

प्रि॰डी॰५१

११

शुनो मांसं शौनं शुष्कमांसं समानामार्थं च तथाकृतां शुष्कामांसं व्रतं कुर्यात्स्वयं तः शुष्कमांसादि तद्द्वितिश्वयदुहणं सकलपरिसं
ख्यातपंचनखोपलक्षणं तदभ्यासे तु शंवः । नारं शौनं तथा मांसं विड्वराहं खरं तथा । ग्रामकुक्कुटं गजरोष्ट्रौ च सर्वपंचनखां
स्तथा । क्रव्यादं कुक्कुटं ग्राम्यं कुर्यात्संवत्सरं व्रतमिति ॥ ॥छत्राकं कवकाशने सांतपनं ॥२४॥ ॥छत्राकं सर्पछत्रकं
कवकं कुकुंदाकारं तस्यैवावांतरभेदः । तद्भक्षणे सांतपनं । इदं चाकामतः । छत्राकं विड्वराहं चेलशुपक्कमाश्रमत्वेतानि
षट् जग्ध्वा कृच्छ्रं सांतपनं चरेदिति मानवात् । सांतपनं च ग्राहिकोऽकामतोभ्यासे यमः । लशुनं कवकं चैव छत्राकं गृं
जनं तथा पुनरज्ञानतो जग्ध्वा कृच्छ्रं सांतपनं चरेत् तप्तकृच्छ्रं चरेद्द्विज इति कामतो यमः । भूतृणं शिग्रुकं चैव खुखंड
कवकानि च । एतेषां भक्षणं कृत्वा प्राजापत्यं चरेद्द्विज इति । खुखंडं खुरखंडीति भाषया । कामतोभ्यासे योगीश्व
रः । छत्राकं ग्रामकुक्कुटं जग्ध्वा चांद्रायणं चरेदिति । कामतोऽनवच्छिन्नाभ्यासे पातित्यमेव । छत्राकं विड्वराहं
च मत्या जग्ध्वा पतेद्द्विज इति मानवात् ॥ ॥यवगोधूमपयोविकारं स्नेहाक्तं खांडवं चर्वं जग्ध्वा यत्पर्युषितं तत्
प्राश्योपवसेत् ॥२५॥ ॥यवविकारः पोलिकादिः । गोधूमविकारो मंडकादिः । पयोविकारोऽत्रामिक्षादिः ।

११

स्नेहेन घृतादिना अक्तमोदनादि। शुक्तमामलकादि कांजिकं न तत् अन्नं शुक्तं पर्युषितोच्छिष्टमिति निषेधात्
नापि केवलं तस्यापि निषेधात्। खांडवं खंडविकारः फाणितादिः। एतत्त्रितयं शुक्तपर्युषितमश्नत उपवासः। अ
चिक्तुक्तं खांडवमिति पदद्वयस्थाने शुक्रकृषाभावमिति पाठः। तत्र शुक्रकृषामूषा तद्भवो व्यंजनविशेषः। एतच्चाका
मतः। शंखः। लोहितान्वृक्षनिर्यासान्वृश्चनप्रभवांस्तथा। केवलानि च शुक्तानि तथा पर्युषितानि च। अजीव
पक्वं भुक्त्वा च त्रिरात्रं तु व्रती भवेदिति। अकामतोभ्यासे संवर्त्तः। अभोज्यभोजनं कृत्वा ब्रह्मन्दत्तं विप्रगणैः
। गोमूत्रयावकाहारः सप्तरात्रेण शुध्यतीति। कामतोभ्यासे ब्रह्मपुराणे। सगुडं मरिचाक्तं च तक्रं पर्युषितं
दधि। दीर्णं तक्रमपेयं च न स्वादु चपेनवतः। प्रमादाद्भक्षितैरेतैर्दिनेपक्षव्रतं चरेदिति॥ ॥वृश्चनामेध्य
प्रभवान्लोहितांश्च वृक्षनिर्यासान्॥३६॥ ॥वृश्चनं छेदनं तत्प्रभवा निर्यासाः। अमेध्यं विष्ठादि तत्प्रभ
वास्तंडुलीयकादयः। लोहिताश्च वृश्चनजा अपि वृक्षनिर्यासास्तद्भक्षणे चैकाहोपवासः। कामाकामादि
व्यवस्था पूर्ववत्॥ ॥वृथाकृसरसंयावपायसापूपशष्कुली देवान्नानि हवींषि च॥३७॥ ॥वृथा

तं पयस्तु मुद्गादिकं दः। कृसरं तिलैर्मुद्गैर्वा मिश्र ओदनः। संयावस्तु त्वक्रिक्तयेरप्यैति महाराष्ट्रभाषायां। पाय
सं परमान्नं। अपूपो मंडकः। शष्कुली स्नेहपक्वो गोधूमविकारः। सोहारीति मध्यदेशभाषायां। देवार्थं कृतम
न्नं। एतानि ह्यादेवायनिवेदितानि। हविर्होमार्थं कृतमकृतमेषां चाश्ने होराचमुपवासः। व्यवस्था च पूर्ववात्रा
हिताग्नेस्तु विशेषमाह लिखितः। हृथा कृसरसंयावपायसापूपशष्कुलीः। आहिताग्निर्द्विजो भुक्त्वा प्राजाप
त्यं समाचरेदिति॥ ॥गोजामहिषीवर्जं सर्वपयांसि च॥३८॥ ॥गवादयः प्रसिद्धास्तत्र पयवर्जं सर्वेषामस्था
स्थादीनां पयांसि भुक्त्वैकरात्रोपवासः। अपि मेकशफं स्त्रैणमारण्यकमथाविकमिति योगिस्मरणात्।
पयो निषधात्तद्विकाराणां दध्यादीनामपि निषेधात्तद्भक्षणेपीदमेव प्रायश्चित्तं। औष्ट्रादौ तु विकारश्चत्य
याष्ट्रक्लन्नूत्वादेरपि निषेध एवात्र चकारार्थः। स्त्री त्वारणाने पुनः संस्कारोधिकश्चतुर्विंशतिमते। स्त्रीक्षी
रं तु द्विजः पीत्वा कथंचित्कामसोहितः। पुनः संस्कृत्य चात्मानं प्राजापत्यं समाचरेदिति॥ ॥अनिर्दशाह
निनान्यपि॥३९॥ ॥तानि गोजामहिषीक्षीराण्यपि। निर्गतदशरात्राणि भुक्त्वैकरात्रोपवासः। गोमहिष्यजा

नाम निर्देशाहाना। मिति वसिष्ठस्मरणात्॥ ॥स्पंदिनी संधिनी विवत्सा क्षीरं च॥४०॥ ॥स्पंदिनी स्त्रवत्पय
स्तनी। संधिनी वृषाक्रांता। एकस्यां वेलायां दुह्यमाना परवत्सेन दुह्यमाना वा। विवत्सा मृतवत्सा। चकाराद्य
मस्त्रयाता सा च क्षीरं त्यक्त्वा काहोपवासः। स्पंदिनी यमस्त्रः संधिनीनां चेति गौतमस्मरणात्॥ ॥अमेध्यभुज
श्च॥४१॥ ॥अमेध्यं विष्ठादि तद्भुजश्च गोः क्षीरं भुक्त्वा काहोपवासः॥ ॥दधिवर्ज्जं केवलानि च शुक्तानि॥
४२॥ ॥केवलान्यामलक्यादि फलरहितानि कालेनाम्लीभूतानि शुक्तानि दधिव्यतिरिक्तानि भुक्त्वा काहो
पवासः। अत्र केवलग्रहणात्पूर्वं शुक्तपर्युदासे फलशुक्तविषयत्वं गम्यते। दधिग्रहणं तद्विकाराणामप्यु
पलक्षणं। दधि मस्त्वं तु शुक्तेषु सर्वं च दधिसंभवं। यानि चैवाभिषूयंते पुष्पमूलफलैः शुभैरिति मानवात्॥ ब्रह्म
चारिणं चत्वारि॥ ॥ब्रह्मचर्याश्रमी श्राद्धभोजने त्रिरात्रमुपवसेत्॥४३॥ ॥ब्रह्मचर्याश्रमी असमावृत्तो मा
सिकादि श्राद्धे भुक्त्वा त्रिरात्रमुपवसेत्। यथा यमः। मासिकादिषु यो ऽश्नीयादसमावर्तो द्विजः। त्रिरात्रमुप
वासोस्य प्रायश्चित्तं विधीयते। अकामतश्चेदं कामतो पि स एव। मधुमांसं तु यो ऽश्नीयाच्छ्राद्धे सूतकमेव वा। प्राज

पत्यं चरेत्कृच्छ्रं व्रतशेषं समापयेदिति। आमश्राद्धे तदर्द्धं तु प्राजापत्यं तु सर्वदेति तदर्द्धं प्राजापत्यार्द्धमकामतः
।कामतः प्राजापत्यं। आमश्राद्धग्रहणं व्रताद्यंग ब्रह्मचर्यवतो नेदं प्रायश्चित्तमिति बोधयितुं। किंच॥ ॥दिनमेकं
चोदके वसेत्॥४४॥ ॥त्रिरात्रोपवासानंतरमहोरात्रमुदवासं कुर्यात्॥ ॥मधुमांसाशने प्राजापत्यं॥४५॥
॥ब्रह्मचारी मधुमांसाशने प्राजापत्यं कुर्यात्। श्राद्धे अश्राद्धे च। ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन्नि
ति योगिस्मरणात्। पुनः साधारणमाह॥ ॥बिडालकाकनकुलाखूच्छिष्टभक्षणे ब्रह्मसुवर्चलां पिबेत्॥४६
॥ ॥बिडालो मार्जारः। काकः प्रसिद्धः। नकुलो बभ्रुः। आखुर्मूषिकः। एषामुच्छिष्टाशने ब्रह्मसुवर्चलां
पिबेदाहारांतरपरित्यागेन। इदं चाकामतः सकृद्भक्षणे। अकामततोऽभ्यासे प्राजापत्यं। यच्च काकाद्यवली
ढं श्वशूद्रोच्छिष्टभोजने त्वतिकृच्छ्र इति। कामतस्तु विष्णुः। पक्षिजुष्टावपदजगधस्पर्शस्पास्कृस्यप्रयसः। सं
स्कारराहितस्यापि भोजने कृच्छ्रपादकमिति। कामतोऽभ्यासे तु रौरवः। काकोच्छिष्टं गवाघ्रातं भुक्त्वा पदत्रं
तीर्भवेदिति। ॥श्वोच्छिष्टाशने दिनमेकमुपोषितः पंचगव्यं पिबेत्॥४७॥ ॥श्वा कुक्कुरस्तदुच्छिष्टाश

नेहोरात्रमुपोष्यपरेहनि पंचगव्यं वेत्। अकामतश्चेदमकामतोभ्यासे आतातपीयोतिकृच्छ्रः। कामतो वैसव-
कृच्छ्रपादः कामतोभ्यासे शंखः। शुना मुष्टिर्यकं भुक्त्वा मासमेकं व्रती भवेदिति॥ ॥पंचनखविण्मूत्राशने
सप्तरात्रं॥४८॥ ॥मानुषातिरिक्तपंचनखविण्मूत्राशने सनेम्नाहोपोषितोन्येद्युः पंचगव्यं पिबेत्। मानुषम-
लभक्षणे चांद्रायणं स्यो कृत्वा तु। कामतश्चेदमकामतो यमः। मांसमूत्रपुरीषाणि प्राश्य गोमांसमेव च। श्वगोमा-
शुकपीनां च तप्तकृच्छ्रं विशोधनमिति। यद्वा। इच्छयैषाममेध्यानि मत्त्वा पीत्वा द्विजातयः। कुर्युः सांतपनं कृच्छ्रं
प्राजापत्यमनिच्छया। त्र्यं गिरोभिहितान्यच्छर्थ्याञ्जेयः। अकामतोभ्यासे स एव। तपो वृद्धा दशाहं वा कृष्णं चैकं कु-
र्यादित्यमिति। कामतोभ्यासे गिराः। नरकाक खरश्वानां जग्ध्वा मांसं गजस्य च। एषां मूत्रपुरीषाणि द्विजश्चां-
द्रायणं चरेदिति॥ ॥आमश्राद्धाशने त्रिरात्रं पयसा वर्तेत॥४९॥ ॥अत्र च यापितिरिक्तस्यामश्राद्धाशने त्र्यहं प-
यःपानं यद्वा। आमश्राद्धे तथा भुक्त्वा तप्तकृच्छ्रेण शुध्यतीति भारद्वाजेंद्रेयं। इदं चाकामतः। कामतः षड्विंशन्म-
ते। आमश्राद्धे तदर्द्धं तु प्राजापत्यं तु सर्वदेति। तदर्द्धं प्राजापत्यार्द्धं। अकामतोभ्यासे प्राजापत्यं। कामतोभ्यासे

द्वैगुण्यं ॥ उच्छिष्टाशने आह ॥ ॥ब्राह्मणः शूद्रोच्छिष्टाशने सप्तरात्रं ॥५०॥ ॥विप्रस्य शूद्रोच्छिष्टाशने सप्ता
हं पयःपानमनुष्ठेयमिति ॥ क्वचित्तु पंचगव्यं पिबेदिति साक्षादुपदिष्ट एव पाठः ॥ शूद्रग्रहणं स्त्र्युपलक्षणं ॥
शूद्रोच्छिष्टाभोजने सप्तरात्रमभोजनं स्त्रीणां चेत्यापस्तंबस्मरणात् ॥ ॥वैश्योच्छिष्टाशने पंचरात्रं ॥५१॥
॥ ॥विप्रस्य वैश्योच्छिष्टाशने पंचाहं पयःपंचगव्ययोरन्यतरस्य पानं ॥ ॥राजन्योच्छिष्टाशने त्रिरात्रं ॥५२॥ ॥
क्षत्रियोच्छिष्टाशने त्रिरात्रं पयःपंचगव्यान्यतरपानं विप्रस्य ॥ ब्राह्मणोच्छिष्टाशने त्वेकाहं ॥५३॥ ॥विप्र
स्य विप्रोच्छिष्टाशने एकाहं पयःपंचगव्यान्यतरपानं ॥ एतच्च कामतो ऽकामतः शंखः ॥ ब्राह्मणोच्छिष्टाशने
महाव्याहृतिभिरभिमंत्र्यापः पिबेत् ॥ क्षत्रियोच्छिष्टाशने ब्राह्मीरसपक्वेन त्र्यहं क्षीरेण वर्तयेत् ॥ वैश्योच्छिष्टा
शने त्रिरात्रोपोषितो ब्राह्मीसुवर्चलां पिबेत् ॥ शूद्रोच्छिष्टाशने षड्रात्रमभोजनेनासीतेत्यभ्यासे ऽयमः ॥ शुक्राख्य
षमनेत्यापस्तंबः ॥ अज्ञानाद्भुक्त्वा तु जीतः शूद्रोच्छिष्टं द्विजोत्तमः ॥ त्रिरात्रोपोषितो भूत्वा पंचगव्येन शुध्यती
ति ॥ एवमन्यत्रापि द्रष्टव्यं ॥ कामतो ऽभ्यासे ऽयमः ॥ भुक्त्वा सह चांडालेन प्राजापत्येन शुध्यति ॥ मनुः ॥ सह

भुक्त्वान्नं तप्तकृच्छ्रेण शुध्यति। वैश्येन सह भुक्त्वान्नमतिकृच्छ्रेण शुध्यति। शूद्रेण सह भुक्त्वान्नं चांद्रायणमथ
चरेदिति। अज्ञानाभ्यासे तु कल्प्यं। क्षत्रियादीनामाह॥ ॥राजन्यः शूद्रोच्छिष्टाशी पंचरात्रं॥५४॥ ॥क्षत्रियः शू
द्रोच्छिष्टाशने पंचरात्रं पयः पंचगव्यान्यतरत्पिबेत्॥ ॥वैश्योच्छिष्टाशी त्रिरात्रं॥५५॥ ॥क्षत्रियस्य विप्रोच्छि
वैश्योच्छिष्टाशने त्रिरात्रं पयः पंचगव्यान्यतरत्पिबेत्। क्षत्रियस्य क्षत्रियोच्छिष्टाशने एकरात्रमेवाविप्रपादि
ष्टोच्छिष्टाशने तथादर्शनात्। क्षत्रियस्य विप्रोच्छिष्टाशने त्वापस्तंबः। ब्राह्मणस्य यदोच्छिष्टमश्नात्यज्ञान
तो द्विजः। अहोरात्रं तु गायत्र्या जपं कृत्वा विशुध्यतीति। द्विजः क्षत्रियादिः॥ ॥वैश्यः शूद्रोच्छिष्टाशी च॥५६
॥ ॥वैश्यः शूद्रोच्छिष्टाशने त्रिरात्रं पयः पंचगव्यान्यतरत्पिबेत्। वैश्यस्य विप्रक्षत्रोच्छिष्टाशने होरात्रं गाय
त्रीजपः। वैश्योच्छिष्टाशने एकाहं पयः पंचगव्यं वा। शूद्रस्य तु द्विजोच्छिष्टाशने न दोषः। द्विजोच्छिष्टं तु भोजन
मिति विधानात्। एतच्च गुरुं विना उच्छिष्टमभोज्यमगुरोरिति वा निषेधात्। चंडालाद्यन्नाशन आह॥ ॥चंडा
लान्नं भुक्त्वा त्रिरात्रमुपवसेत्॥५७॥ ॥चंडालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा। मागधायोगवौ चैव सप्तै

मि॰टी॰प्रा॰
१५

नेत्यावसायिन इत्येते चाण्डालग्रहणेन गृह्यंते। एषामपकामतोन्नं भुक्त्वा त्रिरात्रं तूपवसेत्। एतच्च कामतो द्वि
सकृद्भुक्त्वा प्रायश्चित्तं। अकामतः पादकृच्छ्रः। तदप्युक्तमत्रेणैव चंडालान्नभोजने इति शेषः स्मर
णात्। अभ्यासे त्वभयचापि कल्प्यं। सिद्धान्नभोजन आह॥ ॥सिद्धं भुक्त्वा पराकः स्यात्॥५०॥ ॥चंडालादीनां
सिद्धान्नाशने पराकः। अकामतस्त्वर्द्धं कामतो द्विगुणः। अंत्यावसायिनामन्नमश्नीयाद्यस्तु कामतः। स
तु चांद्रायणं कुर्यात् तप्तकृच्छ्रमथापि वेति। कामाकामाभ्यामभ्यासव्यवस्था। पुनः चंडालान्नं यदा भुक्तं अ
लग्नाद्यैः श्मादतः। चांद्रायणं चोद्दिष्टं तत्पादलं वा। यत्तदकामतोभ्यासे ज्ञेयं। कामाकामतो त्वयंताभ्यासे तु म
तुः। चंडालांत्यास्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छतीति। पातित्य
द्वादशाब्दः सामान्यमरणांतिकं चतुर्विंशतिवार्षिकं वा। सर्वथा प्रायश्चित्ताभावे संसर्गिप्रायश्चित्तं वक्ष्य
नस्यात्। मांसभक्षणे विधिनिषेधयोर्द्वैवमाह॥ ॥असंस्कृतान्पशून्मंत्रैर्नाद्याद्विप्रः कथंचन। मंत्रैस्तु सं
स्कृतानद्याच्छाश्वतं विधिमास्थितः॥५१॥ ॥उपाकरणादिमंत्रसंस्कृतपशुमांसाशनेकार्यं ना नासं

१५

स्कृतानांसीतायज्ञादिशेषाणां।यतःश्राद्धवतंवैदिकंयत्पुनर्वेदमूलकंविधिमास्थितःसीतायज्ञादीनांवुप
शेत्येपिनमत्यन्तवेदमूलकत्वंसामयाचारिकत्वात्।वृथाश्रौतस्मार्तपशुहिंसायामाह॥ ॥यावंतिपशुरोमाणि
तावत्कृत्वेहमारणं।वृथापशुघ्नःप्राप्नोतिप्रेत्यचेहचानेकृतिं॥६०॥ ॥पशुघ्नइहलोकेवृथाश्रौतस्मार्त्तपशु
यागादिमंतरेणपशुमारणंकृत्वापशुरोमसमसंख्यानोदिनानीहलोकेपरलोकेचनिष्कृतिंदुःखानुभवनरू
कोपभोगरूपांप्राप्नोति।दिनानिपशुरोमाभिरितिस्मरणात्।वृथाशब्दव्यावर्त्यमाह॥ ॥यज्ञार्थंपशवःसृष्टाः
स्वयमेवस्वयंभुवा।यज्ञोहिभूत्यैसर्वस्यतस्माद्यज्ञेवधोऽवधः॥६१॥ ॥पशुसृष्टिर्यज्ञार्थमेवब्रह्मणाकृताय
तोयज्ञएहिकामुष्मिकसकलकाम्यफलसाधनमतस्तदर्थवधःअवधःअदृष्टदूषणंनाहंसेपेवृथाखा
देकेदोषाधिक्यमाह॥ ॥नतादृशंभवात्येनोमृगहंतुर्धनार्थिनः।यादृशंभवतिप्रेत्यवृथामांसानिखादतः॥
६२॥ ॥मृगहंतुरेनस्ताहगुरुकष्टंनरकहेतुर्नयतोसाववश्यभरणीयकुटुंबभरणार्थंधनमपेक्षते।अयंका
र्यशतंकृत्वेतिस्मरणात्।प्रायेणवृथाजिह्वास्वादेनमांसभक्षकस्यद्वेत्यनरकहेतुः।यज्ञेपुवधंस्तौति॥ ॥ओ
षध्यःपशवोवृक्षास्तिर्यंचःपक्षिणस्तथा।यज्ञार्थंनिधनंप्राप्ताःप्राप्नुवंत्युत्सृतीःपुनः॥६३॥ ॥ओषध्यः

पुरोडाशार्थं व्रीहियवादयः। पशवो वपाद्यर्थं छागादयः। वृक्षा यूपाद्यर्थं पलाशादयः। तिर्यंचो विषर्णाद्य
र्थं मंडूकादयः। पक्षिणो यागार्थं कपिंजलादयः। एते यज्ञार्थं वध्यमाना ह्युत्कृष्टं परलोकं गंधर्वादि
योनित्वं पुनः पुनः प्राप्नुवंति। पशुवधनिमित्तेषु परिसंख्यामाह॥ ॥मधुपर्के च यज्ञे च पितृदैवतकर्मणि।
अत्रैव पशवो हिंस्या नान्यत्रेति कथंचन॥६४॥ ॥मधुपर्को वरादीनां। यज्ञो ज्योतिष्टोमादिः। पितृकर्म श्रा
द्धं। दैवतकर्म दुर्गाबलिदानादि। एतेष्वेव पशवो हिंस्या अन्यत्र मांसभुक्त्यादिषु कथंचित्प्राणात्ययादिष्व
पि न। तु प्राणात्यये तथा श्राद्धे इति तत्सिद्धमांसभक्षणार्थं न पशुहिंसार्थं। यज्ञपशुहिंसकं स्तौति॥ ॥यज्ञार्थेषु
पशून्हिंसन्वेदतत्त्वार्थविद्द्विजः। आत्मानं च पशुं चैव गमयत्युत्तमां गतिं॥६५॥ ॥यो वेदानां तत्त्वमवाप्ति
तर्थं ज्ञात्वा वेदविहितयज्ञार्थं न तु भक्षणार्थं पशून्हि नस्ति स तात्पशूनात्मानं चोत्तमां गतिं स्वर्गलक्षणां
गमयति। स्तुत्वोपसंहारः। मांसार्थं हिंसानिषेधस्य सर्वाश्रमसाधारण्यमाह॥ ॥गृहे गुरावरण्ये वा निवस
न्नात्मवान्द्विजः। नावेदविहितां हिंसामापद्यपि समाचरेत्॥६६॥ ॥गृहादिवासिनो गृहस्थब्रह्मचारिवान

व्याघ्रादि हनने नतु न दोषः। बहवः सुखमेधंते यस्मिन्व्यापादिते सति। तस्मिन्हते तु कुरुष्व पातकं नोपपातक मिति महाभारतात्। अतस्त्वात्मसुखेच्छयाऽहिंसक पशु हिंसनं वृथा हिंसेत्युक्तं भवति। कायिकीमहिंसां स्तुत्वा मानसीं स्तौति॥ ॥यो बंधन वध क्लेशान्प्राणिनां न चिकीर्षति। स सर्वस्य हितप्रेप्सुः सुखमत्यंतमश्नुते ॥६९॥ ॥यः प्राणिनां वधबंधादिक्लेशान्न चिकीर्षति स सर्वेषामपि हितप्रेप्सुत्वाद् अत्यंतिकसुखभाग्भव ति। अहिंसायां मैहिकं फलमाह॥ ॥यद्ध्यायति यत्कुरुते रतिं बध्नाति यत्र च। तदवाप्नोत्ययत्नेन यो हिनस्ति न किंचन॥७०॥ ॥यः स्थावरं जंगमं वा किंचिदपि न हिनस्ति स ज्ञानेच्छाकृतिविषयान्सर्वानप्ययत्ने नैवाप्नोति। उपायनिषेधादपि मांसं निषिद्धमित्याह॥ ॥नाकृत्वा प्राणिनां हिंसां मांसमुत्प द्यते क्वचित्। न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत्॥७१॥ ॥हिंसासाध्यं मांसं हिंसानिषेधेनैव निषिद्ध मिति तद्ब्राह्मणमपि तद्द्वदेव नरकहेतुः। निषिद्धद्वारत्वतयापि तन्निषिद्धमित्याह॥ ॥समुत्पत्तिं च मांसस्य वध बंधौ च देहिनां। प्रसमीक्ष्य निवर्तेत सर्वमांसस्य भक्षणात्॥७२॥ ॥एतस्माद्धेतोः शिकं शारीरं त्री णि पित्त तः। अस्थिस्नायुमज्जानः पितृतस्त्वङ्मांसरुधिराणि मातृत इति श्रुत्या रजोविकारत्वं मांसस्योक्तं

श्रम्याः॥ आत्मवान् संन्यासी च द्विजग्रहणात् श्रम्या निषेधः। एते आपदि प्राणसंशयेऽपि तज्ज्ञाप्येमां स्वार्थं वे
दाविहितां हिंसां नाचरेयुः॥ हिंसानिषेधात् द्विजोपादानां वेदाविहितनिषेधाच्च यज्ञशिष्टोपादानमनिषि
द्धं। ननु इह स्वव्यतिरिक्तानां मधुमांसवर्जमित्यनेन तत्प्रकरणे मांसभक्षणस्यैव निषेधात् कुतस्तदर्थ
हिंसानिषेधः। उच्यते आमावादिति चेन्मैवं। स यदि व्याधीयीत गुरोरुच्छिष्टं कृत्वा सर्वमन्नायादिति वेदकमप्युप
रुंजीतेति कौणपैः पाकयावकदधिपयोव्रतं चेति वसिष्ठगौतमबौधायनैर्ब्रह्मचारिवानप्रस्थयतीनामाप
दि मांसभक्षणस्याभ्यनुज्ञानात् तस्यैव तदर्थं हिंसाप्राप्तिः पूर्वं मधुमांसादि व्याख्यादिहतस्य पशोर्मांसं वैदक।
कौणं तदेव॥ ॥नित्यां वैदिकहिंसां स्तौति॥ ॥या वेदविहिता हिंसा नियतास्मिंश्चराचरे। अहिंसामेव तां विद्याद्वे
दाद्धर्मो हि निर्बभौ॥४४॥ ॥वैदिकी नित्या अग्नीषोमीयादिहिंसा प्रकरणे दोषहेतुत्वादहिंसैवाविहितहिंसावत्प्र
दोषजनिका वेदस्य धर्मत्वाद्धर्मस्य हेतुत्वादहिंसास्वरूपमाह॥ ॥योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया।
स जीवंश्च मृतश्चैव न क्वचित्सुखमेधते॥४५॥ ॥स्वसुखनिमित्तमहिंसकानि हिंसार्थं मनुष्यतानि भूतानि यो
हिनस्ति स इहामुत्र च सुखभाग्न भवति। अहिंसकानीति विशेषणादाततायिवधे न दोष इत्युक्तमधस्तात्।

रजश्यामेध्यभक्षणं निषिद्धेन निषिद्धं। मानुषास्थिशवं विष्ठा रेतो मूत्रार्तवं वसा। स्वेदाश्रुदूषिका श्लेष्मा मद्यं चामे
ध्यमुच्यत इति देवलेन। अतो निषिद्धोपादानकत्वान्निषिद्धवधवं धोपायकत्वाच्च विहितनिषिद्धाभ्यनुज्ञातस
र्वमांसभक्षणान्निवर्तेत। तथा च महाभारते। प्रोक्षितामभ्युक्षितं मांसं तथा ब्राह्मणकाम्यया। अल्पदोषमिह ज्ञेयं विप
रीते तु लिप्यत इति। प्रोक्षितं यागेषु। अभ्युक्षितं श्राद्धेषु। ब्राह्मणकाम्यया अतिथ्यर्थं। उपलक्षणमेतत्प्राणात्यया
देरपि। विपरीते निषिद्धे। लिप्यते संपूर्णपापेन युज्यते। एतेन प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया। देवा
न्पितॄंश्च समभ्यर्च्य खादन्मांसं न दोषभागिति योगीश्वरीयं दोषाभाववचनं संपूर्णदोषाभावपरं व्याख्यातं॥
मांसवर्जनस्यैहिकं फलमाह॥ ॥न भक्षयति यो मांसं विधिं हित्वा पिशाचवत्। स लोके प्रियतां याति व्याधिभि
श्च न पीड्यते॥७३॥ ॥पिशाचा ह्यविधिनैव मांसं भक्षयंतीति तद्वद्यो न भक्षयति स इह लोके सर्वजनप्रियतां
मव्याधितां चाप्नोति। अनेन रोगोत्पत्तेरप्यविशुद्धिना मांसभक्षणं निदानमुक्तं भवतीति। यदुक्तं पशुघ्न इति
तद्भेदानाह॥ ॥अनुमंता विशसिता निहंता क्रयविक्रयी। संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः॥७४॥

येहन्यमानमनुमन्यंते हतं वा विशंसंति विशस्तं वा क्रीणंति विक्रीणंति वा क्रीतं वा पाकादिना संस्कुर्वंति संस्कृतं वोपाहरंति उपहृतं वा खादंति ते सर्वेपि हिंसानुबंधित्वात् घातकाद्घातकवदेव तारतम्येन दोषभाजः। पुण्यार्थं मांसाशने दोषाधिक्यमाह॥ ॥स्वमांसं परमांसेन यो वर्द्धयितुमिच्छति। अनभ्यर्च्य पितॄन्देवांस्ततोन्यो नास्त्यपुण्यकृत्॥७५॥ ॥श्राद्धाद्यादिरहितः केवलपुष्ट्यर्थमेव मांसानि खादतीति तस्मादन्यः पापकृन्नास्ति परं तु देवपित्रर्चनादन्यत्रादेवाद्यर्चनावशिष्टस्य पुष्ट्यार्थमपि भक्षणे न दोषः। मांसवर्जनस्यामुष्मिकं फलमाह॥ ॥वर्षे वर्षेश्वमेधेन यो यजेत शतं समाः। मांसानि च न खादेद्यस्तस्य पुण्यफलं समम्॥७६॥ ॥प्रत्यब्दं शतं वर्षाणि योश्वमेधेन यजेत यश्च मांसं न खादति तावुभावपि तुल्यपुण्यफलौ। तपसोप्यधिकं मांसवर्जनमित्याह॥ ॥फलमूलाशनैर्मेध्यैर्मुन्यन्नानां च भोजनैः। न तत्फलमवाप्नोति यन्मांसपरिवर्जनात्॥७७॥ ॥दिव्यैः स्वर्गसाधनैः फलमूलनीवारादिभोजनैस्तादृशीं स्वर्गप्राप्तिं न याति यादृशीं मांसवर्जनेन। मांसपदनिरुक्तिमाह॥ ॥मांस भक्षयितामुत्र यस्य मांसमिहाद्म्यहम्। एतन्मांसस्य मांसत्वं प्रवदंति मनीषिणः॥७८॥ ॥इहास्मिन्

लोकेयस्यमांसमहमद्मिसोमुत्रपरलोकेमांभक्षयितेतिमांसपदप्रवृत्तिनिमित्तंमनीषिणःप्राहुस्ततोपिमांसंत्याज्यमिति

॥ ॥इतिश्री विष्णुस्मृतिविवृतौश्रीमत्यांवैजयंत्यामेकपंचा

शत्तमोध्यायः॥ ॥कर्मणातंसुवर्णस्तेयप्रायश्चित्तंद्विपंचाशत्तमेनाह॥ ॥सुवर्णस्तेयकृद्राज्ञेकर्माचक्षाणोमुसलमर्प

येत्॥१॥ ॥अत्रसुवर्णशब्दोजातिवचनःपंचविंशेसाधितः।तत्परिमाणंपंचाद्यायांतद्धेमाणांतिकमित्यनेनसुवर्णाधि

कत्वमुपात्तंतेपंचनिष्कप्रमाणंत्वितिभविष्यवचनेनतुतत्रैवविशेषसमर्पकं।निष्कश्चात्रव्यावहारिकोदीनारएवप्र

थमोपस्थितत्वात्।तत्रब्राह्मणस्वामिकमेवब्राह्मणसुवर्णहरणमिहउपक्रमात्।तस्यस्तेयंशास्त्रपरिगणितस्वत्वहेतुंवि

नोपादानंतद्यःकरोतिसकर्मस्वकृतंसुवर्णस्तेयंमयाकृतमित्याचक्षाणोराज्ञेस्ववधायमुसलमर्पयेत्तेनचमु

सलेनराजातंसकृदेवहन्यात्।अत्रविशेषमाहशंखः।सुवर्णस्तेनःप्रकीर्णकेशोग्रह्यायसंसेद्दुलमादायराजान

मुपतिष्ठेदिदंमयापापंकृतमनेनमुसलेनघातयस्वेतिसराज्ञाशिष्टःपूतोभवतीति।मुसलंवधसाधनोपलक्षणं।यथा

हमनुः।स्कंधेनादायमुसलंलकुटंवापिखादिरं।शक्तिंचोभयतस्तीक्ष्णामायसंदंडमेववेति।हननंचसकृत्कार्यं।ग्र

होत्वामुसलंराजासकृद्धन्यात्तुतंस्वयमितिमानववचनात्।राज्ञोहननाशक्तौतुवसिष्ठः।स्तेनःप्रकीर्णकेशोराजानमभि

वि॰दी॰ ५२

१९

याचेतततस्तस्मै राजोडुंबरं शस्त्रं दद्यात्तेनात्मानं प्रमापयेन्मरणात्पूतो भवतीति विज्ञायत इति। उदुंबरं ताम्रं। इदं च ब्राह्म
णस्याप्यहर्तुर्न क्षत्रियादेः। तस्य सुवर्णस्तेयकृद्विप्र इत्युपक्रम्य सकृद्धन्यात्तु तं स्वयमिति सर्वनाम्नाभिप्रेतमपि मनुनावधो
पदेशात्। यस्तु न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थितमिति वधनिषेधः स दंडतया न प्रायश्चित्ततयेति। वधेन तु शुध्य
ति स्तेनो ब्राह्मणस्तपसैव वेति मानवात्। एवकारश्च वधदंडाभावप्रतिषेधार्थः। यत्तु यद्येतद्वचनं ब्राह्मणस्य परे
वधात्। तेनैवकारकरणाद्ब्राह्मणस्याप्युराधिपात्तप एवेत्यनेनैव प्रतिषेधो वधस्य नान्यदंडप्रतिषेधोक्तिर्ब्राह्मणस्य कदा
चनेति भवति भविष्यवचनेनैव धनिषेधकामिति प्राप्ते एतत्तदेवैवकारकरणाद्ब्राह्मणस्य वधप्रतिषेधस्तप एवेत्यनेन
न ब्राह्मणस्य दंडप्रतिषेधोक्तिश्च कदाचनेति व्याख्येयं। अन्यथा चकारोक्तसमुच्चयानुपपत्तिः। न च वधदंडाभावप्र
तिषेधकत्वेनास्य व्याख्याने प्रतिषेधप्रसिद्धिः। आहुः परिहार्यो राज्ञा अवध्यश्चादंड्यश्चापरिवाद्यश्चापरिहार्यश्चाव
हिष्कार्यश्चेति गौतमीये ब्राह्मणस्य वधदंडाभावस्योक्तेन प्रतिषेधप्रसिद्धेः। यदपि वाशब्दोपादानाद्धीरतपो वा ब्रा
ह्मणस्य तु दंडो वा कीर्तितः तल्लक्षेर्वधस्तु न कदाचनेति भविष्यवचनं तद्दक्षकृतब्राह्मणविषयमुक्तं गौतमवाक्या
धारणेया। तस्मात्सुवर्णस्तेये वधदंडावपि ब्राह्मणस्येति सिद्धं। विप्रपदं च सर्ववर्णोपलक्षणं। क्षत्रादयस्तपो वर्ण

१९

इति भविष्यवचनात् । पर्णपदं चानुलोमादीनामप्युपलक्षणं । इयश्चित्तीयते नर इति तेषामपि निषेधाधिकारात् । इदं चो
भयोः सगुणत्वे । सगुणस्वामिकस्य निर्गुणेनापहारे तु विशेषो भविष्ये । अष्टविप्रसुवर्णं तु अभूतमपहृत्य च । सविशेषानु
पं ध्वं च ब्राह्मणो भूत्वा वल्कलभृत् । प्रायश्चित्तमिदं कुर्यात्त्रिवीयगदतोऽमानिष्कालकोद्भूतान्भृत्क आत्मानं पावके दहेद्
ति । अभूते पंचनिष्काधिकपरिमाणमधस्तात्प्रायश्चित्तांतराम्नानात् । विशेषानुबंधोपागाद्यर्थकल्पितत्वाद्भूतमसे
त्कर्मोपलक्षणं तेन सगुणस्वामिकं अभूतं पामाद्युपकल्पितं वा हृत्वा निर्गुणस्येदं प्रायश्चित्तमित्यर्थः । निर्गुणस्य सगु
णेनापहारे पितृवैवाविप्रस्य गुणवान्विप्रो निर्गुणस्यापहृत्य सतु । चतुर्थकाले भुंजानस्त्रिभिर्वर्षैर्विशुध्यतीति । द्वाविंय
स्यापहृतु भविष्ये । अपहृत्य सुवर्णं तु ब्राह्मणस्य गुणाधिपा । पंचनिष्कप्रमाणं तु राजानं क्षत्रियोऽग्रजे । तस्माद्दोर्द्धं
वरं शस्त्रं वा पापात्मने हन्ते द्रुह । निमीलिताक्षो जह्रे स्वशस्त्रात्वामरणाच्छुद्धिविधि । इदमुभयोः सगुणत्वे निर्गुणत्वे तु तत्रै
वा । निर्गुणस्य कार्यदा विप्रोऽपहर्ता क्षत्रियस्तथा । गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तस्करमिति । अत्र स्वपातिकमरणे
नानिर्गुणविप्रत्वान्निश्चितमरणस्य पूर्वस्य सगुणविषयत्वं युक्तं । तेन च नामधारकब्राह्मणादिविषयत्वं यत्तत्र त्वयेति ब्रा

वि॰ ०५२ २०

हरणविषयत्वं वास्येति निरस्तं। पातकिमरणत्वं चास्यानुपदं स्पष्टयिष्यामः। सगुणस्वामिकस्य निर्गुणेऽपहारेऽपि तत्रैव।
त्रैवादयस्त्र्यो वर्णा निर्गुणा ब्राह्मणास्तत्रयसः। गुणाढ्यस्य हविःप्रस्य पंचनिष्कान् हरंति। निष्कालकादि विधिना दग्ध्वा
त्मानं तु पावके। अग्र्यस्तेयु मरणाद्धी रतन्निर्यात्यतु तस्यैव इति। तदपहृतद्रव्यं निर्यात्य स्वामिने दत्त्वेत्यर्थः। अत्रापि शुद्धं चेत्क
मः। इदं च कामतोऽपहारे। कामतस्त्वकृतं यत्स्यात्तत्रान्यथा वधमर्हतीति शातातपस्मरणात्। मरणसमं चैतत्स्वमेध स्तीर्यानु
सरणं चतुर्विंशतिवार्षिकं व्रतं चेत्यादि पूर्ववत्कल्पनीयं। अकामतस्त्वष्टातिपरिमाणभेदेन प्रायश्चित्तभेदः। षट्त्रिं
शन्नेतो वालाग्रमात्रमपहृते प्राणायामं समाचरेत्। लिक्षामात्रे पिचत्रयशाणायामत्रयं यूकाः। राजसर्षपमात्रे च प्राणाया
मचतुष्टयं गायत्र्यष्टसहस्रं च पंचजेत्पापविशुद्धये। गौरसर्षपमात्रे तु सावित्रीं वै दिनं जपेत्। यवमात्रे सुवर्णस्य प्रायश्चि
त्तं दिनद्वयं। सुवर्णकृष्णलस्तेयेवमपहृत्य द्विजोत्तमः। कृच्छ्रं सांतपनं कुर्यात्तत्पापस्य विशुद्धये। अपहृत्य सुवर्णस्य माषमा
त्रं द्विजाधमः। गोमूत्रयावकाहारस्त्रिभिर्मासैर्विशुध्यति। सुवर्णस्यापहरणे च त्वहं यावकी भवेत्। अर्धचांद्रायणं तिक
शेयमयं वा नेह व्रतमिति। अर्धपंचनिष्कप्रमाणमितस्त्येको न तु द्विनिष्कस्तेयेऽप्युद्दीववरेत्सकृच्छ्रंपजेद्भाकेतुना द्विजः।

२०

२२६

तीर्थानि वागमन्विष्टं स्यात् ततः स्तेनैर्यदि मुच्यत इत्यविस्मरणात्। क्रतुस्वर्जिदादिः तीर्थानि त्रीणि बहुवचनात् तु निष्कहेमस्तेये
न शाद्वं एतदेव व्रतं स्तेनः पादन्यूनं समाचरेदिति व्यासस्मरणात्। यद्वा तु स्तेयानन्तरमेव जातानुतापः अत्यर्पयति तदा त्रैवार्षि
कं। यथाङ्गिराः। महापातकसंयुक्ता वर्षैः शुध्यन्ति ते त्रिभिरिति। इदं चाकामतः। अकामतस्तु वार्षिकमेव। स्तेयं कृत्वा सु
रां पीत्वा कृच्छ्रं संवत्सरं चरेदित्यापस्तम्बीयात्। मनसापहारे तु सुमन्तुः। सुवर्णस्तेयी द्वादशरात्रं वायुभक्षः पूतो भवतीति। सर्वेषा
मापादितसुवर्णभावस्य ताम्रादेः स्तेये न महापातकं मुख्यजातिसमवायाभावादिति ज्ञेयम्। असुवर्णभ्रमेणापहरतोऽपि न
महापातकम्। अपहारकर्मणोऽसुवर्णत्वात्। पारदेऽपि लिप्तसुवर्णरजतबुद्ध्यापहरतस्तु महापातकं भवत्येव वा स्तेव सुवर्ण
पहारत्वात्। सुवर्णसंसृष्टताम्रादिहरणेऽपि सुवर्णस्तेयमेव। एषद्राज्ञाइवाज्ञत्वसंसृष्टेऽपि सुवर्णत्वानपायादित्या
हुः। तच्चियारिसुवर्णस्तेयस्योपपातकत्वान्न तत्प्रायश्चित्तं तत्रैव वक्ष्यामः। मुसलार्पणस्य रूपो जनमाह॥ ॥वधात्त्रा
णाद्वा शुद्धो भवति॥२॥ ॥वधाद्राजकृतमुसलप्रहारजन्यात् प्राणवियोगात् पूतो भवति। अथ तेन प्रहारेण न म्रियते तथा
पि शुध्यत्येव। निःशंकेनापि वेद्राज्ञा हतो न म्रियते शुद्धः। स पत्येव न संदेहो यदि जीवति साद्विजः इति भविष्यस्मरणात्।

मतकल्पः अहोरात्रौ जीवन्नपि विमुच्यतीति योगिस्मरणं च यदि पुनरुत्पन्नकाले न राज्ञा पुनरेवं माकार्षीरित्यनुशिष्य
हत एवत्स्यैतत्तथापि मुच्यते हतः शुद्धिमाप्नोतीति राज्ञासौ मुक्त एव वेति गौतमस्मरणात् । शासनाद्वा विमोक्षाद्वा स्ते
नः स्तेयाद्विमुच्यत इति मानवाच्च । न चाकारणिकं मुक्तापातो राजवचनस्यैवाशौचवचनापि शोधकत्वात् । पन्ना मुक्तेन
त्वी राजेति गौतमीयं तत्र ज्ञेयं वा हननेनैव तत्वायं वोध्यति न राजमुक्तस्य शुद्धमात्रमपीति । अकामतः सुवर्णस्तेये प्र
आह ॥ ॥महाव्रतं द्वादशाब्दानि वा कुर्यात् ॥३॥ ॥वने पर्णकुटीं कृत्वेत्युक्तं महाव्रतं तदकामतउक्तपरिमाणसु
वर्णस्तेये द्वादशाब्दानि कुर्यात् । वा शब्दो व्यवस्थितविकल्पार्थः । उक्तप्राणांतिकं ज्ञेयमथवा बाल्लहतेति षड्विंश
न्मतोदि । अनिवेदनेषु स्तेनेषु रापव्रतमा । वक्ष्या । आत्मतुल्यं सुवर्णं वा दद्याद्वा विप्रतुष्टिकृदिति योगिस्मरणं च अ
लहेतुरापव्रतयोर्विकल्पः । स्वतुल्यसुवर्णदानमतिधनिकविषयं सुवर्णस्तेये प्रसंगेनापायमाह ॥ ॥निक्षेपाप
हारी वा ॥४॥ ॥निक्षेपः सुवर्णातिरिक्तस्याकामतोपहारी च कारादश्वरत्नादिहारी च द्वादशाब्दं महाव्रतं कुर्यात् । का
मतः प्रागुक्तमश्वमेधादि ज्ञेयं । उपपातकसंज्ञं आह ॥ ॥धान्यधनापहारी च कृच्छ्रमब्दं ॥५॥ ॥धान्यं व्रीहियवादि ।

धनेवस्त्रमाणं ताम्ररजतादिपरिमाणविशेषार्थमत्रोपादानं चकारात्सिद्धान्नं च वा लक्षणस्वमेतदपहृत्याब्दं कृच्छ्रं चरेत् ए
तच्चकामतः । यथाह मनुः । धान्यान्नधनचौर्याणि कृत्वा कामाद्द्विजोत्तमः । सजातीयगृहादेव कृच्छ्राब्देन विशुध्यतीति । धान्यं द
शकुंभपरिमितं अधिके वधस्मरणेन प्रायश्चित्तगौरवात् । धान्यं दशभ्यः कुंभेभ्यो हरतोभ्यधिकं वध इति मानवात् । कुंभप
रिमाणं त्वाह कात्यायनः । दशद्रोणा भवेत्खारी कुंभोपि द्रोणविंशतिरिति । सिद्धान्नेपि तावदेव । धनं तन्मूल्यपर्याप्तं । न्यू
नाधिकभावेन प्रायश्चित्ततारतम्यात् । अकामतः शंखः । तिलधान्यान्नवस्त्राणां शय्यानामासनस्य च । संवत्सरार्द्धं कुर्वी
त व्रतमेतत्समाहित इति । क्षत्रियादिस्वामिकापहारे तु पादपादहान्या कल्प्यं । स्वल्पशब्दे न वक्तव्ये यद्धनशब्दोपादानं त
द्ब्राह्मणातिरिक्तस्वामिकसुवर्णापहारेपीदमेव प्रायश्चित्तमिति बोधयितुं । तच्च निर्गुणक्षत्रियादिस्वामिकसुवर्ण
रूपगुणवद्ब्राह्मणेनापहारे वार्षिकं स्मृतौक्तं । अधमस्यापहरणे मणीनां रजतस्य च । धनापहरणे चैव कुर्यात्संवत्सरं
व्रतमिति मानवात् । अधमो ब्राह्मणापेक्षया क्षत्रियः द्विजोत्तमसजातीयस्य ग्रहणाभिधानात् । धनं सुवर्णरजताद्यु
त्कृष्टत्वात् । निर्गुणस्वामिकस्य निर्गुणेनापहारे भविष्योक्तं । यदा च निर्गुणः स्वामी क्षत्रियो वैश्य एव वा । हर्ता च ब्राह्मण

स्यात्तदपसंवभाषितं चतुर्थकालेऽभुंजानस्त्रिकालं स्नानमाचरेत्।स्थानासनाभ्यां विहरंस्त्रिभिर्वर्षैर्विशुध्यतीति।वा
पद्धाकूडोपादानां इदं च पंचनिष्कापहारे।न्यूनापहारे तु गुणवतो भिर्गुणेनैतद्देवकार्यं।इत्यादीनां गुणवतामन्येन्त्व
पहृते तु गुहाऽल्पानुवंधे च तथा एतद्देवमवेद्धिमो इति भविष्यात्।अल्पानुवंधे लौकिकाकर्मोपयोगिनि एतद्वे
वार्षिकं मनुष्यादिस्तेयप्रसंगाद्ध॥ ॥मनुष्यस्त्रीकूपक्षेत्रवापीनामपहारे चांद्रायणं॥६॥ ॥मनुष्यो दासः स्त्री दासी से
यं प्रसिद्धं।एषां त्रियादिस्वामिकानामपकृष्टजातीयानामपहारे चांद्रायणं।ब्राह्मणस्वामिकापहारे उत्कृष्टजातीय
पहारे वा महापातकसमामिति तु क्तं।पुरुषाणां कुलीनानां नारीणां च विशेषतः मुख्यानां चैव रत्नानां हरणे वधमर्हतीति मा
नवे महापातकीयदंडस्मरणात्।वापीकूपयोर्नस्वरूपेणाहरणं स्तुक्ष्णयोरपितयोरपहारे प्रायश्चित्तप्रसंगात्।किं
तु जलवतामेव वापीकूपजलानां चशुद्धिस्थां द्रायणं स्मृतमिति मानवात्।वाप्यादिना जलविशेषणाद्वाप्यादिपरि
मितत्वं गम्यते।न कुंभादिपरिमितत्वं तेन न तत्रेदं प्रायश्चित्तं किं त्वन्यदेव।इदं तूत्कृष्टजलविषयं।उत्कृष्टत्वं तु
सर्वसाधारणत्वात्तद्दोषः।क्षेत्रं वीजोत्पत्तियोग्यभूः निवर्तनपरिमाणं तदपहारे चांद्रायणं।तन्न्यूनाधिका

पहारे प्रायश्चित्तं तदर्धं कल्प्यं। सीसादिस्तेय आह॥ ॥द्रव्याणामल्पसाराणां सांतपनं॥७॥ ॥अल्पसाराणि अल्पानि त्रपु
सीसकादीनि तृणकाष्ठादीनां पृथगभिधानात्। तादृशद्रव्यापहारे सांतपनं आह साध्वं। पंचविंशतिपणलभ्यविषय
मेतत्। अधिकमूल्यविषये धिकं कांस्यायस्ताम्रसीसानामर्धकृच्छ्रं इमे वदंतीति जाबालिस्मरणात्। अर्धपादकृच्छ्रः
ततोप्यधिकमूल्ये हकृच्छ्रार्द्धं। भक्ष्यादिस्तेय आह॥ ॥भक्ष्यभोज्यपानशय्यासनपुष्पमूलफलानां पंचगव्यपानं॥८॥
॥भक्ष्यं मोदकादि भोज्यमोदनादि पानं दुग्धादि शय्या प्रसिद्धा। आसनं पीठादि पुष्पं मल्लिकादि मूलमार्द्रकादि
फलमाम्रादि। एषामेकवारात्तृप्तिभोजनपर्याप्तानां हरणे। भोजनपरिहारेण पंचगव्याशनं। द्विवारभोजनपर्या
प्तहरणे त्रिरात्रं। यथाह पैठीनसिः। भक्ष्यभोज्यस्यान्नस्योदरपूरणमात्रस्य हरणे एकरात्रं द्विवारोदरपूरणमात्रस्य
रात्रं पंचगव्याहारतेति। एकरात्रशयनार्थशय्यापहारे चैवं बहुमूल्याया अत्यंतापहारे तु शय्यानामामिषस्य च। संव
त्सरं हि कुर्वीतेति शंखोक्तं ज्ञेयं। आसनेप्येवमेव व्यवस्था। पुष्पादीनामप्येकरात्रोपभोग्यानां हरणे पंचगव्याशनं। त्रिरात्र
षड्रात्रोपभोग्यापहारे तु पादार्धकृच्छ्रौ। पक्वान्नमौषधं तैलं शय्या वा सर्वउपानहौ। उदके फलमूलेषु पुष्पपर्णेषु गं

पिण्याकगुडमधुमांसेषु च्छर्द्धं कृच्छ्रार्द्धमाचरेदिति जाबालोक्तं ज्ञेयं। बहुमूल्यानां चिरमपहारे तु मूलानां कुसुमस्य चाम-
सार्द्धं तु व्रतं कुर्यादिति शंखोक्तं ज्ञेयं। तृणादिस्तेयप्रायश्चित्तमाह॥ ॥तृणकाष्ठद्रुमशुष्कान्नगुडवस्त्रचर्मामिषाणां त्रिरात्र-
मुपवसेत्॥४॥ ॥तृणं ग्रहाहारो गवादेः। काष्ठं गृहपाकोपयोगि। द्रुमोऽनुपभोग्यफलपुष्पः। शुष्कान्नं तंडुलादि।
गुडः प्रसिद्धः। वस्त्रं कौशेयादिनाच्छादनयोग्यं चर्म कृष्णाजिनयोग्यं। आमिषं मत्स्यादि। एषां स्तेये त्रिरात्रमुपवसेत्। दशा-
हपर्यन्तापहारे मनुः। चललानां गुडानां च मूलानां कुसुमस्य च। मासार्द्धं तु व्रतं कुर्यादेतदेव समाहितः इति विंशतिरा-
त्रपर्यन्तापहारे मासं तृणकाष्ठतक्राणां रसानामपहारकः। मासमेतद्व्रतं कुर्याद्धनानां सर्पिषां तथेति मान-
वात्। अस्यापवादमाह शंखः। तृणस्तेयमन्त्रपेकाष्ठस्तेयं च तृणं गवे। कन्याहरणं यत्र स्तेयं यो हरत्यन्नलंकृतामिति।
अन्नपेयं तस्मात्तोयं योगी स्वशेषि हि जस्तत्तेयं न प्राप्नोति सर्वतः स्वयं दाहरेदिति। तद्रुमयमप्येकाहपर्यन्तस्ते-
यपेक्षार्हं॥ ॥मणिमुक्ताप्रवालताम्ररजतायःकांस्यानां द्वादशाहं कणान्नमश्नीयात्॥१०॥ ॥मण्यादेः प्रसि-
द्धानां स्तेयमेकाहमल्पद्वादशगुणमूल्यमूल्यानां स्तेये द्वादशाहं कणान्नमश्नीयात्। कामतश्चेदमकामतोऽर्द्धं। कां

स्यायस्ताम्रसीसानामर्द्धकृच्छ्रार्द्धमेव चेति। अर्द्धपादकृच्छ्रः सतत्परिमाणान्न्यूनपरिमाणे न्नलोगवाण
दशकन्यूनमूल्यस्तेये तु चतुर्विंशतिमते। रत्नानां हरणे विंशहस्थे चांद्रायणव्रतमिति। गवाणसहस्रन्यू
ल्यस्तेये मनुः। अधमस्यापहरणे मणीनां रजतस्य च। धनापहरणे चैव कुर्यात्संवत्सरं व्रतमिति। गवानसहस्रा
धिकमूल्यरत्नाद्यपहारे तु महापातकसाम्यं। निक्षेपस्यापहरणं नराश्वरजतस्य च। भूमिवज्रमणीनां च रुक्मस्ते
यसमं स्मृतं। गुर्व्वीनां चैव रत्नानां हरणे च धमर्हतीति च मानवात्। तच्च स्पष्टमुक्तं चतुर्विंशतिमते। रूप्यं हृत्वा द्विजो
माहावरे चांद्रायणव्रतं। गवाणदशकाद्र्ध्वं मासं तावद्गुणं चरेत्। आसहस्राच्च त्रिगुणमूर्द्ध्वं हि मोविधिः स्मृत इति।
कार्पासादिस्तेये यज्ञाह॥ ॥कार्पासकीटजोर्णाद्यपहरणे त्रिरात्रं पयसा वर्त्तेत॥२१॥ ॥कार्पासं तूलं। कीटजं तस
रीपट्टादि। ऊर्णा मेषादिलोम। आदिशब्दाद्वल्कलमादि। तेनैवं एषां स्तेये त्रिरात्रं पयसा वर्त्तेत। इदं च पादकृच्छ्रतुल्य
त्वादकामतः। कामतोर्द्धकृच्छ्रः। गुडकार्पासधान्यानि त्र्यर्द्धकृच्छ्रार्द्धमेव चेति जाबालस्मरणात्। तूलादिग्रहणे
नैत्पल्लतिकानां वस्त्रादीनामप्येतदेव प्रायश्चित्तं दर्शितं तेनैव। शय्यासनवासनपानहाविति। एतच्च द्विमोजना

ईमत्स्यमूल्यलभ्यपत्रलादिविषयं।अधिके तिलधान्यान्नवस्त्राणांसेवन्मरार्द्धत्वीतीतिप्रायश्चित्ताधिक्यदर्शनात्।
द्विशफादिस्तेयआह॥ ॥द्विशफैकशफापहरणे त्रिरात्रमुपवसेत्॥१२॥ ॥द्विशफाश्चजादयः एकशफाःखर
दयः।एषांस्तेये त्रिरात्रमुपवसेत्।इदमपि हिभोजनार्हमत्स्यमूल्यलभ्याजादिविषयं।अधिके धिकं कल्प्यं।ग
वाश्वादिषुतु·हिरण्यरत्नकौशेयस्त्रीपुंगोगजवाजिनः।देवब्राह्मणराज्ञांचविज्ञेयंद्रव्यमुत्तमम्।इत्युत्त
मत्वेनोत्तमसाहसविधानात्सुवर्णस्तेयसमत्वाच्चतत्प्रायश्चित्तमेवज्ञेयं।पक्ष्यादिस्तेयत्राह॥ ॥पक्षि
गंधौषधिरज्जुवैदलानामपहरणे दिनमुपवसेत्॥१३॥ ॥पक्षिणःशुकादयः।गंधःकर्पूरादिः।औषध
योगुडूच्यादयः।रज्जुर्मुञ्जादिमयीवरत्रा।वैदलंवैणवंशूर्पादि।एषांस्तेयेएकाहमुपवासः।एतच्चैकवा
रभक्ष्यमूल्यलभ्यपक्ष्यादिस्तेयविषयं।मूल्याधिक्येधिकं।मासंमेसर्पिष्पानचेतिशंखस्मरणात्।
स्तेयप्रायश्चित्तविधिशेषमाह॥ ॥दत्त्वैवापहृतंद्रव्यंधनिकस्याप्युपायतः।प्रायश्चित्तंत[illegible]तः
कुर्यात्कल्मषस्यापनुत्तये॥१३॥ ॥धनस्वामिनेपहृतंद्रव्यंधनिकस्याप्युपायतः।प्रायश्चित्तं

कार्यं द्रव्यदानस्यापि प्रायश्चित्तवद्देवपापक्षयहेतुत्वात् । न च विकल्पः । दद्याद्वेति त्वेवकारान्वयेन दानस्य पू
र्वंगतावबोधनात् । तच्चैकादशगुणं देयं । स्तेयेन ह्यस्वभूतस्य सुवर्णादेर्हर्तेषु नः स्वामिनोपहृतं देयं स्वर्गोऽत्वे
कादशाधिकमिति स्मरणात् । तदशक्तौ चतुर्गुणं देयं । हृत्वा चतुर्गुणं दत्वा प्रायश्चित्तं समाचरेदिति चतुर्विं
शतिमतात् । तदशक्तौ सममपि । यद्यस्यापहृतं द्रव्यं तत्तस्यैव विनिर्दिशेदिति भविष्यात् । तत्राशेतस्य तिरू
पं मापणेप्रणष्टं तां दद्यात्तत्प्रतिरूपकं । तस्याननुरूपं मूल्यं वा दद्यादित्यत्र वाच्यम इति पाराशर्यात् । तस्याप्यसं
भवे चतुर्गुणं व्रतं कार्यं । तदभावे कांचनस्य स्याद्व्रतमेतच्चतुर्गुणमिति वैवस्वतात् । तत्राप्यशक्तौ तत्तुष्टिमेवोत्पा
दयेत् । यो यस्याहिंस्याद्द्रव्याणि ज्ञानतोऽज्ञानतोपि वा । स तस्योत्पादयेत्तुष्टिं राज्ञे दद्याच्च तत्सममिति स्मरणा
त् । दंडदाने च विशेषो भविष्ये । आनीयते बलाद्यस्तु स्तेनो वै पार्थिवं प्रति । प्रायश्चित्तं तु तस्योक्तं दंडश्चचतुरस्स
त्तमः । स्वयं गमने प्रेत्तु ब्राह्मणस्य नृपं प्रति । दंडदानस्य चाशक्तौ विज्ञेयं तु तपो गृहात् । तपः कर्त्तुमशक्तेश्च देहदंडेन
व विशुध्यतीति ॥ स्तेयस्यैहिकं फलमाह ॥ ॥ यद्यत्परेभ्यस्त्वादद्यात्तु रूपस्तो निरंकुशः । तेन तेन विहीनः स्या

वि०टी५३
२५

घ्नन्यत्राभिजायते॥१५॥ ॥यागमिमदेति॥ त्रयस्यैहिंसंमति ऋम्पयद्वइयमपहरन्ति तेन तेनैव विहीनस्तत्कर्म लब्धासुतस्सुताउ यो निषुजायते॥ स्तेयप्रायश्चित्तानो निषेधातिक्रमनिमित्तत्वेन तत्सापेक्षत्वात्तमेवाह॥ ॥जीवि तं धर्मकामौ च धनेयस्मात्प्रतिष्ठितौ तस्मात्सर्वप्रयत्नेन धनहिंसां विवर्जयेत्॥१६॥ ॥यतो जीवितं प्राणधारण महाराहिंसा धनतया धर्मो दानादिकर्म तथा कामश्चोपभोगविषयतया धने नैव साध्यते ओ धनापहारे परकीयप्राणधर्मकामनाशप्रसक्तेः सर्वेण कायवाङ्मनोनव्यापारेण धनस्य हिंसा परस्त्रयोः॥१७॥ ॥यतः प्राणिहिंसायां प्राणमात्रस्यैव नाशो धनहिंसायां तु प्राणधर्मकामानां त्रयाणां नाशो ऽतः प्राणहिंसकात् धनहिंसको गरीयान्॥ ॥इति श्री विष्णुस्मृतिविवृतौ श्रीमत्यां वैजयंत्यां द्विपंचाशत्तमोऽध्यायः॥ ॥क्रमप्राप्तं गुरुतल्पप्रायश्चित्तं त्रिपंचाशत्तमेनाह॥ ॥अथागम्यागमने महाव्रतविधानेन द्वादश वर्षाणि प्राजापत्यं कुर्यात्॥१॥ ॥यद्यपि स्वपत्नीव्यतिरिक्ताः सर्वास्त्रियः स्त्रियो ऽगम्या एव तथाप्यत्र क्रमेण गुरुतल्पपरत्वमगम्याशब्दस्याध्यवसीयते॥ तत्र मातृस्वसा पितृभार्या त

स्याम कामतोगमने पूर्वोक्त महाव्रतविधानेन वने न सन्न इदं प्राजापत्यं चरेदिति। यथाह मनुः। खट्वांगी चीरवा
सा वा श्मश्रुलो विजने वने। प्राजापत्यं चरेत्कृच्छ्रमब्दमेकं समाहितः इति। कामतस्तु गमने याज्ञवल्क्यः। प्राजापत्
यं चरेत्कृच्छ्रं समा वा गुरुतल्पगः इति। समा वर्षत्रयं। इदमेव वैश्यायामकामतो गमने। गमने गुरुभार्यायाः पितृम
र्यामिमेतथा। अब्दं न यमकामात्तु नित्यं समाचरेदिति इद्ध मनुस्मरणात्। कामतो वैश्यागमने षड्वार्षिकं। ब्राह्म
णीपुत्रस्य वैश्यायां षड्वार्षिकमिति पुलस्त्यस्मरणात्। इदमेव क्षत्रियायामकामतो गमने। कामतो गमने द्वा
दशवार्षिकविधानात्। यथाह शंखः। अधःशायी जटाधारी पर्णमूलफलाशनः। एककालं समश्नन्त्वै व
र्षे तु द्वादशे गते। रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः। व्रतेनैतेन शुध्यंति महापातकिनस्त्विमे इति।
एतदेव कामतो ब्राह्मणीगमने। कामतस्त्वेकमरणांतिकं। पितृभार्यां तु विज्ञाय सवर्णां यो धिगच्छति
ज्ञन नो चाप्य विज्ञाय नाप्नुतः शुद्धिमाप्नुयादिति षट्त्रिंशन्मतात्। मरणांतिकं तु आह योगीश्वरः। त
प्तेयःशयने सार्धमायस्या योषितास्त्वपेदिति। स्वोपञ्च स्वकर्म विख्याप्य कार्यः। गुरुतल्पे भिभा

र्थेन इति मानवात् । एतच्चाभयेच्छानः प्रवृत्तौ । छन्नयां गौतमः । तप्ते लौहशयने गुरुतल्पगः शयीत सूर्मीं वा
श्लिष्येज्ज्वलंतीमिति । अत्रैच्छया विकल्पः । सूर्मी लौही शैली मृन्मयी वा स्त्रीप्रतिमा । गुरुतल्पगो मृन्मयीमा
यसीं वा स्त्रीप्रतिकृतिमिति हारीतस्मरणात् । गुरुतल्पी शिलां तप्तामितिं गिरः स्मरणात् । आलिंगनं चोपलो
मकेशेन छन्नामङ्गेन कार्यं । निष्कालको घृताभ्यक्तस्तप्तां सूर्मीं परिष्वज्य मरणात् पूतो भवतीति वासिष्ठात्
स्वेच्छया प्रवृत्तावपि स एव । लिंगं वा सवृषणमुत्कृत्यांजलावाधाय दक्षिणाप्रतीच्योर्व्रजेदजिह्ममाशरी
रनिपातात् । दक्षिणां वा प्रतीचीं वेत्यर्थः । गुरुतल्पगो दक्षिणां प्रतीच्योरन्यतरेण गच्छेदिति बौधायन
स्मरणात् । लिंगादिच्छेदश्चास्त्वयं कार्यः । स्वयं वा शिश्नवृषणावित्ति मानवात् । गच्छेच्चानीक्षमाणः । अ
नीक्षमाणो गच्छेदिति शंखस्मरणात् । धावन् गच्छन् कूपादिन परिहरेत् । यत्रैव प्रतिहतस्तत्रैव तिष्ठेदा
प्रलयाद् वासिष्ठात् । यदि स्वयं न करोति तदा राज्ञा कार्यं । शिश्नस्योत्कर्तनात्तत्रनान्यो दंडो विधी
यत इति नारदस्मरणात् । नावता । विशुध्यति । दंडेनैव विशुध्यतीति मनुविष्णात् । धनदंडे प्रायश्चित्तं प्र

९

थक्कार्यं। प्रायश्चित्तं तु तस्योक्तं दंड श्च सुरसत्तमेति। भविष्यात्। इदमेव क्षत्रियायां कामतोभ्यासे। दंडरहितं शि
श्नोत्कर्त्तनं। मत्यागत्वा पुनर्भार्यां पुनर्गत्वात्वकामतः। श्रेडमा ञ्जंसमुत्कृत्य शुष्केज्ञाचन्मृतो पिवेत्तिज्ञात्कार्ये
स्मरणात्। अकामतो मरणांतं ब्रह्मचर्यं। अभ्यस्य विप्रो वैश्यायां गुरोर्ज्ञानमोहितः। षडंगं ब्रह्मचर्यं च सम्च
रेद्यावदायुषमिति हारीतस्मरणात्। अवामतोभ्यासे षडब्दं। प्रातिलोम्येन व्यवाये योगीश्वरः। प्राति लोम्ये
वधः पुंसो नार्याः कर्णादिकर्त्तनमिति। वधप्रकारस्य विशिष्ठो ज्ञेयः। स यथा शूद्रादीनां ब्राह्मणीगम
ने वीरणालोहितदर्भशरपत्रैर्यथाक्रमं वेष्टयित्वा ग्नौ प्रासनं ब्राह्मण्या वपनं सर्पिषा भ्यंजनं नग्नगोरश्व
तखरारोपणं महापथ ब्राजनं चेति। एवं वैश्यस्य राजन्यां। शूद्रस्य राजन्यवैश्ययोः क्षत्रियावैश्या शूद्रा ण्यां
चेति। कामतः प्रच्छन्नस्य रेतः सेकादर्वाग् निर्हृतो पुलस्त्यः। ब्राह्मणीपुत्रस्य क्षत्रियायां मातरि गमने पादह्
न्याद्द्वादशवार्षिकं एवमन्यास्विति। अथ मर्थः। यस्यां कामतो गमने यद्व्रतं तत्तदेव तत्र रेतः सेकादर्वा
क्पादोनं। ततश्च कामतो ब्राह्मणस्य ब्राह्मण्यामष्टादशाब्दिकं मरणांतं वैकल्पिकं वक्तु विंशतिवार्षिकं सपा

१३

वि०टी०५३
२०

दन्तसत्वात्‌ । एवं क्षत्रियायां न वार्षं वैश्यायां सार्द्धवत्सरवार्षिकं शूद्रायां सपाद द्विवार्षिकमिति । एवमेवाक
मतोपि प्रवृत्तस्य रेतःसेकादर्वाग्निवृत्तौ ज्ञेयमित्यापूह्यं । सर्वत्रैतत्प्रायश्चित्तजातं सकृद्गमनविषयं । उ
क्तेर्वृत्त्यागमने विशेषः । तत्र गुरुपत्न्यां सवर्णाऽऽवृत्तायामकामतः सकृद्गमने याज्ञवल्क्यः । चान्द्रायणं
चरेन्मासान्पयस्विन्यादसंहितामित्र । अभ्यासे द्विगुणं । तत्रैव कामतः सकृद्गमने उशनाः । गुरुत
ल्पाभिगामी संवत्सरं ब्रह्महव्रतं षण्मासान्वा तप्तकृच्छ्रं चरेदिति । तत्र सकृद्गमने षण्मासाः । अभ्यासे
द्वैमिति ज्ञेयं । तादृश्यामेव दौत्रियायां कामतः सकृद्गमने व्याघ्रः । कृच्छ्रं चैवातिकृच्छ्रं च तथा कृच्छ्रा
तिकृच्छ्रकं । चरेन्मासत्रयं विप्रः क्षत्रियागमने गुरोरिति । तत्रारोहणे मासं कृच्छ्रः । रेतःसेकादर्वा
ग्निवृत्तौ मासद्वयमतिकृच्छ्रः । संपूर्णक्रियायां निवृत्तौ मासत्रयं कृच्छ्रातिकृच्छ्रः । तत्रैवाकामतः स
कृद्गमने कण्वः । चान्द्रायणं तप्तकृच्छ्रमतिकृच्छ्रं तथैव च । वा सकृद्गत्वा गुरोर्भार्यामज्ञाना
त्क्षत्रियां द्विजसत्तम इति । तत्रारोहणे वार्ग्निवृत्तौ मासं सान्तपनं । तत्रैवाकामतः सकृद्गमने श्वप

तिः। पूर्ववरात्रं तु नाश्नीयात्सप्ताष्टौ वा तथैव च। वैश्यां भार्यां गुरोर्गत्वा सकृदज्ञानतो द्विज इति। अत्राप्यारोह
णावीड्य्-हत्निप्रधान निर्हृतिषु पंचसप्ताष्टरात्रमनशनं। ताहृश्यामेव शूद्रायां कामतः सकृद्गमने ज
बालिः। अतिकृच्छ्रं तप्तकृच्छ्रं पराकं वा तथैव वा। गुरोः शूद्रां सकृद्गत्वा चरेद्द्विजः समाहित इति। अत्रापा
रोहणावीड्य्-हत्निप्रधान निर्हृतिषु क्रमेण सांतपन प्राजापत्य सप्तरात्रोपवासा ज्ञेयाः। स्त्रीणामप्य
येतदेव प्रायश्चित्तं। एषदोषश्च शुद्धिश्च पतितानामुदाहृता। स्त्रीणामपि प्रसक्तानामेष एव विधिः स्मृत इति
कात्यायनस्मरणात्। एष इति कामतो मरणमकामतो द्वादशाब्दं। छित्वा लिंगं वधस्तस्य सकामायाः
स्त्रियास्तथा। एतदेवव्रतं कार्यं योषित्सु पतितास्विति योगिस्मरणात्। एतदेवार्द्धं [illegible] ब्रह्महत्या
दित्रिषु स्त्रीणामर्द्धं प्रदातव्यमिति स्मरणात्। व्यभिचारे तु नार्द्धं [illegible]। यत्तु सः परदारेषु तद्वै नां चारये
द्व्रतमिति नियमात्। साधारण स्त्रियां न गुरुतल्पत्वं। जातुकर्णपारदार्ये च कन्यादूषणमेव च। सा
धारणस्त्रियो नास्ति गुरुतल्पत्वमेव चेति व्याघ्रस्मरणात्। अत्रागम्येति सामान्योपादानमनुपातकोप

पैतदेवप्रायश्चित्तमितिबोधयितुं।तत्रवर्णभेदेनोक्तमेवप्रायश्चित्तमुक्तापस्थयाव्यवस्थाप्यं।रेतःसिक्त्वाकुमारीषुस्वयोनिष्वंत्यजासुच
सपिण्डापत्यदारेषुप्राणत्यागोविधीयतइतियमः।योगीश्वरोपि।पितुःस्वसारंमातुश्चमातुलानींस्नुषामपि।मातुःसपत्नींभगिनीमाचार्यत
नयांतथा।आचार्यपत्नींस्वसुतांगच्छंस्तुगुरुतल्पगः।छित्त्वालिंगंवधस्तस्यसकामायाःस्त्रियाअपि।नारदः।मातामातृष्वसाश्वश्रूर्मातुला
नीपितृष्वसा।पितृव्यसखिशिष्यस्त्रीभगिनीतत्सखीस्नुषा।दुहिताचार्यभार्याचसगोत्राशरणागता।राज्ञीप्रव्रजिताधात्रीसाध्वीवर्णोत्तमा
चया।आसामन्यतमांगच्छन्गुरुतल्पगउच्यते।शिश्नस्योत्कर्तनात्तत्रनान्योदंडोविधीयते।मातात्रासवर्णासपत्नीमाता।एतच्चकामतोऽ
कामतस्तुद्वादशाब्दंयथाहजातूकर्ण्यः।आचार्यादेस्तुभार्यायांस्नुषायांगुरुतल्पव्रतंचरेत्।सवर्णापितृव्यदारगमनेभ्रातृभार्यागमेत
था।गुरुतल्पव्रतंकुर्यान्नान्यथानिष्कृतिर्भवेदिति।मनुरपि।गुरुतल्पव्रतंकुर्याद्रेतःसिक्त्वास्वयोनिषु।सख्युःपुत्रस्यचस्त्रीषुकुमा
रीष्वंत्यजासुच।याज्ञोपि।आश्रितस्यापिविदुषश्चाहितानेश्चयोगिनः।आचार्यस्यचगोत्रस्यभार्यांप्रव्रजितांतथा।धात्रींपुत्रींचपौ
त्रींस्वसारंमातुरस्यैवच।पितुःस्वसारंगत्वागुरुतल्पव्रतंचरेदिति।गच्छन्नेताःस्त्रियोमोहात्पराकेणविशुध्यतीति।अत्रोभय
त्रापिगुरुतल्पसमानानामुपलक्षणंसर्वासां।यथाहपराशरः।मातुराप्तांचभ्रातृजां।प्राजापत्यत्रयंचरेदिति।चतुर्विंशतिमतेपि

मातुष्वस्त्रियं गत्वा पितृव्यतनयां तथा। तप्तकृच्छ्रं प्रकुर्वीत षड्रात्रं तत्सुतासु च॥ भागिनेयीं द्विजो गत्वा चरेच्चांद्रायणव्रतं। व्रतं मा

तुलस्य सुतां गत्वा। पितुष्वस्त्रियां तथा। प्राजापत्यं प्रकुर्वीत हारीतवचनं यथा। मातृष्वस्त्रियां चैव भार्यां गत्वानुकामतः। पि

तृव्यतनयस्यैव सपादं कृच्छ्रमाचरेत्। दौहित्रीं पुत्रतनयां चरेच्चांद्रायणव्रतं। तत्सुतां चक्षुषां गत्वा पराकेनु समाचरेत्। संबंधिज

स्त्रियो गत्वा सपादं कृच्छ्रमाचरेत्। विधवागमने कृच्छ्रमहोरात्रसमन्वितं। सति भार्यां समारुह्य ज्ञातिस्वजनयोषितां। सकृत्वा

प्राकृतं कृच्छ्रं पादं कुर्यात्ततः पुनः। कुमारीगमने कृच्छ्रमहोरात्रसमन्वितं। सत्विभार्यां समारुह्य ज्ञातिस्वजनयोषितां सकृ

त्वा प्राकृतं कृच्छ्रं पादं कुर्यात्ततः पुनः। कुमारीगमने विप्रश्चरेच्चांद्रायणव्रतमिति। एतान्यपि वचनानुक्तविषय एव संबंधनार

तम्येन व्यवस्थाप्यानि। अोपपातके पारदार्ये आह॥ ॥परदारगमनेवं॥२॥ ॥गुरुतल्पतत्समव्यतिरिक्तस्वस्वजातिपरदा

रगमने ब्राह्मणस्येदं। अग्निहोत्रिणादि ब्राह्मणागमने द्विवार्षिकं। द्वे परदारे इति गौतमीयात्। ताद्दृश्विधश्रोत्रि

यपत्नीगमने त्र्यब्दं। त्रीणि श्रोत्रियभार्यायामिति गौतमीयात्। वर्णभेदेन चैषां व्यवस्था वैश्यायामवकीर्णः संवत्सरं ब्रह्म

यं त्रिषवणं चानुतिष्ठेत् क्षत्रियायां द्विवर्षं ब्राह्मण्यां वैश्यावच्छूद्रायां ब्राह्मणपरिणीतायामिति शंखस्मरणात् । ब्राह्मणपरि
णयः शूद्राया एव विशेषणेन वैश्यादीनां ब्राह्मण्यादिवायात् । तद्विशेषणत्वे च व्यवच्छेद्याभावेन वैयर्थ्यात् । ततश्चानेनैवोक्त
र्षेण साम्याद्वैश्याशूद्रासु द्विवार्षिकवार्षिकषाण्मासिकानि । वैश्यस्य वैश्याशूद्र्योर्वार्षिकषाण्मासिके । शूद्रस्य शूद्रायां
षाण्मासिकं । यथाह प्रजापतिः । विप्रो नृपस्य भार्यायां यत्करोति समागमं । तद्वद्दशियेणापि कार्यमत्रैव संगम इति । इ
ष्यभिचरितासु तथा च । ब्राह्मणो ब्राह्मणीं गच्छेदकामां यदि कामतः । कृच्छ्रं चान्द्रायणं कुर्यात् तदर्द्धमेव प्रमादतः । अर्द्ध
मेव सकामायां तस्मात्कृच्छ्रं सदाचरेत् । अर्द्धमेव नृपादीनां दारेषु ब्राह्मणस्य तु । एतद्व्रतं चरेत्सार्द्धं श्रोत्रियस्य परिग्रहे ।
श्रोत्रियस्य द्विगुणमगुप्ता सद्यमेव चेति । अत्र च सकृदिति विशेषणात् यदर्द्धमसकृद्विषय इति गम्यते । अकामतश्चेदं का
मतोऽपि स एव । विप्रो गो विष्ठ श्रेष्ठा चतुर्वर्णप्रस्त्रयः । क्रमेण पादशो हीनं व्रतं तासु गतश्चरेदिति । ब्राह्मणोपगन्तासु चातुर्व
र्ण्यस्त्रीषु ब्राह्मणो यदि गच्छेत् तदा संवत्सरव्रतमेव पादपादहीनक्रमेण कुर्यात् । अकामतः प्रातिलोम्येन गमने तु प्र

चेताःशूद्रस्यब्राह्मणींमोहाद्गच्छतःशुद्धिमिच्छतः।पूर्णमेवव्रतंदेयंमातायस्माद्धितस्यसा।पादहान्यान्यवर्णेषुगच्छतः
सार्ववर्णिकमिति।पूर्णंद्वादशाब्दंब्राह्मण्यांसर्वेषामन्यासुपादपादहानिः।कामतोवधःप्रातिलोम्येवधःपुंसोनार्याःक
र्णादिकर्त्तनमितिस्मरणात्।स्वैरिणीमनेतुशंखः।स्वैरिण्यांवृषल्यामवकीर्णःसचैलस्नातउदकुंभंदद्याद्वैश्यायां
चतुर्थकालाहारोब्राह्मणान्भोजयेत्।क्षत्रियायांत्रिरात्रोपोषितोयवाढकंदद्यात्।ब्राह्मण्यांषड्रात्रमुपोष्यघृतपात्रंदद्या
दिति।बंधकीगमनेषड्विंशन्मतं।ब्राह्मणींबंधकींगत्वा।किंविद्याद्विजातये।राजन्यांतुधनुर्दद्याद्वैश्यांगत्वातुचै
लकं।शूद्रांगत्वातुवैविप्रउदकुंभंद्विजातयइति।तल्लक्षणंचस्मृत्यंतरे।चतुर्थेस्वैरिणीप्रोक्तापंचमेबंधकीभवे
दिति।एतास्वेवप्रातिलोम्येनगमनेसंवर्त्तः।कथंचिद्ब्राह्मणींगच्छेत्क्षत्रियोवैश्यएववा।कृच्छ्रंसांतपनंवा
स्यात्प्रायश्चित्तंविशुद्धये।शूद्रस्तुब्राह्मणींगच्छेत्कथंचित्काममोहितः।गोमूत्रयावकाहारोमासेनैकेनशु
ध्यतीति।भोगेपत्नीत्वेतुतदेवद्विगुणं।गमनेतुव्रतंयत्स्याद्गर्भेतद्द्विगुणंभवेदितिबौधायनः।शूद्रांचतुर्विंशतिमतं।

वि०टी०५२

३०

दृष्टिल्याभिजातस्त्रा शिपिवैषैर्विशुध्यतीति॥ गोगमनेप्रायश्चित्तमाह॥ ॥गोघ्नं गोगमने च॥ ३॥ ॥गोगमने एवेर्क्तं
मासमेकं स्नानवापन इत्यादि गोवधोक्तं व्रतं कुर्यात्। कामतस्त्वेदमकामतः प्राजापत्यं गोघ्नवकीर्णिः प्राजापत्यं चरे
दिति शंखस्मरणात् स्मृत्यन्तरे॥ अभ्यासे चतुर्विंशतिमतो नरो गोगमनं कृत्वा षोडशायणव्रतमिति॥ अत्यंताभ्यासे तु गौतमः॥ गोवि
रगुरुतल्पसममितिवचनाद्देश्या गमने गोव्रतं ज्ञ्वायेत्कृत्स्नान्तरेषु कृच्छ्रादिगमनमाह॥ ॥पुंस्यायोनावाकाशेष्वप्सु दि
वा गोयाने च सवासा स्नानमाचरेत्॥ ७॥ ॥उदकोदकशुद्धारेशणां योनौ खुरभेदनयोः कामांतरिक्षेकस्थापारादिना
त्रुतुजनमध्ये दिवादिवसे गोयाने च गोष्ठुशेगाबटेच मैथुनं कृत्वा सचैलं स्नानं कुर्यात्। अकामात्स्ववादिया ने च॥ इदं
त्वनैमित्तिकं स्नानं बोसादि विवेचनायस्वितं पुंसि मैथुनस्यडास्त्रि शंकरस्वकृत्वा जातिभ्रंशकरं कर्मकृत्वान्य
तमिच्छयावेस्त्रांतपनं कृच्छ्रं प्राजापत्यमनिच्छयेति इत्यक्तप्रायश्चित्तस्मरणात्॥ पुंगृहेशां खंडगमने षंढगमने षंढ
प्रमवकीर्णिः पलालभार्हं सीसकमाषकं चदद्यादिति शंखोक्तप्रायश्चित्तं तत्र रक्षापनाय॥ अयोनिगमने प्रायश्चि

३०

तदाहबौधायनः।अथकृश्मांडैर्जुहुयाद्योऽपूतइवात्मानंमन्येतयथास्तेनएवमेषभवतियोऽयोनौरेतःसिंचतीति
अत्रैवोनसोविशेषः।यस्तुपुनर्ब्राह्मणोधर्मपत्नीमुखेमैथुनंसेवतेसदुष्यतिप्राजापत्येनशुध्यतीति।आकाशेरेत
स्कंदनेयोगीश्वरः।यन्मेद्यरेतःपृथ्वीमस्कान्त्सीदितिरेतोभिमंत्रयेत्स्तनांतरंभ्रुवोर्मध्यंतेनानामिकयास्पृशेदिति।अत्रका
मतश्चेदकामतोयमः।गृहस्थःकामतोकुर्याद्रेतसःस्कंदनंभुवि।सहस्रंतुजपेद्दिव्याःप्राणायामैस्त्रिभिःसहेति।
अशुमैथुनेशंखलिखितौ।रेतोमूत्रपुरीषाण्युदकेकृत्वात्रिरात्रोपोषितइदमापःप्रवहतेतिजपेदिति।कामतश्चेद
मकामतोमनुः।मैथुनंतुसमासेव्यगोयानेऽप्सुदिवापिवा।स्नात्वात्रचोजपित्वाप्पांःप्राणायामेनशुध्य
तीति।दिवामैथुनेतुशातपः।दिवातुमैथुनेगत्वानग्नःस्नात्वातथांभसि।नग्नांपरस्त्रियंदृष्ट्वामेकंज्ञत्नीभवे
दिति।दिवाग्रहणात्संध्यायामपिनिषेधः।एवंमंडलोपलब्धादिवसावांतरभेदत्वात्संध्यावार्येतानिकर्माणि
संध्याकालेविवर्जयेत्।आहारंमैथुनंनिद्रांस्वाध्यायंचचतुर्थकमिति।निषेधाच्चात्रप्रायश्चित्तमाहकश्यपः।

वि॰टी॰५३
३१

उद्दयास्तमयोः स्कंदित्वादिसंदहनेकर्णक्रोशने वितारीहरणेयूपसंस्पर्शने चसचेलंस्नात्वापुनर्मामितिजपेन्महाव्याहृतिभिश्च
समाज्याहुतीर्जुहुयादिति। कामतो गोयाने मैथुनकरणे यमः। यद्गोभिः समायुक्तेधीयानमारुह्य वै द्विजः। मैथुनंकुरुते तत्र मनुः स्वायं
भुवोऽब्रवीत्। त्रिरात्रंक्षपणंकृत्वा सचैलंस्नानमाचरेत्। गोभ्यो यवाढकंदद्यात्कृत्तंप्राश्य विशुध्यतीति। कामतश्चंडालागमनत्र्याह। ॥चं
डालीगमनेतत्साम्यमाप्नुयात् ॥५॥ ॥अत्र चंडालीशब्दः स्वसमानधर्मीणांश्वपच्यादीनामप्युपलक्षणार्थः। चंडालः श्वपचः क्षत्तासूतो
वैदेहकस्तथा। मागधायोगवौ सेवसप्तैतेत्यावसायिन इति गिरः स्मरणात्। एतासांप्रत्येकंगमनेन तत्साम्यं तत्समानधर्मत्वंभवति। ग
मनेचभोजनप्रतिगृहोपलक्षणं। एतच्चज्ञानतो। अज्ञानतस्तुपातित्यं। चंडालेन तत्समानधर्मत्वंभवति। गमनेचभोजनप्रतिगृहोपल
क्षणं। एतच्चज्ञानतः। इदंचात्यंतानवच्छिन्नाभ्यासे। एकरात्राभ्यासेतुवक्ष्यति। अकामतस्त्वेवाह। ॥अज्ञानतश्चांद्रायणद्वयंकार्यं॥
॥६॥ ॥अज्ञानतश्चंडाल्यादिगमने चांद्रायणद्वयंकार्यं। इदंचचतुरभ्यासे। कामतस्तु चतुरभ्यासेतु कृच्छ्राब्दं। चंडालपुल्कसान्नंतु
गत्वाभुक्त्वाचयोषितः। कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैंदवद्वयमिति यमस्मरणात्। अकामतो द्विरभ्यासे चांद्रायणं। चंडालीपुल्कसी
म्लेच्छीगत्वा चांद्रायणंचरेदिति यमस्मरणात्। अकामतः सकृद्गमने त्वापस्तंबः। चंडालमेदश्वपचकपालव्रतचारिणां। अकामतः स्त्रि
योगत्वा पराकव्रतमाचरेदिति। गर्भेत्वित्रिः उशनाः। चंडाल्यांगर्भमारोप्य गुरुतल्पव्रतंचरेदिति। व्रतेद्वादशाब्दं। एतच्चाकामतः। को

३१

मतः कामतो मरणांतिकं। अंत्यजायां प्रसक्तस्य निष्कृतिर्न विधीयत इति। निष्कृतिव्रतरूपा। अंत्यजागमने तु संवर्त्तः। रजकव्याधशैलूषवेणुचर्मोपजीवनीः। एतास्तु ब्राह्मणो गत्वा चरेच्चांद्रायणद्वयमिति। अंत्यजाश्चापस्तंबः। रजकश्चर्मकारश्च नटो बुरुड एव च। कैवर्त्तमेदभिल्लाश्च सप्तैते त्वंत्यजाः स्मृता इति। कामतश्चेदमकामतः संवर्त्तः। रजकव्याधशैलूषवेणुचर्मोपजीविनां। स्त्रियो विप्रो यदा गच्छेत्तप्तकृच्छ्रं चांद्रायणं चरेदिति। अत्र कामतोऽभ्यासे द्वादशाब्दं कामतो मरणांतिकं। गर्भोत्पत्तौ तु पूर्वोक्तमेव। कापालिकस्त्रीगमने तूशनाः। कापालिकान्नभोक्तॄणां तन्नारीगामिनां तथा। ज्ञानात्कृच्छ्राब्दमुद्दिष्टमज्ञानादैंदवद्वयमिति। म्लेच्छीगमने त्वापस्तंबः। म्लेच्छो नटश्चर्मकारी रजकी बुरुडी तथा। एतासु गमनं कृत्वा चरेच्चांद्रायणव्रतं। कामतश्चेदमकामतो दौ। पशुवेश्यागमन आह॥ ॥पशुवेश्यागमने च प्राजापत्यं॥७१॥ पशवो गवादयः। वेश्या वेशो भृतिस्तत्र वृत्तिर्वेश्या पंचमी जातिः। वेश्याख्या पंचमी जातिः पंचचूडा सकृद्वेति स्मरणात्। पशुगमने पराशरः। पशुवेश्याभिगमने महिषुष्ट्रीकपीस्तथा। खरीं च शूकरीं गत्वा प्राजापत्यं समाचरेदिति। अजादिगमने तूशनाः। तिर्यग्योनिषु गोवर्ज्जं सचैलस्नानीयवसभारं गोभ्यो दद्यादिति। वैदिकस्य तत्र कूष्मांडहोमः। अमानुषीषु गोवर्ज्जं स्त्रीकृते कूष्मांडैर्घृतहोम इति। वेश्यागमने यमः। वेश्यागमनजं पापं व्यपोहंति द्विजातयः। पीत्वा सकृत्सतप्तं पंचसप्तरात्रं कुशोदकमिति। अत्र कामतश्चेदं कामतः प्राजापत्यं। अत्यंताभ्यासे तु लौगाक्षिः। अभ्यासे तु गुणा वृद्धिर्मीमांसा द्वि

र्विधीयते। ततो मासगुणा वृद्धिर्यावत्संवत्सरं भवेत्। ततः संवत्सरगुणा यावत्पापं समाचरेदिति। अनेन वचनेन प्रति निमित्तं
नैमित्तिकन्यायमपोह्याहर्मास संवत्सरादृत्तौ। नैमित्तिकावृत्तिर्विधीयते। तेनैकस्मिन् दिवसे नैकाहत्त्वाप्येकमेव प्रायश्चि
त्तं एवमेकस्मिन् संवत्सरे च द्रष्टव्यं। कामतश्चेदमाकामतश्चतुर्विंशतिमते। सकृत्कृते तु यत्प्रोक्तं द्विगुणं तद्द्विभिर्दिनैः। मासात्
द्विगुणं प्रोक्तं षण्मासाद्दशधा भवेत्। संवत्सरात्तं च दशघ्नाद्दिशद्गुणं भवेत्। ततोप्येवं प्रकल्प्यं स्यात्कातात एवं यथेतिमा
सादित्यादावाङ्गोपश्लेषा द्रसः। तेना मासादित्यादि ज्ञेयं। अतुत्काभ्यासे श्रूपपातकेऽपायमेव न्यायः। यावज्जीवाभ्यासे तु गुरु
तल्पव्रतं। गुरुतल्पव्रतं केचित्केचिद्वा अवणव्रतं। गोघ्नस्य केचिदिच्छन्ति केचिच्चैवावकीर्णिनः इति यमस्मरणात्। अत्र यद्यपि वे
श्यायां सामान्येन प्राजापत्यमुक्तं तथापि नवरुद्धास्विदं द्रष्टव्यं। अवरुद्धासु तु परदारवद्दोषः। यथाह नारदः। स्वैरिण्यब्राह्म
णी वेश्या दासी निष्कासिनी तथा। गम्याः स्युरानुलोम्येन स्त्रियः प्रतिलोमतः। आस्वेव तु भुजिष्यासु दोषः स्यात्परदारवत्। गम्या
स्वपि हि नोपेया यत्ताः परपरिग्रहाः इति निष्कासिनीश्च नवरुद्धाः। अभ्यासे चैवदण्डाभावमभिप्रेत्य न तु प्रायश्चित्ताभावं तस्याह
त्योक्तत्वात्। भुजिष्याः नियतपुरुषपरिग्रहीताः। इदमपि गर्भानुत्पादे। रजस्वलां तु यो गच्छेद्गर्भिणीं पतितां तथा। तस्य पापविशुद्ध्यर्थ
मतिकृच्छ्रो विशोधकः। तन्नैव दिन विशेषस्तु चतुर्विंशतिमते। रजस्वलां द्विजो गत्वा परां कंतु समाचरेत्। सान्तपने द्वितीये

च्छ्रिंप्राजापत्यंपरेत्वन्येइति।गर्भिण्याविशेषमाह।त्रिःषण्मासान्कारयेन्मन्त्रीगर्भिण्यास्त्रियमेवहि।आद्येतज्जननादूर्ध्वमेवंयमो
न्मद्वीयतइति।गर्भिण्याःषण्मासानेवगच्छेत्।ततःपरंऊर्ध्वंप्रसूतेरादेतज्जननाद्बालस्यदंतजननमारभ्यनप्राशितपर्यंतः।स्त्रीणांव्यभि
चारेत्वाह॥ ॥सकृद्दुष्टायाव्यवायत्पुरुषस्यपरदारेनद्वितंकुर्यात्॥८॥ ॥सकृदेकवारंव्यभिचरितापुरुषमेवव्रतंकुर्यात्सवर्णागमनेचे
द्यत्पुंसःपरदारेषुसमानेषुव्रतंस्मृतं।व्यभिचाराच्चभर्तुःस्त्रीतदशेषंचरेत्।समाचरेदितिवाहस्यन्यात्।समानेषुसवर्णेषुसकृदि
तिवचनाद्भ्यासेहगुणावृद्धिरितिकल्प्यां।बलाज्ञमनेनुत्रषष्टेगः।बलेनकामितानारीसवर्णेनकथंचन।प्रायश्चित्तंत्रिरात्रं
चेतस्याःशुध्यर्थमादिशेदिति।वंदीकृतायाहिरभ्यासेचंडालादिसंपर्केशरः।वंदियाहेण्णेकृतायाहत्वावबावलाद्वया।तांकृत्वा
सांतपनंकृच्छ्रंशुध्येत्पाराशरोऽब्रवीदिति।सकृत्संपर्केपिसएव।सकृद्भुक्तातुयानारीनेच्छंतीपापकर्मभिः।प्राजापत्येनशुध्येततत्र
तुश्रवणेनचेति।सगमनेसभार्यायांविशेषमाहसएवा।अंतर्वत्नीतुयानारीसमेताक्रमयकामिता।प्रायश्चित्तंनसाकुर्या
द्यावद्गर्भोननिःसृतः।जातेगर्भेव्रतंकुर्यात्मासेतुयावकं।नगर्भदोषस्तत्रास्तिसंस्कार्यःसयथाविधीति।प्रातिलोम्यगमनेतु
प्रचेताः।विप्राशूद्रेणसंस्पृष्टानचेत्स्यात्प्रसूयते।प्रायश्चित्तंस्मृतंतस्याःकृच्छ्रंचांद्रायणत्रयं।चांद्रायणाद्वेकृच्छ्रविप्रायावैश्यसं
गमे।क्षत्रियोवैश्यगमनेनम्नीकरणंवापनंकृच्छ्रादिस्वरारोपणंसर्पिषाभ्यंजनंमहापथप्रव्राजनंचेत्यादि।आनुलोम्यगमनेतु

वि॰टी॰प॰३
३३

पादपादन्त्यं कृच्छ्रं यथा क्षत्रियायां विप्रगमने त्रिपादं कृच्छ्रं वैश्यायां विप्रक्षत्रियगमने अर्द्धत्रिपादकृच्छ्रौ शूद्रायां विप्रक्षत्रियवि-
ट्गमने पादार्द्धत्रिपादकृच्छ्राः इति। कामतस्त्वेतद्द्विगुणम्। अकामतः षड्विंशन्मतोक्तं क्षत्रियायां पितुर्ब्राह्मणस्यैवायां कृच्छ्रमर्द्धं वैश्यायां पितुर्
ब्राह्मणराजन्ययोरेवायां कृच्छ्रपादं कृच्छ्रार्द्धं जातिलोम्येन वलात्कृत्योपभोगे तु संवर्तः। वलात्कृत्य मयभुक्तां वेदह्यमानेन स्वेन सा। गर्भस्रा-
वे धातु दोषेश्वरेष्वां चान्द्रायणत्रयमिति। एवं क्षत्रियवैश्ययोः विप्रादि चतुष्टयगर्भे क्रमेण पराकादयस्त्यागान्ताश्चत्वारः। एवं शूद्राया-
श्चैव र्णिक गर्भे पराकादयस्त्रयः। शूद्रगर्भे तु पराक एवेति ज्ञेयं। अप्रजाता विशुद्ध्यंति प्रायश्चित्तेन नेतरा इति वसिष्ठस्मरणात्। अं-
त्यजागमने ज्ञानेनावस्थायिगमने तु स्मृत्यन्तरे। चंडालपुल्कसे म्लेच्छे स्वपाकं पतिते तथा। ब्राह्मणी कामतो गत्वा चांद्रायणचतुष्टयमिति।
कामतोऽप्यष्टगुणः। संपृक्ता स्याद्यथान्येयां साकृच्छ्राद्वं समाचरेदिति। रजकाद्यन्त्यजगमने पिस्मृत्यंतरे रजकश्चर्मकारश्च शैलूष-
वेणुचर्मोपजीविनः। ब्राह्मण्येतानुपयदा गच्छेदकामादेव वह्नयमिति। कामतो द्विगुणं। कामतोऽन्त्यानां यासेतु मरणं। अंत्यजेन न
संपर्के गमने मैथुने कृते। प्रविशेत्संप्रदीप्ते ग्नौ मृत्युना सा विशुध्यतीत्युशानः स्मरणात्। अकामतो द्वादशाह्नं। गर्भे चैतद्द्वाका-
मतो गर्भमरणमेवासगर्भायायांभिचारेत्वप्यष्टगुणः। अनवृत्ता तु युवतिः संपृक्ता चांत्ययोनिना। प्रायश्चित्तं न सा कुर्याद्याव-
द्गर्भो न निःसृतः। न प्रचारं गृहे कुर्यान्न चांगेषु प्रसाधनं। शयीत शामभूशौनवाभुंजीतवांधवेः। प्रायश्चित्तं गते गर्भे विधिं कृत्वा हिमांत

३

रेतो हि रोपण मथवा षेडं दद्याद्विप्राय दक्षिणामिति। एकरात्राभ्यासे चंडालीगमनमाह॥ ॥यत्करोत्येकरात्रेण वृषलीसेवनाद्द्वि
जः। तद्भैक्ष्यभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति॥ ५॥ ॥वृषली चंडाली। चंडाली बंधकी वेश्या रजस्वला या च कन्यका। ऊढाया च सगो
त्रा स्याद्वृषल्यः पंच कीर्तिता इति स्मरणात्। नन्वेवं नानार्थे वृषलीशब्दे कथं चंडाल्येवात्रोच्यते। सत्यं अन्यासां गमनस्याल्पप्रा
यश्चित्तत्वेन तत्प्रायश्चित्तविषयत्वासंभवात् न चान्यत्र तद्वेवाद वे। यो न जमना च देक रात्रेण। पुण्यमर्जयति तद्भैक्ष्यभुंजानो गायत्रीं
जपन् त्रिभिर्वर्षैरपनुदति। इदं चैकरात्रं गमनाभ्यासे एकरात्रेणात्यंतसंयोगापवर्गवाचितृतीयादर्शनात्। अत्यंतसंयोगश्चाष्टद
राभ्यासेनाष्टयामध्यात्नैः॥ ॥इति श्री विष्णुस्मृतिविवृतौ श्रीमत्यां वैजयंत्यां त्रि
पंचाशत्तमोध्यायः॥ ॥क्रमप्राप्तं संसर्गप्रायश्चित्तं चतुःपंचाशेनाह॥ ॥यः पापात्मना येन सह संयुज्यते स तस्यैव व्रतं कुर्या
यश्चित्तं कुर्यात्॥ १॥ ॥उद्दिष्टेषु अतिपातकादि प्रकीर्णकांतेषु पातकेषु आत्मा देहो यस्य स तथाभूतो यो येन सह संवत्सरं
संसृज्य ते स संसृष्टस्तस्यैव पापात्मनः प्रायश्चित्तं कुर्यात् तत्पापभागित्वात्। अत एव मनुः। एनस्विभिरनिर्णिक्तैर्नार्थं कंचि
त्समाचरेदिति सामान्येनैव एनस्विमात्रसंसर्गं निषिध्य योयेन पतितेनैषां संसर्गं याति मानवः। स तस्यैव व्रतं कुर्यात्

वि॰टी॰५८

२५

त्संसर्गविशुद्धयेऽस्य कृतवान् । पापात्मनेत्ततीयांतो वा पाठः । प्रायश्चित्तपदेन व्रतं मरणं चोच्यते । तत्र कामतोऽकामतश्चाति
पातकिसंसर्गे मरणमेव स्तस्यैव प्रायश्चित्तं कुर्यादित्यभिधानात् । कामतोऽकामतश्चातिपातकिनां मरणस्यैवाभिधानाच्च म
हापातकिनामकामतः संसर्गे द्वादशाब्दं व्रतं । स तस्यैव व्रतं कुर्यादिति मानवात् । तस्य महापातकिनो व्रतं द्वादशाब्दं । अधःशायी ज
टाधारी पर्णमूलफलाशनः । एककालं तु भुंजानो वर्षेतु द्वादशे गते रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः । व्रतेनैतेन शुध्यंति महापा
तकिनस्त्विम इति शंखोक्तेः । कामतः संसर्गे तु मरणमेवात्ती(?)र्थे पुण्यतमे यथा वह्नेहसंन्यासात् ब्राह्मणो महापातकान्मुच्यत इति देवले
न सामान्याभिधानात् । ब्रह्महत्यां सुरापानं स्तेयं गुर्वंगनागमं । कृत्वा चैतानि ... संसर्गं ब्राह्मणः कामकारतः । कुर्यादनशनं विप्र
पुण्यतीर्थे समाहितः । ज्वलंतं वा विशेदग्निं ध्यात्वा देवं कपर्दिनं । इति कूर्मपुराणे विशेषाभिधानाच्च । एतेन द्वादशाब्दस्य कामतो म
हापातकिनः कामतः संसर्गविषयत्वं परास्तं । कामतः संसर्गे छागलेयेन ज्ञात्वा करोति संसर्गं निष्कृतिर्न विधीयते प्रायश्च
त्तमकामानां कामतो वा भेन विद्यत इति व्रतरूपनिष्कृत्यभावाभिधानात् । एतच्च साक्षात्संसर्गिणः । संसर्गिणस्तु पादोनं
। यथाह व्यासः । उपस्पृश्याशुचिस्पृष्टं तृतीयं वापि मानवः । हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुध्यति । तृतीयोऽत्र पतितापेक्षया चतु
र्थस्तत्संसर्गी पंचमस्तस्याचमनं सर्वेत्तत्स्यापभाव इति । एतेनैतेन वदन्नाशिनो विप्राः हत्कुं तेषां । भाष्यते । तन्नोज्जिनो(?)ऽर्द्धकृच्छ्रेणा

३४

दन्नादस्यपादत्इतिचंडालसंकरप्रकरणीयव्यासवाक्यस्थलिंगदर्शनात्संसर्गिणस्तत्पर्यंतमेवप्रायश्चित्तमितिप्रायश्चित्तमितिपल
पितमप्यास्त्रमापंचमेसंखुद्धिदर्शनात्। अकामच्छेदेकामतोमरणवैकल्पिकंचतुर्विंशतिवार्षिकंपादोनेत्यादिकल्पनयायोज्या
अकामतोवर्षमेकं नसंसर्गेतुपराशरः। संसर्गमाचरन्विप्रः पतितादिष्वकामतः। पंचाहंवादशाहंवाद्वादशाहमथापिवा।
मासार्द्धंमासमेकंवामासत्रयमथापिवा। अब्दार्धमब्दमेकंवाभवेदूर्ध्वंतुतत्समः। त्रिरात्रंप्रथमेपक्षेद्वितीयेकृच्छ्रमाचरे
त्सातपनंक तृतीयेपक्षएवतु चतुर्थेदशरात्रंस्यात्पराकः पंचमेततः। षष्ठेचांद्रायणंकुर्यात्सप्तमेत्वैंदवद्वयं। अष्टमेवत्तथापक्षे
षण्मासानुकृच्छ्रमाचरेदितिकामतः। स्मृत्यंतरे। पंचाहेतुचरेत्कृच्छ्रंदशाहेतप्तकृच्छ्रकं। पराकस्त्वर्धमासेस्यान्मासेचांद्रायणंच
रेत्। मासत्रयेतुकुर्वीतकृच्छ्रंचांद्रायणोत्तरं। षाण्मासिकेतुसंसर्गेकृच्छ्रंत्वब्दमाचरेत्। संसर्गेत्वाब्दिकेकुर्याद्द्वेचांद्रायणे। अत्रेष
न्यूनोद्दिष्टावृत्तत्रभवत्राह्निकः। किंचिन्न्यूनाह्निकइत्यर्थोवा चोन्यथावर्षेणापातित्येन्यूनंनप्रायश्चित्तानुपपत्तेः। एवमनुपातकिसं
संसर्गिणामप्येवंद्रष्टव्यं। अकामतोद्वादशाब्दंकामतोमरणमिति तथोपपातक्यादिसंसर्गेपिकामाकामाभ्यांतत्तद्व्रतमेवज्ञेय
ऽदंचतद्व्रतविधानेसमानपातकविषयएव। यथाकामतोमहापातकिनोअकामतोमहापातकिनः कामतश्चसंसर्गेद्वाद
शाब्दो कामकृतत्वेनपातकिसमानपातकोत्पत्तेः। तथाअकामतोमहापातकिनोअकामतश्चसंसर्गेद्वादशाब्दमेकाम

वि॰टी॰प॰४

३५

ज्ञानतो वेनतावत्पातकानावृत्तः। किंत्वकामविहितं षडब्दमेवा एवमन्यपातकेष्वप्यूह्यं। स्त्रीणामकामतोपि पतितसंसर्गे प्रपतितप्राय
श्चित्तार्धं। एवं बालवृद्धातुराणामपि कामतोर्द्धमकामतः पादः। अनुपनीते नोकामतः पादः। अकामतोर्द्धपाद इत्यप्यूह्यं। पति
तयोनसंसर्गप्रतिषेधस्य प्रतिप्रसवमाह याज्ञवल्क्यः। कन्यां समुद्वहेदेषां सोपवासामकिंचनामिति। एषां पतितानां कन्यां
पतितावस्थायामुत्पन्नां सोपवासां कृततत्संसर्गोचितप्रायश्चित्तां अकिंचनामगृहीतपितृवस्त्रालंकारादिधनां उद्वहेत् उद्वहेदिति
तरस्या पारस्परं नाहात्म्यापरोनिवर्त्तते। तदाह हारीतः। पतितस्य कुमारी विवस्त्रामहोरात्रोपोषितां प्रातः शुक्लेनाहतेन
वाससाच्छादितां नाहमेतेषां न ममैते इति त्रिरुच्चैरभिदधानां तीर्थे स्वगृहे वोद्वहेदिति। एतेषामिति वहुवचनादपतितानामपि
पतितमातादीनां कन्यादानाधिकाराभावो वगम्यते। कन्योपादानात्तु नपुंसकापत्ययोरव्यवहार्यत्वं गमयतीति। यथाह वशि
ष्ठः। पतितोत्पन्नः पतितो भवत्यन्यत्र स्त्रियाः सा हि परगामिनी तामरिक्थामुपेयादिति। विशेषांतरमुपरि छादयिष्यामः। निषिद्ध
जलपाने प्रायश्चित्तमाह। ॥मृतपंचनखात्कूपादत्यंतोपहतात्तथा। ब्राह्मणस्त्रिरात्रमुपवसेत् ॥५४॥ ॥मृताः पंचनखा
नखवान्तकुक्कुरमार्जारादयो यस्मिन्कूपे स्थाने तस्मादत्यंतोपहतात् चर्मास्थिमूत्रपुरीषादिमलदूषिता कूपाज्जलं पीत्वा विप्रस्त्रि
रात्रमुपवसेत् ॥ ॥द्वाहं राजन्यः ॥२॥ ॥क्षत्रियस्तु द्व्यहमुपवसेत् ॥ ॥एकाहं वैश्यः ॥३॥ ॥वैश्यस्त्वेकाहमुपवसेत् ॥ ॥

३५

इत्यपः शूद्रपादाविनोदशा इति। अकामतस्त्वाह। यस्तु चंडालभांडस्थमज्ञानादुदकं पिबेत्। सतु अहेण शुध्येत शूद्रस्त्वेकेन शुध्यतीति रेव
कूपोवाप्याद्युपलक्षणं। जलाशयेषु यथालोभुस्थावरेषु महीतले। कूपवत्कथिता शुद्धिर्महत्सु तु न दूषणमिति विष्णुस्मरणात्। न
चेतिशेषः। म्लेछादीनां जलपात्रपुष्करिण्यां उदपिका। जानुदघ्ने शुद्धिर्ज्ञेयमवस्तादशुचिस्मृतं। ततो यः पिबे इ

द्रोनकोण॥ ॥ शूद्रस्तत्वनक्तं कुर्यात्। ब्रतोत्तरांगमाह॥ ॥ सर्वे चांते व्रतस्य पंचगव्यं पिबेयुः॥ ६॥ ॥ सर्वे त्रैवर्णिका उक्तव्रतांते पं
चगव्यं पिबेयुः। न शूद्रस्तस्य वक्ष्यमाणनिषेधात्। श्वपदोपादानादनुवृत्ता। शवविषयमेतत्। उक्तं च तस्मिन्नहारीतः। किंत्वभिन्नशवेतो
यत्र स्थं यदि तत्पिबेत्। शुद्धिश्चांद्रायणं कुर्यात्तन्नकृच्छ्रमथापिवेति। कामाकामाभ्यां भेदव्यवस्था। यदि कश्चित्ततः स्नायात्प्रमादेन द्विजोत्तमः।
जपंस्त्रिषवणं स्नायी अहोरात्रेण शुध्यतीति। मानुषशवविषयमेतत्। अमानुषे तु देवलः। किंत्वभिन्नेऽशवके वै कूपस्थं यदि हि स्यतोप
यः पिबेत्त्रिरात्रोमानुषे द्विगुणं स्मृतमिति। अत्यंतोपवात्स्पृंडालादिक्षते रूपलक्षणं। यथापस्तंबः। चंडालकूपभांडस्थं नरः का
माज्जलं पिबेत्। प्रायश्चित्तं कथं तत्र वर्णे वर्णे विधीयते। चरेत्सांतपनं विप्रः प्राजापत्यं तु भूमिपः। तदर्धं तु चरेद्वैश्यः कामतोकामतोपि
वा। अकामान्नक्तभोजी स्यादहोरात्रं तु कामतः। इत्यापस्तंबस्मरणात्। सर्वशद्वसंकोचनिमित्तमाह। पंचगव्यं पिबेच्छूद्रो ब्राह्म
णस्तु सुरां पिबेत्। उभौतौ नरकं यातो महारौरवसंज्ञितं॥ ७॥ ॥ यथा ब्राह्मणस्य सुरापाने रौरवनरकपातस्तथा शूद्रस्य पंचग
व्यपान इति तात्पर्यार्थः। शूद्रः स्त्रिया अप्युपलक्षणं। स्त्रीणां होमो न दातव्यः पंचगव्यं तथैव चेति निषेधात्। पंचगव्यं जपहोमयो
रप्युपलक्षणं। तस्मात् शूद्रं समासाद्य सदा धर्मपथे स्थितः। प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितमिति स्मरणात्। अत्रैवा
नोवगमनेऽप्याह॥ ॥ पर्वणि नारीगमने वर्जोनाचगच्छेन्नपत्नीं त्रिरात्रमुपवसेत्॥ ८॥ ॥ पर्वाणि। चतुर्दश्यष्टमीचैवामावास्याच

वि०टी०७४

३६

षष्टीमा पर्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेवत्युक्तानि । अनार्त्तवोपगमकल्पनात् ऋतुव्यतिरेकेण स्वकाले पत्नीमगच्छतस्त्रि
रात्रमुपवासेन त्वागस्त्यतः वद्धहस्तः । ऋतौ नाभिगच्छेद्यो भार्यां मोहितः कृच्छ्रमाचरेदिति । अकामतश्चेदं कामतो द्विगुणं । अगच्छन्नितु
ईरं गत्वा लिंगविद्धत्वाय स्त्रीणां प्रायश्चित्तं विद्यते । अत एव पराशरः । ऋतुस्नातां तु या नारी भर्तारं नोपगच्छति । सा मृ
ता नरकं याति विधवा च पुनः पुनः । रितिस्त्रीणामभिगमनं तु वा यमाह । न चार्द्धं स्त्रीणामर्द्धं प्रदातव्यमिति वचनात् । पर्वादिपर्युदास
स्यादोषः श्रवणात् । तथा च स्मृत्यंतरे । अष्टम्यां च चतुर्दश्यां दिवा पर्वणि मैथुनं । कृत्वा सचेलः स्नात्वा तु वारुणीभिश्च मार्जये
दिति । अकामतश्चेदं कामतस्तु सप्तरात्रमुपवासः । अकल्पपर्यंदासः ऋतुस्नातां तु यो भार्यां स्वस्थः सन्नोपग
च्छतीति स्वस्थस्यैव विधानात् । कौटसाक्ष्यमाह ॥ कूटसाक्षी ब्रह्महत्याव्रतं चरेत् ॥ ८ ॥ यो मिथ्या साक्ष्यं ददाति स ब्रह्म
हत्याव्रतं द्वादशाब्दं कुर्यात् । कूटसाक्षित्वं मरणांतकसमानामनुपातकसंज्ञानां सर्वेषामुपलक्षणं । अश्वमेधेन शुध्यंतीत्या
दि समानप्रायश्चित्तदर्शनात् । द्वादशाब्दप्रक्रमो कौटसाक्ष्यं तथा कृत्वा निक्षेपमपहृत्य च । एतदेव व्रतं कुर्यात् हत्वा वा शर
णागतमिति । शरणागतमरणान्तु । कौटसाक्ष्यं तावद्ब्राह्मणादिवधसंपादकं मिथ्यावचनं तद्वधनिवारणाय मिथ्यावचनस्याभ्य
नुज्ञानात् । तथा च मनुः । शूद्रविट्क्षत्रविप्राणां यत्रर्त्तोक्तौ भवेद्वधः । तत्र वक्तव्यमनृतं तद्वधनिवारणाय मिथ्यावचनस्याभ्य

३६

भुंजानस्तु तथा शूद्राज्ञायत्र्यष्टशतं जपेदिति। उत्तरापोशानं विनोत्थाने पित्तैवायमुच्छिष्टस्तेनाचांतो भुक्त्वा नासनं ततः। से
ऽद्यः स्नानं प्रकुर्वीत सोन्यथाऽप्रयतो भवेदिति। किंच॥ ॥सूर्याभ्युदितनिर्मुक्तः सचेलं स्नातः सावित्र्यष्टशतमावर्तयेत्॥
॥१॥ ॥यस्मिन्सुप्ते सूर्योभ्युदेति स सूर्याभ्युदितः यस्मिंश्च सुप्ते ऽस्तमेति स सूर्याभिनिर्मुक्तः। सुप्ते यस्मिन्नुदेति वाऽस्तमे
ना भिनिर्मुक्तोऽभ्युदितो तौ यथाक्रममिति त्रिकांडीस्मरणात्। तावुभौ सचेलं स्नात्वाष्टाधिकशतमावर्तयेत्। इत्यादि
त्य मेहनादोयमः। इत्यादित्यं न मेहेत न पश्येदात्मनः शकृत्। दृष्ट्वा सूर्यं निरीक्षेत ब्राह्मणो गामथापि वेति। सूर्यं दर्शी
नं चाचोदयादि व्यतिरेकेण। नेक्षेतोद्यंतमादित्यं नास्तं यांतं कदाचन। नोपरक्तं न वारिस्थं न मध्यं नभसो गतमि
ति। अत्र तु स्नातकव्रतलोपे तु प्रायश्चित्तमभोजनमिति ज्ञेयं। इदमेव च प्रायश्चित्तं सूर्येऽनुतारका दृष्टाये च्छिष्टैस्तु क
मतः। नेषां याम्येन रैरदृष्टिएपस्तोवज्ञिः समिध्यते इति मार्कंडेयोक्तनिषेधातिक्रमेपि ज्ञेयं। नाशुचीराङ्गतारका इति
स्नातकव्रतत्वात्। श्वादिदंशे प्राह॥ ॥श्वसृगालविड्वराहखरवानरवायसपुंश्चलीदष्टः स्रवंतीमासाद्य षोडश प्रा
णायामान्कुर्यात्॥ ११॥ ॥श्वादयः प्रसिद्धास्तैर्दष्टः पुमान्समुद्रगां नदीं गत्वा तत्र स्नात्वा जले षोडश प्राणा
यामान्कुर्यात् घृतं पिबेत्। अत्र चांगभेदेन प्रायश्चित्तभेदो व्यवस्थाप्यः। स यथा पाददंशे मनुः। श्वसृगालमर्दि

नुज्ञानात्तथा वमत्तः। स्पृष्ट्वा विड्भुजं विप्रो गायत्र्येकोत्तरं भवेत्। स्नातस्तत्क्षणमन्नं दिवसं याद्विशिष्यत इति प्रकीर्णके चाह॥
॥ उदकमूत्रपुरीषकरणे सचैलं स्नानं महाव्याहृतिहोमश्चाज्येन॥ ॥यः शौचार्थं जलमनपेक्ष्य मूत्रपुरीषे करोति तिस्र
सचैलं स्नानं महाव्याहृतिभिः सप्तभिराज्यं जुहुयात्। चकाराज्जपालम्भे। विनाद्भिरप्सु वाप्यार्तः शारीरं सन्निषेव्य तु सचैलो
बहिराप्लुत्य गामालभ्य विशुध्यतीति मानवात्। शारीरं मूत्रपुरीषादि। आलम्भः स्पर्शः। अकामतश्चेदं कामतो [illegible]। आपन्न
तो विना तोयं शारीरं यो निषेवते एकादशोपवासं कृत्वा सचैलं स्नानमाचरेदिति। अनुदकाचमने स्यात् स्नानं तत्त्वोपलक्षणं
[illegible]पस्तव। तैलाभ्यक्तस्तथा वान्तः श्मश्रुकर्मणि मैथुने मूत्रोच्चारं यदा कुर्याद्दशरात्रेण शुध्यतीति। अभ्यंगलक्षणमाप
वेदे। मूर्ध्नि दत्तं यदा तैलं भवेत्सर्वांगसंगतं। स्नातो मितर्पयेद्वा हृच्छ्रं भंगः। स उदाहृत इति। तथा उदकत्वमयज्ञोपवीतत्वस्याप्यु
पलक्षणं। तथा चस्मृत्यन्तरे। विना यज्ञोपवीतेन यद्युच्छिष्टो भवेद्द्विजः। प्रायश्चित्तं महोरात्रं गायत्र्यष्टशतं तथेति। ऊर्ध्वो
च्छिष्टे भेदाद्भक्षणपानादावुपवासो मूत्रपुरीषादौ गायत्रीजप [illegible]। कामतश्चेदमकामतस्तच्चैवापि वतो
मतश्चेत्तज्ज्ञातोपवीतिनः। प्राणायामत्रिकं षड्वं नक्तं च त्रितयोक्तमादि। आपोशानं मकृत्वा तु यो भुंक्ते नापदि द्विजः।

श्वाजाविखरकरभनकुलमार्जारमूषिकाश्ववकाककुक्कुटदष्टानामापोहिष्ठादिभिःस्नानंप्राणायामत्रयंचेति।जान्वूर्ध्वमानाभिदं
शेंगिराः।ब्रह्मचारीश्वाशुनादष्टस्त्र्यहंसायंपयःपिबेत्।गृहस्थस्यद्विरात्रंतुएकाहंयोग्निहोत्रवानिति।सूत्रोक्तंचाग्निहोत्रिविषयमेवानु
तिष्ठते।षोडशप्राणायामानामेकाहपर्यायत्वात्ब्राह्मणस्यंवकृच्छ्रद्वादशांशत्वात्प्राणायामशतद्वयस्यकृच्छ्रप्रत्याम्नायत्वात्।नाभेरूर्ध्वंदं
शेतुसएव।नाभेरूर्ध्वंतुदष्टस्यतदेवद्विगुणंभवेत्।स्यादेतत्त्रिगुणंवक्त्रेमस्तकेतुचतुर्गुणमिति।यत्तुवासिष्ठंब्राह्मणस्तुशुनादष्टोनदीं
गत्वासमुद्रगां।प्राणायामशतंकृत्वाघृतंप्राश्यविशुध्यतीति।तन्नाभेरधोदेशएवज्ञेयं।त्रिरात्रोपवासप्राणायामशतयोरर्द्धकृच्छ्र
प्रत्याम्नायत्वात्।शूद्रस्याप्याहांगिराः।शूद्राणांचोपवासेनशुद्धिर्दानेनवापुनः।गांवादत्वावृषंचैकंब्राह्मणायविशुध्यतीति।स्त्री
णांदेशेव्याहपराशरः।ब्राह्मणीतुशुनादष्टाजंबुकेनवृषेणवा।उदितेग्रहनक्षत्रेदृष्ट्वासद्यःशुचिर्भवेदिति।व्रतस्थायांविशे
षस्तत्रैवत्रिरात्रमेवोपवसेत्कृच्छ्रदष्टातुसव्रता।सघृतंयावकंभुक्त्वाव्रतशेषंसमापयेदिति।रजस्वलायांपौलस्त्योविशे
षः।रजस्वलायदादष्टाशुनाजंबुकरासभैः।पंचरात्रंनिराहारापंचगव्येनशुध्यति।ऊर्ध्वंतुद्विगुणंनाभेर्वक्त्रेतुत्रिगुणंतथा
चतुर्गुणंस्मृतंमूर्ध्निदष्टेन्यत्राप्लुतिर्भवेदिति।अन्यथारजस्कायां।श्वाघ्राणेतुशातातपः।शुनाघ्रातावलीढस्यनखैर्विलिखि
तस्यवा।अद्भिःप्रक्षालनंशोधनमग्निनाचोपज्वलनमिति।उपज्वलनंतापनं।तत्रैवव्रणेकर्मसूत्रमुदेमतः।ब्राह्मणस्यव्रणद्वारे

श्यशोणितस्तेभवोऽकामिकृतपश्चात्तेयस्य प्रायश्चित्तं कथं स्नवेताग्रवांसत्रपुरीषेणात्रिसंध्यंस्नानमाचरेत्। त्रिरात्रं पंचगव्यास
त्वैवोनाभ्याविशुध्यति। नाभिकंठांतरोद्भूतेव्रणे चोत्पद्यते कृमिः। षड्रात्रं तु तदा प्रोक्तं प्राजापत्यं विशोधनमिति। कंठाद्ध्वं
प्राजापत्यं ज्ञेयं वेदाभित्याग आह॥ ॥वेदाग्न्युत्सादी निषण्णस्त्याचां धःशायी संवत्सरं सद्यज्ञैदोषणवर्न्नेन॥२३॥ ॥वे
दोत्साद्यधीतवेदविस्मर्ताऽग्न्युत्सादी आहितानामग्नीनां श्रौतस्मार्तानां त्यक्ता स प्रत्येकं त्रिषवणं स्नाद्यधःस्वद्भापरिहारेण
शयानो भैक्षेण सह कृत्वेन संवत्सरं वर्तेत। न चेदोत्सादो हि विधोऽनुपातकमुपपातकं चेति। तत्रानुपातके कामतो स्वमेधा
ध्यकामतो स्वमेवाद्यकामतो द्वादशाब्दमित्युक्तं कौत्सस्य। उत्सादोनिंदोपलक्षणं ब्रह्मोज्झता वेदनिंदेति प्रागभिधान
नास्ति विधा। बौद्धादिशास्त्राभिनिवेशेना प्रामाण्यबुद्धिरेका। प्रामाण्यबुद्धावपि हैतुकशास्त्राभिनिवेशेनावज्ञान
द्वितीया। अत एवमनुः। योवमन्येत ते तु मेहेतुशास्त्राभिनिवेशेनाप्रामाण्यबुद्धिरेका। प्रामाण्यबुद्धावपि हैतुकशास्त्रा
भिनिवेशेनावज्ञानं द्विती। अत एव मनुः। योवमन्येत ते तु मे हेतुशास्त्रार्थवादतः। स साधुभिर्बहिष्कार्यो नास्तिको वेद
निंदकः इति वैदिककर्मफलेष्वनाश्वासः तृतीया। तच्चाद्यानुपातको तत्र प्रायश्चित्तं कामतो स्वमेधाद्यकामतो द्वादशाब्दमि
ति सर्वत्रानुपातकेज्ञेयं। अपरेह्वेत्पातको तत्रोपपातके तु निमित्तकालभेदेन प्रायश्चित्तं कामतो स्वमेधाद्यकामतो

तनवसिष्ठः। अश्नोऽग्नः। कृच्छ्रं द्वादशरात्रं चरित्वा पुनरुपयुंजीत वेदमाचार्यादिति। एतच्च नास्तिकेन त्यागे। योऽग्नीन् पञ्चैति
नास्तिको वा प्राजापत्यं चरेद्द्विज इत्यग्नित्यागे नास्तिक्यश्रवणात्। इदं च मासद्वयत्यागे। मासद्वये प्राजापत्यं मासद्वये प्रा
जापत्यं मासचतुष्टये तिकृच्छ्रः षण्मासे पराकः अर्द्धमासं पयोव्रतं त्र्यूनं तरं त्रैमासिकमिति। नास्तिको पि मासादिकत्यागे
नुप्राणायामा। शतमा त्रिरात्रा। तदूर्ध्वं मासद्विवर्षं चांद्रायणं तदूर्ध्वं मासत्र्यब्दं चांद्रायणं सोमायनं वा। तदूर्ध्वं त्वतिकृच्छ्रो धनिन
गोदानं चेति संक्षेपः। तमेतमखिलमखिलमर्थं स्मरणे सौकर्याय संजग्राह संग्रहकारः। कृच्छ्रो मासद्वये चेन्मजति दुतव
हे तच्चतुष्के तिकृच्छ्रस्तत्षडङ्के स्यात्पराकस्ततउपरि पयोमासमासाद्या त्रिरात्रमासं। नास्तिकोत्तप्रमादे त्वसुनियमशतं प्रा
कृ त्रिरात्रात्परे तु कुर्यादेकोपवासं त्रिदिनमुपवसेद्विंशतेरूर्ध्वमब्दं॥१॥ ॥षष्टेरूर्ध्वं कृच्छ्रः शरदउपरि वेद्द्व्यमालस्यस्त्यक्त
श्चेद्द्वादशाहे त्रिदिनमुपवसेद्द्वादशाहं तु मासे। मासं चाद्वेथ चांद्रं तदपि भवति सोमायनं वाद्व्युग्मे स्यादूर्ध्वं तेर्द्द कृच्छ्रो यदि भ
वति धनी गां च दद्याद्द्विजायेति। तदेवं मूलोक्तमहत्कृच्छ्रं च अब्दादूर्ध्वं वेदितव्यं। इदमेव चाग्नित्यागे समानयोगक्षेमतया नि
र्देशात्। तथा च याज्ञवल्क्यः। यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषं। स वै दुर्ब्राह्मणो नाम सर्वकर्मबहिष्कृत इति दोषाद्ब्राह्म
णपरिहारार्थं माश्विनपशुविधानस्य चेतुल्यत्वात्। एतन्मूलवाक्यानि भारद्वाजगृह्याद्वगंतव्यानि विस्तरभयान्नोद

त्रि०टी०५४
३९१

हुतानीउदंचोपाशनाग्नित्यागेऽतातित्यागेत्वभ्यत्रग्निहोत्रापविद्धाग्नीर्ब्राह्मणः कामकारतः चांद्रायणं चरेन्मा
संवोहत्या समंहितत्। अग्निहोत्रापविद्धाग्नीन्मासाइ वृद्धिकामतः कृच्छ्रं चांद्रायणंचैवकुर्यादेवाविचारयन्निति। अत्र का
मतो हाराग्नेः संवत्सरोत्सन्नेऽग्निहोत्रे चांद्रायणं कृत्वा पुनराद्ध्यात्। द्विवर्षोत्सन्ने सोमायनं चांद्रायणं च कुर्यात्। त्रिवर्षोत्स
न्ने संवत्सरं कृच्छ्रमभ्यस्य पुनराद्ध्यादिति। ऋग्वेदकल्पे। यथोक्तप्रायश्चित्तानंतरमंतरितहोमद्रव्यं दत्वा पुनराद्ध्यात्। य
थाज्ञातं कर्तव्यः। अतीत काल उपायाप्रायमो विप्रायवास्तव्यं। गतेऽग्नौ त्रिविद्धस्त्वा हत्वादध्यात्पुनर्द्विज इति। स्मार्त्ताग्नित्या
ग एवेदमित्येके। त्यागो नध्ययनाध्यानयोरणुपलक्षणं। नथाचस्मृत्यंतरे। अनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमं। सज
वन्नेवशूद्रत्वमाशुगच्छति सान्वय इति। तत्र प्रायश्चित्तमाह गौतमः। अग्न्युत्सादि निराकृत्युपपातकेषुचैवमिति। अग्न्युत्सा
दी व्याख्यातः। निराकृतिः शक्तावपि वेदाध्ययनशून्यः स संवत्सरं ब्रह्मचर्यं कुर्यादिति। प्रतिषिद्धानामध्यापनेऽप्येवमे
वाहलएव। प्रतिषिद्धमंत्रयोगे सहस्रवाकश्चेदिति। प्रतिषिद्धाः पतितादयः तैः सह मंत्रयोगोऽध्ययनाध्यापन सहाध्ययनया
जनादिसंबंधस्तत्र संवत्सरं प्राकृतं ब्रह्मचर्यं। संबंधमात्रसंयोगः सहस्रपरश्चेत्तो भवति अर्वाक् कल्पं अत्र कामतश्चेदं मा
ससंयोगे षाण्मासिके चण्डच्छाभिधानात् संवत्सरे द्वादशाब्दाभिधानात्। कामतः पातित्यमेव। तिपतितादिश्राव ते तु व

सि...शपतितचंडालशवस्तक आवरोत्तत्रिरात्रं वागपता आसीरन् सहस्रावरं वा तदभ्यसंतः शूना भवंतीति विज्ञा
नेश्वरेतेनैव गर्हिता थ्यापकयोज का व्याख्यातादक्षिणात्यागाच्छूना भवंतीति विज्ञायते इति ॥ एवमंतरागमनेन ध्या
याध्ययनेपि गौतमः ॥ अंतरागमने पुनरुपसदनं श्वनकुलसर्पमंडूकमार्जाराणां त्र्यहमुपवासो विप्रवासश्च प्रा
णायामो घृतप्राशनं चेतरेषां श्मशानाध्ययने चैवमिति ॥ श्मशानमित्यनध्यायमात्रोपलक्षणं श्मशानपतितादिक
इति स्मरणात् ॥ अनाहिताग्निस्त्वेवं कामोऽग्निः ॥ काले त्वाध्यायकर्माणि कुर्याद्द्विजो विधानतः ॥ तदकुर्वन्द्विजः
रेणमासि मासि विशुध्यति ॥ अनाहिताग्नेः पित्रादौ यक्ष्यमाणः सुतो यदि ॥ सह द्वात्येन पशुना यज्ञेन निष्क्रयायति
ति ॥ एवं त्रेतानाधाने वर्षषट् प्राजापत्याः प्रतिवर्षं चांद्रायणं आवसथ्यानाधानेपि स एव ॥ कृतदारो गृहे ज्येष्ठो यो नादध्या
दुपासनं चांद्रायणं चरेद्वर्षं प्रतिमासमहोपि वेति ॥ कृतदारो ज्येष्ठ इत्यनेनाधानाधिकारे सतीत्युक्तं ॥ यावद्वर्षं प्र
तिमासमेकोपवासस्तद्वर्षं प्रतिवर्षं चांद्रायणमिति ॥ त्र्यब्दो तत्राहोमे मनोर्ज्योतिषाज्याहुतिराद्वादशाहं ॥ नष्टे पु
नस्तस्मिन्द्वादशाहमयाश्चेत्यनेनाज्याहुतिः ॥ तद्ध्वंस्थालीपाकत्रयेणाग्निजां तेऽभिनाशस्ततोयथा स्वगृह्य
मुक्ताहरणात् पुनः संधाने ॥ अत्राप्याहसकलेमर्थसंग्रहकारः ॥ तत्रायामे...श्चेति चक्रिभवति पुनरिहाद्वादशाहेत

वि॰टी॰प॰
५०

तथाग्नौ होमश्चेन्नास्ति तस्मिन्नुत्सन्ने भवति मनोज्योतिषा द्वादशाहो जातोत्विष्टिश्चयेवास्मृतमथ पुनराधानं कुर्याद्धारी
तायद्वायाश्चेति तत्याछुतिसमभिहिताधानसंभारलाभे इति। स्थालीपाकातिक्रमादौ तु [illegible]लायनः। स्थालीपाके
त्वतिक्रान्ते यद्यन्यारोप्यवर्ज्यं यजेत। स्याच्चान्यो यजेद्य द्याकार्यः पाथिकृतेष्टिः कर्मश्रौते तु उनराधानं पर्व[illegible]हो
मलोपे मनुः। होमलोपो ह्यमावास्यां पर्वस्याग्रयणादिषु। कुर्यादिष्टिं पावमानीं श्रुतिस्तां तु यथा विधी। पर्वोपस्थानलोपे
बृहस्पतिः। अग्निहिताग्निरुपस्थानं न कुर्याद्यदि पर्वणि। अतो न गच्छेद्ग्रामीयः सोऽपि कृच्छ्रार्द्धमाचरेदि[illegible]। अग्निमुत्सृज्य
प्रवासे [illegible]तः। उत्सृज्याग्निं प्रवसन्वैश्वानर्या यजेतेति। प्रवासोऽन्तर्तीर्थाद्यर्थं नयनार्थं। आनान्यो जायितुं युक्तः प्रवा
सो ह्यग्निहोत्रिणः। यन्नैरिड्यादिकार्याणि तीर्थाद्यर्थं न तु व्रजेदिति स्मरणात्। सांवत्सरिकपशुसोमाद्यकरणेऽपि
स एवाः सांवत्सरिकाणां पशुसोमानामिज्यानामसंभवे वेति। म[illegible]। इष्टिं वैश्वानरीं नित्यं निर्वपेदब्दपर्यये। स्त
प्तानां पशुसोमानां निष्कृत्यर्थमसंभवे इति। कृतसंकल्पस्यायजने हारीतः। यो यद्यद्यइत्युक्त्वा न यजेत्स म्हो तेवाक
तुमाग्निसमीद्यालेनेष्ट्वा न सर्वपशुनामितत्रत्रेधा नयाशायश्चित्तरिति। संकल्पितस्य यज्ञनादेरन्यथाकरणाकरणयो
रपि स एवा यत्त्वेतयथा थर्नपस्यन्यथावाचरत्य समाप्ति कोवानस्याग्नेयो ह विश्वांद्रयणं वेति। वेदाग्नित्यागे कर्या

४०

२७६

गानिर्दिष्टत्वात्पितृमातृसुतदारत्यागेष्वपि तदेव सामान्यप्रायश्चित्तेन सहजातिः सहजातिशक्तिसकृदभ्यासा
द्यपेक्षया योज्यं ॥ अन्यान्यपि श्रौतप्रायश्चित्तानि तत्तत्कल्पेभ्य एवावधेयानि । उत्कर्षानृतादि यथाह ॥ ॥ सत्कर्षान्ते गु
रोश्चालीकनिर्बन्धनं तदद्वेषपणे च मासं पयसा वर्तेत ॥ २३ ॥ ॥ उद्देशपदद्वयार्थो व्याख्यातः स्तदाक्षेपणं गुरुतिरस्कारः स
तद्वैविध्यं तत्प्रायुक्तं । तत्रोपपातकेष्वेतेषु कामतोऽश्वमेधादि । अकामतो द्वादशवार्षिकमित्युक्ते । उपपातकेष्वपुनर्मा
सं पयःपानं । गुर्वनभिमतानुष्ठाने तु प्रतिकूलं गुरोः कृत्वा प्रसाद्यैव विशुध्यतीति योग्युक्तं ज्ञेयं । प्रसादनानन्तरं चोप
वासः । गुरुं हुंकृत्य त्वंकृत्य विप्रं निर्जित्य वादतः । बध्वा वा वाससा क्षिप्रं प्रसाद्योपवसेद्दिनमिति तत्स्पेव स्मरणात् । नास्तिकादि
ष्वाह ॥ ॥ नास्तिको नास्तिकवृत्तिः कृतघ्नः कूटव्यवहारः ब्राह्मणवृत्तिघ्नश्चैते संवत्सरं भैक्षेण वर्तेरन् ॥ २४ ॥ ॥ नास्तिको
व्याख्यातः । नास्तिकवृत्तिर्विद्यार्थारोपजीवी नास्तिकेभ्यो वृत्तिर्जीविनं यस्येति वा । कृतघ्नः उपकारं द्वेषेण नाशयती
ति कृतघ्नः । कौटव्यवहारी कूटेन कपटेन तुलामानादिकृते क्रयविक्रयकर्त्ता । ब्राह्मणवृत्तिघ्नो राजवृत्तिघ्नो राजादि
दत्तशासनाद्यपहर्त्ता । चकारोऽभिध्याभिशंसी । एते संवत्सरं भैक्षेण वर्तेरन् । यथाह शंखः । नास्तिको नास्तिकवृ

२२

त्तिः हन्तव्रः स्तेयश्च व्यवहारी मिथ्याभिशंसी चेत्येते पंच ब्राह्मणगृहेषु संवत्सरं भैक्षं चरेयुरिति। इदं चाभ्यासे सकृत्करणे
तु वसिष्ठः नास्तिकः कृच्छ्रं द्वादशरात्रं चरित्वा विरमेन्नास्तिक्यात् नास्तिकवृत्तिरतिकृच्छ्रमिति। संवत्सरं चात्र प्रकार
प्रायश्चित्तमल्पस्वल्पापहारे। कृच्छ्रं वर्णेषु प्रपर्या महत्त्वापहारे तु तत्र छर्दि वक्ष्यो क्रमेवातथा पराशरः। यस्य यस्य तु वर्णस्य हनि
हे देसमाचरेत्। अपहृत्य च वर्णानां विप्रो भूमिं प्रमादतः। प्रायश्चित्तं वधे प्रोक्तं ब्राह्मणानुमतं चरेदिति। परिवेत्त्यादिष्वाह
।। परिवित्तिः परिवेत्ता यया च परिविद्यते। दाता याजकश्चैव चान्द्रायणं चरेयुः ।।१५।। परिवित्त्यादयः पंचापि चान्द्राय
णं कुर्युः। पंचानामपि कामतः प्रवृत्तिविदं। अकामतस्तु वसिष्ठः। परिविविदानः कृच्छ्रं अतिकृच्छ्रं चरित्वा तस्मै दत्त्वा पु
नर्निविशेत् तं चैवोपयच्छेदिति। परिविविदे त्यसोपरिविविदानः लिटि कानच्। परिवेत्तेति यावत्। अत्र सोऽकृच्छ्रातिकृच्छ्रौ कृ
त्वा स्वीयां ज्येष्ठाय निवेद्य पुनस्तामेव ज्येष्ठानुज्ञातामुद्वहेदित्यर्थः। यथाह हारीतः। तां कन्यां ज्येष्ठाय दद्युः सतामनु
ज्ञातान्यया निविशेत् तेन धर्मो न लुप्यत इति। स ज्येष्ठस्तां कनिष्ठोपनीतामनुमान्य कनिष्ठायाभ्यनुज्ञया त्यास्तु
यं परिणयेत् कनिष्ठोपनीतामिति। अत्रैव विपर्ययमाः कृच्छ्रो द्वयोः। परिवेद्यकन्यायाः कृच्छ्र एव च। अतिकृच्छ्रं
चरेद्दाता होता चान्द्रायणं चरेदिति। होता याजकः। अभ्यासे तु नारदः। परिवित्तिः परिवेत्ता च संवत्सरं ब्राह्मणगृहे

शुभेद्गं चरेयाताम् इति । न तु अग्निहोत्रं विवाहं च प्रयोगे असमर्थे स्थितं न कुर्यात् ज्ञानके ज्येष्ठे सोदरे वा यच्च कुर्वीत ... ताः
प्रथमविवाहादेरेव परिवेदनादिनिमित्तत्वागमनेन द्वितीयादिविवाहाद्यनिषेधाद् अभ्यासोऽनुपपन्न इति चेत् सत्यमेवं तात्पर्यानवग
मात् तथा हि न ह्यत्र प्रथमाग्निहोत्रविवाहयोः प्रतिषेधो येन द्वितीयाद्यनिषेधः स्यात् । किंतु प्रथमविवाहाद्यकुर्वति ज्येष्ठे
कनिष्ठस्य विवाहे निषेधः । स च प्रथमद्वितीयादिसाधारण इति तदतिक्रमाहेनो परिवेदनाद्यभ्यासोपपत्तेः । अन्वयस्या
यमित्थमेवान्यथा द्वितीयादिविवाहमकुर्वत्यपि ज्येष्ठे कनिष्ठस्य परिवेदनापत्तेः । तस्माद् ब्रह्महत्यादिनिषेधातिक्रमाभ्या
से ब्रह्महत्यादिभ्यास इवात्राप्यभ्यासो नानुपपन्नः । न चैवं ज्येष्ठे अनिविष्टे कनीयान्निविशमानः परिवेत्ता भवति परिवित्तो ज्येष्ठः
परिवेदिनी कन्या परिदायी दाता परियष्टा याजकस्ते सर्वे पतिताः संवत्सरं प्राजापत्येन कृच्छ्रेण पापं व्यपोहति इति हारीतवाक्ये
न कन्यायाः परिवेदनी कन्यात्वाभ्यासासंभवात् संवत्सरप्रायश्चित्तानुपपत्तिरिति वाच्यं । नष्टे मृते प्रव्रजिते क्लीबे च पतिते
पतौ । पंचस्वापत्सु नारीणां पतिरन्यो विधीयते इत्याद्यभ्यनुज्ञातेषु न विवाहयास्तदभ्याससंभवात् तत्स्यात् संवत्सर
कृच्छ्रं परिवेत्तृत्वाद्यभ्यासविषयं । पर्याहितादिष्वप्येतदेव यथाह गौतमः । परिवित्तिवेत्तृपर्याधात्रग्रेदिधिषूपतीनां
संवत्सरं प्राकृतं ब्रह्मचर्यं । अकृताधाने ज्येष्ठे निष्ठेनाधाने ज्येष्ठः पर्याहितः आधानात्र अग्रेदिधिषूपतिः । कृच्छ्रं द्वादशरात्रं

चरित्वा। निर्विशेत्तां चैवोपलब्धो दिधिषूपतिः कनिष्ठापतिः कथं कन्यां तां ज्येष्ठां मन्युतो ढां स्वयमुद्वहेत् दिधिषूपतिर्ज्येष्ठाप
तिः स्मो द्व ज्येष्ठां कनिष्ठापतये दत्वा स्वयमन्यामुद्वहेदिति॥ अथ विक्रेयविक्रये प्राह॥ ॥प्राणिलवणसोमविक्रयी तप्तकृच्छ्रं॥१६॥
॥ ॥प्राणिनो गोमनुष्यादयः। भूर्गृहक्षेत्रादिका। पुरंपयागादिजन्यो धर्मः। सोमः सोमलता। एतेषां विक्रेता तप्तकृच्छ्रं कुर्यात्॥ किंच॥
॥आर्द्रौषधिगंधपुष्पफलमूलचर्मवेत्रविदलतुषकपालकेशभस्मास्थिगोरसपिण्याकतिलतैलविक्रयी प्राजापत्यं॥१७॥ आर्द्रमार्द्रकं। औषध्यो
यवव्रीह्यादयः। गंधाश्चंदनादयः। पुष्पाणि मल्लिकादीनि। फलमाम्रादि। मूलं मूलकादि। चर्म अजिनादि। वेत्रं वंजुलः। विदलं वंशका
दिनिर्मितं सूर्पव्यजनादि। तुषं यवादीनां। कपालं खर्परं घटादेर्भंडकादिसाधनं। केशाः श्मश्रुमरादीनां। भस्म शुष्ककाष्ठादिदहनसाधनं।
अस्थि कर्मादेः कंकणादिसाधनं। गोरसो दधिक्षीरादिः। पिण्याकं खलिः। तिलाः श्वेताः कृष्णाश्च। तैलं तिलादिस्नेहः। एषां प्रत्येकं वि
क्रयी प्राजापत्यं कुर्यात्॥ किंच॥ ॥श्लेष्मजतुमधूच्छिष्टशंखशुक्तित्रपुसीसकांस्यलोहोडुंबरखड्गपात्रविक्रयी चांद्रायणं कुर्यात्॥१८॥
॥ ॥श्लेष्मा श्लेष्मातकफलानि। जतु लाक्षा। मधूच्छिष्टं सिक्थकं। शंखशुक्ती प्रसिद्धे। त्रपुसीसे धातुविशेषौ।
कांस्यलोहमायसं। औडुंबरं ताम्रं। खड्गपात्रं खड्गशृंगमयं पात्रं पितृतर्पणसाधनं। एषां प्रत्येकं विक्रयी चांद्रायणं कुर्यात्॥ किं
च॥ ॥रक्तवस्त्ररंगरत्नगंधगुडमधुरसोर्णाविक्रयी त्रिरात्रमुपवसेत्॥१९॥ ॥रक्तवस्त्रं मंजिष्ठादिरंजितं। रंगं धातुविशे

षः रत्नं पद्मरागादि। गंधाः कर्पूरादयः। गुडः प्रसिद्धः। मधुक्षौद्रं रसा गुडलवणादिव्यतिरिक्ताः तिक्तकटुकादयः। ऊर्णा मेषादि
लोम तन्निर्मितं कंबलादि च तेषां विक्रयी त्रिरात्रमुपवसेत्। अयं कामतश्चरेत्। कामतः पैठीनसिः। अथ विक्रेयाणि ब्राह्मणस्य ल
वणपक्वान्नमधुक्षीरंदधिघृतमुदकं सर्वगंधलाक्षारक्तवासो गुडतैलं ग्राम्यपशुनामेकशफाः केशिनः सर्वे चारण्याः पशवो वि
द्याः शस्त्रं मिष्टं गावः शंखश्चौर्णमिति विक्रयणे तेषामेकैकस्मिन्वक्ष्यमाणप्रायश्चित्तं चरेदिति। किंच। ॥मांसलवणलाक्षाक्षीरविक्रयी चा
न्द्रायणं कुर्यात्॥१०॥ ॥मांसं सुरोपलक्षणं आममांसं खुरालोमला लवणं सर्पिषां विक्रयी सर्वपण्यानां द्विजश्चान्द्रायणं च
रेदिति शातातपस्मरणात्। अपण्यविक्रये नैमित्तिकं पुनरुपनयनमाह॥ ॥तं च भूयश्चोपनयेत्॥११॥ ॥तं ब्राह्मणमपण्यवि
क्रयिणं भूयः पुनरुपनयेत्। चकाराद्वक्ष्यमाणखरोष्ट्रादियानेष्वपि। रासभं महिषं मेषं बलीवर्दं क्रमेलकं। आरुह्य ब्राह्मणो
मोहात्पुनः संस्कारसंधानार्थं तया भिन्नकार्यत्वात्। निषिद्धयानादिमाह॥ ॥उष्ट्रेण खरेण वा त्वा नग्नः स्नात्वा सुप्त्वा भुक्त्वा
प्राणायामत्रयं कुर्यात्॥१२॥ ॥खरोष्ट्रयानारोहगमने नग्नस्य स्नात्वा न शयनभोजनेषु च सचैलस्नानानंतरं प्राणाया
मत्रयं कार्यं। प्राणायामो जले स्नात्वा खरयानोष्ट्रयानगः। नग्नः स्नात्वा च भुक्त्वा च गत्वा चैव दिवा स्त्रियमिति योगिस्मरणात्
तदस्य कामतः। अकामतस्तु स्नानमेव। पुनरुपनयनं तु भयत्रापि। वाशब्दो गवादिसंग्रहार्थः। गवी चयानं पृष्ठेन सर्व

वि०टी०प०
५३

थेवर्गोर्हिनिंदितमानवात् ॥ हष्ठेनसर्वेषेदेशिदिगर्हितमिदरनात्तक्तस्थादियानमपिदिगर्हितमेव ॥ अतएवमनुः ॥ उक्तयानेसमा
रूह्यरवस्यानवकामत ॥ सवासाजलमाइन्याप्राणायाममेवपु च्छतीतियैकमेवप्राणायामात्तदुक्तरथादियानमपिविगर्
हितत्वादयन्तुगोयुक्तरथमुपलक्षयमेत्यादिवचनं तक्रमाचर्तनादिकर्मविदिशोपतयेतिनविरोधः ॥ यमोपि ॥ समंमहि
षंमेषवलीवर्दकामेलकं ॥ आरुह्य ब्राह्मणोमोहात्पुनः संस्कारमर्हतीति ॥ असत्प्रतिगृहेत्याह ॥ ॥ जपित्वात्रीणिसावित्र्याः
सहस्राणिसमाहितः ॥ मासंगोष्ठेपयःपीत्वामुच्यतेसत्प्रतिग्रहात् ॥ ॥ ५४ ॥ ॥ प्रतिग्रहासत्त्वंदातृदेशकालदेयद्रव्यासत्
त्वेनतद्दातृसत्वंजात्याकर्मणाचाययाचंडालादेः पतितादेश्चदेशकालासत्वंयथा ॥ कुरुक्षेत्रोपरागादेः ॥ द्रव्यासत्वं
यथामेषीकृष्णाजिनादेः ॥ तत्रादोषेव्यवहारीतः ॥ राज्ञः प्रतिगृह्यकृत्वामासमप्सुसदावसेत् ॥ षष्ठेकालेपयोभक्षः पूर्णेमासेप्रमुच्य
तितर्पयित्वाद्विजानकामैः सततंनियतव्रतैः ॥ तपसानेनयायांतेवराजपात्प्रमुच्यतइति ॥ एतच्चोदाहृतवर्तिराजपानराज्ञः प्रति
गृह्णीयाल्लुब्धस्योच्छास्त्रवर्तिनइतिनिषेधात्तन्मात्रवर्तिनुक्तं ॥ धर्मज्ञस्यकृतज्ञस्यदाढ्यार्थशास्त्रतोस्तुवान् ॥ मेधर्म
वचनमाज्ञस्तिदापस्थापिमहापतेरितिलेवलस्मरणात् ॥ सुमन्तुरपि ॥ गोकरिकव्याधपादरजकस्वर्णकारचनय
वरूडएवच ॥ केवर्तमेदभिल्लाश्चसप्तैतेत्यतजाः स्मृताः ॥ एतेषांवस्त्रियोगत्वाभुक्त्वाचप्रतिगृह्यच ॥ पततत्यज्ञानतोविप्रोज्ञा

५३

नाधसामं कुगच्छतीति। बृहस्पतिः। पतितानां गृहं त्वा भुक्त्वा सप्रतिगृह्य वा मासोपवासं कुर्वीत मध्यापि वेति। आपस्तम्बः। द्विज
तिभ्यो धनं लिप्सेत् प्रशस्तेभ्यो द्विजोत्तमः। अपि वा दत्रियाद्वैश्यान्न तु शूद्रात् कदाचनेति। तत्रापि वाङ्मय एं अपात्रीकरणात्वा
त्। द्वितीये मत्स्यपुराणे। तस्मात्तीर्थे न गृह्णीयात् पुण्येष्वायतनेषु च। निमित्तेषु च सर्वेषु न प्रमत्तो भवेद्द्विज इति। निमित्तमुपरागा
दि। तृतीये यमः। तिलधेनुं गजं वाजी प्रेतान्नमजिनं मणिः। सुरभिः सूयमाना दिवोराः सप्रतिग्रहा दिति। एषु द्वयोर्द्वयोः
समवाये मासं गोष्ठे नसन् पयोमात्राहारो शत्यहं त्रीणि त्रीणि सहस्राणि गायत्र्योऽर दाराणामिग्रहाः। ऐंदवेन मृगारेष्ठ्या
कदाचिन्निमित्तविदुया। देव्या लक्ष्यजपेनैव स्तुथं ऊः प्रतिग्रह इति देवी गायत्री। महादानप्रतिगृह्य हादित्या छुनेयमस्म
त्ता। तस्मा[illegible]। सर्वत्र इत्थ्या गर्वकं प्रायश्चित्तं। यद्गृहीतेनार्जयन्ति कर्मणा ब्राह्मणा धनं। तस्योत्सर्गेण शुध्यं
ति जप्येन तपसैव च सैव सेवेति। व्यास[illegible]। इदं त्वतिधनवतो दरिद्रस्य। तु चतुर्थांशदानं प्रतिगृह्य चतुर्थांशदाने प्रतिगृ
ह तुर्थांशेवणिस्ला नेर्ध्दतीयकं। क्रमेण षष्ठं च विप्रेभ्यो दत्वा पापात्प्रमुच्यत इति शर्यात्ते। अतिदरिद्रस्य षष्ठांशदानं। प्रति
गृहेषु सर्वेषु षष्ठांशं परिकल्पयेदिति चतुर्विंशतिमतात्। ऋणपरिशोधनार्थं प्रतिगृह्य तदुभोग एव। यथाह हारीतः। पतितु
क्तेभ्यः प्रतिगृहीतमत्स्वर्णमय इयं नतेन घुणपार्थिना प्रोति आदेशवादाभामात्मार्थं ब्राह्मणमभिज्ञित्यतामसमन्य

र्भेदीयमानं प्रतिगृह्णानस्तत्साद्गुण्यमाप्नोति आत्मनः प्राणपार्थे प्रतिगृह्णन्स्तेयभोगात्तेनैव एनेप्र नियुक्त्वनिरुयायकल्पत इति
आदेशोभिचारः वशीकरणादिः ॥ अयाज्ययाजनादि साह ॥ ॥ अयाज्ययाजनं कृत्वा परेषामन्त्यकर्म ॥ अभिचारमही-
नं च त्रिभिः कृच्छ्रैर्व्यपोहति ॥ २८९ ॥ ॥ अयाज्यायाजनादेः ते च द्विविधा जात्या कर्मणा । जात्या शूद्रप्रतिलोमादयः । कर्मणा
पातित्योपपातकादियुक्तास्तेषां याजनं परेषामसपिण्डादीनामन्त्यं प्रेतकर्म । अभिचारः परमरणाद्यर्थो ऽदृष्टोपायः
श्येनयागादिः । अहीनो ऽनेकरात्रसाध्यो यागो द्विरात्रादिद्वादशाहान्तः । एषामन्यतमं कृत्वा त्रिभिः कृच्छ्रैः शुध्यति । तत्र सुमन्तुः
शूद्रयाजकः सर्वेषु व्यपरित्यागात्मनो भवति प्राणायामसहस्रेण दशधाभ्यस्तेनेति । सर्वयाजनलब्धं सहस्राणां त्रयाणां
दशधाभागं त्रिंशत्संख्यासंपादनं तत्स्यकृच्छ्रोदेयं तस्मिन्नेव प्राणायामसहस्रेषु दशधाभ्यस्तेष्विति । सर्वशूद्रयाजनलब्धानां स-
हस्राणां त्रयाणां दशधाभ्यास त्रिंशत्संख्यासंपादनं तत्स्यकृच्छ्रोदेयं चैव प्राणायामशतहस्रमिति न्यायेन सार्धं श-
तकृच्छ्रं भवति । तत्रैकामतस्तु लघुकल्पोऽद्यान्तार्थं तद्गुरुत्वात् शूद्रपौरोहित्येऽप्यमः पुरोधाः शूद्रवर्गे सर्वे पापतत्प-
त्तिमामर्गतां शैरार्धेयुपशुजानो द्विजस्मात्परायणं तेषां वनगाजस्थ देतो येनापपेद्द्विभावितं । अत्रोत्सर्गेण मंत्रो
तेन तस्मात्पापात्मुच्यते । आहारलवणं कृत्वा पिबेत्ब्राह्मीं सुवर्चलां । तस्योपनयनं कृत्वा व्यवहार्यस्तदा भवेदिति ॥

नागङ्गदेगमज्जनयोगेङ्कदे। अविमाविनुमन्यान्नुपलंङ्घितंत्यजेत्॥ उत्सर्गानंतस्वाङ्गायणंतेत्राह्मी। पिबेत् मधुपर्कोग
केषंडालादियाज्ञने। ज्ञानात्पातित्यंज्ञानात:साम्यभोजनयाजनयोस्कल्यत्वस्मरणात्तत्रअन्यत्रकल्पापतितादियाजने
चुर्वोधायन:। वक्रूप्रतिग्राह्यस्यवाप्रतिगृह्य अयाज्यंवाजातयित्वा। अप्रतिग्राह्यस्यवाप्रतिगृह्य अनाश्यस्यवान्नमशित्वातेरत्समंदी
यञ्जपेदिति। अनादेशेशतमितिपरिभाषणात्। छतवारं। आत्ययाजनेयोगीश्वर:। त्रीन्कृच्छ्रानाचरेद्व्रात्ययाजकोभिचरन्नपीति
असपिण्डांत्यकर्मणिप्रेतदिशेषेणविशेष:। तत्रब्राह्मणस्यसवर्णांत्यकर्मणिकृच्छ्रत्रयंक्षत्रियांत्यकर्मणिषड्वैश्यांत्यक
र्मणिनवशूद्रांत्यकर्मणिप्रेतविशेषेणविशेष:। तथांगिरा:। ब्राह्मणोब्राह्मणादीनामंत्यकर्मसमाचरेत्। कृच्छ्रंत्रिषण
वदशचांद्रायणमथापिवेति। वरेदितिशंख:। इदंचलोभेनदाहादिसपिण्डीकरणांतकर्मकरणे। दाहमात्रेकल्पंप्रेतालंका
रमात्रेशंख:। कृच्छ्रपादोऽसपिपिण्डस्यप्रेतालंकरणेकृते। अज्ञानादुपवास:स्याद्दशक्रोस्नानभिष्यते। स्पर्शेऽपिसुमं
तु:। प्रेतस्पर्शिनामसंबंधिनांकृच्छ्रपादइतीदंनेवलिङ्ग:। दाहादिसपिण्डीकरणांतकर्मकरणे। दाहमात्रेकल्प
प्रेतालंकारमात्रेशंख:। कृच्छ्रपाऽसपिण्डस्यप्रेतालंकरणेकृते। अज्ञानादुपवास:स्याद्दशक्रोस्नानमिष्यते

वि॰टी॰ ५८

५५

सपत्नेऽपि स्वमातुः प्रेतस्पृष्टिनामसंबंधिनां कुर्वपाद इति रोदनेव सिद्धः। दाहादि स्नानपर्यंतं रुदनकृत्यं विधीयते
पादहीनं सपिंडस्य वा मातुर्मम नेदिष्ठे तितिनिर्हृतो मनुः। असपिंडं द्विजं प्रेतं विप्रो निर्हृत्य बंधुवत्। विशुध्यति त्रिरात्रेण
मातुराप्तांश्च बांधवान्। निनिनिति चतुर्वर्त्ते हा दिना। धर्मार्थमनाथप्रेतनिर्हरणे वाशिष्ठः। यः कश्चिन्निर्हरेत्प्रेतमसपिंडः
कथंचन। स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यतीति एवमन्यत्र प्रेतं यो वहेत्तदहे तत्र वा। कटोदकक्रियां स्नात्वा तत्प्रक
श्चमाचरेदिति। कटः प्रेतं लहायति। आत्महत्यातिनिर्वशिष्ठः। य आत्मत्यागिनः कुर्यात्स्नेहात्प्रेतक्रियां द्विजः। स तप्त
कृच्छ्रसहितं चरेच्चांद्रायणव्रतमिति। तत्र स्मृतीरथार्थे शिरसीः कुर्यादित्यभिशस्यं चांडालकेशस्य वेदब्राह्मणस्य तेन ह
न्यादशौचं द्विजइति मनुना भिचारस्याभ्यनुज्ञानात्कथमभिचारे हीनिनु कथं श्येनादशोहं प्रजाकामया जयेदित्यादि
फलतोऽपनिषेधादिति चेत्। अभेदो हानेतिकृति मानयोगेति तोयानिभिन्नत्वादन्यानतस्याश्च। अथात्र निष्ठत्वेन प्र
सक्तिस्याधिन्यात्रविषयत्वात्। एवं न्यस्तमार्जिज्ञकार्यमहोनस्यमीचुदाहितात्यधिव्याधितस्यातुरस्येत्यादि
ड्यानिषेधस्तान्यत्वेन तथा सोमपदा कंप्रानिकश्चिन्नारीनइतिस्मृतिकश्चिन्नेषामेवेति। ज्ञात्यान्प्रत्याह॥ ॥ येषां द्विजा
नां स्त्रीविशेषानानूचो नयथाविधि। तांश्चाप्रयित्वा लोचनकृच्छ्रं प्रयाविधिर्शूद्रेण नाययेत्॥ १५॥ ॥ द्विजो द्विजेनयोगा स्वे

४

वर्णिकामूर्द्धावसिक्तादयोऽनुलोमजाः। अथ तेषां यथाविधि देशकालकर्तृशाखासूत्राद्यनतिक्रमेण एवं तत्सावित्रीनानूच्यते तेनानुवा
चनविषयीकृत्य तेन त्रीन् प्राजापत्यांश्चारयित्वा यथाविध्युपनाययेत्। गायत्र्युपदेशरूपोपनयनप्रवर्त्तकाः वाहि भोः सावित्रीं मो
अनुब्रूहीतिप्रश्नवत्कन्याङ्कयीदाचार्यादिः। एवं नासितिविहायेवेतन। अन्यथोपनयनेयोपारमात्रविवक्षायां तांश्चारयित्वे
ति कृच्छ्रगणोपनायनयोः समानकर्तृत्वात्सिद्धेः। यत्किंचिदुपनयनं गृहानेप्पतदेवनानूच्यते यथाविधीति सामान्याभि
धानात् न चेदं पुनरुपनयनं विधिवैगुण्येनाद्यसंस्कारस्यैकाव्युत्पत्तेः। तत्र व्रात्यकालेऽप्यनादरेण। अत एव व्रात्याधि
कारे हारीतः तेषां प्रायश्चित्तं मासं पयो भक्ष्यं गामनुगच्छेत्। पश्चादेयश्चित्तत्वविशिष्टजैरुपनेयुर्यथा प्रकृत्युत्तु
छन्दोविशेषादिति। न तु वसन्तादिः। छन्दः स्वशाखा तयोरविशेषाद्विशेषानभिधानाद्यथा प्रकृत्यैवोपनयेत्। इदं चा
ष्टमवर्षादिमुख्यकालातिक्रमे। गौणकालातिक्रमे तु याज्ञवल्क्यः। आषोडशाद्द्वाविंशाच्चतुर्विंशाच्च वत्सरात्। ब्र
ह्मक्षत्रविशां काल औपनायनिकः परः। अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः। सावित्रीपतिता व्रात्या व्रात्यस्तोमादृ
तेक्रतोरिति। अत्राङ्यमभिविधोत्समर्थर्यादायामित्युक्तं। तत्र चैकल्पिकमाह वसिष्ठः। पतितसावित्रीक उद्दालक
व्रतं चरेत्। द्वौ मासौ यावकेन वर्त्तयेत् मासं पयसा अर्द्धमासमामिक्षया अष्टरात्रं घृतेन षड्रात्रमयाचितं त्रिरात्रमब्भक्षो होरा

वि॰री॰५४
४६

न्युपपन्नेदस्वमेषां वृत्त्यर्थं वाणिज्यकेऽन्यस्मिन्मे जवायजेति गोदादि पशुपजीवनमाह।।प्रायश्चित्तं चिकीर्षति विकर्मस्था
स्त्वेते द्विजाः ब्राह्मणाश्च परित्यक्तास्तेषामप्येतद्दिशेत्। एवं च संवत्सरान्ते तरान्न इष्टं तु अपचेताः ब्राह्मणस्यापत्काले
स्वोपनिवेशस्त्वत्र संवत्सरमनुप्राप्तोऽचाञ्जायाञ्चरेत्। संवत्सरान्ते न इष्टं च चापदि गमेकल्प इति।तदनन्तरं स्वहस्ते वजीवे
श्च मपुनस्तथैवाद्ये नैणकर्मणा जीवि द्विशो वा पापापदि द्विजः। निस्तीर्यमथात्मानं वापथितन्यूसेति योगिस्मरणात्।वैश्य
दृत्तावपतर्दृव याज्ञवल्क्यीये सा हवर्त्यं प्रवणात्। परन्तु इह स्वयं कर्म मन्त्राधिकं वाणि कृष सीरद्याद्वस्त्रगोकं चान
कां।हृषीवलो ह्यणाना निरयासनानिवा परन्तु इह स्वयं कर्म मन्त्राधिकां वणिक सद्युदोषः स्याद्ब्राह्मणानां च पूजना
दिति।आपदीतस्तु तेभोजने याज्ञवल्क्यः।आपद्गतः संप्रगृह्णन् भुञ्जानो पियतस्ततः।न लिप्येतेन सा विप्रो ज्वलनार्कसमो
हि सदृतीये च ब्राह्मणपा ब्राह्मणो वेदस्यायमधिकारी निब्राह्मणस्त्वेवर्णिकस्तस्य भावे वा हलण्यं वेदस्तस्या द्विशो विल
द्वाणातया तदनध्ययना द्विजैः परित्यक्तास्तेषामप्येतदेव कृच्छ्रत्रयमादिशेत्। इदमेकस्य पुरुषस्य पुरुषत्रयमन
ध्यायनेनाविन्नः पशुः प्राकृतः।स्त्रिविपरिहितिप्राय श्चित्तोऽप्येकं त्रयमाह।यज्ञहिते नार्जयति कर्मणा ब्राह्मणा धनं
तस्योत्सर्गेण शुध्यं ति जप्येन तपसा तथा।।२७।। ।।गर्हितेन जास्त्र निषिद्धेन लेच्छादिकर्मणा ब्राह्मणा यद्धनमर्जयं
ति तस्य त्यक्त्वा जपतपसा कुर्युः।गर्हितेन परोपानान्निषिद्धप्रतिग्रहादावप्येतद्व्रयं तथोक्तमेव प्राक्। संख्यादि नित्य

४६

लोपेष्वप्रकीर्णकेष्वाह ॥ वेदोदितानां नित्यानां कर्मणां समतिक्रमे स्नातकव्रतलोपे तु प्रायश्चित्तमभोजनं ॥२०३॥
वेदः स्मृत्युपलक्षणं तेन श्रौतस्मार्त्तसंध्यास्नानादिनित्यकर्मलोपे उपवासः कार्यः । सच दर्शपूर्णमासादिलोपोक्तपथि
कृदिष्ट्यादिभिः समुच्चीयते उपवासासमर्थेन कार्यं ब्राह्मणभोजनमिति स्मरणात् । यद्वाभ्यासे तु बृहस्पतिः । अ
निर्वर्त्य महायज्ञान्यो भुंक्ते प्रत्यहं । अनातुरः सति धने कृच्छ्रार्द्धेन स शुध्यतीति । संवत्सरमकरणे विष्णुपुराणे । संव
त्सरं क्रियाहानिर्यस्य पुंसः प्रजायते । तस्यावलोकनात्सूर्यो निरीक्ष्यः साधुभिः सदा । स्पृष्टे स्नानं सचैलं तु शुद्धिहेतुर्महामतेः शु
द्ध्यर्थं कल्पं । यद्येकत्राभ्यासात् महायज्ञा नित्यकर्मोपलक्षणं । स्नातकव्रतानि नैष्ठिकव्रतमादित्यमित्यादीनि तल्लोपे भोजनं ।
एतेषामाचाराणामेकैकस्य व्यतिक्रमे गायत्र्यष्टशतजपं कृत्वा पूतो भवतीति केचित् ॥ ॥ अवगूर्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने ॥ कृ
च्छ्रातिकृच्छ्रौ कुर्वीत विप्रस्योत्पाद्य शोणितं ॥२०९॥ विप्रजिघांसया दंडाद्युद्यमोऽवगूरणं तत्कृत्वा कृच्छ्रं प्राजापत्यं तस्यै
व दंडादेर्निपातनेतरपि शोणितोत्पत्तौ कृच्छ्रं चरेत् कृच्छ्रोऽभ्यंतरशोणित इति योगिस्मरणात् । बृहस्पतिस्तु विशेषमा
ह । काष्ठादिना ताडयित्वा त्वग्भेदे कृच्छ्रमाचरेत् । अस्थिभेदेऽतिकृच्छ्रः स्यात्पराकस्त्वंगकर्त्तने इति । पादप्रहारे तु य
मः । पादेन ब्राह्मणं स्पृष्ट्वा प्रायश्चित्तविधित्सया । दिवसोपोषितः स्नात्वा प्रणिपत्य प्रसादयेदिति । अन्वयव्यतिरेका
भ्यां प्रायश्चित्तप्रयोजनमाह ॥ ॥ एनस्विभिरनिर्णिक्तैर्नार्थं किंचित्समाचरेत् । कृतनिर्णेजनांश्चैतान्न जुगुप्सेत धर्मवि

तीरेण॥ एनश्चिन्नोतिपातकादिप्रकीर्णकांतान्यतरपातकिनस्तैरनिर्णिक्तैरेकत्रप्रायश्चित्तैः कमपि संलापाद्य
र्थं नाचरेत्॥ कृतप्रायश्चित्तानेतांश्च न धर्मं विक्रुर्नापि लौकिककार्येषु न जुगुप्सेत न परिहरेत्॥ ऋद्धत्यादिना प्रायश्चि
त्तं प्रदत्तं स्वयं गृहीत्वाति। अयमेव प्रायश्चित्ते परिग्रहप्रकारमाह शौनकः। यस्तु प्रायश्चित्तेन शुध्येत्तस्मिन् शुद्धे शातकुंभमयं पात्र
पुण्यतमाद्ध्रदात्पूरयित्वा स्रवंतीभ्यो वा तत एनमप उपस्पर्शयेयुरिति। शान्नकुम्भं सुवर्णं तत्र ताः पात्राद्धृताभिरद्भिरेनं स्नाप
येयुर्जातवेदः। अथास्मै तत्पात्रं दद्युस्तत्संप्रतिगृह्य जपेत् शान्ता द्यौः शान्ता पृथिवी शान्तं शिवमंतरिक्षं यो रोचनस्त
मिमं गृह्णामीत्येतैर्यजुर्भिः पावमानीभिस्तरत्समंदीभिः कूष्माण्डैश्चाज्यं जुहुयाद्धिरण्यं ब्राह्मणाय दद्याद्गां वाचार्या
य येन देवसांयुदकं सर्वेषूपपातकेष्विति। गर्भवसिष्ठः। अभिषिक्तस्य च तु द्वारः पुनर्जन्मना व्याख्यात इति। पूर्वोक्ताभि
षेकानंतरं पुनर्जन्मवज्जातकर्माद्युपनयनांतैः संस्कारैः स संस्कार्य इत्यर्थः। योगीश्वरस्त्वन्यथाह। चरितव्रत आया
ते निनयेरन्नवं घटं। जुगुप्सेरन्न चाप्येनं संवसेयुश्च सर्वशः॥ घटपदर्जितज्ञातिमध्यस्थो यवसं गवां। प्रदद्यात्प्रथमं गोभिः स
त्कृतस्य हि सत्क्रियेति। गोभिः सत्कारमाह हारीतः। स्वशिरस्यायसमादाय गोभ्यो दद्याद्यदि ताः प्रतिगृह्णीयुरथैनं
प्रवर्तयेयुरिति। यद्वापवं वा दन्यथा नेति सिद्धं। तदा च पुनः प्रायश्चित्ताचरणमर्थसिद्धमेव। एतानि तिपुंस्त्वा विवदाय

स्त्रीणामप्येतद्ज्ञेयं यथाह योगीश्वरः पतितानामेष एव विधिः स्त्रीणां प्रकीर्त्तितः। वासो गृहांतिके देयमन्नं वासः सर
क्षणमिति। त्यक्तानामपि वासादिदानं विशेषः। स्त्रीणां पातित्यहेतुं रमप्याह स एव नीचाभिगमनं गर्भपातनं
भर्तृहिंसनं। विशेषपतनीयानि स्त्रीणामेतान्यपि ध्रुवमिति। अत्यंतिकात्याज्या आह वसिष्ठः। चतस्रस्त्रः परि
त्याज्याः शिष्यगा गुरुगा च या। पतिघ्नी च विशेषेण जुङ्गितोपगता च येति। कृतनिर्णेजनान्न जुगुप्सेतेत्यस्यापवादमा
ह॥ ॥बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः। शरणागतहंतॄंश्च स्त्रीहंतॄंश्च न संवसेत्॥ २१॥ ॥बालकोनषो
डशवर्षः तं घ्नंतीति बालघ्नाः। कृतमुपकारं घ्नंत्यपकारेण नाशयंतीति कृतघ्नाः। शरणागतं स्त्रियं च ये घ्नंति तान् धर्म
तो धर्मशास्त्रोक्तप्रायश्चित्तेन शुद्धानपि न संवसेन्न व्यवहरेदिति वाचनिकोऽयं प्रतिषेधः। जातिगुणविशेषानादरेणै
तत्र बालादिसामान्योपादानात् विशेषविवक्षायां प्रमाणाभावाच्चोक्तप्रायश्चित्तस्याधिकारिविशेषे ईतामाह
॥ ॥अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः। प्रायश्चित्तार्द्धमर्हंति स्त्रियो रोगिण एव च॥ २२॥ ॥अशीत्यवरो
ऽद्धऊनषोडशो बालः स्त्री रोगी चेत्येते जातिविशेषानादरेणोक्तप्रायश्चित्तार्द्धमर्हंति द्वादशाब्दादौ षडब्दादीति

सर्वत्र कल्प्यं। ऊनषोडशो बालः। अनुपनीतस्य तु पादो बालस्य दातव्यः सर्वपापेष्वयं विधिरिति स्मरणात्। वर्णा
विशेषेणापद्यादिकल्पनेन चतुर्विंशतिप्रायश्चित्तं यदातव्यं ब्राह्मणस्य महर्षिभिः। पादोनं क्षत्रियः कुर्यादर्द्धं वैश्यः
समाचरेत्। शूद्रः समाचरेत्पादमशेषेष्वपि पापेष्विति। एतच्च प्रातिलोम्यानुष्ठितचतुर्विंशसाहस्रातिरिक्तविषयं
तत्र हि गुणापेक्षाभिधानात्। यथाह योगीश्वरः। प्रातिलोम्यापवादेषु द्विगुणत्रिगुणा दमाः। वर्णानामानुलोम्येन
तस्मादर्द्धार्द्धहानित इति। विशेषांतरं च व्यवहारप्रायश्चित्तप्रकरण एवोक्तं। ननूद्दिष्टानुद्दिष्टेषु येषु निमित्तेषु प्रायश्चि
त्तं नाभिहितं तत्र कथमित्यत आह। ॥ उक्तानिष्कृतीनां तु पापानामपनुत्तये। शक्तिं चावेक्ष्य पापं च प्रायश्चित्तं प्रकल्प
येत्॥ ३२॥ ॥ उद्दिष्टनिपलाशदंतधावनादीन्यत्रैत निषेधाभिधानात् अनुद्दिष्टनिष्कृतीनां च तीर्थयात्रां च श्राद्धभो
जनमेव च। मासत्तु सप्तमादूर्ध्वं वर्जयेन्मैथुनमिति पतिरित्यादीन्यत्रैत निषेधानभिधानभिधानेषु पापेषु प्रायश्चित्तं प्रकल्प
येत्। कल्पना चेयं अत्रस्य तु नस्मृत्यंतरादुपदिशेत्तथा तत्तत्सुप्रकारयेत्। तादृशामान्यमपि न निश्चीयते तत्तद्ब्रह्मणोपदेष्टव्य
उद्यथा सपिंडापरिणयनादौ तत्र सगोत्रसप्रवरादिपरिणयनप्रायश्चित्तं कल्प्यं। अत्र असपिंडामसमानार्षेगो

नजामित्यादि निषेधसामान्यात् । यत्र तु निषेधसामान्यमपि न दृश्यते तत्र प्राणायामशतं कार्यं सर्वपापापनु
त्तय इति कल्प्यं । नन्वेषां ज्ञातानां प्रत्यक्षविधानादेव का कल्पनावसर इति चेत् सत्यं । तथापि विवक्षितं विषय
विशेषे तु विशेषतो नभिधानात् तद्विशेषसिद्ध्यर्थमस्त्येव कल्पनावसर इति । न केवलं विशेष्यविशेषेण कल्पना
। किं तु शक्त्याद्यपेक्षयापि सा कार्या । द्वादशवार्षिकादिप्रायश्चित्तशक्तस्यापि तु वंशविशेषात् त्यापतारतम्येणापि
प्रायश्चित्तं कल्प्यं । यथा आत्मनश्चोपरिस्थानेभ्यो द्विगुणानां च संगरे । ब्राह्मणविप्रापन्नौ चतुर्गुणं वेमैनानडुष्पतीत्यादि
वद्दप्रायश्चित्तं । चकारात् देशकालाद्यपेक्षयापि देशं कालं वयः शक्तिं पापं चावेक्ष्य यत्नतः । प्रायश्चित्तं कल्प्यं स्यात् यत्र चोक्ता न निष्कृ
तिर्योगिस्मरणात् ॥ ॥ इति श्री विश्वेश्वरभट्टोपाध्याय... श्रीमत्याम्वैजयन्त्यां चतुःपंचाशत्तमोध्या
यः ॥ द्विविधं पापप्रकाशं लोके विदितं रहस्यं कार्यमाज्ञातं तत्र प्रकाशे प्रायश्चित्तमुक्तमिदानीं तत्पंचाशत्तमेना[ह]
॥ ॥ अथ रहस्यप्रायश्चित्तानि भवन्ति ॥ १ ॥ ॥ अथ प्रकाशे प्रायश्चित्ताभिधानानन्तरं रहस्यप्रायश्चित्तानि कीर्त्य
न्ते(?) निभवंति । विख्यातदोषः कुर्वीत पर्षदोनुमतं व्रतं । अनभिख्यातदोषस्तु रहस्यं व्रतमाचरेदिति योगिस्मरणात्

तिं॰टी ५५
४७

अनेन विरुद्धानाम् एवं दोषे पर्षदं गत्वा जपस्य रूपं कृत्वा इति पर्षद् भावे कथं तद्वेयम् इति चेत् उच्यते। कर्द्दमे शालग्रामे पुण्ये पत
एतत् स्थान संभव स्वदने पुण्ये ऽन्यापदेशे न विरुद्धस्नानादिति तत्र पर्षद् भावे पर्षद् ह्रिगणमात्रस्यैव लोपो गौतरस्य
हरस्य ततायनमाह॥ ॥स्रवंतीमासाद्य स्नातः प्रत्यहं षोडश प्राणायामान् कृत्वा एककालेह विषाशीमासेन ब्रह्महा पू
तो भवति॥२॥ स्रवंतीनदीं तां गत्वा तत्र स्नात्वा मासं प्रत्यहं षोडश प्राणायामान् यद्यस्मा प्राणलक्षणान् कृत्वा एकदा रमे वह ति
ष ब्रह्महत्याशुध्यति। स्रवंती नदीं तां गत्वा तत्र स्नात्वा मासं प्रत्यहमिति स्नानैककालो भ्यामपि संबध्यते। इदं च वि
प स्नानात् पृथग् एकमेवं गंगास्नानं॥ कृत्वा॥ ॥कर्मणोंते पयस्विनीं गां दद्यात्॥३॥ ॥उक्तस्य कर्मणः समाप्तौ प्रचुर
पयसं गां दद्यात्। अंत इत्येव वचनात् एककर्मोपादानं वक्ष्यमाण कर्मसु अपि गोदान प्राप्त्यर्थं। गोदेया कर्मणो स्यांते पृ
थग्भिः पयस्विनीति योगिरत्नं परणात्। एभिर्महापातकिभिः पृथक् प्रत्येकं गौर्देयेति। कामतश्चेदमकामतो मनुः। स
वाहतिभिएवकाः प्राणायामास्तु षोडश। अपि भ्रूणहनं मासात्पुनंत्यहरहः कृता इति। अकामतोभ्यासे गौतमः
नष्टतपदवा ब्रह्महत्यासुरापानस्तेयगुरुतल्पेषु प्राणायामे स्नातो घमर्षणं जपेत् सममश्वमेधावभृथेनेति पयो

तावाद्दशरात्रंव्रतेनद्वितीयमग्निस्तृतीयंदिवादिच्छेकमत्तिकोजलक्लिन्नवासाइतिपूर्वोक्तयावद्भिःप्राणायामैस्ता
तःक्लिष्टोभवतितावतःकृत्वावशिष्टकालेघमर्षणंजपेत्।मासमितिशेषः।तद्व्रतःपयोव्रतः।द्वितीयंदशरात्रं।एवंदशरा
त्रं।एवंतृतीयं।दिवादिषुप्रातःकालेषु।पयःप्रभृतीनामेकवारंभोजनं।कामतोप्येवमेवमनुः।महापातकसंयुक्तोनगच्छेद्गाः
समाहितः।अभ्यस्याब्दंपावमानीर्भैक्षाहारोविशुध्यतीति।पित्रादिहननेमनुः।मंत्रैःशाकलहोमीयैरब्दंहुत्वाघृतंद्विजः
सुगुर्वप्यपहंत्येनोजप्त्वावानसइत्यृचमिति।शाकलहोमीयादेवकृतस्येनसइत्यादयोष्टौमंत्राः।नमरुद्रेत्येनमेत्राः।विवासेरत्यु
क्ता।अत्रगुरुहत्यादिविषयेयमः।अहंतपवसेद्युक्तस्त्रिरह्नोभ्युपयन्नपः।मुच्यतेपातकैःसर्वैस्त्रिर्जपित्वाघमर्षणमिति।निमि
त्तविषयेहारीतः।महापातकिपातकपातकोपपातकानामेकतमसन्निपातेचाघमर्षणमेवत्रिर्जपेदिति।एवमन्येष्वपि
विषयेविशेषमूह्यं।क्रमप्राप्तेसुरापानप्रायश्चित्ते।ब्रा॥ ॥व्रतेनाघमर्षणेनचसुरापःपूतोभवति॥८॥ ॥व्रतेनसंवत्सरं। मासाद्ये
त्यादिनामासैद्विर्त्यादिनामासेनेत्यंतेनातेनात्यापिदेशकालसंख्याशनानामुक्तानामेवप्राप्तिः।तत्रान्यनद्यांसा
तोघमर्षणेनमासंप्रत्यहंषोडशवारानभ्यस्तेनैककालंहविष्याशीसुरापःपूतोभवति।अनुवर्तनादपिपुनःपूतत्ववचनमग्ने

५०

पवपंगार्यांप्राणायामस्त्र्यानेनाणपमर्षणंतस्मजलेस्थित्वाकार्यंतथावत्रिंशद्दानवत्तोपक्रमेणैतनमः॥ अंतर्जलेवाघमर्षणं
त्रिरावर्त्तयन्सर्वपापेभ्योविमुच्यतइतिएतद्वपैष्पा॥ ६॥ त्रिविधसुरापानेइयंकामतस्त्वेदमकामतोयोनायवरः॥ द्विरात्रो
पोषितोऽत्राकृश्माण्डोभिर्घृतंजुहुपि॥ सुरापइतिश्रुयतेतिमेघः॥ अकामतोभ्यासेमनः॥ कोत्संजस्वापश्येतद्वासिष्ठंच
प्रत्येकंप्रति॥ माहिस्त्रुद्धवत्यसुरापोपिविशुध्यति॥ मासंषोडशवारंप्रत्यहमपनःशोशुचदघमितिकोत्सं॥ प्रतिस्तोमेभिरु
षसंवसिष्ठाइतिवासिष्ठं॥ महित्रीणामवोस्त्वितिमाहित्रं॥ एतोन्विंद्रंस्तवामेतिशुद्धवत्यश्चेता॥ निमसुचितानिजपन्सुरापःशु
ध्यति॥ कामतोभ्यासेमहापातकसंयुक्तस्यत्यहंपावमानीजपः॥ सुवर्णस्तेयप्रायश्चित्तमाह॥ ॥ गायत्र्यादशसाहस्त्रजपेनसुव
र्णस्तेयकृत्॥ ५॥ ॥ घृतेनेत्यनापिसंतघृतेनातस्थनयोस्नानोइ॥ विषमुक्तमासंभत्यहंदशभिरधिकेनसहस्रगायत्रीज
पेनसुवर्णस्तेयकृन्मुच्यतेतथावत्रिंशज्जनवत्तोपक्रमेणैतनमः॥ साविंत्रीवासहस्रकृत्वस्त्रावर्त्तयनुनीतेहैवात्मानमिति
॥ वद्यमितिसारस्सहस्रकृत्वस्त्वभ्यस्येद्वाविशेषोपोषितइत्ययेतनमसंवधाविशेनमुपोष्यप्रत्यहंदाशसाहस्रगायत्रीजपेनसु
वर्णस्तेयकृन्मुतोभवतीति॥ कामतस्त्वेदमकामतोभ्यासः॥ मकृज्ञवाच्यवामीयंशिवसंकल्पमेवच्च॥ सुवर्णमपहत्यापि

द्राणाङ्गवति निर्मलइति। अस्यवामस्यपलितस्यहोतुरितिद्विपंचाशदृचं सूक्तमस्यवामीयं यज्जाग्रतोदेवमुदेति
देवमितिषड्डचं सूक्तं शिवसंकल्पं। अकामतोभ्यासेगोतमीयं। त्रिंशद्रात्रंशतपूर्वकं प्राणायामावघमर्षणंजपात्मकं का
मतोभ्यासेमहापातकसंयुक्तइत्यव्दंपावमानीजपः। गुरुतल्पगमनप्राह॥ ॥त्रिरात्रोपोषितःपुरुषसूक्तजपहो
माभ्यांगुरुतल्पगः॥६॥ ॥त्रिरात्रविधानान्मासमात्रनिवृत्तिःनप्रत्यहादेः। पौरुषंसूक्तमावर्त्यमुच्यतेसर्वकि
ल्बिषादितियमविहिताहृत्तोसंख्यापिज्ञायतोपूर्वोक्तापोडशसंख्येवान्वेतितत्रत्रिरात्रमुपोष्यप्रत्यहंषोडशवारंस
हस्रशीर्षेतिषोडशर्चंपुरुषसूक्तंजपित्वाषोडशवारंषोडशर्चेनतेनैवहुत्वागुरुतल्पगःशुध्यति। कामतस्त्वेदम
कामतोमनुः। हविष्यांतीयमभ्यस्यनतमंहइतिवाजप्त्वापौरुषंसूक्तंमुच्यतेगुरुतल्पगइति। हविष्यांतम
जरंस्वर्विदीतिहविष्यांतीयं। नतमंहोनदुरितंमितिनतमंहः। सहस्रशीर्षेतिपौरुषं। अभ्यासस्त्रिरात्रेत्रिवा
रं। अकामतोभ्यासेगोतमीयं। मासंप्राणायामेस्ततोघमर्षणंजपेदितिज्ञेयं। कामतोभ्यासेमहापातकसं
युक्तइतिमानवोव्दंपावमानीजपः। इदंचसवर्णसपत्नमातृगमने। साक्षान्मातृगमनेतुपइत्रिंशन्मतोमह

व्याहृतिभिर्होमः कृतैवैकार्यो द्विजन्मना । महापातकसंयोगे तत्तु होमेन शुध्यतीति । महापातकसंयोगे पातक
परः प्रायश्चित्तस्यानिरुक्तत्वात् । असत्प्रतिग्रहमये [illegible] । अपेद्यापहरन्मा दामो येपावमानीस्तथापि वा । कुंतापं
वालखिल्यांश्च निवित्प्रैषान्वृहदाकपिं होतॄन्रुद्रान् सह शुचीन् जप्त्वा मुच्यते सर्वपातकैरिति । कुंतापमिदं जना उपश्रु
त इत्यादयः । निविदोग्निर्देवेद्ध इत्यादयः । प्रैषा होता यक्षदग्निं समिधेत्यादयः । वृषाकपिः वि हि सोतोरसृक्ष
दित्यादिसूक्तं ये विशिष्टा होतारः पृथिवी होतेत्यादयः तिहर्होता । अग्निर्होतेति । पञ्चहोता । वाचोहोतेति षड्ढोता । महाहविर्होतेति
सप्तहोता । चित्तिः स्रुक् शचिन्नमाज्यमितिदशहोता । रुद्राः कद्रुद्राय का न मस्त इत्यादयः । संसर्गि प्रायश्चित्तमाह मनुः ।
यो येन पतितेनैषां संसर्गं याति मानवः । स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धये इति । महापातकसमेष्वपि महापातको
क्तमेव उपपातकिनस्त्वेते महापातकिनो यथेति महापातकसाम्याद्दश्वमेधेन शुध्येयुस्तीर्थानुसरणेन वेति प्रायश्चि
त्तानि । अथ उपपातकान्याह ॥ ॥ यथाश्वमेधः क्रतुराट् सर्वपापापनोदकः । तथाघमर्षणं सूक्तं सर्वपापापनोदकं
॥७॥ ॥ तरति सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजत इति श्रुत्या अश्वमेधस्य यथा सर्वपापापनोदकत्वं

तथाघमर्षणऋषिदृष्टस्य ऋतंच सत्यमिति सूक्तस्यापि सर्वपापापनोदकत्वमघ्य वसेयं सर्वपातकेषु विनियोगदर्शना
त्। यथाह बौधायनः। ग्रामात्प्राचीं वोदीचीं दिशमुपनिष्क्रम्य स्नातः शुचिः शुचिवासा उदकान्ते स्थंडिलमुपलिप्य स
कृत्क्लिन्नवासाः सकृत्पूतेन पाणिनादित्याभिमुखोघमर्षणं स्वाध्यायमधीयीत प्रातः शतं मध्याह्ने शतमपरा
ह्णे शतमपरिमितं चोदितेषु नक्षत्रेषु प्रसृतियावकं प्राश्नीयात् ज्ञानकृतेभ्योऽज्ञानकृतेभ्यश्चोपपातकेभ्यः स
प्तरात्रात्प्रमुच्यते द्वादशरात्रान्महापातकेभ्यो ब्रह्महत्यां सुवर्णस्तेयं सुरापानमिति वर्जयित्वैकविंशतिरात्रेणता
न्यपि तरतीति। षड्विंशन्मते महाव्याहृतिभिर्होमस्तिलैः कार्यो द्विजन्मना। उपपातकशुद्ध्यर्थं सहस्रपरिसंख्यये प
रिसंख्ययेति। संकरीकरणादिषु यमः। अहं तु पवसेद्युक्तस्त्रिरह्नोभ्युपयन्नपः। मुच्यते पातकैः सर्वैस्त्रिर्जपि
त्वाघमर्षणमिति। प्रायश्चित्तान्तरमाह॥ ॥प्राणायामं द्विजः कुर्यात्सर्वपापापनुत्तये। दह्यन्ते सर्वपापानि प्रा
णायामे द्विजन्मनाम्॥ ॥सर्वेष्वपि पापेषु द्विजः प्राणायामं कुर्यात् प्राणायामानां सर्वपापदाहकत्वात्। तदु
क्तं कौर्मे। दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः। तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य संयमात् इति। पापविशे

दिशेषेसंख्याविशेषोबौधायनेनोक्तः। अभिज्ञाकृतकः। ओंकृतस्य प्राणस्य सर्वं विभिः प्राणायामैः शुध्यति। इड एवी
मनाकेनोजनेषु पृथक् सप्ताहं सप्त सप्त प्राणायामान् धारयेत्। अभक्ष्यभोज्यामेध्यप्राशने प्राणायामान् धारयेत्। अथ पा
तकोपपातकवर्जं यच्चान्यदेवं युक्तः स्यात् अर्धमासं द्वादश द्वादश प्राणायामान् धारयेत्। अथ पातकपतनीयव
र्जं यच्चान्यदप्येवं युक्तः स्यात् मासं द्वादश द्वादश प्राणायामान् धारयेदथ पातकेषु संवत्सरं द्वादश द्वादश प्रा
णायामान् धारयेदिति। आचार्यः। वागादिक्रमेषु प्राणायामाः। स्वर्णस्तेये भक्षने उपपातके पंचैकोन पंचाशत्प्राणा
यामाः। अभक्ष्ये महापापप्रकीर्णकेषु उपपातकेषु षडधिकशतम् इति द्विसहस्रप्राणायामाः। पातकेषु म
हापातकेषु विंशत्यधिकशतत्रयपुक्तास्त्रिसहस्रः प्राणायामाः। अतिपातकेषु महापातकाधिकाश्चत्वारिंश
दधिकपट्शतयुक्ताष्टसहस्रं प्राणायामाः कल्प्याः। उक्तातिरिक्तेषु उपपातकेषु चतुःशतं प्राणायामाः। प्राणाया
मशतं कार्यं सर्वपापापनुत्तये। उपपातकजातानामनादिष्टस्य चैव हि। तिथो ब्राह्मणानां प्राणायामलक्षणमाह॥ ॥सव्या
हृतिं सप्रणवां गायत्रीं शिरसा सह। त्रिः पठेदायतप्राणः प्राणायामः स उच्यते॥ ७॥ ॥व्याहृतयो भूरायाः सप्त प्रणव

०.टी५५
१६

पूर्वकां वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेदिति ॥ गायत्र्यास्त्रिपदात्वे सिद्धे पुनर्वचनं सन्न्यासिजपपरोऽसेर
वदोभिन्नस्य चतुर्थपादस्य निरासार्थं ॥ गायत्रीजपस्य मोक्षफलकत्वमाह ॥ ॥ योऽधीतेऽहन्यहन्येतां त्रीणि वर्षाण्य
तन्द्रितः । स ब्रह्म परमभ्येति वायुभूतः खमूर्तिमान् ॥ २६ ॥ ॥ यो वर्षत्रयमतन्द्रितोऽनलसः सन् प्रत्यहं प्रणवव्याहृतिशीर्ष
कां गायत्रीं सहस्रकृत्वो जपति स वायुभूतो दृश्यरूपरहितः कामचारी खमूर्तिमान् आकाशवन्निर्लेपो लिंगशरीर
नाशे शुद्धस्वरूपो ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतेः । परं ब्रह्माभ्येति । प्रणवादित्रयार्थमाह ॥ २७ ॥ ॥ एकाक्षरं ब्र
ह्म प्रणवः । स सर्वेभ्योऽपि वेदेभ्यः परः श्रुतं हृष्टं मन्यन्ते इति वेदमातृत्वात् । मौनाद्वाक्संयमात्सत्यमवितथभाषणं विशि
ष्यते विशिष्टफलकं भवति । न सत्यात्परो धर्मो नानृतात्पातकं परमिति स्मरणात् । प्रणवेदारपदस्फुटत्वेनाभि
नत्वमाह ॥ ॥ क्षरन्ति सर्वा वैदिक्यो जुहोति यजति क्रियाः । अक्षरं त्वक्षरं ज्ञेयं ब्रह्म तथा ब्रह्मा स्रष्टा प्रजाः पातीति प्र
जापतिर्विष्णुश्च कारात् रुद्रश्च प्रणवस्तत्त्वं चकारोऽकारो मकारात्मकत्वात् । ततश्च प्रणवेन ब्रह्मादयन्तमसगुण
स्वरूपोपासनेन तत्तद्रूपावाप्तिरेव निर्गुणोपासनेन तु कैवल्यमित्युभयमप्यक्षरब्रह्मादिविशेषणाभ्यामभि

५४

ह्याहृतिकां गायत्रीं सहस्रसंख्यया जप्त्वा महापातकादिरहितः उपपातकादेस्सर्प इव जीर्णत्वचा विमुच्यते ॥२७॥ समा
संयमाद्दहिः सप्रणवव्याहृतिकां गायत्रीं सहस्रसंख्यया जप्त्वा महापातकादिशुद्धः उपपातकादेस्सर्प इव जीर्णत्व
नि मुच्यते ॥ गायत्र्या द्विजपत्यनित्यं द्वैपमाणमाह ॥ ॥एतयर्चा विसंयुक्तः काले च क्रियया स्वया । विप्रक्षत्रियनिर्गर्हणां या
ति साधुषु ॥२८॥ ॥यस्त्वैवर्णिको गायत्र्यादिविकं न जपति न त्रिसंध्याकाले स्वां क्रियां गायत्रीजपरूपां न करो
ति स साधुषु वैदिकेषु गर्हणां निंदां प्राप्नोति । यद्वा श्रौतस्मार्तकर्मसु गर्हणां सन्निधिकारं प्राप्नोति । संध्याहीनोऽशुचि
र्नित्यमनर्हः सर्वकर्मसु । यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेदिति दक्षस्मरणात् । एतयर्चेति मानवः पाठः
अध्येतव्या त्रिवास्येषु वेदाध्ययनोपगतत्वमप्याह ॥ ॥ओंकारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः । त्रिपदा चैव गायत्री विज्ञे
यं ब्रह्मणो मुखम् ॥२९॥ ॥प्रणवपूर्विकास्तिस्रो व्याहृतयो गायत्री च ब्रह्मणो वेदस्य मुखमादौ प्रयोज्यत्वात् । तदाह
श्वलायनः । ॐ पूर्वा व्याहृतयः सावित्रीं चान्वारभ्य वेदादिमारभेदिति स इति समानो निरासः । अथ चायाद
ति गायत्र्याः प्रयोगमपि चाह नयरवत्प्रकोज्यान्तेवमर्थ यथाह योगीश्वरः । उपनीय गुरुः शिष्यं महाव्याहृति

धि०टी५५

५३

पादमुदूदुहत्तांतदित्यृचोस्याः सावित्र्याः परमेष्ठी प्रजापतिः ॥ ७७ ॥ ॥ परमेष्ठी प्रजापतिः परमेष्ठी प्रजापतिः प
रमात्मा सावित्र्याः सवितृदेवताकायास्तत्सवितुर्वरेणीमह इत्यस्याः अपि समाने तथापि वेदत्रयात्पादत्रयात्पाद
त्रयात्पादत्रयाभिधानोपक्रमात्रिपदावैवेत्युपसंहाराच्च तद्धुदाशेन प्रसिद्धा या एव त्र्यहणां प्रणवादित्रिकस्य प्रसं
गात्रित्यजपे विनियोगमाह ॥ ॥ एतदक्षरमेतां च जपन्व्याहृतिपूर्विकां । संध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते ॥ ७८ ॥
॥ ॥ एतत्सर्वोक्तं प्रणवाख्यमक्षरं नसरतीत्यक्षरं तस्य नित्यमेतामनुपदोक्तां तदित्यृचं च व्याहृतयो भूराद्याः पूर्वं
यस्यास्ताः हृदयां पूर्वापरयोः संध्ययोर्जपन्विप्रो अनधीतवेदोपि वेदविद्भवति गायत्र्युपदेशकालानंतरं कालांतरे वे
दाध्ययनोपक्रमात्ततः पूर्वं गायत्रीजपस्य वेदप्राप्तिरूपं फलं ततश्च वेदविशेषं गायत्रीजपविधिरिति निरस्तं। गाय
त्रीजपेन वेदप्राप्तौ हेतुमाह। यतो वेदानां त्रयाणामध्ययनेन यत्पुण्यं तेन युज्यते त्रयीसारत्वाद्गायत्र्याः। अनेन स
प्रणवव्याहृतिकां गायत्रीं जपेदिति विधिः कल्पनीयः। इदं च नित्यजपस्यानुषंगिकं फलं। फलांतरमाह ॥ ॥ सह
स्रकृत्वस्त्वभ्यस्य बहिरेतत्त्रिकं द्विजः। महतोप्येनसो मासात्त्वचेवाहिर्विमुच्यते ॥ ७९ ॥ मासं यावद्बहिः सप्रणव

५३

259

ॐकारस्तु इमेयेपेतमापोज्योतीरसोमृतमित्यादिःशारस्मादुक्तोगायत्रीतत्सवितुर्वरेण्यमित्यादिकोमुद्दनासस्वरा
शिरंवायुनिरुच्य निःश्वसेत्प्राणायामः।यद्गुणगायत्र्याःप्रणवयोगःश्रूयतेनेनव्याहृतिशिरसोस्तथापिशिर
सोव्याहृतिभिःसहसप्रणवामिति त्रिशिखाद्वयेनत्रिषुपिदपादान्वयःसिद्धानि।अतएवशौनकः।आयतप्राणःप्रणव
सप्तव्याहृतिसावित्रीत्तिरःशिरोयुक्तयेतिरेणप्राणायामैःस्मृतिविषयप्रणवयोगमाह॥गायत्रीजपेप्रणवादिविध्यर्थंत
त्रिरात्मासाह॥ ॥अकारंचाप्युकारंचमकारंचप्रजापतिः।वेदत्रयान्निरदुहद्भूर्भुवःस्वरितीतिच॥२०॥ ॥ऐतरेयब्राह्मणेप्रजा
पतिरकामयततुपञ्चमपत्रयाणांलोकानांतेभ्यस्त्रयाणांदेवानामग्निवायुसूर्याणांतेभ्यस्त्रयाणांवेदानामृग्यजुःसाम्नां
तेभ्यस्तिसृणांभूर्भुवःस्वरितिव्याहृतीनांताभ्यस्त्रयाणांवर्णानामकारोकारमकाराणामुत्पत्तिमभिधायतानेकधा
समभरत्तदेतदोमितिव्याहृतिप्रणवोत्पत्तिरभिहितातदभिप्रेत्याहप्रजापतिस्त्रिभ्योवेदेभ्योऋग्यजुःसामभ्योभूर्भु
वःस्वरितितिस्रोव्याहृतीस्त्रीन्प्रणवावयवानकारोकारमकारान्निरदुहत्सारभूतानुद्धृतवानित्यर्थःकर्षइति
कालान्तरमहर्जनस्तपःसत्यमितिव्याहृतीनामुपन्यासः।जपविशेषार्थंगायत्रीप्रसंसति॥ ॥त्रिभ्यएवतुवेदेभ्यःपादं

हितं ब्रह्मेति नपुंसकलिंगपाठस्तु शब्दो हि नीयस्मात्प्रणवो ब्रह्म। नित्यव्यापकतया ब्रह्मप्रापकतया च प्रजानां सर्गस्थितिसं
हारहेतुत्वेन पतिः स्वामिभूतं ब्रह्मैवेत्यर्थः। उक्तस्य जपविधेरर्थवादपूर्वकं फलविशेषाय गुणविशेषमाह॥ ॥विधियज्ञा
ज्जपयज्ञो विशिष्टो दशभिर्गुणैः। उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः॥८५॥ ॥विधीयंत इति विधयोऽग्न्यदेव
ता मंत्रेतिकर्त्तव्यतादयस्तन्मयो यज्ञो विधियज्ञो ज्योतिष्टोमादिस्तस्मादिथा कथंचित्क्रियमाणोपि जपयज्ञो दशगुणा
धिको भवति स एव करणोवदशब्दमनःप्रयोगमुपांश्विति उपांशु क्रियमाणस्तस्मात् शतगुणाधिकः स एव मनसा
क्रियमाणस्तस्मात्सहस्रगुणाधिकः स्मृतः पूर्वैः। विधियज्ञाज्जपयज्ञाधिक्ये हेतुमाह॥ ॥ये पाकयज्ञाश्चत्वारो वि
धियज्ञसमन्विताः। ते सर्वे जपयज्ञस्य कलां नार्हंति षोडशीं॥८६॥ ॥ये अहरहः संपद्यमानसूनापंचकोत्पन्नदुरि
तनिवर्त्तकतया पाकाः प्रशस्ता ब्रह्मयज्ञं विना चत्वारो देवभूतपितृमनुष्ययज्ञा विधियज्ञैरुक्तलक्षणैर्ज्योतिष्टोमादि
भिः सहितास्ते सर्वे जपयज्ञस्य षोडशांशसमाना अपि न भवंति। अनेषां विनश्वरस्वर्गादिफलकत्वादस्य च ब्रह्म
सायुज्यफलकत्वात्। ब्रह्मयज्ञस्य पाकयज्ञत्वेपि जपयज्ञत्वेन पृथग्भावः फलातिशययोगार्थः। तदेवाह॥ ॥ज

प्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः। कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते॥८७॥ ब्राह्मणः पूर्वोक्तेन गाय
त्र्यादिजपेनैव संसिध्येद् दिद्युचोतेतान्न संशयो न तपसा स्त्रीलक्षणया जपक्रियामाह। एवकारो विधियज्ञाद्यन्त
र्थः। नैन तन्निरसनदासैव तावनत्वं निःश्रेयसो नमोदो। तान देवहि कैवल्यमिति श्रुतेः। कः पुनर्ब्राह्मण इत्यत्राह। मै
त्र इति ब्राह्मणस्य साधारणो लक्षणस्त्रियादिष्वपि संभवात् स्वाभाविकः योऽपि ब्राह्मणेषु द्वेषः सोऽपि प्राक्तन
शुभकर्मजन्य एवेति न क्वाप्यव्याप्त्यतिव्याप्ती इति सिद्धं स्वाभाविका मैत्री ब्राह्मणलक्षणं स्वाभाविकत्वं च ब्रा
ह्मणारंभकपरमपुरुषगुणविशेषात् स्वतं जल्पाजपाभिरत्यान्यद्वैदिकं निमित्तनैमित्तिकादि करोतु न क
रोतु वा तथापि मैत्रत्वेन ओतस्मात्त्वयज्ञार्थं पशुवीजाद्यहिंसनेनैव ब्राह्मणो ब्रह्मसंबंधी उच्यते॥ ॥इति श्री
विष्णुस्मृतिटीकायां श्रीमन्मन्वर्थवैजयंत्यां पंचपंचाशत्तमोऽध्यायः॥
॥ ॥एवं रहस्यप्रायश्चित्तान्युक्त्वा प्रायोपेक्षितान्यतः सर्वेषु चतुर्वर्णेषु वेदेषु याविप विज्ञाणि लक्कादानितं
निवक्तव्यानि भवंति तान्यप्यो जनमाह॥ ॥अघमर्षणं॥३॥ ॥ऋतं च सत्यं चेति न्तृचं सूक्तमघमर्षणमार्ष

कं॥ ॥देवकृतं॥ ॥५॥ देवकृतस्यैनसोवयजनमसीत्यादयोमंत्राः॥ ॥शुद्धवत्यः॥५॥ ॥एतोन्विंद्रंस्तवामेतित्य
चं सूक्तं॥ ॥तरत्समंदीयं॥६॥ ॥तरत्समंदीधावतीतिचतुरर्चं॥ ॥कूष्मांड्यः॥७॥ ॥यद्देवादेवहेडनमित्यनुवाक
त्रयं॥ ॥पावमान्यः॥८॥ ॥पावमानीस्वस्त्ययनीरित्यादिकाः॥ दुर्गासावित्री॥९॥ ॥जातवेदसेसुनवामसोम
मित्येषाऋक्॥ ॥अतीषंगाः॥१०॥ ॥पुरोजितीतोंधसइतिमासत्रयं॥ पदस्तोभाः॥११॥ ॥अष्टेडादिसामच
तुष्टयंवर्त्मादिवःपचात्ऽत्यस्यामृचागायमानं॥ ॥समानिव्याहृतयः॥१२॥ ॥व्याहृतिसामानिस्वरादीनिपंच
॥ ॥भारुंडानि॥१३॥ ॥यसेत्क्षसत्रातुतोदपिपीलःसर्पइत्यादीन्येकविंशतिसंख्याकानिसामानिस्वरा
दीनिपंच॥ ॥चंद्रमास॥१४॥ ॥अत्राहगोरमन्वतेत्यस्यामृचिगीयमानेचंद्रसाम॥ ॥पुरुषव्रतेसामनी॥१५॥
॥ ॥सहस्रशीर्षापुरुषस्त्रिपादूर्ध्वउदैदित्येतयोर्गायमानेसामनी॥ ॥अग्निलिंगं॥१६॥ ॥आपोहिष्ठेतित्यचे
गीयमानं॥ ॥बार्हस्पत्यं॥१७॥ ॥सोमंराजानंवरुणमित्यस्यांगीयमानं॥ ॥गोषूक्तं॥१८॥ ॥यदिंद्राहंयथा
त्वमस्यामृचिगीयमानेसाम॥ ॥आश्वसूक्तं॥१९॥ ॥इदमपित्यस्यामेवगीयमानेसामा॥ ॥सामनीचे

वि॰यं॰प॰
५६

दकुत्रेत्यस्य॰॥ ॥एतोन्विंद्रंस्तवामेत्यस्यामृचिगीयमाने चकाराज्ञायज्ञरैवतेत आद्योगायत्रंरैवतंतत्येतिवासि
ष्ठात् गायत्रंततश्च विलुर्वेत्पमित्यस्यांगीयमानं रैवतीनःस्वधमादइत्यस्यांगीयमानरैवतं॥ ॥शातकाडि
यं॥२१॥ ॥नमस्तेरुद्रमन्यवइत्येकादशानुवाकान्तैत्तिरीयप्रसिद्धाः॥ ॥त्र्यर्थवशिरः॥२२॥ ॥ब्रह्मादेवानांप्र
थमःसंबभूवेत्यादि॥ ॥त्रिसुपर्णा॥२३॥ ॥ब्रह्ममेतुमांमधुमेतुमामित्यानुवाकत्रयंतैत्तिरीयप्रसिद्धं॥ ॥मधु
व्रतं॥२४॥ ॥सोमंराजानमित्यस्यांगीयमानंसाम॥ ॥नारायणीयं॥२५॥ ॥नारायणोपनिषत्तैत्तिरीयप्रसि
द्धाअंभस्यपारेभुवनस्यमध्यइत्यादि॥ ॥पुरुषसूक्तंच॥२६॥ ॥सहस्रशीर्षेत्यादिषोडशर्चसूक्तं चकाराद्वाक्
सूक्तमहूचांद्रायणं वाक्सूक्तमहंरुद्रेभिर्वसुभिश्चरामीत्यष्टर्चं॥ वाक्सूक्तेऽहस्पतेप्रथमंवाचोअग्रमित्यष्टर्चप्रसि
द्धं महूचोमध्ववाताऋतायतइतितिस्रः॥ ॥त्रीण्याज्यदोहानिरथंतरंचअग्निव्रतंवामदेव्यंबृहच्च॥ एतानिगीतानि
पुनंतिजंतूनजातिस्मरत्वंलभतेयदीच्छेत्॥२७॥ ॥मूर्धानंदिवोअरतिमित्यस्यामृचिगीयमानंसामान्यसाम
त्रयमाज्यदोहानित्रमित्याचक्षते अभित्वाशूरनोनुमइत्यस्यामुत्पन्नंरथंतरं अग्निव्रतंचअग्निर्मूर्धादिवःककुदित्यस्यामृचु

तत्वंसामावामदेव्यंकयानश्चित्रआभुवदित्यस्यामृच्युत्पन्नंसामात्वामिद्धिहवामह इत्यस्यामुत्पन्नंरथंतरंसाम।एतेषां
साम्नांगानंप्रस्तावादिनिधनांताभिःपंचभक्तिभिःस्तोकेषुपंचविधंसामोपासीतेतिश्रुतेः।पापेभ्यस्त्रैवर्णिकान्पुनंती
तिनिमित्तसंयोगःकामनायांजातिस्मरत्वंचभवतीतिकामसंयोगः॥ ॥इतिश्री
विष्णुस्मृतिविवृतौश्रीमत्यांवैजयंत्यांषट्पंचाशत्तमोध्यायः॥ ॥उक्ताःपातकिनोद्विविधाः॥
अनुतापिनोननुतापिनश्च।तत्रानुतापिनांप्रायश्चित्तमुक्तमननुतापिनांत्यागंसप्तपंचाशत्तमेनाह॥ ॥अथव्रात्यादयः॥
॥१॥ ।अथानुतापिप्रायश्चित्तानर्हास्तेत्याज्यात्वभिधीयंतेतानाह॥ ॥व्रात्याः॥२॥ ॥व्रात्याःपूर्वोक्तास्तेयथो
क्तप्रायश्चित्ताकरणेत्याज्याः॥ ॥पतिताः॥३॥ ॥पतिताब्रह्महादयःपातकसंयोजकांताःप्रागुक्ताः॥ ॥त्रिपुरुषं
मातृतःपितृतश्चाशुद्धाः॥४॥ ॥मातृतोमातृदोषेणपितृतःपितृदोषेणचयेऽशुद्धाःपातित्यादिदोषदुष्टमा
तृपितृवंशयोरुद्भवास्तेत्याज्याः।पतितोत्पन्नःपतितोभवत्यन्यत्रस्त्रियाइतिवसिष्ठस्मरणात्।स्वपित्रोरात्मनःशुद्धिवि
हीनस्तंचवर्जयेदितिब्राह्मात्रानकेवलंतएव।किंतुत्रिपुरुषपतितोभवत्यन्यत्रस्त्रियाइतिवसिष्ठस्मरणात्।स्व

किंतु त्रिपुरुषं पिता महः प्रपितामहः वृद्धप्रपितामहाः पितामही प्रपितामही वृद्धप्रपितामह्यस्ते त्याज्या इति। तन्न पतितो न त्याज्यो मातुरन्यत्र स्त्रिया ज्ञप्तेनेन पातित्याभावबोधनात्तदपत्यस्य त्यागानुपपत्तेः। चकाराद्व्रात्यतकादयो पि यथाह गौतमः। त्यजेत्पितरं राजघातकं शूद्रयाजकं वेदविप्लावकं भ्रूणहनं यश्चान्त्यावसायिभिः सह संवसेदन्त्यावसायिन्यां वेति। पितृग्रहणं कैमुतिकन्यायेन। शूद्रयाजक उपपातकमात्रोपलक्षणं भ्रूणहा महापातकानां। ननु पतितोत्पन्नानां तु प्रायश्चित्तापनोद्यदुरितभावेन प्रायश्चित्ताकरणे त्यागः। भावाज्ञत्वेनैव पुरुषं त्यागविधिना त्यागस्यार्थं स्वाहारभइति। युक्तं चैतत्। विहितस्याननुष्ठानान्निंदितस्य च सेवनाच्च। अनिग्रहाच्चेंद्रियाणां नरः पतनमृच्छतीत्यादिना याज्ञवल्क्यादिवाक्येन पाणामेव पापोत्पत्तिनिमित्तताप्रतीयते। न चैषामन्यतमस्यापत्ये उपलंभः। मनुष्याधिकारत्वाच्छास्त्रस्येति न्यायेन शरीरात्मानं प्रतिविधिनिषेधयोरप्रवृत्तेः। न च शरीरग्रहणान्नरकालपातित्यनिमित्तोपलंभः। मनुष्याधिकारत्वाच्छास्त्रपातित्याभावो भिधीयते। अतो न नन्तरत्यास्य नापराधो न पातकमिति तिष्ठ अमिवा शरीरस्य पातित्यं ब्रूयाच्छास्त्रीय दिवा शरीरस्यापक्वचित्कसंयोगएव पातित्यहेतुस्तदा शरीरानव

छिन्नस्याप्यात्मनोनेकाशुद्धिद्रव्यसंयोगेमनुष्यमात्रस्यनित्यपातित्यापत्तेः।नचपतितोयमिति शरीरमेवाशुद्धिमत्तच्छ
रीरसंबंधात्समवेतंप्रायश्चित्तनाश्यदुरितंकिंचिदितिसिद्धान्तःचशरीरंप्रायश्चित्तनाश्यंपापंयेनचदेहांतिकेनतन्नाश
तिनतद्व्यवहारंसाधयतिशरीरस्यैवनष्टत्वात्।किंचपतितात्पन्नःपतितोभवतीत्यनेनाविशेषेणापत्यमात्रस्यपातित्य
मभिहितंतस्मादन्यत्रस्त्रियाइत्यनेनस्त्रीषुपोद्धृतेतत्रहेतुःसाहिपरगामिनीतिपरगामिनीतिपरगामित्वंचपरव्य
वहार्यत्वपर्यवसन्नंतेनचोत्सर्गापवादयोरेकविषयत्वान्यथानुपपत्त्याप्रमपत्यपातित्यापरपर्यायमव्यवहार्य
त्वमेवपर्यवस्यति।नचेदमहापातकप्रायश्चित्तवदितिचेत्।न।दृष्टान्तमेभिष्यात्।।सर्वतएवात्मानंगोपायेदित्यादिविध्य
तिक्रमस्यतत्रप्रत्यवायत्वात्।प्रकृतेतत्पादकाभावेनदुरितानुत्पत्तेरुक्तत्वात्।प्रायश्चित्तविधानंतुनपतितोत्रज्ञान
प्रतिरुद्धतानित्यस्यवैयर्थ्यापत्तेः।नह्यनिच्छतोप्रायश्चित्ताचरणंसंभवतिइच्छापूर्वकत्वात्प्रवृत्तेःइच्छायाश्चप्रवर्तन
लोपेनैवसिद्धेः।नचप्रायश्चित्तस्यपापादिकर्तृअभिधानार्थमितिवाच्यं।यदिरथंतरसामासोमस्यादैन्द्रवायवाग्रान्गृ
ह्णीयादितिवन्निमित्तस्यपापादिकत्वात्तत्स्मात्पतितोत्पन्नान्यदुच्छेतितेषामिदंप्रायश्चित्तमितिवक्तव्येतेषामिति

वे॰टी॰५७
५८

त्वकर्मणि षष्ठी। अस्तु स्मृत्युक्तोपजन्तवं पतद्यद्वर्हत्टेणां प्रायश्चित्ताचरणे हेतुः। एवमस्तु स्मृत्युक्तैर्यैश्चिवन्त्येतेनैतेन सह
संप्रयोगो विद्यत इति श्वेतोक्तिनिषेधस्मारणाय। अत एव पतिताः समवसाय धर्मं चरेयुरितरेतरयाजका इतरेतरा
ध्यापका मिथो विवहमानाः पुत्रान्संनिष्पाद्य ब्रूयुः। विप्रव्रजत अस्मत्त एवमार्यान्संप्रतिपत्स्यथेत्यथापि न स
रेन्द्रियैः पतन्ति पतितेन समाचरन्स्तद्दोषं न वेदितश्च संगहीनोपि सांगजन पैत्र्ये येत दिति हारीतोऽपि धवानि स धर्मा:
स्त्रियः स्तुर्योऽहिदुषि यानामभ्युपयन्तं पय आनत्यमं यातन न हि शा धर्मेष्क्वतेषु प्रयोजयेत्येवमस्तु स्मृत्युक्तैर्यैश्चिवन्त्ये
तेनैतेन सह संप्रयोगो विद्यत इति पूर्वोक्त एव संप्रापतितो। पत्नी नाम व्यवहार्येति बौधायन स्तु येषिद्धान्तयातिष्माश्र
पत्तलोपनयैवाशुश्रूषांस्तु मे व सिद्धांततु धीरकारा पुनः पितिविभाग प्रकरणे बौधायन एव पतितात्पत्रे व्यवहारं निषेध
ति। अनीतव्यवहारानुग्रासाच्छादनैर्बिभृयादनभिभाषमाण इति। अन्नापि पतितग्रहणे नैवतज्जातग्रासोपृथग पादा
नमात्रेति को व्यवहार्यताभिप्रायेणेति मन्तव्यम्। अन्यथा ग्रासाच्छादनानिषेधानुपपत्तेः। हारीतोऽपि। पतितस्यक
न्यायां विवाह्यमानायां वाहोरात्रस्तुपोषिता प्रातः शुक्लेन वाससाच्छाद्य नाहमेतेषां न ममैत इति त्रिरुच्चैरभिद

वानां तीर्थेषु गृहेषु वोद्वहेदिति याज्ञवल्क्योपि । कन्यां समुद्वहेदेषां सोपवासामकिंचनामिति कन्यामात्रस्यै
व व्यवहार्यत्वं वदन् पुमपत्यादीनामव्यवहार्यत्वमेवाह । अभ्युपगतं चैतद्विज्ञानेश्वराचार्यैरपि कन्यां समुद्वहेदेषामि
ति वचनात्कन्याया एवं तिरिक्ततदीयापत्यस्य संसर्गानर्हतां दर्शयतीति पुनरपि तैरेवाप्येवमेनः शमयति बीजगर्भसमुद्भवमि
त्यस्य व्याख्याने बीजगर्भसमुद्भवं शुक्रशोणितसंबद्धं गोत्रव्याभिसंक्रान्तिनिमित्तं न तु पतितोत्पन्नतादात्म्यमिहितं । यत्तु न
स्तेरेवरहस्यप्रकरणे ह्यादशरात्रेण पतितोत्पन्नश्चेति निरुद्धवसिष्ठवाक्ये न प्रसृतियाज्ञवल्क्यं तत्र पतितादीयोरहस्यमुत्पादित
पत्यस्येत्यभिप्रायेण वृषल्यामभिजातास्ति तिर्वत्पतितोत्पन्नव्याख्यानात् । अनुमेतदपरार्केणापि क्लीबाद्यपतितस्तज्जाश्च
त्यस्य व्याख्याने । यद्यपि पतितग्रहणेनैव तज्जग्रहणं सिद्धं तथापि पृथक्कार्यं अन्यथा औरसाः क्षेत्रजास्तेषामिति वाक्ये
न भागार्हता स्यादिति । अस्यायमाशयः । पतितज्जातवर्जमिति बोधायनेन ग्रासाच्छादनयोरपि निषेधाद्दूरापास्त
विभागार्हतेति तस्मात्पतितोत्पन्नानां न व्यवहार्यतेति सिद्धं । त्यागप्रकारस्त्वाशौचनिर्णये तस्य विद्यागुरुयोनिसंबद्धाश्च
सन्निपात्य सर्वाण्युदकादीनि प्रेतकर्माणि कुर्युरिति । उदकादीनीत्यनेन दाहनिषेधः शरीरस्य तेनुपप्रयोजनत्वात्

तेनपुत्रापि जलांजलिं पातादेवैर्वीयरो प्रतिपत्तिस्तत्रापि दाहलोपस्तु नैव शरीरसंस्कारात्तदाहस्मरणे वा पत्यश्राणां
तिकंशायश्चित्तंसम्रतःस्त्रेयेत्रस्मिन्नुदकादीनि सर्वाणि प्रेतकार्याणि कुर्या[illegible]ति। आदिशब्दादेकोद्दिष्टं। तस्मिन्नेवाह
णानस्त पिंडीकरणस्य प्रेतमनोद्देश्यकत्वाभावात्प्रेतकर्मत्वाद्दाशौचप्रा[illegible]िः। दासीघटमपांपूर्णं पर्यस्ये
त्प्रेतवत्पदा। अहोरात्रमुपासीरन्नाशौचं बांधवैः सह। ति[illegible]नवाह। बांधवैः सह सपिंडा इति शेषः। पतितस्योदकका
र्य्यं सपिंडैर्बांधवैः सहैवोदकदाने साहित्यात्। किंच पात्रं दास्या विपर्यस्येयुः। अस्य त्याज्यस्य विपर्यस्येदन्नमनुद
कं करोमीति नामग्राहमिति। अवकारोऽमेध्यस्थानपदा सव्येन तत्राजुमिति मंत्रः। योगीश्वरस्त्वन्यथाह। दासी
कुंभं बहिर्ग्रामान्निनयेरन्स्वबांधवा इति। अत्र मानवो विशेषः। निंदितेहनि सायाह्न इति। निंदितोहो रिक्ता
तिथिः। ज्ञातिजत्वमाह। ते सर्वे न्वारब्धाः स्युः प्राचीनावीतिनो मुक्तशिखा इति। अन्वालंभः स्पर्शः। किंच। विद्यागुरुबां
धवा निसंदेहाश्चैवाहोरात्रिं तिन्नसंस्पृशेयुः। नद्यन्तं उपस्पर्शनग्रामं प्रविशन्ति। प्रचेताः कृच्छ्राद्वाहिरग्नौ ममेतदु
पैतीतामभ्यासेयं वदुपेरितस्यापि प्रायश्चित्ताकरणे। तस्य गुरोर्बांधवानां राज्ञश्च समस्तदोषानाश त्यापाउम।

अपुनःपुनराचारं लभस्वेति सर्वथैव मय्यनवस्थितमतिः स्यात्ततोऽस्य पात्रं विपर्यस्येदिति शंखस्मरणात्। त्यागस्थात्या
गकालसंक्रान्तदुरितप्रायश्चित्ताचरणानंतरं कार्यः। पतितः पात्रयेद्दृश्यानुज्ञावतो पितृतानपि। अतः पतितसंत्यागः
कर्तव्यः शुद्धिमीप्सुभिः। प्राजापत्यं चरित्वा तु प्रायश्चित्ताचरणानंतरं कार्यः पातयेद्दृश्यान्। त्यक्ता च मे नाहं॥ ॥सर्व
एवाभोज्याश्चाप्रतिग्राह्याः॥५॥ ॥त्यक्ताः सर्वेऽप्यभोज्यान्नभोज्यं भोजनार्हमन्नं येषां ते तादृशाः। अप्रतिग्राह्याः नप्रति
ग्राह्यं प्रतिग्रहार्हं धनं येषां ते तथा। चकारादसंभाष्याश्च तदाह गौतमः। अतऊर्ध्वं तेन संभाष्य तिष्ठेदेकरात्रं जपन् सावि
त्रीमज्ञानेऽपूर्वं ज्ञानपूर्वं त्रिरात्रमिति। अज्ञातेरप्येतत्कार्याकार्यं विचारे वेदं। मार्गादिप्रश्ने तु पराशरः। पतितान्नं च संभा
षेद्दक्षिणां श्रवणं स्पृशेदिति। शंखोऽपि। अपपात्रितस्य रिक्थपिंडोदकानि निवर्तेरन्निति संभाषणसहासनव्यवहारान्न तेन
सह कुर्यादिति। ननु पतितेन सहैकशयनासनभोजनानि प्रागेव निषिद्धानीति कथं पुनरत्र निषिध्यंते त्यक्तस्य। पिप
तितत्वाविशेषादिति चेत्उच्यते। पतितेन सह भोजनादिनिषेधो यावत्प्रायश्चित्ताचरणमेव नोर्ध्वं न तु गुप्ते तकार्हं चि
त्सापि वेयुश्च सर्वशइति जुगुप्सावर्जनपूर्वकव्यवहारविधानात्। त्यक्तेन सह निषेधस्तु त्यागोत्तरं प्रायश्चित्ताचर

रोष्यमव्यवहार्यत्वप्रदर्शनार्थे वा यत्संभाषणादिनिषेधपुनरुक्तिरिति चेन्न। नापतितापहृद्वं चंडालमृतहारं स्वध
र्मवित्। सस्पृश्यान्नुभयतेषां नाडुदक्यामंत्यस्त्रकादि निमाहृं डियेन नत्रुइ तत्वाभिधानात्। अत्रापविद्धस्तन्नक्तः। विद्या
दिनिषेधपौनरुक्त्यं तदसंभवात्। अत्राहुः। नायमपूर्वः संभाषणादिनिषेधः। किंतु पूर्वोक्तस्यैवानुवादः स
हसंभाषणे प्रायश्चित्तविशेषविधानार्थः। तन्न तादृशप्रायश्चित्तस्याग्रगनभिधानात्। विद्यादिनिषेधस्त
त्रोक्तोपपातकत्वाभिप्रायेणेति चेदुपपातकिनोपि तत्स्याद्विद्यादिनिषेधोऽस्ति प्राकृपतितेनोदकपिंडादिनिषेधोपि
व्याख्यात इति। अत्रोच्यते। उपपातकिनः स्त्रीगोघ्नोपपातकमात्रेति प्रसंगात्पतितस्यैव हि कुर्युरिति विवेचनाद्वि
शेषात्। किंतु मासेन पतितेन तथा त्वपातित्यादिविशेषाभिप्रायः पुनरुक्तिरिदं वस्येव। यद्वैवं पतितस्य बहिः
कुर्युरित्येवं वा भोजनतानेतिनेतरे राजन्मकं भिन्नादिविशेषपरिगणनं क्रार्थपातित्याभावे न परिगणनो
नर्थक्यादिति चेन्न। स्मृतिभेदात्तथान्येऽपि परिगणनस्य नियमार्थत्वेनैकवाक्यत्वात्। नन्वेवमनन्वादि
वर्जस्य तिष्ठमहापातकादिप्रायश्चित्तोन्नोद्धृत्यादिना तदकारिणां स्मृत्यागं विधायोते परिग्रहं विधे

भिधानाद्भयशेषत्वमिच्छात्यक्तात्यक्तयोः प्रायश्चित्तकरणेपरिग्रहइतिवृद्धबंधस्वरसोमज्योतिर्विदांनास
गपरिग्रहविधौरंतरात्यागविधिशेषतयारिक्थवद्धादिनिषेधाभिधानेनविरोधात्परिग्रहविधेरुभयशे
षत्वासंभवेनात्यक्तचीर्णप्रायश्चित्तमात्रशेषतासिद्धेः। नचत्यागविधानंतरमेवसर्वस्मृतिषुपरिग्रहवि
ध्यभिधाननियमः। बौधायनेनत्यागविधेःप्रागेवमहापातकावकीर्णिप्रायश्चित्तानंतरंपरिग्रहविध्यभि
धानात् तथापस्तंबः। परिषच्छुदपात्रेणनिनयेयुरसावहमित्यनृतइतिविरित्वापःपयोहृतंमधुलवण
मितिपालन्नवंतब्राह्मणाःसुशुश्रूरितिंतवयेत्योमतीतरःप्रत्याहचरितनिर्वेषंसवनीयंकुर्युरितितत्पूर्ववसि
ष्ठादिस्मृतिषुपतितानांचरितवृत्तानांपरित्वपुह्वारइतिपतितशब्दःश्रूयतेनक्वापितक्तशब्दइतितेनचतुर्वीसर्वान्गुरु
सर्वीमपपात्रितोपतितोवगतोपपातकमितिबौधायनीयंपतितापतितशब्दःश्रुतिमार्कंडेयीयंचपृथक्वनेनकृ
तप्रायश्चित्तात्भिप्रायश्चित्तोभिप्रायेणवसंभवतिनान्यथापतितश्चहत्येनेवसिद्धेः। किंचेत्पुनःपुनरात्वारेल
नस्यचत्याज्ञापश्चित्तप्रवर्त्तनेनदृष्टार्थंभवतितत्यक्तस्यासंग्राह्यत्वात्यक्तस्यापिदृष्टतस्यसंग्रहेतदृष्टार्थकंस्यात्

पृस्तात्तत्कार्यकृतस्य प्रायश्चित्तमनुष्ठापननिषेधेनैव व्यवहार्यत्वं स्पष्टमाह वसिष्ठः। गृहेषु ये रमापद्येरन्नतज
हतीन तं धर्मयेदुत्कृष्टकर्माणं तं धर्मयेन्न इति। अस्यार्थः। त्यागानन्तरं स पिंडाः स्वस्वगृहेषु ये तत्कृतपापसंक्रम
पुनस्तत्परिग्रहभयभूत्या न धर्मयेयुः। तन्नरसापिद्धतत्तत्तस्य परिग्रहे को दोष इत्यत आह। अतस्त्यागाद्द्वेते स पि
डास्तं तन्न धर्मयेयुः। धर्मं करोत्यन्वर्षेवा धर्मयतितन्नरोतितदेवत्र इति लिंगं धर्मयंतं धेरयंतीति धर्मयंतीति
नोरयंतीति वत्त्वार्थविषयकधर्मवत्तेनानिषेधेन प्रायश्चित्तमनुष्ठापनावगमात्तस्य चैतया निषादस्य पतितया
जेपेदिति वदनुष्ठानमपर्यवसानादर्थसिद्धमेवाव्यवहार्यत्वं। नसैवं प्रयोजकमिति विवदाव्यध्येतिशंकां प्रा
नाभत्त्वज्ञानार्थत्ववदनुष्ठापननिषेधार्थत्वात् उक्तानिषेधार्थवादमाह॥८॥ ॥ अप्रतिग्राह्याः पूर्वोक्तास्तेभ्यः
प्रतिग्रहाभ्यासो न कार्यः। प्रसंगवचनादापदि सकृत्प्रतिग्रहेण दोषस्तु तं भवति। आपद्गतः सप्रगृह्णन्भुंजा
नोऽपि यतस्ततः। न लिप्येतैनसा विप्रो ज्वलनार्कसमो हि स इति योगिस्मरणात् प्रतिग्रहवर्जनहेतुमाह॥
॥ ॥प्रतिग्रहेण ब्राह्मणानां ब्राह्मं तेजः प्रशाम्यति॥७॥ ॥ब्राह्मं ब्रह्मलोकाद्र्राह्ममिति पाठे वेदाभ्यासजनितं

तिज्ञोत्तिशयविशेषः प्रतिग्राह्येतारतम्येनाणनश्यतीति प्रतिग्रहविध्यज्ञाने दोषांतरमाह ॥ ॥द्रव्याणां वाविज्ञाय प्रति
ग्रहविधिं यः प्रतिग्रहं कुर्यात्स दात्रा सह निमज्जति ॥८॥ द्रव्याणां गवाश्वादीनां प्रतिग्रहविधिमज्ञ मंत्रयेत प्राणमभि
मृशेदप्राणीत्यादिकमजानतः प्रतिग्रहे दात्रा सह नरकपातः । दानविनैव दानफलोपायमाह ॥ ॥प्रतिग्रहस
मर्थश्चयः प्रतिग्रहं वर्जयेत्स दातृलोकमाप्नोति ॥९॥ ॥प्रतिग्रहे समर्थस्तपोविद्याचारास्तद्दानपियद्दस्तं प्र
तिग्राह्य तस्य राज्ञस्तुल्यो भवति तद्दानजन्यं लोकमाप्नोति प्रतिग्रहनिषेधापवादमाह ॥ ॥एधोदकमूलफलाभयामि
षमधुशय्यासनगृहपुष्पदधिशाकांश्चाभ्युद्यतान्न निर्णुदेत् ॥१०॥ ॥एधः काष्ठमुदकं जलं मूलं मूलकादि फलमा
म्रादि अभयं भयात्त्राणं त्रामिषं नत्स्यमांसं मधु क्षौद्रं शय्यावद्धात्रासनं भोग्यादि गृहं वेश्म पुष्पं मल्लिकादि द
धि प्रसिद्धं शाकं वास्तूकादि एकारात् कुशादीन् अभ्युद्यतान् दातुमानीतान् न निर्णुदेन्न प्रत्याचक्षीत । यथाह योगी
श्वरः । कुशाः शाकं पयो मत्स्या गंधाः पुष्पं दधि क्षितिः । मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि च ॥ मनुरपि
शय्यां गृहान्कुशान्गंधानपः पुष्पं मणीन्दधि । मत्स्यान् धानाः पयो मांसं शाकं चैव न निर्णुदेत् । एधोदकं मूल

मि.टी.५७
६१

फलमन्नमभ्युद्यतं च यत्। सर्वतः प्रतिगृह्णीयान्मध्वाज्यमभयदक्षिणामिति। इति तिरुहुतमल्लिका। सर्वतो निषिद्धादपि
वनिष्ठापि पापीयोदकयवसक्तुशालाजा अभ्युद्यतया नावलयुशफरी प्रियंगुरुस्रग्गन्धमधुमांसानीत्येतेषां प्रतिगृह्णी
यादिति। ननु गृहशय्यादिप्रतिग्रहे प्रायश्चित्ताम्नानात्कथमत्राभ्यनुज्ञेति चेत् सत्यं। अत्राभ्युद्यतत्वविशेषणेन
प्रायश्चित्तस्याभ्युद्यतादितविषयत्वकल्पनात्। किंच॥ ॥आहृताभ्युद्यतां भिक्षां पुरस्तादप्रचोदितां। ग्राह्यां प्रजा
पतिर्मेने अपि दुष्कृतकर्मणः॥२४॥ ॥गृहात्प्रामोरि सां भिक्षामित्याहृत्य पुरस्तादानीतां तां दुष्कृतकर्मणोऽपि याञ्चा
संप्रदायकारितोऽपिन त्पुपातितादेः प्रजापतिर्ग्राह्यामाह। तत्प्रत्याख्याने पञ्चदशवर्षाणि देवपितृकर्माणि विफ
लानीति वंतीत्यर्थवादकल्पो दोषः। प्रतिग्रहनिवृत्तेरपवादान्तरमाह॥ ॥गुरून्भृत्यांश्चोज्जिहीर्षन्नर्चिष्यन्पि
तृदेवताः। सर्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं ततः॥२३॥ गुरवो मातृपित्रादयः। भृत्या भार्यादयः। तानापद्ग्रस्ता
नुज्जिहीर्षुः प्रयोपयुक्तः पितॄन्सांवत्सरिकादौ देवताः कुलधर्मादावर्चिष्यन्सर्वेभ्यः स्वसर्वतो निषिद्धादपि प्रति
गृह्णीयात्स्वयं तत्तात्प्रतिगृहीतधनान्नतृप्युपायं न कुर्यादन्नापन्नः स्वेदापदि तु स्वयमपि तेन वर्त्तेत स्वे वा॥

यांत्यं सप्तपंचाशत्तमोऽध्यायः॥ ॥वक्ष्यमाणगृहस्थधर्माणामर्थसाध्यतयार्थो विवेक्तव्य इति तावद्दष्टपंचाशत्तमेनाह
॥ ॥अथ गृहाश्रमिणस्त्रिविधोऽर्थो भवति॥१॥ ॥अथेदार्थनिर्णयाधिकारः। गृहस्थस्यार्थो धनं वक्ष्यमाणप्र
कारेण त्रिविधं भवति। गृहाश्रमिण इत्याश्रमान्तरनिरासाय। धनार्जनस्य गृहस्थप्रकरण एवाभिधानात्। वृत्ति
नास्त्यातिकेनापि कार्या शुद्धेषु याचना। गुरोरर्थे प्रदानाय कष्टाल्लाभाय चात्मनः। यच्च मात्राहृते नित्यं वृत्ति
नोच्छनशस्य तदित्यभिस्मृतौ भिक्षाकन्यातिरिक्तयाचननिषेधात्। वानप्रस्थस्यापि नित्यं दद्यान्न प्रतिगृह्णी
यादिति प्रतिग्रहनिषेधात्। याजनाध्यापननिषेधाच्च ब्रह्मचार्यादीनां। त्रिविध इति विधान्तरनिरासः। तानि विभाऽ
ह॥ ॥शुक्लः शबलोऽसितश्च॥२॥ ॥शुक्लादिलक्षणं वक्ष्यति। प्रवृत्तिनिमित्तं तु शुद्ध्यर्थमतस्तत्र शुद्धिरुच्यते। त
साध्यप्रयोजनमाह॥ ॥शुक्लेनार्थेन यदौर्ध्वदेहिकं करोति। तेन देवत्वमासादयति॥३॥ ॥मृतस्य पित्रादेः पुत्रा
दिर्यच्छुक्लेन धनेनौर्ध्वदेहिकं पारलौकिकं पिंडोदकदानादिकं करोति तेनास्य देवत्वं संपादयति। यच्छबलेन तन्म
नुष्यं॥४॥ ॥शबलेन धनेन कृतं तेन मनुष्यत्वं नयति। यत्कृष्णेन तत्तिर्यक्त्वम्॥५॥ ॥कृष्णेन धनेन कृतेन तस्मिन्स्ति

र्थं न्वं पद्भुतांशापयति । असाधारणं शुल्कादिलक्षणमाह ॥ ॥ स्वहस्तेनुपार्जितं सर्वेषां शुल्कं ॥ ७ ॥ ॥ स्वहस्तेनयोब्राह्म
णादीनां प्रतिग्रहादस्वकर्त्तव्योपार्जितं शुल्कमुच्यते । सर्वेषामित्यनुलोमप्रतिलोमजातानामपि उक्तस्वधर्मार्जितं शुल्कं ज्ञेयं
॥ ॥ अनंतरस्वहस्तेनुपात्तं शबलं ॥ ८ ॥ ॥ ब्राह्मणस्य दानं यस्य वैश्यवृत्तिः वैश्यस्य शूद्रवृत्ति निरंतराते र्जितं शबलं ॥
अंतरितस्वहस्तेनुपात्तं च शबलं ॥ ९ ॥ ॥ एकांतरितोपात्तं अर्जितं कृष्णमुच्यते । यथा ब्राह्मणेन वैश्यवृत्त्या क्षत्रियेण शूद्रवृत्त्यावे
ति साधारणानां लक्षणमाह ॥ क्रमागतं प्रीतिदायप्राप्तं च सह भार्यया लब्धं श्वशुरादिभ्यो लब्धं तत्सर्वेषां वर्णानुलो
मजप्रतिलोमजानामविशेषेण शुल्कमुक्तं ॥ ॥ उत्कोचशुल्कसंप्राप्तमविक्रेयस्य विक्रयैः कृतोपकारादाप्तं च
शबलं समुदाहृतं ॥ १० ॥ ॥ उत्कोचो लंचः शुल्कं वरादिदेयं कन्यादिमूल्यं चात्र विक्रेयं लाक्षा लवणादि तद्वि
क्रयेण यल्लब्धं यच्चस्वपरोपकृतालब्धं तत्सर्वेषां शबलमुच्यते ॥ ॥ पार्श्विकद्यूतचौर्याप्तप्रतिरूपकसाहसैः ॥ व्या
जेनोपार्जितं यत्तत्कृष्णं समुदाहृतं ॥ ११ ॥ ॥ पार्श्वे स्थित्वा चामरचालनादि पार्श्विकं द्यूतमक्षादिक्री
डनं तत्समाह्वयस्यापि उपलक्षणं तेन समाह्वयो मेषादिभिः क्रीडनं चौर्यं प्रसिद्धं । प्रतिरूपकं अन्यप्रतिप्रतिरू

प्रतिगृह्णीयादात्मवृत्त्यर्थमेवचेति योगिस्मरणात्॥ अत्रैवापवादमाह॥ ॥पैतृकपितृकार्येषुसमर्थस्तत्प्रतिग्रहे
नादद्यात्कुलटाषंडपतितेभ्यः स्तथाद्विषः॥२४॥ ॥एतेषुस्वोक्तेषुमातृपितृमरणादिष्वपिकर्तव्येषुकुलटा वि
प्रतिग्रहसमर्थोपितेभ्यः प्रतिग्रहंनकुर्यात्॥कुलात्कुलमटतीतिकुलटास्वैरिणी॥षंढोनपुंसकः षाड्गुण्यः पति
तामहापातकादयः द्विषःशत्रुः तथाशब्दाच्चिकित्सकादेर्ग्रहणं॥ चिकित्सकस्यमृगयोर्वेश्यायाः कितवस्य च षंढ
स्तेनकयोश्चैवउद्यतावर्जयेदितिस्मरणात्॥ कितवोद्यूतकृत्स्तेनकोहिंसकः॥गुर्वाद्यर्थंसर्वतःप्रतिग्राह्यंतदभा
वेस्वार्थंतुकथमित्यतआह॥ ॥गुरुषुत्वभ्यतीतेषुविनावातैर्गृहेवसन्॥आत्मनोवृत्तिमन्विच्छन्गृह्णीयात्साधुतः
सदा॥२५॥ ॥गुरुषुपूर्वोक्तेष्वभ्यतीतेषुमृतेषुजीवद्भिरपितैर्विनावावसन्गृहस्थआत्मजीवनायसाधुभ्यएवै
वर्णिकेभ्यएवप्रतिगृह्णीयान्नशूद्रादिभिः तस्मात्प्रशस्तानांस्वकर्मसुद्विजातीनांब्राह्मणोभुंजीतप्रतिगृह्णी
यान्नशूद्रादिभ्यः॥तस्मात्प्रशस्तानांस्वकर्मसुद्विजातीनांब्राह्मणोभुंजीतप्रतिगृह्णीयाच्चेतिगौतमस्मरणा
त्॥शूद्रेषुप्रतिप्रसवमाह॥ ॥आर्द्धिकःकुलमित्रंचदासगोपालनापिताः॥एतेशूद्रेषुभोज्यान्नायश्चात्मानं

वि॰ टी॰ ५७

६३

निवेदयेत्॥१६६॥ अर्द्धेन फलं योऽसौ गृह्णाति सोऽर्द्धिकः। अर्द्धिकः सीरी इति यो गिरिस्मरणात् कुलपरंपरया मित्रं कुलमित्रं दासो गृहदासः गोपाल आभीरः। नापितः कोऽयं वा आयस्थ तवाहमित्यात्मानं निवेदयति एते शूद्रेषु भोज्यान्नाः भोजनार्हमन्नं येषां ते न थेति शेषः। विस्तरतस्तु पराशरेण कुलत्रयेण दासादयो ज्ञेयाः। यथा दासगोपालकुलमित्रार्द्धसीरिणाः एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्। शूद्रकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः। असंस्कृतो शूद्रवद्दासः संस्कारादेव नापितः। क्षत्रियाच्छूद्रकन्यायां समुत्पन्नस्तु यः सुतः। स गोपाल इति ख्यातो भोज्यो विप्रैर्न संशयः। वैश्याच्छूद्रकन्यायां समुत्पन्नः कुलमित्रं वैश्यकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः। सोऽर्द्धिक इति प्रोक्तो भोज्यो विप्रैर्न संशय इति। यद्यप्येषां द्विजोत्पन्नत्वेन न शूद्रत्वं तथापि कन्यासु शूद्रसामर्थ्यादविवाहितोत्पन्नत्वेन शूद्रसमानत्वाच्छूद्रत्वव्यपदेशः। शूद्रा णां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृता इति स्मरणात् एवंकारा कुंभकारोऽपि गोपनापितकुंभकार कुलमित्रार्द्धिक निवेदितात्मानो भोज्या इति वचनात्॥ ॥इति श्री

विज्ञानेश्वरविरचितायां मिताक्षरायां

कमन्यप्रदर्शनेनस्त्वयंदानादिपार्श्विकं। द्यूतमद्यादिक्रीडनंकरणंवा। साहसंपणपूर्वकंगिरिकन्दाद्यारो
हणं। व्याजमन्यद्रव्यप्रदर्शनेद्रव्यविक्रयादिएतैरुपायैर्यदर्जितंद्रव्यंतत्कालमित्युक्तं। नारदोपिपार्श्विकद्यूतचौ
र्यार्तिप्रतिरूपकसाहसैः। व्याजेनोपार्जितंयच्चतत्कालंसमुदाहृतमिति। पार्श्विकंउत्कोचेनुयानं। आर्तिःपरपीड
करणंदैन्यातिशयोवा। और्ध्वदेहिकन्यायममन्यत्रापातिदिशति॥ ॥यथाविधेनद्रव्येणयत्किंचित्कुरुतेन
रः। तथाविधमवाप्नोतिसफलंप्रेत्यचेहच॥ २२॥ ॥उक्तंत्रिविधमवाप्नोति। शुक्लादिनाद्रव्येणयदैहिकामु
ष्मिकफलसाधनंकर्मकरोतितादृशमेवोत्कृष्टापकृष्टमध्यमादैहिकमामुष्मिकंफलंप्राप्नोति॥ ॥इतिश्री
विष्णुस्मृतिविवृतौश्रीमत्यावैजयंत्यामष्टपंचाशत्तमोध्यायः॥ ॥
॥ ॥एवंगृहाश्रमोपयुक्तमर्थंनिर्णीयप्रक्रांतान्गृहाश्रमधर्मानेकोनषष्ठितमेनाध्यायेनवक्तुंवक्ष्यमाणे
षुश्रौतस्मार्तकर्मस्वग्निनिर्णयार्थंतावदाह॥ ॥गृहाश्रमीवैवाहिकाग्नौपाकयज्ञान्कुर्यात्॥ १॥ ॥
गृहस्थोविवाहकालाहृतेदायकालाहृतेगृहपतिप्रायणकालाहृतेवाग्नौपाकाःप्रशस्ताःत्रिरेतिकर्तव्या

गृह्यकारैर्न ये यज्ञा वैश्वदेवस्थालीपाकश्रवणाकर्मादयस्तान्कुर्यात्। गृहस्थग्रहणमाद्यंताश्रमनिवृत्त्य
र्थं नयोः पद्धत्यामस्ताभिलात्। यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ इति स्मरणात्॥ वानप्रस्थो ज्ञपि
लस्तकपचा माद्यान्देवपितृमनुष्येभ्यः इति वसिष्ठस्मरणात्। अनग्निकस्तु यो विप्रः सोन्नं चाहुतिभिः स्वयं
हुत्वाश्नीयात् कालमेवेच्छाशिष्टाद्भूतवलिं हरेदिति स्मरणात्। अनग्निः श्रौतस्मार्ताग्निरहितो विधुरः। विवा
हाग्निर्लौकिकस्तामुपलक्षणम्। औपासनेऽनुद्दृते तथा शालाग्नौ वा विजानता। विकल्पस्त्विच्छया कार्यो नान्ये
वान्यत्र वस्थितिरिति तस्यैव स्मरणात्। यच्च ग्निश्रयः पाकयज्ञाहुताग्नौ ह्यमानश्च अन्नमोपकृता ब्राह्म
णभोजने नोज ब्रह्माणा हुता इत्याश्वलायनोक्तानां सर्वेषामग्निसाध्यत्वं तथापि ब्राह्मणमुत्रत्वपदवात्
तिबलिंगसमवायात् पाकयज्ञशब्दोग्निसाध्यपाकयज्ञमाह। एवं स्मार्तेष्वग्निनिर्णय उक्तः श्रौतेष्वाह
ः॥ सायंप्रातस्त्वग्निहोत्रं॥२॥ ॥ सायंतु पक्रमत्वात् प्राक्सायंनिर्देशः। सूर्यास्तानंतरमस्पष्टनक्ष
त्रकर्मणोः श्रौतस्मार्तयोरग्निकर्म कुर्यात्। श्रौतस्मार्तकर्मणोः श्रौताग्निनियमः स्मार्तेषु गृह्याग्निर्वि

६

271

धानाद्धोतिशुश्रेताग्निसिद्धरर्थात्स्फुटैवेति न पृथग्वचनं।तच्च स्मृत्युक्तं योगीश्वरेण। श्रौतवैतानिकाग्निषि
तिनदसंभवत्याह॥ ॥देवताभ्यो जुहुयात्॥३॥ ॥अग्निहोत्रासंभवेग्निहोत्रदेवताभ्योग्नये सूर्याय योभयत्र प्र
जापतये च गृह्याग्नौ जुहुयात् सायंप्रातरनुवर्त्तते। तस्याग्निहोत्रेण प्राडुष्करणहोमकालो व्याख्यातो दित्य
स्थलायनस्मरणात्। सोयं नित्यविधिः। पक्षांतविधिमाह॥ ॥चंद्रार्कसन्निकर्षविप्रकर्षयोर्दर्शपूर्णमा
साभ्यां यजेत॥४॥ ॥चंद्रार्कयोः सन्निकर्षो मास्यांतयोर्विप्रकर्षः पौर्णमास्यांतयोर्यथाक्रमं दर्शपौर्ण
मास संज्ञकाभ्यां कर्मभ्यां यजेत। अग्निस्त्वेतायामनाहिताग्निः गृह्ये इति क्रमः। यद्यपि सन्निकर्षविप्रकर्षयो
रिति सामान्येनोक्तं तथाप्यात्यंतिकयोस्तयोः प्रतिपत्संधावेव संभवात्संधिदिने प्रधानयागस्तत्पूर्वेद्यु
रन्वाधानमिति विवेक्तव्यं। अन्वाधानं पूर्वदिने यागः संधिदिने भवेदिति स्मरणात्। विशेषांतरं
स्मृतिसंग्रहोक्तमस्माभिरन्यत एवावगंतव्यमिति॥ ॥अत्ययने पशुना॥५॥ ॥अयनमयनं प्रती
ति प्रयने रवेः कर्कसंक्रांतिर्दक्षिणं मकरसंक्रांतिरुत्तरमयनं तयोर्निरूढपशुबंधेन यजेत। उभ

यएककामेपिश्रौतएवायंगृह्यान्नोविषमोवादः॥ ॥सस्यांतेनवसस्येष्ट्यायनेन॥ह॥ ॥शरद्ग्रीष्मयोहत्त
योर्निरूढपेशुनवान्नेष्ट्यास्थालीपाकेश्रौतकर्मान्नीग्रीयज्ञेयातंक्रमेण॥ तत्क्रमः॥शरदिशारदा
नांव्रीहीणांग्रीष्मेयवानां॥देशविशेषेणप्रथमंयवसिद्धिः॥वेणुयवाभिप्रायेणवा॥यथर्तुवेणुयवैरि
तिविज्ञायतइत्यापस्तंबस्मरणात्॥चकाराद्दर्पग्रहणंकर्तव्यं॥शरदिव्रीहिचरुत्पत्तोहेमंतिकानांव्री
हीणामाग्रयणमिदंनचतुर्थ्यां॥ ॥त्रैवार्षिकाभ्यधिकान्नः॥५॥ ॥त्रिषुवर्षेषुदृश्यतइतित्रैवार्षिकं
नमेभ्यधिकमन्नंयस्यसतथाविधः॥सोमेनयजेत॥त्रैवार्षिकाधिकान्नोयःसहिसोममपिबेद्विज इ
तिवाक्यस्मरणात्॥काम्यसोमाभिप्रायमेतत्॥अल्पाल्पार्थसिद्ध्यैयःसोमंपिबतिद्विजः॥सपीत
सोमपूर्वोऽपितस्यानाप्नोतितत्फलमितिस्मरणात्॥ ॥प्राक्सोमेन॥५॥ ॥अन्नसामान्यस्यवतोपिव
मंतेत्यानतिपायज्ञेतेतिश्रुत्याप्रतिवसंतंसोमेनयजेतेतिनित्योविधिः॥सोमादिप्रत्याम्नायमाह॥ ॥
वित्तमावेष्ट्यावैश्वानर्या॥६॥ ॥पशुसोमचातुर्मास्यादिपर्याप्तवित्ताभावेवैश्वानर्येष्ट्याय

त्तात् एषा मर्मं मवेत् कुर्यो रिष्टिं वैश्वानरी ह्लिज इति योगिस्मरणात्॥ ॥श्राद्धार्थं यागोपहृतं हरेत्॥११॥ ॥श्राद्धा
दर्जितमर्थं यागे सोमादौ वर्जयेत्। चंडालो जायते यज्ञकरणं शूद्रभिक्षितादिति योगिस्मरणात्॥ ॥यज्ञा
र्थं भिक्षितमवाप्तमर्थं सकलमेव वितं हरेत्॥१२॥ ॥यज्ञोद्देशेन। अर्जितमनेन। अर्जितेन धनेन। अहं यज्ञमेव
करिष्यामीति संकल्पितं न तु यज्ञार्थं लब्धमदद्न्नासः काको पि वा भवेदिति योगिस्मरणात्। अवाप्तमि
ति विशेषणात् पूर्वमाप्राप्तवितमपपश्चाडुपगतेन सर्वं वितरेत्। वैश्वदेवकालमाह॥ ॥सायं प्रातर्वैश्वदे
वं तु जुहुयात्॥१३॥ ॥सायं संध्योपासनहोमानंतरं प्रातरमध्याह्ने तु विश्वेदेवसंबंधि हविर्जुहुया
त्। मध्याह्ने त्वयं संप्राप्ते बलिं कृत्वा तमनो गृहे। देवर्षिपितृमनुष्याणां यज्ञं कुर्वीतवाग्यत इति स्म
रणात्॥ ॥भिक्षां तरभिक्षवे दद्यात्॥१४॥ ॥सायं प्रातर्भिक्षवे संन्यासिने भिक्षां ग्रासमात्रां भवेद्भि
क्षुः पुष्कलपरिमाणो दद्यात्। चकाराद्ब्रह्मचारिणे वद्यात्। अभिक्षा त्रितयं परिव्राड्ब्रह्मचारिणामिति
प्राशरस्मरणात्। तत्रैव गुणफलमाह॥ ॥अर्चितभिक्षादानेन गोदानफलमवाप्नोति॥१५॥

स्यादंतयोर्भिक्षादानस्य जलदानं त्यड्जलदानमर्घ्येनोद्धृत्य भिक्षादाने गोदानफलं भवतीति यतिहस्ते ज
लं दद्याद्भैक्षं दद्यात्पुनर्जलं तद्भैक्षं मेरुणा तुल्यं तज्जलं सागरोपमितं पृथ्वीवा दातिशयात्। भिक्षुभावेत्वा
ह॥ ॥भिक्षुभावे त्वाहन्तमात्रं गवां दद्यात्॥१६॥ ॥संन्यासिब्रह्मचारी यो द्वय्या समादेया समर्थं गोभ्यो
दद्यात् भिक्षाभावमाह॥ ॥वक्ष्येवा प्रतिषिद्धा॥१७॥ ॥अग्रं गौवा ग्रासमात्रं प्राशिपेत्। अत्र नेन भिक्षादानस्य
नित्यतोक्ता भवति। भिक्षादाने भोजनप्राक्कालतापवादमाह॥ ॥भुक्ते पाने विद्यमानेन भिक्षा के प
न्या प्रदीता॥१८॥ ॥गृहपतिभोजनानंतरमपि पूर्वं शिष्टेनान्नेन भिक्षवे भिक्षा देयैवापत्तु। दंपत्योर्भुक्त
शिष्टेन भक्ष्यपात्रमस्यो कांत देवभोजनाभिप्रायेणोति भिक्तयं विद्यमानयहणात् इष्ट्वार्थं पुनः पाको नास्ती
ति गम्यते। अतिथिभोजनार्थं तत्स्वैव। वैश्वदेवेपि निवृत्ते यद्यन्योऽतिथिरावृजेत्। तस्मा अन्नं यथाश
क्ति प्रदद्यान्न बलिं हरेदिति मानवात्। पंचमहायज्ञकरणे निमित्तमाह॥ ॥कंडनी पेषणी चुल्ली उपस्कार इति पंच सू
ना गृहस्थस्य॥१९॥ ॥कंडनं तंडुलादिकंडनशाला। पेषणी गोधूमादिपेषणशाला। चुल्ली अग्निश्रयणी। कुंभो जलमणिकं।

उपस्कारोवस्करः। एताभिःपंचसूनाः प्राणिहिंसास्थानानि गृहस्थस्यावश्यंभावीनि गृहस्थग्रहणंब्रह्मचारिसंन्या
सिव्यावृत्त्यर्थं नित्यंकर्मानैमित्तिकमाह॥ ॥तन्निष्कार्यं तु सततं पितृतर्पणयज्ञान्कुर्यात्॥२०॥ ॥तासां प्राणिहिं
सानांनिष्कृतिर्द्धेर्ऋतौपञ्चमस्तदर्थंब्रह्मयज्ञादीन्कुर्यात्। चकारात्नित्यविधिसिद्ध्यर्थंतेनचनैमित्तिकं
नामप्येषांनित्यत्वंगम्यते। पंचयज्ञविधानंतुगृहीनित्यंसमाचरेदितिशंखस्मरणात्तानाह॥ ॥स्व
ध्यायोब्रह्मयज्ञः॥२१॥ ॥स्वाध्यायोवेदस्तस्यचक्रियाविशेषानुपादानादध्ययनमध्यापनंवाब्र
ह्मयज्ञः यत्स्वाध्यायमधीतेसब्रह्मयज्ञअध्यापनंब्रह्मयज्ञइतिचस्मरणात्॥ ॥होमोदैवः॥२२
॥ ॥होमोत्रवैश्वदेवार्थःसदैवयज्ञः॥ ॥पितृयज्ञस्तुतर्पणं॥ श्राद्धंवापितृयज्ञःस्यात्पित्र्योबलिरथा
पिवेतिकात्यायनस्मरणात्॥ नृयज्ञश्चातिथिपूजनं॥२५॥ ॥एकरात्रंहिनिवसन्नतिथिरित्यादिवक्ष्य
माणलक्षणोतिथिस्तस्यवक्ष्यमाणलक्षणंपूजनंमनुष्ययज्ञः। पंचमहायज्ञवद्देवयज्ञादीना
म्। पंचानांनित्यत्वमाह। देवतातिथिभृत्यानांपुत्रकलत्रादीनां। विहेणांपित्रादीनांज्ञेयाद

वि॰टी॰५८
६८

वरुहः सायंप्रातर्योऽग्नीन्निर्वपति निर्वपोऽत्र जन्ममरणाभ्यां [illegible] करोति स जीवन्नपि मृत
प्राय एव अकरणे प्रत्यवाय एव श्रवणान्नित्येक्त॥ ॥ब्रह्मचारी यति भिक्षुजीवंत्यते गृहाश्रवणात्तान
स्मादन्यागतानेतान्गृहस्थो नावमानयेत्॥२७॥ ॥ब्रह्मचारी प्रथमाश्रमी यतिः संन्यासी भिक्षु
भिक्षामात्रोपजीवी यन्नोपि विद्यार्थ्यादिः ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः अध्वगः क्षीणवृत्ति
श्च षडेते भिक्षुकाः स्मृताः इति व्यासोक्तेः एते गृहस्थगृहान्नात् भिक्षया जीवंतीति तस्मादेतानभ्याग
तान्भिक्षाकाले प्राप्तान्गृहस्थो गृहाश्रमी नावमानयेत्किं विदुतो मानमानं रक्षेन्नातिथिवंद्यो ज
तोऽदं वा दद्यात्सुभिक्षां कितयपरिश्रांतः ब्रह्मचारिणो॥ इह यावत्ततो दद्याद्विनवेमत्यवारितामिति पराश
रस्मरणात्॥ पृथग्मृत्यार्थं वा रम्भादो॥ ॥गृहस्थ एव यजते गृहस्थ एव विक्रियते गृहस्थस्तु यदा पश्येद्व
लीपलितमात्मनः अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् इति स्मृतेः वानप्रस्थाश्रये तपोविधानात्
आश्रमसमुच्चये चैतेन दानेष्वपि गृहस्थ एवाधिकारी तस्यैव धनसंग्रहाविरोधात् यश्च पि ब्रह्मचारि

णोपिअग्न्यादिसंभवेनदानमस्त्येवतथापिभिक्षादानातिथिभोजनादौगृहस्थस्यैवाधिकइतितदभिप्राये
णदानधारइतिनविरोधस्तस्मात्सर्वाश्रमिभ्योगृहस्थःश्रेष्ठःअभिहितः॥ ॥ऋषयःपितरोदेवाभूतान्यतिथ
यस्तथा।आशासतेकुटुंबिभ्यस्तस्माच्छ्रेष्ठोगृहाश्रमी॥२९॥ ॥ऋषयोवानप्रस्थाः।यामादाहृत्यवाग्रासान
ष्टौभुंजीतवागृतइतिस्मरणात्।पितरःश्राद्धे।देवायज्ञादौ।भूतानिश्ववादीनि।शुनांचपतितानांचश्वपचोपाप
रोगिणां।वायसानांकृमीणांचशनकैर्निक्षिपेद्भुवीतिमानवात्।अतिथयोवक्ष्यमाणाः।एतेसर्वेकुटुंबिभ्यो
गृहस्थेभ्यएवस्ववृत्तिमाशासतेतस्मात्सश्रेष्ठः।यथोक्तगृहस्थधर्मानुष्ठानेफलमाह॥ ॥त्रिवर्गसेवा
ततमन्नदानंसुरार्चनंब्राह्मणपूजनंच।स्वाध्यायसेवापितृतर्पणंचकृत्वागृहीशक्रपदंप्रयाति॥३०॥ ॥धर्मा
र्थकामेभ्यइतित्रिवर्गस्तस्यसेवनात्।सततंनित्यमन्नदानंयथाशक्ति।सुराणांहरिहरब्रह्मादीनांयथावास
नमर्चनं।ब्राह्मणानांवेदशास्त्राभिज्ञानांयथागुणमभ्यर्चनं।स्वाध्यायस्यवेदस्यसेवाध्ययनाध्यापनो
र्थजिज्ञासा।पितृतर्पणंनित्यनैमित्तिकश्राद्धाभिज्ञानां।एतान्विधिवदुक्तविधिनाकृत्वागृहस्थइंद्रलोकंप्राप्नोति॥ ॥३

॥ ५९ ॥ इति त्रातेषु गृहस्थधर्मेष्वाह्निकं षष्ठितमाध्यायेनाह ॥ ब्राह्मे मुहूर्ते उत्थाय मूत्रपुरीषोत्सर्गं कुर्यात् ॥ १ ॥ रात्रेः पश्चिमो यो यामो ब्राह्मो मुहूर्तः । तदुक्तं पश्चिमे यामे मुहूर्तो ब्राह्म उच्यते इति पितामहस्मरणात् । रात्रु पान्तो वास्तु इत्येवं ब्राह्मः । ब्राह्मो नाम भवेत् तस्यैव मुहूर्तः क्रमप्रेतो निशान्तिस्मरणात् तत्रोत्थाय जागरित्वा [illegible] द्राक्षिणे वा तद्ब्राह्मे मुहूर्ते यो निद्राति स उपपातकी स्यात् तं करोति तुर्यो मोहात् ताद् कृत्यं स्वयति तिष्ठ य [illegible] [illegible] पूर्वाकाले नाम नैवक्तानाचारवान् अपि न दोषः । तेन वस्त्रं परिधाय ततोऽनन्तरं के तत्राचामो नीषीस्तो [illegible] वर्जितः प्राकृत शिराः संवीतो मौनमोन्मन्यन्तरं परस्परं न पश्येत् दक्षिणाकर्णोपवीत कृत्वा मूत्रपुरीषोत्सर्गं कुर्यात् । तत्र कात्यायनः । यज्ञोपवीतेन च नपावनेच्छुः स्ववर्जितः शिरः प्रावृत्य कुर्वीत दाक्कर्णे दक्षिणे इति । एकवस्त्रश्चेत् कर्णे न्यधातु ग्रीवा पृष्ठे वा कृपाती तायवैक वस्त्रोपवीतं कर्णे कृत्वा मूत्रपुरीषोत्सर्गं कुर्यादिति शंखायनः स्ववरात् । कर्णेऽप्यदक्षिणः । पवित्रं दक्षिणे कर्णे कृत्वा विण्मू

नसुत्सृजेदिति हारीतस्मरणात् दंडांतेप्युतयोत्सर्गस्य प्रत्येकसंबंधादेकैकोत्सर्गेप्येको विधिर्ज्ञेयः
तत्र कालविशेषेण दिङ्नियममाह ॥ ॥दक्षिणाभिमुखो रात्रौ दिवा चोदङ्मुखः संध्ययोश्च ॥२॥ ॥द
क्षिणामुखो रात्रौ दिवा संध्ययोश्चोत्तरामुखो मूत्राद्युत्सृजेत् । रात्रिदिवाशब्दौ त्रिमध्याह्नपरः । तत्तश्च
पूर्वाह्णापराह्णयोर्दिगंतरव्यवच्छेदः समुच्चीयते । तदाह यमः । प्रत्यङ्मुखस्तु पूर्वाह्णे पराह्णे प्राङ्मुखस्त
था । उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुख इति । अस्यापवादमाह मनुः । छायायामंधकारे वा रात्रावह
नि च द्विजः । यथासुखमुखः कुर्यात्प्राणबाधाभयेषु चेति । तत्र व्यतिरेकेण देशविशेषमाह ॥ ॥नाप्रच्छादितायां भू
मौ ॥३॥ ॥तृणादिभिरनाच्छादितायां भूमौ मूत्रपुरीषोत्सर्गं न कुर्यात् । एवमुत्तरत्राप्यनुषंगः । तेनाच्छादनं ग
म्यते । तदाह यमः । तिरस्कृत्योच्चरेत्काष्ठपत्रं लोष्ठं तृणानि वेति । तृणेष्वविशेषस्तु स्मृत्यंतरे । अयज्ञियैरनार्द्रैस्तु
तृणैः संछाद्य मेदिनीमिति ॥ ॥न फालकृष्टायां ॥४॥ ॥फालोपहालाग्रलोहतेन कृष्टावदारितायां भू
म्यस्यामपि न ॥ ॥न छायायां ॥५॥ ॥छायायज्ञियद्रुमच्छायामवस्तोरिति हारीतस्मरणात् ॥ ॥न चोषरे ॥

वि॰टी॰६॰
७०

॥ ॥ऊषरस्थीरिणां निष्फला भूमिरिति स्थिया। वतोत्वकालनदीपर्वतपर्वतमस्तके देवायतनादिग्रहणा॥ नफा
लकृष्टेन जलेन न चयां न च पर्वते। नदीणीरे वायतनेन पर्वतमस्तके इति मानवाः॥ ॥नशाड्वले॥७॥ ॥शा
ड्वले हरिततृणादेशः॥ ॥नससत्वे॥८॥ ॥सत्वा निष्क्रमयस्तत्पुक्ते देशे॥ ॥नगर्ते॥९॥ ॥गर्तः श्वभ्रं त
द्विलस्या पुफलद्दाणं वर्जयेद्दृष्टे मला। निषेधयश्वभ्रादिला निचे तियास्यात्॥ ॥नवल्मीके॥१०॥ ॥वल्मी
कं वामलूरः सर्पस्थाननिति यावत्॥ ॥नपथि॥११॥ ॥पंथा जनसंचारमार्गः॥ १२॥ रथ्या राजमार्गः
पथः पृथग्वचनं दृष्टप्रय...ग्नैगौरवार्थ॥ ॥नपरास्युषे॥१३॥ ॥परकीये मूत्रपुरीषादौ॥ नोद्याने॥१४॥ ॥
उद्यानं फलपुष्पाद्यारामः॥ ॥नोद्यानोदकसमीपयोः॥१५॥ ॥उद्यानमुक्तं। उदकं जलाशयः कूपत
डागादि तयोः समीपे॥ ॥नभस्मनि॥१६॥ ॥भस्मरक्षातेन श्मशानमपि उपलक्ष्यते। राजमार्गश्मशाना
निदेशानि वचलानि चेतियास्यात्॥ ॥नांगारे॥१७॥ ॥अंगारो दग्धकाष्ठं तत्समूहस्त्वांगारं तुषक
पालयोः कपलद्दाणं तुषांगारकपाल निदेवतायतनानि चेतियास्यात्॥ ॥ नगोमये॥१८॥ ॥गोमये

गोशालायां तेन नमस्कारादिशङ्कातो न निषेधः॥ ॥न गोव्रजे॥२०॥ गोव्रजो गोष्ठं॥ ॥नाकाशे॥२१॥ ॥आकाशे तस्मिन् मट्टालिकादि॥ ॥नोदके॥२१॥ ॥उदकमुदकाधारः कूपतडागादि॥ ॥न प्रत्यग्न्यनिलानलेन्दुर्क स्त्री गुरु ब्राह्मणानां॥२२॥ ॥वाय्वग्निचंद्रसूर्यस्त्रीपित्रादिब्राह्मणानां प्रत्याभिमुख्येन अभिमुख्यं दर्शनोपलक्षणं॥ वाय्वग्निमानवानां॥ ॥नैवानवगुंठितशिराः॥२३॥ ॥नत्रवगुंठितमाच्छादितं शिरो येन सो न तथा शिरः प्रावृत्य वाससेति स्मरणात्॥ तच्छिरो वगुंठनमुपानच्छत्राद्युपलक्षणं॥ न सोपानत्पादुको वाच्छत्रवान्नांतरिक्ष इति स्मरणात्॥ शौचविधिमाह॥ ॥लोष्टेष्टकापरिमृष्टगुदोऽद्भिस्तेन शिस्मश्चोत्तायाद्भिश्चस्त्रिश्चोद्धृताभिर्गंधलेपक्षयकरं शौचं कुर्यात्॥२४॥ ॥लोष्ठं मृत्खंडः इष्टका प्रसिद्धा तयोरन्यतरेणगुदं पदं भिज्यातृणं काष्ठं तृणयोरप्युपलक्षणं॥ अथापकृष्य विण्मूत्रं लोष्टकाष्ठतृणादिनेति भारद्वाजस्मरणात्॥ वामकरेण धृतमेहनश्च कराङ्गुलिमात्रं वा साङ्गुदकं स्नवा साउद्दिश्य हृदं विधृतमेहन इति तत्स्मरणात्॥ उत्थायेति तत्रैव शौचं निषेधः पुरीषादि विंदुभिरूपोरुपवातपसेमात्॥ विप्रुषश्चयथानस्तुस्मरणात्॥

र्यथा वोक्तं न स्पृशेदिति देवलस्मरणात् । तत्र च सुवर्णजवचनं मृत्स्नं त्याभिप्रायेण तेन प्रतिमृद्ग्रहणमपायहरा
आधानेयोक्त शौचनामेभिः प्रक्षालनं स्मृतं तासु निर्णिक्तैर्मृदं दद्यान्मृदैतं जलमेव वेति देवलस्मरणात्
उद्धृताभिरित्युभय विशेषणं तेन जलांतः शौचनिषेधः । स्नानं त्वविरोधि तत शौचं न स्यादित्तज्जलाशयस्थितेपठानस्म
रणात् । उद्धृताभावे तु वस्त्रान्तरितमात्वं जलं त्यक्त्वा कुर्याच्छौचमुद्धृतैरिति । तथा पश्चान्मृद्ग्रहणनिषेधस्तु
उभयत्र पुरीषे तु पूर्वमादाय मृत्तिकां आर्द्र दानक्तवे पश्चात्त्वलोजलमाविशेदिति स्मरणात् । मृदो वि
शेषान्तरमस्मत्कृतं स्मृतिलिंगेषु दृष्टं । गन्धो विष्ठाद्यालेपः शौचार्थोपात्तायां मृदस्तयोः क्षयकरं इदं दे
यमेव चावधिर्याम्नान्यथा गंधद्वयस्यालेपद्वयस्य एवं कारणाद्वा क्षयकरमित्येवोक्तं । अत एव योगीश्वरः
अमेध्याक्तस्य मृत्तोयैः शुद्धिर्गन्धापकर्षणादिति गंधग्रहणमेव कृतवान् । कथं तर्हि सर्वस्मृतिगंधलेप
ग्रहणमिति चेत् । उच्यते । गंधार्थलेपो गंधलेप इति मध्यशाकपार्थिवादिवद्विशेषिलक्षणाया गंधक्षया
र्थं लेपो मृद इति वा ख्यातं तत्क्षयकारं शौचं कुर्यादित्यर्थः । तथा च दक्षः । दातव्यमुदकं तावद्यावत्स्यान्मृत्तिकाक्षयः

ति।शोधं शिश्नगुदवामकरदक्षिणकरकरद्वयदक्षिणपादवामपादपादानां क्रमेण शुद्धिभावं कुर्या
त्। तत्र हस्तनियममाह देवलः। धर्मविद्दक्षिणं हस्तमधःशौचे न योजयेत्। तथैव वामहस्तेन नाभेरू
र्ध्वं न शोधयेत्। प्रकृतिस्थितिरेकाहिकारणादुभयं क्वेति। कारणं व्याध्यादि तेनोभाभ्यामुभयत्रि
येति कारणं व्याध्यादि तेनोभाभ्यामुभयक्रियेति। स्मृत्यन्तरे तु वक्ष्यते पि विविदितोसंख्यामाह॥
एका लिंगे गुदे तिस्रस्तथैकत्र करे दश। उभयोः सप्त दातव्याः शुद्धिस्तिस्रस्तु पादयोः॥२५॥ ॥लिंग
गुदवामकरोभयकरपादेषु क्रमेणैकत्रिदशसप्तत्रिवारैः शुद्धिः। एकत्र वामकरे दश वामकरे दश
वामकरेत येति स्मरणात्। अत्र पाठक्रमेणैव शौचक्रमः। पादयोस्तु शौचादितेवामपादमिति स्म
त्यन्तरीयः। उभयोत्सर्गे वैतत्। केवलमूत्रोत्सर्गे तु शातातपः। एका लिंगे करे सव्ये तिस्रो द्वे हस्तयोर्द्वयोः। मूत्र
शौचं समाख्यातं शुक्रे तद्द्विगुणं भवेदिति। यदा तु संख्यया गंधलेपक्षयो न भवति तदा सैवावर्त्तनीया ने
ति याकल्पनाया नियमादृष्टार्थत्वात्। एतच्च स्वप्नोत्सर्गे। स्त्रीसंगे तु पराशरः। ऋतौ तु मैथुने स्नायाद्गर्भधा

रणशंकया। अनन्तरोक्तपदं गच्छेत्। कोपि मनःपुरीषवदिति। उभयोपादानमुक्तदशौचार्थो विशेषान्तरं स्मृति-
भिर्बोधव्यं। उक्तशौचस्यात्र मविशेषेण व्यवस्थामाह॥ ॥एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणां। त्रिगु-
णं वनस्थानां यतीनां च चतुर्गुणं॥२६॥ ॥एकलिंगेत्याद्युक्तं शौचं गृहस्थानां ज्ञेयं। ब्रह्मचारिवानप्रस्थसंन्या-
सिनां तु तदेव द्विगुणं त्रिगुणं चतुर्गुणं च क्रमेण ज्ञेयं। अत्र विशेषमाह दक्षः। यद्दिवा विहितं शौचं गृहस्थानां ज्ञेयं।
ब्रह्मचारिवानप्रस्थयत्यर्हमं तन्नेति। स्त्रीशूद्रयोरर्द्धमानं शौचं प्रोक्तं महर्षिभिरिति। पराशरोपि। उपविश्य तु व-
त्स्वेव कर्तुं यत्नेन विदति। एकार्धं दद्यात्। शौचं तु नरस्य गोचरस्य सर्वदा। बालस्यानुपनीतस्य गंधलेपक्षयावदि-
ति॥ ॥इति श्री विष्णुस्मृतिविवृतौ श्रीमत्यां वैजयन्त्यां षष्टितमो-
ऽध्यायः॥ ॥क्रमप्राप्तं दन्तधावननिर्णयमेकषष्टितमेनाह॥ ॥अथ पालाशं दन्तधावनं नाद्यात्॥१॥
॥ ॥अथ शौचानन्तरं यद्यपि विण्मूत्रानन्तरं गण्डूषान्पुरीषोत्सर्जने द्विजः। मूत्रोत्सर्गे तु चतुरो भोजनान्ते तु षोड-
श। पालाशमाशनं पाइकेदन्तधावनमिति नव ज्ञेयेदितापत्तं बीयात्॥ ॥नैव श्लेष्मातकारिष्टविभीतक

बचवन्वनजं॥२॥ ॥श्लेष्मातकः शेलुः। अरिष्टः फेनिलः। ननिंबस्तस्यायं विधानात्। विभी
तकः कलिद्रुमः। धन्वनो वनविभीतकः। एतभ्यो जातं नाम्न्यात्॥ ॥नक्वंशकनिर्गुंडीशिग्रुति
ल्वतिंदुकतं॥३॥ ॥बंधूको बंधुजीवकः। निर्गुंडी इंद्रा पिवा सुवहा वा। शिग्रुः सोभांजनः। ति
ल्वो मार्जनः। तिंदुकः स्फूर्जकः। एभ्यो जातं वनं॥ ॥नचकोविदारशमीपीलुपिप्पलेंगुदगुग्गुल
जं॥४॥ ॥कोविदारो युगपत्रकः। शमी शक्तुफला। पीलुर्गुडफलः। पिप्पलोऽश्वत्थः। इंगुदस्त
पस्तरुः। गुग्गुलः पुरः तेभ्योऽपि नं॥ ॥नपारिभद्रकाम्लिकामोचकशाल्मलीभ्यएणजं॥५॥
पारिभद्रकः शक्रपादपः। अम्लिका चिंचा। मोचकः शिग्रुभेदः। शाल्मली स्थिरायुः। शणः प्रसि
द्धः। एभ्यो जातं वनं। शरइतिपाठे शरखंडं वनं॥ ॥नमधुर॥६॥ ॥मधुरं मधुरसं मधुयष्टिका
दि॥ ॥नाम॥७॥ ॥अम्लमम्लरसमामलक्यादि॥ ॥नोर्ध्वशुष्कं॥८॥ ॥ऊर्ध्वं दलशाखाया
मेव शुष्कं॥ ॥नसुषिर॥९॥ ॥सुषिरं सच्छिद्रं॥ ॥नपूतिगंधि॥१०॥ ॥पूतिगंधि दुर्गंधि॥

नपिहितां ॥१२॥ ॥ पिहितं लक्ष्मीं वर्ज्यां दिशमाह ॥ ॥ न दक्षिणापराङ्मुखः ॥१४॥ ॥ दक्षिणा च अपरा च दक्षिणापरे ते प्रति
ती तदभिमुखो नाद्यात् । याम्यां दिशमाह ॥ ॥ अथवोदङ्मुखः प्राङ्मुखो वा ॥१३॥ ॥ प्राग्गुदङ्मुखो वा दातुं
चकारादैशान्यामुदक्। प्राग्वोदङ्मुख आसीनः प्रागुदङ्मुखत्वपर्वर्तते स्वलायने स्मरणात् । अत्रोदङ्मुखता वि
धानयत्या दि विषयं उक्तैरेण नानाशः । स्तोत्रोपरि जनस्य गृहस्थस्य दुष्टफलश्रवणात् । निषेधादेव वि
धिसिद्धे पुनर्विधानमनिषिद्धग्नेयादि दिग्निवृत्त्यर्थं विधानादेवं च निषेधसिद्धे पुनर्वचनमदृष्टविरोधेऽसत्य
दृष्टफलविरोधार्थं यदाहाश्वलायनः । दक्षिणेन तथा कुष्ठं पश्चिमेन पराजयः इति । विहितमदाह ॥ ॥ वटा
र्कखदिरकरञ्जबदरसर्जनिम्बारिमेदापामार्गमालतीककुभबिल्वानामन्यतमम् ॥१५॥ ॥ वटो न्यग्रो
धः । असनो जीवकः । अर्को मन्दारः । खदिरो दन्तधावनः । करञ्जः प्रकीर्यः । बदरः कर्कन्धूः । कदरीति पाठे श्वे
तखदिरः । करीरेति पाठे श्वेतखदिरः । करीरेति पाठे आकारः । कारवीति पाठे तस्योपविषत्वेनाभक्ष्यत्वा
दास्यात् । सर्जः शालः । निम्बः पिचुमर्दः । अरिमेदो विट्खदिरः । अपामार्गः शैखरिकः । मालती जातपुष्पव

ल्ली। कुकुभोर्जुनः। विल्वश्रीफलः। एषां मन्यतमं दंतधावनं ग्राह्यं। किंच।। ।। कषायं तिक्तं कटुकं
।।१८।। ।।उक्तातिरिक्तमपिकषायादिसंयाह्यं वकोराजो वृक्षहो दुंवरा दिस्यान्यंतरीयज्ञेयं। तत्प्रि
माणाद्याह।। ।।कनीन्यग्रसमस्थौल्यं सकूर्चं द्वादशांगुलं। प्रातर्भूत्वायतवाक्भक्षयेद्दंतधावनं
।।१६।। ।।कनीनीकनिष्ठिकातदग्रेणसमस्थौल्यं यस्यतादृशं कूर्चेनचर्वितभागेनयुक्तं। स च पर्वा
र्द्धमात्रः। कनिष्ठिकाग्रवत्स्थूलंपर्वार्द्धकृतकूर्चकमितितस्यैवस्मरणात्। वितस्तिमितं तच्च विप्राणां
द्वादशांगुलकं प्रोक्तं काष्ठमाद्यमे नीषिणः। क्षत्रविट्शूद्रजातीनांनवषट्चतुरंगुलं दंतानांशोधनायालं
नारीणांचतुरंगुलमितिगर्गस्मरणात्। प्रातरुदयात्प्राक्। पुरोदयाद्धवेत्सन्ध्या त्रोदितेस्तमितेरवाविति
रणात्। ब्राह्ममुहूर्तानुवृत्तौपुनः प्रातर्वचनमामध्याह्नं मध्याह्नस्नानवेलायां भक्षयेद्दंतधावनं।
निशायास्तस्य गर्हितदेवताः पितृभिः सहेतियमेनमध्याह्नं निषेधातायतवाक्मौनी। मेधमारम्येवमौ
नसिद्धौपुनर्भूत्वेतिवचनंमौनांतरविधानेनपूर्वमौनस्यात्वमनान्तताबोधनाय। भक्षयेच्चर्वयेन्न निग्र

तुरीतत्कालप्रतिपन्नाधाराः ॥ ॥प्रक्षाल्य भंक्त्वा तज्जह्यात् शुचौ देशे प्रयत्नतः। अमावास्यां न चाश्नीयाद्दंतका
ष्ठं कदाचन ॥१७॥ ॥तस्य प्रक्षालनं चाद्यंतयोः प्रक्षाल्य भंक्त्वा दैवादिति प्रक्षाल्य च सर्वं जह्यादिति गिरः स्मर
णात् तस्य भंक्त्वा जह्यात् उच्छिष्टताज्ञापनाय शुचौ देशे नैर्ऋत्यां दिशि। राक्षसां सत्यजेत्काष्ठं दिशि निर्ऋत्यां
त्र छुप्तों वितस्मरणात्। न प्रयत्नतोऽ शि अस्पर्शेन। आमावास्यायां कदाचन अपि उक्तं च प्रतिपत्तयोर्दंतकाष्ठं
नाश्नीयात्। आहेद्रवौ दिने वैतति दंतलेन स्थगनं यात्। अमावास्याशौ मास्वपलक्षणं। अष्टम्योश्च चतु
र्दश्योः पंचदश्यां त्रिजन्मसु। व्यतीपाते च संक्रान्त्यां दंतकाष्ठं न भक्षयेदिति स्मरणात्। दंतकाष्ठग्रहणं जि
ह्वोल्लेखस्यापि निषेधः। जिह्वोल्लेखं सर्वदा हि तिथौ वा सस्मरणात् ॥ ॥इति श्री
विष्णुस्मृतिविवृतौ श्रीमत्यां वैजयंत्यां मेकषष्ठितमोऽध्यायः ॥ ॥दंतधावनानंत
रमाचमनं तदर्थं तीर्थं निर्णयाय द्विषष्ठितमं नाह ॥ ॥अथ द्विजातीनां कनीनिकामूले प्राजापत्यं नाम
तीर्थं ॥१॥ ॥अथ यश्च ब्राह्मं इषानंतर्याद्ध्वः। ज्ञातो वो हि राचमध्यक्तत्वोदेदंतधावनं। पश्चाद्द्वादशमं

इषे॰ शुद्धिं कृत्वा द्विराचमेदिति शौनकस्मरणात् । द्विजातिग्रहणं वक्ष्यमाणआचमनेतीर्थसंख्यायोरधि
कारनियमाय । नस्त्रीशूद्रयोरस्तीयो भाववोधनाय तत्पर्णादोतीर्थाभावोपत्तेः । कनीनिकाकनिष्ठांगुलिस्तन्मू
लं प्राजापत्यतीर्थं नामेति स्मृत्यंतरप्रसिद्धं तीर्थांतरमपि दर्शयति । तत्र वसिष्ठः । अंगुलिकनिनिष्ठिकामूले
दैवमिति । आर्षं कनिष्ठिकामूल इत्याश्वलायनः । तेनात्र दैवार्षप्राजापत्यानां विपः ॥ ॥ अंगुष्ठमूले ब्राह्म
॥२॥ ॥ मूले आद्यपर्वणि नामेतानुवर्त्तते तेन मूलोत्तरतो रेखायामपि अंगुष्ठमूलस्योत्तरतो रेखायां ब्राह्म
तीर्थमिति वसिष्ठस्मरणात् ॥ ॥ अंगुल्यग्रे दैवं ॥३॥ ॥ नामेत्यनुवर्त्तते तेन मूलोत्तरतो रेखायामानुषप्रा
जापत्यानां विकल्पः । अंगुल्यग्रेषु मानुषमिति वसिष्ठः । कायमंगुलीषु चेत्याश्वलायनः । अग्र
मूलमध्योपलक्षणं । तेन मूले मध्येपि दैवं । अंगुलीमूलं दैवमिति बोधायनः । अंगुलिपर्वणि दैवमिति व्या
सस्मरणात् । अग्रे दैवमित्युक्त्यामूर्ध्येनङ्क्तो । अंगुल्यग्रमार्षमिति वासिष्ठात् । तेन चांगुलीमध्ये दैवार्ष
योर्विकल्पः ॥ ॥ तर्ज्जनीमूले पित्र्यं ॥४॥ ॥ मूले तर्ज्जन्यंगुष्ठांतराले पित्र्यं । नामेत्यनुवर्त्तते तेनांगुष्ठाग्र

पित्र्यमिति बोधायनीयमपि स्मृतं। एतानि दक्षिणे करे एव ब्राह्मणस्य दक्षिणे हस्ते पंच तीर्थानीति प्रचेतः
स्मरणात पित्र्यमंतरामेयं करमध्ये पाणिमध्ये ब्राह्म सुमिति। वासिष्ठात् तत्रैव सौम्यमपि मध्ये सौम्यं प्रतिष्ठि
तमिति योगियाज्ञवल्कीयात्। न वाचमनेऽग्राह्यस्यैव विनियोगात् दैवतराभिधानमसंगतमिति शंक्य
ब्राह्मणे विप्रस्तीर्थेन नित्यकालमुपस्पृशेत्। कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचनेति भारद्वा
जीय विकल्पार्थत्वेन संगतेः। पित्र्यविधानादेव पित्र्येनिषेधे सिद्धे पृथग्वचनमनिषिद्धानां मानुषाग्नेय
योरपि ग्रहणार्थं। आचमनविधिमाह॥ ॥ अनुष्णाभिरफेनिलाभिर्नैकैकपाणावर्जिताभिरक्षाराभिरद्भिः
शुचौ देशे आसीनो जान्वोरंतः प्राङ् उदङ्मुखो वा आचमनं समनाचम्य चाचामेत्॥५॥ ॥ अग्निनातप्ताः अनुष्णा नाम
स्यात्समुत्तिनिषेधस्नानादेरस्योदकेनापूरणं च तथोऽसेनोपायेनामिति या वक्ष्यतु इति शेषः। उपपाधि
नादीन्दीताः। अस्पृष्टेनाप्युदकस्याग्रहणं न चाम्बुदकशेषेण कार्यो दाचमनं तु यथेष्ट स्मरणात्। अम्बु
दकमात्रे परिवर्जनीयं। अग्निग्रहणात्कोलसहजोष्णयोर्निषेधः। अफेनिलाः फेनरहिताः फेनो बुद्बुद

यहणायारहितं बुद्बुदैः फेनैर्मलैरन्यैश्च सम्बद्धे इति स्मरणात् अशुद्धश्चैककरस्थाभ्यामावर्जितायां न भवेत्ता पक्ताः
एक एव करो यस्य सा चैककरो हस्तान्तरविकलः एकेनैव वा करेणानीताः शूद्रेणानुपनीतापलद्वारणान्यैर्वा वर्त्ति
हस्तेनानापरिज्ञाता हस्तेनेति पाराशर्यात् अद्वाराः द्वाररसगहिताः संभवेचेदमसंभवे तु यथालाभाय स्मिन्नुदे
शे तु पत्रयोर्ययास्त्वयत्नेनमृत्तिका सैवतत्र प्रशस्ता स्यात्तयाशौचं विधीयते इति मानवात् द्वारत्वेन रूपरसगंधांतर
शीलभ्यां तोऽअद्भिश्चशक्ति स्याभि इति स्मरणात् अद्भिर्द्वयांतरासंस्पृष्टाभिः एलालवंगकर्पूरगंधाद्यैर्वासि
तैर्जलैः नाचामेदिति स्मरणात् आचमनक्रियाकरणत्वेनात्तजीयाश्रुचेदेशेऽइति पादुकोपानन्निषेधः भू
मोपादेप्रतिष्ठाप्येति स्मरणात् आरूढपादुको वापिनस्तु येत द्विजोत्तमइति संवर्त्तीयाच्च आचमृतिशेषः
सुखूपविष्टः तएन्यथात्वनिषेधः न तिष्ठन्न प्रणतो न प्रहृद्धो न प्रसारितपाद इति बोधायनीयात् उपवेशनस्य
लाभे वे तिष्ठतापिकार्यी तिष्ठन्नाचामेत्प्रह्वो वेति गौतमीयात् जानुनोस्तरित्यंतर्जानुजानुनोर्मध्ये कृत्वा करौ
अंतरूर्वोररत्नी कृत्वा त्रिरपः पिबेदिति हारीतस्मरणात् दक्षिणं बाहुं जान्वंतरा कृत्वेति गौतमीयात् वाम

०२।६१

७८

स्यानियमःस्तदक्षिणः। निर्मलं शीतलं शुद्धं दक्षिणेन करेण नित्तिस्मरणात्। सव्यान्वारब्धस्ततावन्नोपस्पृशेद्दि
जन्मावमनं चरेत्। स्मृतेः। योवद्धपर्यंकः प्रौढपादस्तथा नमः। उद्देशप्रपदश्चैनाचामन्नुष्णं हिमाक्षुया दित्यादि
विधि निषेधयोर्ग्रहणात् तन्तीर्थादिनियममाह॥ ॥ब्राह्मेणतीर्थेन द्विराचामेत्॥ ८॥ ॥ब्राह्मं दैवप्राजाप
त्यानामन्यतमेन तीर्थेन पुण्यभागे न जलमार्गेण वा द्विस्तु वै चाचामेत् त्रिस्तु वै इति गौतमीयात्। त्रयं च तीर्थ
संस्तु यो नियमो द्विजानामेव प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेदिति योगिस्मरणात्। स्त्रीशूद्रयोस्तु
सकृदेवेन। स्त्री शूद्रौ तु जातिदैवेन सकृदाचमनं चरेदिति देवलस्मरणात्। पुनराचमनं परामर्षादंतधावने
न्याय द्वैचं द्विराचमनार्थः। द्विराचम्यात्मानमभ्युक्षेद्दंतान्शोधयित्वा पुनर्द्विराचामेदिति परिशिष्टात्। अनं
तरकार्यमाह॥ ॥द्विः प्रमृज्यात्॥ ९॥ अंगुष्ठमूलेन मुखमिति शेषः। पाणिं प्रक्षाल्य संहृष्टाभ्यां गुष्ठमूलेनाकुंचितोष्ठमा
स्यं द्विः प्रमृज्य सकृच्च संहतमध्यमांगुलीभिरिति परिशिष्टात्॥ ॥खान्यद्भिर्मूर्धानं हृदयं स्पृशेत्॥ १०॥ ॥खानि
नाभेरूर्ध्वं तानि तिसृभिरंगुलीभिः स्पृष्ट्वानंतरं मूर्धानं हृदयं च स्पृशेत्। तथा च परिशिष्टे। पाणिं प्रक्षाल्य सव्यं

७८

पातिपादेशिरस्यांगुष्ठदंताग्रमासंहतमध्यमांगुलित्रयेणास्यमुपस्पृश्यसांगुल्यप्रदेशिन्याघ्रा
णं विलद्वयमनामिकयाचक्षुःश्रोत्रेकनिष्ठयानलाभितलेनहृदयंसर्वाभिरंगुलीभिःस्पृष्ट्वाने
तरंसर्वोपस्पृशेतदाचमनमिति।सांगुष्ठत्वमनामिकाकनिष्ठयोरपि विशेषणंक्रमश्चपादहस्तेनेत्यु
क्तरीत्याज्ञेयः।जलपानेकालपरिमाणमाह॥ ॥हृत्कंठतालुगाभिस्तुयथासंख्यंद्विजातयः।शुध्येरं
स्त्रीचशूद्रश्चसकृत्स्पृष्टाभिरंततः॥९॥ ॥प्रथमंपीतमुदकंगच्छतितावद्यावत्तावद्धृतीयंचपिबेत्तदा वि
पःशुध्येत्तत्त्वयामंथरंवा।एवंकंठतालुगतंद्वित्रियवैश्योपिबतश्चेच्छुध्यतः।हृदयंप्राप्तिः पीत्वेतिप
रिशिष्टात्।अप्सुपाप्ताःसुहृदयंब्राह्मणःशुद्धिमाप्नुयादितिस्मरणाच्च।स्त्रीशूद्रयोस्तुसकृदपिताभि
स्तालुमात्रस्पृष्टाभिरद्भिःशुद्धिरितिशेषः॥ ॥इतिश्री
विज्ञानेश्वरभट्टोपाध्यायकृतौ ऋजुमिताक्षरायांस्मृतिविवृतौश्रीमत्पाविडयत्तोद्धिष्ठितमोध्यायः॥ ॥गृहस्थधर्माणांधनसाध्यत्वात्तदर्जनो
पायंविषष्ठितमाध्यायेनाह॥ ॥अथमोक्षतेमार्यमारवरुपगच्छतः॥१॥ ॥अथैतत्पृष्ठयो वि

क्रिमत्तादिनाद्यभागद्वयं विहितं कृत्यानंतरं तृतीये च तथा भागे पोष्यवर्गार्थसाधनमिति दक्षस्म
रणात् व्यतिक्रमो निवृत्तः प्रवासे पथि स्मृद्रवदाचरेदिति वचनात् प्रातःस्नानात् प्रातःस्नानादीनामवश्यक
र्तव्यतावबोधनाय । अलब्धलाभो योगः लब्धपरिपालनं क्षेमः । इष्टापूर्ते च योगक्षेमौ क्षेमं पूर्तं योगमि
ष्टमित्याहुस्तत्त्वदर्शिन इति लोगाक्षिस्मरणात् तदर्थमीश्वरं राजानं मन्यादिवाधनिकं स्वदेशे परदेशे वाऽभि
गच्छेत् । निवृत्तेन गमनेन पावि धर्मात् ॥ नैकोऽध्वानं प्रपद्येत ॥२॥ ॥एकोऽसहायः सार्थः प्रस्त
वतो मित्रमिति भारतात् ॥ ॥नाधार्मिकैः सार्धं ॥३॥ ॥अधार्मिका अधर्मशीलास्तैः सार्धं तत्सहायो
न ॥ ॥न वृषलैः ॥ ॥वृषलाः शूद्रास्तैः सह धार्मिकास्ते पतनापनाद्यनर्हत्वात् ॥ ॥न द्विषद्भिः ॥५॥ ॥द्विष
न्तः कृतवैरा न विश्वसेदविश्वस्तस्त इति नीतेः ॥ ॥नातिप्रत्युषसि ॥६॥ ॥प्रत्यूषः प्रभातः सप्तपञ्चउषःका
लः पञ्चपञ्चारुणोदयः । अष्टपञ्चकं भवेत् प्रातः शेषः सूर्योदयः स्मृत इत्युक्तलक्षणस्तस्मात्पूर्वकालस्त
दतिशायस्तस्मिन् ॥ ॥नातिसायं ॥७॥ ॥दिनपञ्चमो भोगः सायंतनमतिक्रम्यास्तवेलायां ॥ ॥नसंध्य

योः॥८॥ ॥उदयास्तयोरूर्ध्वं घटिकात्रयं संध्या उदयात्प्राक्तनी संध्या घटिकात्रयमिष्यते सायंसंध्या त्रि
का अस्तादुपरि भास्वत इत्युक्तलक्षणे तयोः संध्या॥ ॥नमध्याह्ने॥९॥ ॥मध्याह्नः कुतपः॥ ॥नसंक्षि
तपानीयं॥१०॥ ॥जलसमीपवर्त्तिना मार्गेण॥ ॥नातितूर्णं॥११॥ ॥सहयाश्वैर्याति त्वरया॥ ॥न
संततं वालव्याधितैर्वाहनैः॥१२॥ ॥अप्रौढैः व्याध्यभिभूतैः पीडावद्भिश्च वाहनैः रस्वादिभिः संततम
विश्रमेण न यायात्। व्याल इति पाठे दुष्टैः॥ ॥नहीनांगैः॥१३॥ ॥हीनांगाः काणखोडादयः॥ ॥न
दीनैः॥१४॥ ॥दीनैर्दुर्बलैः॥ ॥गोभिः॥१५॥ ॥गोभिर्बलीवर्दैः। गवां तु यानं पृष्ठेन सर्वथैव विगर्हि
तमिति मानवात्॥ ॥नादान्तैः॥१६॥ ॥अदान्तैरशिक्षितैः। अथवा न प्रपद्येत तत्र वर्त्तेत। पथि कथमेमेमा
ह॥ ॥यवसोदके वाहनानामदत्त्वात्मनः क्षुत्तृष्णापनोदनं न कुर्यात्॥१७॥ ॥अश्वादिभ्यस्तृणोदकमद
त्वा स्वयं न किंचिदुपभुंजीत। पथिकानिवासस्थानमाह॥ ॥नचतुष्पथमधितिष्ठेत्॥१८॥ ॥चतुर्णां मा
र्गाणां समवाये न प्रतिश्रयं कुर्यात्॥ ॥नरात्रौ वृक्षमूले॥१९॥ ॥वृक्षावस्तात्रात्रौ रात्रिग्रहणात् दिवा

षिवः॥ ॥न संध्यास्वयोः॥ ॥निर्मनुष्यं गृहं॥ ॥न रणे॥२१॥ ॥सद्रणं प्रदेशं॥ ॥न पशूनां बंधनागारं॥
॥२२॥ ॥गवादिपशुबंधनगृहं सेनाबंधनागारमितिपाठे सेनागारं हिंसागृहं वे बंधनागारं बंदीगृहं॥ ॥न केश
तुषकपालास्थिभस्मांगारान्॥२३॥ ॥तुषधान्यत्वक्‌ कपालानि घटखर्पराणि॥ अंगारा निर्वाणाला(ता)॥ ॥नि शे
षप्रदिङ्मात्रमुक्तप्रदेशः॥ ॥न कार्पासास्थि॥२४॥ ॥कार्पासास्थिकं पिचबीजं उक्तं देशे॥ अतितिष्ठेत्तिप्र
यिकमनुवर्तते प्रत्येकं निषेधार्थमादेशार्थम्॥ गमनकाले नास्नियमानाह॥ ॥चतुष्पथं प्रदक्षिणी कुर्यात्॥२५॥
॥ ॥पूर्वोक्तं चतुष्पथं प्रदक्षिणीकृत्य गच्छेत् न तन्मध्ये न चिह्नदेवतादिषु न तत्र॥ ॥देवतार्चां च॥२६॥ ॥देवता
प्रतिमां च॥ ॥प्रज्ञातान् वनस्पतींश्च॥२७॥ ॥प्रसिद्धान् महावृक्षान् अश्वत्थवटादीन्॥ प्रयाणे शकुनान्याह॥
॥ ॥अग्निं ब्राह्मणं गणिकां पूर्णकुंभमादर्शं छत्रं ध्वजपताकाश्चेति वर्धमानं नन्द्यावर्तं च॥२८॥ ॥अग्निं निर्धूम
सज्वालं ब्राह्मणं शोभनवेषं विप्रं चतुर्वेदानपि पूर्णकुंभमादर्शं छत्रं ध्वजपताकाश्चाभिवादिनी। पूर्णकुंभं जलेन
॥ आदर्शो निर्मलो दर्पणः॥ छत्रमातपवारणम्॥ ध्वजश्चतुरस्रवस्त्रयुक्तो दंडः॥ पताका तिर्यक् छिन्नवस्त्रो दंडः॥

२

द्रो।बिल्ववृक्षः।वर्द्धमानः।शरावकः।गृह विशेषो वा।नंद्यावर्त्तो राजविशेषः।चकाराद्भद्रपीठादि।ग्रहणं।फलपु
ष्पान्वितानगंधं दीपं च ज्वलितानलमिति स्मरणात्॥ ध्वजगणिकाप्रजनाश्च चारुवेषा इति वा रोहोत्॥ ॥ता
लवृंतं चामरा श्वगजाजगो दधि दीप्यमधु सिद्धार्थकांश्च॥२९॥ ॥तालवृंतं व्यजनं।चामरं वालव्यजनं।अश्व
स पल्याणः।गजः सांकुशः।अजः छागः।गोः सवत्सा।सुरभिः सवत्सेति स्मरणात्।दधि निर्मथितं।द्वीर
दुग्धं।मधु माक्षिकं।सिद्धार्थको गौरसर्षपः।एतांश्च।चकारान्नृपमंत्रिपुरोहितानिति स्मरणात्॥ ॥वीणां चंद
नाद्रचार्द्रगोमयफलपुष्पांकुशाक गोरोचन दूर्वाप्ररोहांश्च॥३०॥ ॥वीणा वल्लकी।चंदनं मलयोद्भवं।आयुध
जातं।आर्द्रगोमयमभिनवं गोशकृत्।आर्द्रपदेन शुष्कव्युदासः।फलमाम्रादि।पुष्पं मल्लिकादि।आर्द्रशाको म
स्तुकादिर्नशुष्कः।गोरोचना प्रसिद्धा।दूर्वायाः प्ररोहा नंकुरास्तांश्च।चकारात्काकोदीश्च।काकं च सायुधं शुद्धम
न्याश्चिह्नैः स्वकैर्युतानिति स्मरणात्॥ ॥उष्णीषालंकारमणिकनककरजतवस्त्रासनयानामिषांश्च॥३१॥ ॥
उष्णीषं शिरोवेष्टनं मुकुटं।अलंकारः कटककंकणादिः।मणि[illegible]कादिः।कनकरजते चाद्वतिते।वस्त्र

चिं·टी·६३
७९

गौरलंकारत्वात्तावत्खंजनकादिदर्शनं। लितमनार्द्रमक्तसोत्रासनंमेऽइपीठादि। यानमंदोलिकागेरथ्यादिखुर
गादोलिगाः स्प्राङितिनारदीयात्। यानेवागोमयुक्तामितिलत्वमरणात्। आमिषंसक्तपिंकंमांसंकविरे
द्वितेसमांसमितिलक्ष्मस्मरणात्। त्वंचकारान्मृदंगादीश्च। मृदंगतालपणवान् शंखान् भेरीश्च गोमुखान्।
वाद्यमानान् दृष्ट्वा व्रजन् कुर्यास्सर्वदिप्राप्तिमितिस्मरणात्॥ ॥ भृंगारोऽद्भुतोर्वरावद्धकपटुकुमारीमीनाश्च दृष्ट्व
प्रयाणादितिशा॥१॥ ॥ भृंगारः कनककोलुकः सुवर्णकलश इत्यन्ये। उद्भृतोऽहीमानाउर्वरा सर्वसस्याढ्याभू
मिकानाचिव। रज्जुवद्धरेकाकीपस्तुर्वलीवर्दादिः। सितहयमेऽश्वेदवस्त्रापि। सितौ हि वस्त्र सुमनोक्षि। श्वरत्नामि
वेति स्मरणात्। कुमारीश्च नूढा कन्या साच श्वेतांबरा। कुमारीपांडुरांवरेतिस्मरणात्। मीनोऽपंक्तो मत्स्यस्तो
वाकारांदोरादियइणोरजलिंगा। निसर्वोपिशवंकरदितवर्जितमितिस्मरणात्। एतान् प्रदक्षिणीकृत्य प्रय
आतांप्रस्थावादः। मोरहाजमयूराणां चापत्यनकुलस्य च। एतेषां दर्शनं श्रेष्ठं दुर्लभं चाप्रदक्षिणमिति। अथ शकुना
न्याह॥ ॥ अथमनोन्मनेयजानृह्वानिवर्नेता॥२३॥ ॥ अथेतिप्रकरणांतरार्थः। मनोमच्चादिनाउन्मनोऽप्रहादि

नाद्यंगोवित्यादि:। एषांदर्शनेनिवर्त्तेतैव॥ ॥वांतविरिक्तमुंडजटिलवामनांश्च॥२४॥ ॥वांत: कृतवमन: विरक्तो
तिसारी। मुंडोजटिलोवधूत:। वामनोह्रस्व: एतांश्च। चकारात् द्विपुप्रभृतिग्रहणं। रिपुविडसितधान्यद्याधितान्य
क्तैतैः पतितजटिलमुंडोन्मत्तवातैर्नसिद्धिरितिस्मरणात्॥ ॥काषायिप्रव्रजितमलिनांश्च॥२५॥ ॥का
षायिणोरक्तलिंगधारिण:। प्रव्रजित: संन्यासी। मलिनोमलाक्रांतदेह: कापालिकादि:। चकाराद्विमु
क्तकेशकाषायिनग्नेवनमुंडिता:। कुब्जांधवंध्यावधिरैर्दृष्टैसिद्धिर्नजायतइतियाज्ञ:॥ ॥तैलगुडशुष्कगोम
यैंधनतृणपलाशभस्मांगारांश्च॥२६॥ ॥तैलंसर्वेनतिलानामेव। गुड: पिंडिका। शुष्कंगोमयंकरीषादि। इंध
नंकाष्ठादि। तृणंकुशदूर्वातिरिक्तंघासादि। पलाशंपलाशादिपर्णानतांबूलपर्णानि। तांबूलधानासनकर्द्दमा
नेतिवसिंतात्। भस्मरक्षा। अंगारोऽलातं। चकारात्सर्पचर्मादिग्रहणं। शवेदिगंबरेत्सर्पगोधाशवरचर्मणि
॥ज्ञाहकेमूकरेचौतोदृष्टेसैतिचनक्षजेदितिस्मरणात्। लवणक्लीबासवनपुंसककार्पासरज्जुनिगडमुक्तके
शांश्च॥२७॥ ॥लवणंसांभलादि। क्लीवनपुंसकयोर्लक्षणंकर्मविपाकसंग्रहे। त्रमेथ्याशप्रमानक्लीबोनष्ट

वै॰टी॰ ६३
८०

रेतान् पुंसकं कर्पासरज्जुपरीतरक्ताङ्गुल्या यः पुमान् भवति सस्त्रीवज्र्यः॥ अथासवरक्तायदपक्वौषधांबुमां
सिद्धं मद्यासवासवं ज्यं बललक्षणः। आसवग्रहणान्मद्यभांडसुरयोर्निषेधः। वेश्यास्त्रीमद्यभांडप्रिय
॥ इति तद्वचनमंगलं परिस्थिता नाभिषेचनासिद्धार्थमत्स्यमांसकुराद्योतत्र वस्त्रशंखवृषभध्वजा इति नारद
यात्राप्रस्थाने भिनंदनीयान्याह॥ ॥वाणानंदनार्जनावोशीपालकारणकुमारीरक्तप्रस्थानमध्ये भि
नंदयेदिति॥ ३५॥ ॥वीणादयो यात्रायातारक्तारप्रस्थानकालेदर्शनभिर्देयेत्स्तुवीत। यद्वा वाणादिस्तान्
पुरुषान् हस्तरत्नादिदानेन संतोषयेत्। अथाशेऽनाक्रमणीयान्याह॥ ॥देवब्राह्मणगुरुत्वक्षुदीक्षितानां
छायां नाक्रामेत्॥ ३९॥ ॥ देवो देवप्रतिमा। ब्राह्मणो वटुश्रुतः नजातिमात्रं बहुश्रुतस्य छायामिति स्म
रणात्। गुरुरस्याध्यापको मंत्रोपदेष्टा वा। वभ्रुः कपिलवर्णो वा गोरन्यो वा। दीक्षितो दीक्षावस्थः। एषां छायां क
मेतानाक्रामेत्। नोल्लंघयेद् धितिष्ठेन्नवा॥ ॥निष्ठ्यूतवांतरुधिरविण्मूत्रस्नानोदकानि वा॥ ४०॥ ॥निष्ठ्यूतं
सस्वत्कारः। वांतं मुखनिर्गीर्णं। रुधिरमसृक्। विण्मूत्रे प्रसिद्धे। स्नानोदकेस्नानवारि। नाक्रामेदाचकारादिति

गादिग्रहणं देवर्त्विक्स्नातकाचार्यराज्ञां परस्त्रीनाक्रामेदुक्तं विण्मूत्रष्ठीवनोद्वर्तनस्नानिवेति योगिस्म
रणात् श्लेष्मनिष्ठ्यूतवांतानि नाधितिष्ठेत् चकारान्मलादीनि च॥ ॥न वत्सतंत्रीं लंघयेत्॥४१॥ ॥वत्सतं
त्री वत्सबंधनी रज्जुः वत्सग्रहणं गोमात्रोपलक्षणं तिसाभ्रात्प्रयाणे कन्येचान्या इ॥ प्रवर्षति न धावेत्
॥४२॥ ॥पृष्ठच्छत्रश्रिम ध्येन धावेत्॥ ॥नद्रुथ्या नदीं तरेत्॥४३॥ ॥साक्षात्परपरया वा समुद्रगो जलप्र
वाहो नदी तां हथात्र अन्यथा सिद्धकारणमंतरेण न तत्पारं गच्छेत् हथा वचनादावश्यककार्यं तरणेन
दोषः। न दोषः॥ ॥न देवताभ्यः पितृभ्यश्चोदकमप्रदाय॥४४॥ ॥देवपितृतर्पणमकृत्वा च न नदीं
तरेत्॥ ॥न बाहुभ्यां॥४५॥ ॥बाहुमात्रेण नौ हत्यादि साधनेन तु न दोषः॥ ॥न भिन्नया नावा
॥४६॥ ॥भिन्नया जलस्राविण्या नावा न चरेत् भिन्नेति सांशयिकापि गृह्यते नावं च सांशयि
कीमित्यापस्तंबीयात्॥ ॥न कूलमधितिष्ठेत्॥४७॥ ॥नद्यादिकूलं नाश्रयेत् कूलनिषेधाग्रनकू
लच्छायादिनिषेधोऽप्यर्थसिद्ध एव हि श्रद्धदोषस्योभयत्र तुल्यत्वात्॥ ॥न कूपमवलोकयेत्॥४८॥ ॥

वि॰टी॰६३
८१

कूपान्तर्न पश्येत् अन्तरनिषेधान्मुखादिदर्शनमपि निषिध्यते॥ नेक्षेतान्मुखं जले कूपे नयने चेत्क्वात्मकं
इति स्मरणात् । दर्शननिषेधादवरोहणनिषेधोपि॥ न कूपमवरोहेदिति स्मरणात्॥ ॥न लंघयेत्॥ ८९॥
॥ ॥न कूपमुत्प्लवनेन लंघयेत् कूपग्रहणमुत्प्लवनेन लंघयेत् कूपग्रहणं विषमोपलक्षणं ।विषमारोहणं चैवाह्
णा निर्वर्जयेदिति यमस्तवीयात् मार्गदानीयमाह॥ ॥वृद्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणां पंथा देयो
नृपस्तेषां मान्यः स्नातश्च नृपतेः॥ ९०॥ ॥वृद्धोशीत्यवरः भारी भाराक्रान्तः नृपोभिषिक्तः क्षत्रियः नृपपाद
नादन्योपि पालनाधिकृतः स्नातो ब्रह्मव्रतो नयस्नातस्त्रैवर्णिकः स्त्री जातिमात्रं रोगी रोगाक्रान्तोयः कश्चि
त् वरो वरयानस्थितः चक्री शाकटिकः एषामन्यतमेन समवायेऽन्ये न पंथा देयः एषामन्योन्यसम
वाये वृद्धतरादिभ्यो देयः नृपेण सहैषां समवाये नृपायैवैतैः नृपेणापि स्नातकाय ब्राह्मणायेति चकारादंधा
दिभ्योपि अंधबधिरगर्भिणीगोश्वगजउर्वलडुवीर पश्चमन्नोन्मत्तवशितयितवनिदीक्षितोदकाभ्यः पंथोः
पक्रामेदिति शंखस्मरणात्॥ ॥इतिश्री

विष्णुस्मृतिविवृतौ श्रीमत्प

८

वैजयंत्यां त्रिषष्ठितमोऽध्यायः॥ ॥एवं भागत्रयकृत्यमुक्त्वा चतुर्थभागीयं मध्याह्नस्नानं चतुःषष्टितमेन वक्तुमादौ स्नाने
परिहार्यमाह॥ ॥परनिपानेषु न स्नानमाचरेत्॥१॥ ॥परकीयेष्वनुत्सृष्टेषु जलाशयेषु न स्नायात्। आत्मीये
ष्वपसंस्कृतेषु। तथा च मरीचिः। अनुत्सृष्टेषु न स्नायात्तथैवासंस्कृतेषु च। आत्मीयेष्वपि न स्नायात्। परकीयत्व
मात्मकृतस्याप्युपलक्षणं। अत्येरप्यकृते कूपे सेतो वाप्यादिके तथा। तत्र स्नात्वा च पीत्वा च भीत्वा च प्रायश्चित्तं स
माचरेदिति शातातपीयात्। प्रतिप्रसवमाह॥ ॥आचरेत्पंचपिंडानुद्धृत्यापदि॥२॥ ॥जलांतराभावे स्त्र
पंच चतुरस्त्रीन्वा मृत्पिंडान्कूपाद्बहिरुद्धृत्य च जलं चोद्धृत्य परकीयेष्वपि स्नायात्। एवमासन्नवापिंडात्स्नायादुद्धृत्य
तु। उद्धृत्य चतुरः पिंडान्पारक्ये स्नानमाचरेत्। उद्धृत्य वापि त्रीन्पिंडान्स्नायादापत्सु नो सदा॥ निवद्धासु च मृत्पि
डान्कूपात्तु त्रीन्स्वयं स्तथैव पराशरमनुबोधायनीयात्। व्यतिरेकेणाधिकारिणमाह॥ ॥नाजीर्णे॥३॥ ॥अ
जीर्णेऽजीर्णरोगे॥ ॥न चातुरः॥४॥ ॥आतुरो ज्वराद्यभिभूतः। चकाराद्रजस्वलादिः। रजस्वला न स्नायान्ना
भ्यंज्यादित्यादिनिषेधात्॥ ॥न नग्नः॥५॥ ॥नग्नोऽत्र मुख्यो गौणश्च द्विविधस्यापि कर्मानधिकारात्।
ख्यात च भृगुः। त्रिकच्छोऽनुत्तरीयश्च नग्नश्चावस्त्र एव च। श्रौतं स्मार्तं तथा कर्म न नग्नश्चिंतयेदपीति। तत्रावस्त्रो

वि॰टी॰ ६४
८२

मुख्येन नग्नः। त्रिकच्छादिर्गौणस्तेष्वपि नग्नताभिधानात्। अन्यान्यपाह गोभिलः। नग्नः स्यान्मलवद्वासा
नग्नः कौशेयकेवलः। नग्नो द्विगुणवस्त्रः स्यान्नग्नोऽग्रथितवस्त्रकः। नग्नः स्यूतवस्त्रः स्यान्नग्नः कौशेयकेव
लः। काषायवस्त्रः स्यान्नग्नोऽर्धपटस्तथा। नग्नश्च स्यूतवस्त्रः स्यान्नग्नोऽग्रथितवस्त्रकः। स्नाननिषेधः प्रा
यश्चित्तवेलत्वप्राप्तावेत्तेषोक्तः प्राक्॥ ॥न रात्रौ॥६॥ ॥रात्रिर्निशा निशा तथा च यामः। महानिशा तु विज्ञेया
मध्यमं प्रहरद्वयं। तत्र स्नानं न कुर्वीत काम्यनैमित्तिकाद् ऋते। इति महानिशा निषेधात् पूर्वापरयामयोर्निषेधः
प्रदोषः। शिवरात्रौ [illegible] दिनवत्स्नानमाचरेदिति पूर्वाग्र्यां तत्र प्रतिप्रसवमाह॥ ॥राहुदर्शनवर्ज्ञ॥७॥
॥७॥ राहुदर्शने संक्रान्ते ग्रहणे तु निमित्ते तादृशोपलक्षणार्थं ह गोघ्ना ह संक्रान्तियात्रा। निप्रसवेषूत्स
वा नैमित्तिके [illegible] पितृदिव्यतादिष्ठय [illegible] ॥ ॥न संध्ययोः॥८॥ ॥संध्यात्रागोदास्त
उदयकालान्तरे। अन्यथा उषस्युषसीति वक्ष्यमाणवचनविरोधापत्तेः। प्रातःस्नानकालमाह। प्रातः
[illegible] स्नायात्॥९॥ ॥अरुणकिरणपराजितां प्राचीं दृष्ट्वा प्रातःस्नानमा
लः स्नायात् [illegible] स्नाननिषिद्धं रात्रौ [illegible] तपस्युषसि यत्स्न

ग्र॰
८२

नंसंध्यायामुदितेरवौ। प्राजापत्येन तत्तुल्यं सर्वपापप्रणाशनमिति कालांतरश्रवणात्। तत्र पूर्वः पूर्वो मुख्य
उत्तरोत्तरो गौण इति ध्येयं। नित्यस्नाने चायं कालः। काम्ये माघादिस्नाने तु किंचिदभ्युदिते रवावित्य
द्विशेषिक एवात्र नचांगभूतं मंत्रतर्पणादिकं मध्याह्नस्नान एव वक्तव्यमित्यत्र नोक्तं। तत्र तत्र
द्धामकालस्य बहुत्वात् स्नानकर्मणः। प्रातर्न तनुयात् स्नानं होमलोपो हि गर्हितइति कात्यायनेन क्रि
याविस्तारनिषेधात्। यत्तु प्रातः स्नानं मंत्रस्नानं मध्याह्ने मांत्रिको विधिरिति मार्कंडेयवचनं तदपि मं
त्रविस्ताराभिप्रायेण विस्तरस्य निषेधात्। स्नातवमाना॥ ॥स्नातः शिरो नावधुनेत्॥१०॥ ॥स्नाना
नंतरं शिरःस्थितान्कुशान्करेण न कंपयेत् न राबुधूनयेत् केशान्करेण न कंपयेदिति शातातपीया
त्॥ ॥गात्रेभ्यस्तोयमुद्धरेत्॥११॥ ॥हस्तेन वस्त्रेण वा गात्रप्रोंछनं न कुर्यात् अपमृज्यान्न वस्त्राणि गात्राणि वा पु
णिभिरिति स्मरणात्॥ ॥नतैलवत्संस्पृशेदिति मानवोक्तः। वस्त्रविधिमाह॥ ॥नाप्रक्षालितं पूर्वधृतं
वसनं बिभृयात्॥१२॥ ॥परिहितं प्रावृतं वा वासः प्रक्षालनमंतरेण न धारणार्हं न प्रक्षालनं प्रोक्षणं पल

स्रोतोऽभावे स्वेदवस्त्रं वा संप्रोक्ष्य प्रावेन विद्युतः स्मरणात् वासोग्रहणात् तद्धौमादीनाम निषेधः अत्र ला
भे धौतवस्त्रस्य स्नान होमादिका निवाङ्गतपयोगपट्टं वा द्वितीयमात्रकं यथा भवेदिति योगिस्मरणात् पट्टद्धौ
मादिना निवीतिपाठः एवं धृतत्वेन स्नानादि धौतमपि लप्यते इषद्धौतं स्त्रियाधौतं शूद्रधौतं तथैव च अत्र धौ
तं तत्त्वविज्ञेयं शुष्कं दक्षिणपल्लवैः इति स्मरणात् अत्र धौतत्वेन पुनः क्षालनमुच्यते ॥ ॥ स्नात एव सोत्तरीयो वा
वासी विभृयात् ॥१०॥ ॥ स्नातः सांगेन स्नानविधिना स्नात एवेत्य विधानेन शुक्लवाससः स्थल
एवं संध्याद्यनुष्ठानस्य मुख्यपदं तां दर्शयति यत्राशुचिस्थलमास्याऽद्य कोदेवताः पितृश्चातर्पयेत्तु यथाकाम
मप्सु सर्वं प्रतिष्ठितमिति विष्णुना स्थलाभाव एव जले कर्म विधानात् इत्याहतेन आर्द्रवाससा नैकवाससा स्थले
जपादि नियोगी प्रवेश्याद्भुवातत्तः स्थले कर्मनिषेधाच्च उत्तीर्षजलापसारणाय शिरोवेष्टनं तेन सहितो तथा
गाढबंधनं शिरसि वेष्टयेत् राजहंसनिभं प्राप्य उत्तरीयं शिथिलीकृतं जलस्थानमित्रं वेष्टया मासमू
र्द्धनीति महाभारतीय लिंगात् यत्तु नाग्नेऽप्सु स्नायसुद्धं इति विशेषेणोक्तत्वाच्छिराच्छादनातिरिक्तांगवि

८२

षयंयच्चदेवाःपिबंतिशिरस्तोमुख्यस्यपितरस्तथा।वसवोपिचगंधर्वाअधस्तात्सर्वजंतवइतिविशेषस्म
रणात्पित्रानशाट्यानपाणिनपाणिनेत्यनेनोपसंहरणीयं।धौतंस्वयमेव।स्वयंधौतेनकार्त्स्न्यंक्रियाध
र्माद्विपश्चितेतिदेवलस्मरणात्।वाससोर्द्धत्वंचविवर्जितंएकवासानभुंजीतनकुर्याद्देवतार्चनंनचार्चये
द्द्विजानभोक्तुर्यन्नोपर्यधस्तादंबरमितिव्यासस्मरणात्।तयोश्चधारणमंतर्वासोद्विनान।नांतर्वासोविनाज
तुनिवसेद्वसनंबुधइतिकात्यायनस्मरणात्।तत्रदैर्घ्यमाह।षोडशाद्वादशाष्टामितिगुलेविस्तृतंत्रयमाविस्त
तंचामममान्नेवतरंतवासइतिमितिवस्त्रपरिधानानंतरंतिलकधारणंकार्यं।तच्चब्रह्मांडपुराणे।स्नात्वापुंड्र
कृत्वाकुर्याद्धुत्वाचैवतुभस्मना।देवानभ्यर्च्यगंधेनसर्वपापप्रणुत्तयेजलेनतिलकंकुर्याज्जलांतःकर्मसिद्धये
इति।तदनंतरंसंध्यावंदनंस्वस्वसूत्रोक्तविधिनाकार्यं।तच्चोक्तंब्राह्मणसर्वस्वप्रकरणइतिनात्रोक्तं।तदनंतरंश्रौतस्मा
र्तोन्यतरहोमःकार्यः।सोपिशक्तस्यादत्तनोक्तइति।स्नानोत्तरंनिषेधमाह॥ ॥नम्लेच्छांत्यजपतितैःसहसंभाष
णंकुर्यात्॥१५॥ ॥म्लेच्छाःशबरपुलिंदकिरातादयः।अंत्याश्चंडालादयः।पतितामहापातक्यादयः।एतैःस
हस्नातोनसंभाषेत।संभाषणेपुनःस्नायात्।अत्रसंभाषणादनवलोकनमपिगम्यते।चंडालपतितोदृष्ट्वा

वि॰टी॰६७
८४

८१

नरः पक्षे तु भास्करांश्यात स्नैतौ समौ लोकात्सर्वेलं स्नानमाचरेदिति याज्ञवल्क्यः ॥ स्नानीयजलन्याह ॥ ॥स्नाय
यत्स्रवणे देवख्यातसरोवरेषु ॥ २६ ॥ ॥प्रस्रवणो निर्झरः देवखातं पुष्करादि । सरोवरं मानसादि । एषु स्नायात् गङ्
त्तरोऽप्रशस्तजलेन्याह ॥ ॥उद्धृताद्भिष्ठमुदकं पुण्यं स्यात्तेरात्प्रस्रवणादिगतं । तस्मादुक्तं जलदाणा नदी स्यात्तस्मे
तस्मादप्रवहतः प्रवहत्प्रस्रवणादिगतं तस्मादुक्तं जलदाणानदीस्थात्तस्मात्साधुभिर्वसिष्ठादिभिः परिगृही
तं नदीसंबंधि यथा वसिष्ठः प्राची दिग्वाजिन प्राचीना दीर्घोकेभ्यः सर्वेभ्यो पि गंगोदकं पुण्यतमं तथा च यम
देवलौ देवस्थं उद्धृतं वापि शीतमुष्णमथापि वा ॥ गांगेयं हरते पापमाजन्ममरणांतिकं मितिवह्नौ ऽपि रात्रौ
चेस्थापयां गंगायां तु प्रसंगतः । स्नात्वाश्वमेधजं पुण्यं प्रहृष्टं शुद्धं तज्जले इति ॥ स्नानाभिधानलाघवेन प्रातः
स्नानप्रसंगान्मध्याह्नस्नानमप्याह ॥ ॥स्नायेत्कामलापकर्षेषु निमज्योपविश्य पाहस्थानांतिस्तु अह्नि
तर्पयेत्तितत्पुण्येन दिमापःप्रवहात इति तीर्थमपि मंत्रयेत् ॥ २७ ॥ ॥यद्यपत्रमध्याह्नादिशब्दाभावात्स्ना
नं नक्तं भौमार्कवारयोरिति निषेधेन प्रातःस्नाने गुणविधिरिति प्रतिभाति । तथापि नप्रातर्मुहूर्तिकास्ना
नं न कभौमार्कवारयो रिति निषेधेन प्रातःस्नाने न गुणविधित्वासंभवात् । स्नानांतरस्यैव विशिष्ट

८४

ध्विष्विरितियुक्तं। तच्चमाध्याह्निकमेव। ततोमध्याह्नसमयेस्नानार्थंस्वरमाहदेवशिर्षे। तत्रच्छन्दोगानामितिव
ह्नबवचनाद्गोमयग्रहणं। त्रिधाकृत्वामृदंततुगोमयंच। विचक्षणः इति शातातपीयात्। मंगत्रयस्यविनियोगमा
प्याहलक्षणदानम्। भगवान्मेधावी नामंत्रानं क्षालनंचतैः। भागैः पृथक्पृथक्कुर्यात्क्षालनेमृदंसंकरमितिअनुले
पनक्रमोपिस्मृत्यंतरे। आयुष्यामशिरोलेपंमृदाकुर्याद्द्विजः पुरा। श्रीकामः पादशौचं तुमृदापूर्वंसमाचरेदि
तिमंत्रोपितत्रैव। महीद्यौरितिमंत्रेणमृत्तिकामभिमंत्रयेत्। स्योनापृथिवीतिमंत्रेणशिरआरभ्यालेपयेदिति।
अनंतरकार्यमपितत्रैव। ततोवक्ष्यतिगात्राणिनिर्मृज्यमस्योन्मज्यवैशनैः। आचम्यगोमयेनापिमानस्तो
कासमालभेदिति। एवंशारीरंमलमपहस्यापुत्रिनिमज्यतीर्थेउपविश्यापोहिष्ठेत्याद्यष्टभिर्मंत्रैस्तीर्थम
भिमंत्रयेत्। निमज्यापस्पृशेदितिपाठेनिमज्जानंतरमाचम्यतीर्थमभिमंत्रयेदित्यर्थः॥ ॥ततोऽप्सुनिमग्न
स्त्रिरघमर्षणंजपेत्॥ १९॥ ॥पाठेनैवानंतर्यलिङ्गे। ततश्चाभिमंत्रणोत्तरकर्मानंतर्यबोधनाय। तथोक्तं
परिशिष्टे। तीर्थमभिमंत्र्याप्यवगाह्यस्नातोद्विराचम्यमार्जयेद्दिवयोयंत्वप्स्विभिरित्यष्टाभिरापोहिष्ठेतिनव

मिरयतीर्थमंत्रपृष्ठेनेमंमेगंगेइत्यृचा त्रिः अद्भिः प्राणमालोड्य प्रकाशपृष्ठेन अघमर्षणसूक्तं त्रिराव
र्तयेदिति। अभ्यितयनुवृत्तौ पुनर्वचनं मम मिमंत्रितस्वैवृत्ति नियमार्थं। निमज्जनस्य पुनर्वचनं यावज्ज
पसमाप्ति निमज्जनप्राप्त्यर्थं। अन्यथाल्पयाजपस्य कालत्वामात्रमेव निमज्जनस्यापद्येताल्पप्रका
शपृष्ठतयेव। निमग्नस्त्रिर्जपेदित्यनेन सह निमग्नस्त्रिरावर्तयेन्नपत्यावर्तनं निमज्जनं। अघमर्षण
मघमर्षणऋषिदृष्टमृतं च सत्यं चेति त्रिरवर्तनं जपस्य मनसैव संभवात्। अतएव व्यासः। अंतर्जले [illegible]
[illegible] ऽघमर्षणमिति पश्चात्तरान्याह।। ।।तद्वि
ष्णोः परमं पदमिति वा ।।२०।। ।।अघमर्षणस्थाने तद्विष्णोरित्यृचं वा जपेत्। त्रिरित्यनुवर्तते।। ।।द्रुपदां
सावित्रीं वा ।।२१।। ।।द्रुपदादिवेन्मुमुचान इति यजुर्वेदप्रसिद्धां तां वा त्रिर्जपेत्। द्रुपदा नाम गायत्री यजुर्वे
दे प्रतिष्ठिता। अंतर्जले त्रिरावर्त्य मुच्यते ब्रह्महत्यया इति योगियाज्ञवल्क्यात्।। ।।युंजते मन इत्यनुवाकं वा
।।२२।। ।।युंजते मन उत युंजते धिय इति संहितं समारण्यकोक्तं वानुवाकं वा सकृज्जपेत्। सकृ

न्निमज्जने त्रिर्जपस्याशक्यत्वात्॥ ॥पुरुषसूक्तं वा॥२३॥ सहस्रशीर्षेति षोडशर्चं पुरुषदेवताकं सूक्तं वा सकृज्जपेत्। पक्षिकोयं विकल्पः। अघमर्षणानंतरमाह॥ ॥स्नातश्चार्द्रवासा देवपितृतर्पणम्भस्थ एव कुर्यात्॥२४॥ ॥अघमर्षणानंतरं पुनः स्नानोर्थे स्नात इति। अघमर्षणं त्रिरावर्त्य निमज्यो न्मज्यादित्यमवलोकयेदिति स्मरणात्। चकारादभिषिक्तश्च ततोभिषिंचेन्मंत्रैश्च वारुणैस्तु यथाक्रममिति स्मरणात्। आर्द्रवासा अंभस्थ एवेत्यत्र आर्द्रवासा एव जल इति नियमात्। शुष्कवाससो जले निषेधः आर्द्रवासा जल एवेति नियमादार्द्रवाससः स्थले च निषेधः सिध्यति। शुष्के नोत जले नैव [illegible] वहिरपार्द्रवाससा। स्नानदानजपोहोमैः कर्तव्यं पितृतर्पणमिति लिखितस्मरणात्। देवपित्रोरेवोपादानम्मृषिपरिहाराय तेषामंजलौ तीर्थाभावेन तर्पणासंभवात्। तथा हि। आर्षकनिष्ठिकामूल इत्युक्तलक्षणस्य दक्षिणकरस्थस्यार्षितीर्थस्य तोयुतां चंजलिः पुमानितुक्तः लक्षणेन जलो वामकरसंयोगेन तिरोहितत्तयाञ्जलनिग

०·रीद७
८६

मादामत्वात्प्रियोजलेनात्रिर्गर्भेनैंजलिना। व्याघातात्। तस्मादंजलिना देवपित्रोस्तर्पणं तत्तत्तीर्थसद्भावा
त्रऋषीणां तीर्थाभावात्। अतएवाह्वपादः। स्नानांगत्वेनांजलिनातर्प्ययेत्पितृदेवताः। काम्येनित्येवि
शेषेणनकुर्यात्प्रयतत इति देवपित्रोरेवतर्पणामितिपाठः। सत्राश्रेनाकपृष्ठयाविरोधाच्चिंत्यः। यत्तुऋ
षीणामपितदंजलिनातर्पणं अवगतं गुल्परूपाणां भिरंगुलिभिःस्थितर्पितीर्थाभिप्रायेणेति
मंतव्यं। स्नानांगतर्पणप्रकारस्तु स्मर्यते। ब्रह्मादयो ये देवास्तान्देवांस्तर्पयामि। भूर्ऋषीस्तर्पयामि भुव
र्ऋषींस्तर्पयामि स्वः पितॄंस्तर्पयामि भूर्भुवः स्वः पितॄंस्तर्पयामि। अशक्तंप्रत्याह। ।।परिवर्तितवासाश्च
तीर्थसुत्तीर्य।।१५।। ।।यस्तु स्नात्वा जलेस्थातुमशक्तः शुष्कवासः परिधत्ते सतीर्थाद्बहिरागत्य स्थल
एवस्नानांगतर्पणंकुर्यात्। आर्द्रवासा जलेकुर्यात्तर्पणाचमनंजपं। शुष्कवासाः स्थलेकुर्यात्तर्पणाच
मनंजपमितिहारीतस्मरणात्। तर्पणोत्तरांगमुच्यते देवेन।। ।।अस्नात्वा देवपितृतर्पणात्स्नानशा

८६

रीं न पीडयेत् ॥२६॥ ॥ परिवर्त्तितवासाश्चापि देवपितृतर्प्पणात्प्राक् स्नानवस्त्रं न निष्पीडयेत् । यथाह योगी-
श्वरः । यावद्देवानृषींश्चैव पितॄंश्चापि न तर्प्पयेत् । तावन्न पीडयेद्वस्त्रं येन स्नातो भवेद्द्विजः इति । एतेन वस्त्रनिष्पीडन-
स्य तर्प्पणोत्तरांगत्वं गम्यते । निष्पीडयति यो वस्त्रं स्नानं कृत्वा ह्यतर्प्पिते । निराशाः पितरो यांति शापं दत्वा सुदारुण-
मित्यन्यथाकरणे दोषश्रवणात् । अत एव ये के चास्मत्कुले जाता अपुत्रा रोगिणो मृताः । ते गृह्णंतु मया दत्तं व-
स्त्रनिष्पीडनोदकमिति मंत्रोत्तरसमर्थितानितरतर्प्पणेप्येतत्समानं । स्नानांगनित्यतर्प्पणोर्मध्ये पाठाद्दोषश्रव-
णाद्विशेषाच्च स्नानेन्यदप्युत्तरांगमाह ॥ ॥ स्नात्वाचम्य विधिवदुपस्पृशेत् ॥२७॥ ॥ वस्त्रनिष्पीडनांतस्नान-
विध्यानंतर्यं द्विराचम्य न स्वर्गमयितुं पुनः स्नानपरामर्शो न्यथा मज्जनमात्रानंतरमेव स्यात् । यद्वा स्नानमा-
त्रविधेर्वस्त्रनिष्पीडनांतता बोधनाय अन्यथा मध्याह्नस्नान एव स्यात्तत्प्रकरणात् । विधिवदिंद्रियस्पर्शनांतमा-
चम्य पश्चाद्द्वितीयवारं तथैवाचामेत् । एतेन यत्र सामान्यतोपि द्विराचमेदित्युच्यते तत्रापि सांगाया एवाचमनभा-
वनायां द्विरावृत्तिर्न प्रधानमात्रस्या वृत्तिः सत्रेणैणंगानीति न्यायोप्यनेन गृहीतः । स्नात्वा पीत्वा क्षुते सुप्ते

कृ.टी.६४
८७

मुक्तारघ्योपसर्पणोत्रारात्तः पुनराचामेदाह सोपि पापि मायचेति योगिकमरणात् तामथाङ्गस्त्रानांगमाह ॥
॥ ॥ ऊर्ध्वपत्रेन मन्त्रेण पुरुषाय पुष्पाणि दद्यात् ॥ २८ ॥ ॥ सहस्रशीर्षेत्यादि षोडशभिः पुरुषसूक्तं तत्र्यचे
डशभिर्मन्त्रैः पुरुषाय षोडशपुष्पाणि सदैवाद्भिर्जलमेव वा दद्यात् तथाच योगीश्वरः
स्याः पुरुषसूक्तेन यः पुष्पाण्यप एव वा अर्चितं स्याज्जगदिदं तेन सर्वं चराचरं । विष्णुर्ब्रह्मा च रुद्रश्च विष्णुर्देवो
दिवाकरः तस्मात्पूज्यतमं नान्यमहं मन्ये जनार्दनात् इति । एतेन मध्याह्नस्नाने पुष्पाण्यपि सह देयानीति गम्य
ते । यथाह रत्नः । चतुर्थे च तथा देहे स्नानार्थं मृदमाहरेत् । तिलपुष्पकुशादीनि स्नानं चाकामे त्रिमे जलम् इति
किंचि ॥ ॥ उदकाञ्जलीन् ॥ २९ ॥ ॥ पुष्पदानानन्तरमुदकाञ्जलीन् क्षिपेच्चकारात् ब्रह्मादिभ्यश्च दद्या
त् । यथाह योगे याज्ञवल्क्यः । ब्रह्मणेऽग्नये पृथिव्यै ओषधीभ्यस्तथैव च । वाचे वाचस्पतये विष्णवे महद्भ्यस्तथा ।
ऽद्भ्यो देवताभ्यश्च नमस्कारो जलाञ्जलीन् दत्वा नमस्यां क्रमशस्तेनैव सर्वकर्मणामिति । अत्र स्पर्शतर्प
णानन्तर्यमाह ॥ ॥ आदावेव द्विजैस्तर्पणं देवानां तर्पणं कुर्यात् ॥ ३० ॥ ॥ उक्तस्य विष्णुपूजनस्य

दाउक्तेन देवतीर्थेन देवानां स्वसूत्रोक्तानां तर्पणं कुर्यात् । अत्र तेवै सर्वकर्मणामित्यनेन जले देवतापूजनस्य स
वैतिएव विधानात् । यद्यपि ब्रह्मयज्ञानंतरं तर्पणं वक्तव्यं तथापि स्नानांगतर्पणात्कार्यः पश्चाद्दोषात्तराद्ध
तेः । केरवदेवाव सानेवानान्पदर्तेभिभिन्नत इत्यनेककालताश्रवणात्सर्वमेवाभिहितइति नाराद्दृवनो । तत्रांजलिप्र
श्रमादंजलिनैवा । तत्र संख्यामा[illegible]: । एकैकमंजलिं देवा द्वौद्वौ सनकादयः । अर्हंति पितरस्त्रीस्त्रीन्स्त्रियस्त्वेकैकमंजलिमिति । तत्रोप
वीतिनैव । उपवीतं देवानां निवीतं मनुष्याणां प्राचीनावीतं पितॄणामितिस्मृतेः । कुशाग्रैश्च । कुशाग्रैस्तर्पयेद्दे
वान्मनुष्यान्कुशमध्यतः । द्विगुणीकृत्य मूलाग्रैः पितॄन्संतर्पयेदिति स्मरणात् । तत्र प्रागग्रेषु प्रागग्रेषु
सुरांस्तर्पेन्मनुष्यांश्चोदगग्रतः । पितॄन्दक्षिणाग्रेषु चैकद्वित्रिजलांजलिरित्याग्नेयात् । तत्र तिलेषु गोभिलः ।
शुक्लैस्तु तर्पयेद्देवान्मनुष्यान्शबलैस्तिलैः । पितॄन्नपरिचरन्नपो ह्यन्यतोवगंतव्यं ॥ ॥ तदनंतरं पित्र्येण पि
पितॄणां ॥ ३१ ॥ ॥ देवतर्पणानंतरं यवसनं स्पृत्यंतरीयमध्यस्थितार्षतर्पणाभिरामायो अंजलावृषि
तीर्थस्यातिरोधानात् । तेषामपि तर्पणं चेदंगुलिमध्यस्थितार्षतीर्थेनोक्तमेव । तत्र पितॄणां क्रमः

वि०टी०६४

८८

माह॥ ॥तत्रादौ स्ववंश्यानां तर्पणं कार्यमित्याह॥३२॥ ॥तत्र पितृगणे प्रथमं जलिमिति सव्योपवीतिनैव। उपवीतं दे
वानां निवीतं मनुष्याणां प्राचीनावीतं पित्र्यं तस्मादादौ संबंधिनः पितृमातृमातामहांस्तदनंतरं स्ववंश्यान् पितृव्यभ्रातृमातु
लादीं स्तर्पयेत्। सतर्पणानि कृत्वा पश्चादन्यांस्तर्पयेदिति योगिस्मरणात्। तर्पणानुष्ठानं पुनर्वचनमंजलि
त्रयभेदप्रदर्शनाय। क्रियानुष्ठानं पुनर्वचनं प्राचीनावीतित्वादिपूर्वोक्तगुणभेदप्रदर्शनाय। गुणांतरमप्याह य
मः। संबंधनामगोत्राणि स्वधां तेन नमो ततः। वस्त्रादि रूपं निर्दिश्य तर्पयेदिति पूर्वकमिति किं॥ ॥ततः संबंधि
बांधवान्॥३३॥ ॥संबंधिनो भागिनेयश्वशुरस्यालादयः। बांधवाः पैतृष्वस्रेयमातृष्वस्रेयमातुलादयस्तां
स्तर्पयेत्। किं च ततः सुहृदा॥३४॥ ॥सुहृदो मित्रगुर्वाचार्योपाध्यायादयस्तांश्च तर्पयेत्। एतच्च संगृहीतं
स्मृत्यंतरे। पितृमातामहाः पितृव्या भ्रातरस्ततः। पितृष्वसा मातुलश्च ज्ञातिन्यः स्वजामयः। भार्या पुत्राश्च पौत्रा
श्च भ्रातृपुत्रास्तथैव च। दुहिता श्वशुरश्चैव मातुला गुरवस्तथा। आचार्यो सुहृदः स्यालाउपाध्यायाश्च पोषकाः। स्वामि
नश्च सखायश्च माता पितोश्च बांधवाः। आत्मनो बांधवाश्चैव ज्ञाताज्ञाता यथाक्रमं। तर्पणे च गया श्राद्धे तीर्थे महालये

तिअत्र पित्रादि शब्दाः पित्रादिस्त्रियपराः यथाह हारीतः पित्रादीन्मात्रादीन्मातामहादीन्मातामह्यादीनितरयां स्तपत्नीः ज्येष्ठभ्रातृ स्तपत्नीर्भगिनीः स्वपत्नीश्च स्तर्पयेदिति स्नानविधिमुपसंहरति ॥ एवं नित्यस्नायी स्यात् ॥ ३५ ॥ उक्तेन विधिना प्रत्यहं स्नायात् अत्र नेन चतर्पयित्वोनंतरं स्नानोपसंहारेण तर्पणस्यापि विष्णुपूजनवत् संशत: पातित्वात् स्नानांगत्वं गमयति नित्यवचनादकरणे प्रत्यवायं गमयति अस्नातानाचरेत्कर्मजपहोमादिकं चनेति स्मरणात् यद्यपि यथाह नित्यशः प्रातर्नित्यं स्नायाद नातुर इति वचनात्स्नानद्वयस्यापि नित्यत्वं गम्यते तथापुनातुरं प्रत्येव द्वयोर्नित्यत्वं सर्वान्प्रतितु अस्नात उमानस्नाहो जपाग्निहवजपाग्निहवनादिषु प्रातः स्नानं तदर्थं तु नित्यस्नानं प्रकीर्तितमिति शंखेन प्रातःस्नानस्य सर्वकर्मांगत्वाभिधानान्नित्यत्वं स्नानंनित्यत्वेनेव तदंगस्य तर्पणादेरपि नित्यत्वं सिध्यति यत्तु तर्पणे फलश्रवणं तन्नित्यकाम्यतावाचनाय यथाह हारीतः स्नातः संतर्पणं कृत्वा संतर्पणं कृत्वा पितृणां तु तिलांभसा पितृलोकमवाप्नोति प्रीणाति च तथा पितृनिति एवं तर्पणानंतरं तु कारीत्या विष्णुं संपूज्य तदनंतरमाह ॥ स्नातश्च पवित्राणि यथाशक्ति जपेत् ॥ ३६ ॥

॥ स्नानविषयैर्विष्णुपूजनं तत्तदर्शनायपुनःस्नानपरामर्शः पवित्राणिपावमानानितरत्समंदीत्यादीन्यपि मासंख्या निजपेत् ॥ विशेषतः सावित्री ॥ ३७ ॥ पूर्वोक्तजपसंख्यापेक्षयाधिकसंख्ययागायत्रीजपेत् यद्वा स्नानांतरजपेस्नानात्रिं त्रिवत्जपेदिति किंच ॥ पुरुषसूक्तं च ॥ ३८ ॥ सहस्रशीर्षेतिषोडशर्च्चपुरुषसूक्तं च विशेषतोजपेत् ॥ विशेषतोजपेद्धेतुमाह ॥ नैताभ्यामधिकमस्ति ॥ ३९ ॥ गायत्रीपुरुषसूक्ताभ्यामधिकं ... नास्ति ॥ गायत्र्युपासिता येनतेनेष्टं ... स्मरणात् ... पृथगेवमथाङ्गस्नानं ... जपेनमथाङ्गं ... नित्यं ... हेतुमाह ... तथा जपेदर्थं ... विधियते ॥ ४० ॥ यतोदेवेष्व ... दोपि ... ब्रह्मयज्ञादौ ... तथा ... महेशादौ ... गोदानादौ ... नित्यं ... त्यात्ततेष्वेवनैमित्तिकत्वे हेतुमाह ॥ ... कर्णी चंडः ... तिंतो ... मिनैमित्तिकस्यनश्य

तइतिवारणाम्॥४१॥ ॥अलक्ष्मीर्निर्ऋतिः कालकर्णीदुःसहदुहिता पकारात्कलहादाराचाडःस्वप्नेस्व
मे खराद्यारोहणं दुर्विचिंतितमशुभचिंतितमेतानुद्दृतेनानुद्धृतेनवातीर्थातीर्थमाधारणेनजलेन स्ना
तस्यनश्यंतीतिनियमस्तेन नैमित्तिकमपि तस्यैवकाम्यत्वमाह॥ ॥यामपंहियान्नाडःखंनित्यस्ना
यीनपश्यंति॥ ॥नित्यस्नानशीलःपुमान्यमलोकभवंपरकीयमपियातनाडःखंनपश्यति किंपुनः
स्वीयमनुभविष्यतितस्मात्काम्यापापक्षयार्थत्वमप्यस्याह॥ ॥नित्यस्नानेनपूताःयेतेयेपिपापकृतोन
राः॥४२॥ ॥यानिपुनरनिर्दिष्टप्रायश्चित्तानिपापानितान्यपिनित्यस्नानेननश्यंतीति॥यद्वामहापातकादि
योपिनित्यस्नानेनपूताःप्राग्बप्रायश्चित्तानुष्ठायिनोभवंतीतिप्रायश्चित्तांगत्वमप्यस्येति॥ ॥इतिश्री
विश्वमूर्तिविरचितोश्रीमत्यांवैजयंत्यांचतुःपञ्चितमोध्यायः॥ ॥मथा
द्यस्नानानंतरंविष्णुपूजनंचपष्ठितमेनाह॥ ॥अथातःसुस्नातःसुप्रक्षालितपाणिपादःस्वाचांतोदेवता
र्चायांस्थलेवाभगवंतमनादिनिधनंवासुदेवमभ्यर्चयेत्॥१॥ ॥पाठादेवानंतर्यसिद्धावथशब्दोनिर

ऽनध्यानसूर्यावलोकनोपस्थानस्तुत्याचमार्जनादिस्मृत्यंतरोक्तकर्मानंतर्यार्थः।तानि दयोगयाज्ञव
ल्क्यादिप्रसिद्धानि।यतो देवपूजाकरणे।योमोहादथवालस्यादकृत्वा देवतार्चनं।भुंक्ते स याति नरकान्
कृमिर्भूत्वेह जायत इत्यादिदोषः श्रूयते।अतो हेतोः सुस्नात इति वारुणस्नानवत एव देवार्चायामधिकारं
गमयति।वारुणेनैव संशुद्धो यपाग्निहवनादिषु।अधिकारी भवेन्नित्यो देवतानां च पूजने इति शंखस्मरणा
त्।प्रक्रमात्सादावपि पुनः स्नानवचनं प्रातःस्नानानंतरमपि देवपूजाप्राप्त्यर्थं।प्रातर्मध्यंदिने सायं विष्णु
पूजां समाचरेदिति शौनकस्मरणात्।सुप्रक्षालितपाणिपाद इति स्ववत्याद्रिष्टयाचमनसोपानत्कोद्य
संस्पर्शनात्।आगतः सोदपात्रः कृतयत्नेन नस्त्विरेव सइति योगिनां सोपानत्कागमनविधानात्पादावुपह
त्यप्रक्षालनाप्ता चौ नियमार्थमुच्यते।उपाभ्यामुभयोः सन्नदातथ्यातिस्वन्तिस्वल्पक्तपादयोर्स्थितिकरपा
दयोर्मृत्संख्यानापि विधीयते।स्वाचांत इत्याचमनानुकल्पनिरासाय।देवतार्चा देवप्रतिमा स्थले स्थंडि
ले।वाशब्दादप्स्वादिषु च।अप्स्वग्नौ हृदये चैव सूर्ये स्थंडिले प्रतिमासु च।विशेषेण हरेः सम्यगर्चनं मनुना स्मृतमि

तिनादस्मरणात्। एतेषु शालग्रामो मुख्यः। पूजार्थमुत्तमं स्थानं शालग्राममंतउच्यते। द्वारकाजातचक्रांकशिला श्रेष्ठा तथैव च। तयोश्च संगमं कृत्वा पूजयन्मुक्तिभाग्भवेदिति स्कांदात्। भगवंतमष्टगुणैश्वर्ययुक्तमनादिनिधनं जन्ममरणरहितमेताभ्यां विशेषणाभ्यामस्य देवांतराद्उत्कर्षोभिहितः। वासुदेवं सर्वभूताधारं। वासुदेवः सर्वमिति स्मरणात्। तमभिमुखीकृत्याचयेत्। तत्प्रकारमाह॥ ॥अश्विनोः प्राणेस्त्वी त इति जीवादानं दत्वा युंजते मन इत्यनुवाकेनावाहनं कृत्वा जानुभ्यां पाणिभ्यां शिरसा च नमस्कारं कुर्यात्॥१॥ ॥अश्विनोः प्राणे स्त्वौत इति काठकीयमंत्रेण जीवस्य भगवतो जीवो विनयितो सादीतिस्मरणात्। आवाहनेध्यानेनांतष्करणेसंन्निधानं कृत्वा युंजते मन उत युंजे वियते न्निरीयसंहितारण्यकान्यतरपठितेनावाहनं स्थंडिलादिषु सतः सन्निधानं कृत्वा जानुद्वयमवाच्य भूमावंजलिं कृत्वा तदुपरि शिरसा प्रणमेत्। चकाराउन्मनसा वा चोवंनमो भगवते वासुदेवायेति। आवाहनं च स्थंडिलादिविषयं। उद्वासादाहनेनयुक्तः स्थिरायां द्वयार्चने। अस्थिरयो विकल्पः स्यात्स्थंडिले तु द्वयं भवेदिति भागवतोक्तेः। शालग्रामेतु नैव। शालग्रामशिला

यां तु नावाहनविसर्जने। शालग्रामशिलायां तु नित्यं सन्निहितो हरिरिति स्कान्दात्। नाकथं तर्हि षोडशोपचा
रत्वसिद्धिरिति चेन्न। सत्यं पुष्पांजलिनेति ब्रूमः। आवाहनमाचारद्याः स्युः पुष्पांजलिर्हरेः। तस्येयं वोऽस्तु स्वागतं प्रा
र्थये मा गे वोहासने न्यव। अंगे पुष्पांजलिं दद्याद्यागसंपत्तिसिद्धये इत्यनुष्टुब्विधानात्॥ ॥आपो हि ष्ठेति तिसृ
भिरर्घ्यं निवेदयेत्॥३॥ ॥आपो हि ष्ठा मयोभुव इति तिसृभिरेकेनार्घ्यं कस्तु ऋक्रयेवा विनिवेदयेत्। निवेदनं नाम
यतः स्थापनं॥ ॥हिरण्यवर्णा इति चतसृभिः पाद्यं॥४॥ ॥हिरण्यवर्णाः शुचयः पावका इत्यारभ्य मयि वर्चो वि
लमो जो निधत्तेत्यन्तेन ऋक्चतुष्टयेन पाद्यं। पादशौचकरं वारि निवेदयेदिति प्रत्येकं संबध्यते। यद्यपि पाद्यं तृ
तीयया दैव चतुर्थ्यार्घ्यं प्रदापयेदिति त्रपादाद्यर्घ्ययोर्विपर्यासः श्रूयते तथापि समीपुरुषसूक्ते नार्च्चन एवात्र तु यथो
क्त एव क्रमः। आपो हि ष्ठेति तिसृभिः स्नातोऽर्घ्यं विनिवेदयेत्। हिरण्यवर्णेति चतसृभिः पाद्यं च तत्र भिर्हिजेति विष्णु
वर्मेन्निशात्। प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे। तृतीयां वामपादे च चतुर्थीं दक्षिणे न्यसेदिति न्यासे क
रयोः प्राथम्यात्॥ ॥शन्न आपो धन्वन्या इत्याचमनीयं॥५॥ ॥शन्न आपो धन्वन्या इत्यध्येकठशाखीयस्यैकाय

र्च्वोआचमनार्हंजलमाचमनीयं॥ ॥इदमापःप्रवहतेतिस्नानीयं॥६॥ ॥इदमापःप्रवहतेत्येक
यर्च्वास्नानीयंनार्हंजलं॥ ॥रथेस्वदैकांक्षणभराजारत्यनुलेपनालंकारौ॥७॥ ॥रथेस्वोदेषिति
काठशाखीयैश्चतुर्भिरनुलेपनंवेदनमलंकारःकटकमुकुटादिः॥ ॥युवासुवासाइतिवासः॥८॥
॥ ॥युवासुवासाइतिचयर्च्वावासोवस्त्रंयद्यपिषष्ठ्यांस्नानंप्रकुर्वीतसन्नम्यावस्त्रमेवचेतिस्मृत्यंत
रस्नानानंतरमेववस्त्रादानंश्रूयतेतथापितत्पुरुषसूक्तेनार्चनएवात्रयथोक्तएवक्रमः।इदमापः
प्रवहतस्नानमंत्रःप्रकीर्तितः।रथेस्वदेषुवतस्त्वनुलेपने।युवासुवासाइतिचमंत्रोवासस्तिकीर्ति
तइतिविष्णुधर्मोत्तरात्॥ ॥पुष्पावतीरितिपुष्पं॥९॥ ॥पुष्पावतीःप्रसूवतीरितितैत्तिरीयश्चापु
ष्पं॥ ॥धूरसिधूर्वइतिधूपं॥१०॥ ॥धूरसिधूर्वधूर्वंतमितितैत्तिरीययजुषाधूपं॥ ॥तेजोसिशुक्रमि
तिदीपं॥११॥ ॥तेजोसिशुक्रमितिकठशाखीयैकयर्चादीपं॥ ॥दधिक्राव्णइतिमधुपर्कं
॥१२॥ ॥दधिक्राव्णोअकारिषमित्येयर्चामधुपर्कमधुसंपृक्तंदधि॥ ॥हिरण्यगर्भइत्यष्ट

निर्नैवेद्यं॥१३॥ ॥हिरण्यगर्भःसमवर्त्ततस्त्राग्रेस्ययस्थितःपोमहिनोस्त्यंत्नाभिरष्टाभिर्ऋग्भिर्नैवेद्यं
निवेदयेदितिश्लोकेनैवच्यते॥ ॥चामरंव्यजनंमार्गेछत्रंयानासनंतथा।सर्वत्रेणैवतत्तत्त्वदेवाय
विनिवेदयेत्॥१४॥ ॥चामरंव्यजनेप्रसिद्धे।मार्गश्चादर्शः।चामरमार्गेनादर्शौछत्रंयानासनंतथेति
विष्णुधर्मोत्तरात्।यानशिविकादिश्चासनंसिंहासनादि।तत्सर्वमित्यनेनश्रुद्धवाचनाकरोत्तत्रन
तोकृत्वनीराजनादीनांपूर्णपना।निसाविन्नेणगायत्र्याभगवतेनिवेदयेत्।यथागारुडे।छत्रध
जपत्रेदद्यात्तुद्वावमनमंभका।पुनःश्वमनेदद्यात्करोहुर्निमेवच।मकर्पूरंचताम्बूलंकुर्या
न्नीराजनंतथेति।अत्रतुहन्नावपिपुनर्निवेदनवचनंतुक्तसंख्योपचारातोन्यूनाधिकसंख्योपच
रतोन्यूनाधिकसंख्योपचारांतरप्रदर्शनार्थं।यथोक्तंपुराणसमुच्चये।पंचवादशकावाथषोडश
शादशापिवा।उपचाराभगवतेचतुःषष्टिरथापिवेति।तेचास्मत्ताते स्मृतिसिंधौद्रष्टव्याः।पूजोत्तरंग

माह॥ ॥एवमभ्यर्च्य जपेत्सूक्तं वैष्णवं पौरुषं ततः॥ तेनैव चाज्यं जुहुयाद्यद्वा शंवत्तंपदं॥ २५॥ ॥
एवमुक्तैः षोडशोपचारैः भगवंतं संपूज्य पुरुषसूक्तं षोडशर्चं जपेत् दिति देशाद् नित्यमंगं॥ ततो जपा
नंतरं शाश्वतपदकामश्चेत्तेनैव सूक्तेन प्रत्यृचं लौकिकेऽग्नौ विध्याधानाद्याज्यभागांते वक्ष्यमाण
विधिना कृत्वाज्यं जुहुयादिति काम्यमंगं॥ इति श्री
विष्णुस्मृतिविहितो श्रीमत्यां वैजयंत्यां पंचषष्टितमोऽध्यायः॥ ॥उक्तोपचारद्रव्यविवेचनं षट्षष्
ष्टितमोऽध्यायेन कर्तुमादौ जलनिर्णयमाह॥ ॥न नक्तं गृहीतेनोदकेन देवपितृकर्म कुर्यात्॥ १॥
दैवं देवस्नानादि। पित्र्यं पितृयज्ञतर्पणादि। श्राद्धे पृथक्निषेधस्य वक्ष्यमाणत्वात्। पर्युषितेन जलेन
गंगोदकव्यतिरिक्तेन न कुर्यात्। जलं पर्युषितं त्याज्यं पत्राणि कुसुमानि च। तुलस्यगस्त्यबिल्वा
नि गांगं वा विनदुष्यंतीति स्मरणात्॥ ॥चंदनमृगमददारुकर्पूरकुंकुमजातीफलवर्जमनुलेप
नं दद्यात् नार्थं द्यानि नान्यानि तुलसीकाष्ठागरुवर्जितानि। कलौ यच्छंति ये विलोस्कालक्ता।पा

मचंदनं।विलक्षीतिकरं मर्त्यो ऽञ्जरां यांतितेऽच्युत मितिविष्णुधर्मोत्तरात्।गंधेभ्यश्चंदनं पुण्यं चंदना
दगुरुर्वरः इतिस्मरणात्।इक्ष्वान्यत्त्वाप्युपलक्षणं।आयुर्दर्श निर्दग्धानि तु विरिंतिमरद्वाजस्मर
णात्।मरकत्वापदाहलघव।अंगष्ठानि पट्टवस्त्राणि देवअस्मा शिस्तर्वदा।एषामलाभे कार्पासवास
सि ग्रथनानि चेति॥ ॥नमणिसुवर्णयोः प्रतिरूपमलंकरणं॥४॥ ॥कृत्रिममणिसुवर्णादि
निर्मितमलंकारं न दद्यात्।अलंकारास्तथा सिंहे।सुवर्णाभरणैर्दिव्यैर्हारकेयूरकुंडलैः।मु
कुंडलैः सुकुटैः कनकाद्यैस्तथा यो विष्णुं पूजयेन्नृप।सर्वपापविनिर्मुक्तः सर्वभूषणभूषितः
इन्द्रलोके वसेच्छ्रीमान्यावदिंद्राश्चतुर्दश इति॥ ॥नोग्रगंधि॥५॥ ॥उग्रोघ्राणम्लानिकरो गंधो
यस्येति तन्धत्तूरादि॥ ॥नागंधि॥६॥ ॥गंधशून्यं भिंडिकर्णिकादि।कोशातक्यर्कवर्तुल
शाल्मलीगिरिकर्णिका।कपित्थलांगलीशिग्रुकोविदारशिरीषकं।त्यजाज्ञानात्पूजयेद्विष्णुं
नरो नरकमाप्नुयादिति॥ ॥नकंटकिजं॥७॥ ॥कंटकिवृक्षोद्भवं कंटकारिकादि।कंट

कारिकयाशोणकं कुरंडे ईःख्वसंगमः शाल्मलीकुसुमारोपैस्वपापैस्तु लिप्यत इति पुष्पसारस्मर
णात्। तस्यापवादमाह॥ ॥कंटकिजमपि शुक्लं सुगंधि केतुदद्यात्॥८॥ ॥कंटकिजमपि केतकादि
शुक्लं सुगंधि चदेयं। एकयावापि केतक्या यदा संपूज्यते हरिः। पूजितो द्वादशाब्दं तु केशवस्तेन नि
श्चितमिति तत्वसागरस्मरणात्। पुनर्थर्दद्यादिति वचनेन निषेधानुपंग निरासाय॥ ॥रक्तमपि
कुंकुमंजलजंचदद्यात्॥९॥ ॥कुंकुमकेसरं रक्तोत्पलं च कारोत्करवीरादि। करवीरकपुष्पेण र
क्तेनाथ सितेन वा। मुकुंदस्यचैकेन पूजयित्वा दिवं व्रजेदिति स्मरणात्। जलजत्वविशेषणात्। वैस
वान्यत्पुष्पाणि संक्षेपेण निबोधमे। पद्मं गंधोत्पलं चान्यदुत्पलं नीलमेव च। श्वेतं चैवं तथा रक्तमुत्प
लं कुमुदं तथा पुष्पाण्येतानि राजेंद्र शस्तानि जलजेष्वपीति। अनेन विहितरक्तातिरिक्तरक्तनिषिद्ध
मिति गम्यते। पुनर्दद्यादिति वचनं पुष्पसंख्यातिरेकेण फलातिशयद्योतनाय। तच्चलक्षसंख्यायां सि
द्धं॥ ॥नशूपार्थंजीवजातं॥१०॥ ॥आग्णं गगन खपुष्पं गादिश्रूपत्वेन देयं। सर्जरसादिच यद्वारद्वारोपूप

तामादेयंतु रत्नकोशोक्तमुलुं चारुकं चैव सत्कोष्ठं चैव संदर्नोऽक्षयीरं वर्तुडं चैवं द्वादश कुप्पीकेर्युत मिति॥
न स्नानं तैलेन विना किंच नदीपार्श्वे॥११॥ ॥स्नूतं गोमहिष्यजानां निदर्शनामिति वसिष्ठस्मरणात् पयो निषे
धेत हि कारणामपि निषेधात् महार्णवं तु तरं निहृन्निः। नाभग्नं नैवेद्यार्थं इति निषेधात्। कार्तनियमा
नाह॥ ॥अयं तत्स्वस्तु विनिर्णीतानां सर्वमेव निवेदयेत्। नान्यानां सुमनो भक्त्यात्वाक्रोधविवर्जितः॥१५॥ ॥अथ
तोयाद्यशौचतान्तु स्नात [illegible] ताद्यन्तु तत्राहलावकिंशु नवेचनं पंचविधं वस्तु द्विषाप्तार्थं। मंत्रकोशे। प्रथमं
देहशुद्धिः स्यात् स्थानशुद्धिरनंतरं। पात्रशुद्धिस्तृतीया च आत्मशुद्धिस्तु तुर्थिका। पंचमी बिंबशुद्धिः स्यात्स्था
नपंचैव स्मृतानि ति। आत्माश्रेत च्छरणं। बिंबं हृन्निः शुचित्वार्थाभिषेकादिना। [illegible]
[illegible]। यथा शौनकः। तीर्थाभिषेकपूतात्मा कृत्वा चैवोर्ध्वपुंड्रकं। भूषणार्थे रत्नहेमत्वाड कृत्वा
च धारयेत्। मौक्तिका निप्रवाला निपद्मा दीक्षितुलसीमणीन् राजपश्जनवेलयां धारयेद्बुधः सर्वदि
कः। धारयेद्दहुमालावा शोवणीमथवापिवा। पवित्रपाणिः पूतात्मापदस्थः स्विकासनेः। कुर्याद्

रावनं विष्णोर्देवदेवस्य चक्रिण इति। तीर्थं भगवच्चरणोदकं। ऊर्ध्वपुंड्रं शंखचक्राद्युपलक्षणं। अंकि
तः शंखचक्राभ्यामुभयोर्बाहुमूलयोः। समर्चयेद्धरिं नित्यं नान्यथा पूजनं भवेदिति स्मरणात्। तन्म ना
भगवन्मनाः सुमनाः प्रसन्नचित्तो भूत्वा व्यासगांतरपरिहारेणात्वराक्रोधाभ्यां विशेषतो रहितो सर्वपू
र्वोक्तमुपचारं निवेदयेत्॥ ॥इति श्रीधर्माधिकारि विष्णुस्मृतिविवृ
तौ श्रीमत्यां षट्पंचाशत्तमोऽध्यायः॥ ॥देवपूजानंतरं वैश्वदेवादयभिधातुं सप्तपंचाशत्तमेनादौ पू
र्वोत्तरांगं होममाह॥ ॥अथाग्निं परिसमूह्य पर्युक्ष्य परिस्तीर्य परिषिच्य सर्वतः पाकादयमुद्धृत्य जु
हुयात्॥१॥ ॥अथ शब्दः पुरुषसूक्तजपानंतर्यार्थः स्तेन परिसमूहनादीति कर्तव्यतानंतर्यमा
ज्यहोमस्यापि सिध्यति। अन्यथान्नहोममेव स्यात्। अत एव शौनकः। आवाहनादिकान् कृत्वा वै
श्वाग्निं समुद्भवयेत्। जुहुयात् पुरुषसूक्तेन षोडशाज्यतिलान्नकैः। त्युभयस्य धारणेन गत्कानिना
ह॥ ॥अग्निं लौकिकं परिसमूह्य पाणिना सोदकेनाग्नेः समंतात् रिमार्ज्य पर्युक्ष्याग्नेः समंताज्ज

लिना सुदर्यपरिस्तीर्यग्निःसमंताद्दर्भेनास्तीर्य परिषिच्य परितो दर्भैर्न मिषिमेघृतत्रयोपादानेनागांत
रनिहतिः गृहमेधीये आज्यभागौ यजेत्‌ निवृत्ताभागवतेत्विष्याकानादयमुक्तोध्यायन्नभर्वेदाहृतिणिह
विषामिदृतानिहतामिष्ठाशिताभि सर्वंतत्र हविषस्यापभ्यनुज्ञानायामन्त्रोपमद्याभ्यामितिवद्यमा
णाद्दासुजानिष्पादकामाषरकं चरुश्रपन काङ्क्षि पिवंसैतेति प्रमाणतःस्मृतिर्वेद्येदोषवर्जिताइत्याहाव
ष्याणामपि निर्वपतां होमस्यत्तनिवेद्यशेषद्रव्यकालात्पाकादित्यपक्षपरिहाराया अतिपक्वमप
क्वं दुःपक्वमितियुतां दुःस्थामसंघक्तं दुर्गंधमशुभं स्मृतमिति हृह्नावदीयात्‌ सद्यस्कम
तुलो अथमष्टाचत्वारिंशद्वा सर्पिर्मितमन्त्रेण समाचामेवं ङ्किद्वापुष्कलंतचतुर्गुणाहेतिरिति स्वभ्रमिः
स्यादेयं तु क्षिप्रगुणां भावे दितिसातातपीयात्‌ उद्धृत्य पाकपात्रात्‌ मन्त्रेत्तरेकात्वापर्यग्निकरणादूनादि
संस्कारयेह्‌ तेनैवजुहुयात्‌ वंहविद्विषुवैणौवपाणिनाकेठिनं हविर्विशीर्णं स्मरणात्‌ होमदेवता आह
॥ ॥वासुदेवायसंकर्षणाय प्रद्युम्नायानिरुद्धाय पुरुषाय सत्याय अच्युताय वासुदेवाय॥१॥ ॥व

सुदेवायेत्यादिभिरष्टभिर्मंत्रैरष्टावन्नाहुतीर्जुहुयात्। तावेतावाज्यान्नहोमौ गृह्यं गभृतौ। कठशाखा
नुसारेण वैश्वदेवमाह॥ अथाग्नये १ सोमाय २ मित्राय वरुणाय ४ इंद्राय ५ इंद्राग्निभ्यां ६ विश्वेभ्यो देवेभ्यः ७
प्रजापतये ८ अनुमतये ९ धन्वंतरये १० वास्तोष्पतये ११ अग्नये स्विष्टकृते च १२॥ ३॥ ॥ अथैतान्नतर्यनियम
य। अन्यथा तमेन वैश्वदेवकृतशेषेण। दृष्यगान्नेनवा कुर्यान्नाश्यशेषेण वैश्वदेवमिति स्मृत्यंतरेण नैवेद्य
त्यागपि स्यात्। तेन चोक्तैवेति कर्तव्यता। त्रापितत्रैलोपकरोति। पयाजादिवर्जमेयादित्रिके हविरपि
तदेव परिसमूहना दिवर्जकरणेनाग्रोद्धरणस्याप्युभयार्थत्वात्। तानि वेद्यो थे श्यभांडे स्नातापत्नी पचे
त्तथा। वैश्वदेवार्थमन्यस्मिन्नद्यंजनानि ष्टथक्ष्टथक्। एकस्मिन्वाप्यशक्तिश्चेत्सर्वं विष्णुनिवेदनं। वै
श्वदेवांततः शिष्टाद्यासस्य वचनं यथोक्तिथासस्मरणाच्च। ततश्च तेनैवान्नेनाभ्यादिभ्यो द्वादशभ्यो द्वा
दशाहुतीर्जुहुयात्। चकाराद्धोमांते पिपरिसमूहनं। आदौ च कर्मणोंते च वह्नेः परिसमूहनं। पर्यु
क्षणं च कर्तव्यमिति शौनकोयात्। भूतयज्ञमाह॥ ततोन्नशेषेण बलिमुपहरेत्॥ ४॥ ॥ ततः

वि॰टी॰ ७
९६

तिहोमानंतर्यायाअन्यथाकर्मांतरत्वेन कालांतरेपि स्यात् ॥ अत्रस्य कृतस्यशेषेणावशिष्टंतेनव ह्यमाणदे
वताभ्योबलिंदद्यात् ॥ देवेभ्यस्त्वहुतादन्नादेकैकाङ्गनुबलिंहरेदितियोगिस्मरणात् ॥ तत्रविशेषमाह ॥ ॥
पत्नोपमन्दानं ॥ ५ ॥ ॥भक्तमोदनादि ॥ उपमन्द्यं शाकादि ॥ सर्वतस्त्वयनुक्त्वोपुनर्वचनंवैश्वदेवहो
मभिन्नहविषज्ञापनाय ॥ स्विष्टकृत्यहविष्प्रत्युक्षया दितोपस्वलायनीयात् ॥ वर्जयित्वाविशेष
नंमुद्गेनान्नेनतत्रवेदितिशौनकीयात् ॥ तेनवैरूपस्यहोमबलिहरणयोरेवसर्वान्नंसाध्यतेतिसिद्धं ॥ तत्र
देवतामाह ॥ ॥ अग्निनःस्वाहेति ॥ ६ ॥ ॥ उक्तस्याग्नेः पूर्वादिचतुर्दिक्षुतत्रमंत्रानाह ॥ ॥ ऊर्जा
नामासीति ॥ १ ॥ ऊर्जस्वलानामासीति ॥ २ ॥ निविनामासीति ॥ ३ ॥ प्रपर्णीकानामासीति ॥ ४ ॥ सर्वासां ॥ ७ ॥ ॥ अ
तेषादिचतुर्भिर्मंत्रैः पूर्वादिचतस्रृणांदिशांबलिसंबंधागमाद्देवतात्वंगम्यते ॥ रक्षसांभागोसीतिवतेन
वोनदिशः पूर्वादिदिशएवाभिधीयंते ॥ किंच ॥ ॥ नंदिनि १ सुभगे २ सुमंगलि ३ भद्रकालीति ४ स्वस्ति
ष्वभिप्रदक्षिणं ॥ ८ ॥ नंदिनीत्यादिचतुर्भिर्मंत्रैः पूर्वादिदिशएवाभिधीयंते ॥ किंच ॥ ॥ स्थूणायां ध्रुवायांश्रि

ये हिरण्यकेशेष्वेव नश्यति मन्त्रः॥९॥ ॥ध्रुवा गृहा धारभूता लक्षणा सकर्णा स्तंभस्तस्यां श्रिय इति द्वा
भ्यां हिरण्यकेशीति श्रीविशेषणं॥ ॥धर्माधर्मयोर्द्वारिम्याय वेच॥१०॥ ॥धर्मादिद्वाभ्यां गृहद्वारे।ध
र्माधर्मयोर्मिलितयोर्दैवतात्वमग्नीषोमवत्॥ ॥उदधाने वरुणाय॥११॥ ॥उदधानं जलशाला
तत्र वरुणायेत्येके॥ ॥वैस्रवणेत्युलूखले॥१२॥ उलूखलकंडनशालातत्र वैस्रवणेत्येकेन॥ ॥मरु
द्भ्य इति दृषदि॥१३॥ ॥दृषत्पेषणशालातत्र मरुद्भ्य इत्येकेन॥ ॥उपरि शरणे वैश्रवणाय राज्ञे भूतेभ्य
श्च॥१४॥ ॥शरणं गृहं तदुपरि अट्टालिकायां वैश्रवणायेति द्वाभ्यां चकारः प्रोक्षणस्यत्ताये॥ ॥यमाय यम
पुरुषेभ्य इति दक्षिणार्द्धे॥१६॥ ॥गृहस्य दक्षिणार्द्धभागे यमायेति द्वाभ्यां॥ ॥वरुणाय वरुणपुरुषेभ्य इति
पश्चार्द्धे॥१७॥ ॥गृहस्य पश्चिमार्द्धभागे वरुणायेति द्वाभ्यां॥ ॥सोमाय सोमपुरुषेभ्य इत्युत्तरार्द्धे॥१८॥ ॥
गृहस्योत्तरार्द्धभागे सोमायेति द्वाभ्यां॥ ॥ब्रह्मणे ब्रह्मपुरुषेभ्य इति मध्ये॥१९॥ ॥गृहस्य मध्ये ब्रह्मण इ
ति द्वाभ्यां॥ ॥ऊर्ध्वमाकाशाय॥२०॥ ॥ऊर्ध्वं भूमेरवस्ताच्छदेराकाशायेत्येकेन॥ ॥दिवा दिवाचरेभ्यो भूतेभ्य

इति स्थंडिलोक्तं॥२२॥ ॥स्थंडिलमंगणमथ्यवणीकाच्चरत्नत्रइदिवसे दिवा सरे माइतिनक्तं॥२२॥ ॥रा
त्रौ वैश्वदेवक्रियमाणे नक्तंचरेभ्य इत्येको ऽनेन सायंप्रातर्वैश्वदेवकर्त्तव्यतोक्ता भवति। अथ सा
यंप्रातः सिद्धस्य हविष्यस्य जुहुयादित्याश्वलायनीयात्। अत्र सायमिति प्रथमोपादाने विद्वैवो
पक्रमः। वैश्वदेवं गृहस्थः सायंप्रातराशं भवेदिति गोनर्दीयात्। पितृयज्ञमाह। ततो दक्षिणाग्रेषु
दर्भेषु पित्रे पितामहाय प्रपितामहाय मात्रे पितामह्यै प्रपितामह्यै स्वनामगोत्राभ्यां वपिंडनिर्वपणं
कुर्यात्॥२३॥ ॥तंत इत्यानंतर्येतिनच देवभूतपितृयज्ञानां क्रमः सिद्धः। वैश्वदेवं ततः कुर्याद्बलिक
र्म तथैव च। अनंतरः पितृयज्ञं कुर्यादिति नारसिंहात्। पितृकर्मत्वाद्दक्षिणाग्रता दर्भाणां। पितृस्त्रे दक्षि
णायेति परिभाषणात्। पित्रादित्रयोपादानमेकोद्दिष्टतापरिहाराय। मात्राद्युपादानं मातामहा
दिपरिहाराय। यत्तु नित्यश्राद्धं तु यत्नान्मदैवहीनं तदुच्यते। तत्रषाट्पुरुषं ज्ञेयं दक्षिणा पिंडवर्जनमिति
मातामहाभिप्रायेण षाट्पुरुषत्वं तच्छाखांतराभिप्रायं पिंडवर्जनं समूहचर्यात्। एतेन नित्यश्रा

द्वे पिंडवर्जनमिति मात्रमहाभिप्रायेणाह। सर्वान्पितृगणान्सम्यक्सदैवो हि भोजयेदित्यभिधानात्। नामगोत्रान्योर्वकारो द्वस्यादिरूपस्वधाकारान्यो चपिंडदानं कार्यं॥ पिंडग्रहणं ब्राह्मणभोजनयो विकल्पाभिधानात्। ततश्च ब्राह्मणभोजनमिति भोजनापिंडदानं पिंडनोत्तन ब्राह्मणभोजनमिति पिंडवर्जनेनाविरोधः॥ ॥पिंडानां तांबुलेपनपुष्पधूपनैवेद्यादि दद्यात्॥२४॥ ॥षसादि पित्रादिपिण्डानां गंधानां गंधादि चतुष्टयं दद्यात्। आदिशब्दात्तांबूलदक्षिणयोर्ग्रहणं॥ ॥उदककलशमुपनिधाय स्वस्त्ययनं वाचयेत्॥२५॥ ॥पिंडसमीपे पितुद्देनजलपूर्णकलशं निधाय स्वस्तित्वं ब्रूहिति यं कं चिद्ब्राह्मणं वाचयेत्। तं ब्राह्मणाय दद्यादित्यर्थः। अन्नं पितृमनुष्येभ्यो देयमप्यन्वहं जलमिति यो [illegible]स्मरणात्। वल्यंतरमप्याह॥ ॥श्वकाकश्वपचानां तु विनिर्वपेत्॥२६॥ ॥श्वादीनामर्थे किंचिदन्नं भूंगणे तु विनिक्षिपेत्। शुनां च पतितानां च श्वपचां पापरोगिणां। वायसानां कृमीणां च शनकैर्निक्षिपेद्भुवी ति मानवात्। मनुष्ययज्ञानुकल्पमा

हा॥ भिक्षां च दद्यात्॥१७॥ ॥भिक्षां ग्रासमात्रां दद्यात्तावत्कार्या ब्राह्मणं च भोजयेत्॥ अहरहः
स्वाहाकारो ब्राह्मणेभ्योऽन्नं दद्यादिति नो भाव्यनीयात्॥ इदं च ग्रामाणामत्थ्यभावे॥ ततो गोदोहमात्रं वा कालं
तिष्ठेन्निष्क्रम्य गृहाङ्गणे॥ अतिथिग्रहणार्थाय तावद्वै प्रेक्षयेत् इति विष्णुपुराणात्॥ ततः स्वादिबलिदा
नानंतरं तदभावे वैश्वदेवः॥ भोजनं हंतकारं वा अग्रं भिक्षामथापि वा॥ अदत्त्वा नैव भोक्तव्यं यथा
विभवमात्मनः इति॥ अन्नाग्रं ग्रासचतुष्टयमिति मानं च ज्ञेयं॥ सर्वस्वीभावे चोद्धरोन्नं स भिक्षेति
मात्रामात्रोऽपि तिथिस्यो देयाः दद्याच्च भिक्षात्रितयं परिव्राड्ब्रह्मचारिणां॥ स्वेच्छया च ततो देवादि
भवे सत्यवादिनि भिक्षापात्रे शास्त्रार्थोऽन्नसुवर्णमनुपमं वदिमाह॥ ॥अतिथिपूजनेन च परं यत्नमाहेति
ष्ट॥१८॥ ॥वक्ष्यमाणस्यातिथेर्वह्वामातेन प्रतिश्रयादिना पूजनेन च कांक्षेन च परं कार्यं वा
अन्नोभिर्यातं कुर्यात्॥ वक्ष्यमाणदद्यादन्नोदकाहाराचं दद्यात्संस्कृतं॥ अप्यात्मनः प्रदानेन तोषयेत्
दितिथिं सदेति यावत्स्मरणात्॥ वक्ष्यमाणस्यातिथेः देविषयो वदन्ति॥ तत्र सायमातिथि विशेषमा

हा ॥ ॥ सायमतिथिं प्राप्तं प्रयत्नेन नार्चयेत् ॥ २९ ॥ ॥ सायं वैश्वदेवान्ते प्राप्तमतिथिं अन्नाद्यभा
वे वाग्भूतृणोदकैरप्यर्चयेत् । अशरणो यो ऽतिथिः सायमपि वाग्भूतृणोदकैरिति योगिस्मरणा
त् । अस्य यत्नवचनं दोषाधिक्यज्ञापनाय दिवातिथौ तु विमुखे गते यत्पातकं नृप । तदेवाष्टगुणं
पुंसां सूर्योढे विमुखे गत इति विष्णुपुराणात् । सायं समागतो यो सूर्योढः सोऽतिथिः स्मृत इति प्र
चेतस्मरणात् । किंच ॥ ॥ अनाशितमतिथिं गृहे न वासयेत् ॥ ३० ॥ ॥ अनाशितमभोजितं स्वयम
शक्तो ऽन्येन वा स्वगृहे न स्थापयेत् । नास्यानश्नन् गृहे वसेदिति मानवात् । अतिथिप्रशंसामाह
॥ ॥ यथा वर्णानां ब्राह्मणः प्रभुर्यथा स्त्रीणां भर्त्ता तथा गृहस्थ्यातिथिर्दैवतः । राजन्यो विप्रदैवत्यो
भार्याश्च पतिदैवताः । गृहस्थातिथिदैवतस्तस्मात्तं पूजयेत् सदेति स्मरणात् । तत्पूजाफलमा
ह ॥ ॥ तत्पूजया सुरस्वर्गमाप्नोति ॥ ३१ ॥ ॥ देशकालविषयविशिष्टः सुखविशेषस्तत्र जामि
निएवं कामत्वमुक्तं नित्यत्वमाह ॥ ॥ अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्त्तते । तस्मात्

वि॰टी॰ ६७
७७

सुकृतमादाय गच्छतु अयं कृती ॥ इत्यादि ॥ अकृतस्यातिथेः परावर्तने गृहस्थस्य सुकृत
नाय गच्छति तत्पापं क्षिप्त्वा तिथिसत्कारो नित्यः । अतिथिप्रशंसामाह ॥ ॥ यथा वर्णानां हि निव
सन्नतिथिर्ब्राह्मणः प्रभुर्यथा ब्राह्मणः स्मृतः । अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥ ३७
॥ ॥ योऽब्राह्मणो देशान्तरं गच्छन्नेकरात्रं धर्मीय स्य गृहे वसति तस्यासावतिथिर्ज्ञेयः । कृतार्थ्य
षितश्चेद्वर्ण्यान्तो गृहमुपागतः । प्रयत्नेन तु संपूज्यः सोऽतिथिः स्वर्गसंक्रम इति वैष्णवात् । इत्यादौ
लक्षणान्तरमपि दर्शयति । यथाह पराशरः । दूराच्चोपगतं श्रान्तं वैश्वदेव उपस्थितं । अतिथिं तं
विजानीयान्नातिथिः पूर्वमागत इति । नातिथिः पूर्वमागत इति वैश्वदेवे चोपस्थितस्य प्राश
स्त्यायाकाले वाप्यथवा कालेनास्यानुगमनं गृहे वसेदिति मानवात् । कालो वैश्वदेवस्य
कालोऽन्यः कालः । यमोऽपि । अनित्यं यतिर्नैकरात्रं निवसन्नुच्यते तिथिरिति । यत्तु वदन्ति यत्त्वो
रेवातिथिरिति व्यत्तु व्रति यत्र ब्राह्मणपदस्य तत्रैवोपसंहारादिति । तन्न यतिरुत्य मिहे

७७

त्रीवत्तथा च मएवहि द्विजः सदैवं तिथयः प्रोक्ता अपर्वाश्च दिने दिने। अपर्वः सुव्रती विशेषाः पर्वस्था तिथि
स्तथा। वेदाभ्यासरतो नित्यं त्रयो पूर्वे दिने दिनऽ इति पराशरवचनाविरोधात्। ब्राह्मण इत्यब्राह्मणनिरासाय।
नैकग्रामीणमतिथिं विद्यान्नाब्राह्मणं तथेति विष्णुधर्मोत्तरात्। तत्र च प्रवृत्तिनिमित्तम् अनित्यस्थितिका
त्वमेकरात्रनिवासात्तेन च द्वितीयवासेनातिथित्वभिन्नमुक्तं भवति शब्दस्वरूपं त्वनित्यं स्थितिर्यस्येत्यत्र
त्र थंभयमपदलोपेन वर्णविपर्ययवर्णनाशाभ्यां च सिध्यति। हि शब्देन स्थित्यागमनादेपादनित्यमाग
तोयस्मात्तस्मादतिथिरुच्यत इत्यपि प्रवृत्तिनिमित्तं सूचितं। तथा हयमः। तिथिपर्वोत्सवाः सर्वे
त्यक्ता येन महात्मना। सोऽतिथिः सर्वभूतानां शेषानभ्यागतान्विदुरिति। तिथिः प्रतिपदादिः पर्वसंक्रा
न्त्यादिः उत्सवो विवाहादिस्तेषु यो नियमेन नायाति सोऽतिथिरिति सनेनन विद्यते तिथिर्यस्येत्युक्तं भवति।
उक्तं तिथिलक्षणं न्वयव्यतिरेकमुखेन विशेषांतराएणाह॥ ॥नैकग्रामीणमतिथिं विप्रं सांगतिकं तथा
।उपस्थितं गृहे विद्याद्भार्या यत्राग्नयोपि वा॥१०५॥ ॥एकग्रामे भव ऐकग्रामीणस्तं दृष्टविश्रांतया

नि॰टी॰६९
१००

ग्रामांतरस्थमपि संगतिपूर्वं पतिर्यो विद्यते येन नासौ सांगतिकस्तं ॥ यत्र भार्याग्निहोत्रं वास्ति नात्र हरो
षि निवासेऽपश्चिममतिथिं न जानीयात् । गृहविशेषणोपादानात् प्रवासे यथोक्तविशेषणवतोऽपि
नातिथित्वं । यथाहलौगायनः । प्रवासं गच्छतो यस्य गृहे कर्त्ता न विद्यते । पंचानां मेषस्तह यज्ञैः सम
हूति । प्रवासे ऊर्ध्वं चैतो नु यदा ह्युपपद्यते । नैवेद्यं सर्वते वाऽन्नमङ्क्षिरेतान् समाचरेदिति एककर्त्तृत्वेन तत्
संभवे प्रवासे पाक्षिकं वर्तते तादृशेनानाः । पति नग्रामांतरस्थोऽपि रिन्नोऽभार्यावति गृहे दूरादागतस्य
केवलं वासो ब्राह्मणो वासो ब्राह्मणा नातिथिरिति तिथिरिनलक्षणमुक्तं भवति श्चातिथिः प्रसंगेनाह ॥ ॥
यदि त्वतिथिधर्मेण क्षत्रियो गृहमागतः । भुक्तवत्सु च विप्रेषु कामं तमपि भोजयेत् ॥ ३६ ॥ अतिथिधर्मे
तिथिलक्षणं तदुक्तः क्षत्रियोपि वैश्यमागा तिन्नदा भावपि विप्रातिथिभोजनानंतरमिच्छया भोजनी
यः । कामग्रहणाद्भोजने वृत्त्यभावादवश्यमिति । किंच ॥ ॥ वैश्यशूद्रावपि प्राप्तौ कुटुंबेऽतिथिधर्मिणौ
भोजयेत्सह भृत्यैस्तावानृशंस्यं प्रयोजयन् ॥ ३७ ॥ ॥ यद्यतिथिः पितृदैववैश्यः शूद्रो वापि कुटुंबविवास

१००

वर्ज्यमाणेः सहभोजनीयो नत्वतिथित्वेनार्चनीयो
मागच्छतस्तदातावप्यनिर्दयत्वख्यापनाय भृत्यैर्वर्ज्यमाणेः सहभोजनीयो नत्वतिथित्वेनार्चनीयो। यत्त्वतिथित्वेन
अब्राह्मणस्यातिथित्वाभावात्। ब्राह्मणस्य। नतिथिरब्राह्मणाय इति गौतमीयात्। यत्त्वतिथित्वेन
वर्णानां देयं शक्त्यानुपूर्वशः इति वर्णमात्रस्यातिथित्वाभावात्। तद्भोजनं यत्वाभिप्रायेण नत्वप्रत्या
ख्येयत्वेन शक्तिकामाद्युपर्वदर्शनात्। किंच॥ ॥इतरानपि सख्यादीन् संप्रीत्या गृहमागतान्। प्र
कृतान्नं यथाशक्ति भोजयेत्सह भार्यया॥३८॥ ॥वैश्वदेवकाले प्रीत्यतिशयेन यथोक्तलक्षणं गृहमा
गतान्। भार्यापितरौ तथोपपादितमेवान्नं भार्या
प्ता नितरान्मूर्धाविसिक्तादीन् सखिसंबंधिबांधवाश्वशुरौ सत्यौ प्रकृतं यथोपपादितमेवान्नं भार्या
भोजनकाले भोजयेत्। यथाह योगीश्वरः। भोजयेच्चागतान् काले सखिसंबंधिबांधवाश्वशुरा वेवा
हिकाबांधवाः पैतृष्वस्रेयादयः। भार्याभोजनकालेश्च पतिभोजनानंतरं। भुक्तो भुक्तेपतौ याज्ञवल्क्य
नां वा पिता सिते। विनिद्रिते विनिद्रातिप्रथमं प्रतिबुध्यत इति मानवात्। इदं च भार्यया सह भोजनं प
तिभोजनानंतरमागतानां पूर्वागतानां तु पत्यैव सह भोजनमौचित्यात्। दंपतीभोजनानंतरम

मागतानुंस्तुपाकांतंरैपैविनाभुक्तशेषेणादंपत्योर्भुंजीत शेषंतुउक्तांचांद्रायणंचरेदितिनिषेधात्।अतिथि
भोजनानंतरंनभोऽजनोप्रागन्योनभोऽजनीयमिति प्राप्ते।तस्यापवादमाह॥ ॥स्ववासिनीकुमारी
चरोगिणोगुर्विणीस्त्रियः।अतिथिभ्योग्रएवैतान्भोजयेदविचारयन्॥३०॥ ॥ऊढापितृगृहस्था
कन्यास्ववासिनीतिपाठेनपोढाकन्यास्नुषाच।कुमार्यविवाहिता।रोगिणोज्वराद्यभिभूताः।गु
र्विणीगर्भिणी।तथैन्यविवस्त्रस्तुता।स्वगृह्याकुमारीबालवृद्धतरुणप्रजाताइतिनासिद्धात्।त
रुणप्रजाताइतिवासिष्ठात्।तरुणप्रजातानवप्रजाताएतानतिथिभ्यःपूर्वमेवभोजयेदेषांबुभुक्षा
ऽसहिष्णुत्वात्कथमतिथिभ्योऽग्रइतिभोजनीयानवेत्यविचारयन्।प्रधानाविरोधस्याभ्यर्हितत्वा
त्।एतानितिनिर्दिष्टत्वेनबालवृद्धादीनपिपरामृशति।यथाहयोगीश्वरः।बालस्ववासिनीवृद्धगर्भि
ण्यातुरकन्यकाःसंभोज्यातिथिभृत्यांश्चदंपत्योःशेषभोजनमिति।अनेनचपाठक्रमेणाग्रेअनं
तरमितिव्याख्यातिरस्ता।अन्यगितिमानवःपाठः।तत्रस्नेहेनपयोर्मिश्रातिथ्यः।अतिथ्यादिभ्यःप्र

गभोजने अतिथिषेधमाह॥ ॥अदत्वा यस्तु एतेभ्यः पूर्वं भुंक्ते विचक्षणः भुंजानो न स जानाति श्वगृध्रैर्जग्धिमा
त्मनः॥८०॥ ॥अतिथिमारभ्य सुवासिन्यादींतानभोजयित्वा यो धर्मानभिज्ञः स्वयमेवाग्रप्रथमं भुंक्ते
भुंजान इति णिज्विभावनया अन्यान्वा भोजयति स श्वभिर्गृध्रैश्च कर्मणा आत्मनो जग्धिं भक्षणं कि
यां न जानाति। भोजनीयभोजकभोजने क्रममाह॥ ॥भुक्तवत्सु च विप्रेषु स्वेषु भृत्येषु चैव हि। भुंजी
यातां ततः पश्चादवशिष्टं तु दंपती॥८१॥ ॥विप्रा अतिथयश्च कारादतिथिवदागता अभ्यागताः द
त्रियाश्च स्वाः सपिंडसंबंधिबांधवा दान्नपोषणाभरणा या मातादयः माता पिता गुरुर्भार्या प्रजादीनाः स
माश्रिताः अभ्यागतातिथिभ्रात्राश्रिताः पोष्यवर्ग उदाहृता इति दक्षस्मरणाच्च चकाराद्दासीदासा एतान्
भोजयित्वैव नाभोजयित्वा पश्चादनंतरं न सह तत्सद्भुक्तादवशिष्टेन पक्वान्नाज्जायापती भुंजीयातां॥ दं
पत्योर्भोजने क्रममाह॥ ॥देवान्पितॄन्मनुष्यांश्च भृत्यान्गृह्याश्च देवताः॥ पूजयित्वा ततः पश्चाद्गृह
स्थः शेषभुग्भवेत्॥८२॥ ॥देवादींस्तत्तद्यज्ञेषु चकारात्सख्यादीन्भृत्यान्कुलद्वारगृह्यादेवताः

वि॰री॰६७
१०२

आदयः। चकारात्तच्छक्त्याकादयश्चैतांस्तत्क्रमेणार्पयित्वानंतरं ततो महायज्ञत्रयमरणान्नाद
वशेषं गृहस्थो भुंजीत अथात्मनी पतिभोजनानंतरं भुंजीतेति सिद्धं। सर्वेत भर्तुरुच्छिष्टमिष्टमन्नफलादिकं मे
हाबुपसादत्वमुक्तापीति दंपती छुनीति मानवात्। उक्तानामपि देवज्ञादीनां पुनर्वचनं देवयज्ञात्माकेम
मनुक्तं भूतयज्ञविधानाय चानं यान्त मनुः दद्यादहरहः श्राद्धमिति पितृयज्ञामुक्ता वैश्वदेवस्यासिद्धस्य
ति देवयज्ञमाह। स्वाध्यायेनार्चयेदृषीन् होमैर्देवान्यथाविधि। पितॄन् श्राद्धैश्च नॄनन्नैर्भूतानि बलिकर्म
णेति मनुष्ययज्ञान् भूतयज्ञं चाह। पंचयज्ञाकर्तुर्भोजने प्रत्यवायमाह॥ ॥अघं स केवलं भुंक्ते यः पच
त्यात्मकारणात्। यज्ञशिष्टाशनं ह्येतत्सतामन्नं विधीयते॥८३॥ ॥यस्त्वात्मार्थमेवान्नं पक्त्वात्मनेव भुंक्ते
पंचयज्ञाननुतिष्ठति स केवलमघमेव भुंक्ते केवलाघो भवति केवलादीति श्रुतेः। तत्र हेतुर्यतो यज्ञेभ्यो दे
वयज्ञादिभ्यः शिष्टमशनं तत्सतामन्नमनुयोग्यं विधीयते शास्त्रेषु। तस्मात्पंचानुष्ठायैव
भोक्तव्यं नान्यथेति। अतिथिभोजने फलमाह॥ ॥स्वाध्यायेनाग्निहोत्रेण यज्ञेन तपसा तथा। नक्षा

प्नोति गृही लोकान्यथा त्वतिथिपूजनात्॥७४॥ ॥गृहस्थोतिथिपूजनेन याहशान्लोकान्प्राप्नोतिताह
शान्वेदाध्ययनाग्निहोत्रहोमयज्ञतपोभिर्नेति।उक्तस्यातिथेर्द्वैविध्यं तत्पूजनप्रकारमाह॥ ॥सायंप्रात
स्त्वतिथये प्रदद्यादासनोदके।अन्नं चैव यथाशक्त्या सत्कृत्य विधिपूर्वकं॥७५॥ ॥सायंप्रातःकालभेदेनाग
तोतिथिरपि द्विविधस्तस्मै यदन्नं दद्यात्तद्विधिपूर्वकं मधुपर्कविधिना।आसनोदके आसनं विष्टरं उदक
पाद्यार्घाचमनीयानि।द्वैवाचकौ रोवाको भेदप्रदर्शनार्थौ।तथा यथाशक्ति अन्नं मिष्टं स्वपत्नुडे
मनादिना सत्कृत्य मधुपर्कादिदानैवेत्युक्त एवातिथिभोजने गुणविधिः किंच॥ प्रतिश्रयं तथा शय्यां
पादाभ्यंगसंदीपकं प्रत्येकदानेनाप्नोति गोप्रदानसमं फलं॥७६॥ ॥प्रतिश्रयो निवासः स्यात् एव
छात्रलिका वा पादयोः प्रक्षालनपूर्वकं हस्तादिनाभ्यंजनं दीपो निवासोद्योतार्थं तथा शब्देन गात्राभ्यंगव
स्त्रानानुलेपनादीनां विष्णुधर्मोत्तरोक्तानां ग्रहणं एषां प्रत्येकं दानेन गोः प्रकृष्टदानफलसमं फलं प्राप्नो
ति।प्रतिश्रयादिषु द्वितीयानिर्देशात्प्रापिक मेतापि सिद्ध्यति।तेन इहलोके प्रतिश्रयादिदानेन प्रतिश्रय

प्र५६

दिदानेनप्रतिश्रयादिप्रतिश्रयादिप्राप्नोतिपरत्रचगोदानफलमिति॥ ॥इतिश्री
विष्णुस्मृतिविवृतौश्रीमत्यांवैजयंत्यांसप्तषष्ठितमोध्यायः॥ ॥उक्तेभोजनेविधिनिषे
धावष्टषष्ठितमेनाह॥ ॥चंद्रार्कोपरागेनाश्नीयात्॥१॥ ॥चंद्रसूर्यग्रहणकालेग्रहणप्रहरात्पूर्वयामत्र
ययामचतुष्टयंचनाश्नीयात्तथाचव्यासः॥ग्रहकालेचनाश्नीयादिति॥वृद्धगौतमोपिसूर्यग्रहेतुना
श्नीयात्पूर्वंयामचतुष्टयं॥चंद्रग्रहेतुयामांस्त्रीन्बालवृद्धातुरैर्विनेति॥चंद्रार्कयोःसर्वग्रहेयामचतुष्टयंखं
डग्रहेयामत्रयमितरार्थः॥चंद्रार्कसर्वग्रासेतुनाद्याद्यामचतुष्टयंखंडग्रहेतुयामांस्त्रीन्बालवृद्धातुरैर्वि
नेति॥चंद्राजयेदितिद्विवर्तात्रावाला॥विष्णुत्विशेषमाहमार्कंडेयः॥सायाह्नेग्रहणंचेत्स्यादपराह्णेन
भोजनं॥अपराह्णेनमध्याह्नेमध्याह्नेनतुसंगवे॥भुंजीतसंगवेचेत्स्यान्नपूर्वंभोजनकालस्तदा॥ ॥स्नात्वामु
क्तयोरश्नीयात्॥२॥ ॥मुक्तेःपूर्वंस्नानवचनंमुक्तिस्नानेनाश्रमनिरासायतेनमुक्तिस्नानानंतरं
भोजनांगतयास्नात्वाश्नीयात्॥आ॥स्नाताशीमलंभुंक्तेइतिभोजनांगस्नानवचनंमुक्तिस्नान

ताग्रमनिरासार्थेनमुक्तिस्नानानंतरंभोजनं।गतयास्नात्वाश्नीयात्।अस्नाताशीमलंभुंक्त इतिभोज
नांगस्नानश्रवणात्।तस्मिंश्च मुक्तिंमुक्तिंश्च स्नानानंतरमेवाधिकारात्।आशौचंजायतेनृणांग्रहणेचं
द्रसूर्ययोः।राहुस्पर्शतियोःस्नात्वास्नानादौकल्पनेनरइतिब्रह्मांडपुराणात्।ग्रस्तास्ते विशेषमाह।
।। ।।अमुक्तयोरस्तंगतयोःस्नात्वादृष्ट्वापरेह्नि।।२।। ।।अमुक्तयोरित्यादिकर्मणिषष्ठीतेनराहुग्र
स्ताकेवास्तंगतौचंद्रार्कौपरेद्युर्यावदुदितौदृष्ट्वाचकारान्मुक्तिनिमित्तंस्नात्वापुनःस्नात्वाश्नीयात्।मुक्ति
दर्शनोत्कर्षोत्कर्षात्स्नानस्याप्युत्कर्षः।तदाद्युत्कर्षन्यायात्।दर्शनात्प्राक्स्नानवचनंतत्तत्प्रयोजन
मेव।तत्रश्चरविग्रस्तास्ते होरात्रंचंद्रग्रस्तास्तेहर्मतेनाश्नीयादिति सिद्धं।तथाचभृगुः।ग्रस्तावेवास्तम
नंतुरवींद्वोःप्राप्नुतोयदि।परेद्युरुदयेदृष्ट्वास्नात्वाभ्यवहरेन्नरइति।दर्शनंशास्त्रीयज्ञानोपलक्षणंमे
घमालादिदोषेणयदितुक्विन्नहरपते।आकलय्यतमःकालंस्नात्वाभुंजीतवाग्यतइतिस्मृत्यंतरा
त्।ग्रस्तोदयेतुवसिष्ठः।ग्रस्तोदयेविधोःपूर्वंनाहर्भोजनमाचरेत्।रविग्रस्तोदयेपूर्वंरात्रौचोपवुञ्जिव

जनमितिः ॥ ॥न गोब्राह्मणोपरागेऽश्नीयात्॥४॥ ॥गोकुब्राह्मणयोरुपरागे वंदीकरणं तद्दिने
नाश्नीयात्। अत्रानुक्त्वा तथापि पुनः क्रियावचनपि वेनन्यायवहंदीकरणमुपवासस्याशक्यत्वावगमानाद्
॥ ॥न राजव्यसने॥५॥ राज्ञो व्यसनमापदुपगमो मरणं वा तद्दिनेपि नाश्नीयात्। पुनः क्रियावचन
आहिताग्नेः प्रवासे विशेषमाह॥ ॥प्रवसितो ग्निहोत्री यदाग्निहोत्रं कृतं मन्येत तावति काले नातेद
दृष्टपात्रातिनियं स्याग्नेर्नाश्नीयात्। पुनः क्रियावचनं स्मार्ताग्ने रनियमाय। किंच॥ ॥यदा कृतं मन्येत
वैश्वदेवमपि॥७॥ ॥प्रवास्याहिताग्नियवता कालेन वैश्वदेवमपि कृतं मन्येत तावत्कालात्य
येऽश्नीयात्। वैश्वदेवशब्देन देवभूतपितृयज्ञा उच्यंते। देवभूतपितृयज्ञा वैश्वदेवइत्याचक्षते। अपि
शब्दान्मनुष्ययज्ञमपि। भार्यायां च प्रवासेयोपि वेत्यनेन तस्या पि स्वकर्तव्यत्वात्। किंच॥ ॥पर्वणि च य
दाकृतं मन्येत पर्व॥८॥ ॥दर्शपूर्णमासयोः पर्वणोः प्रकारान्तर्गतिपदोश्वाद्यावान पिण्डपितृयज्ञा
न्वाहार्यकादिं यदा कृतं मन्येत तदाश्नीयात्॥ ॥नाश्नीयाच्चाजीर्णे॥९॥ ॥अजीर्णे भोज्ञा

रिचकारात् आर्द्द्रशमीद्वादश्यादिभोजनेचपुनर्नाश्नीयात्पुनर्भोजनमथ्यानमेकादशीसमास्
थायजेद्भक्तचतुष्टयमित्यादिस्मरणात्॥ ॥नार्द्धरात्रे॥१०॥ ॥अर्द्धरात्रंनिशीथः।निशीथोवरि
काद्वयमितिस्मरणात्।अत्रमहानिशाचविज्ञेयामध्यस्थप्रहरद्वयं।तत्रनाश्नीयात्।तथार्द्धव्यतीप
तिति।अर्द्धरात्रेव्यतीतेवाप्यर्द्धरात्रेमहानिशि।ब्राह्मणःक्षत्रियोवैश्यो्भुक्त्वासांतपनंचरेदितिस्मरणात्
॥ ॥नमध्याह्ने॥११॥ ॥मध्याह्नःकुतपः॥ ॥नसंध्ययोः॥१२॥ ॥सायंप्रातःसंध्ययोः॥ ॥नार्द्र
वासः॥१३॥ ॥क्लिन्नवस्त्रः।नार्द्रवासानार्द्रवासानार्द्रशिराइतिब्राह्मात्॥ ॥नैकवासाः॥१४॥ ॥एकवास
अनुत्तरीयःअनुपवीतिच।सोत्तराच्छादनश्चैवयज्ञोपवीतीभुंजीतेत्यापस्तंबीयात्।ब्राह्मेपि।नैकवस्त्रोद्दश्यमध्येस
पानत्कःसपादुकः।नचर्मोपरिसंस्थश्चचर्मावेष्टितपार्श्ववानिति॥ ॥ननग्नः॥१५॥ ॥नग्नोदशविधःप्राउक्तः॥
॥ ॥नोदके॥१६॥ ॥जलस्थोनौकास्थोवा।ननाविभुंजीतेत्यापस्तंबीयात्॥ ॥नोत्कटुकः॥१७॥ ॥उत्कु
टुकऊर्ध्वजानुः॥ ॥अभिन्नासनगतः॥१८॥ ॥भिन्नंस्फुटितंभिन्नजातीयंवासनद्वयंतत्रोपविष्टः॥ ॥

वि॰टी॰दृ
१०५

नशयनगतः॥१९॥ ॥शयनं स्थानं ततः भूमौ वा पिधायित्वा वा। ब्राह्मे नावसक्थिकसंस्थनचप
र्यंकिकास्थितइति। पर्यंकिकामंचिका॥ ॥नभिन्नभाजने॥२०॥ स्फुटितेभिन्नजातीयैः कांतेवापात्रेत्त
आदित्यतिरेकेणेतत्। ताम्ररजतसुवर्णानां भिन्नेभिन्नेचनदोषइति पैठीनसिस्मरणात्॥ ॥नोत्संगे॥
॥२१॥ ॥उत्संगेउपस्थेपात्रं संस्थाप्य भोजनं भक्ष्यस्याप्युपलक्षणं नभक्ष्योनुत्संगे भक्षयेदितिगो
तमः। उत्संगशब्दसंस्तुपलक्षणं नवासंदीस्थितेपात्रइतिविष्णुपुराणात्॥ ॥नभुवि॥२२॥ ॥पत्रा
वल्याद्यनंतर्हितायां भूमौ त्र्यक्ष्णे भाजनं वा। तत्र भोक्तुं जीतेत्यापस्तंबीयात्॥ ॥नपाणौ॥२३॥ ॥
पाणौपाणितले। करे कर्परके चैव शिलायां ताम्रभाजने। वटार्काश्वत्थपत्रेषु कुरुहीमुक्तौ दवं चरेदिति
शातातपीयात्। तथा ब्राह्मेपि। यस्तुपाणितले भुंक्ते यश्चतोगुलिभिस्त्वयः। यस्तुफूत्कारसंयु
क्तं तस्य गोमांससदृशं तदिति॥ ॥लवणं यत्र दद्यात्तन्नाश्नीयात्॥२४॥ ॥यस्मिन्द्रव्ये पाकानंतरं ल
वणं दीयते न तत्। प्रत्यक्षलवणं वर्ज्यमिति भविष्यात्। चकारात् दिः पक्कमजीर्णपक्कादि च। पुनप.

१०५

कास्त्रपपक्कमित्याशिष्टात्॥ ॥न बालकान्निर्भत्सयन्॥२५॥ ॥स्वपंक्तौ भुंजानान्बालका
न्धिक्कुर्वन्न कुत्सयंश्च ब्राह्मोपि। अन्नस्य जन्मकालुष्यं दुःपंक्तिं च न कुत्सयेदिति। जन्मकालुष्यं दुर्दर्शो
त्पन्नादि। दुष्पंक्तिर्दुष्पाकः॥ ॥नैकोऽमृष्टं॥२६॥ ॥एकोन्यरहितोऽन्यपंक्तौ च मिष्टान्नं॥ ॥नोद्धृतस्नेहं॥२७
॥ ॥उद्धृतः स्नेहो नवनीतं यस्मात्तन्नाद्यात्। उद्धृततैलं तिलकल्कं च। गौतमः। उद्धृतस्नेह विलयन पिण्याक
मथितप्रभृतीनि चात्तवीर्याणि नाश्नीयादिति। उद्धृतस्नेहस्यैवायं प्रपंचः। विलयनं नवनीतमलं। मथि
तं निर्जलं तक्रं। प्रभृतिशब्देनोपात्तशरस्के दधिपयसी॥ ॥न दिवा धानाः॥२८॥ ॥दिवसे भृष्टयवान्नाद्या
त्। दिवाग्रहणाद्रात्रावनिषेधः। दिवा धाना उपवसति रात्रौ च दधिसक्तून्। अलक्ष्मीः कोविदारेषु कपित्थेषु सदै
व हीति ब्राह्मात्॥ ॥न रात्रौ तिलसंबद्धं॥२९॥ ॥तिलैः संबद्धो यस्य तद्रात्रौ न। रात्रिग्रहणाद्दिवाऽनिषेधः॥
तिलसंबद्धनिषेधात्तिलनिषेधो सिद्ध एव॥ ॥न दधिसक्तूंश्च॥३०॥ ॥रात्रौ दधिसक्तूंश्च नाद्यात्। सक्तयो
भृष्टपिष्टानि। आयुष्कामो न कुर्वीत रात्रौ च दधिभोजनं। धानादधि च सक्तूंश्च श्रीकामो वर्जयेन्निशि।

भोजनं तिलसंबद्धं स्नानं चैव विवस्वत इति पृथ्वीचंद्रे वाक्यावसाहित्यविवक्षा। मधुनोऽप्यत्रोपलक्षणं। अ
पि उत्थानसमये राज्ञो न श्राद्धे न्मधु। मधुपर्कप्रदानं तु वर्जयित्वा तु कामत इति ब्राह्मात्। अत्रैव वाक्ये
देवीत्रिपिपाठः पुराणांतरे॥ ॥नकोविदारवटपिप्पलशणशाकं॥२१॥ ॥कोविदारः कांचनारः। शेषं प्र
सिद्धं। एषां कलिकाफलपत्राणां शाकेन। एतेन कुसुमादीन्युपलक्षणं। कुसुमादीन्युपलक्ष्यंते। कुसु
मं नालिकाशाकं हेतौ कपोतिकान्यथेत्तुस्मरणात्॥ ॥नादत्तां॥२२॥ ॥यद्धेव द्विजादिभ्यो न दद्यात् तन्न भु
मं दापयेत्॥ ॥नाक्तत्॥२३॥ ॥वस्त्रं ईक्ष्यन्न ह्यते। तन्ना द्यात्। यस्या भोजनं क्रियते यस्य वा ग्रंथं न दीयते तेन मज्ञो
कत्वभिप्याप्तं दीयात्॥ ॥नानार्द्रपादः॥२४॥ ॥नआर्द्रौ पादौ यस्य सो नथा॥ ॥नानार्द्रकरमुखः॥
॥२५॥ करौ च मुखं च तयोः समाहारः करमुखं न आर्द्रं तद्यस्य सो तथा। प्राङ्मुखो ह्यन्नानि भुंजीत पंचार्द्रो
वाग्यतः स्थिरितियास्मात्। चकारादर्द्रहृदयश्च। तेन हृदयं गमादिना सम्मनं गम्यते। सुप्रक्षालितपाणिपा
दोपस्थश्चाचम्य शुचौ संवृते देशे न्नमुपहृतोपसंगृह्य कामक्रोधलोभमोहानपहृत्य सर्वाभिरंगुलीभिः शब्द

ङ्मुखः कुर्वन्प्राश्नीयादितिदेवलस्मरणात्॥ ॥नोच्छिष्टस्य घृतमादद्यात्॥३६॥ ॥आपोशनानंतरं याव
त्समाप्ति पूर्वगृहीतं घृतं न गृह्णीयात्। तेन भोजनारंभात्प्रागेव घृतग्रहणं सिद्धं न तु भुंजीत घृतं नित्यं गृह
स्याभोजनेस्त्वयमितिदेवलेनाघृतभोजननिषेधात् ग्रहणावश्यत्वे गोपि निषिद्धो वद्यते। हस्तदत्तस्या
पि निषेधः पराशरेण। माक्षिकं फाणितं शाकं गोरसं लवणं घृतं। हस्तदत्तानि भुक्त्वा तु दिनमेकमभोजनमिति
॥ ॥नस्वंडार्कतारका निरीक्षेत॥३७॥ ॥उच्छिष्टश्चंद्रादीन्न पश्येत्। राहुं च नाशुचौ राहुतारकाइतियो
गिस्मरणात्। निर्बुद्धिपूर्वकतां गमयति॥ ॥न मूर्द्धानं स्पृशेत्॥३८॥ ॥उच्छिष्टो मस्तकं न स्पृशेत्। शि
रः पादोपलक्षणं। न स्पृशेद्वामहस्तेन भुंजानोन्नं कदाचन। न पादौ न शिरो वस्तिं न पदा भाजनं स्पृशेदि
ति बार्हस्पत्यात्। स्पर्शनं वेष्टनोपलक्षणं। यद्भुंक्ते वेष्टितशिराः सर्वं विद्यात्तदासुरमिति स्मरणात्॥ ॥
न ब्रह्म कीर्तयेत्॥३९॥ ॥उच्छिष्टो वेदं नोच्चारयेत्। उपलक्षणमिदं नाशुचिर्देवपितृनामानि कीर्तयेदि
ति जोतमीयात्॥ ॥प्राङ्मुखोश्नीयात्॥४०॥ ॥पूर्वाभिमुखो भुंजीत नियमविधिरयं नित्यः॥ ॥

दृशिमागमुखोवा ॥४१॥ ॥अयमपि नित्यविधिर्न वा शक्त्या काम्योपि। आयुष्यं प्राङ्मुखो भुंक्ते ऋ-
तं भुंक्ते ह्युदङ्मुख इति च। तत्र दक्षिणामुखता निषेधो जीवन्मातृकविषयः॥ ॥अभिघार्याद्यात्॥४२॥
॥ ॥भोजनार्थमुपकल्पितमन्नं सघृतं व्याहृतिगायत्र्याभ्युक्ष्य सत्यं त्वर्तेन परिषिंचामीति परिषिच्यामृ-
तोपस्तरणमसीत्यापः प्राश्य प्राणादिपंचाहुतीर्हुत्वा वाग्यतोन्नमकुत्सयन्सशेषं भुक्त्वाऽमृतापिधानम-
सीत्यापः पीत्वा च मनःशेषं दक्षिणतो भुक्तशेषेणाभिनयेत्। अत्र पूर्वग्रहणाद्यादावनियमः। भक्ष्यापूपकंद-
मूलफलमांसेष्वेकशतिरावेनत्साम्॥ ॥सुमनाः स्रगनुलिप्तश्च॥४३॥ ॥प्रसन्नचेताः पुष्पमाला-
नुलेपनादिभूषितो भुंजीत। तथा न शयानो नोपविष्टो मंडलस्योपरि पात्रं स्थाप्यादि। शुचिः पीठमधिष्ठित-
इति देवलीयात्। चतुरस्रं त्रिकोणं च वर्तुलं चार्धचंद्रकं। कर्तव्यमानुपूर्व्येण ब्राह्मणादिषु मंडलमि-
ति ब्राह्मोक्तात्॥ ॥ननिःशेषकृत्स्यात्॥४४॥ ॥परिविष्टमन्नं निःशेषं न खादेत्। सर्वत्र शेषमश्नीयादिति स्म-
रणात्। अस्यापवादमाह॥ ॥अन्यत्र दधिमधुसर्पिःपयस्सक्तुपललमोदकेभ्यः॥४५॥ ॥सर्पिर्वर्जितं

पलंमांसंमोदका लड्डुकाः शेषंप्रसिद्धं। जलाद्युपलक्षणमेतत्। पाणीयंपायसंसर्पिर्मधुसक्तुदधीन्यपि।
निरस्यशेषमेतेषांनप्रदेयंतुकस्यचिदिति भारतात्। निरस्यपनितरामशनीयं॥ ॥नाश्नीयाद्भार्ययासार्द्धं
नाकाशेनतथोत्थितः। बहूनां वेष्टमानानां नैकस्मिन्बहवस्तथा॥४६॥ ॥भार्याऽसवर्णा तया
सहनाश्नीयात्सवर्णयासहाभ्यनुज्ञानात्। ब्राह्मण्यासहवाश्नीयादुच्छिष्टंवाऽऽदीचन। नतस्यदो
षमन्यंते नित्यमेवमनीषिणः। उच्छिष्टमितरस्त्रीणांयोश्नीयाद्ब्राह्मणः क्वचित्। प्रायश्चित्ती सविज्ञेयः
संकीर्णोमूढचेतन इत्यांगिरसात्। सवर्णयापि सहविवाहमार्गयोरेवोब्राह्मण्या भार्ययासार्द्धंक
चिद्भुंजीत वा वनि। अत्र सवर्णस्त्रियासार्द्धंभुक्त्वापततितन्ब्राह्मणादिति वाह्मात्॥ ॥कचिद्विवाहे। भा
र्येत्युपलक्षणं। मातावा भगिनीवापि भार्यावान्यास्त्वयोषितः। नताभिः सहभोक्तव्यंभुक्त्वाचांद्रायं
णं चरेत्। योभुंक्तेत्वनुपनीतेनयोभुंक्ते चस्त्रियासह। योभुंक्तेकन्ययासार्द्धंभुक्त्वा सांतपनंचरेदितिवा
सस्मरणात्। सार्द्धमितिदर्शनोपलक्षणंवक्ष्यति। नाकाशे आकाशेमनाच्छन्नप्रदेशे नतिष्ठन्वा।

नत्रभोजनानुद्धृतनावाश्वलायनः। श्राद्धेः प्रेषितश्चेच्छ्राद्धांतरे चेज्जयन्मनूनिति। आपस्तंबोपि न
जाविभुंजीत तथाश्रमाद इति। न तथोत्थितः। उभ्यनक्तिष्ठन्नातथा शत्रुार्थः स्मृत्यंतरे। नाहारमुप
भुंजीत तिष्ठन्न गच्छन्न हसन्नपीति। वहुनामिति। वटुश्रुसाभिलाषप्रेक्षमाणेषु नाश्नीयात्। श्मशा
नाद्युपलक्षणमेतत्। हस्त्यश्वरथयानेषु प्रासादस्थो न भोजयेत्। श्मशानांतःस्थितो वापि देवा
लयगतोपि वेति ब्राह्मात्। अंजलिः संहतोपाणी ते जलं न पिवेत्। तोयं पेयमाचोपलक्षणं। पेयं नां
जलिना पिवेदिति शंखस्मरणात्। अतिशयेन सौहित्यं तृप्तिं न कुर्यादजीर्णहेतुत्वात्॥ ॥न
तृतीयमथाश्नीत नत्वापथ्यं कथंचनेनातिप्रगे नातिसायं नसायं प्रातराशितः॥८८॥ ॥सायंप्रातस्ति
न्नमभिपूजितमश्नन्निदं भुंजीत गौतमोक्तकालद्वयातिरिक्ते तृतीयकाले नाश्नीयात्। अथशब्दो
निषेधातिरिक्तकाम्यविधागमयति। अनराप्रातरासावशनायमाशंतथेवच। सदोपवासी भवति
यो नाश्नीते कदाचनेवोधायनीयेसदोपवासफलश्रवणात्। अपथ्यं वातादुष्ट्योदकमन्नं कथं

वनतद्रसलोलुपतया॥पि॥ अतिप्रगे अनुदितेऽर्के अतिसायं न शास्तमयसमीपे शनाश्नीयात्। अथ गि
धे वेनन संध्ययोरित्यत्रोदयास्तमयात्काल नीसंध्यावदिकान्यभिष्यते। सायंसंध्या त्रिकटिको अस्तादुपरि भास्वत
इति कालांतरं विषयीकृतं। द्वितीयभोजनापवादमाह। प्रातराशितः प्रातर्भोजने नैवातितृप्तः सायंनाश्नी
॥ ॥नावदुष्टमन्नमद्यान्न भांडे नावदुष्टेशयानः प्रौढपादश्च कृत्वा चैवावचसे स्थिको॥८९॥ ॥यस्मि
न्नदृष्टे विचिकित्सा भवति तन्नावदुष्टं। तच्च जातिदुष्टादेरुपलक्षणं। जातिदुष्टं क्रियादुष्टं कालाश्रयवि
दूषितं। संसर्गाश्रयं दुष्टं च सहृल्लेखं तथैव च। इति विष्णुस्मरणात्। तल्लक्षणान्यपि तत्रैव। लशुनं गृंजनं चैव पलां
डुकवकानि च। वृंताकनालिकालाबुश्च पेया जातिदूषितं। द्विशब्दोऽन्यभिन्यादि श्रीरादि न नश्यते क्रि
याडुष्टं यदृष्टं पतितैः पृथक्कृदृष्टं स्पृष्टं वा तुनः पाकहस्तदानादि क्रियावाडुष्टं। कालदुष्टं तु विज्ञेयं ह्यस्त
नं पर्युषितं। पक्कमोदनादि चिरसंस्थितं। हृत्य हृत्यं न पर्युषितं। सुरालशुनसंस्पृष्टं पायूषादिसमन्वितं सं
सर्गदुष्टमेतद्धि शूद्रोच्छिष्टवदाचरेत्। अभोज्यान्नं द्विजानीयादन्नमाश्रयगर्हितं। अभोज्योः कदर्यवद्धा

द्यः॥ चिकित्सा तु हृद्रोगेऽन्नं यस्मिन्न जायते स हृद्रोगः एवं विज्ञेयं पीयूषं तु स्तन्यं पीयूषं तु स्तना वे तु रति। रुग्णमेव भावदुष्टं स्वभावदुष्टं पीयूषादि। एवं सप्तविधमभोज्यं भावे न चित्तं दत्ताद् इत्यत्र छोदि भांड स ह शेभांडे दुर्ग्रहणाद् भोजनदुष्टे वा न भिन्नावेकी र्ण इति हारीतात्। शयानो गमनावपि तिर्यग्भूतः शनैर्गतस्य प्रागेव निषेधात्। प्रौढपादः आसना रूढपादः अवसक्थिका आसनवंधस्तेनाश्नीयादिति प्रत्येकं संबंधः। चक रात् प्रसारितपादोऽपि। न प्रसारितपादोऽपि पादारोपितपाणिमानिति ज्ञाहसात्॥ ॥ इति श्री विज्ञानेश्वरभट्टविरचितायां मितायां वैजयंत्यां मष्टषष्ठितमोऽध्यायः॥ ॥ एवं दिनकर्तव्यमुक्त्वा रात्रिकृत्ये स्त्रीसंगमे निषेधविषयमेकोनसप्ततितमेनाह॥ ॥ नाष्टमीं चतुर्दशीं पंचदशीं तु स्त्रियमुपेयात्॥१॥ ॥ स्नातानुपेयात्सर्वत्रवाप्रतिषिद्धवर्जमिति गौतमोक्त्या न तावच्छतो वायदा स्त्रियं गच्छेत्तदाष्टमीचतुर्दशीपौर्णमास्यमावास्या वर्जयेत्। अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीं। ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विज इति मानवा त्तत्रापि शब्दाद् ऋतौ। स्नातको गृहस्थः स्नातकधर्माणां गृहस्थसाधारणत्वा। उपलक्षणमिदं संक्रांत्यादेरपि। अष्ट

म्यां चतुर्दश्यां पंचदश्यां त्रिजन्मसु। चतुर्थ्यां तेदसंक्रान्त्यां देवपितृनोपेयात् ज्ञातुयोषितमित्याश्वलायनस्मरणात्

॥ ॥नश्राद्धं भुक्त्वा॥३॥ ॥श्राद्धभोजनानंतरं॥ ॥नदत्वा॥३॥ ॥श्राद्धं कारणानंतरं। नोपनिमंत्रितःश्राद्धे॥४॥ ॥

श्राद्धनिमंत्रणस्वीकारानंतरं। अपराह्णेनश्वेद्युक्तनमेव निमंत्रणं गृह्यते नकालांतरेयं निमंत्रयीत पूर्वेद्युर्वा ब्राह्मणान्नात्म

वान्यत्सु विशितिस्मरणात्॥ ॥नव्रती॥५॥ ॥व्रतंश्राद्धदिनात्पूर्वेद्युस्तनमेकादश्यादिकं चेतद्वान्। श्राद्धं कथि

श्व ब्रक त्वावा भुक्त्वापिनिमंत्रितः। उपोष्य चाप्यथा भुक्त्वा नोपेयाद्धृतावपीत्याश्वलायनस्मरणात्। उपो

ष्येकादश्याद्युपवासनियमं कृत्वा भुक्त्वा पारणायां॥ ॥नदीक्षितः॥६॥ ॥अवभृथेष्टिं यावद्दीक्षासंस्का

रवान्॥ ॥नदेवायतनश्मशानशून्यालयेषु॥७॥ ॥देवगृहपितृवनोजरगृहेषु॥ नवृक्षमूलेषु॥८॥ ॥

विशेषाविवक्षया हस्तमात्रमूलेवृक्षवचनात् क्षलमलतादिग्रहणं॥ ॥नदिवा॥९॥ ॥दिवासूर्योपलक्षि

तेकाले॥ ॥नसंध्ययोः॥१०॥ ॥उत्कूलक्षणयोः सायंप्रातःसंध्ययोः॥ ॥नमलिनां॥११॥ ॥म

लिनां गवस्त्रां। नमलिनवाससा सह संवसेदिति वासिष्ठात्। रजस्वलोपलक्षणमिदं। नरजस्वलयं

निःस्मरणात्॥ ॥न मलिनः॥१२॥ ॥अपरिस्कृतानां वस्त्रः॥ ॥नाभ्यक्तां॥१३॥ ॥तैलाद्यभ्यङ्ग्यास्नातां
॥ ॥नाभ्यक्तः॥१४॥ ॥तैलादिभिरभ्यक्तो स्नातः॥ ॥न रोगार्त्तां॥१५॥ ॥रोगेण ज्वरादिना दुःखितां न
कल्पां नारीमभिरमयेदिति गौतमीयात्॥ अकल्पा अस्वस्था। न रोगार्त्तः॥१६॥ ॥ज्वराद्यभिभूतः
आतुरत्वा नोढया भार्यया स्वस्थः सन्नोपगच्छेदिति स्वस्थो वोपदेशात्॥ ॥न हीनांगीं नाधिकांगीं तथैव च
वयोधिकां नोपेयाद्दुर्भगां नारीं दीर्घमायुर्जिजीविषुः॥१७॥ ॥जन्मत एव हीनमंगं हस्तपादांगुल्यादि यस्याः
स्यास्तां। स्वापेक्षया वयसाधिकां वृद्धां वापगतरजस्कां वा दुर्भगां गर्भवतीं च दीर्घविशुष्कां मो नोपेयादन्त
प्रत्यागतां इति। पतितां च परित्यक्तामभिशस्तां च रोगिणीं। ह्युदासां मां नाभिभुक्तां वा अन्यस्य ये वैतैर्गुणैर्युतद्
ति। गर्भिणीसंगमननिषेधः सिद्धोऽपि नर्वचनमतिक्रान्तनिषेधस्योद्वाहेपि विवाहानंतरमपि वाहीनांगपाद्यभ्यर्थितं
स्या गमननिषेधार्थं यथाश्वलायनः। पत्नीमप्यृतौ नेयादियाद्वाभ्युहितस्त्वर्थं ति। गमनकालमप्याह स एव
पत्नीमृतुमतीं स्नातां त्वस्मात्रेस्मादिवर्जितां। उपेयान्मध्यरात्रे तेजोर्णी [illegible] स्नेमानसइति॥ ॥इतिश्री

नं०१

विष्णुस्मृतिविवृतौ श्रीमत्यां वैजयंत्यामेकोनसप्ततितमोऽध्यायः॥ ॥शयनेनिषे
धविषयं सप्ततितमेनाह॥ ॥नार्द्रपादः सुप्यात्॥१॥ ॥सुप्रक्षालितचरणः स्वाचांतः सुप्यादिति हारीतोक्तचरणक्षाल
नोत्तरमार्द्रत्वप्राप्तावनार्द्रपादतोच्यते। नार्द्रवासा न चास्तु विरितिमार्कंडेयः। न तैलेनाभ्यक्तशिरा न त्वस्नुशानः स्वपे
दिति शेषः॥ ॥नोत्तरापरशिराः॥२॥ अपरा पश्चिमा। न तिर्यगुदक्प्रत्यक्शिरा इति हारीतात्। तिर्यक्कोणः आ
ग्नेयदक्षिणयोरभ्यनुज्ञानमनेन। प्राग्दक्षिणशिराः सुप्यान्नोदक्प्रत्यक्शिराः कचिदिति स्मरणात्। तत्स्वगृहे वस्था
स्वगृहे प्राक्शिराः सुप्याच्छ्वशुरे दक्षिणाशिराः प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शिरा इति गार्ग्योक्तेः
॥ ॥न नग्नः॥३॥ ॥नग्नः परिधानहीनः। नग्नस्य स्वापनिषेधात्स्वापानंतरनिद्रयाने सत्तायां न दोषः। आ
श्वलायनः। उत्तानवदानशयेन्नाधोवक्त्रश्चक हिंचिदिति॥ ॥नानुवंशा॥४॥ ॥वंशो मेढ्रीत इत्यमरः॥ ॥
॥ ॥नाकाशे॥५॥ ॥आकाशोऽनाच्छन्नो देशः॥ ॥न पालाशे शयने॥६॥ ॥पलाशाज्जातं तत्। च्यवनः
स्मृतं दंतमयं च विष्णुहृग्वेदभेपलाशजे। न शयीतेति। अस्तृतस्यदं तिनोदंते नहतेन। अनेन च दंतमयी शय्या भवति

वृ·टी७०
१११

श्चेदनास्त्रमितियाख्यातं॥ ॥नपंचदारुकृते॥७॥ ॥पंचभिर्दारुभिःकृतएकस्मिन्नशयने॥ अन्येतुपंचदारु
भिरोक्ता निंबजंबुकदंबमास्तथा॥ अश्मपीठाश्रितंश्लेषवटसिक्तातरुस्तथा॥ करिभग्नकृतेचैवनशयीततद्
विभिन्नइति भिक्षुपुराणोक्तान्याहुः॥ वक्ष्यमाणान्येवपंचदारूणीत्यपरे॥ ॥नगजभग्नकृते॥८॥ ॥गजे
नभग्नस्यातरोःकाष्ठेनकृते॥ ॥नविद्युद्दग्धकृते॥९॥ ॥विद्युताद्दग्धस्यतरोःकाष्ठेनकृते॥ ॥नभिन्ने॥१०॥
भिन्नेशीर्णेवयवेनशीर्णेखट्वायामित्यपिपठीनसीयात्॥ ॥नाग्निप्लुष्टे॥११॥ ॥विद्युद्भिन्नेनाप्यग्निनादग्धे॥
॥ ॥नवटाश्वत्थकद्रुमजे॥१२॥ ॥वटैराश्वत्थैरस्यतरोःकाष्ठेनकृते॥ ॥नश्मशानशून्यालयदेवायतने
षु॥१३॥ ॥पितृवनशून्यगृहदेवगृहेषु॥ मार्कंडेयः॥ शून्यालयेश्मशानेचैनैकवृक्षेचतुष्पथे॥ महादेवगृहेवापि
मातृवेश्मनिनस्वपेत्॥ नयक्षनागायतनेस्कंदस्यायतनेतथेति॥ ॥नचपलमध्ये॥१४॥ ॥चपलोद्युर्व्यसनी
हस्तपादादिविट्ठेप्रावा॥ ॥ननारीमध्ये॥१५॥ ॥नार्यःस्त्रियः॥ मात्रास्वस्रादुहित्रावानैकशय्यासनोभवेत्
बलवानिंद्रियग्रामोविद्वांसमपिकर्षतीतिमानवात्॥ ॥नधान्यगोगुरुहुताशनसुराणामुपरि॥१६॥

१११

धान्यं व्रीह्यादि गवादि शकृत्ते न तु छालाउच्चं तेषां न्यवत्सादानृतु परिशयनासंभवात्तासामुपरि। मार्कण्डेयः। हलकृष्टायां च तथा शर्करालोष्ठपांशुषु। धान्यगोदेवविप्राणां गुरूणां च तथोपरीति। यद्वा धान्यादीनुपादप्रदेशे कृत्वा न शयीत तदुपरि शय्यार्थः॥ ॥नोच्छिष्टो न दिवा सुप्यात्संध्ययोर्न च भस्मनि। देशे न चाशुचौ नार्द्रे न च पर्वतमस्तके॥१७॥ ॥उच्छिष्टः वा धरोच्छिष्टवान् दिवसे संध्ययोः कालक्षणयोः। भस्मनि रक्षोदो। केश भस्मतुषांगारकपालेषु च संस्थितयोगिस्मरणात्। अशुचौ मूत्रविष्ठाद्युपहतदेशे। आर्द्रे जलज्ञाये। पर्वतस्य मस्तके शिरोभागे। चकारान्नान्यपूर्वेशयनेन प्रमपीठे पवाने नादीक्षितः हलवर्माणि सुप्यान्निति पेठानसायं ज्ञेयं॥ ॥शुभम्॥

विष्णुस्मृतिविवृतौ श्रीमत्यां वैजयंत्यां सप्ततितमोध्यायः॥ ॥एवं गृहस्थधर्मानुक्त्वेदानीं स्नातकधर्मानेकसप्ततितमेनाह॥ ॥अथ न कंचनावमन्येत॥१॥ स्नातकधर्माणामपि केषांचिद्गृहस्थसाधारण्यमानेतच्चैतेनास्पष्टयितुमयं श्लोकः। ते च द्विजानामेव न शूद्रस्य मानवे चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः तु पक्रम। स्नातको द्विजः। व्रतानीमानि धारयेदित्युपसंहारात्। ब्राह्मणक्षत्रियोरेव त्यके। स वि

धिपर्वेस्नान्वेतिगोतमीयेनछद्देनतयोरेवपक्रमशौत।तयोरेवतत्त्वोशायश्चित्तं।स्नातकव्रतलोपेतुप्रायश्चित्तंविधी
यते।राजब्राह्मणयोरेवमेतरेषांकथमेनीतिस्मरणात।ब्राह्मणस्यैवतान्येमानवेविप्रोजीवेदनापदीतुपक्रमा
त।मनुरेनसमस्तुब्राह्मणप्रकृष्टपानावज्ञानीयात्।।नाधमितिषेधस्त्रस्नातकव्रतमितिश्रुतोऽन्तरेणक्रमान्तिंतुपर्युदास
स्तुस्त्रस्थाभिन्नकरणोस्तवैश्यपिनन्मूत्रचुन्तेशुवाकेषुतेतुदकरणासंकल्पालक्षणीयास्तेचोभयसाधारणाःगृ
हस्थस्यैवान्तधर्मान्तकेपांस्नातकस्येतिगोतमीयात्॥ ॥नर्पेहीनाधिकांगान्मूर्खान्वृद्धनहीनानवहसेत॥१॥
॥ ।।हीनांगाःकाणादयोधिकांगाःषडंगुल्यादयोमूर्खावेदशास्त्राद्यनभिज्ञावृद्धहीनाहरिद्रास्तकोराद्युपहे
नादीस्नानावहसेत।अवहासोवक्षेपःहीनांगानतिरिक्तांगान्विद्याहीनान्वयोधिकान्।रूपद्रविणहीनां
श्चजातिहीनांश्चनाक्षिपेदितिमानवात्॥ ॥नहीनानवहसेत॥२॥ ॥हीनाःस्तापेक्षयाहीनजातयस्तानवहसे
वेत्–वेतनग्रहणेनतदाज्ञाकरणंसेवा।वर्णानामानुलोम्येनदास्यंनप्रातिलोम्यतइतियोगिस्मरणात्॥ ॥स्वा
ध्यायविरोधिकर्मनाचरेत्॥३॥ ॥स्वाध्यायोवेदाध्ययनाध्यापनक्रियातद्विरोधिक्रियातद्विरोधिकर्षि

लोकयात्राद्यर्थसाधनमपिकर्मनाचरेत्। सर्वान्परित्यजेदर्थान्स्वाध्यायस्यविरोधिनः। यथातथाध्या
पयंस्तुसाह्यस्यकृतकृत्यतेतिमानवात्॥ ॥वयोनुरूपंवेशंकुर्यात्॥५॥ ॥वयसोबाल्यवार्द्धकादेरनुरूपोयो
वेशउष्णीषादिस्तंकुर्यात्। एतेनबालस्यवृद्धवेशोवृद्धस्यबालवेशोनभवति॥ ॥श्रुतस्याभिजनस्यधनस्यदेश
स्यच॥६॥ ॥श्रुतंविद्याअभिजनःकुलंधनंसुवर्णादिदेशोजनपदः। चकाराद्बुद्ध्यादि। एषामनुरूपंवेश
माचरेत्। वेशवाग्बुद्धिसारूप्यमाचरन्विचरेदिहेतिमानवात्। वयोबुद्ध्यर्थवाग्वेषश्रुताभिजनकर्मणां। आच
रेत्सदृशींवृत्तिमजिह्मामशठांतथेतियोगिस्मरणात्। वृत्तिराचरणं॥ ॥नोद्धतः॥७॥ ॥उद्धतोनिर्मर्या
दोनस्यात्॥ ॥नित्यंशास्त्राण्यवेक्षेतनिगमांश्चैववैदिकानिति॥ ॥सतिविभवेनजीर्णमलवद्वासाः
स्यात्॥९॥ ॥विभवेधनेसतिविशीर्णंमलिनंचवस्त्रंनधारयेत्। विभवविशेषणाद्दारिद्र्येनदोषः
॥ ॥नन्नास्तीत्यभिभाषेत॥१०॥ ॥गृहेन्नधनाद्यभावेपिनास्तिशब्दंनोच्चारयेत्। किंतुश्वइतिब्रूयात्॥ ॥
ननिर्गन्धोग्रगंधिरक्तंचमाल्यंबिभृयात्॥११॥ ननिर्गंधंकिंशुकादि। उग्रगंधिधत्तूरादि। रक्तंकरवी

एदि । चकारात्कंटकिजं च माल्यं न धारयेत् । न कंटकिजन्माकृतिषेधात् । माल्योपादानात्सुवर्णस्रगाद्यनि
षेधः । नागंधां स्रजं धारयेदन्यत्र हिरण्यस्रज इति गोभिलीयात् । अस्य व्रतिधर्मत्वमाह । ॥ बिभृयाज्जलजं रत्न
मपि ॥ १३ ॥ ॥ रक्तोत्पलं तु धारयेत् ॥ ॥ यष्टिं च वैणवीं ॥ १३ ॥ वैणवीं वंशनिर्मितां यष्टिं मा धारयेत् । गण्पा । चकाराद
न्तर्वासस्त्व ॥ ॥ कमंडलुं च सोदकं ॥ १४ ॥ ॥ कमंडलुर्मृन्मयः करकस्तं चोदकपूर्णं । अथ कमंडलुचर्यामुप
दिशंतीत्यादि बौधायनीयात् । चकारादुत्तरीयं च ॥ ॥ कार्पासमुपवीतं ॥ १५ ॥ ॥ ब्रह्मचर्य एवोपवीतसिद्धेः पुन
र्वचनं द्वितीयप्राप्त्यर्थं । यथाह वसिष्ठः । स्नातकानां द्वितीयं स्यादंतर्वासस्तथोत्तरीय । यज्ञोपवीते द्वे यष्टिः सोद
कश्च कमंडलुरिति । अंतःकलत्रं या परीधेयोमर्धे वस्त्रं तदंतर्वासस्तथा न्युडुत्तरमुत्तरीयं प्रावारः । अथ स्ना
तकः सांतर्वासाः सोत्तरीयं वैणवं दंडं धारयन्निति बौधायनी । अतः एवं च वस्त्रत्रयधारणं नित्यं भवति । एतो विके
वलं वेकस्त्रं वा । तज्जीवत्पितृकस्यैतु पाङ्के सोत्तरीयं तज्जन्योत्तरीयधारणं न जीवत्पितृकः कुर्याज्ज्येष्ठो भ्रात
र्यथापि वेत्तुत्तरीयमेव निषिद्धं नांतर्वासः । कार्पासवल्कं शाणं क्षौमं वा निबद्धं यातेनोपनायनिकयोः श्रा

एणविकयोर्थवत्त्वान्नानमेवधारणं सिध्यति नोपरिष्टात् स्नातकस्य कार्पासनियमात्मातनोश्चतत्तद्दंडादिधारणं नि
यममाह। न वब्राह्मणमात्राभिप्रायं कार्पासवचनं। उपनयनप्रकरणोक्तकार्पासवचने न पौनरुक्त्यापत्तेः।
तस्माद्यथोक्तमेव स्नातुरुपवीतमुपवीतमुपलक्षणाय यज्ञोपवीतं तुलसीपमजिनमुत्तरीयमुपानहौ छत्रं चेतिवो
ध्यायनीयात्। अजिनमुत्तरीयवस्त्राभावे॥ ॥रौक्मे च कुंडले॥२६॥ ॥रौक्मे स्तौवर्णे चकारादेतदंचा। यज्ञोपवी
तं वेदं च शुभे रौक्मे च कुंडले इति मानवात्। वेदो दर्भमुष्टिः। बिभृयादिति सर्वत्रानुवर्त्तते॥ ॥नादित्यमुद्यंतमी
क्षेत॥२७॥ ॥उद्यंतमर्कं न पश्येदादित्यग्रहणं चंद्राद्युपनिषेधः॥ ॥नास्तं यांतं॥२८॥ ॥अस्तमये प्यादि
त्यं नेक्षेतेति सर्वत्र संबंधः॥ ॥न वाससा तिरोहितं॥२९॥ ॥वस्त्रांतरितमपि॥ ॥न चादर्शजलमध्यगतं॥३०॥
जलादर्शयोः प्रतिबिंबितं चकाराद्दुपरक्तमपि। नोपरक्तं न वारिस्थमिति मानवात्॥ ॥न मध्यान्हे॥३१॥ ॥म
ध्यान्हः कुतपः॥ ॥नक्तं [illegible]॥३२॥ ॥कुन्दः क्रोधात् गुरुः श्रेयान् नश्रेयसः कुत्स्येति घाचेत् स
॥ ॥नतैः लोदकयोः स्वां छायां॥३३॥ ॥तैलेयले च स्वप्रतिबिंबं वेक्षेत पीतेले जले स्वं मुखं वा नेक्षेत न लपनेक्षु

वीति। तैलग्रहणाद्धृतस्यानिषेधः स्वमात्मानं ह्येतेपरपेद्व्यदीक्षेच्चिरंजीवितमितिब्राह्मणात्॥ ॥नमलवत्या
दर्शी॥२४॥ ॥मलाक्रांतेदर्पणे॥ ॥नपत्नींभोजनसमये॥२५॥ ॥स्वस्यपत्न्यावाभोजनकालेपत्नींनपश्ये
त्। नभार्यादर्शनेऽश्नीयादितियोगिस्मरणात्। नाश्नीयाद्भार्ययासार्द्धंनैनामीक्षेतचाश्नतीं। क्षुवतींजृंभमा
णांचनचासीनांयथासुखं। अंजयंतींस्वकेनेत्रेनचाभ्यक्तामनावृतां। प्रसवंतींचनेक्षेततेजस्कामोद्विजो
त्तमइतिमानवाच्च॥ ॥नस्त्रियंनग्नां॥२६॥ ॥स्वीयांपरकीयांवानग्नांस्त्रियं। स्त्रीग्रहणंपत्नीव्यावृत्त्याज
तिमात्रप्राप्त्यर्थं मैथुनंविना। ननग्नांस्त्रियमीक्षेतान्यत्रमैथुनादित्याश्वलायनीयात्। कृतमैथुनाम
नग्नामपिनचसंसृष्टमैथुनामितिस्मरणात्। नमूत्रदर्शनेचप्रातः। पापिष्ठंदुर्भगांमद्यंनग्नमुत्कृत्तना
सिकं। प्रातरुत्थाययःपश्येत्तत्कलेरुपलक्षणमितिकात्यायनीयात्॥ ॥नकंपनमेहमानं॥२७॥ ॥मू
त्रपुरीषेकुर्वाणंयंकं। मूत्रपुरीषेवा। नवमूत्रेपुरीषेवेतिस्मरणात्॥ ॥नचानग्नंकुंजरं॥२८॥ ॥वंजनंसुत
गजं। चक्राराद्यावादौ श्वानं व्याघ्रंनगजंनाश्वंनवृषभंमहिषंतथा। वंवनंप्रतिसुक्तनदींशिशुंपुरतोव्र

जेदिति ब्राह्मात्॥ ॥न च विषमस्योद्दष्पादित्युद्ध॥२९॥ ॥विषमे जनसंमर्द्दादौ पलायनायोगे देशे स्थितो द्वि
षगजमहिषादिर्युद्धं वकाराद्दुरशक्यादिपातं र॥ ॥नोन्मत्तं॥३०॥ ॥उन्मत्तो वातादियस्तः॥ ॥न मत्त॥३१॥
॥ ॥मत्तो मद्यादिना॥ ॥नामेध्यमग्नौ प्रक्षिपेत्॥३२॥ ॥अमेध्यं ष्ठीवनाद्यग्नौ ज्ञानपूर्वं न क्षिपेत्। अमेध्यमि
षेवान्नक्षिप्यते। अमेध्यलिप्तमन्यद्वेति मानवात्॥ ॥नासृक्॥३३॥ ॥असृक् रुधिरं अमेध्यात्पृथग्वचनमेध्य
स्याछागादिरुधिरस्य निषेधार्थं॥ ॥३४॥ ॥विषं वत्सनाभादि नाग्नौ प्रक्षिपेदिति प्रत्येकं संबंधः॥ ॥
॥ ॥नाप्स्वपि॥३५॥ ॥अमेध्यादिकमप्स्वपि न प्रक्षिपेत्। यथाह योगीश्वरः। ष्ठीवनासृक्शकृन्मूत्ररेतां
स्यप्सु न प्रक्षिपेत्। शंखोऽपि। तुषकेशकरीषभस्मास्थिश्लेष्मनखलोमान्यप्सु न क्षिपेन्न पाणिना वा जलमभिहन्यादि
ति॥ ॥नाभिलंघयेत्॥३६॥ ॥लंघनमुपरि प्रसरणं देवादिछायामपि। देवतानां गुरो राज्ञः स्नातकाचार्ययोः स्त
था। नाक्रामेत्कामतश्छायां बभ्रुणो दीक्षितस्य चेति मानवात्। बभ्रुर्नकुलः। नपुंसकनिर्देशाज्ज्ञो ब्राह्मणयो
रपि कपिलयोः। न गोब्राह्मणयोः कपिलयोरिति स्मरणात्। छायालंघननिषेधात्तन्निषेधोऽर्थसिद्ध एव। तु खोप

वि॰टी॰७१

१२५

भ्रमनाद्यपिवर्ज्यानामिंसवेनोपधमेन्नचपादौप्रतापयेत्।आचक्तान्नोपदध्यान्नानिलंनयेत्।नचैनंपादतःकुर्यान्नमा।।
वायमारदेदितिमानवात्।। ।।नपादौप्रतापयेत्।।३७।। ।।आसावितिशेषः।प्रकर्षस्तुत्वातिशयःप्रचयशिष्टेयंस
ख्यानाबहेदिका।। ।।नकुशेषुपरिमृज्यात्।।३८।। ।।कुशैःकुशेषुवापादमलंनशोधयेत्।। ।।नकांस्यभाजने
धावयेत्।।३९।। ।।कांस्यपात्रेभोजनार्थेपादौनप्रक्षालयेत्स्वार्थेलिङ्गस्त्वनिषेधात्परयोजकत्तापिनिषिध्यते।। ।।न
पादपादेन।।४०।। ।।धावयेत्।। ।।नभुवमालिखेत्।।४१।। ।।काष्ठादिभिः।।-।।नलोष्टमर्दीस्यात्।।४२।। ।।क्रेण
मृत्पिंडमर्दनशीलोनस्यात्।। ।।नतृणछेदीस्यात्।।४३।। ।।नखदंतादिभिस्तृणछेदनशीलोनस्यात्।पुनः
स्याद्वचनंनिष्फलकर्मवर्जनार्थं।नकर्मनिष्फलंकुर्यान्नायत्यामसुखोदयमितिमानवात्।। ।।नदंतैर्नखलोमा
निछिंद्यात्।।४४।। ।।नखान्करपादजान्लोमानिश्मश्रुआदीनिदंतैर्नछिंद्यान्नोत्पाटयेच्चनछिंद्यान्नखलोमा
निदंतैर्नोत्पाटयेन्नखानितिमानवात्।तेनकर्तनमभ्यनुज्ञायते।लोमकेशनखश्मश्रुरितिमानवात्।नमुंडनं।न
समोहनामुंडेरन्नन्यत्रविहारादित्यापस्तंबीयात्।विहारोदर्शादिः।औपासनोदर्शपूर्णमासोपर्वसुचकेशश्म

११

सुलोमनखावापनमितिबौधायनीयात्॥ औपासनःश्माग्नौ भिमाणादर्शे शर्गमासोऽचकुर्वाणः औतामिमान
तावुभावपिपर्वसु केशादावापनं कुर्यात्तामिति॥ ॥द्यूतंवर्जयेत॥४५॥ ॥द्यूतंपणपूर्विकाक्रीडाप्राणिभिर
प्राणिभिर्वातांवर्जयेत्॥ ॥बालातपसेवांच॥४६॥ ॥बालातपःप्रातरातपःसंगप इत्यन्ये शरदातप इत्यन्ये
शरदातप इत्यपरे तत्सेवनंचवर्जयेत्। चकारात्तपधूमादिच। बालातपःप्रेतधूमोवर्ज्यंभिन्नंतथासनमितिमा
नवात्॥ ॥वस्त्रोपानहमाल्योपवीतान्यन्यधृतानिनधारयेत्॥४७॥ ॥वस्त्रादीन्यगुरोरन्येनधृतानिनधा
र्याणि। निर्णिज्याशक्तावितिगौतमीयात्॥ ॥नशूद्रायमतिंदद्यात्॥४८॥ ॥मतिंदृष्टादृष्टार्थेकर्मनीतिविष
यांशूद्रायनदद्यात्॥ ॥नोच्छिष्टहविषी॥४९॥ ॥उच्छिष्टंभुक्तावशिष्टंहविःपुरोडाशादिशेषः। नेहब्राह्म
णस्येतिश्रुतेः। तत्शूद्रायनदेयं शूद्रेदासव्यतिरिक्तः। उच्छिष्टमनुदासायेतिमानवात्। द्विजोच्छिष्टंचभोज
नमित्यत्रस्वमोच्य। अगृहस्थोवा। उच्छिष्टमन्नदानंशूद्रस्यगृहमेधिनो। गृहस्थायतुदातव्यमनुच्छिष्टंदि
नेदिनइत्याग्राद्वस्मरणात्॥ ॥नतिलान्॥५०॥ ॥तिलान्श्वेतान्कृष्णांश्चशूद्रायनदद्यात्॥ ॥नवासो

धि॰ २१७१
११६

परिशिष्टम्॥ ५१॥ ॥धर्मोपदेशश्च स्वस्य न कार्यः। चतुर्थं तु वक्ष्ये पुनः षष्ठ्युपादानं शूद्रस्य वारणा धर्मोपदे
शवर्जनार्थं कुर्वन्तदितस्यानुष्ठानं ब्राह्मणेन ब्राह्मणमन्तरा कृत्वोपदिष्टेनेति॥ ॥नवमं॥ ५२॥ ॥व्रतं प्राय
श्चित्तं साक्षाच्चोपदिशेच्छूद्राय किंतु ब्राह्मणमन्तरा कृत्वा। तथा स्मृत्यन्तरे समासाद्य सदा धर्मपथे स्थितं। अन्तरा
ब्राह्मणं कृत्वा प्रायश्चित्तं समादिशेदित्यंगिरःस्मरणात्। व्रतोपादानादेकादश्यादिव्रतमपि ग्राह्यं। यो ह्य
स्य धर्ममाचष्टे यश्चैवादिशति व्रतं। सोऽसंवृतं नाम तमः सह तेनैव मज्जतीति मानवात्॥ ॥न संहताभ्यां
पाणिभ्यां शिर मानवात्। चकारात्कण्डूयेच्चान संहताभ्यां पाणिभ्यां नरः कूर्चमुपस्पृशेदिति ब्राह्मात्। के
शग्रहांश्चापि वर्जयेत्। केशग्रहान्प्रहारांश्च सदा शिरसि वर्जयेदिति मानवोक्तं। न संहद्विसुमनसो प्रत्या
चक्षीत॥ ५४॥ ॥सुमनसः पुष्पाणि समासात्कुशादिचोपस्थितं न प्रत्याचक्षीत यथाह योगीश्वरः। कुशाः
शाकं पयो मत्स्या गंधाः पुष्पं दधि क्षितिः। मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि चेति। मणीनुदचीतिम
नुः। यद्वा विसमन्नं पंचाशन्नमेधायैवोदकमिति वा केचिद् विप्रुषयोरप्यप्रत्याख्येयत्वमुक्तमेवं तथापि तद्

११६

गृहस्थधर्मत्वेनस्नातकेधर्माप्राप्तापुनर्वचनंयुक्तं।तर्ह्येवंतद्वचनमस्तुस्नातकधर्माणांगृहस्थसाधारण्यादि
तिचेत्।मैवं।प्रायश्चित्तभेदाद्योभयत्रवचनात्।तथाहि।गृहस्थप्रकरणोक्तनिषेधातिक्रमस्यप्रकीर्णकत्वेनतत्प्रा
यश्चित्तंगृहस्थानांस्नातकव्रतलोपेतुभोजनंस्नातकानामित्युभयत्रवचनमर्थवत्॥नात्मनःस्रजमपकर्षयेत्
॥५५॥ ॥स्वकण्ठाद्युपस्रजंनान्येनापनयेत्।किंतुस्वयमेवापनयेत्।यत्तुनात्मनोपहरेत्स्रजमितिमानवेतत्राप्य
न्नोविनोपपर्योद्रष्टव्यः।अन्यथाशीर्णांस्रजमितोऽन्यश्चेतिश्रौतलिंगविरोधापत्तेः॥ऽपहरेदितिवाविच्छेदस्तेना
त्मनायुक्तांस्रजमात्मनेनोपहरेत्।स्वहस्तलिखितंस्तोत्रंस्वघृष्टमपिचंदनं।स्वहस्तग्रथितांमालांशक्रस्या
पिश्रियंहरेदितिमानवात्॥ ॥नरक्तंविरागयेत्॥५७॥ ॥आत्मन्यनुरक्तंरुदंतंभाषणादिभिर्नविरक्तंकुर्यात्
नचरक्तोविरागयेदितिमानवात्।स्वयंयस्मिन्ननुरागस्तेनविरुद्धभाषिणंकुर्यात्रक्तानितिवापाठः।वि
रागयेदितिवा॥ ॥नोदक्यामभिभाषेत॥५८॥ ॥उदक्यारजस्वलातांनाभिभाषेत।अभिराभिमुख्येतेनत
दभिमुखीभूयभाषणनिषेधोनांतरितस्यएवंसूतिकयापरिजेरजस्वलात्वात्॥ ॥नश्लेष्मोत्पजान्॥५९॥ ॥श्लेष्मा

वि॰टी॰१
१२७

यवनादयः। अंत्यजा रजकादयस्तैर्नपि सार्द्धं न संभाषे॥ ॥अग्निदेवब्राह्मणसन्निधौ दक्षिणं पाणिमुद्धरेत्॥६०॥ ॥अग्निः श्रौतः स्मार्तश्च देवो विष्ण्वादिप्रतिमा। ब्राह्मणो गुर्वादिरेषां सन्निधौ परिचरणे दक्षिणं बाहुं कंठादुत्तरीयाद्बहिः कुर्यात् गुरुदर्शने कंठप्रावृतादि वर्ज्यमिति गौतमीये। गोष्ठादिषु पिंड्यम्यगारे गवां गोष्ठे ब्राह्मणानां च सन्निधौ स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेदिति मानवात्॥ ॥न परद्दोदेवरंतीं गामाचक्षीत॥६१॥ ॥परकीये यवादिक्षेत्रे निरुद्धं धान्यं भक्षयंतीं गां परस्मै नाचक्षीत परग्रहणात्स्वीये गोग्रहणान्महिष्यादिषु चेष्टीति गम्यते। पिबंतीं स्तनाचक्षीत न वारयेत् स्वोन वारयेद्धयंतीं गां नेचाचक्षीत॥ ॥नोद्धृतानुप्रहर्षयेत्॥६३॥ ॥उद्धृतां तु न्मार्गवर्तिनस्तदन्तु क्रमलावरणेन नोत्साहयेत्॥ ॥न शूद्रराज्ये निवसेत्॥६४॥ ॥यत्र शूद्रो राजा तस्मिन्देशे नान्यत्र वसेत्। शूद्रग्रहणान्म्लेच्छादिराज्य इरापं हे॥ ॥नाधार्मिकजनाकीर्णे॥६५॥ ॥अधार्मिका धर्मविरोधिनः पाषंड्यादयः पतितादयो वा तत्समूहव्याप्ते राज्ये ग्रामे का न संवसेत्। पुनः क्रियोपादानमन्येषामपि निषेधार्थं तथा च स्मृतिः। धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पंचमः। पंच यत्र न विद्यन्ते न तत्र दिवसं वसेदिति॥ ॥नोपसृष्टे॥६७॥ ॥उपसृष्टो व्याध्यभिभूतो यस्तस्मिन्देशे ग्रामे वा न संवसेत्। न व्याधिबहुले मेरुमितिमा

११

नवात्॥ ॥न दिवं पर्वती॥६८॥ ॥पर्वते विंध्यादौ बहुकालं न संवसेत्॥ ॥न हस्त्याश्वेष्टां कुर्यात्॥ ६९॥ ॥हस्ति
हस्त्यर्थैश्च न्यो व्यापारो हस्त्यादिना दिर्हयां चेष्टा॥ ॥न नृत्यगीते॥७०॥ ॥अशास्त्रीं नृत्यगीते न कुर्यात्। शास्त्रीययो
मोक्षसाधनत्वात्। यथाह योगीश्वरः। वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः। तालज्ञश्चाप्रयासेन मो
क्षमार्गं नियच्छतीति। समासाद्वादित्रवादनं च। न नृत्येन्न च गायेच्च न वादित्राणि वादयेदिति मानवात्। क्ष्वेडनं
सिंहनादः॥ ॥नाश्लीलं कीर्तयेत्॥७२॥ ॥अश्लीलमसभ्यं॥ ॥नानृतं॥७३॥ ॥अनृतं मिथ्यावचनं तच्च
द्वेधा शब्दार्थाभ्यां। तत्र शब्दानृतमवाच॥ केनासाधुना वा। अर्थानृतमन्यथासतोन्यथाप्रतिपादनं तन्न कु
र्यं॥ ॥नाप्रियं॥७४॥ ॥अप्रियमुद्वेगकरं॥ ॥न कस्यचिन्मर्माणि स्पृशेत्॥७५॥ ॥मर्माणि प्राणायतनानि नाभि
शंखौ गुदं शुक्रं शोणितं शंखकौ तथा। मूर्धांसकंठहृदयः प्राणस्यायतनानि वै। इति वक्ष्यमाणानि तत्र किंचिद
पि न स्पृशेत् नाभिहन्यात्। कस्यचिदपि मर्मदुश्चरितं न प्रकाशयेदित्यन्ये॥ ॥नात्मानमवजानीयाद्दीर्घमायु
र्जिजीविषुः॥७६॥ ॥दीर्घायुष्कामश्चात्मनोवज्ञां न कुर्यात्। तथा विप्रादीनामपि। विप्राहिताश्रियात्मानो

नावज्ञेयाः कदाचनेति योगिस्मरणात्॥ ॥चिरं संध्योपासनं कुर्यात्॥७७॥ ॥दीर्घायुष्कामो दी
र्घकाले संध्यामुपासीत। ऋषयो दीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुयुरिति मानवात्॥ ॥न सर्पसत्त्वैः क्रीडेत
॥७८॥ ॥सर्पा विषधराः शस्त्राणि खड्गादीनि वर्ज्यवचनात् अन्येषामपि मृत्युहेतुभिर्व्याघ्रादिभिश्च न क्रीडेत्॥ ॥
अनिमित्तः खानि न स्पृशेत्॥७९॥ ॥स्वस्थो मलापहरणं विना स्वशरादीनीन्द्रियाणि न स्पृशेत्। अ
नातुरः स्वानि खानि न स्पृशेदनिमित्ततः। रोमाणि च रहस्यानि सर्वाण्येव विवर्जयेदिति मानवात्। प
रस्य दंडं नोद्यच्छेत्॥८०॥ ॥परताडनार्थं दंडलोष्टादिनोत्थापयेन्न पातयेच्च। परस्य दंडं नोद्यच्छेत्क्रुद्धो
नैनं निपातयेदिति मानवात्। अस्यापवादमाह॥ ॥शास्त्रं वा शासनार्थं ताडयेत्॥८१॥ ॥शासनार्थं शिष्य
पुत्रादिकं शिक्षार्थमेव ताडयेन्न क्रोधादिना। यदि वाङ्मात्रेण शिक्षितुं न शक्यते शिष्यः शिष्टिरवधेनेति
गौतमीयात्। ताडनं सा वनमिति॥ ॥तं च वेणुदलेन रज्ज्वा वा पृष्ठे॥८२॥ ॥पाटितस्य वेणोरर्द्धं दलं रज्जु
र्विदलाभ्यां तनुभ्यामन्येन घ्नन्राजा शास्य इति गौतमीयात्। वो भागे शरीरस्य नोत्तमांगे न वक्षसि

अतोन्यथात्वप्रहरन् पापयुक्तो भवेन्नर इति स्मरणात्॥ ॥देवब्राह्मणशास्त्रमहात्मनां परिवादं परिहरेत्॥८३
॥ ॥देवा विष्ण्वादयः। ब्राह्मणा जातिमात्रेण। शास्त्रं स्मृत्यादि तेषु हृणान्न मूलभूतवेदस्यापि ग्रहणं। महात्मानो
महर्षयस्तेषां निंदां वर्ज्जो। नास्तिक्यं वेदनिंदां च देवतानां च कुत्सनं। द्वेषं दंभं च महात्मानं क्रोधं तैक्ष्ण्यं च वर्ज्जयेदि
ति मानवात्॥ ॥धर्मविरुद्धौ चार्थकामौ॥८४॥ ॥धर्मविरुद्धोर्थो अजाज्ययाजनाद्यर्जितः। धर्मविरुद्धः का
मः परस्त्रीगमनादिस्वकारादेतत्त्रयविरुद्धं च मोक्षं। अनधीत्य द्विजो वेदाननुत्पाद्य तथा सुतान्। अनिष्ट्वा चैव यज्ञैश्च
मोक्षमिच्छन्पतत्यध इति मनुस्मरणात्॥ ॥लोकविद्विष्टं धर्ममपि॥८५॥ ॥धर्मविहितमपि लोकनिंदितं मधु
पर्कीयगोवधादिकं वर्ज्जयेत्। अतिथ्यादिजनकत्वेनाग्नीषोमीयादिवदस्वर्ग्यत्वात् देवहेतुर्गर्भविशेषेणेनाह या
ज्ञवल्क्यः। अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु। इति। त्वकारादसुखोदर्कमिति मानवा। नाकुलस्यो। द्वेषसादि
दसुखोदर्कः॥ ॥पर्वसु शांतिहोमं कुर्यात्॥८६॥ ॥शांतिः पापस्य तदर्थं होमः कूष्मांडहोमस्तत्पर्वस्यमावास्यापौ
र्णमासीषु वृद्धवचनात्सर्वासु कुर्यात्। अथ कूष्मांडैर्जुहुयात् इत्युपक्रम्यामावास्यायां पौर्णमास्यां वेति बौधाय

नीयात्। गायत्रीजपंश्चासावित्रीन्संतिहोमंश्च कुर्यात्पर्वसु नित्यश इति मानवात्॥ ॥न तृणमपि छिं
द्यात्॥८८॥ ॥पर्वसु तृणमपि शब्दात् हस्तादीश्च न छिंद्यात् तुरीयं हेतुमाह। वाताहृदोषवासृजत्। ततः स्नान्
वर्णाच्छित्वा ब्रह्महत्यामवाप्नुयादिति ब्रह्महत्यास्मरणात्॥ ॥अलंकृतस्तु तिष्ठेत्॥८८॥ ॥स्वकृवेदना
दिभिरलंकृतो भवेत्। चकारान्मंगलाचारयुक्तः स्यादिति मानवं ज्ञेयं। उक्तानां नित्यतामाह॥ ॥एवमा
चारसेवी स्यात्॥८९॥ ॥एवमुक्तानामाचाराणां व्रतानां नित्यं सेवनशीलो भवेत्। स्नातकव्रतलोपेतु प्रा
यश्चित्तमभोजनमिति मानवे प्रायश्चित्तदर्शनात्। अनुष्ठेयमाचारं दिशिनष्टि॥ ॥श्रुतिस्मृत्युदितं धर्मं साधुभि
श्च निषेवितं। तमाचारं निषेवेत धर्मकामो जितेंद्रियः॥९०॥ ॥मातुलस्य वयोषेत्यादि श्रुतिलिंगावगतोपि
मातुलकन्यापरिणयो नानुष्ठेयः स्मृतिनिषिद्धत्वेनाविधेयत्वा। ततस्मृतिविहितोपि मधुपर्के मवाल
भो मा गाम नामदितिं वधिष्टेति श्रुतिविरोधान्नानुष्ठेयः। श्रुतिस्मृतिविहितोपि श्येनाद्यभिचारो दृष्टार्थत्वाद्
भोजनकइति नानुष्ठेयः। श्रुतिस्मृतिविहितं धर्मजनकं च दर्शपूर्णमासयोर्ज्योतिष्टोमान्या पत्नीसंजाजानुष्ठा विशि

ष्टापरिहारादनुष्ठेयमिति।श्रुतिस्मृतिभ्यांविहितमदृष्टसाधनंशिष्टानुष्ठितमाचारंसंध्यास्नानादिकमदृ
ष्टार्थइंद्रियाणितत्परिपंथीनिजित्वानित्यंकुर्वीत।इदानींतत्रफलसाधनीभूतकर्माणामाचारस्यनैमित्तिकतामा
ह॥ ॥आचाराल्लभतेह्यायुराचारादीप्सिताःप्रजाः।आचाराद्धनमक्षय्यमाचारोहंत्यलक्षणं॥५१॥ ॥दीर्घा
युष्ट्वस्वर्गापवर्गादीप्सितत्वात्तथ्यधनदुर्लक्षणसूचितदुःखध्वंससाधनानांकर्मणामाचारानुगृहीतानामेवतत्त
त्फलनिष्पादकत्वंनान्यथा।चकारात्संततिसाधनस्यापिआचारादीप्सिताःप्रजाइतिमाननानचसातादेवा
चारस्यतत्तद्भावेनत्वेसाधु।आचाराभावेफलस्यैवासिद्धाऽल्पफलताश्रवणविरोधात्।यथाहमनुः।दु
राचारोहिपुरुषोलोकेभवतिनिंदितः।दुःखभागीचसततंव्याधितोल्पायुरेवचेति।आचारानुगृहीतायुःसा
धनात्कर्मणोल्पमायुःसिध्यतिनसंपूर्णं।नत्वायुःसूचकलक्षणसद्भावेतदस्त्विति।दृष्टैवतत्सिद्धिस्तदभावे
त्वाचारानुगृहीतेनापितत्साधनेनकर्मणानतत्सिद्धिः।प्राचीनादृष्टरूपसहकार्यभावादित्यतआह॥ ॥सर्वल
क्षणहीनोपियःसदाचारवान्नरः।श्रद्दधानोनसूयश्चशतंवर्षाणिजीवति॥५२॥ ॥आयुरादिफलस्यच

कलक्षणरहितस्यापि आचारश्रद्धानीर्षादियंगानुगृहीतात्पुरादिसाधनकर्मजन्यैहिकादृष्टैनैवायुष्यादि
फलसिद्धेर्नप्राचीनादृष्टापेक्षेति। यद्वा आचारवत्त्वशुद्धानसूययोरपि सर्वकर्माङ्गत्वमाह। सर्वलक्षणहीनोपि
यः सदेति। यच्छ्रद्दधाकरोतितदेवास्यवीर्यवत्तरंभवतीत्यादिश्रुतेः॥ ॥इतिश्री

विष्णुस्मृतिविवृत्तौश्रीमत्केशववैजयन्त्यामेकसप्ततितमोऽध्यायः॥ ॥एवंगृहस्थस
धारणंस्नातकधर्ममभिधायाश्रमचतुष्टयसाधारणंधर्मंद्विसप्ततितमेनाह॥ ॥दमयमेनतिष्ठेत॥१॥ ॥
दमोन्तःकरणनियमः। यमोबाह्येन्द्रियनियमः समाहारेणब्रह्मचर्यादयोगृह्यन्ते। ब्रह्मचर्यंदयाक्षान्तिर्दानंस
त्यमकल्कता। अहिंसास्तेयमाधुर्यंदमश्चेतियमाःस्मृताइतियोगिस्मरणात्। तेनान्वितोभवेत्॥ ॥दमश्चेन्द्रियाणां
प्रकीर्तितः॥२॥ ॥अन्तःकरणनियमेनचक्षुरादीन्द्रियाणामपिनियमः समाहारेणब्रह्मचर्यादयोगृह्यन्ते। ब्र
ह्मचर्यंदयाक्षान्तिर्दानंइन्द्रियाणामपिनियमः प्रसिद्धएव। तदधीनप्रवृत्तिकत्वात्तेषां। दमफलमाह॥ ॥दान्त
स्यायंलोकःपरश्च॥३॥ ॥ऐहिकामुष्मिकफलसाधनानांकर्मणांदमेनैवफलसिद्धेः। व्यतिरेकेनिष्फल

हा॥ ॥नादानस्यात्क्रियाकांक्षितस्मृत्यामिति॥६॥ ॥ऐहिकी पारलौकिकी वा क्रिया दमं विना न फलं साधयतीति द
मं स्तौति॥ ॥दमः पवित्रं परमं मंगलं परमं दमः। दमेन सर्वमाप्नोति यत्किंचिन्मनसेच्छति॥५॥ ॥पवेः पापात्त्राय
तइति पवित्रं मंगलं मंगलकारणं मनोभिलषितं यत्किंचिदैहिकं पारलौकिकं वा तत्सर्वं सेनोनाप्नोतीति दमं स्तौति
॥ ॥दशार्हयुक्तेन रथेन यातो मनोवशेनार्यपथानुवर्तिना। तं वेदरथं न प्रहरंति वा जिनस्तथागतं नावजयंति
शत्रवः॥६॥ ॥दशार्हेण पंचभिरिंद्रियमलक्षणैर्वाजिभिर्युक्तेन प्रज्ञालक्षणेन रथेन मनोलक्षणसारथिना
नुगृहीता नापथे प्रवर्त्यत इति यथोक्तं भगवता। इंद्रियाणां विचरतां यन्मनोनुविधीयते। तदस्य हरति प्रज्ञां वायु
र्नावमिवांभसीति। शांतिशास्त्रुपायमाह॥ ॥आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत्। तद्वत्कामा
यं प्रविशंति सर्वे स शांतिमाप्नोति न कामकामी॥७॥ ॥अद्भिरापूर्यमाणमप्यचलतया अविक्षुभितं तया प्रति
ष्ठा यस्य तमविक्रियं संतं समुद्रं सर्वतो गता आपः प्रविशंति यया तथा सर्वे कामा विषयेच्छा विशेषा विशेषा
विषयसन्निकर्षेप्यविकुर्वंतं यं प्रविशंत्यंतरेव प्रलीयंते स एव शांतिं तिति द्वा प्राप्नोति। तल्लक्षणं चस्य त्यंतरे

वि०२७३

१२१

आक्रुष्टोभिहतोवापिनाक्रोशेन्नचताडयेत्। अदुष्टोवाङ्मनःकायैः सा तितिक्षा क्षमा स्मृतेति। नितरं कामका
मी। काम्यंत इति कामा विषयास्तान्कामयितुं शीलमस्य॥ ॥इति॥
विष्णुस्मृतिविहितोऽयं मत्यो वै जयंत्यां हि सप्ततितमोऽध्यायः॥ ॥गृहस्थधर्मेषु श्राद्धं विवक्षुः त्रिसप्ततितमोऽध्याय
मारभते। तत्र ब्राह्मणनिमंत्रणकालमाह॥ ॥अथ श्राद्धेषुः पूर्वेद्युर्ब्राह्मणान्मंत्रयेत् श्राद्धभोजनमंगीकारयेत्
। तत्र श्राद्धं नाम पित्राद्युद्देशेन ब्राह्मणेभ्योन्नादिदानं। देशे काले च पात्रे च श्रद्धया विधिना च यत्। ब्राह्मणाणांच यथ्य तु पि
पितॄनुद्दिश्य विप्रेभ्यो दत्तं श्राद्धमुदाहृतमिति स्मात्। तच्च नित्यं नैमित्तिकं काम्यं चेति त्रिधा। यत्तु विश्वामित्रेण
नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिंडनं पार्वणं चेति विज्ञेयं गोष्ठ्यां शुद्ध्यर्थमष्टमं। कर्मांगं नवमं प्रोक्तं दैविकं
दशमं स्मृतं यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतमिति द्वादशविधत्वमुक्तं तत्त्रस्यैव प्रपंचायन वि
वोत्तरोपदर्शनाय तत्र नित्यमहरहः क्रियमाणं। यथाह देवोयवतः। मृताहोहरदर्शश्राद्धं यच्च महालये।
तन्नित्यमुदितं तद्भिन्नित्यवन्न हि वो नत इति नैमित्तिकं संक्रांत्यादौ। यथा गालवः। प्रेतश्राद्धं सपिंडीनं संक्रां

तियहणेषुत्रासवत्सरोदकुंभेन्वहद्विश्राद्धं निमित्तइति। कामंप्रतिपदादितिथिषुयथाह स एवातिथ्यादिषु चय
छाद्धंमन्वादिषुयुगादिषु। अलभेषुव्ययोगेषुतत्काम्यंसमुदाहृतमिति। आदिशब्दाद्ग्रहणस्नानत्रयोगकरणा
नांग्रहणं॥ तत्र नैमित्तिकं द्विविधमेकोद्दिष्टंपार्वणंच। एकमुद्दिश्यक्रियमाणमेकोद्दिष्टं पुरुषोद्देशेनपार्वणमिति
।पूर्वेद्युर्ब्राह्मणान्संभवेसद्योपिनिमंत्रयेत। असंभवेपरेद्युर्वाब्राह्मणान्संस्कृतान्निमंत्रयेदितिदेवलीयात्। ब्राह्मणान्क्षत्रि
यादीन्। राजन्यवैश्ययोश्चैवनैतत्कर्मप्रशस्यतइतिमानवात्। आश्वलायनः कात्यमाह॥ ॥द्वितीयेह्निशुक्लपक्ष
स्यपूर्वाह्णेकृष्णपक्षस्यापराह्णेषुद्विजान्सुस्नातान्सुस्वाचांतान्यथाभ्योविद्याक्रमेणकुशोत्तरेष्वासनेषूपवे
शयेत॥२॥ ॥निमंत्रणाद्वितीयेश्राद्धायमहस्तस्मिन्शुक्लपक्षसंबंधिनिकृतपस्यपूर्वकायांमुपक्रम्यापनेलो
हितेनादिनासम्यक्स्नातान्स्वाचांतानयथाभयोयथ्यावहोवाकुलं पित्रर्थंब्राह्मणान्द्विवृषवयसंपैतामहत
तोप्यधिकवयसंप्रपैतामहइति। पितृवदुपवेशयेदितिपारस्वलीयनीयात्। विद्याक्रमेणाद्येनापित्रर्थंव्या
पकंपैतामहेतस्याप्यव्यापकंप्रपैतामहइति। कुशोत्तरेयेषांतेषुकुशाछन्नेषुतत्रविशेषोदेवलीयः

होदर्भेषु प्राङ्मुखो दैवे पित्र्ये चोदङ्मुखो दक्षिणामुखो वा नः। आसनेषु निजुंजीत प्रो द्विजेषु तिलोदके रितिसुखसत्रं।
आसनानि विष्टरेत्तो आसनानि तत्रनु यथा हारसनेमं स्पृशन्नपि तिलेषु पनवेशयेत्। ब्राह्मणसंख्यामाह॥ ॥
द्वे दैवे प्राङ्मुखौ त्रीन्पित्र्ये उदङ्मुखान्॥३॥ ॥ दैवे देवस्थाने द्वौ विप्रौ प्राङ्मुखौ। पित्र्ये पित्रादिस्थाने त्रीनुद
ङ्मुखानुपवेशयेत्। चकारात्संख्यान्तरमपि प्रदर्शयते। एकैकमेकैकस्य द्वौ द्वौ त्रींस्त्रीन्वा हवे फलभूयस्त्व
मित्याश्वलायनीयात्। होता विति दैवे त्रींस्त्रीनिति पित्र्ये। अत्र कल्पमाह॥ ॥एकैकमुभयत्र वेति॥४॥ ॥
उभयत्र दैवे पित्र्ये च एकैको वा। वेत्यनुकल्पोऽनविकल्पोतुल्यवलवत्त्वाभावात्। इतिः पक्षसमाप्तौ। नोभयत्रै
कं। न तत्रैकं सर्वेषामित्याश्वलायनीयात्। अतएव वसिष्ठः। यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत्। अन्न
पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य तु। देवतायतने कृत्वा ततः श्राद्धं प्रवर्तयेत्। प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचा
रिणे इति पृथक्त्वाभ्यासयोगमाह। इदमपि सपिण्डीकरणं विना। कामममनाद्य इत्याश्वलायनीयात्। आद्यं स
पिंडीकरणं श्राद्धं स विशेषे कोद्दिष्टकानुसारेणेति कर्त्तव्यताविशेषमाह॥ ॥आमश्राद्धेषु कामेषु च प्रय

मपंचकेनाग्निकृत्या॥५॥ ॥कृष्णपक्षे जनितिराद्धे त्रयोदशीपंचदशीर्वेसु तत्कालेके प्रसिद्धं तस्याद्येन पंचकेनाम श्राद्ध
काम्यश्राद्धयोर्वैश्वदेविकश्राद्धानंतरं पित्र्यावाहनात्पूर्वमेवाग्निहोमः कार्यः अनुक्तद्रव्यकत्वादाज्यहोम इति
भावः॥ ॥पक्षश्राद्धेषु मध्यमपंचकेन॥६॥ ॥पक्षश्राद्धे च श्राद्धे मध्यमपंचकेनोक्तकाले होमः॥ ॥अमावास्या
युत्तमपंचकेन॥७॥ ॥वह्निवचनं द्वादशाभिप्रायेणोत्तमपंचकेनावाहनात्पूर्वं होमः॥ ॥आग्रहायिण्या ऊर्ध्व
कृष्णाष्टकासु पंचक्रमेणैव प्रथममध्यमोत्तमपंचकैः॥८॥ ॥आग्रहायणी मार्गशीर्षी पौर्णमासी सा च पौषीमा
घ्योरुपलक्षणं तामारभ्योर्ध्वं यास्तिस्रः कृष्णाष्टकाः कृष्णपक्षाष्टम्यस्तासु यथाक्रमं प्रथममध्यमोत्तमपंचकैस्तत्का
ले होमः॥ ॥अन्वष्टकासु च॥९॥ ॥ताभ्योऽष्टमीभ्योऽनुपश्चाज्जातानवम्योऽन्वष्टकास्तासु चकारात्पूर्वेद्यु
र्नवासु सप्तमीषु च यथाक्रमं प्रथमक्रमं पंचकत्रिकेण होमः। तत्र प्रथमाष्टकायां सप्तम्यादि दिनत्रयेपि प्रा
थ्यपंचकेन द्वितीयाष्टकायां दिनत्रयेपि द्वितीयेन तृतीयाष्टकायां दिनत्रयेप्यंत्येनेति। यद्यपि न्नेने कानि
श्राद्धानि पक्षोतानि तथापि दर्शश्राद्धमेवात्र प्रकृतिः श्राद्धकालेषु प्रथममध्यमान्वास्यायानिर्देशात्स

नरास्त्वत्र यथा काठकीयगृह्य आह ॥ ॥ ततो ब्राह्मणाननुज्ञातः पितॄनावाहयेत् ॥ पितृयज्ञ एवाह्वावाहना
द्याहुर्दर्शनात्तेषु तेन होम इति सिध्यति । यदावाहनमुक्तं तत्किं कार्यमित्यत आह ॥ ॥ अपयंत्वसुरा इति द्वाभ्यां ति
लैर्यातुधानानां विसर्जनं कार्यं ॥१२॥ ॥ ततो होमसमापनान्तरं पर्यग्निकरणं गच्छन् तिलैः श्राद्धविघ्नकर्तॄन्यातु
धानान् प्रसार्य वाहयेत् ॥ समंत्रावाहनादिकं समाह ॥ ॥ एत पितरः सर्वा स्तानस्मा सेयं त्वेतद्वः पितर इ
त्यावाहनं कृत्वा तिलोमन्त्रेण गंधोदकं या दिव्या यास्तिष्ठंत्य भृता गारिति निन्मे पातेति च पाद्यं निवेद्य अंकित्वा निवेद्य
वानुलेपनं वस्त्रपुष्पालंकारधूपदीपनैवेद्यादिभिस्तथा विप्रानभ्यर्च्य घृतप्लुतमन्नमादायादित्या रुद्रा वसव
इति विद्वान्पाणौ करपाणौ वा ततस्ते विशेषः कुर्विन्मुके आज्ञितं दद्यात् ॥१२॥ ॥ उक्तप्रतीकेन मंत्रे
णावाहनमुक्तं प्रतीका मंत्रे मंत्रा आपो पाद्यमासादनादिभिरर्घ्यं सपाद्यं निवेद्य गंधादिभिर्दीपान्तैर्यथोक्तप्रका
रेणाभ्यर्च्य देवपितृब्राह्मणाननुसंपूज्य गृहीतमन्नमादित्येति मंत्रेण वेदपृष्ठोत्तरेषां आदित्येभ्यो रुद्रेभ्यो वसु
भ्य इति मंत्रेण सोमाय पितृमते स्वधा नमो यमायांगिरसे स्वधा नमोऽग्नये कव्यवाहनाय नम इति वा मंत्रयेण

इति त्रयं कुर्यात्। अन्नसंकल्पमाह॥ ॥ये मामकाः पितर एतद्वः पितरो यं यज्ञ इति च द्विरुक्तमंत्रणं कृत्वा यथो
क्तपथ्येनेषु पात्रेषु विशेषाद् अत्र मयेषदन्नं नमो विश्वेभ्यो देवेभ्यो न ममेदमन्नमादौ इत्युभयोर्निवेदयेत्॥ १३॥ ॥
ये मामका एतद्वो यं यज्ञ इति त्रिभिर्मंत्रैरन्नमनुमंत्र्य यथाभिलिखितेषु सौवर्णेषु दैवे राजतेषु पित्र्ये का नम इति मंत्रेण वै
श्वदैविकयोः ब्राह्मणयोः प्रथमं निवेदयेत्। तत्रोपवीतिना कार्यं उपवीतं दैवे प्राचीनावीतं पितॄणामिति श्रुतेः।
तत्र प्रदक्षिणेनाप्रदक्षिणं तु देवानां पितॄणामप्रदक्षिणमिति कात्यायनीयात्। तत्र ऋजुदर्भैर्देवानां मृजवो दर्भाः
पितॄणां द्विगुणाः स्मृताः इति स्मरणात्। विश्वेभ्यो देवेभ्य इति सामान्यवचने पितृसंज्ञकेभ्य इति सामान्यवचने
पितृसंज्ञकेभ्य इति वाच्यं। संज्ञाश्चाह शंखः। इष्टिश्राद्धे क्रतुर्दक्षः सत्यो नांदीमुखे वसुः। नैमित्तिके कालकामौ का
म्ये च धुरिलोचनौ। पुरूरवा आर्द्रवौ चैव पार्वणे समुदाहृतौ। इति। तत्र पुरूरवाआर्द्रवसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य इत्यादिना
सर्वत्रोह्यं। तदनंतरं पित्र्यमाह॥ ॥पित्रे पितामहाय प्रपितामहाय च नामगोत्राभ्यां शुद्धक्षुद्रेषु॥ १४॥ ॥ यद्यपि गो
त्रसंबंधनामानि इदमन्नं ततः स्वधा पितृक्रमात् उदीर्येति स्वसत्तां विनिवर्तयेदित्यत्रिणा गोत्रसंबंधानंतरं न।

वि॰टी॰७३
१२४

नामोक्तं तथापि कंठानुसारित्वात् मूलस्थोक्तेस्तदभिप्रायेणायं क्रम इति ध्येयं। ततस्थास्वकशर्म्मणोस्मृतिरेषु कमोप
यत्सुरस्पायेदमन्नं स्वधा नम इति वा क्षोप्रयोगेण तन्निवेदयेत्। अकारान्मातामहेभ्यस्त्वा। पितरो यत्र शङ्क्यंते तत्र माता
महापि। अविशेषेणाकर्तव्यं विशेषान्न स्वजंवजेदिति स्मरणान्नोवद्यति च मातामहानामप्येवमित्यादिना॥ ॥तद्दत्तु
ब्राह्मणेषु यन्मेप्रकामा ब्रह्मरात्रैर्यद्दः क्रचादि निजपेत्॥१५॥ ॥तन्निवेदितमन्नमदत्सु भुंजानेषु देवपितृब्राह्मणेषु
यन्मेप्रकामा इत्यादिमंत्रजातं जपेदिति करणादित्यान्यपारस्कात्यायनः। अन्नेषु जपेदाहृति श्रवोगायत्री सप्रणवां
सकृत् त्रिर्वाराह्नो हंतारुदित्यमंत्रानुधुकषत्र्कं मधुवतिरघमन्वामिसर्पवित्राणीति। मात्स्येपि इंद्रेशसोमसूक्तानि पाव
मानीश्च शक्तित इति॥ ॥इतिहासपुराणधर्मशास्त्राणीति॥१६॥ ॥इतिहासाभारताद्याः पुराणं विष्णुब्राह्मणादि
धर्मशास्त्राणि मानवादीनि। यथाहृत्योगीश्वरः। स्वोकन्ययमपिहस्माद्यः श्राद्धेश्रावयिष्यति। पितॄणां तस्मात् तृप्ति
स्यादक्षया नात्र संशय इति। जमदग्निः। अपसव्येन कर्तव्यं सर्व्वश्राद्धं यथाविधि। सूक्तस्तोत्रजपं मुक्त्वा विप्राणां च वि
सर्जनमिति॥ ॥उच्छिष्टसन्निधौ दक्षिणायेषु कुशेषु पृथिवी दर्विहिता इत्येकं पिंडं पितृनिंदद्यात्॥१७॥ ॥पाणि

१२

होमपक्षेउच्छिष्टसन्निधौ उच्छिष्टपात्रादरत्निमात्रमन्तरं निरयं वोत्सृज्य पृथिवीत्यादिमंत्रेण पितृपिंडं दद्यात् तदाहस्व
चिताः अरत्निमात्रमुत्सृज्य पिण्डांस्तत्र प्रदापयेत् । यज्ञोपस्पृशेत्तांवापि प्राहुर्वंति न विंदत इति । अ... । पितृणामोत्मे
नःस्यानारत्निस्त्रिप्रराउच्छिष्टसन्निधात्तन्नोच्छिष्टान्नसन्निधाविति । यथा वका शमेयं विकल्पः । एकमिति वचना
द्विपितृकेनाहि द्विपितृकेनाप्युभयोरेक एव पिंडो देयः यदि हि द्विपिता स्यादेकैकस्मिन्पिंडे द्वौ द्वावुपलक्षयेदित्यापस्तंबीया
त् । एकविभक्तिनिर्देशाच्चोभयनामांते एकैव विभक्तिः प्रयोज्या स्तुत्वः । उच्छिष्टसन्निधौ पिंडान्दद्यादे पितृयज्ञवदिति
योगिस्मरणात् । सर्वे माषवर्ज्या माषाः श्राद्धेषु वेश्याह्यावर्जयित्वा भिंपिंडयोः । ब्राह्मणेषु यथा मद्यं तथा माषो
भिंपिंडयोरिति वायुस्मरणात् ॥ ॥ अंतरिक्षोदर्विरहितात इति द्वितीयं पितामहाय ॥१८॥ ॥ द्वितीयमित्यपेक्षा
वचनेन च पितामह द्वितीयेक एव पिंडः ॥ ॥ द्यौर्दर्विरहिता इति तृतीयं प्रपितामहाय ॥१९॥ ॥ तृतीयमित्यनुक्तार्थं
॥ अत्र पितरः प्रेता इति वासो देयं ॥२०॥ ॥ अत्रेति मंत्रेण पिंडोपरि वस्त्रं दद्यात् ॥ ॥ वीरान्नः पितरो धत्त इत्य
न्ने ॥२१॥ वीरेति मंत्रेण पिंडशेषमन्नं पिंडोपरि दद्यात् ॥ ॥ अत्र पितरो मादयध्वं यथाभागमिति दर्भमूले क

३३०

रावद्दर्भाणां ॥२२॥ ॥अत्र पितर इति मंत्रेण पिंडाधःस्थितदर्भमूले करलेपावघर्षणं कुर्यात् ॥ ॥ॐ ऊर्जं वहंतीरित्यरि
मेन सोदकेन प्रदक्षिणं पिंडानां विकिरणं कृत्वा अर्धेषु पात्रपालेपनान्नादि भक्ष्यभोज्यानि निवेदयेत् ॥२३॥ ॥
ऊर्जमिति मंत्रेण सोदकेन पितृशेषेण सप्रदक्षिणेन पिंडानां परितो विकिरणं सेचनं कृत्वा अर्घादीन् पंचभो
ज्यांतान्निवेदयेत् ॥ ॥उदकपात्रं मधुघृततिलैः संयुक्तं च ॥२४॥ ॥जलपूर्णं करकं मध्वादियुक्तं च निवेदयेत्
स्त्कारादंजनाभंजनादीनि पिंडेष्वभ्यंजनांजनवासःसूत्राद्युलापनीयात् ॥ ॥शुक्लवस्त्रोद्धरणेष्वतन्निमा
गतेषु मासेषु ब्रह्मन्नं समर्पणमस्तु ह्यान्नविकिरणं क्षिप्यतः कृत्वाशिष्टमावंतः संपन्नमिति च पृष्ट्वोदङ्मुखेषु
च मंत्रमासोदत्वा ततः प्राङ्मुखेषु दत्वा ततस्तेषु प्रोक्षणीमिति संकल्पं शंभो ह्यदर्भपाणिः सर्वं कुर्यात् ॥२५॥ ॥
तृप्यंतु सुत्रोक्तेषु मासेति मंत्रेण श्राद्धशेषमन्नं सतर्पणं कुशसहितजलेन स्वदन्तस्यान्नस्य ब्राह्मणो छिष्ट
यतो विकिरणं कृत्वा ब्राह्मणान्प्रति श्राद्धं संपन्नं च पृष्ट्वा पित्रोद्वादौ वा चमनं दत्वा पश्चाद्देवेषु वनंतरं सुश्लोकितं
मिति मंत्रेण श्राद्धदेशे शेषो दैदि दत्वसर्वे दर्भपाणिना कार्यं ॥ ॥ततः प्राङ्मुखो वायतो यज्ञमेनामङ्गलि प्रदक्षि

णं कृत्वा प्रत्येकं यथाशक्ति दक्षिणाभिः समभ्यर्च्याभिरमंतु भवंतु शुक्रान्तेरुक्तो अभिरताः स्म इति देवाः अपि तरश्चे
त्यभिजपेत् ॥२६॥ ॥ततः सुप्रोक्षितानंतरं दैव विप्रागते यन्मेनामेति मंत्रेण प्रदक्षिणमाहृत्यादत्वा हृत्य
च स्वयशक्त्या दक्षिणां दत्वा अभिरमंतामिति मंत्रेण ब्राह्मणान्विसृज्याभिरताः स्मेति तैरप्युक्ते देवाः स्वेति मंतं तेद
भिः शुश्रूषान्यजयेत ॥ ॥अक्षय्योदकं च नामगोत्राभ्यां दत्वा विश्वे देवाः प्रीयंतामिति प्राङ्मुखेभ्यः ततः प्रांज
लिरिदं तत्त्म नाः सुमना यावेत ॥२७॥ ॥यद्दत्तमक्षोदकादि तदक्षय्यमस्त्विति दैवपित्र्ये च नामगोत्राभ्या
मुदकं दत्वा विश्वे देवाः प्रीयंतामिति दैवोदकं दत्वानं तरमंजलिं कृत्वा प्रसन्नचेता ब्राह्मणेषु दत्तचित्त आशि
षो वाचयेत ता एवाह ॥ ॥दातारो नोभिवर्द्धतां वेदाः संततिरेव च ॥ श्रद्धा च नो मा व्यगमद्बहु देयं च नोस्त्विति ॥२८
॥ ॥नोस्माकं कुले दातारो दानशीलाः पुरुषा वेदाः अध्यापनाध्ययना वेदाः अभिवर्द्धतां संततिः पुत्र
पौत्रपरंपरा वर्द्धतां श्रद्धा आस्तिक्यबुद्धिः सा नो माव्यगमदपयातु देयं दानपानाद्यस्माकं कुले बहु
लमस्त्विति याचेत ॥ ॥तथास्त्विति प्रत्युः ॥२९॥ ॥ते च यथा चितास्तथास्त्विति प्रतिब्रूयुः किंच ॥ ॥अन्नं च नो

वि॰टी॰३

१२६

बद्भुमवेदनिर्थीश्वलमेमीहाय । चितारश्वनः संतुमारयानिप्रकेन्ना ॥३०॥ ॥अत्र मदनीयमस्माकं बद्भुमस्या
दनिर्थीश्वापेतितकालेलममाहयाचकाश्वाः अः कुवहवः संतुवयं चकं वनाः पिमायाविप्र ॥ ॥इत्येताभ्यामा
शिषः प्रतिगृह्य ॥३१॥ ॥इत्युक्तौ म्यामवदिता म्या मवाभ्यामुक्ता आशिषस्तथास्त्विति प्रतिब्रूयुः ॥ ॥वाज
वाजेतिवक्तो विसर्जयेत्प्रइ । यित्वायथान्यायमनुव्रज्याभिवाद्य च ॥३२॥ ॥आशिषः प्रतिगृह्य विप्रान्वि
सर्जयेत् ॥ ॥वाजेवाजेतिवातेऽब्राह्मणांश्च विसर्जयेत् पितृब्राह्मणा पूर्वकं विसर्जयेत्ता पितृपूर्वं विसर्जन
मितियोगिस्मरणात् ॥ ॥इतिश्री विलसन्मतिहृतोम्भो
मत्यावेजयंत्यां श्रिसमेतित मोध्यायः ॥ ॥एवं प्रकृतिभूतमन्नश्राद्धं वतुः सप्रतिप्रमेनाह ॥ ॥अष्टकासु
दैवपूर्वं शाकमांसान्नेरैश्वाद्दैकाया न्वष्टकावज्रोद्कृत्वा देवपूर्वमेव मातृपितामहे प्रपितामहेश्च पूर्ववद्राह्म
णान्भोजयित्वा दक्षिणांभिश्च नमस्कृत्य च तान्विसर्जयेत् ॥१॥ ॥अष्टकादिष्वेव सामान्यादेवपूर्वमिति प्रकृ
तिप्राप्तानामपि देवानां पुनर्देवनमदेवत्वभ्रमनिरासाय । यथाह मार्कण्डेयः । वैश्वदेवविहीनं तु केचिदि

१

द्वंतिसतन्माद्गुणितास्तुयथाक्रमंशाकमांसापूपैः।पैंद्र्यांतुप्रथमायांतुशाकैःसंतर्पयेन्नरान्।प्राजाप
त्यांद्वितीयायांमांसैस्तुद्वैश्चतर्पयेत्।वैश्वदेव्यांतृतीयायामपूपैश्चयथाक्रममिति।आद्यात्।अनेन चाद्या
मूपैःसदाकार्यामांसेरन्याभवेत्तथा।शाकैःकार्यातृतीयास्यादेषद्रव्यगतोविधिरितिवायवीयःक्रमो
निरस्तः।यथोक्तविधिरितिश्राद्धंकृत्वापरेद्युरन्वष्टकासुअष्टकावद्धस्यामष्टकायांयेनपंचकेनहोम
स्तेनैवान्वष्टकास्वपिहोमः पुनर्वचनंमातृश्राद्धेएयाश्विश्वदेवप्राप्त्यर्थंमातृश्राद्धंसदैवंतुएकमष्टका
सुचितिहारीतायात्।मात्रादिषट्कवचनंमात्रादिद्विवेकपिंडप्राप्त्यर्थंचकार।पित्रादिकंमातामहादित्रि
कंचगृह्यते।तेनचान्वष्टकासुनवभिःपिंडैःश्राद्धसुदाहृतमितिस्मृतिरसुगृह्यते।पूर्ववत्प्रकृतिवद्भ्राह्मणभो
जनादिविसर्जनांतंकुर्यात्।दक्षिणादीनांपुनर्वचनंक्रमनियमार्थं।ततश्चभोजनानंतरंदक्षिणादानन
त्रयमेभ्यःमेतिप्रदक्षिणमात्रोवर्त्तनयोधिष्ठितिः।वैशिष्यकर्मीनाह॥ ॥ततःकर्षूःकुर्यात्॥श॥ ॥ततोवि
सर्जनांतरेकर्षूगैयमूलेस्त्री॥ण॥५॥ ॥एकैककर्षमूलएकैकोपिंडंपुरुषेभ्यःस्त्रीभ्यश्चदद्यात्।पुरु

वि०दी०७४

१२२

पाणामिति सामान्यवचनं मातामहश्राद्धे यतिनापि तृपिंडानंतरं मातृपिंडांश्च दत्वा मातामहपिंडा देयाः
केवलास्त्वास्त्येकार्थामिहसावोल्लेखप्रकीर्तिताः ॥ अन्वष्टकासु मध्ये वनीयाः कार्यास्तु मातरइति स्मरणात् ॥
अन्वष्टकासु क्रमशो मातृपूर्वं तदिष्यत इति ब्राह्मवाक्यान्तरपूर्वत्व मिदं ॥ पुरुषकर्षूत्रयं सा ह्येन
दानेन पूरयेत् ॥५॥ ॥ यासां सन्निवेशो पितृपिंडादस्त्रास्त्राः पुरुषकर्षस्त्रासां त्रय मन्त्रसहितेनोदकेन पूर
येत् ॥ यद्यपि मातामहकर्षेऽपि पुरुषकर्षस्त्रथापि तासां पृथगुपादानात् पितृपर एवात्र पुरुषशब्दो ज्ञेयः ॥ स
ह ॥ सेहयोगाद्वा नस्य युग्मत्वे ॥ ॥ स्त्रीकर्षत्रयं मांसेनैव पूरयेत् ॥६॥ ॥ यत्संनिवेशो मातृपिंडाः स्त्रीकर्षस्तत्त्रय
मन्त्रसहितेन दुग्धेन पूरयेत् ॥ ॥ दध्ना मांसेन पयसा च प्रत्येकं पूरयेत् ॥७॥ ॥ मातामहकर्षत्रयं प्रत्येकं दध्यादीना
मेकैकेन पूरयेत् ॥ यद्यपि च मातामहश्राद्धे न श्रूयते तथापि अन्वष्टकानादेवत्यत्वाविगमात् मातृपिंडकर्षवत् आम
षो ऽभिधानान्यानप्रमाणान्तु पाश्वोष्णानां मातामहश्राद्धेन विषयत्वमासांसि घातिनाच पूर्वोक्तानां मेव
वाक्यमदध्यादिभिरपि पूरणमिति सम्प्रदानासां प्रत्यान्तरावरोधेन नैराकांक्ष्यात् ॥ घटसंख्या वरोधेन त्रित्वसं

१२

र्स्यानर्हत्वाद्वस्ररथिज्याजपेदेतद्ब्रह्मज्ञोभवतिः सोऽस्कवाह्यायं॥८३॥ एवं नवापि कर्षूरस्तलतद्ध्येणरथिल्वा
एतद्ब्रह्म‍ह्रत्या दिमंत्रंजपेत्॥ ॥इतिश्रीमन्महाराजाधिराजकोंडपनायकात्मजनागमनायकश्रीमत्साहिबधर्मा
धिकारिरामपंडितात्मजनंदपंडितकृतौ विष्णुस्मृतिविवृतौ श्रीमत्यां केशववैजयंत्यां चतुरशीतितमोऽध्यायः॥८४॥
उक्ते श्राद्धविधौ देवतानिर्णयाय पंचाशीतितममध्यायमारभते तत्र जीवत्पितृकर्तव्यश्राद्धेतमाह॥ ॥पितरि जीवति
यः श्राद्धं कुर्यात्स येषां पिता कुर्यात्तेषां कुर्यात्तेषां॥१॥ जीवत्पितृकस्य उद्वाहे पुत्रजनने पितृमेष्ट्यां सोमे मखे तीर्थे ब्राह्मण
आयाते षडेते जीवतः। पितुरित्यादौ यत्र पत्रश्राद्धं प्राप्नोति तत्र तत्रापि पितृकर्तृकश्राद्धदेवताभ्यः कुर्यात् पितुरेव पितरो
मातरो मातुर्महा। जीवत्पितृककर्तव्यश्राद्धे देवता इत्यर्थः। यत्तु सपितुः पितृकृत्येषु अधिकारो न विद्यते न जीवं
तमतिक्रम्य किंचिद्दद्यादिति स्मृतिशिरिकात्यायनोऽयं उद्वाहो न्यादिभिन्नाग्यणीयपरिशिष्टादिपरिगणितनिमित्तव्यतिरिक्तविष
यत्वेन एकोद्दिष्टं तत्कौ तौमन्वादिषु युगादिषु चंद्रसूर्यग्रहे पाते स्वच्छयापूर्व्यायोगतः। जीवत्पितानैव कुर्यात्छाद्धकाम्यं तथा खिलदर्श
श्राद्धं गयाश्राद्धं वा परपक्षिकं। न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणमिति ऋतुलौगाक्ष्योर्विशेषपरिगणनं तत्पक्षाति
रिक्तमाति सपिंडनैकोद्दिष्टाद्यनुज्ञानापात्र यात्र्वगयाश्राद्धंमत्यां मातुश्च तेइनिमात्रस्यापि तुतः कुर्यात्पितर्यपिजीवति

नेनमृताहादिश्राद्धमात्रमेवापठेत्तन्नवश्राद्धादिप्रभृतिष्वमेवहेवमाननलक्षणाम्राद्यपाह कात्यायनः । हुतोदीर्घेवसंन्यस्तेनानेचप
तितेसतितेभ्यएवदपिनाद्द्यात्स्वयंजनइतिपतितश्चात्रापपातितः । अनयपातितस्यतु गोत्राण्यलनानंतु पतितानांवचाऊर्ध्वसंव
त्सरात्ऊर्ध्वंमिवोर्ध्वदैहिकानिस्याद्दिनामाहविधानमाचरेत्तथा ब्राह्मणादिहतेऽपि ब्राह्मणादिहतेनापेक्षन्ते नेमगबाजिने । शुक्र
मात्रं मृते देयं येभ्य एव ददात्यसौ विशिष्टश्राद्धमन्त्रैरस्माभिः । ब्राह्मणादिहते पितरि संवत्सरानंतरं तेऽऊर्ध्वदैहिकविधानात्त्रै
महपितामहादिश्राद्धमपारवणं तु पितामहादिश्चैकोप्यसतो पौत्रेणत्दधिकारश्राद्धंसाहं स्वयं कर्तव्यमिन्नुत्ततो
एवमपातितेपिति जीवतिशिष्टैर्न्यायेन पितामह्यादि कर्तव्यो शोऽप्यनादि भेतृत्वस्थानेविष्णुमुद्धार्यततः परम्पांहाभ्यंदा
भ्यां श्राद्धं कर्तव्यं पथाहरम्पत्रैमाता तोऽकन्नमापन्ना पितावापि कदाचमेनतु एकस्मापितरं विष्णुमुद्धार्यततः पंचपितामहादा
तीयचनलमोते चूपापिंडइवात्रयज्ञेरितिकात्यायनमतेऽत्र एवमपवेत्तिवहस्तत्त्वत्रणापितामहादिभ्यएवबहिष्यइति । अनप
पातितेन तोऽते लिंगआयं श्राद्धं नारिकोर्ध्वंतिक्रं वर्तितो वातत्तु हिपवंतनदधिकारश्राद्धंपौत्रेणश्राद्धं कर्तव्यं मुख्यने तेस्य
हिपुत्राङ्गप्रोक्तश्राद्धविधि महालयेतुयज्ञेऽकादरणपार्वणेनतद्दिनेसंगुरणीयवचनं । तथासपिंडीकरणपक्षेयस्यपिता प्रेत

स्यादित्या द्वितीयं मूलएवस्यष्टमिति लिंतस्यैवा एवं संन्यस्तेपि महारीजीवतित द्कारप्राप्तं सर्वश्राद्धं पौत्रेण कर्तव्यं। मृतेतु स्यैवा। एवं युक्तमस्मृते सपिंडानामाव पक्षे प्रेतत्वनपाये नहद्धिश्राद्धा धयोग्पतयाउत्र तन्मादौ वृद्धि श्राद्धादि लोपे प्राप्ते प्रति गृह दीनामे वश्राद्धं कर्तव्यमिति नियमे तत्तश्राद्धं प्रतिपादकानके वचनाविरोधः। स्मार। तेषु तावज्जीवज्ञाह्मणहतानामित्येक मनेरनेवादाहातं षट्त्रिंशन्मती यां। तत्रचगवादिहते पितरि पिनामाहस्यैव श्राद्धकरणिसच्चयाति। तत्रादित्रिकेन्यतरस्य पितृजीवत्वेन धिकारएवं त्येक:। तथाच निगमे एकस्मिन्नपि जीवत्यदानीमिति कात्यायनस्मृति। जीवेत मुत्रं श्येत रेभ्य स्त्रिभ्यो दद्यादिति द्वितीयः। सच मूल एवाभिहितः। श्वतमात्रस्यैव श्राद्धकरणमिति तृतीयः। तथाच भविष्यत्पुराणे। जीवमा ने। जीवमानेन दद्यं। स्याद्यस्मा द्वरतसनम। तस्माजीवत्पिता कुर्याद्वाभ्यामेवनसंशयइति। जीवदत्तु ज्ञयात तोन्ये षां स्मृणाति चतुर्थः। कामं वातदत्तु ज्ञात इति मनुस्मरणात्। जीवंतं भोजयीत्वा। परयो रितिपंचमः। पितरंभोजयित्वा तुपिंडे निरृणुयात् परइति मनुस्मरणात्। जीवंतं भोजयीत्वा परयोरिति पंचमः। पितरं भोजयित्वा। परयोरितिपंचमः। पि तरइति यज्ञपार्श्वपरिशिष्टात्। पितरमित्युपलक्षणं। तेन पितामहं प्रपितामहं वा जीवंतं भोजयित्वा तुपिंडौ निरृणुयात् परइति यज्ञपार्श्वपरिशिष्टात्। पितरमित्युपलक्षणं। तेन पितामहं प्रपितामहं वा जीवं तरंभोजयित्वा तुपिंडौ निरृणुयात् परइति यज्ञपार्श्वपरिशिष्टात्। पितरमित्युपलक्षणं। तेन पितामहं प्रपितामहं वा।

वि॰ ३५
१२१७

तं भोजयित्वाऽन्ययोः पिंडौ देयौ। यो जीवति पितॄणां तं भोजयेत्स्वपितृस्थाने इत्येक इति निर्णयमात् त्रीन् पिंडान् कृत्वा जीवतः
पिंडं तेनैव दद्यादिति ष॰ः। तथा च यज्ञपार्श्वः। त्रीन्वा पिंडान् समारोप्य मध्यमं तेन भोजयेत्। द्वौ पिंडौ ब्राह्मणे दद्यादग्ना
वेऽम्भसि वा क्षिपेत्। उभौ यदि च जीवेतां तौ तु जीवे जीवपितामहः पिंडौ निष्पृणुयात् वै भोजयेच्च पितामहमिति मध्यम इति प्रथम
स्याद्युपलक्षणं द्वौ पिंडाविति लिंगात् जीवति होमांतं कृत्वान्येषां कुर्यादिति सप्तमः। तथा च यज्ञपार्श्वः। होमांतः पितृयज्ञः
स्याज्जीवे पितरि नामतः। पितरं भोजयित्वा तु वा पिंडौ निष्पृणुयात्परौ। जीवतो होममात्रं पाणौ नान्नाकार्यं। नान्नोत्सर्गः पिं
डदानादि परयोस्तु पिंडादि सर्वं कार्यमिति। विशेषांतरं तु श्राद्धकल्पलतायामेवास्माभिः प्रपंचितमिति नेहोच्यते। किं
च॥ ॥पितरि पितामहे प्रपितामहे च जीवति नैव कुर्यात्॥३॥ अयमभिसंधिः पितुर्जीवत्पितृपितामहकत्वे पितामहीय
दि पितृपितामहानामेव श्राद्धदेवतात्वेन चतुर्थस्यापि येषां पितेति च वचनात्तेषामेव श्राद्धमात्रविदस्तूच्यते पित्रादि[?]
षु जीवत्सु श्राद्धमेव न कुर्यात्। किं तु यत्र श्राद्धप्राप्तिस्तानेवार्चयेत्। तदुक्तं मत्स्येनाह॥ ॥यस्य पितामहाद्यो पि
तेः स्यात्स पित्रे पिंडं निधाय पितामहात्परं द्वाभ्यां दद्यात्॥४॥ मृतपितृको जीवत्पितामहः पि जीवे वै पितर्येव सामाप
येदिति हारीतीयात्॥ ॥यस्य पिता पितामहश्च प्रेतौ स्यातां स ताभ्यां पिंडं दत्वा पितामहाय दद्यात्॥५॥ ॥मृतपितृपितामह

१२

कोजीवत्प्रपितामहाकस्यपितृपितामाहयोः पिंडौदत्वावृद्धप्रपितामहायपिंडदद्यात्॥ ॥यस्यपिताम
हः प्रेतःसतस्मैपिंडंनिधायप्रपि तामहात्परंद्वाभ्यांदद्यात्॥६॥ ॥योजीवत्पितृप्रपितामहकःसपि
तामहपिंडंदत्वावृद्धप्रपितामहतात्पितृभ्यांपिंडंदद्यात्।पूर्वोक्तविध्यतिदेशमाह॥ ॥मातामहानामप्ये
वंश्राद्धंकुर्याद्विचक्षणः।मंत्रोहेणयथान्यायंशेषाणांमंत्रवर्जितं॥७॥ ॥येनविधिनायत्राष्टकादौ
यथाप्युक्तमस्मृतौवपित्रादिश्राद्धमुक्तंतथैवतत्रतेनक्रमेणमातामहानामपियर्थास्यात्तद्यथा
।पितरोयत्रपूज्यंतेतत्रमातामहाअपीतिवचनेजीवदजीवत्पितृकयोरविशेषेणमातामह
श्राद्धप्राप्तेतत्रसर्वपूर्वोक्तंविपदेवादिविसर्जनांतमतिदिश्यते।तत्रमातामहेजीवतितत्पि
तृणामेवमातामहयोजीवतोःप्रमातामहपितृणांचिपुजीवत्सुनैवश्राद्धंकिंतुपूजनभोजन
योरन्यतरद्दित्याद्युक्तंयांएवमन्वष्टकावृद्ध्यादौयत्रमातृश्राद्धंतत्रपक्षेमात्रन्यतरस्याजीवित्वेय

वि॰ टी॰
१३०

मेवप्रकारस्मात्मनायत्वादित्याह॥ वहूवचनंत्रित्वाभिप्रायेणयथाहमनुस्मृतः॥ मातुःपितरमार
भ्यत्रयोमातामहाः स्मृताः॥ तेषांतुपितृवच्छ्राद्धंकुर्युर्दुहितृसूनवइति॥ पितृवन्निसंपाद्येणेत्य
र्थः॥ पार्वणंतत्कुर्यात्स्वकेवलेपितृकारणात्॥ मातामहेनत्कुर्यास्तेपितृणांसप्रजायतइति आश्वला
तः॥ अस्यापवादमाहकात्यायनः॥ कर्षसमन्वितंमुक्त्वातथाद्यंश्राद्धषोडश॥ प्रत्याब्दिकंचशेषेषुपि
डाःस्युःषडितिस्थितिरिति॥ कर्षसमन्वितंसपिंडीकरणं॥ पुत्रिकापुत्रेविशेषमाहमनुः॥ मातुः
प्रथमतःपिंडंनिर्वपेत्पुत्रिकासुतः॥ द्वितीयंतुपितुस्तस्यास्तृतीयंपितुःपितुरिति॥ विशेषांत
रमाहजातूकर्ण्यः॥ अप्रत्यहंपर्वणितेनैवविधिनाक्षेत्रजौरसौ॥ कुर्यातामितरेकुर्युरेकोद्दिष्टंसुतादशेति
॥ विशेषांतरमाहजातूकर्ण्यः॥ प्रत्यहंपर्वणितेनैवविधिनाक्षेत्रजौरसौ॥ कुर्यातामितरेकुर्युरेकोद्दिष्ट
सुतादशेति॥ तत्रयत्रनाममंत्रेषुवैदिकमंत्रेषुवापितृनावहयिष्येशुंधंतांपितरइत्यादौपितृश॥

राम

द्रष्टव्यं यथान्यायं प्रथमांते प्रथमांतं द्वितीयांतमित्यादिप्रकारेण मातामहश्राद्धस्योहेन कार्यं । ऊ
हापवादमाह शिष्याणां पितृव्यमातुलआचार्यादीनां श्राद्धममंत्रकमेव पितृपदवन्मंत्ररहितमेव कुर्यात
। तेन च सुंधेतां पितर इत्यादिमंत्रसाध्यं क्रियामात्रमेव कार्यं न मंत्रप्रयोग इति ॥ ॥ ॥ इति श्री
धर्माधिकारि रामपंडितात्मज नंदपंडितकृतौ विष्णुस्मृतिविवृतौ श्रीमत्यां वैजयंत्यां पंचसप्ततितमो
ध्यायः ॥ ७५ ॥ ॥ श्राद्धकालानंतरं षट्सप्ततितमाध्यायेनाह ॥ ॥ अमावास्यास्तिस्रोष्टकास्तिस्रोन्वष्टकाः मा
घी प्रौष्ठपद्यूर्ध्वं कृष्णत्रयोदशी व्रीहियवपाकौ चेति ॥ १ ॥ अमावास्या द्वादशतिस्र इति हेमंतशिशिरयोश्च
तुर्णामपरपक्षाणामष्टमीष्वष्टका इति शाखांतरीयवचनं तदुक्तनिराकरणार्थं तत्र च फाल्गुनकृष्णपक्षीया
निरस्यते । ऊर्ध्वमाग्रहायण्यास्तिस्रोष्टका इति कात्यायनीयात् । अष्टमासु भवा अन्वष्टका नवम्य इति
नैनैव त्रित्वसिद्धौ पुनर्वचनेति सर्वासामष्टमीनां ग्रहणार्थं सर्वदा । पितृभ्यो दद्यादित्याश्वलायनीयात्

माघीत्याषाढीकार्त्तिकीवैशाखीनामुपलक्षणं। आषाढीकार्त्तिकीमाघीवैशाखीषु नराधिपाः। श्राद्धं कु
र्वीत प्रयत्नेन तदनंतफलं स्मृतमिति ब्राह्मोक्तेः। अन्ये तु माघीति प्रोष्ठपद्यूर्ध्वकृष्णत्रयोदशीविशेषणमाहुः।
तत्र माघी मघायुक्तेत्यर्थः। प्रोष्ठपद्याः पौर्णमास्या ऊर्ध्वं कृष्णत्रयोदशी केवलैव प्रकृष्टकालेऽसितपक्षे त्रयो
दश्यामिति वक्ष्यमाणात् मघायोगे तु फलविशेषो ब्राह्मे। प्राप्य तु स्नावकृष्णपक्षे त्रयोदश्यां मघासु
चैतस्तु पक्षे मघयुक्तायां तु पितरो गृह्णन्त्यस्मात् तमदृष्यमित्यभिधानात्। तत्रैव हंसस्थे रवौ गतच्छायेति
पद्मेऽपि। पितृदेवस्तु हंसस्थे च केऽपि स्थितः। या स्यात्तिथिर्भवेत्सा हि गजच्छाया प्रकीर्त्तितेति स्मरणात्। श्री
हिपाकः शरत्यथवा पाको वसंतः। तत्र नवाभ्यां श्राद्धं नित्यं व्रीहिपाके च कर्त्तव्यं यवपाके च पार्थिव। न ता
वाद्यो महाराज विना श्राद्धं कथंचनेति विष्णुधर्मोत्तरात्। चकारान्महालयापरपक्षादीनां ग्रहणं। शा
केनाप्यपरपक्षं नातिक्रामेदिति स्मरणात्। अत्रैवापादांतरमाहुः तिथ्योरुक्ता कास्विदत्र स्वर्ववंतुः प्रोष्ठपा

देहेमंतशिशिरयोरपरपक्षेषुत्रयोदशीत्रीहिनिर्वपेदर्घायोगइतिहेमंतशिशिरयोस्त्रिष्वपरपक्षेष्वितिसो
ष्टकाइत्यष्टकात्रयः। प्रोष्ठपदेत्रयोदशीत्यष्टका। एवंपित्र्योष्ठपदनाम्यष्टकाचयः। संभवतिसंभिवानाह
आन्नवरदर्शीनाव तथापिनासावभिप्रेतस्मिन्त्वनितिशेषात्श्राद्धशेषयोगत्रीहियवयोः आमिश्रन्येषु
रन्यथापदंतिमाघीपौर्णमासीप्रोष्ठपदस्वई कल्पेत्रदशिमघात्रयोदशीत्रीहिनिर्वपेदर्घायोगइतिप्राग
आग्रयणेष्टिः त्यदानंतरंताभ्यांश्राद्धमित्यर्थः एषांनित्यत्वमाह॥ एतांश्चश्राद्धकालान्वैनित्यानाह प्रजाप
तिः। श्राद्धमेतेष्वकुर्वाणोनरकंप्रतिपद्यते॥१॥ ॥एतान्शृण्वीक्ताननमावास्यादीन्श्राद्धविषयान्प्रजाप
तिः। परमात्माप्राहेतिप्रसिद्धमेवतत्रहेतुमाह। यतएतेषुकालेषुश्राद्धमकुर्वन्नरकमाप्नोति। यथा
हमनुः। ननिर्वपतियःश्राद्धंप्रमीतपितृकोद्विजः। इंदुक्षयेमासिमासिप्रायश्चित्तीयतेहिसइति
। एवमन्यत्राप्यकरणप्रत्यवायवचनमूह्यं॥ ॥४॥ इतिश्रीधर्माधिकारिरामपंडितात्मजनंदपंडित

हेतौश्रीमत्यांवैजयंत्यांचबहुसम्मतमित्यध्यायः॥१०८॥ ॥नित्यश्राद्धंकाम्यंनैमित्तिकश्राद्धका
लनं हि॥ ॥आदित्यसंक्रमणं॥१॥ ॥आदित्यस्यशेषराश्यंतरगमनंसंक्रमणं॥आदित्यग्रहणंचंद्रादिसं
क्रमणनिवृत्त्यर्थं।तत्रैवमिथुनान्तराशेषराशिसंक्रमेस्पर्शात्पर्वापरेषुनाड्यः।पुण्यास्यु
र्थंदोषिद्विवराह्लेषुगकेवनाडिषुनिमिषंस्तुगोवेनाड्यस्तत्स्वःसफलाःकुजस्थ॥२॥वृषस्यतिलो
मनयःफलानि॥३॥४॥सार्द्धघ्नताःस्वःफलसम्पुत्रात्तुरोस्थ६॥पंचरामुक्तेसफलाश्चतस्त्वः॥५॥
ढ्डिनागनाड्यःपलसंपुक्ताशंनेश्वरस्याभिहिताःसुपुण्याः॥६॥आद्यंतमध्येष्वपादनाडीमेजुर्वने
वाभ्रोतिनरेंद्रधामीतिकालत्रयेकमेत्रयाभिधानेनश्राद्धकालमावात॥ ॥विषुवद्द्वयं॥२॥विषुव
तोस्तुलामेषयोर्द्वयंपरापरसंक्रमत्वेनैवप्राप्तिस्तथापिफलातिशयपाठात्पृथग्निर्देशः॥अनेनंवि
षुवेश्राद्धमितिस्मरणात्॥ ॥विशेषेणायनद्वयं॥३॥ ॥अयनयोर्मकरकर्कटयोर्द्वयंविशेषण॥

श्राद्धकालत्त्वयने चाद्यं पंस्मृतमिति स्मरणात् ॥ ॥ व्यतीपातः सप्तदशो योगः पारिभाषिको योगविशे-
षो वा। यथाह हेमाद्रिः। श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके। यद्यमा रविवारेण व्यतीपातः स उच्यते
इति। नागदैवतमाश्लेषा। मस्तकं मृगशिरः। परिभाषांतरमप्याह नरहिंसः। पंचाननस्थौ गुरुभूमिपुत्रौ
मेषे रविः स्यादिति शुक्लपक्षे। पाशाभिधाना करभेण युक्ता तिथिर्व्यतीपात इतीह योगः। पंचाननः सिंहः पा-
शाभिधाना द्वादशी। करभं हस्तः॥ ॥ जन्मसु॥ ५॥ आत्मनः पुत्रस्य भार्यायाश्च जन्मन इदं श्राद्धं तत्पु-
त्रकलत्राणां जन्मश्राद्धमाचरेदित्यादिपुराणात्। यद्यपि जन्मशब्द इति सामान्येनोक्तं तथापि पुत्रस्यैव द्र-
ष्टव्यं इति द्रष्टव्यं जनने ग्रहपीडायां सर्वमानं स्यमस्तु ते इति मानवात्। तच्च निषेधेन जन्मदिने श्राद्धनिषेधा-
त्। यथा भारते नन्दायां च नक्षत्रे वीतपायसं जातो भवेन्नर इति श्राद्धमित्यर्थः तत्रैव तेषामभ्युदयश्राद्धं॥ ६॥ अ-
भ्युदयः पुत्रजन्मादिः। यथाह गार्ग्यः। गर्भाधाने पुंसवने सीमंतोन्नयने तथा। जातकर्मणि नाम्नि लोकन

नि॰ सी॰
१३२

निष्क्रमणादिषु । अन्नप्राशने चूडाहुतयोपनयने पि च । वेदव्रतसमावर्त्तौ विवाहे पुत्रकन्ययोः । गृह
प्रवेशे वापीनेहेनदानभोज्ये नीदेवारामतडागादिप्रतिष्ठासु तथैव च महालयेषु सर्वेषु पाकयज्ञेषि
याहुत्यां श्राप्रमगृहणे तेव होमेष्वारंभयोरपि वेश्मे वारंभणे चोपाकर्मोत्सर्गयोरपि दीक्षाहं समाव
र्तने इति । चकारात्तद्याहादिनो ग्रहणं मातापित्रोः स्याहेव श्राद्धाहं द्वयदिव्ययोः । कश्यपदे श्राद्धं स
वो श्राद्धं कुर्यात्प्रयत्नत इति स्मरणात् । एषां नैमित्तिकत्वमाहुः ॥ ॥ एतानि श्राद्धकालान्येकाम्याने
हप्रजापतिः श्राद्धमेतेषु यद्दत्तं तदानंत्याय कल्पते संक्रान्त्यादयः कालाः काम्याः काम इच्छा श्राद्धस्य विष
मनुष्यरंतीति काम्याय यथा श्राद्धेच्छायां सत्यामैहिकं श्राद्धमनुष्ठीयते तथा संक्रान्त्यादिकालप्राप्तावपी
दमनुष्ठेयमित्येषां नैमित्तिकत्वं वा अमत एवैषामिच्छासमनियाहारेण नैमित्तिकत्वं स्पष्टीकृतं मार्कंडे
येन विशिष्टब्राह्मणप्राप्तौ सूर्येन्दुग्रहणेऽयने विषुवे रविसंक्रांतौ व्यतीपाते च उत्तमश्राद्धं द्व

राम॰
१३२

संपन्नौ तथा दुःस्वप्नदर्शने । जन्मर्क्षे ग्रहपीडासु श्राद्धं कुर्वीत चेच्छयेति । यथाश्राद्धे ब्रारूपे निमित्ते श्राद्धं क्रि
यते तथा ग्रहणादिनिमित्तेष्वपि कार्यमित्यर्थः । अन्यथाऽकरणे प्रत्यवायश्रवणादुपपन्नेः । तथा च
दिपुराणे । एवं स्वनापि कर्तव्यं श्राद्धं वैराग्यदर्शने अकुर्वाणास्कृतघ्नाद्दूपंके गौरिव सीदतीति । य
द्यै नैमित्तिकं काम्यं ह्येषां ज्ञानेऽपि वत्सवलिताधिकारस्यात्र । नैदं वचस्य षष्ठीकृतं ऊर्मपुराणेन मि
त्तिकं तु कर्तव्यं ग्रहणे चंद्रसूर्ययोः । बांधवानां च मरणे नारकी स्यादतोऽन्यथा । काम्यानि चैव श्राद्धानि
शस्यंते ग्रहणादिषु अयने विषुवे चैव व्यतीपातेऽप्यनंतकं । संक्रांत्यामक्षयं श्राद्धं तथा जन्मदिनेष्व
पि । नक्षत्रेषु सर्वेषु कार्यं सामान्यं विशेषतः इति तत्प्रशंसामाह । एतेषु संक्रांत्यादिकालेषु यद्दत्तं श्राद्धं
तदनंतत्वाक्षितकं भवति । श्राद्धे निषिद्धकालमाह ॥ ॥ संध्यारात्र्योर्न कर्तव्यं श्राद्धं खलु विचक्षणैः ॥ ॥ वि
वस्वतो निषेधशास्त्रविधीः । सं[illegible]या रात्र्योर्य श्राद्धं न कार्यं संध्यानिषेधात् संध्यासामीप्यमपि निषि

ष्यते सायाह्ने त्वथ वा कुर्यान्नातिसंध्यासमीपमपि निषिध्यते सायाह्ने त्वथ वा कुर्यान्नातिसं
ध्यासमीपत इति स्मरणात्। गौणकालत यथा तस्यापि ग्रहणं कालत यथा स्तुतस्यापि ग्रहणोत्तरकाल
ति नभे कुर्याज्ज्ञाने हर्वेत यावधिरिति। आशौचे भवत्समापनमपि निषिद्धं। नवमत्वं आह कौधीतारह्वे
चाभोज्ञानमासमापनादिकापक्षवीयात्। अरण्याः। आह समापरःखे कृतस्थितारणाद्दिलं वे मध्येय
दि सूर्यास्तमने आह कर्तुं भोजनमुपवासो यावत्स्वैरग्रः पिंडदाने भवति न तु रात्रौ समापनमिति। प्र
तिप्रसवमाह।। ।।तयोरविवेकर्तुं बंधमपदिस्याजाहूदर्शने।। ।।संध्यायां रात्रौ वा यदि सूर्याचंद्रमसो
ग्रहणं भवति तदा तन्निमित्तं आह भवत्येव राहुदर्शने पुत्रजन्मनोऽप्युपलक्षणात्पुत्रजन्मोनियहे
च तथा चात्ययकर्मीति।। राहोश्च दर्शने आह प्रशस्तं नान्यदा निशीति स्मरणात्। ग्रहण आह प्रसति
।।राहुदर्शनदत्ते हि आह मावंद्रतारकं। गुणावत्सर्वकामीये पितॄणामुपतिष्ठते।।८।। ।।राहुदर्शं

द्रष्टव्यो परागस्तत्र कृतं श्राद्धं पितॄणां यावच्चंद्रतारकानस्थानमुपतिष्ठते। कर्तुश्च गुणातिशयवत्सर्वकाम
साधनं भवतीति॥ ॥इति श्रीधर्माधिकारिरामपंडितात्मजनंदपंडितकृतौ विष्णुस्मृतिविवृतौ श्रीमत्या
वैजयंत्यां सप्ततितमोऽध्यायः॥ ॥७७॥ ॥क्रमप्राप्तं काम्यश्राद्धकालमष्टसप्ततितमोऽध्यायेन
ह॥ सततमादित्येऽह्नि श्राद्धं कुर्वन्नारोग्यमाप्नोति॥१॥ आदित्यवारे श्राद्धं सार्वकालिकारोग्यहेतुः॥ सौ
भाग्यं हेतुः॥ ॥सौभाग्यं चांद्रे॥२॥ ॥चंद्रवारे सौभाग्यं जनप्रियत्वं॥ ॥समरविजयं कौजे॥३॥ ॥भौमवारे सं
ग्रामे शत्रुजयं॥ ॥सर्वान्कामान्बौधे॥४॥ ॥बुधवारे धनपुत्रादिकामान्॥ ॥विद्यामभीष्टां जैवे॥५॥ ॥गुरु
वारे स्वाभीष्टां विद्यां धनं शौक्रे॥६॥ ॥शुक्रवारे सुवर्णादि धनं॥ ॥जीवितं शनैश्चरे॥७॥ ॥शनिवारे दी
र्घमायुः आप्नोतीति प्रत्येकं संबध्यते। ववादिकरणे प्रत्येतान्येवा फलानि ज्ञेयानि। सूर्यादिवासरेषु
युक्तादिकरणे तत्फलं। ववादिकरणेष्वतद्युक्तकरणे तत्फलमिति बार्हस्पत्यात्॥ नक्षत्राण्याह

॥ ॥स्वर्गं कृत्तिकासु॥८॥ स्वर्ग इंद्रादिलोकसुखं॥ ॥अपत्यं रोहिणीसु॥९॥ अपत्यं पुत्रादि॥ ॥ब्रह्मव
र्चसं सोम्ये॥१०॥ ॥सोम्यं मृगशिरः॥ब्रह्मवर्चसं ब्रह्मतेजः॥ओजो वा॥ कर्मसिद्धिं रौद्रे॥११॥ कर्मणामैहि
कानां सिद्धिः फलप्राप्तिः॥ रौद्रं वा रौद्रमार्द्रा॥ ॥धनं पुनर्वसौ॥१२॥ ॥धनं हेमादिरूपं॥ ॥पुष्टिं पुष्ये॥
१३॥ ॥पुष्टिरवयवोपचयः॥बलं वा॥ ॥श्रियं सार्पे॥१४॥ ॥सार्पमाश्लेषा नक्षत्रं श्रीः संपदं वा लक्ष्मीर्वा॥
॥सर्वान् कामान् पैत्र्ये॥१५॥ पित्र्यं मघा तत्र सर्वान् कामान् अभीष्टं वा॥ ॥सौभाग्यं भाग्ये॥१६॥ भाग्यं पूर्वाफाल्गु
नी सौभाग्यमाख्यातं॥ ॥धनमार्यमणे॥१७॥ ॥आर्यमणमुत्तराफाल्गुनी तत्र धनं समृद्धिं वा॥ ॥
ज्ञातिश्रैष्ठ्यं हस्ते॥१८॥ ज्ञातिषु स्वपिंडेषु श्रेष्ठत्वं॥ ॥रूपवतः सुतान् त्वाष्ट्रे॥१९॥ ॥त्वाष्ट्रं चित्रा रूपवतः
सुदर्शनान् सुतमेव॥ ॥वाणिज्यसिद्धिं स्वातौ॥२०॥ वाणिज्यं क्रयविक्रयो तयोः सिद्धिः फलप्राप्तिः अप्र
तिहता ज्ञेया॥ ॥कनकं विशाखासु॥२१॥ ॥कनकं सुवर्णं॥ वाणिज्यं कृषिकुसीदगोरक्षा वा॥ ॥

मैत्रे ॥२२॥ मैत्रमनुराधा। तत्र मित्राणि सुहृदश्च रोगित्वं वा ॥ ॥ राज्यं शाक्रे ॥२३॥ शाक्रं ज्येष्ठा। तत्र राज्यं
यशो वा ॥ कपिं मूले ॥२४॥ कपिं कृषिफलं निःशेषातं वा ॥ ॥ समुद्रयानं सिद्धिमाप्ये ॥२५॥ ॥ समुद्रे
यानेपोतसमागमं वा मित्राप्येऽश्वीषाढासु ब्रह्मलोकप्राप्तिं वा ॥ ॥ सर्वान्कामान्वैश्वदेवे ॥२६॥ ॥ वैश्व
देवमुत्तराषाढा। तत्र सर्वकामावाप्तिं वा ॥ श्रेष्ठमभिजिति ॥२७॥ ॥ अभिजिदुत्तराषाढायाश्चतुर्थः पा
दः श्रवणस्याद्यं घटीचतुष्टयमेवमेकोनविंशतिदण्डात्मकसंधिभागस्तत्र श्रेष्ठत्वं ॥ ॥ सर्वान्कामान्श्रवणे
॥२८॥ श्रेष्ठार्थी वेदान्वा ॥ श्रवणं वासवो ॥२९॥ वासवं धनिष्ठा। तत्र लवणं जवणक्रियासिद्धिः। सौदेय
निदानं वा ॥ अथ फलावाप्तिं वा ॥ ॥ आरोग्यं वारुणे ॥३०॥ वारुणं शतभिषा। तत्रारोग्यं कुप्यं वा ॥ ॥ कुप्य
द्रव्यमाजे ॥३१॥ ॥ आजं पूर्वाभाद्रपदा। तत्र कुप्यं ताम्रपित्तलादिगाः वा ॥ ॥ गृहमाहिर्बुध्न्ये ॥३२॥ ॥ आहि
र्बुध्न्यमुत्तराभाद्रपदा। तत्र गृहजाव ॥ ॥ गाः पौष्णे ॥३३॥ पौष्णं रेवती। तत्र गाश्चवीन्धति योगिश्वरा ॥७

वि॰ टी॰
१३६

रंगमानवशिनो॥३४॥ ॥आश्विनादश्विनी॥ गजौ वितंत्याम्बे॥३५॥ ॥यामं यमरणीनी वितमातुःश्य
नोतीति प्रत्येकमत्रापि संबध्यते। विष्कंभादियोगेषु एतावत्येव फलानीति न पृथगभिधानं। यथाह मरी
चिः। कृत्तिकादिषु नक्षत्रेषु आह्वयतुल्यफलमीरितं। विष्कंभादिषु योगेषु तद्वत्फलमस्तु तदितीतिविराहा॥
॥राक्षसे सुरूपः श्रियः प्रतिपदि॥३६॥ ॥राहुर्वा रसतु वेदहेतुः सुंदरीभार्यो यश्च प्रतिपक्षाइनाप्नोति। क
न्यावा योगिरमरणात्सुरूपान्पुत्रान्वामानवानत्॥ ॥कन्यो वरदघाडितीयायां॥३७॥ वरदामभीष्ट
प्रदोकन्या। जमातन्वा॥ ॥सर्वान्कामांस्तृतीयायां॥३८॥ ॥सर्वेकामाः पशुपुत्रादयः पशुन्वा योगिरमर
णात्सवेदिनो वा मानवात्॥ ॥पशुश्चतुर्थ्यां॥३९॥ ॥पशुन् आदीन् सुदुरतांसतुतान्वा॥ ॥सुरूपान्सुता
न्पंचम्यां॥४०॥ ॥सुंदरान्पुत्रान्दूतविजयषष्ठ्यां॥ ॥४१॥ ॥द्यूतमक्षादिभिः सजहविजयं कृषि
फलं वा॥ ॥कृषिं सप्तम्यां॥४२॥ कृषिं कृषिफलं वाणिज्यं वा॥ ॥वाणिज्यमष्टम्यां॥४३॥ वाणिज्यकृषय

राम॰

फलं क्लिशफान्ना ॥ ॥षष्ठ्यां नवम्यां ॥६४॥ ॥षष्ठ्यां नेकशफान्नाम्यादीनेकशफाम्यादीनेकशफां म
थेति योगिस्मरणात् ॥ ॥वाजिनो दशम्यां ॥६५॥ वाजिनोऽश्वान् ब्रह्मवर्चस्विनः पुत्रान्वा योगिस्मरणात् ॥ द्व
स्तु रं वामानवान् ॥ ॥पुत्रान् ब्रह्मवर्चस्विन एकादश्यां ॥ ॥६६॥ ॥ब्रह्मतेजोयुतान् पुत्रान् स्वर्णरूप्यं वा
योगिस्मरणात् कंवलं रूप्यं वामानवान् ॥ ॥कनकं रजतं द्वादश्यां ॥६७॥ कुप्यं वा योगिस्मरणात् ॥ ब्रह्म
वर्चस्विनः पुत्रान् स्वर्णरूप्यं वामानवान् ॥ ॥सौभाग्यं त्रयोदश्यां ॥६८॥ सौभाग्यं ज्ञातिश्रैष्ठ्यं योगिस्म
रणात् ॥ ॥सर्वकामांश्चतुर्दश्यां ॥६९॥ सर्वकामाः पूर्वोक्ताः पंचदश्यमावास्या यद्यप्यविशेषेण मास
पक्षो गम्यते तथापि भाद्रपदयोः कृष्णपक्षो न धेयः । कालतः इति तो मासौ माघप्रोष्ठपदावुभौ
पक्षयोः श्राद्धपक्षो हि बहुलः श्राद्धपूजित इति देवलस्मरणात् । यत्तु नंदायां भार्गवदिने त्रयोदश्यां
त्रिजन्मनि । एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयात् । प्राजापत्ये च पौष्णे च पित्र्यर्क्षे भार्गवे तथा । भर

वि॰टी॰
१३७

णीःक्तिकांचैवसांवत्सरेविशेषतः। यस्मात्श्राद्धं प्रकुर्वीत तु स्यपुत्रा विनश्यतीत्यादितिथीवारर्क्षादिशे
षेगार्ग्यः श्राद्धनिषेधः सप्तपिंडकश्राद्धविषयः मानैमेमेत्रयोदश्यां नंदासु मघासु च। पिंडदानं च
दास्नानं न कुर्यात् तिलतर्पणमिति तद्वेवचनात्। स चायं निषेधः सनिमित्तक एव श्राद्धेनास्ति नि
नकोतिथिवारनक्षत्रयोगदोषः सद्गृहीतः। सनिमित्तके श्राद्धे नान्यश्राद्धे कदाचनेत्यपि स्मर
णात्। चतुर्दशीश्राद्धविषमाह॥ ॥शस्त्रहतानां श्राद्धं कार्यं चतुर्दशी प्रसक्ता॥५०॥ ॥शस्त्रमपमृत्यु
मात्रप्रदर्शनायशस्त्रोपहतलोष्ठकाष्ठविषपुच्छजलपाषादिभिः। नरविवदष्ठि विपन्नानां तेषां शस्त्रात्
तुर्दशी तिथावेतत्सात्तत्कमेघमेकोद्दिष्टताप्रदर्शनाय। चतुर्दश्यां तु यच्छ्राद्धं सपिंडीकरणात्परं। एको
द्दिष्टविधानेन तत्कार्यं शस्त्रघातिन इति पारापयात्। चतुर्दश्याः श्राद्धं नान्यतिथावप्यनुज्ञा
यते। तेषां प्रत्याब्दिकं श्राद्धं स्वस्वमृतपार्वणं भवेत्। प्रेतपक्षे चतुर्दश्यामेकोद्दिष्टविधानत इति स्मरणात्

रा॰म॰०
१२७

त्यागत्सदैकोद्दिष्टमपि सदैवं दैवपुत्रः तत्श्राद्धं पितॄणामक्षयं सदैव तत्श्राद्धं दैवहीनं चेत्तु वदामयन
यइति स्मरणात् ॥ शङ्खहरितमामिति वह्नवचनात् द्वयोश्च पार्वणं वा स्यात् अथातएकोद्दिष्टद्वयं च पार्वणं कार्यं
वा स्मिन् द्वयोर्वैकोद्दिष्टविधिरिति शंखस्मरणात् तानि च पिशाचहते श्रुणुष्व यो गोकोद्दिष्टं द्वयोरेकोद्दिष्टं
यामिति हेव स्वामिवचनात् एकोद्दिष्टं तु पार्वणमाह्रःपिताद वयश्चयो यस्य शस्त्रघातेन हताः क्रमात् ॥ स
ऋते पार्वणे तेषु योदशद्विकानि एकं इति पारस्कर्याः ॥ अत्र मतं चैतत् परार्केणापि त्रयाणां तथा लेपार्व
णमेवेति ॥ त्रयोदशी श्राद्धं श्रावश्ये सर्व्वतिथाह ॥ ॥ अथ पितृगीतगाथा भवत ॥ पु ॥ पितृ निरश्रिष
त्वादि मिगीते पठितेगाथे श्लोकौ ते आह ॥ ॥ अपि तायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः ॥ ... टूका
लेसितपक्षे त्रयोदश्यां समाहितः ॥ ५१ ॥ मघायुक्ते नयः श्राद्धं पायसेन समाचरेत् ॥ ... ... लेम
हं श्राद्धं एकं जरसंव ॥ ५३ ॥ सर्वकाश्चिन्नरोत्तमोऽस्मत्कुलेत्र श्राद्धि सदैहि त्रादिष्टवान्नायेतापि

वर्षासु कृष्णपक्षे त्रयोदश्यां मघावहितः प्रभूतकटमधुघृतेन पायसेन श्राद्धं कुर्यात् तथाञ्जलयहणात्मात
महश्राद्धं नित्यमाह। श्राद्धं नैवैकवर्गस्य त्रयोदश्यां तु पञ्चमेत। न तत्र ज्ञातव्यये यस्य ज्येष्ठा हिंसेतिति
त्रैत इति कार्ष्णाजिनिस्मरणात्। तानं च पितरो यत्र रुद्रपं तेते त्वमाता मह्यश्वदीत्यनेनैव पिद्धो नरारंभो
व्यर्थ इति वाच्यं। अस्मादेव ज्ञापकादन्यत्रानियमसिद्धेरित्यानिकारविज्ञानेश्वराभ्यामभ्युपगमात् कि
वसकलंकार्त्तिकीमांसरसवघृतेनापायसेन यः श्राद्धं दद्यात् सोऽक्षय्यमनन्तं लभतेऽपीति कालान्तरमपि त्र
मीष्वस्त्ये विधेतरमिदं रवेर्भगणकालविधिभेदप्रत्यायकं चकारात्तु पपत्तेः। द्वितीयपैवशाक
म्यावगतो सकलपदहर्शीतस्य पूर्णिमांतस्य वोपादानाय देशविशेषमध्याह प्राकृतायेतु जरस्य
गजस्य प्राक्छायो प्राग्विच्छायाया प्राक्छायाविभाषासनाघच्छाया शालानि शानामित्येनेनपाति
वीनष्टुसकता प्राक्छायाचापराह्णे भवति तत्रापि पितरो मधुपायसेन श्राद्धमिच्छंतिन्यायं काल

विशेषएवगजच्छायापर्यायः॥ हस्तिच्छायास्तुविधिवत्कर्णव्यजनवीजितमितिमारत्नीयकर्णव्यजनेति
विशेषणात्तूपपन्नः॥ ॥ इतिश्रीधर्माधिकारिरामपंडितात्मजनंदपंडितकृतौ विष्णुस्मृतिविवृतौ श्रीम
त्पांवैजयंत्यामष्टसप्ततितमोध्यायः॥७८॥ ॥ अथाद्येप्रकरणत्रेकोनाशीतितमध्यायेनाह॥ तत्रवर्ज्यो
दिकमाह॥ अथनक्तंगृहीतेनोदकेनश्राद्धंकुर्यात्॥१॥ अथैतत्प्रकरणजश्राद्धावायरांतरितेनज
लेनश्राद्धंनकुर्यात्॥ यद्यपिहृजाप्रकरणेहस्तमेवतथापितस्यनित्यप्रकरणस्थानानैमित्तिकस्य
प्ययोरश्राद्ध्यात्तस्यास्येतुनरारंभः गंगोदकंविनेतदिस्तुत्तमेव॥ अनेनाप्यदापिनिषिध्यते॥ ङ्गंगाद्विप्रक्तेनि
लंद्वारेपंकिलंपल्वलोदकं॥ नलभेद्यत्रगौस्तृप्तिंनतंयत्नेवगृह्यते॥ यत्तुसर्वार्थंस्तुतंस्पृष्टंयत्नाभो
म्यांनिपानजातंतद्वर्ज्यंसलिलंसर्वंसदैवश्राद्धकर्मणीतिमार्कंडेयोक्त॥ सर्वार्थमुक्तस्पृष्टंजपादि॥ डंशामादे
उशस्यानेकाशारवर्ज्यंवादद्यात्॥२॥ ॥ मुक्तकेशशिथिलीकृत्यरवानिर्जेणविवसनः॥ आदद्यात्पितृ

र्थेनपरन्तूं फट्सन्नतत्सक्ता। अष्टिन्नायानस्तुक्षायान्तूस्याश्चैव प्रमाणात इत्यादिस्मृत्यंतरेक्तलक्त
णक्कशाभावेन तत्सद्भावे कुशास्याकुशकार्यंकाशा इत्येवाविनिस्तुस्यात्। काशाभावे वल्वजाद्यास्याः। कु
शाभावे तु काशाः। स्युःस्मृदभावे तु वल्वजा इति स्मरणात्॥ ॥वासः सार्धकार्पासोत्थं सूत्रं॥३॥ कौशेयं क्षौम
कार्पासं दुकूलमहतं तथा। आहुः पवित्राणि देयानि कामानामात्रितिपुष्कलानि स्युः वासो। भावे तत्कार्यं का
र्पासंभवे सूत्रं देयं। कार्पासपत्नेन क्षौमादिसूत्रं निषिद्धं॥ ॥दशां विवर्जयेद्यग्रह्णहतवस्त्रं नास्यात्॥४
॥ ॥अहतवस्त्रोऽध्वाम विदशापातमागवर्जयेत्॥ अनेन दशाहरणां स्कंधोवेति शाङ्गांतरीया दशानिव
त्येते॥ ॥अनएवास्वलारेस्य संतरोत्कीर्णेनस्तां मक्कोवेति उगोधीन्यगंधीन्यांधीनिकंटदितानिर
क्तानि वस्तुष्ट्राणि॥५॥ ॥आख्यात मेतत्सूत्रावकरसोत्पत्तिवतेमकरणांतरस्मापणायावकारात्कंदंबवि
त्वपत्रं खकेत तद्विवद्गलं तथा। ववेरिकल्पषकापिष्माङ्कालेविवर्जयेदित्यादीनां ग्रह्यते। वर्जयेद

गीष्टस्यंतोयर्द्धयेदितिसंबंधःप्रतिज्ञस्तवमाह॥ ॥कुंकुमानितुगंधीनिचंदनादिकाल्पिंडलज्ञ
निरक्तान्यपिदद्यात्॥ सुगंधार्थमपिशब्दात्तुलसीशतपत्रंचंपकंगारजंतथैवच। मरुकंमल्लिकांचैवपु
ष्पाणांदत्तमष्टकमित्यादीनांग्रहणं॥ ॥वसांमेदंचवर्षापार्थेनदद्यात्॥७॥ वसामेदोमज्जाएवमर्थसादिपा
र्थेनदेयो। वकारात्सार्षपादितैलमपिउक्तमाह्वातिलतैलाद्भिन्नान्यद्द्यात्तुदीपकमितिस्मरणात्
॥घृतंतैलंतुदद्यात्॥ तैलंतिलोद्भवंवाकपर्दादेवधीरसं। घृतेनादीपोदातव्यस्तथावाप्याप
धीरसैरितिशौनकस्मरणात्॥ ॥जीवकंसर्जधूपार्थेनदद्यात्॥८॥ जीवकंनखशृंगादिसर्वेधूपशस्ता
यशस्ततयात्रिजं। घृतंनकेवलंदद्यात्किंतुघृतंवर्त्तिगुग्गुलंघृतंवर्त्तिगुग्गुलंघृतंचंदनरालंवसाज्यं
गुग्गुलधूपितमित्यादिवा॥ ॥मधुघृतसंयुक्तंगुग्गुलुंदद्यात्॥९॥ सघृतेनपोवापर्ययणां। रूरूपकं
गुग्गुलुंचैवघृताक्तंयुगपद्दहेदितिस्मरणात्॥ ॥चंदनकुंकुमकर्पूरागुरुपद्मकाननुलेपनं

र्थे॥१३॥ ऊर्द्ध्वमंके सरंपसकंपसकाछंशेषंप्रतिद्रूद्द्यात्॥ ॥न त्वल्पलवणं दद्यात्॥१४॥ ॥लव
णं विना पि पक्वे शाकादौ तत्संस्कारायअल्पलवणं नदेयं किंतु तत्रैव मेलयेत्॥ ॥हस्तेन च घृत व्यंज
नादि॥१३॥ घनीभूत घृतव्यंजनं च घृतादि शाकादि पायसादिकं हस्तेन न देयं किंतु दर्व्यादिना॥ ॥तैजसानि प
त्राणि दद्यात्॥१४॥ तैजसानि कांस्यताम्रादि॥ न पिंडादीनि॥ नायसान्यपि कुर्वीत पत्राणि न चैव हि॥ न च
पीतमयानीह शस्यंते च पुनर्मपीति मात्रा॥ पीयात्॥ ताम्रं पतितिविषयकं रेकवपीट के चैव शिलायां त
त्र भाजने॥ वटकौसुमपत्रेषु हस्तेषु वद्धि चराशिति शुद्धितो निषेधात्॥ ॥विशेषतो राजतानि॥१५॥
॥फलविशेषाय राजतानि पात्रेणि कार्याणि तानि च पित्र्ये दैवे तु दोषवर्णनि भो जयिने हे महत्पातिदै
वे पित्र्य यथाक्रममित्याभ्यात्॥ ॥खड्गकृतपकृतानि राजिनं निजसिद्धार्थकालं तानि च पवित्राणि रक्षोघ
नि च निदध्यात्॥१६॥ ॥खड्गः खड्गपात्रं कृतपो मध्याह्नाष्टघटिकाः॥ मध्याह्नः खड्गपात्रं वत्सामेषा

नकेवलारोग्यं दर्भाभिलाभावोदोहित्रः ऋतपाः स्मृताइति । कृष्णमृगाजिनः । तिलाः प्रसिद्धाः । सिद्धा
र्थोसर्षपाः । अक्षतायवाः चक्रा राहूपादिडपस्थलेस कृत्स्नानाहन्दशांसन्नोपकल्पयेत् । एवंतिलाद्
ष्टौकांस्यमापः शुद्धैः समाहृतः । पार्ग्रेराजततान्नपात्राणिछ्वः शमीमधुपुष्पंस्वपेंगंधादद्दे
मे द्रूह्वं चमे सणामितिस्मृत्यंतरात् । एतानिपवित्राणिरसोन्नानिश्चजाहीनीवक्ष्यमाणानिचक्रारहता
उच्छिष्टंशिवनिर्माल्यंवांतेवस्मृतकर्पटः । अष्टेसपवित्राणिदेहित्रः । ऋतपसिलारतिकाशीजिस्त
क्तानि । उच्छिष्टंपयः शिवनिर्माल्यंगोदकं । वांतंमधु । स्मृतकर्पटंकौशेयं । देहित्राउहितस्कृतः । हवि
र्वेद्रूस्मृगस्यललाटेयत्सहस्पते । तत्स्नेगस्ययत्पात्रेदेहित्रमितिकीर्त्तितमितिशातातपीयेया ।
अमावास्यागतेसोमेयत्तृणंगोभक्षयेदिति । तस्यागोर्यद्यद्भवेत्तस्मीरंतद्देहित्रस्तुदाहृतमितिस्मृत्यंत
रायेवाएतानिश्राद्धेप्रमोनिदध्यात् ॥ ॥ पिप्पलीमुकुंदकसूरकणाशिस्तुसर्षपश्वसासर्जकश्चद्वेच

कूष्मांडालाबुवार्त्ताकपालक्योपोदकीतंडुलीयकं कुसुंभं पिंडालुकं महिषीक्षीराणि वर्जयेच्छ्राद्धे ॥ पि
प्पलीकणातस्याश्विकल्पे ॥ पिप्पलीमरिचे चैव पटोलं बृहतीफलमिति वायवीये ॥ अप्युज्ञानात् ॥ मुकुंदकं कं
डुरः ॥ बिंबीफलमिति यावत् ॥ भूस्तृणोपत्रशाकविशेषः ॥ शिग्रुः शोभांजनः ॥ सर्षपः सिद्धार्थकः ॥ राजस
र्षपः ॥ स्वेदजं मेराजनं सर्षपमिति स्मरणात् ॥ सुरसा तुलसी ॥ सर्जको ऽर्जुनः ॥ अर्जक इति पाठे श्वेतपर्णासः
सुवर्चलेति ॥ वर्चला कूष्मांडं प्रसिद्धं ॥ अलाबुर्वर्तुलतुंबी ॥ वार्त्ताकं श्वेतं कृष्णं च ॥ श्वेतं कं श्वेत
वैकं मूलकं ॥ अलाबुवर्तुलाकारं भुक्त्वा सांतपनं चरेदिति देवलः ॥ स्मरणात् पालक्या गोगयः पत्रशाकं उ
पोदकी कलंबी तंडुलीयको ऽल्पमारिषः ॥ कुसुंभं महाराजनैतस्यपत्रशाकः ॥ उपोदकी कलंबी तंडुलीयको
ऽल्पमारिषः ॥ पिंडालुकं घुय्यानीति भाषायां महिषी निषिद्धोपलक्षणं ॥ आविकं मार्गमौष्ट्रं च सर्वमेकशफं
च यत् ॥ माहिषं चामरं पयो वर्ज्यं विजानतेति ब्रह्मांडात् ॥ पयोग्रहणात्तद्विकारणामपि निषेधः ॥ सर्वं

शस्त्रयद्दद्यात्तस्मात्माहिषेतुदधिपयसी। तंडुलीएकादानेत्समाहिषंचपयोदधीतिभारद्वाजीयात्तन घृतंमहि
षीणांघृतंग्राह्यः श्रेष्ठंनतुपयः क्वचिदितिसोमेश्वरः॥ ॥राजमाषमसूरपर्युषितकृतलवणानिच॥
१८॥ राजमाषाः श्वेतमाषाः मसूरी मंगल्यका॥ पर्युषितंभस्ममपिकृतंकृत्रिमलवणंचक्षाराख्याणिका
दीस्यात्कुलत्थाश्चणका। श्राद्धेतथानिष्पावकोद्रवाः कृष्णधान्यानिसर्वाणिवर्जयेत्तृणशिग्रुकाः। व
र्जयेत्तिलांश्चैवमुद्गमाषांस्तथैवचेतिस्मरणात्। कर्तुर्दिवार्मनाह॥ ॥कोपंचपरिहरेत्॥१९॥ ॥कर्त्रामो
क्षोपवर्जयेत्॥ ॥नाश्रुपातयेत्॥२०॥ ॥अश्रुपातोरोदनंतन्नकार्यं॥ ॥नत्वरांकुर्यात्॥२१॥ ॥अथभो
क्तृषुस्नानेकर्त्राभोजनेचभोक्ता त्वरानकार्या। परिवेषणादिपात्राण्याह॥ ॥हस्तादित्तानितैजसानिपा
त्राणिखड्गपात्राणिफल्गुपात्राणिचप्रशस्तानि॥२२॥ आदिशब्दाद्भोजनदधिपायसादिदानेतैजसानितैज
सानिताम्रपित्तलादीनिनलोहानि। कालायसंविशेषेणनिंदितंपितृकर्मणीत्यादित्यपुराणात्। पित्त

कर्मणीति सामान्योपादानात्पाकादिष्वपि निषेधः। न कार्दवित्स्य वेदन्नमयः स्थालीष्वपेत्तकां श्रय
सोऽदर्शनाद्देवपितरो विद्वैव निहितेति त्रैवा ग्मानात। अस्यापवादोऽपि तत्रैव। फलानां चैव शाकानां छेद
नार्थानि यानि ह्व। महानसेऽपि शस्त्राणि तेषामेवं तु सन्निविशेति। खड्गपात्राणि खड्गशृंगनिर्मितानि। फ
ल्गुपात्राणि दारुमयानि। एकत्र स्थापनार्थं तु शब्द्यते दारुजान्यपि। स्वर्णादीन्यपि कार्याणि यज्ञिये गृ
दारुभिरित्यादितीयार्थस्वकीयस्या कार्येषु पाते हणं ब्राह्मिस्तु परतोऽपवेदन्ना। निस्तु स्वात्तः पात्रे स्वस्ति
स्रुक्स्रुवविष्णुत्वयं। स्वर्णादि याज्ञतेषु न्मयेषु पिबा द्विजः। श्रद्धिवितिमे तथा तुपहते स्वाह
वैकृतोपयोगेष्वन्मयेषु नेष्टुकादिति। वैशाखपः। खादिरोडुंबराण्यपश्यं पात्राणि श्राद्धकर्मणि अ
प्यश्मन्मयानि सुरापिपर्यातुसानि वेति। उक्तार्थपमति माह। ॥अ ̄ नस्लोको भवति॥२३॥ ॥स्व
र्णातमेवाह॥ ॥सौवर्णराजताभ्यां च खड्गेनोडुंबरेण च। दत्तमक्षय्यतां याति फल्गुपात्रेण चाप्यथ॥

॥२७॥ ॥ श्वोड्डवरंतास्यां फल्गुपात्रं यज्ञियकाष्ठमयं ॥ शेषं प्रसिद्धं ॥ ॥ इति श्रीधर्माधिकारिरामपंडिता
त्मजनंदपंडितकृतौ विष्णुस्मृतिविवृत्तौ श्रीमत्यां वैजयंत्यामेकोनाशीतितमोऽध्यायः ॥ ॥ अथ द्व्यविशे
षणात्त्रिविशेषमशीतितमेऽध्यायेनाह ॥ ॥ तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलैः शाकैः श्यामाकैः प्रि
यंगुभिर्नीवारैर्मुद्गैर्गोधूमैश्च मासं प्रीयंते ॥१॥ ॥ तिलादिषु तृतीया यानेरपेक्षा वागमाद्व्यंतराभावेन
यदा तावन्मात्रेणाद्ध्रियते तदेदं फलं ज्ञेयं सर्वलिंगैः करणेत्त फलांतरं कल्प्यं तच्च जलमात्रेणाप्य
द्धं स्यात्तंतरैरभिहितं । तथा निबागवेद धार्मिकान्वापि विनिर्वपेत । तिलोदकैः पितृन्वापितामहं यो वि
धिरर्वकमिति । शाकैः । आ ह्रीये शेषवायवीयैः कालशाकं महाशाकं द्रोणशाकं तथार्द्रको बिल्वा
मलकं म्हद्दीका पनसं साम्रातक्रडिमान्नमपारेवतादेरवज्रुरं सकसेरुकमित्यादयः शेषं प्रसिद्धं ॥
द्वौ मासौ मत्स्यमांसेन ॥२॥ मत्स्याः सिंहतुंडकादयः सन्मासेन मासद्वयं ॥ ॥ श्रीब्रह्महारिणेनः ॥

॥ हरिणः कृष्णमृगस्तदीयं हारिणं तेन त्रीन्मासानेवं सर्वत्र ॥ चतुरोऽरभ्रेणेति ॥४॥ ॥ उरभ्रो मेषः
॥ पंचशाकुनेन ॥५॥ ॥ शकुनः पक्षी लावतित्तिरादिर्भक्ष्यः ॥ ॥ षड् छागेन ॥६॥ ॥ छागोऽजः ॥ ॥ सप्त रौ
रवेण ॥७॥ रुरुः शंबरः रौरवेण षष्ठ्यावितिमनुः ॥ ॥ अष्टौ पार्षतेन ॥८॥ पृषतो बिंदुमान्मृगः। पार्षतेने
ह सप्त वै हृति ॥ अष्टावेणेय मांसेनेति च मनुः ॥ ॥ नव गावयेन ॥९॥ ॥ गवयो गोसदृशो मृगः ॥ ॥ दश
माहिषेणेति ॥१०॥ ॥ महिषो वन्यस्तथा वन्यवाराहेणापि ॥ दश मासांस्तु तृप्यंति वराहमहिषामिषैरि
ति मानवात् ॥ ॥ एकादश तूपरेणाजेन ॥११॥ ॥ तूपरः शृंगहीनः। तथा शशकौर्मेणापि। शशकूर्मयो
र्मांसेन मासानेकादशैव तु इति मानवात् ॥ ॥ संवत्सरं गव्येन पयसा तद्विकारैर्वा ॥१२॥ ॥ श्व्येन गोसंभ
वेन मांसस्य मनिरासायाह ॥ पयसेति पायसेन पयसा गव्येनेत्युभयानुषंगः स्मरणात् । मांसपरत्वे पयसो नि
विशेषणात् यानि पिंडदानेऽप्येवमन्यपरावृत्तिः स्यात्। पयो दधि घृतं चैव गवां श्राद्धेषु पावनमिति

सौमं तत्वेनाभिन्नवाक्यतापन्नेस्तु तस्य पयसो विकारैर्दध्यादिभिस्तु संवत्सरं प्रीयंत इति प्रत्येकमन्व
यः।उक्तोर्थस्संप्रतिमाह॥ ॥अत्रापि पितृगीता गाथा भवति॥१३॥ ॥पितृभिरग्निष्वात्तादिभिर्गीता गाथा श्लो
कः।तामाह॥ ॥कालशाकं महाशल्कं मांसं वार्ध्रीणसस्य च।विषाणवर्ज्या ये खड्गा आसूर्यं तांस्मश्नु
ष्महे॥१४॥ ॥कालशाको दीर्घपत्रेति ख्यातः शाकविशेषः।महांति शल्कानि शकलानि यस्य स
महाशल्को मत्स्यविशेषः।वार्ध्रीणसमाह निगमः।त्रिपिबं त्विंद्रियक्षीणं श्वेतं वृद्धमजापतिं।वार्ध्री
णसमिति प्राहुर्याज्ञिकाः पितृकर्मणीति।पक्षिविशेषो वा कृष्णग्रीवो रक्तशिराः श्वेतपक्षो विहं
गमः।स एव वार्ध्रीणसः।प्रोक्त इत्येषा नैगमी श्रुतिरिति निगमात् तस्य मांसं।विषाणवर्ज्याः शृंगर
हिता ये खड्गास्तेषां चायावत्सूर्यं मलयं तं स्मश्नुमहे।खड्गारण्यो ह्यामिषादीन्।खड्गामिषं महाशल्कं
मधु मुन्यन्नमेव च।लोहामिषं कालशाकं मांसं वार्ध्रीणसस्य च।यद्ददाति गयास्थश्च सर्वमा

नंत्यमश्नुतइतियोगिस्मरणात्॥ ॥इतिश्रीधर्माधिकारिरामपंडितात्मजनंदपंडितकृतौविद्व
न्स्मृतिविवृतौश्रीमत्सांवैजयंत्यामशीतितमोध्यायः॥८०॥ ॥अथभोजनधर्ममेकाशीतितमा
ध्यायेनाह॥ ॥नान्नमश्नानमसानमशेषयेत्॥१॥ ॥अश्ननमासेहिकाग्न्यानोपुनर्वेदनेश्राद्धेगताव
गमनायातेनतद्दुष्येनशुद्धघ्नत्वादायमनेवसिंदुमाहवेशुणपमपीतिश्रेयं॥ ॥नपदास्ट
शेत॥ ॥मनुः॥ असंस्कृतप्रमीतानांत्यागिनांयोषितांकुलस्त्रियः।दास्यामितेभ्योविकिरमन्नंतास्व
स्वपेत्कमिति।उच्छिष्टेदेवतानामयाह॥ ॥उच्छिष्टंतराभ्यागतानांतिल्हरूपाटस्यवादासवर्गा
स्यततियेभागधेयंप्रचक्षते॥१२॥ ॥भोजनपात्रमेपातितमुच्छिष्टमकपटस्यावेवकस्य
दासीदासस्यसंहहस्यभागधेयंस्वर्वर्णयोवदंति।तथावमेवः।यजमानकुलेजातादासादास्योत्पन्नका
श्रिताः।तेसर्वेतत्समिमायांतुमयादत्तेनभूतलइति॥ ॥इतिश्रीधर्माधिकारिरामपंडितात्मज

नंदपंडितकृतौ विष्णुस्मृतिविवृतौ वैजयंत्यामेकाशीतितमोऽध्यायः॥ ॥८१॥ ॥अथ द्व्यशीति
तमेन श्राद्धानर्हान्ब्राह्मणानाह॥ ॥दैवे कर्मणि ब्राह्मणं न परीक्षेत॥१॥ ॥दैविके कर्मणि विशेषव
र्हेः सम्यगर्चने मनुनाप्युक्तमपि स्वेन विहिते ब्राह्मणो हरिहरजनकर्मणि ब्राह्मणपरीक्षा न कार्येन
दैविकमात्रे तु ल्लादानादौ परीक्षा ज्ञानविरोधात्तनापि श्राद्धांगे वैश्वदेविके श्रोत्रियायैव देया निष्कृ
कत्वा निदानमिति स्मृत्यन्तरपरीक्षाश्रवणात्॥ ॥प्रयत्नात्पित्र्ये परीक्षेत॥२॥ ॥श्राद्धे तु दैविके पै
त्र्यके योः प्रयत्नेन विप्रं परीक्षेत। दैवपित्र्यक्रियोर्द्वयोर्भास्करो मार्जवमाश्रितः। तस्य तृप्यंति पितरो देवता
श्च न संशय इति स्कांदात्॥ ॥हीनाधिकांगान्विवर्जयेत्॥३॥ ॥वृद्धकुष्ठिषंडत्वादिना हीनान्विशेषतो व
र्जयेत्॥ ॥विकर्मस्थांश्च॥४॥ ॥श्रुतिस्मृतिविरुद्धं कर्म विकर्म तत्र तिष्ठंतीति विकर्मस्थाः श्चकारात्स्मृ
त्यंतरोक्तान्सगोत्रप्रवरादींश्च न सगोत्रे हविर्दद्यात्समानप्रवरे तथा न चाज्ञातकुले दद्यात्कन्या

तथाहविरित्यपिस्मरणात्॥ ॥वैडालव्रतिकाश्चापा॥ ॥विडालस्येवव्रतंयेषांतेतथाधर्मध्वजीसदालु
ब्धः छाद्मिकोलोकदंभकः॥वैडालव्रतिकोज्ञेयोहिंस्रःसर्वाभिसंधकइतिमनूक्तलक्षणाः॥ ॥वृथालिंगि
नः॥६॥ ॥वृथाशास्त्रातिक्रमेणलिंगंसन्यासाश्रमचिह्नंयेषांतेवृथाश्रमिणइतियावत्‌वृथाउंडश्चज
टिलाः सर्वेकार्पटिकासंघ्यतिचयवीयत्॥ ॥नग्नजीविनः॥ ॥७॥नग्नाश्चतेजीवंतितेतथाज्योतिर्विदः॥ ॥
८॥ ॥देवलकाश्च॥८॥ ॥देवद्रव्योपजीवतिनः देवार्चनपरोविप्रोवित्तार्थीवत्सरत्रयं॥सवैदेवलकोना
महव्येषुगर्हितइतिस्मरणात्‌चकारात्स्तेनादयोग्राह्याः॥येस्तेनाःपतिताःक्लीबायेचनास्तिकवृत्तयः॥तान्हव्य
कव्ययोर्विप्राननर्हान्मनुरब्रवीदितिस्मरणात्॥ ॥स्मृतिसंग्रहेपि॥संवत्सरत्रयंकुर्यात्परार्थंदेवे
तार्चनं॥संवत्सरेणगायत्रीयण्मासैरुद्रमेवच॥अष्टावेवाह्निनैकेनसद्यःपातित्यमाप्नुयादितिदेवल
काः॥१०॥वेदपत्नीश्च॥ ॥कानीनाश्च॥११॥ ॥अनूढाकन्यातत्सुताः कानीनाख्याः॥ ॥तत्सुताश्च॥१२॥तेषांक

नीमांडकाः ॥ ११ ॥ ॥ वहूयाजिनः ॥ १२ ॥ ॥ वहून्येषयाजयंतितान् ॥ ॥ ग्रामयाजिनः ॥ १३ ॥ ग्रामयाजकाः

॥ ॥ शूद्रयाजिनः ॥ १४ ॥ शूद्रजातकाः ॥ ॥ अयाज्ययाजिनः ॥ १५ ॥ ॥ अयाज्याःपतितादयस्तेषांयाज

काः ॥ ॥ व्रात्याः ॥ १६ ॥ ॥ संस्कारहीनाः ॥ ॥ तद्याजिनः ॥ १७ ॥ व्रात्ययाजकाः ॥ ॥ पर्वकाराः ॥ १८ ॥ ॥ ष

ण्डुः शराणांसंधिसंस्कारात्पर्वणः शराणांकर्त्तीतिस[illegible] ॥ ॥ सूचकाः ॥ १९ ॥ राजसुपेशून्यवक्तारः ॥

भृतकाध्यापकाः ॥ २० ॥ भृतिहवीध्यापकाः ॥ ॥ भृतकाध्यापिताः ॥ २१ ॥ भृतिहवीध्यापिताः ॥ ॥ शूद्रान्न

पुष्टाः ॥ २२ ॥ ॥ निरंतरंशूद्रान्नभोजिनः ॥ ॥ पतितसंसर्गिणः ॥ २३ ॥ ॥ पतितामहापातकादयस्तैःसंसृष्ट

त इतितत्संसर्गाः ॥ आहैयौनेन्धसंबंधैःसंयोगंपतितैर्गतइतिस्मरणात् ॥ संसर्गिनिषेधात्पतितेनिषे

धार्थसिद्धवाकाणाः उन्मत्ताश्चंडालाश्चस्ततघ्नागुरुतल्पगाः ॥ ब्रह्मघ्नाश्वस्तुअपास्त्रेनगोघ्नाः

कितस्कारइति[illegible] ॥ आहपतितनिषेधः ॥ क्वचित्पिजायश्चिन्नेतदभावेसंभाषणादिनिषेधेनैवप्राप्ते

पि॰री
१४६

वता॥ ॥अनधीयानाः॥१४॥ येऽधीतामपि वेदं प्रत्यहं नाधीयते माता॥ ॥संध्योपासनवर्जिता रथ्या॥
सेध्यानासुपासनं कर्म त्यक्ता तया रहिता॥ यद्वा देशया उपासनेनाग्निपरिचरणेन च वर्जिता॥ ॥राज्ञ
सेवकाः॥२६॥ ॥राज्ञो भृतिं गृह्णति ना ज्ञाकारिणः॥ ॥नग्ना॥२७॥ ॥मलवत्त्रासः प्रभृती द्दशविधाम्
वैता॥ यद्वा ब्राह्मणाद्या श्वेता आवश्यकर्मदत्य तत्सुवं येन नग्नसंज्ञा हि हि न कर्मसु व्यस्थिता गतिर्वै
सर्वोक्ता न शीला॥ ॥निराकृतिः नानाः॥२८॥ धनार्थं पित्रा सह कलहं कुर्वंति पितृमातृपुत्रवीर्यस्वाध्या
यत्यागिनश्चेति॥२९॥ पितृवैरिणो न्यागो नाम पोषकाः॥ अग्न्यागोपरवरहतो वकाराहोरश्चिकादयश्चे
रश्चिको मानं दूषकः परस्त्रीपतिश्चथा॥ अत्तनिर्यांतकश्चैव वर्जनीयाः॥ अयत्नतस्मिन्स्मरणात्॥ उक्तानि
पेषेदेतु माहा॥ ब्राह्मणापसदाः स्पृतै कथिताः पंक्तिदूषकाः॥ एतान्विवर्जयेद्यत्नाच्छ्राद्धकर्मणि पंडितः
३०॥ ॥ब्राह्मणो मोपसदा वहिष्कृता अत एव पंक्तिदूषकाः कथिताः सर्वविधिभिः॥ एतान्नूपंडितो देवपङ्क्तः

सम॰
१४६

आद्वैशेषिकेनयत्नेनवर्जयेत्तदुनरेतत्कद्दोन्येषामपिस्मृत्यंतरनिषिद्धानांसंग्रहार्थं॥ ॥यथाहश
लेलायनः॥ अविद्धकर्णौयद्भुंक्तेलंवकर्णस्तथैवच॥ दग्धकर्णौश्चयद्भुंक्तंतद्वैरक्षांसिगच्छंतिलंवकर्णे
लंहलतमाहोमितेनः॥ हस्तस्थलादधःकर्णौलंवौवृथ्यरिकीर्तितौ॥ छेत्तुलेअंगुलेःसेतेनथातातप
त्रवोत्तरंतिइतिश्रीधर्माधिकारिरामपंडितात्मजनंदपंडितकृतौविष्णुस्मृतिविवृतौश्रीमत्यांद्व्यशी
तितमोध्यायः॥ ॥अथपंक्तिपावनान्त्र्यशीतितमेनाह॥ ॥अथपंक्तिपावनाः॥१॥ अनंतरंवक्ष्यमाणाःपं
पावनज्ञेयाः॥ ॥त्रिणाचिकेतः॥१॥ त्रिणाचिकेतचयनकृतवान्सोत्रिणाचिकेतः॥ त्रिणाचिकेतसंज्ञंय
जुर्वेदभागंतद्व्रतपूर्वकमधीतेसवा॥ ॥पंचाग्निः॥२॥ ॥सभ्यावसथ्याभ्यांसहेत्रेताग्निमानपंचाग्निर्विध
धापापावापंचाग्निरपवेकोवा॥ ॥ज्येष्ठसामगः॥३॥ ॥ज्येष्ठसामाख्यसामविशेषस्यगायकःसः॥ ॥वेदपा
रगः॥४॥ मंत्रब्राह्मणयोःपारंगच्छतीतिसः॥ ॥वेदांगस्यान्यतमस्यपारगः॥५॥ ॥शिक्षाकल्पोव्याक

करणं निरुक्तं छंदो ज्योतिषं चेत्येषां वेदांगानामन्यतमस्यापि पारगः ॥ पुराणेतिहासव्याकरणपारग
ः ॥८॥ पुराणं ब्राह्मादिः इतिहासो महाभारतादिः। व्याकरणं पाणिनीयादिः। अंगेषु आकरणो ज्ञातिशा
स्यमित्यपोन स्त्र्यो एषामन्यतमस्य पारगः ॥ ॥धर्मशास्त्रस्यापि कस्य पारगः ॥९॥ ॥सप्तपंचाशत्
स्मृतीनामन्यतमस्यापारगः ॥ तीर्थपूतः ॥८॥ तीर्थैर्गंगादिभिरन्तकृतैः पवित्रितः ॥ ॥यज्ञपू
तः ॥१०॥ यज्ञैरग्निष्टोमादिभिः पूतः ॥ ॥तपःपूतः ॥११॥ ॥तपसा चांद्रायणादिना पूतः ॥ ॥सत्यपूतः ॥१२
॥ सत्येन यथार्थवाक्येन पूतः ॥ ॥मंत्रपूतः ॥१३॥ ॥मंत्रैर्विष्ण्वादिदेवस्यैर्नित्यजप्यैः पूतः। वेदमंत्राणां
प्रागेवाभिधानात् ॥ ॥गायत्रीजपनिरतः ॥१४॥ तत्सवितुर्वरेण्यमित्यस्या जपे तत्परः ॥ ॥ब्रह्मदेयानु
संतानः ॥१५॥ ब्रह्मदेयं वेदाध्यापनं तद्रूपा दीप्तिं संतानपरंपरा यस्येति त्रिपुरुषाध्यापनपर्यन्तं यावत् ॥
॥त्रिसुपर्णः ॥१६॥ त्रिसुपर्णाख्यमृगंगविशेषमधीते सोऽत्र त्रिसुपर्णीपितिं स्मृतवान्वा ब्राह्मणस्तु

न्यसमाह॥ ॥ग...॥१७॥ उद्धितः पतिः॥ ॥दौहित्रस्त्रोत्रियश्चैव॥८॥ ॥उद्धितः पुत्रस्य प्रकाराद्वा गिनिय
दायः॥ स्वस्त्रीय ऋत्विक् जामातृ यास्य श्वशुरमातुः इति शब्दः अकारवचनः। एवं प्रकाराश्चान्ये भिक्षा इदा
नेपात्रं भवति॥ येतो चिकेत दौहित्र। शिष्य संबंधबांधवाः कर्मणि श्रेष्ठा स्वेपो निष्ठाः पंचाग्नि ब्रह्मचारिणः
।पितृपराश्चैव ब्राह्मणाः श्राद्धसंपद इति योगिस्मरणात्॥ ॥विशेषेण च योगिनः॥१९॥ ॥योगाभ्यास
निष्ठा विशेषेण भैक्ष्यः पात्रं भवति। चकारस्तेन्यापि ते पि वायवीये। गृहस्थानां सहस्रेण वानप्रस्थशतेन
वा ब्रह्मचारि सहस्रेण यतिरेको विशिष्यत इति। ते च त्रिदण्डिनः ब्रह्मलोके वर्णी मुण्डाश्च जटिलकाषाया र
जटिलकाषायान् श्राद्धकाले विवर्जयेत। शिखिभ्यो धातुरक्तेभ्यस्त्रिदण्डिभ्यः प्रदापयेत्। स्वोक्तेर्थे संम
तिमाह॥ ॥अपि स्मानां भवति॥२०॥ व्याख्यातं प्राक्तानामाह॥ ॥अपि स्मातुलं व्यादेशे गं
येषस्मायोगिनः। विप्रं श्राद्धे प्रयत्नेन येन तस्याम्नहे वयं॥२१॥ ॥अस्माकं कुले भूयाद् दौहित्रादि संततो

सकोपिभवेद्योयोगनिष्ठंविप्रंयत्नेनबुद्धिपूर्वकमानीयश्राद्धेभोजयेद्येनयोगिभोजनेनवर्यंतद्याम
हेतिशयितत्तद्भिमंतोभवे॥ ॥ ॥इतिश्रीधर्माधिकारिरामपंडितात्मनंदपंडितकृतौविष्णुस्मृतिवि
वृत्तौश्रीमत्सीवरीतितमोध्यायः॥ ॥८३॥ ॥अथचतुरशीतितमेनश्राद्धेवर्ज्यान्देशानाह॥ ॥नम्ले
च्छविषयेश्राद्धंकुर्यात्॥१॥ ॥वक्ष्यमाणलक्षणेम्लेच्छदेशेश्राद्धंनकुर्यात्॥प्रासंगिकमाह॥ ॥नगच्छेन्म्ले
च्छविषयं॥२॥ ॥तीर्थयात्रांविनाम्लेच्छदेशंनगच्छेत्‌यथादेवलः॥सिंधुसौवीरसौराष्ट्रांस्तथाप्रत्यंतवा
सिनः॥अंगकलिंगांध्रमगधान्गत्वासंस्क्रिया॥तीर्थयात्रांविनागच्छन्पुनःसंस्कारमर्हतीति॥विंच॥ ॥
परनिपानेभ्यःपीत्वातोयंतत्समोभवतीति॥३॥ ॥परेषांचातुर्वर्ण्यबहिर्भूतानांम्लेच्छानांनिपानेजलाश
येस्नात्वापीत्वावातत्साम्यंप्राप्नोति॥इतिशब्दोदेवानिधानामन्येषामपिकुंडलादीनांजलाशयेष्व
वंसाम्यंयावज्जीवाभ्यासविषयंसकृत्त्वामाम्नायमात्रमिदंबोक्तंज्ञेयंम्लेच्छादीनांजलंपीत्वापुष्प

रिण्यां झटेपि वा ज्ञानात्तु तदङ्गं प्रायश्चित्तीयमधमस्मादस्तु चिस्मृतात् ततो यं यः पिबेद्द्विजः कामतोकामतोपि
वा ।। अकामान्न तन्नभोजी स्याद्दहोरात्रं तु कामत इति । म्लेच्छदेशं लङ्घयति ।। चातुर्वर्ण्यव्यवस्थानं य
स्मिन्देशे न विद्यते । स म्लेच्छदेशो विज्ञेय आर्यावर्तस्ततः परः ।।८।। चातुर्वर्ण्यस्य विषमव्यवस्था यत्र
देशे नास्ति स म्लेच्छदेशो चातुर्वर्ण्यव्यवस्थानं कुशादीनामुपलक्षणं । तथा चादिपुराणे कृष्णसारो यत्र देशे
अनु वर्णाश्रमे तथा । स म्लेच्छो धर्मदेशः स्यादाश्रयरान्निपश्चित इति । एतोविहीनो म्लेच्छदेशाः इत्यभि
प्रायः अतोन्यस्तु द्वानार्यावर्त इति प्रासंगिकं लक्षणं वक्ष्यमाणं विभ्रथं मनुस्त्वन्यथाह । आसमु
द्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात् । तयोरेवान्तरं गिर्योरार्यावर्तं प्रचक्षत इति दूरं चलक्षणं कारणांतह्रातिन
देशविशेषागमनिषेधायत्तथाचारस्मरणे । आर्यावर्तनीमस्तु स्यान्नो द्विजो वा द्विजः ।। नर्मदां सिंधुपारं च
करतोयां न लंघयेत् । आर्यावर्तमतिक्रम्य विना तीर्थक्रियां द्विजः । आज्ञां चैव तथा पित्रोरैदं धेनाविशुध्यती

वि॰ टी॰
१४९

त्ति॥ इति श्रीधर्माधिकारिरामपंडितात्मजनंदपंडितकृतौ विष्णुस्मृतिविवृतौ वैजयंत्यां चतुरशीतितमोऽध्या-
यः॥ ॥८४॥ ॥अथ पंचाशीतितमेऽध्याये श्राद्धार्हदेशानाह॥ ॥अथ पुष्करेष्वक्षयं श्राद्धं॥१॥ अथेति श्राद्धार्हदे-
शप्रस्तावः॥ त्रीणि च पुष्कराणि तिस्र स्तानि ऽज्ज्वरवनं तेषां ज्येष्ठमध्यमकनिष्ठपुष्कराणीति संज्ञा भारते॥ प्र-
थमं ब्रह्मदैवत्यं द्वितीयं विष्णुदैवतं तृतीयं रुद्रदैवतं त्रयो देवा अधिष्ठिता इति॥ तेषु त्रिषु कृतं श्राद्धमक्षय्यं
भवति॥ प्रत्येकं श्राद्धे फलोक्तिरेकत्र वा प्रयोगे क्रमाह॥ ॥जप्यहोमतपांसि च॥२॥ ॥जप्यं मंत्रजप्यं होमस्तिला-
दिः तपश्चांद्रायणादि चकारात् दानं तत्र गास्विति शेषः क्षयं भवति किंतु॥ ॥पुष्करे स्नानमात्रेण सर्वपापेभ्यः पूतो
भवति॥३॥ एतेन पुनः पुष्करोपगमनेऽपि प्रत्येकस्नानेप्येतत्फलमुक्तं भवति वागमनाय मात्र श्राद्धे जपहोमादि
क्रियांतरनैरपेक्ष्याया उक्तामर्थमतिदिशति॥ ॥एवमेव गयाशीर्षे॥४॥ ॥पंचक्रोशं गयाक्षेत्रं क्रोशमेकं
गयाशिरः इति कल्पतरौ गयाशीर्षेप्येवमेव फलमवधेयमेवमग्रेपि॥ ॥वटे॥५॥ तत्रैवाक्षयवटे॥ ॥अ-

एस॰
१४९

६

अमरकंटकपर्वतः॥६॥ अमरकंटकेन तीर्थेनोपलक्षिते पर्वते मेकलभिधे विंध्यपादे पर्वते यत्स्नानं तीर्थांतरेष्वपि
भागेतुल्यफलतावगमाय॥ ॥वराहपर्वतः॥७॥ ॥वराहाकारे पर्वतविशेषे॥ ॥यत्र रेवनर्मदावरारेवातो
र्मातीरे॥८॥ तीर्थविशेषानादरेण नर्मदातीरमात्रे। तत्परिमाणां वक्तुरगो। उत्तरेन वाग्स्मृतिर्दर्शितो योस्
ताव यस्तुना यासीरपरी माला विशेषा नाम्ना नान्तट इत्युक्तो गंगा एव तीरं ज्ञेयं। पारतीरकर्मसमासाविति यातो
: सदन्दु ग्राहपरितो देवस्वेव मागस्य तीरत्वावगमत्त्र॥ ॥गंगायां विशेषः॥१०॥ ॥गंगायां पत्र काचन
द्वेन माह्नमन्य तीर्थं हि शेषतो नयो॥ ॥उशनवनं॥११॥ ॥उशा वनं त्र्यंबकगिरिस्थो गोदावरी प्रभवः
॥ ॥बिंडकः॥१२॥ ॥बिंडकोदक्षिणदेशस्थ तीर्थविशेषः। बिल्वक इति पाठे पितृवेवसः॥ ॥नीलपर्व
तः॥१३॥ ॥नीलपर्वत उत्कलदेशस्थः पुरुषोत्तमस्थाने॥ ॥कनखलः॥१४॥ ॥कनखलस्तुत्तरपर्वतस्य

त्रि·टी
१५०

वकस्थंत्र्यंबकस्थंवा॥ ॥कुशावर्ते॥५॥ ॥कुशावर्त्तःकोलदेशस्थंक्षेत्रंगंगाद्वारस्थंवा॥ ॥भृगुतुंगो॥६
॥ ॥भृगुतुंगोमरुकंटकसमीपस्थोविंध्यपादः॥ ॥केदारे॥७॥ केदारउत्तरपर्वतस्थः॥ ॥मलये॥८
॥मलयःपर्वतविशेषः॥ ॥नडंतिकानद्यामिषुकेष्वाश्रया॥ ॥सुगंधायां॥१०॥ सुगंधानदीसौगंधिक
वनसमीपस्था॥ ॥शाकंभर्यां॥११॥ ॥शाकंभरीदिल्लीस्थानेमरुदेशेयत्रलवणंभवति॥ ॥फल्गुतीर्थे॥१२
॥ ॥फल्गुतीर्थंगयास्थं॥ ॥महालयायां॥१३॥ ॥महालयोगालिकनंदः॥ ॥बिल्हलिकाग्रामे॥१४॥ ॥बिल्ह
लिकाग्रामेऽपिशाग्रामःतंबिल्हलिकाग्रामइतिवाणाः॥ ॥कुमारधारायां॥१५॥ ॥काश्मीरदेशेक्रौंचप
र्वतेकुमारशक्तिप्रहारेणजलधारानिर्गतास्मिन्नामाकुमारधारातस्यांदक्षिणास्तुद्वेइक्षुमतस्त्रेवा॥
प्रभासे॥१६॥ द्वारकासमीपेप्रभासतीर्थं॥ ॥सरस्वत्यांविशेषतः॥१७॥ तत्रप्रसववणमारभ्य
समुद्रसरस्वतीविनशनपर्यंतेयत्रकुत्रापिसरस्वत्यांआइंदुविशेषेणान्यतीर्थेभ्योऽल्प्यां॥यत्रक्षपनेतिपु

रा०म०
१५०

क्षत्रं हर्षस्य गंगायमुनयोरेवानुषंगो नोत्तरत्रेति ज्ञापनाय॥ ॥गंगाद्वारे॥१६॥ ॥गंगाद्वारं हरिद्वारं
हरिद्वारे वेति हरत्तु हरिद्वारे मोक्षद्वारं नतु परो गंगाद्वारं च केप्याहुः केचिन्मायापुरीं पुनरितिहा
सा॥ ॥प्रयागे॥१७॥ प्रयागे गंगायमुनासंगमस्थाने काशावतारद्वियोगे भिन्नप्रयागास्तेः गंगायमुनयो
र्योगे वियोगे चानुयंभवेदिति ज्ञानार्थः॥ ॥गंगासागरसंगमे॥ ॥यद्यपि सीता चालकनंदा च वक्षु
भद्रा चैकमादिति वत्सलाम अपि गमनो चतुर्थेपि सागरेषु चलार्थः संगमास्तथापि अत्र श्वेसागरम
गंगायोरेव संगमो विवक्षितो मनुष्यगम्यत्वात्॥ ॥सततं नैमिषारण्ये॥१८॥ नैमिषारण्येषु दशाव
स्थितेषु चेतन्त्रकालनविशेषणानादरेण॥ ॥वाराणस्यां विशेषतः॥१९॥ ॥वाराणसी काश्यंतर्गता नगरी
तस्यां देशकालविशेषानादरेण॥ ॥अगस्त्याश्रमे॥२०॥ ॥अगस्त्याश्रमः पुष्करसमीपे सरस्वतीती
रमहिमाने सरस्वत्याः अगस्त्याश्रमवर्णितो नाभिवति भारतात् दक्षिणदेशे स्वामिस्थाने वा॥ ॥[illegible]॥

३८॥ ॥वाएवाश्रमोमातिनीतरे॥ ॥कौशिकं॥ ३९॥ कौशिकसुत्तरपर्वतोद्भवा नदी॥ ॥सरस्वती॥ ४०॥ दृ
॥स्रयोष्मावाहिनी सरस्वती॥ ॥शोणस्य ज्योतिषा च संगमे॥ ४१॥ ॥शोणो नदो ज्योतिषा नदी
तयोः संगमो विंध्यमध्ये शोणज्योतीरथ्ययोरिति पाठे पि तत्रैव॥ ॥श्रीपर्वते॥ ४२॥ ॥श्रीपर्वतो दक्षिण
देशस्थः श्रीशैलो मल्लिकार्जुनस्थाने॥ ॥कालोदके॥ ४३॥ ॥कालोदकं यास्तुनन्दीर्थविशेषः॥ वा
मनपुराणे देवी विरहसंतप्तो महादेवो ऽभ्यागतः॥ ॥ततः स पातदेवेशः कालिंदीसरितां स्तुनेनिर्म
योकरोत्पादपद्मः कृष्णत्वमागता॥ ततः प्रभृति कालिंद्यादुदकं कालोदकमिति वर्ण्यते॥ ॥उत्तर
मानसे॥ ४४॥ ॥उत्तरमानसे कैलासे पर्वतस्थे॥ ॥वडवायां॥ ४५॥ ॥वडवा तीर्थविशेषो दक्षिणदे
शस्थः॥ ॥मतंगवाप्यां॥ ४६॥ [illegible]॥ ॥मतंगवापी गयादक्षिणभागस्था॥ ॥सप्तार्षे॥ ४७॥
॥सप्तार्षं सप्तर्षितीर्थं॥ ॥विष्णुपदे॥ ॥विष्णुपदं गयामध्ये स्थितं॥ ॥स्वर्गमार्गपदे॥ ४८॥ ॥

रम०

स्वर्गमार्गेरथमार्गइतिजदशानाहर्वभागेप्रसिद्धः॥ ॥गोदावर्यां॥४६॥ ॥गोदावरीगौतमानीतागंगा॥
॥गोमत्यां॥४७॥गोमतीनैमिषारण्यप्रभवानदी॥ ॥वेत्रवत्यां॥४८॥ ॥वेत्रवतीयहिछत्रगतानदी॥ ॥वि
पाशायां॥४९॥ ॥वितस्तायां॥५०॥ ॥शतद्रुतीरे॥५१॥ ॥चंद्रभागायां॥५२॥ ॥इरावत्यां॥५३॥ ॥सिंधोस्तीरे
॥५४॥ ॥विपाशाद्याःपंचनद्यःसिंधुनदेषष्ठाःकुरुक्षेत्रसन्निधिमदेशेपंचनदमितिप्रसिद्धाः॥ ॥दक्षि
णेपंचनदे॥५५॥ ॥कृष्णावेणातुंगभद्राकोणानांपंचानांनदीनांसमाहारदेशः॥ ॥अमरके॥५६॥ ॥अमर
कंटकंदक्षिणदेशस्थतीर्थंनामानंत्येनप्रत्येकवचनाशक्त्यातिदेशमाह॥ ॥एवमादिष्वथान्येषु
तीर्थेषु॥५७॥ ॥अथेषूक्तातिरिक्तेष्वेवमाकारकेष्वन्येष्वपितीर्थक्षेत्रेषुग्राममठपुरादिषुआद्यमन्त्रयंज्ञेयं॥
सरिद्वरासु॥५८॥ ॥अन्यास्वपितापीपयोष्णीजेडवादिषुनदीश्रेष्ठासु॥ ॥सर्वेष्वपिजन्मवेश्मसु॥५९॥
स्वभावारस्तुनाथश्रीकृष्णादीनांजन्मस्थानानितेषुसर्वेष्वपि॥ ॥पुलिनेषु॥६०॥ ॥पुलिनानिसैक

तानि॥ ॥प्रस्रवणेषु॥८३॥ ॥प्रस्रवणानि निर्झराः॥ ॥पर्वतादिष्वादयः॥ ॥निकुंजेषु॥८४॥ नि
कुंजा वृंदावनवर्त्तीनि भगवत्क्रीडास्थानानि लतागृहाणि॥ ॥वनेषु॥८५॥ ॥वनानि वृंदावनतालव
नमधुवनादीनि द्वादश॥ ॥उपवनेषु॥८६॥ ॥वाराणस्यादिपरिसरभवेषु हरिकेशवनादिषु गोमये
नोपलिप्तेषु गृहेषु॥८७॥ ॥गोमयोपलिप्ते विविक्ते गृहाणामेव विशेषणं न पृथग्विशेष्यं गृहं मार्जन
लेपनादिति संस्कारात्॥ अन्यथा निषिद्धदेशे छातिप्रसंगात्॥ ॥मनोरमेषु॥८८॥ ॥मनोज्ञास्तुलसी
बिल्वरादयः उक्तेभ्योन्यत्र स्मृतिमाह॥ ॥अन्नं चापि हि पीतं गयायां भवति॥८९॥ एतदर्थं तामाह॥ ॥कु
लस्याकं संतजंतुः॥ यो धनोयवजलो जलौघनदीषु वहंतो या शुशीतला ग्राविशेषणं॥९०॥ ॥ज
लौजली रतपंतास्ता वहंतोयानि लंबवाहाः शीतला हिमवत्संभवाः॥९१॥ ॥अपि जायेत सो
स्माकं कुले कश्चिन्नरोत्तमः॥ गयाशीर्षे वटे श्राद्धं यो नः कुर्यात्समाहितः॥ ॥९०॥ ॥गयाशीर्षे

ह्यस्तुकेतत्रचयोवशेत्सघसंज्ञसत्रत्र्चः॥ किंच॥ ॥एष्टव्याबहवःपुत्रायद्येकोपिगयांव्रजेत्॥ यजेतवाश्व
मेधेननीलंवावृषमुत्सृजेत्॥७॥ ॥बहूनांपुत्राणांमध्येएकेनापिगयायांश्राद्धकरणेपितत्स्तुतिर्भवत्येवेत्य
वगमपितुबहूपुत्राणांसनोंतत्रचाधिनेत्रानामप्यधिकारः एष्टव्याबहवःपुत्राःशीलवंतोगुणान्विताः ते
षोवैसमवेतानांयद्येकोपिगयांव्रजेदितिश्रीज्ञातायपुष्यश्वमेधःस्याद्यस्यैवेतिनस्वंवर्णपितत्साध
रणमिदमाश्वसन्नृत्यापिदिअपित्वणसवैवर्णसाधारणत्वेनतत्संततौक्षत्रियाणामपिसंभवान्नंदमिप्राय
मिदमिदमित्यवधेयंनीलोनंतरंवक्ष्यमाणलक्षणःतंवक्ष्यमाणविधिनावोत्सृजेदितिक्षत्रियमपिप्रत्येवं
स्तुतिहेतुः॥ ॥इतिश्रीधर्माधिकारिरामपंडितात्मजनंदपंडितकृतौविष्णुस्मृतिटीकायांवैजयंत्यांपंचा
शीतितमोध्यायः॥८५॥ ॥षडशीतितमेनवृषोत्सर्गमाह॥ ॥अथवृषोत्सर्गः॥१॥ ॥अथेतिश्राद्धप्रक
रणविच्छेदः वृषोत्सर्गोवक्ष्यतेतत्रकालमाह॥ ॥कार्तिक्यामाश्वयुज्यांवा॥२॥ ॥कार्तिक्याःश्विन्यावा

वृ. दी.
१५३

युक्तायां पौर्णमास्यां कृत्तिकादियोगः संभवति प्रायेण । तामस्यां माघ्यापि यथा मास्यो कार्तिकामाश्वयु
ज्यो वा माघ्या पार्वण्यथापि वा । फाल्गुन्यां वापि चैत्र्यां वा वैशाख्यां वा तथैव च । वैधृतौ वा व्यतीपाते मन्वादिषु यु
गादिषु । दिनच्छिद्रे वा संक्रान्तौ सम्यक्तत्रैव चन्द्रमाः । तत्रापि ग्रहणे चन्द्रसूर्ययोः । अयनद्वितये चैव
विषुवद्वितये तथा । अष्टकासु एकादशाहे । एकादशाहे नित्यो ऽन्यत्र काम्या । ए
कादशाहे प्रेतस्य यस्य नोत्सृज्यते वृषः । प्रेतत्वं सुस्थिरं तस्य दत्तैः श्राद्धशतैरपीति स्मरणात् । एवं यथोक्त
विधिना वृषमानीतं समुत्सृजेत् । यावन्ति रोमाणि तस्य तावद्युगसहस्राणि स्वर्गलोके
महीयते इत्यादि फलश्रवणात् ॥ ॥१॥ ॥ आदौ कर्मोपक्रमात् । एवं का
रणकर्मभक्ष्य तामाह ॥ ॥ जीववत्सायाः पयस्विन्याः ॥४॥ ॥ जीवन्तौ वत्सौ यस्याः नेन
पुंवत्सत्वमप्युक्तं । पयस्विनी तस्याः पुत्रमध्ये ॥ ॥ सर्वलक्षणोपेता ॥५॥ ॥ नष्टं तत्र इति लक्ष

रामः

णान्येतानितैः सर्वैर्युक्तं तेन गंगनिर्हृतिः। लक्षणानि समासेन वक्ष्येनोः श्रुतं परीक्षेत तद्रूपलक्षणान्वितांच
क्रस्कंधं सकलं कुर्दे श्रोत्रता यांत कंवलं। महः कटितटस्कंधं चेहेधमणिप्रभिमं। सुश्रृंगं गंडवृंदं ष्वेव
रललक्षणावालविमिति॥ ॥नीलाद्दी॥ नीलः सर्वेश्वतः। सव्वाहमणीजातिः। [illegible] वानुवर्णपरीक्षेत
आसाणादिप्रभेदतः। श्वेतवर्णो [illegible]वर्णो भवेद्विप्रो लवाम्लत्ताहितैः क्षत्रियः स्मृतः। पीतवर्णो भवेद्वैश्यः कृ
ष्णः शूद्रो बुधैः स्मृत इति तेषामवस्थापितदेवाय यावर्णा समुत्सृज्यावर्णोक्त ब्राह्मणादिभिरिति॥ अथे
वलक्षणांतरोपेतस्य नीलस्य मणुक्तं तन्नैवाय कृष्णश्वेतनवर्णेन कृष्णः ड्डंडे सुवेधुरे इन्द्रनीलनिभः। भृंगने
त्रनिलः पंचवर्णां कप्लतिपंचसुनेत्रवर्णायस्येति यावत्। पंचवर्णा यस्येति लक्षणांतरं वा। लक्षणांतरं वा
। लक्षणांतरमपि तन्नैवाशफश्रृंगनयनश्वेतवर्णो भवेद्यदि। शापेः अवालसहस्रानाशिध्यन्ततरसत
रीता॥ ॥लोहितवासुदेवतनद्वपादश्रृंगमंजुलोः॥ ७॥ ॥सुवाद्यश्रृंगसंपुलं लोहितवर्णं वा। अन्येलतमवन

न्माह्न। लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः। श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यत इति। सोऽनवी
यात। मात्स्ये तु लक्षणान्तरमपि। सर्वाङ्गलोहितो यस्तु पृष्ठे पुच्छे तु कापिलः। ललाटे कोपितः सर्वे नीलः स्मृतो
बुधैरिति॥ अस्य च सर्ववर्णसाधारण्यात्पश्चादुपन्यासः। तथा च मात्स्ये। अथवा सर्ववर्णस्तु सर्वेषामेव शस्य
त इति। वाशब्दाल्लक्षणान्तरमपि यासां। नीलं वकुं कपिलः कांस्यपिङ्गलं लोहितं वा नीलवृत्तस्यायाः यथास्विन्ना
ः पुच्छे द्विहायनवोत्सृज्येदिति। अत्र विस्मरणात्। मात्स्ये विधिः। अन्यः कपोतवर्णो यो यस्य मणिनिभेक्षणः। यस्योमा
ङ्गारपादश्च यस्य शिरसि संनिभः। एकवर्णो द्विवर्णो वा सर्वः कापिल एव वा। एवंविधो वृषो मोक्तव्यो नवधाऽयो
गृहे मेवेदिति॥ ॥ वृषस्याकादर्कौ॥ ८॥ गोपृष्ठस्याङ्कदर्कं निषेक्तारं॥ ॥ ततो गवां मध्ये तु समिद्धमग्निं परिस्त
र्य पौलेय चरुं पयसा श्रपयित्वा पूषा गा अन्वेतु न इहरतिरिति च हुत्वा वृषमयस्कारः स्थकयेत॥ ९॥ ॥ ततः प
रिधानं तद्गवां मध्ये गोष्ठ इति देशविधिः। गृहे गोष्ठे तथा तीर्थे पुण्ये ह्रदे शिवालये इति मात्स्यात् ततनवकाइ

मेऽप्यविधानमात्स्यादेवंतथोस्तुसमिद्धंप्रज्वलितमग्निंलौकिकेकंदेवंप्रतिसीर्यस्वदेवताकंनिर्वापयोरा॥
हूर्वकंस्थालीपाकतंत्रेणोपयासिवसंख्यवधित्वाघाराज्यभागौहुत्वाप्रधानाग्नेऽन्वेतुनऽइत्यादिसितिचद्वाभ्या
माहुतिद्वयंहुत्वानंतरंस्विष्टकृदादिहोमंकृत्वा।तुशब्दोक्तनेहोमकर्तुर्यजमानस्यार्थः।अन्यथात्वानिर्देशनायस्या
